Institut Français de Pondichéry

Collection Indologie - 100.3

Rashtriya Sanskrit Sansthan

संस्कृतवर्षस्मृतिग्रन्थमाला - ८

शाब्दबोधमीमांसा

ŚĀBDABODHAMĪMĀṂSĀ

AN INQUIRY INTO INDIAN THEORIES OF VERBAL COGNITION

सुबन्तपदार्थविचारात्मकः तृतीयो भागः

PART III - NOMINAL STEMS AND THEIR SIGNIFICANCE

By

N.S. RAMANUJA TATACHARYA

with the collaboration of

F. GRIMAL

and S. LAKSHMINARASIMHAM

शाब्दबोधमीमांसा

ŚĀBDABODHAMĪMĀṂSĀ

An Inquiry into Indian Theories of Verbal Cognition

सुबन्तपदार्थविचारात्मकः तृतीयो भागः

Part III - Nominal Stems and their Significance.

COLLECTION INDOLOGIE – 100.3
संस्कृतवर्षस्मृतिग्रन्थमाला – ८

शाब्दबोधमीमांसा

ŚĀBDABODHAMĪMĀṂSĀ

An Inquiry into Indian Theories of Verbal Cognition

सुबन्तपदार्थविचारात्मकः तृतीयो भागः

Part III - Nominal Stems and their Significance.

By

N.S. Ramanuja Tatacharya

INSTITUT FRANÇAIS DE PONDICHÉRY
RASHTRIYA SANSKRIT SANSTHAN

Publisher : –

Dr. C. Giri
Registrar
Rashtriya Sanskrit Sansthan
Deemed University
56-57, Institutional Area
Janakpuri, New Delhi - 10058
India

Project Co-ordinator

Dr. Prakash Pandey
Assistant Director

Price : Rs. 250.00

© Institut français de Pondichéry, 2006 (ISSN 0073-8352)
© Rashtriya Sanskrit Sansthan, New Delhi (ISBN 81-86111-35-2)

Typeset by: Mrs. T.V. Kamalambal (IFP)
Cover: Sarasvatī.in the.Bṛhadīśvara.temple, Tanjavur; Photo: IFP
Cover design: N. Ravichandran (IFP)

Printed in India by: Graphic World, 1659, Dakhani Rai St.
Darya Ganj, New Delhi-110002. Ph. 91-011-23274374, 9811025848
email: graphicworld@rediffmail.com

NOTE

The present volume is the third of a series of four. The following volume will be:

Volume IV: Verbs and Verbal Suffixes: their Significance

This work by Professor N.S. Ramanuja Tatacharya is a result of the programme "Indian Analysis of the Sanskrit Language and Literature" carried out at the French Institute of Pondicherry and the Centre of the Ecole française d'Extrême-Orient in Pondicherry.

Dr. F. Grimal,
Head of the programme

CONTENTS

Overview of the work i

Acknowledgements v

Abbreviations vii

Introduction १-३५

Detailed table of Contents ३७-५१

Text of Śābdabodhamīmāṃsā **1-422**

1. Śabdārthasambandhavicāraḥ 1-115
2. Padārthavicāraḥ 117-219
3. Nipātārthavicāraḥ 221-298
4. Samāsārthavicāraḥ 299-396
5. Taddhitārthavicāraḥ 397-414
6. Kṛdarthavicāraḥ 415-422

Appendix **423-456**

Bibliography 425-437

Index of śloka-s 439-444

Index of examples 445-448

Index of definitions 449-450

Index of notions 451-456

शाब्दबोधमीमांसाग्रन्थस्य संक्षिप्तपरिचयः

शब्दजन्यो बोधः शाब्दबोधः इत्युच्यते। आप्तवाक्यं शब्दः। अथवा अनाप्तानुक्तं वाक्यं शब्दः। प्रमाणेषु मध्ये शब्दस्य महत्त्वमस्ति। सर्वेऽपि लौकिकाः परीक्षकाश्च शब्देनैव व्यवहारं प्रवर्तयन्ति। अतो वाक्यस्वरूपं वाक्यप्रतिपाद्यार्थस्वरूपं वाक्यार्थबोधे प्रधानकारणस्य सहकारिकारणस्य च स्वरूपमवश्यं ज्ञातव्यं भवति। तथा वाक्यं पदसमूहात्मकम्। पदं च नामाख्यातोपसर्गनिपातभेदेन चतुर्धा यास्केन विभक्तम्। तत्र सुबन्तं नाम। तिङन्तमाख्यातम्। सुबन्ते प्रकृतिः प्रत्ययश्चेति अवयवद्वयमस्ति। तिङन्ते धातुः तिङ् चेति अवयवद्वयमस्ति। सुप्प्रकृतौ अव्युत्पन्नप्रातिपदिकं, कृदन्तं, तद्धितान्तं, समासः, ङ्यन्तमाबन्तं चान्तर्गतम्। तत्र प्रकृतीनां प्रत्ययानां च अर्थाः तेषां परस्परमन्वयप्रकारश्च ज्ञातव्या भवन्ति। एतत्सर्वमधिकृत्य शाब्दबोधनिरूपणपरग्रन्थेषु निरूपणमस्ति। तत्र व्याकरणशास्त्रे वाक्यपदीय-भूषणसार-लघुमञ्जूषाग्रन्थाः, न्यायशास्त्रे मणिग्रन्थस्थशब्दखण्ड-शब्द-शक्तिप्रकाशिका-न्यायकौस्तुभ-व्युत्पत्तिवाद-पदवाक्यरत्नाकर-विभक्त्यर्थनिर्णयाः, मीमांसायां भाट्टचिन्तामणि-श्लोकवार्तिक-शास्त्रदीपिका-मीमांसाकौस्तुभादयो ग्रन्था अपि निर्देशमर्हन्ति। उक्तग्रन्थेभ्यः तत्तच्छास्त्रप्राचीनग्रन्थेभ्यश्च विषयसंकलनं कृत्वा विमर्शपूर्णः शाब्दबोधमीमांसात्मकः ग्रन्थश्चिकीर्षितः। अयं ग्रन्थः भागचतुष्टयरूपः। तत्र प्रथमो भागः वाक्यवाक्यार्थविचारात्मकः भवति। द्वितीयो भागः सुबर्थविचारात्मकः। तृतीयो भागः सुबन्तपदार्थविचारात्मकः। चतुर्थो भागः धात्वाख्यातार्थविचाररूपः। तत्र प्रथमभागः वाक्यवाक्यार्थविचाररूपः २००५ वर्षे प्रकाशितः। सुबर्थविचाररूपः द्वितीयभागः अचिरात् प्रकाशितः। अधुना सुबन्तपदार्थविचारः तृतीयभागरूपेण प्रकाश्यते। उपरिनिर्दिष्टभागस्थाः सर्वे विषयाः पूर्वनिर्दिष्टग्रन्थेभ्यः तत्तच्छास्त्रप्राचीनग्रन्थेभ्यः द्वैताद्वैतविशिष्टाद्वैतवेदान्तग्रन्थेभ्योऽपि यथालाभं संगृहीताः।

सुबन्तपदार्थविचारात्मकस्य तृतीयभागस्य संक्षिप्तं स्वरूपम्

सुबन्तपदार्थविचारात्मकेऽस्मिन् तृतीयभागे नाम्नामर्थो विचार्यते। अत्र नामपदेन सुप्प्रकृतिभूताः शब्दाः विवक्षिताः। सुपः "ङ्याप् प्रातिपदिकात्" इति सूत्रेण ङ्यन्तात् आबन्तात् प्रातिपदिकाच्च परतया विहिताः। ङ्यापः अपि प्रातिपदिकात् परतया विहिताः। प्रातिपदिकसंज्ञा च "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्", "कृत्तद्धितसमासाश्च" इति सूत्राभ्यां विहिता। "चादयोऽसत्त्वे" "प्रादयः" इति सूत्राभ्यां चादीनां प्रादीनां च निपातसंज्ञा विहिता। "स्वरादिनिपातमव्ययम्" इति सूत्रेण स्वरादीनां निपातानां च अव्ययसंज्ञा विहिता। "अव्ययादाप्सुपः" इति सूत्रेण अव्ययात् परेषां सुपां लुग्विधानसामर्थ्यात् अव्ययानां सुप्प्रकृतित्वमवगम्यते। तथा च अव्युत्पन्नानामर्थवतां शब्दानां कृदन्तानां तद्धितान्तानां समासानां च प्रातिपदिकसंज्ञकत्वात् तेषां, अव्ययान्तर्गतानां चादीनामुपसर्गाणां निपातानां च सुप्प्रकृतिभूतानामर्थः अस्मिन् तृतीयभागे विचार्यते।

तत्र आदौ नामभिरर्थाः प्रतिपादनीयाश्चेत् कंचित् संबन्धं पुरस्कृत्यैव प्रतिपादनीया इति प्रथमतः शब्दार्थसंबन्धविचारः प्रस्तूयते। ततः स संबन्धः शक्तिलक्षणादिरूप इति शक्तिलक्षणादीनां विचारः क्रियते। ततः जातिशब्दानां गुणशब्दानां च कुत्र शक्तिरिति विचार्यते। ततो रूढियोगरूढ्यादिशक्तिभेदाः लक्षणाप्रभेदाश्च निरूप्यन्ते। तदनन्तरं क्रमशः निपातार्थविचारः, समासार्थविचारः कृत्तद्धितार्थविचारश्च प्रस्तूयत इति अस्य तृतीयभागस्य संक्षिप्तं स्वरूपम्।

कृतज्ञतानिवेदनम्

यथा प्रथमद्वितीयभागयोः न्यवेदयं तथा पाण्डिच्चेरिस्थ-फ्रेञ्च्-इन्स्टिट्यूट् अनुसन्धानशाखायां प्राजेक्ट्-रूपेण शाब्दबोधमीमांसाख्यग्रन्थनिर्माणमङ्गीकृत्य भागचतुष्टयरूपेण तं ग्रन्थं नानाशास्त्रग्रन्थेभ्यो विषयसंकलनपूर्वकं व्यरचयम्। अस्य महतः कार्यस्य निष्पादने मूलकारणभूतेभ्यः, तदा तदा आलोचनादातृभ्यः डा. ग्रिमाल्-महोदयेभ्यः प्रथमं कृतज्ञतामाविष्करोमि।

अस्य ग्रन्थस्य वाक्यवाक्यार्थविचारात्मकः प्रथमो भागः २००५ फर्वरीमासे, सुबर्थविचारात्मको द्वितीयो भागः २००६ अगस्तमासे च लोकार्पणीकृतः। अधुना सुबन्तपदार्थविचारात्मकः तृतीयो भागः प्रकाश्यते। इत्थमेतद्ग्रन्थस्य भागशः प्रकाशनाय सर्वविधव्यवस्थां कृतवद्भ्यः फ्रेञ्च्-इन्स्टिट्यूट् निदेशकेभ्यः डा. मुल्लर्-महोदयेभ्यः कार्तज्ञ्यं प्रकटयामि।

एवमेतेषां भागानां मुद्रणाय द्रविणप्रदानादिना उपकृतवत्सु राष्ट्रियसंस्कृत-संस्थानस्य कुलपतिषु प्राच्यप्रतीच्यशास्त्रनिपुणेषु प्रो. वेम्पटि. कुटुम्बशास्त्रिषु हार्दं कृतज्ञतावाकं वच्मि।

अस्य तृतीयभागस्य यथापूर्वं शोधनपूर्वकं गणकयन्त्रे मुद्रणे, विषयसूच्यनु-बन्धादिनिर्माणे च साहाय्यं कृतवद्भ्यः विद्वद्भ्यः डा. लक्ष्मीनरसिंहमहोदयेभ्यः कृतज्ञतानिवेदनपूर्वकं मङ्गलमाशासे।

अन्ते पुनरेकवारं साक्षात् परम्परया चात्र कर्मणि उपकृतवद्भ्यः सर्वेभ्यः स्वीयां धन्यतामाविष्करोमि।

एन्. एस्. रामानुजताताचार्यः

संकेताक्षरसूची

अ.व्या.	अनुव्याख्यानम्
अ.व्या.व्या.न्या.सु.	अनुव्याख्यानव्याख्या न्यायसुधा
अ.को.	अमरकोशः
अ.सं.	अर्थसंग्रहः
अ.स.वि.	अरुणाधिकरणसरणिविवरणी
आ.श्रौ.	आश्वलायनश्रौतसूत्रम्
ऋजु.	ऋजुविमला
क.त.	कल्पतरुः
क.प.	कल्पपरिमलः
का.	कारिकावली
का.आ.	काव्यादर्शः
का.प्र.	काव्यप्रकाशः
का.प्र.व्या.वि.	काव्यप्रकाशव्याख्याविवरणम्
का.प्रदी.	काव्यप्रदीपः
कु.सं.	कुमारसंभवः
खं.खं.खा.	खण्डनखण्डखाद्यम्
ग.सू.	गणसूत्रम्
ग.	गादाधरीयम्
ग.अव.	गादाधरीयम् अवयवः
ग.व्यु.का.	गादाधरीयः व्युत्पत्तिवादः, कारकम्
गू.त.	गूढार्थतत्त्वालोकः
चि.अव.	चिन्तामणिः अवयवः
जै.सू.	जैमिनिसूत्रम्
जै.न्या.वि.	जैमिनीयन्यायमालाविस्तरः
कणिका.	तत्त्वकणिका
त.चिं.म.	तत्त्वचिन्तामणिः
त.चिं.म.व्या.मा.	तत्त्वचिन्तामणिव्याख्या माथुरी
त.चिं.म.व्या.माथुरी.	तत्त्वचिन्तामणिव्याख्या माथुरी
त.चिं.म.व्या.प्र.	तत्त्वचिन्तामणिव्याख्या प्रकाशः

त.चिं.म.व्या.रहस्यम्.	तत्त्वचिन्तामणिव्याख्या रहस्यम्
त.प्र.	तत्त्वप्रदीपिका
त.बिं.	तत्त्वबिन्दुः
त.मु.क.	तत्त्वमुक्ताकलापः
त.र.	तत्त्वरत्नाकरः
त.वै.	तत्त्ववैशारदी
तं.वा.	तन्त्रवार्त्तिकम्
त.कौ.	तर्ककौमुदी
त.तां	तर्कताण्डवम्
त.प्र.	तर्कप्रकाशः
त.भा.	तर्कभाषा
त.सं.	तर्कसंग्रहः
त.सं.दी.	तर्कसंग्रहदीपिका
ता.टी.	तात्पर्यटीका
ता.टी.प.	तात्पर्यटीकापरिशुद्धिः
तै.सं.	तैत्तिरीयसंहिता
दी.व्या.रा.	दीपिकाव्याख्या रामरुद्रीयम्
द्र०	द्रष्टव्यम्
नि.भा.	निरुक्तभाष्यम्
नि.	निरुक्तम्
नी.प्र.	नीलकण्ठप्रकाशिका
नृ.प्र.	नृसिंहप्रकाशिका
नैषध.	नैषधीयचरितम्
न्या.कं.	न्यायकन्दली
न्या.कु.	न्यायकुसुमाञ्जलिः
न्या.को.	न्यायकोशः
न्या.कौ.	न्यायकौस्तुभः
न्या.परि.	न्यायपरिशुद्धिः
न्या.बो.	न्यायबोधिनी
न्या.भा.	न्यायभाष्यम्
न्या.भू.	न्यायभूषणम्
न्या.मं.	न्यायमञ्जरी

न्या.र.मा.	न्यायरत्नमाला
न्या.रत्ना.	न्यायरत्नाकरः
न्या.ली.	न्यायलीलावती
न्या.वा.ता.टी.	न्यायवार्त्तिकतात्पर्यटीका
न्या.वा.	न्यायवार्त्तिकम्
न्या.सि.मं.	न्यायसिद्धान्तमञ्जरी
न्या.सु.	न्यायसुधा
न्या.सू.	न्यायसूत्रम्
प.वा.र.	पदवाक्यरत्नाकरः
प.त.नि.	पदार्थतत्त्वनिर्णयः
पा.सू.	पाणिनिसूत्रम्
पूर्वपक्षे	ग्रन्थस्य पूर्वपक्षे
प्र.पं.	प्रकरणपञ्चिका
प्र.स.	प्रमाणसमुच्चयः
प्र.पा.भा.	प्रशस्तपादभाष्यम्
ब्र.सू.शां.भा.	ब्रह्मसूत्रशांकरभाष्यम्
ब्र.सू.शां.भा.व्या.भा.	ब्रह्मसूत्रशांकरभाष्यव्याख्या भामती
बृ.टी.	बृहट्टीका
भट्टि.	भट्टिकाव्यम्
भा.चिं.म.	भाट्टचिन्तामणिः
भारवि.	भारविकाव्यम् किरातार्जुनीयम्
मनु.	मनुस्मृतिः
म.भा.	महाभाष्यम्
माघ.	माघकाव्यम् शिशुपालवधम्
मी.को.	मीमांसाकोशः
मी.कौ.	मीमांसाकौस्तुभः
मी.न्या.प्र.	मीमांसान्यायप्रकाशः
मी.बा.	मीमांसाबालप्रकाशः
मी.वा.	मीमांसावार्त्तिकम्
मी.सू.	मीमांसासूत्रम् पूर्वमीमांसासूत्रम्
मु.	मुक्तावली
मु.व्या.दि.	मुक्तावलीव्याख्या दिनकरी

मु.व्या.प्र.	मुक्तावलीव्याख्या प्रभा
मेदिनी.	मेदिनीकोशः
मे.सं.	मेघसंदेशः
या.स्मृ.	याज्ञवल्क्यस्मृतिः
यो.भा.	योगभाष्यम्
यो.सू.	योगसूत्रम्
र.वं.	रघुवंशः
रा.ता.	रामानुजताताचार्यः
रामा.	रामायणम्
ल.चं.	लघुचन्द्रिका
ल.मं.	लघुमञ्जूषा
वा.पा.	वाक्यपदीयम्
वा.पा.व्या.अ.	वाक्यपदीयव्याख्या अम्बाकर्त्री
वा.वृ.	वाक्यवृत्तिः
वा.न्या.सु.	वार्त्तिकन्यायसुधा
वे.प.	वेदान्तपरिभाषा
वे.प.व्या.शि.	वेदान्तपरिभाषाव्याख्या शिखामणिः
वे.सं.	वेणीसंहारः
वै.भू.सा.	वैयाकरणभूषणसारः
वै.सि.का.	वैयाकरणसिद्धान्तकारिका
वै.सू.	वैशेषिकसूत्रम्
व्या.वा.	व्याकरणवार्त्तिकम्
व्यु.वा.	व्युत्पत्तिवादः
व्यु.वा.व्या.प्र.	व्युत्पत्तिवादव्याख्या प्रकाशः
व्यु.वा.व्या.गू.त.	व्युत्पत्तिवादव्याख्या गूढार्थतत्त्वालोक
श.वा.	शक्तिवादः
श.कौ.	शब्दकौस्तुभः
श.नि.	शाब्दनिर्णयः
श.श.प्र.	शब्दशक्तिप्रकाशिका
शा.भा.	शाबरभाष्यम्
शा.त.	शाब्दतरङ्गिणी
शा.दी.	शास्त्रदीपिका

श्लो.वा.	श्लोकवार्त्तिकम्
श्रीभा.	श्रीभाष्यम्
श्रु.प्र.	श्रुतप्रकाशिका
सं.शा.	संक्षेपशारीरकम्
सं.र.	संगीतरत्नाकरः
सा.सु.	सारस्वतीसुषमापत्रिका
सां.का.	सांख्यकारिका
सां.त.कौ.	सांख्यतत्वकौमुदी
सां.सू.	सांख्यसूत्रम्
सोम.	सोमनाथीयम्
स्फो.वा.	स्फोटवादः
स्फो.सि.	स्फोटसिद्धिः

।। श्रीः ।।

शाब्दबोधमीमांसायां

सुबन्तपदार्थविचारात्मकस्य तृतीयभागस्य

उपोद्घातः

आदौ सुबन्तपदार्थविचारात्मकस्य तृतीयभागस्य संक्षिप्तं स्वरूपं लिख्यते।

सुबन्तपदार्थविचारात्मकेऽस्मिन् तृतीयभागे नाम्नामर्थो विचार्यते। तत्र नामपदेन सुप्प्रकृतिभूताः शब्दाः विवक्षिताः। ङ्यन्तात् आबन्तात् प्रातिपदिकाच्च परतया सुपः विहिताः। प्रातिपदिकसंज्ञा च "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[१] "कृत्तद्धितसमासाश्च"[२] इति सूत्राभ्यां विहिता। चादयः प्रादयश्च निपातसंज्ञकाः। "स्वरादिनिपातमव्ययम्"[३] इति सूत्रेण स्वरादीनां निपातानां चाव्ययसंज्ञा उक्ता। "अव्ययादाप्सुपः"[४] इति सूत्रेण अव्ययात् परेषां सुपां लुग्विधानसामर्थ्यात् अव्ययसंज्ञानां शब्दानां सुप्प्रकृतित्वमवगम्यते। तथा चाव्युत्पन्नानामर्थवतां शब्दानां कृदन्तानां तद्धितान्तानां समासानां च प्रातिपदिकसंज्ञकत्वात् तेषाम्, अव्ययान्तर्गतानां चादीनामुपसर्गाणां निपातानां च सुप्प्रकृतिभूतानामर्थः यथायथमन्वयबोधश्च अस्मिन् भागे प्रतिपाद्यते।

तत्र आदौ नामभिरर्थाः प्रतिपादनीयाश्चेत् कंचित् संबन्धं पुरस्कृत्यैव प्रतिपादनीया इति प्रथमतः शब्दार्थसंबन्धविचारः प्रस्तूयते। ततः स संबन्धः शक्तिलक्षणादिरूप इति तेषां विचारः क्रियते। ततः जातिगुणादिशब्दानां कुत्र शक्तिरिति विचार्यते। ततः रूढियोगयोगरूढियौगिकरूढिरूपाः शक्तिभेदाः, तदनन्तरं क्रमशः समासार्थविचारः, निपातार्थविचारः, कृत्तद्धितार्थविचारश्चेति अस्य तृतीयभागस्य संक्षिप्तं स्वरूपम्।

---

[१] पा.सू. १.२.४५
[२] पा.सू. १.२.४६
[३] पा.सू. १.१.३७
[४] पा.सू. २.४.८२

शब्दार्थसंबन्धः

न्यायसूत्रोक्तः शब्दार्थसंबन्धः

"आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः"[५] इति न्याससूत्रम्। प्रत्यक्षेणानवगम्यमानानां स्वर्गः अप्सरसः उत्तराः कुरवः लोकसंनिवेशः इत्यादीनामर्थानां न शब्दमात्रात् ज्ञानं भवति। किं तर्हि, अयं शब्दः आप्तैरुक्तः इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययो भवति इति तदर्थः। तदनन्तरं शब्दश्रवणानन्तरमर्थप्रत्ययो जायते। तेन शब्दार्थयोः संबन्धोऽङ्गीकरणीयः। अन्यथा असंबन्धाविशेषात् सर्वेभ्यः शब्देभ्यः सर्वेऽर्था बुध्येरन्। अतः शब्दार्थयोः संबन्धः कः इति जिज्ञासायां प्राप्तिरूपः संबन्धो न भवतीति।

"पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः"[६] इति सूत्रेण प्रतिपाद्य, "न सामयिकत्वाच्छब्दार्थप्रत्ययस्य"[७] इति सूत्रेण शब्दार्थयोः समयः संबन्ध इति सूत्रकारः प्रोवाच। एतत् किंचित् विव्रियते। प्राप्तिर्नाम संयोगः एकार्थसंयोगः समवायो वा। सा कुतो नाङ्गीक्रियते इति चेत् — यदि शब्दार्थयोः संयोगादिरूपा प्राप्तिः संबन्धः स्यात्। तर्हि शब्दान्तिके वा अर्थः स्यात्, अर्थान्तिके वा शब्दः स्यात् उभयं वा उभयत्र स्यात्। तत्र नाद्यः पक्षो युक्तः। यदि शब्दान्तिकेऽर्थः स्यात्, तदा अन्नमिति शब्दोच्चारणे सति अन्नरूपस्यार्थस्य प्राप्त्या तेन उदरपूरणं स्यात्। अग्निः इति शब्दोच्चारणे सति अग्निरूपार्थप्राप्त्या तेन शरीरदाहः स्यात्। असिः इति शब्दोच्चारणे सति खड्गरूपस्यार्थस्य प्राप्त्या तेन शरीरस्य च्छेदनं स्यात्। अर्थान्तिके शब्द इति द्वितीयः पक्षोऽपि न युक्तः स्थानकरणाभावादिति चशब्देन सूच्यते। स्थानं कण्ठादि, करणं प्रयत्नविशेषः। अर्थान्तिके स्थानप्रयत्नविशेषयोरसंभवात् शब्दस्योच्चारणं न संभवतीति नार्थान्तिके शब्दः। उभयपक्षप्रतिक्षेपादेव तृतीयपक्षोऽपि न युक्तः। कस्तर्हि शब्दार्थयोः संबन्ध इति शङ्कायामुक्तम् — न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य इति। तत्र भाष्यम् — "न संबन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि। समयकारितम्। यत्तदवोचाम अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः समयं तमवोचाम" इति। अनेन शब्दार्थयोः न प्राप्तिः संबन्धः, अपि तु समय इत्युक्तं भवति। कोऽसौ समय इत्याशङ्क्य भाष्यकारेणोक्तं — "अस्य शब्दस्येदमर्थजातमभिधेयमिति चाभिधा-

---

[५] न्या.सू. २.१.५२
[६] न्या.सू. २.१.५३
[७] न्या.सू. २.१.५५

नाभिधेयनियमवियोगः'' इति। तत्र तात्पर्यटीकायां सूत्रभाष्यवार्तिकग्रन्थपर्यालोचनपूर्वकं कृतो निष्कर्षस्तावदयम् —

शब्दार्थयोः तादात्म्यरूपः संबन्धः प्रत्यक्षलक्षणसूत्रस्थेन अव्यपदेश्यपदेन निराकृतः। प्राप्तिनिराकरणहेतुनैव प्रत्याय्यप्रत्यायकभावोऽपि निराकृतः। प्राप्तिरूपस्तु संबन्धःसूत्रकारेण निराकृतः। परिशेषात् समय एव संबन्धः। कोऽयं समयः। अभिधानाभिधेयनियमनियोगः। अभिधानाभिधेययोः नियमः गोशब्दस्य सास्नादिमानेवार्थः, अश्वशब्दस्य केसरादिमानेवेति व्यवस्था। तस्मिन् नियोगः बोद्धव्य इति भगवतः परमेश्वरस्य सर्गादौ इच्छाविशेषरूपः संकेतः। सोऽयं समयः। तस्मिन्नुपयुक्ते ज्ञाते शब्दार्थव्यवस्था भवति। येऽपि मीमांसका वैयाकरणा वा स्वाभाविकं शब्दार्थयोः संबन्धमास्थिषत, तेषामपि संबन्धः नैव सत्तामात्रेण गमकः, अपि तु ज्ञातः सन्। विज्ञाने चायमस्य वाचक इति वा, अस्मादयं बोद्धव्य इति वा संकेत एवोपायः। वृद्धव्यवहारोऽपि गवादिशब्दानां देवदत्तादिशब्दवत् संकेतपूर्वक एव। तद्वरमस्तु संकेत एव। कृतमत्र स्वाभाविकेन संबन्धेन। संकेतादेव प्रयोगप्रतिपत्तिव्यवहाराणामुपपत्तेः — इति।

शब्दार्थयोः स्वाभाविकसंबन्धनिरासः

शब्दार्थयोः स्वाभाविकसंबन्धनिराकरणपरं सूत्रम् — ''जातिविशेषे चानियमात्'' इति। इदं सूत्रं तात्पर्यटीकायामेवं व्याख्यातम् —

स्वाभाविको हि संबन्धः कस्यचिच्छब्दस्य केनचिदर्थेनास्ति, न सर्वस्य सर्वेण। तथा सति अस्य शब्दस्यायमर्थ इति व्यवस्था न स्यात्। तथा च ऋष्यार्यम्लेच्छानाम् अर्थविशेषनियमो न स्यात्। तथा हि यवशब्दः आर्यैः दीर्घशूके पदार्थे प्रयुज्यते। म्लेच्छैस्तु प्रियङ्गौ। एवं त्रिवृच्छब्दं ऋषयः स्तोत्रीयानवके प्रयुञ्जते। आर्यास्तु लताविशेषे। सोऽयमनियमो न स्यात् स्वाभाविके संबन्धे। न हि स्वभावतो रूपेण संबद्धः आलोकः सहस्रेणापि शिल्पिभी रसादिसंबद्धः कर्तुं शक्यः। यतस्ततो रसादयो गम्येरन्। नापि तत्र संकेतेन स्वाभाविकः संबन्धो व्यज्यते। असत्त्वात्। सदेव हि व्यज्यते नासत्। न खलु यत्र घटो नास्ति, तत्र तं दीपः शक्तो व्यङ्क्तुम्। सोऽयमनियमः शब्दादर्थप्रत्ययस्य सामयिकत्वे युज्यते, पुरुषेच्छाधीनत्वात्; तस्याश्चानियमात् इति। अभिधानाभिधेयनियमनियोग इति भाष्ये नियोगशब्दः संकेतपर्यायः। ''संकेतेन तु नियम्यन्ते'' इति टीकाग्रन्थात्। संकेतोऽपीच्छारूपः। ''सोऽयं नियमः सामयिकत्वे उपपद्यते, पुरुषेच्छाधीनत्वात्'' इति टीकाव्यवहारात्।

न्यायमञ्जर्यां शब्दादर्थप्रत्ययस्य समयकृतत्वे बहून् आक्षेपान् उद्भाव्य तेषां समुचितानि समाधानानि उक्त्वा संकेतस्य शब्दार्थसंबन्धत्वं व्यवस्थापितम्। तन्मया ग्रन्थे संगृहीतम्, ततो द्रष्टव्यम्। एवं न्यायभूषणे कृतः शब्दादर्थप्रत्ययस्य सांकेतिकत्वसमर्थनप्रकारोऽपि ग्रन्थे द्रष्टव्यः।

मीमांसकाभिमतः शब्दार्थसंबन्धः[८]

"औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः" इति सूत्रेण जैमिनिः शब्दार्थयोः स्वाभाविकः संबन्धः इति प्रत्यपादयत्। स च प्रत्याय्यप्रत्यायकभावरूप इति भाष्यादिषु व्यक्तम्। तत्सर्वं पर्यालोच्य शास्त्रदीपिकायां पार्थसारथिमिश्रैः यत् निरूपितं तदेवम् —

न तावत् शब्दार्थयोः संयोगः संबन्धः। क्षुरादिशब्दोच्चारणे मुखस्य पाटनप्रसङ्गात्। नापि कार्यकारणभावः। शब्दार्थयोर्द्वयोरपि नित्यत्वात्। नापि प्रत्याय्यप्रत्यायकभावः। असति संबन्धे प्रत्यायकत्वासंभवात्। केन संबन्धेन शब्दार्थं प्रत्याययतीत्येतदेव हि निरूप्यते। तत्र प्रत्यायकत्वसंबन्धात् प्रत्याय-कत्वमित्युक्ते आत्माश्रयः स्पष्टः। तस्मान्नास्ति वस्तुतः शब्दार्थयोः संबन्धः। असति च संबन्धे वस्त्वन्तरस्य वस्त्वन्तरबोधकत्वासंभवात् अनिरूपितहेतुविशेषं स्वाप्रज्ञानवत् यादृच्छिकं शब्दार्थज्ञानं न प्रमाणं भवितुमर्हतीति प्राप्ते —

उच्यते। स्यादेवं यद्यसंबन्धः शब्दार्थयोः। अस्ति च संबन्धः प्रत्याय्य-प्रत्यायकभावरूपः। असत्येव संबन्धान्तरे स्वभावत एव शब्दोऽर्थस्य प्रत्यायकः अर्थश्च प्रत्याय्यः इत्ययमेव संबन्धो भविष्यति।

एतदुक्तं भवति — अर्थप्रतिपत्तिफलकः शब्दव्यापारः अभिधानक्रिया। तस्यां च प्रतिपत्त्याख्यफलशालितया यत् अर्थस्य कर्मत्वं तत् तस्य वाच्यत्वम्। शब्दस्य च विवक्षावशेन यत् कर्तृत्वं करणत्वं वा तत् वाचकत्वमिति। अनेनैवाभिप्रायेण "संज्ञासंज्ञिलक्षणः संबन्धः" इति भाष्यकारेणोक्तम्। किं पुनः शब्दस्यार्थ-प्रतिपादकत्वे प्रमाणम्। शब्दानन्तरमर्थप्रतिपत्तिरेव। अनन्यथासिद्धार्थप्रत्ययान्यथा-नुपपत्त्या अर्थापत्तिरेव प्रमाणमिति यावत्।

ननु स्वभावत एव यदि शब्दोऽर्थं प्रत्याययति, तदा प्रथमश्रवणे कुतो न प्रत्याययति। प्रत्यायकत्वरूपसंबन्धग्रहणात् अनन्तरमेव कुतः प्रत्याययति। तथा च गोशब्दः न गोत्ववाचकशक्तिमान् संबन्धग्रहणात् पूर्वमप्रतिपादकत्वात्, देवदत्त-शब्दवत्। प्रत्यायकत्वशक्तिमत्त्वे प्रथमश्रुत एव प्रत्याययेदिति विपक्षे बाधकस्तर्क

---

[८] शा.दी. पृ. ९०-९१

इति चेत् — न। सहकारिविरहात्। शब्दस्य अर्थप्रत्यायने प्रत्यायकत्वरूप-संज्ञात्वज्ञानं सहकारिकारणम्, नेत्रस्येव आलोकः। प्रथमश्रवणे च तादृशसह-कारिविरहात् न प्रत्यायकत्वम्। एवं च संबन्धान्तरापेक्षां विना प्रत्यायकत्वमेव शब्दस्यार्थेन संबन्ध इति मीमांसकमतमिति सूत्रभाष्यादितोऽवगम्यते।

प्रकरणपञ्चिकायां प्रकारान्तरेणोपपादनम्[१]

प्रकरणपञ्चिकायां पूर्वोक्त एव प्रत्याय्यप्रत्यायकभावसंबन्धः प्रकारान्तरेण स्पष्टीकृतः। तथा हि — यद्यपि प्रथमश्रुताच्छब्दादर्थं नावबुध्यते, तथापि स्वा-भाविकमेव शब्दस्यार्थप्रत्यायकत्वम्, न तु संकेतापेक्षम्। तथा हि — वृद्धयोर्व्य-वहारतोः एकस्य वाक्यं श्रुत्वा अपरस्य प्रवर्तमानस्य प्रवृत्त्या बुद्धिमनुमाय तस्याश्च बुद्धेः शब्दश्रवणानन्तरभावित्वात् शब्दस्य तद्धेतुतां निश्चिनोति। किं तु तेषां पार्श्व-वर्तिनां व्युत्पित्सूनां तस्मात् शब्दात् स्वयमर्थमजानतां पुनरियं शङ्का जायते — यदि प्रत्यायकः शब्दः अस्माकमपि कुतो नार्थं बोधयति। अथ अप्रत्यायकः, तदा वृद्धस्य कथं बोधयति इति। एवं शङ्कमानानां तेषां पुनरेषा कल्पना प्रसरतिनूनमस्ति कश्चिदस्य विशेषः यतोऽर्थमवबुध्यत इति। कोऽसौ विशेष इति निर्णयतां पुनः शब्दश्रवणे सति वृद्धव्यवहाराधीनार्थप्रत्यायकत्वज्ञानमात्रेण स्वस्यार्थावगमदर्शनात् अर्थप्रत्यायकत्वज्ञानमेव विशेषः इति निश्चयो जायते। न च संकेतज्ञानं वृद्धस्य विशेष इति कल्पना शक्या। तदानीं संकेतस्यैवाप्रतीतेः।

नन्वेवं सति देवदत्तादिपदेष्वपि कथं संकेतस्य कारणत्वम्। उच्यते। प्रत्यक्षदृष्टस्तत्र संकेतः, न तु कल्पयितव्यः। तेन देवदत्तादिपदेषु संकेतस्यैवार्थ-प्रतीतिकारणत्वम्। गवादिपदेषु तु केवलकार्यदर्शनमात्रकल्पनीयो नावकाशं लभत इति अपौरुषेयः शब्दानामर्थेन प्रत्याय्यप्रत्यायकभावलक्षणः संबन्ध इति सिद्धम्।

एवं च मीमांसकानां मते शब्दानामर्थप्रत्यायकत्वं यदस्ति तदेवार्थेन सह संबन्धः। तत्तु न संकेतसापेक्षम् अपि स्वाभाविकमित्युच्यते। आधुनिक-संकेतितपदेषु तु संकेतसापेक्षं प्रत्यायकत्वमिति विशेषोऽवगम्यते। भूषण-कारादिवैयाकरणानामपीदमेव मतमिति पश्चान्निरूपयिष्यते।

शब्दार्थसंबन्धविषये नव्यनैयायिकमतम्

गदाधरभट्टाचार्यैः शक्तिवादारम्भे — "संकेतो लक्षणा चार्थे पदवृत्तिः" इत्युक्तम्। वृत्तिर्नाम शाब्दबोधौपयिकः अर्थानुयोगिकः पदप्रतियोगिकः पदानु-

---

[१] प्र.पं. पृ. २३२

योगिकोऽर्थप्रतियोगिको वा संबन्धः संकेतो लक्षणा चेति तदर्थः। संबन्धे शाब्दबोधौपयिकत्वं च शाब्दबोधजनकोपस्थितिजनकज्ञानविषयत्वम्। शक्ति-लक्षणान्यतरात्मकपदपदार्थसंबन्धज्ञानवतो हि पुरुषस्य पदज्ञानमर्थोपस्थितिद्वारा शाब्दबोधं जनयति।

यथा आधुनिकसंकेतितेषु नदीवृद्धिदेवदत्तादिपदेषु संकेतमूलकमेवार्थ-प्रत्यायकत्वं दृश्यते। तथा गोघटादिपदेष्वपि संकेतमूलकमेवार्थप्रत्यायकत्वम्। संकेताश्रयश्चेश्वरः। तथा च घटादिपदानि संकेतज्ञानपूर्वकमर्थप्रत्यायकानि पदत्वात् देवदत्तादिपदवत् इत्यनुमानेन सर्वेषां पदानां कृत्रिममेव अर्थप्रत्यायकत्वं, न स्वाभाविकमर्थप्रत्यायकत्वं केषांचिदपीति मीमांसकमते दोष उक्तो भवति। संकेतश्च इदं पदमिममर्थं बोधयतु इति, अस्माच्छब्दादयमर्थो बोद्धव्य इति वा इच्छा। तत्रेश्वरेच्छा शक्तिः। आधुनिकेच्छा परिभाषा इत्युच्यते।

पदवाक्यरत्नाकरे संकेतस्य शक्तित्वनिरूपणम्

यत्तु मीमांसकैरुक्तम् — गोबुद्धिजनकतैव गोपदस्य गवि शक्तिः। न च गोज्ञाननिरूपितशक्तेः पदे सत्त्वेऽपि गोनिरूपितशक्तेः तत्राभावात् तन्निरूप-कत्वमादाय पदार्थे क्रियमाणः गोपदशक्यत्वव्यवहारोऽनुपपन्न इति वाच्यम्। तन्मते मुख्यं तत्पदशक्यत्वं तत्पदजन्यत्वमेव। तच्च गोज्ञान एवास्तीति गोज्ञानस्यैव गोपदशक्यत्वम्। तत् गवि आरोप्य गौः गोपदशक्येति व्यवह्रियते। तथा च शक्यपदस्य गवि लक्षणाभ्युपगमेनादोषात्। तद्विषयकज्ञानजनकतया गृहीतं पदं तदर्थस्मारकम्, यथा वह्निविषयकज्ञानजनकतया गृहीतो धूमो वह्नेः स्मारकः। गोबुद्धिजनकत्वविषयकज्ञानजन्यसंस्कारेण पदज्ञानसहकृतेन जन्यं पदार्थस्मरणं शाब्दबोधं प्रति हेतुः — इति।

तन्न। आधुनिकपाणिन्यादिसंकेतितटिघुभादिशब्देन तदर्थबुद्धिजनकताज्ञान-रहितस्यापि पुंसः अस्माच्छब्दादयमर्थो बोद्धव्य इति पाणिनीच्छारूपसंकेत-विषयज्ञानमात्रेण अन्वयबोधस्योत्पत्त्या व्यतिरेकव्यभिचारात्। तत्परिहाराय यदि बोधकत्वरूपशक्तिज्ञानसंकेतज्ञानयोरन्यतरस्य कारणत्वमुच्यते तदा गौरवम्। सर्वत्र संकेतज्ञानेनैव शाब्दबोधनिर्वाहात्।

संकेतस्य पदपदार्थसंबन्धत्वोपपादनम्

ननु गोपदजन्यः गोत्वविशिष्टविषयकबोधो भवतु इत्याकारकस्य संकेतस्य भगवत्समवेतस्य जीवसमवेतस्य वा पदे अर्थे चाविद्यमानतया कथं पदपदार्थ-संबन्धत्वमिति चेत् — न।

संकेतस्य स्वनिरूपितगोत्वविशिष्टविषयकत्वनिष्ठप्रकारतानिरूपितबुद्धित्वावच्छिन्नविशेष्यतानिरूपितजन्यत्वनिष्ठप्रकारत्वावच्छिन्नविषेष्यतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारतासंबन्धेन पदनिष्ठत्वात्, स्वनिरूपितगोपदजन्यत्वनिष्ठप्रकारतानिरूपितबुद्धित्वावच्छिन्नविशेष्यतानिरूपितविषयकत्वनिष्ठप्रकारत्वावच्छिन्नविशेष्यतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारतासंबन्धेन गोत्वविशिष्टेऽर्थे च सत्त्वात् पदपदार्थसंबन्धत्वोपपत्तेः इति पदवाक्यरत्नाकरे गोकुलनाथोपाध्यायाः प्राहुः।

वैयाकरणभूषणकारमतम्

वैयाकरणभूषणकारास्तु मीमांसकोक्तरीत्या अर्थबोधकत्वमेव पदानां शक्तिरिति निरूपयन्ति। तथा हि —

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा।।

इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिषु यथा अनादिर्योग्यता घटादिविषयकचाक्षुषादिप्रत्यक्षकारणता तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः।

अर्थधीजनकत्वरूपा शक्तिश्च पित्रादिसंकेतज्ञानादेव ज्ञायते। अतः संकेतज्ञानाधीनबोधकत्वज्ञानात् प्राक् घटादिशब्दश्रवणेऽप्यर्थबोधो न भवति। न च लक्षणोच्छेदापत्तिः, गङ्गापदे तीरबोधकत्वसद्भावेन शक्तिज्ञानादेव तीरबोधसंभवात् इति वाच्यम्। इष्टापत्तेः। बोधकत्वरूपशक्तिज्ञानजनकस्य व्यवहारादेः शक्यलक्ष्योभयसाधारणत्वात्।

एवं च गङ्गापदस्यापि तीरबोधकत्वात् तीरवाचकत्वमिष्टमेव। न च गङ्गापदस्य हर्यादिपदवत् नानार्थकत्वापत्तिरिति वाच्यम्। इष्टापत्तेः। यथा हर्यादिपदप्रयोगे किमत्र विष्णुर्विवक्षितः उत सूर्य इत्यर्थसंदेहः, प्रकरणादिना तात्पर्यज्ञाने अर्थविशेषविषयकः शाब्दबोधः, तथा गङ्गापदे नानार्थबोधकत्वं जानतः पुरुषस्य भवत्येवार्थसंदेहः। अन्वयानुपपत्त्यादिना तीरतात्पर्यकत्वनिश्चये तीरविषयकः शाब्दबोधो जायते। अत एव "सर्वे सर्वार्थवाचकाः" इति वैयाकरणप्रवादः संगच्छते। तथा च बोधकत्वमेव शक्तिरिति निरूपयन्ति भूषणकाराः।

मणिग्रन्थरीत्या बोधकत्वं शक्तिरिति मतस्य पोषणं तत्खण्डनं च[१०]

तत्त्वचिन्तामणिग्रन्थे शब्दखण्डे बोधकत्वं शक्तिरिति पक्षोऽप्युपक्षिप्तः। तथा हि —

---

[१०] त.चि.श. पृ. ६५५

आक्षेपः

ननु तद्धीजनकतावच्छेदिकायाः स्वाभाविकसंबन्धरूपायाः शक्तेः तद्धीजनकत्व-विषयकेश्वरेच्छारूपसंकेतस्य वा ज्ञानात् अर्थप्रत्यय इति आवश्यकत्वात् लाघवाच्च तद्धीजनकत्वज्ञानमेव अर्थप्रतीतौ हेतुरस्तु। किं शक्तेः ईश्वरसंकेतस्य वा ज्ञानेन।

अन्यथा मीमांसकस्य स्वाभाविकसंबन्धरूपशक्तिज्ञानात् अर्थप्रत्ययः, नैयायि-कस्य ईश्वरसंकेतज्ञानात् अर्थप्रत्यय इति परस्परं व्यतिरेकव्यभिचारेण एकस्यापि कारणता न स्यात्।

अपि च लौकिकानां शक्तीश्वरसंकेतयोरज्ञानेऽपि वृद्धव्यवहारात् अर्थज्ञान-जनकत्वं शब्दस्यावधार्य पश्चात् शब्दश्रवणानन्तरं अर्थज्ञानजनकत्वस्मरणात् अर्थप्रतीतिर्जायते। एवं च तद्धीजनकत्वेन ज्ञातं यत् पदं यदनुभवं जनयति तस्यैव तत्र शक्तत्वं, न तु शक्तिरीश्वरसंकतो वेति चेत् —

सिद्धान्तः

उच्यते। देवदत्तादिपदादर्थबुद्धौ संकेतज्ञानस्य कारणत्वनिश्चयात् अन्यत्र घटादिपदादर्थबुद्धावपि संकेतज्ञानस्य हेतुत्वं कल्प्यते। न हि अस्माच्छब्दात् अय-मर्थो बोद्धव्य इति यस्तत्र संकेतः तज्ज्ञानं विना ततस्तदर्थप्रत्ययः। संकेतज्ञानात् पूर्वं अर्थधीजनकत्वस्य अर्थधीजनकत्वज्ञानस्य वा असंभवात्। अथ सादिदेव-दत्तादिपदे संकेतज्ञानादेवार्थप्रतीतिरस्तु। अनादिगवादिपदे तु संकेतज्ञानं विनाप्यर्थ-प्रतीतेर्भावात् न संकेतकल्पनेति चेत् — न। पदत्वस्यैवार्थधीहेतुसंकेतवत्त्व-प्रयोजकत्वे संभवति तत्र सादित्वविशेषणे गौरवात्।

वेदान्तदेशिककृतं बोधकत्वस्य शक्तित्वसमर्थनम्[११]

सेश्वरमीमांसायां बोधकत्वमेव शक्तिरिति श्रीमद्वेदान्तदेशिकैः निरूपितम्। तदत्र संगृह्यते। यत्पुनरुक्तं शब्दार्थसंबन्धस्य स्वाभाविकत्वे व्युत्पत्तेः पूर्वमपि बोध-कत्वप्रसङ्ग इति। तदसत्। संबन्धज्ञानस्य सहकारित्वात्। अन्यथा सांकेति-कत्वेऽपि कृतसंकेतः शब्दः संकेतज्ञानात् पूर्वमेव गमयेत्। अन्यवयव्यतिरेकाभ्यां तज्ज्ञानस्य सहकारित्वं निश्चितमिति समाधानं तुल्यम्।

---

[११] सेश्वरमी. पृ. ४३

कोऽत्र संबन्धः, कथं चात्र तज्ज्ञानस्यान्वयव्यतिरेकाविति चेत् — बोध्य-बोधकभाव एव संबन्धः। तज्ज्ञानस्य सहकारित्वं व्युत्पत्तिपर्यालोचनया सिद्धम्। सा व्युत्पत्तिः कार्यार्थे सिद्धार्थे वा अस्तु। प्रथमं तावत् ज्ञायमानशब्दस्य अर्थ-विशेषबोधकत्वज्ञानात् पूर्वं अर्थविशेषप्रतीतिर्न जायते। बोधकत्वग्रहणात् पश्चात् उपदेशादिना वा अयं शब्दोऽस्यार्थस्य बोधक इत्येवंरूपेण तज्ज्ञानसमनन्तरं व्युत्पन्नस्य परप्रयुक्तात् तस्मादेव शब्दात्तदर्थप्रतीतिर्जायते। इन्द्रियलिङ्गयोरिव संबन्धान्तरं न किंचित् दृश्यते। अतो बोधकत्वज्ञानमेवार्थबोधहेतुत्वेन अन्वय-व्यतिरेकाभ्यामवसितम्।

सांकेतिकेषु असांकेतिकेषु वा शब्देषु अस्य शब्दस्यायमर्थ इति व्युत्पादय-द्भिरपि न संकेतः क्रियते, ज्ञाप्यते वा। अपि तु अयं शब्दोऽस्य बोधक इति व्यपदिश्यते। अन्यथा स्वेच्छया संकेतकरणे सर्वस्य शब्दस्य सर्वत्रार्थे प्रयोग-प्रसङ्गात्। तथा अयं गोशब्दस्य वाच्यः इति वदन्तः पूर्वम् अमुकेन संकेतित इत्यपि न वदन्ति। तथाविधस्य कस्यचित् संकेतयितृत्वाप्रसिद्धेः। स्वयं चापरि-ज्ञानात्। सांकेतिकेष्वपि भाषाशब्देषु वृद्धप्रयोगमात्रमेव व्युत्पाद्यम्, न तु सन्नपि संकेतः। तज्ज्ञानमन्तरेणापि उत्तरोत्तरेषां व्युत्पित्सूनामर्थप्रतीतेर्दर्शनात् अविरोधाच्च।

तदेवम् आदिमां द्वितीयां च व्युत्पत्तिं पर्यालोचयद्भिः बोधकत्वग्रहणमेव शब्दस्य स्वार्थप्रत्यायने सहकारीति निश्चीयत इति ततः पूर्वमर्थानवगतिः परस्ताच्चावगतिः उपपद्यते — इति।

निर्धारणेन निगमनम्

बोधकत्वं शक्तिरिति पूर्वमीमांसकानां सेश्वरमीमांसकानां वैयाकरणभूषण-काराणां च मतम्। बोधकत्वरूपशक्तिज्ञानं च अयं शब्दोऽस्यार्थस्य बोधक इति पित्राद्युपदेशादिना भवति। लक्षणोच्छेदापत्तिशङ्का तु इष्टापत्त्या भूषणकारेण परिहृता।

वयं तु ब्रूमः। गङ्गापदस्य प्रवाहबोधकत्वं तीरबोधकत्वं च यद्यप्यस्ति; तथापि प्रवाहबोधकत्वमेव शक्तिः, न तीरबोधकत्वम्। गङ्गापदेन प्रवाहबोधानन्तरमन्वया-द्यनुपपत्तिप्रतिसन्धानानन्तरं हि तीरबोधः। तथा च बोधान्तरअन्वयानुपपत्त्यादि-प्रतिसन्धानव्यवधानरहितबोधजनकत्वं शक्तिरित्युक्तौ लक्षणोच्छेदापत्तिशङ्काया नावसरः। इष्टापत्तौ शक्यलक्ष्यविभागाभावादिप्रसङ्गचोद्यस्य परिहारार्थं प्रयासस्य च नावसरः इति। अतो गवादिसंस्कृतशब्देषु संबन्धान्तरनिरपेक्षं बोधकत्वं शक्तिरिति पक्षोऽपि युक्तियुक्त इत्येव प्रतीयते।

अत एव बोधकत्वज्ञानार्थं संकेतज्ञानस्यावश्यकत्वात् आवश्यकः संकेत एव शक्तिरित्यपास्तम्। अयं शब्दोऽस्यार्थस्य बोधकः इत्यादिः यः पित्रादीनामुपदेशः तत एव बोधकत्वज्ञानसंभवात् इच्छादिरूपसंकेतज्ञानस्यानपेक्षितत्वात्।

बोधकत्वं शक्तिरिति ये वदन्ति मीमांसकाः तन्मतेऽपि बोधकत्वमित्यनेन बोधजननसामर्थ्यमेव विवक्षितम्। षट्पदार्थातिरिक्तस्य शक्त्यपरपर्यायस्य सामर्थ्यस्य तैः अङ्गीकारात् शब्दनिष्ठं सामर्थ्यमेव बोधकत्वं नाम। अतः बोधकत्वस्य बोधजनकतावच्छेदकत्वे आत्माश्रय इत्यादिदूषणानां न प्रसक्तिः।

तर्कताण्डवेऽपि व्यासतीर्थश्रीचरणैः — कारणसामान्ये कार्यानुकूलशक्तेरङ्गीकारात् शब्देऽपि अर्थबोधानुकूलं सामर्थ्यमेव शक्तिः इत्युपपादितम्। इयांस्तु विशेषः वह्न्यादौ दाहाद्यनुकूला शक्तिः स्वरूपसती कार्यकरी; शब्दनिष्ठा तु शक्तिः ज्ञाता सती अर्थबोधं जनयति। तदुक्तं गदाधरभट्टाचार्यैः शक्तिवादे[१२] ज्ञाने पदानां शक्तिरिति मीमांसकमतनिरूपणावसरे — "दाहादिकार्ये बह्न्यादिनिष्ठशक्तेः स्वरूपसत्या एवोपयोगित्वेऽपि शाब्दबोधानुकूलशक्तेः शाब्दबोधे पदार्थोपस्थितौ च ज्ञातायाः उपयोगित्वे बाधकाभावात्" इति, "अस्तु वा तज्ज्ञानशक्त्या तस्य वाचकत्वम्" इति च।

शब्दार्थयोस्तादात्म्यं संबन्ध इति नागेशमतम्

नागेशभट्टास्तु लघुमञ्जूषायां शक्तिमधिकृत्य एवं निरूपयन्ति — पदपदार्थयोः वाच्यवाचकभावाख्यः क्लृप्तपदार्थातिरिक्तः संबन्धः शक्तिरिति अभिधेति चोच्यते। तादृशशक्तिग्राहकं च शब्दार्थयोः तादात्म्यम्। स एव संकेतः। शक्त्युपकारकत्वात् तादात्म्यमपि शक्तिरिति व्यवह्रियते। न च शब्दार्थयोस्तादात्म्ये अन्नमित्युक्ते मुखस्य पूरणापत्तिः, पूरणहेतुभूतस्यार्थस्यान्नस्य शब्दाभिन्नत्वेन तत्र सत्त्वात् इति वाच्यम्। शब्दार्थयोरत्यन्ताभेदानङ्गीकारात्। भेदसमानाधिकरणाभेदरूपतादात्म्यस्यैव स्वीकारेणोक्तापत्त्यसंभवात्।

ननु शब्दार्थयोस्तादात्म्ये किं प्रमाणमिति चेत् — उच्यते। अयं घट इत्यादिज्ञाने घटादिरूपोऽर्थः तत्तद्वाचकशब्दानुविद्ध एव भासते। अत एव पुरोवर्तिपदार्थदर्शी तद्वाचकशब्दमजानानः "किमिदमिति न जानामि" इति ब्रूते। वाचकशब्दोपदेशानन्तरं ज्ञातमिति वदति। ज्ञानेषु अर्थमात्रभाने न जानामीति कथं ब्रूयात्। अर्थस्य ज्ञातत्वात्। अतः शब्दानुविद्धोऽर्थो भासते। शब्दानुविद्धत्वं च शब्दतादात्म्यापन्नत्वम्। इतोऽधिकं ग्रन्थतोऽवगन्तव्यम्।

---

[१२] पृ. २१

आलंकारिकमतम्

नैयायिकवत् ईश्वरसंकेतः शक्तिरित्येव आलंकारिकाणां मतम्। तथा हि काव्यप्रकाशकाराः — शब्दस्तावत् वाचको लक्षको व्यञ्जकश्चेति त्रिविधः। अर्थोऽपि वाच्यः, लक्ष्यः, व्यङ्ग्यश्चेति त्रिविधः। तत्र वाचकस्य लक्षणम् — साक्षात् संकेतितं योऽर्थमभिधत्ते स वाचक इति। यस्य शब्दस्यार्थे संकेतो न ज्ञातः तस्मात् शब्दात् अर्थप्रतीतेः अनुत्पत्या संकेतग्रहसहाय एव शब्दः अर्थविशेषं प्रतिपादयति। अतो यस्य शब्दस्य यस्मिन्नर्थेऽव्यवधानेन संकेतो गृह्यते स शब्दस्तस्यार्थस्य वाचक इत्याहुः। तत्र — शक्त्यपरपर्यायः संकेतितार्थ-बोधजनको व्यापारोऽभिधा। संकेतश्च शक्तिग्राहकः समयः। स च अस्माच्छब्दा-दयमर्थो बोद्धव्य इत्याकारकः इति उद्योतः।

रसगङ्गाधरे तु[१३] — शक्त्याख्योऽर्थस्य शब्दगतः, शब्दस्यार्थगतो वा संबन्ध-विशेषः अभिधा। सा च पदार्थान्तरमिति केचित्। अस्माच्छब्दादयमर्थोऽवगन्तव्य इत्याकारेश्वरेच्छैवाभिधा। तस्याश्च विषयतया सर्वत्र सत्त्वात् पटादीनामपि घटादिपदवाच्यता स्यात्। अतो व्यक्तिविशेषोपधानेन घटादिपदाभिधात्वं वाच्य-मित्यपरे। एवमपीश्वरज्ञानादिना विनिगमनाविरहः स्यात्। अतः प्रथममतमेव ज्याय इत्यपि वदन्ति — इत्यभिहितम्।

लक्षणाविचारः

मणिग्रन्थानुसारेण लक्षणास्वरूपादिकम्

तत्त्वचिन्तामणौ शब्दखण्डे अतिविस्तरेण लक्षणा तदनुबन्धिविषयाः निरूपिताः। सर्वं ग्रन्थे मयानूदितम्। अत्र साररूपेण प्रस्तूयते। संकेत एव मुख्या वृत्तिः। तात्पर्यनिर्वाहकत्वात्। लक्षणा च वृत्यन्तरम्। यत्र वाच्यार्थान्वयानुपपत्त्या वाच्यसंबन्धोपस्थापिते वाक्यार्थान्वयः, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे तदुच्यते —

> "वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः।
> तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते।।" इति।

अथ तीरे गङ्गापदस्य शक्तिरेव। शक्तिग्राहकस्य व्यवहारस्य मुख्यलक्ष्य-साधारणत्वात्। पदानां संभूय वाच्यार्थान्वयबोधकत्वमिति व्युत्पत्तेः। लाक्षणिकत्वे तु अननुभावकतया तद्भङ्गप्रसङ्गात्। किं च पदानि स्वजन्योपस्थितिद्वारा अन्वय-

---

[१३] पृ. १७६

बोधजनकानि। उपस्थितिश्च शक्तिसापेक्षेति तीरस्य शक्त्या उपस्थितिं विना इतर-पदार्थेनान्वयो दुर्घटः। अन्यथा तीरे शाब्दत्वं तात्पर्यं च न स्यात्। तयोः शक्ति-नियतत्वात्। किं च यदि तीरे तात्पर्यं निश्चितं तदा तात्पर्यनिर्वाहकत्वेन शक्तिरेव स्वीकार्या, क्लृप्तत्वात्। तथा च गङ्गादिपदानां प्रवाहतीरादिनानार्थशक्तत्वमेव युक्तम्, अक्षादिपदवत्। अतो लक्षणाख्यं वृत्त्यन्तरं न कल्प्यमिति चेत् —

उच्यते। गङ्गापदस्य लक्षणीयतीरादिसहस्रेषु शक्तिकल्पने तज्ज्ञानार्थं लक्षणीयेषु प्रत्येकं वृद्धव्यवहारान्तरापेक्षा स्यात्। तथा च गौरवम् अननुभवश्च। लक्षणा तु एका अनेकेष्वर्थेषु शक्यसंबन्धरूपा लक्षणीयविषयकवृद्धव्यवहारान्तरनिरपेक्षा चेति सैव लाघवात् युक्ता।

न च लक्षणीयेष्वनेकेष्वर्थेषु शक्तिकल्पने गौरवं न्याय्यमेव, प्रामाणिकत्वात्। लक्ष्यत्वाभिमतार्थान्वयबोधस्य शक्तिं तद्ग्रहं वा विनानुपपत्तेः इति वाच्यम्। शक्तिं विनापि तीरान्वयबोधोपपत्तिः। तथा हि —

व्युत्पन्नः पुरुषः आप्तत्वेन निश्चितस्य पुरुषस्य "गङ्गायां घोषः प्रतिवसति" इति वाक्यं श्रुत्वा विमृशति — इदं वाक्यं प्रमाणम् आप्तोक्तत्वात्, वाक्यार्थश्च संभवत्येव — यथा "वस्त्रेण पिधेहि" इत्यत्र कर्मणि द्वारे अध्याहृते योग्येन तेन साकम् इतरपदैः स्वार्थान्वयो बोध्यते, तथा शक्त्या गङ्गापदेन स्मारितो यो मुख्यार्थः प्रवाहः तेन स्वसंबन्धात् स्मारिते योग्ये आकाङ्क्षिते च तीरे इतरपदैः स्वार्थान्वयबोधः अत्रापि संभवति — इति। ततः मुख्यार्थस्मारिते तीरे घोषादिपदैः स्वार्थान्वयबुद्धिः तस्य जायते। एवं च तीरान्वितवाक्यार्थबुद्धिः तीरनियत-वृद्धव्यवहारादिदर्शनं विनैव जायते। एवं च तीरस्मृत्यनुभवयोः शक्यसंबन्ध-ज्ञानादेवोपपत्तेः न तीरे गङ्गापदस्य शक्तिः। शक्यसंबन्ध एव च लक्षणा। पश्चात्तु अनेन आप्तेन परंपरया गङ्गासंबन्धितीरप्रतिपत्तिजननाय गङ्गापदं प्रयुक्तमिति तात्पर्यज्ञानं जायते। गङ्गास्मारिततीरान्वयबोधश्च न तात्पर्यज्ञानमपेक्षते। पूर्वोक्त-न्यायेनैव तीरस्य प्रथमं वाक्यार्थान्वयबोधोत्पत्तेः। शक्तिस्मारितशक्यसंबन्धो वा तज्जन्या शक्यसंबन्धस्मृतिर्वा लक्षणा। उभयथापि लक्षकपदस्य लक्ष्ये तात्पर्यज्ञानं लक्षणायामनुपयुक्तमेव। उक्तरीत्या तात्पर्यग्रहात् पूर्वमेव अशक्यतीरस्मृतेः क्लृप्तकारणादुपपत्तेः।

ननु तात्पर्यज्ञानस्य लक्षणायामनुपयोगे "शक्योपस्थापितार्थे शब्दतात्पर्यात् लक्षणा" "तात्पर्याद्धि वृत्तिः" इति प्रवादयोः का गतिरिति चेत् — लक्षणास्थले लक्ष्ये वस्तुतस्तात्पर्यमस्तीत्येवंपरत्वात् तयोः प्रवादयोः।

मणिकारोक्तानि लक्षणायाः लक्षणानि

(१) लक्षणा नाम — शक्तिसादृश्याभ्यामतिरिक्तः अन्वयबोधानुकूलोपस्थिति-हेतुभूतः शक्यसंबन्धः। शक्तावतिव्याप्तिवारणाय शक्त्यतिरिक्तत्वनिवेशः। गौणी-वृत्तावतिव्याप्तिवारणाय सादृश्यातिरिक्तत्वनिवेशः। अत्र उपस्थितिहेतुरिति हेतुगर्भ-विशेषणम्। यतः उपस्थितिहेतुः अत एव लक्षणा वृत्तिर्भवति, शक्तिवत्। लक्षणा, वृत्तिः, उपस्थितिहेतुत्वात् शक्तिवत् इति अनुमानप्रयोगोऽत्र विवक्षितः।

(२) लक्षणा च शब्दात् परंपरया अशक्यासदृशस्य अन्वयपरोपस्थितिरूपा।

(३) शक्यसंबन्धात् अशक्यासदृशान्वयपरोपस्थितिरूपा।

(४) अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः स्वशक्यसंबन्धो लक्षणेति परमार्थः — इति।

शक्यसंबन्धः किंरूप इति विवेचनम्

एतावता शक्यसंबन्धो लक्षणेत्युपपादितम्। शक्यसंबन्धश्च किंरूप इति जिज्ञासायामुक्तं मणौ — शक्यसंबन्धश्चाविनाभाव एवेति। यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति इत्यत्रापि प्रवेशनक्रोशनसमये यष्टिधरमञ्चस्थपुरुषयोः यष्टिमञ्चाभ्यामवि-नाभावोऽस्त्येवेति यष्टिमञ्चपदयोः यष्टिधरे मञ्चस्थपुरुषे च अविनाभावरूपा लक्षणा।

न च प्रवाहाविनाभावस्य तीरे इव मत्स्येऽपि सत्त्वात् मत्स्येऽपि गङ्गापदस्य लक्षणा स्यादिति वाच्यम्। तात्पर्यवशात् तीरेणैवान्वयबोध इति स्वीकारात्। शक्यसंबन्धसामान्यं लक्षणेति वादिनापि प्रवाहसंयोगस्य तीरवन्मत्स्येऽपि स्त्वात् तदन्वयबोधवारणपूर्वकं तीरेणैवान्वयबोधस्य तात्पर्येणैव निर्वाह्यत्वात्।

लक्षणायाः बीजम्

लक्षणायाः बीजं तु तात्पर्यानुपपत्तिः। पदस्य वृत्तिं विना लक्ष्ये तात्पर्य-स्यानिर्वाहात्। न तु शक्यार्थान्वयायोग्यत्वम् लक्षणायां बीजम्। यष्टीः प्रवेशयेत्यत्र, अजहत्स्वार्थायां च काकेभ्यो दधि रक्ष्यताम् इत्यादौ शक्यस्यान्वययोग्यत्वेऽपि लक्षणायाः सत्त्वात्। तात्पर्यानुपपत्तिस्तु तत्रापि वर्तते। लक्ष्ये तात्पर्यं विना लक्षणायाः अनुदयात् इति संप्रदायः।

मणिकृतस्तु अन्वयपरप्रमाणशब्दस्य मुख्यार्थेऽन्वयायोग्यत्वमेव लक्षणायां बीजम्। गङ्गायां घोष इत्यादौ पूर्वोक्तरीत्या लक्ष्ये तात्पर्यग्रहात् पूर्वमेव मुख्यस्यान्वयायोग्यत्वज्ञानेन लक्षणायाः उपपादनात्।

यष्टीः प्रवेशयेत्यत्र छत्रिणो यान्तीत्यजहत्स्वार्थायां च मुख्यार्थस्यान्वयानुपपत्तिरेव। तथा हि प्रकरणादिना प्रवेशयेत्यस्य भोक्तृकर्मकप्रवेशनपरत्वं, यान्तीत्यत्र छत्रितदितरघटितसमूहात्मकगमनकर्तृपरत्वं च ज्ञातम्। लक्षकपदे इव इतरपदेऽपि तात्पर्यग्रहस्य वक्तव्यत्वात्। अन्यथा घोषपदस्यैव जलपरत्वे गङ्गापदे लक्षणा न स्यात्। तथा च प्रकरणात् प्रवेशनादिविशेषे तात्पर्यग्रहात् तत्र च यष्टिच्छत्रिणोरन्वयायोग्यत्वात्। गङ्गायां घोष इत्यादौ तात्पर्यग्रहात् पूर्वमेव मुख्यार्थान्वयानुपपत्तेः क्लृप्तत्वात् सैव सर्वत्र लक्षणायाः बीजम्।

ननु चित्रगुमानयेत्यादौ बहुव्रीहौ चित्रगोपदार्थस्य आनयनान्वययोग्यत्वात् अन्यपदार्थे स्वामिनि तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति चेत् — न। तत्रापि प्रकरणादिना आनयपदस्य चित्रगोस्वाम्यानयनपरत्वे ज्ञाते तादृशानयने चित्रगोपदार्थस्यान्वयानुपपत्तिरस्त्येवेति अन्वयायोग्यत्वस्यैव अन्यपदार्थे स्वामिनि लक्षणायां बीजत्वात् — इति प्राहुः।

लाक्षणिकं पदं नानुभावकमिति निरूपणम्

लक्षणास्थले गङ्गापदात् आदौ शक्यार्थस्मृतिः। ततः शक्यार्थान्वयानुपपत्तिज्ञानम्। ततः गङ्गापदात् पुनः शक्यार्थस्मृतिः। ततः स्मृतशक्यात् स्वसंबन्धेन तीरस्मृतिः। शक्तेः शक्यस्मृतौ, शक्यस्य प्रवाहस्य स्वसंबन्धेन तीरस्मृतौ सामर्थ्यावधारणात्। ततः शक्यस्मारिततीरस्य घोषपदादेवान्वयबोधः।

अत एव लाक्षणिकं पदं नानुभावकम्। अन्वयप्रतियोगिनः तीरस्य पदादनुपस्थितेः। पदशक्यादेव तीरस्मृतेः। अन्वयप्रतियोगिविषयकोपस्थितिजनकानामेव पादानामन्वयानुभावकत्वात्। न च गङ्गापदात् स्वशक्यसंबन्धेन प्रथममेव तीरस्मृतिः, पुनः शक्यस्मरणकल्पने गौरवादिति वाच्यम्। गङ्गापदस्य स्वशक्यसंबन्धात्मकपरंपरासंबन्धेन अन्वयप्रतियोगिस्मारकत्वस्य अक्लृप्तस्य कल्पने गौरवात्। न चेहैवागत्या तत्कल्पनमिति वाच्यम्। क्लृप्तकारणताकस्मृतिद्वयादेव तीरोपस्थितिसंभवात् इति प्राञ्चः।

नव्यास्तु लाक्षणिकं पदमप्यनुभावकम्। तावता तीरे शक्तिरिति नाशङ्कनीयम्। प्रवाहशक्तत्वेन ज्ञातादेव गङ्गापदात् शक्तिं विनापि तीरानुभवसंभवात्। यथा परमते जातिशक्तत्वेन ज्ञातादेव पदात् व्यक्त्यनुभवसंभवान्न व्यक्तौ शक्तिः, यथा वा अस्माकं मते पदार्थशक्तत्वेन ज्ञातादेव अन्वयानुभवसंभवान्नान्वये शक्तिः तद्वदिति वदन्ति। लक्षणा पदवृत्तिः न वाक्यवृत्तिरिति विचारः ग्रन्थे द्रष्टव्यः।

लक्षणाविषये वैयाकरणमतानि

नागेशेन बृहन्मञ्जूषायां[१४] प्रवर्तितस्य विचारस्य संग्रहः — ननु वैयाकरणमते बोधकत्वमेव शक्तिः। तथा सति गङ्गादिपदे तीरादिबोधजनकतायाः सत्त्वेन शक्त्यैवोपपत्तौ लक्षणाद्युच्छेदापत्तिरिति चेत् —

अत्राहुः — यस्य पदार्थस्य स्वविषयकबोधजनकत्वज्ञानात् बोधो भवति तदर्थनिरूपितबोधकत्वं शक्तिः। यस्य पदार्थस्य स्वसंबन्धिबोधकत्वज्ञानात् बोधः तत्पदार्थनिरूपितं स्वसंबन्धिबोधकत्वं लक्षणेति व्यवस्था। गङ्गापदात् प्रवाह-विषयकबोधजनकत्वज्ञानात् प्रवाहबोधो जायत इति प्रवाहनिरूपितबोधकत्वं शक्तिः। गङ्गापदात् तीरस्य तु न तीरबोधकत्वज्ञानात् बोधः, अपि तु तीरसंबन्धि-प्रवाहबोधकत्वज्ञानादेवेति तीरे लक्षणा।

अपरे तु — गङ्गादिपदजन्यतीराद्यर्थविषयकशाब्दबोधं प्रति स्वसंबन्धिप्रवाह-बोधकत्वज्ञानस्य कारणत्वापेक्षया स्वबोधकत्वज्ञानस्यैव कारणत्वं युक्तम्। एवं च तीरादावपि शक्तिरेव। गङ्गापदं तीरबोधकमिति ज्ञाने सति, स्वसंबन्धिबोध-कत्वज्ञानं विनापि तीरोपस्थितितीरशाब्दबोधयोः सर्वानुभवसिद्धत्वेन तीरबोधकत्व-ज्ञानकारणतायाः आवश्यकत्वाच्च। लाक्षणिकपदानां शक्तिभ्रमेण तीरबोधकत्वस्य त्वयाप्यङ्गीकाराच्चेति प्राहुः।

लक्षणायाः निमित्तम्

नागेशोऽपि मणिकारवत् आदौ अन्वयानुपपत्तिज्ञानमेव लक्षणायाः निमित्तमिति निरूपयति। तथा हि — लक्षणाज्ञानजन्यशाब्दबोधे अन्वयव्यतिरेकाभ्यां मुख्यार्थ-बाधज्ञानं कारणम्। मुख्यार्थबाधज्ञाने सति लाक्षणिकार्थबोधः, तदभावे तदभाव इत्यन्वयव्यतिरेकौ।

न च छत्रिणो यान्ति कुन्तान् प्रवेशय, काकेभ्यो दधि रक्ष्यताम् इत्यादौ मुख्यार्थानां छत्रिकुन्तकाकानां समभिव्याहृतक्रियासु यथाक्रमं कर्तृत्वकर्मत्वा-वधित्वैः अन्वये बाधाभावात् मुख्यार्थबाधरूपनिमित्तविरहात् कथं लक्षणेति वाच्यम्। मुख्यार्थबाध इत्यनेन समभिव्याहृतपदतात्पर्यविषये तात्पर्यविषयान्वये वा मुख्यार्थतावच्छेदकरूपेण मुख्यार्थासंसर्गस्य विवक्षितत्वात्। उक्तस्थलेषु तत्त-त्तात्पर्यविषयीभूतेषु छत्र्यच्छत्रिसमूहगमनभोजनार्थप्रवेशदध्युपघातकावधिकरक्षणेषु मुख्यार्थतावच्छेदकछत्रित्वादिरूपेण तदन्वयबाधोऽस्त्येव। अतो न दोषः।

---

[१४] पृ. १९-३०

एवं मुख्यार्थसंबन्धज्ञानमपि लक्षणाजन्यशाब्दबोधे कारणम्, अन्वयव्यतिरेकाभ्यामेव। मुख्यार्थसंबन्धज्ञाने सति लक्षणाजन्यशाब्दबोधः, तदभावे तदभाव इत्यन्वयव्यतिरेकौ।

तथा रूढिप्रयोजनान्यतरदपि तत्र कारणम्, अनुभवबलात्। रूढिर्नाम प्रयोगप्राचुर्यम्। गङ्गापदस्य हि तीरे प्रयोगप्राचुर्यमस्ति। प्रयोजनं शैत्यपावनत्वादिप्रतीतिः। तदुक्तं काव्यप्रकाशे —

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।।

लघुमञ्जूषायां लक्षणाविषये कृतो निष्कर्षः[१५]

परे तु इत्यादिना लघुमञ्जूषायां कृतो निष्कर्षस्तावत् — गङ्गायां घोष इत्यादौ तीरे शक्यतावच्छेदकस्य प्रवाहत्वस्य आरोपः। तथा च आरोपितेन प्रवाहत्वेन रूपेण तीरस्य बोधो भवति। सोऽपि शक्त्यैव। तथा च गङ्गापदवाच्यत्वेन प्रसिद्धो यः प्रवाहः तदन्यस्य तीरस्य आरोपितशक्यतावच्छेदकप्रवाहत्वरूपेण बोधो भवतीति कृत्वा लक्षणेति व्यवहारः। छत्रिणो यान्तीत्यादावपि अच्छत्रिषु छत्रिसाहचर्यात् छत्रित्वारोपः। काकेभ्यो दधि रक्ष्यतामित्यादौ दध्युपघातकेषु सर्वेष्वपि काकत्वारोपः। एवं शक्यतावच्छेदकरूपेण व्यक्तिविशेषबोधेऽपि लक्षणेति व्यवहारः। यथा कमलानि कमलानि इत्यादौ कमलत्वेन रूपेण सौरभविशिष्टकमलबोधः।

लक्षणास्थले शक्यतावच्छेदकारोपेण लक्ष्यार्थबोध इत्यत्र भाष्यमपि प्रमाणम्। तथा हि — "पुंयोगादाख्यायाम्" इति सूत्रे भाष्ये — गोपीत्यादौ गोपसंबन्धिस्त्रीत्वेन लक्षणायां तस्येदमिति शास्त्रेण तादृशार्थेऽण्-प्रत्ययान्तस्यैव साधुत्वनियमात् असाधुत्वापत्तिं दूषणमभिधाय —

"नावश्यमयमेवाभिसंबन्धो भवति तस्येदमिति किं तु तन्मूलकः सोऽयमित्यप्यभिसंबन्धोऽस्ति" इत्युक्त्वा "चतुर्भिः प्रकारैः अतस्मिन् स इत्येतत् भवति तात्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यात् मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय"

इत्युक्तम्। सोऽयमपीत्यादेः सोऽयमित्यपि विशेष्यविशेषणभावोऽस्तीत्यर्थः। तत्र कैयटेनोक्तम् — "आरोप्यते ताद्रूप्यम्, न तु मुख्यमित्यर्थः।" इति। आरोपे हेतवः तत्स्थत्वादयः। शक्यतावच्छेदकप्रकारक एव लक्ष्यार्थबोध इति भाष्याशयः।

---

[१५] ल.म. १३४

न्यायसूत्रकारो गौतमोऽप्याह — "सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्य-योगसाधनाधिपत्येभ्यो ब्राह्मणबालकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावे-ऽपि तदुपचारः" इति। तस्य भावः तद्धर्मः तदभावेऽपि तदुपचारः तच्छब्दव्यवहार इत्यर्थः। स च तद्धर्मारोपेण। आरोपनिमित्तानि सहचरणादीनि।

अत्र सूत्रे न्यायवार्तिकग्रन्थः — "साहचर्यं नाम यष्टिकया संबन्धः। तत्संबन्धात्तु यष्टिकावानित्येव स्यात् न तु यष्टिकेति। यष्टिकावानिति तु मुख्य एव। तस्मात् उपचारबीजमन्यद्वक्तव्यम्। उच्यते। यष्टिकायां तावदयं यष्टिकाशब्दो यष्टिकात्वजातिनिमित्तकः। तत्र संयुक्तसमवेतां जातिं ब्राह्मणे समवायेनाध्यारोप्य ब्राह्मणं यष्टिकेत्याह" इति। अनेन शक्यतावच्छेदकारोपो लक्षणेति वार्तिकाभि-प्रायः स्पष्टः। यष्टित्वारोपो ब्राह्मणे साहचर्यात्, मञ्चत्वारोपो बालेषु तात्स्थ्यात्, गङ्गायां तीरधर्मस्य आधारत्वस्यारोपः तत्सामीप्यात् इत्यादिकं न्यायसूत्रव्याख्यानेषु दृश्यते। एवं च शक्यार्थप्रवाहेण अत्यन्तसामीप्ये गङ्गायां तीरधर्मं घोषाधारत्व-मारोप्य गङ्गायां घोष इति प्रयोगः। व्यवहितसामीप्ये तु तीरे गङ्गात्वमारोप्य गङ्गायां घोष इति प्रयोगः — इति। अस्य नागेशमतस्य युक्तायुक्तत्वादिकं ग्रन्थे विवेचितमस्ति।

लक्षणाप्रभेदाः

सा च लक्षणा द्विविधा गौणी शुद्धा च। स्वनिरूपितसादृश्याधिकरणत्वसंबन्धेन शक्यसंबन्ध्यर्थप्रतिपादिका गौणी। स्वं शक्यार्थः। तदतिरिक्तसंबन्धेन शक्य-संबन्ध्यर्थप्रतिपादिका शुद्धा। प्रकारान्तरेणापि सा द्विविधा अजहत्स्वार्था, जहत्स्वार्था च। स्वशक्यार्थापरित्यागेन इतरार्थबोधनम् आद्या। तदपरित्यागश्च शक्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिना अन्वयित्वम्।

यथा छत्रिणो यान्तीत्यत्र एकसार्थवाहित्वेन रूपेण छत्रिणां गमने अन्वयः, कुन्तान् प्रवेशयेत्यत्र तीक्ष्णत्वेन रूपेण कुन्तानां प्रवेशे अन्वयः; काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वेन रूपेण काकानां रक्षणेऽन्वयः। तथा चोभयसाधारणरूपेण शक्यलक्ष्ययोरेकत्रान्वये अजहत्स्वार्था लक्षणेत्युक्तं भवति। स्वार्थपरित्यागेन इतरार्थबोधनं जहत्स्वार्था। परित्यागश्च शक्यार्थस्य केनापि रूपेण लक्ष्यार्थान्वयिना अनन्वयित्वम्। यथा गां वाहीकं पश्येत्यादौ। अत्र गोपदस्य गोसदृशे लक्षणायामपि शक्यार्थस्य गोः लक्ष्यार्थान्वयिदर्शनक्रियान्वयित्वविरहात् जहत्स्वार्थात्वं लक्षणायाः।

त्वचा ज्ञातमित्यादौ त्वक्शब्दस्य त्वगिन्द्रिये निरूढलक्षणा। असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकं तत्संबन्ध्यपरार्थबोधे निरूढलक्षणेति व्यवहारः।

जहदजहल्लक्षणेति तृतीयापि विधा तर्कसंग्रहदीपिकाप्रकाशिकादौ प्रतिपादिता। "यत्र वाच्यार्थस्यान्वयाभावः तत्र जहल्लक्षणा, यथा मञ्चाः क्रोशन्तीति। यत्र वाच्यार्थस्याप्यन्वयः तत्राजहल्लक्षणा। यथा छत्रिणो गच्छन्तीति। यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहल्लक्षणा यथा तत्त्वमसीति" इति दीपिकादौ न्यरूपि।

लक्षितलक्षणाविचारः[१६]

न्यायकोस्तुभे लक्षितलक्षणायाः विचारः विस्तरेण कृतः। स संगृह्यते। अत्र प्राञ्चः —

लक्षितलक्षणापि वृत्त्यन्तरम्। तथा हि द्विरेफो गुञ्जति इत्यादौ द्विरेफपदात् भ्रमरबोधः सर्वसिद्धः। स च न द्विरेफपदशक्त्या। तस्य द्वौ रेफौ यस्य स द्विरेफ इति बहुव्रीहिसमासतया पदसमुदायत्वेन शक्त्यभावात्। नापि द्विरेफपदलक्षणया। शक्तेरिव लक्षणाया अपि पदमात्रवृत्तित्वात्। तस्मात् रेफपदस्य रेफद्वयसंबन्धिनि लक्षणायां तात्पर्यग्राहको यो द्विशब्दः तत्समभिव्याहृतेन रेफशब्देन रेफद्वयसंबन्धिभ्रमरपदं लक्ष्यते। लक्षितेन च भ्रमरपदेन तादात्म्यरूपस्वशक्यसंबन्धेन भ्रमररूपार्थो लक्ष्यते इति द्विरेफपदस्य भ्रमरे लक्षितलक्षणारूपं वृत्त्यन्तरमावश्यकम्।

अथ द्विरेफपदलक्ष्यभ्रमरपदेन शक्त्यैव भ्रमरबोधसंभवेन भ्रमरपदस्य न भ्रमरे लक्षणेति चेत् — न। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः भ्रमरस्य द्विरेफपदलक्षितभ्रमरपदार्थत्वेऽपि द्विरेफपदार्थत्वाभावेन तत्र द्विरेफपदोत्तरविभक्त्यर्थान्वयानुपपत्तेः। मन्मते च द्विरेफपदस्यैव लक्षितलक्षणा वृत्तिरिति भ्रमरस्य द्विरेफपदार्थत्वात् नानुपपत्तिः। एवं च लक्षितस्य भ्रमरपदस्य लक्षणा लक्षितलक्षणा। सा च द्विरेफपदस्य वृत्तिः — इति वदन्ति।

मिश्रास्तु — शक्यसंबन्धो हि लक्षणा, न तु शक्यस्य साक्षात्संबन्ध एव, गौरवात्। एवं च परंपरासंबन्धेन लक्षणैव लक्षितलक्षणा। स्वशक्यपदघटितलक्षणा सेति तु यावत्। तथा च परंपरासंबन्धेन लक्षणाया एव लक्षितलक्षणात्वेन द्विरेफपदस्य स्वलक्ष्यभ्रमरपदोपस्थाप्यत्वरूपेण स्वलक्ष्यभ्रमरपदघटितपरंपरा-

---

[१६] न्या.को. पृ. ६३६

संबन्धेन भ्रमरत्वरूपेण भ्रमररूपार्थोपस्थापकत्वसंभवात् द्विरेफपदलक्षणयैवोपपत्तेः नातिरिक्तायाः लक्षितलक्षणाख्यायाः वृत्तेः कल्पनम् इति प्राहुः।

नवीनास्तु — द्विरेफपदात् उपदर्शितपरंपरासंबन्धेन भ्रमरत्ववर्वरत्वप्रस्तरत्वादीनामनियतोपस्थितौ तस्य भ्रमरपर्यायत्वमनुपपन्नम्। तस्मात् द्विपदस्य तात्पर्यग्राहकतया परंपरासंबन्धरूपलक्षणयैव द्विरेफसंबन्धी लक्ष्यः। स च योगार्थ एव। यौगिकव्युत्पत्तिप्रयोज्यत्वात्। स च प्रस्तरादावतिप्रसक्त इति भ्रमरत्वविशिष्टे रूढिरपि अङ्गीक्रियते। तथा च द्विरेफपदं योगरूढमेव पङ्कजादिपदवत् इति प्रवदन्ति। तथा च रेफद्वयसंबन्ध्यभिन्नो भ्रमर इति द्विरेफपदात् बोधः। संबन्धश्च पूर्वोक्तपरंपरारूपः।

गौणीवृत्तिः

गौण्यपि लक्षणैव लक्ष्यमाणगुणसंबन्धस्वरूपा यथा अग्निर्माणवक इति तर्कसंग्रहदीपिका।

ननु गङ्गायां घोष इत्यत्र तीरे शक्यस्य प्रवाहस्येव अग्निर्माणवकइत्यादौ माणवके शक्यस्याग्नेः साक्षात्संबन्धो न संभवतीति कथं लक्षणया निर्वाह इति चेत् — उच्यते। शक्यसंबन्धो हि लक्षणा। स च क्वचित् साक्षात्संबन्धः, क्वचित् परंपरासंबन्धः। एवं च शक्यस्याग्नेः स्वनिष्ठशुचित्ववत्त्वसंबन्ध एव लक्षणेति प्रकाशिकाकाराः। वेदान्तपरिभाषायां तु गौण्यपि लक्षितलक्षणैव। यथा सिंहो माणवक इत्यत्र सिंहशब्दवाच्यसंबन्धिक्रौर्यादिसंबन्धेन माणवकस्य प्रतीतेः इत्युक्तम्।

गौणीवृत्तिविषये मीमांसकमतम्

पूर्वमीमांसायां प्रथमाध्यायचतुर्थपादे तत्सिद्धिपेटिकायां "तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायाः" इति सूत्रेण तत्सिद्धिः जातिः सारूप्यं प्रशंसा भूमा लिङ्गसमवायः इति षट् गौण्याः वृत्तेः निमित्ततया निर्दिष्टानि। लक्षणायाः निमित्तानि तु सहचरणेत्यादिन्यायसूत्रे निर्दिष्टानि।

तत्सिद्धिः

तत्सिद्धर्नाम तत्कार्यकारित्वम्। यथा "यजमानः प्रस्तरः" इत्यत्र यजमानपदं यजमानकार्यकर्तृत्वरूपं गुणं पुरस्कृत्य प्रस्तरं बोधयति। तेन प्रस्तरस्य स्तरीत्वं भवति। यजमाननिष्ठकार्यकर्तृत्वसजातीयकार्यकर्तृत्वाश्रयः प्रस्तरः इति बोधः।

जातिः

जातिः जन्म। प्रजापतिमुखात् जातत्वमग्निब्राह्मणयोः श्रुतम्। अग्निर्वै ब्राह्मणः इत्यत्र एकमुखप्रभवत्वं गुणं पुरस्कृत्य अग्निशब्दो ब्राह्मणे वर्तते। अग्निनिष्ठ-प्रजापतिमुखप्रभवत्वसजातीयमुखप्रभवत्ववान् ब्राह्मण इति बोधः।

सारूप्यम्

सारूप्यं नाम शक्यनिष्ठगुणसजातीयगुणवत्त्वम्। यथा आदित्यो यूप इत्यत्र आदित्यवृत्तितेजस्वित्वादिगुणसजातीयगुणं पुरस्कृत्य आदित्यशब्दो यूपे वर्तते।

प्रशंसा

"अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः" इत्यत्र अपशुशब्दः घटादौ मुख्यः गवाश्वगतप्राशस्त्याभावरूपगुणयोगात् अजादौ गौणः सन् लक्षणया गवाश्वस्तुत्यर्थः। प्रशंसा अत्र गौणीवृत्तिघटिका।

भूमा

भूमा बहुत्वम्। "सृष्टीरुपदधाति" इत्यत्र सृष्टिवाचकशब्दघटितमन्त्रगतबहुत्व-समानाधिकरणसमुदायाश्रितत्वगुणयोगेन सृष्ट्यसृष्टिमन्त्रात्मकसमुदायिनः बोध्यन्ते।

लिङ्गसमवायः

अल्पत्वम्। "प्राणभृत उपदधाति" इत्यत्र प्राणभृदल्पत्वसमानाधिकरणसमुदा-याश्रयत्वगुणयोगेन प्राणभृदप्राणभृत्समुदायाश्रयीभूतसकलमन्त्रेषु गौणः प्राण-भृच्छब्दः।

न च गौण्याः लक्षणातो न भेद इति वाच्यम्। स्वशक्यवृत्तिगुणानामेव यत्र संबन्धित्वेन रूपेण बोधः तत्र लक्षणा, क्रूरत्वत्वादिना बोधे तु गौणीति तयोर्भेदात्।

गौण्याः लक्षणायामन्तर्भावः

अत्र वदन्ति — लक्षणातिरिक्ता जघन्या गौणी वृत्तिः स्वीकरणीया। सिंहो माणवक इत्यत्र सिंहशब्दस्य माणवके वृत्तिः गौणी। न चात्र सिंहपदशक्यार्थसिंह-सादृश्यरूपसंबन्धेन सिंहपदस्य माणवके वृत्तिः लक्षणैवेति वाच्यम्। यतः शक्य-संबन्धरूपा वृत्तिः संबन्धितीरादिकमुपस्थापयति। तस्य शब्दबोधे भानार्थमेव लक्षणावृत्तेः स्वीकारात्। न तु तस्यैव शाब्दबोधे भानम्। स्वस्य स्वोपस्थापक-

त्वाभावात्। ततश्च सिंहसादृश्यस्य लक्षणात्वे तस्य शाब्दबोधे भानं न निर्वहति। तस्मात् शक्यवृत्तिलक्ष्यमाणगुणसंबन्धः गौणीवृत्तिः। सिंहपदस्य सिंहवृत्तिशौर्यादि-गुणलक्षणया तद्वति माणवके वृत्तिः। तदुक्तम् —

"लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता" इति। अत एव वृत्तिद्वयात्मिका लक्षणापेक्षया दुर्बलेति।

वस्तुतस्तु सादृश्यविशिष्टानुयोगिकः शक्यसंबन्धः गौणी वृत्तिः। सिंहशब्दस्य सादृश्यविशिष्टे लक्षणा। सादृश्यं च सिंहवृत्तिसादृश्यादिगुणवत्त्वम्। तच्च लक्ष्य-तावच्छेदकम्। तदवच्छिन्नानुयोगिकः शक्यसंबन्धो लक्षणैव। सादृश्यपर्यवसितगुणैः स्वावच्छिन्नानुयोगिकत्वसंबन्धात् सा गौणी इति कथ्यते। इत्थं च लक्ष्यतावच्छे-दकगुणानां शाब्दबोधे भानमुपपद्यते। अतो न गौणी वृत्तिद्वयात्मिका अतिरिक्ता।

निरूढलक्षणा

अनादितात्पर्यविषयीभूतार्थनिष्ठा लक्षणा निरूढलक्षणा। तात्पर्ये अनादित्वं च स्वप्रयोज्यशाब्दबोधध्वंसकालीनस्वप्रयोज्यशाब्दबोधसामान्यकत्वम्।

आधुनिकलक्षणा

सादितात्पर्यवती लक्षणा आधुनिकलक्षणा। सा च सांप्रतिकलक्षणा स्वारसिक-लक्षणेत्येवं व्यवह्रियते।

देशिककृतः वृत्तिविभागः

वृत्तिर्द्विधा अभिधोपचारभेदात्। व्युत्पत्तिसिद्धार्थ एव वृत्तिः अभिधा, यथा सिंहशब्दस्य मृगेन्द्रे। सा जातिगुणादिविषयभेदात् योगरूढितत्समुच्चयभेदाच्च बहुविधा। मुख्यार्थबाधे सति तदासन्ने वृत्तिरूपचारः। आसत्तिश्च द्विधा मुख्यार्थ-संबन्धः तद्गुणसंबन्धश्चेति। तत्र पूर्वेण प्रवृत्तिर्लक्षणा। यथा गङ्गायां घोष इत्यत्र गङ्गाशब्दस्य प्रवाहविशेषरूपवाच्यसंबन्धिनि तीरे। द्वितीयेन प्रवृत्तिः गौणी। यथा सिंहो देवदत्त इत्यत्र सिंहशब्दस्य शौर्यादिगुणयोगिनि देवदत्ते।

अयं विभागो युक्ततमः। यतो हि न्यायसूत्रकारः "सहचरणस्थाने"त्यादिसूत्रे उपचारनिमित्तानि कथयन् लक्षणागौण्योः उदाहरणानि च प्रदर्शयन् उपचारशब्दः लक्षणागौण्योः साधारण इति सूचयति।

पदार्थविचारः

एतावता पदपदार्थयोः संबन्धमधिकृत्य विचारः प्रस्तुतः अथ शक्त्यादिसंबन्धं पुरस्कृत्य पदेन प्रतिपाद्यमानमर्थमधिकृत्य विचार्यते।

न्यायसूत्रानुसारेण पदार्थनिरूपणम्

"ते विभक्त्यन्ताः पदम्"[१७] इति न्यायसूत्रम्। तच्छब्देन पूर्वसूत्रप्रस्तुता विकृता वर्णाः परामृश्यन्ते। ते वर्णाः विभक्त्यन्ताः पदसंज्ञका भवन्ति। विभक्तिश्च द्विविधा नामिकी = सुप्, आख्यातिकी = तिङ् चेति। ब्राह्मणः पचति इत्युदाहरम्। तथा च सुबन्तं तिङन्तं च पदमित्युक्तं भवति। उपसर्गनिपातानामव्ययसंज्ञकत्वात् "अव्ययादाप्सुपः" इति सूत्रेण लुप्तां सुपमाश्रित्य पदसंज्ञकत्वम्। पदसंज्ञार्थमेव ततः सुपो लोपविधानात्। तत्र नामरूपस्य सुबन्तस्य पदस्यार्थः क इति परीक्ष्यते। गौरिति पदमुदाहरणम्। गोपदस्य किं व्यक्तिरर्थः उत आकृतिः अथवा जातिरिति संशयः। संशयबीजं तु तेषामविनाभावः। अविनाभावेन वर्तमानासु व्यक्त्याकृतिजातिषु गौरिति शब्दः प्रयुज्यते। तत्र न ज्ञायते किम् अन्यतमः पदार्थः उत सर्वे इति। व्यक्तिः द्रव्यम्।

तत्र व्यक्तिवादिनः — वैद्याय गां ददातीति गोपदार्थस्य दानं तस्य परिग्रहः दश गावः एकादश गावः इत्यादिसंख्या व्यक्तेः पदार्थत्वे संगच्छन्ते। जातेः अमूर्तत्वात् एकत्वाच्च ते न संगच्छन्ते। एवं गौः वर्धते अपचीयते इति उपचयापचयौ सावयवद्रव्ये उपपद्येते, न तु निरवयवायां जातौ। एवं गोहितं गोसुखम् इति गोपदार्थे व्यक्तौ सुखादिसंबन्धात् संगच्छते। जातौ तदयोगान्न संगच्छते। एवम् अनुबन्धः सरूपप्रजननसंतानः गौर्गां जनयतीति व्यपदिश्यमानः द्रव्यस्योत्पत्ति-धर्मकत्वात् युज्यते, न जातेः विपर्ययादिति वदन्ति।

जातिवादिनः — न व्यक्तिः पदार्थः, जातिं विना व्यक्तेः अवस्थित्यभावात्। अतो जातिरेव गवादिपदार्थः। जातिसहचरितत्वात् व्यक्तौ जातिशब्दस्य लाक्षणिकः प्रयोग इत्याहुः।

आकृतिवादिनस्तु अवयवानां नियतसंनिवेशरूपा आकृतिरेव पदार्थः। तस्यां गृह्यमाणायां अयं गौः अन्यश्च इति द्रव्यभेदबुद्धिः भवति। अत आकृतिरेव पदार्थः। जातिपक्षे प्रोक्षणानयनदानादीनामनन्वयात् इत्याहुः। एवं संशये सिद्धान्तमाह सूत्रकारः —

---

[१७] न्या.सू. २.२.५८

"व्यक्त्याकृतिजातयस्तु पदार्थः"[१८] इति। एतत्सूत्रस्य अर्थं सुदूरं विचार्य जात्याकृतिविशिष्टव्यक्तौ गवादिपदानां शक्तिरिति निर्धारणं चक्रुः।

येष्वर्थेषु जातिर्न संभवति तत्र व्यक्तिमात्रं शब्दवाच्यम्, यथा आकाशादिपदार्थे। आकाशस्य एकत्वेन जात्यसंभवेन आकाशव्यक्तिमात्रमाकाशशब्दार्थः। एवं सज्ञात्वेन प्रसिद्धानां डित्थादिशब्दानां वाच्यस्यार्थस्य एकत्वेन जातिशून्यत्वात् व्यक्तिवाचकत्वम्। एते द्रव्यशब्दा इत्युच्यन्ते।

गुणशब्दास्तु केचित् स्वगतजात्यवच्छिन्नं गुणमभिधाय तावत्येव विरमन्ति यथा रूपरसगन्धादिशब्दाः। तेषां रूपत्वगन्धत्वाद्यवच्छिन्नमात्रवाचकत्वात्। केचित्तु स्वजात्यवच्छिन्नं गुणमभिधाय तदाश्रयद्रव्यमपि बोधयन्ति, द्रव्यसामानाधिकरण्येन प्रयोगदर्शनात्, यथा शुक्लनीलादिशब्दाः "शुक्लः पटः" "नीलमुत्पलम्" इत्यादौ। शुक्लादिशब्दा अपि यदा गुणपदोपबद्धा भवन्ति तदा भावप्रत्ययान्तपदवत् गुणमात्रवाचकाः, न द्रव्यपर्यन्तवाचकाः। यथा "अश्वस्य शुक्लो गुणः" "अश्वस्य शौक्ल्यम्" इत्येव प्रयोगदर्शनात्।

मीमांसकमतम्

गवादिपदानां जातिवाचकत्वम्

सूत्रभाष्यवार्तिकादिग्रन्थस्थविचाराणां संग्रहपूर्वकं शास्त्रदीपिकायां यत् प्रतिपादितं तदत्र लिख्यते। व्यक्तीनामनन्तत्वात् सर्वासु व्यक्तिषु गवादिशब्दानां शक्तिग्रहोऽसंभवी। एकस्यां व्यक्तौ शक्तिश्चेत् अगृहीतशक्तिकव्यक्तेः शाब्दबोधासंभवः। अत एव शक्तिं विनापि बोधोत्पत्त्या व्यतिरेकव्यभिचारः। अनन्तासु व्यक्तिषु शक्तिस्वीकारे अनन्तशक्तिकल्पना च प्रसज्यते। न च जातेरुपलक्षणत्वात् न शक्त्यानन्त्यमिति वाच्यम्। शक्तिग्रहकाले हि जातिरूपलक्षणं, न तु बोधकाले। बोधो हि व्यक्तिमात्रस्य। तद्यथा अक्षत्रयमेकापवरकस्थमेकापवरकस्थित्या उपलक्ष्य कश्चित् कंचिदाह — "य एतस्मिन्नपवरकेऽधुना स्थिताः तेऽक्षशब्दाभिधेयाः" इति। तत्र यद्यपि व्युत्पत्तिसमये अपवरकस्थितिर्नाम एकमुपलक्षणं लभ्यते तथापि शब्दस्तदनादरेण व्यक्तित्रयमात्रमेव स्वरूपेणाभिधत्ते इति भवति शक्तित्रयमक्षशब्दस्य विदेवने विभीतके रथावयवे च। एवं गवादिशब्देष्वपि जातेरुपलक्षणत्वेऽपि अनन्तव्यक्तिषु अनन्तशक्तिकल्पनमवर्जनीयम्।

---

[१८] न्या.सू. २.२.६५

अपि च यदि विशेषणरहितं धर्मिस्वरूपमभिधेयं तदा गोशब्दात् गोव्यक्तिः प्रतीयमाना अश्वादिव्यक्तिव्यावृत्ता न प्रतीता स्यात्। न ह्यसाधारणमाकारमन्तरेण द्रव्यं द्रव्यान्तरव्यावृत्तं प्रतीयते। ततश्च गौः इत्युक्ते सर्वत्राविशिष्टा प्रतीतिः स्यात्। यथाह भाष्यकारः — अव्यपदेश्यत्वेन सर्वत्राविशेषात् — इति।

अथैतद्दोषपरिहाराय अभिधानसमयेऽपि (बोधकालेऽपि) जातेरुपलक्षणत्वं स्वीक्रियत इति चेत् — तर्हि व्यक्तिमभिदधत् शब्दः जातिमुपलक्षणमुपादाय तज्जातीयरूपेणाभिधत्ते गोजातीयमिति इति वक्तव्यम्। ततश्च प्रथमं जातिरभिधातव्या। न हि जातिमनभिधाय तज्जातीयत्वेन रूपेण व्यक्तिरभिधातुं शक्यते। ततश्च विशिष्टाभिधानमेव शब्दान्तरेणापन्नं, न शुद्धव्यक्त्यभिधानम्। विशिष्टाभिधाने च पूर्वतरं विशेषणमभिधातव्यम्, "नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते" इति न्यायात्। विशेषणाभिधाने च तत एव तदत्यन्ताविनाभूतव्यक्तेः आक्षेपात् प्रतीतिसिद्धेः न तत्र अभिधानशक्तिकल्पनावसरः।

किं च गोशब्दे उच्चरिते सति गामानयेत्यादौ गोव्यक्तिषु का वा व्यक्तिरानेयेति संदेहो जायते, न कस्यांचिन्निर्णयः। यस्मिन् विषये संदेहः न तस्य शब्दवाच्यता। शब्दस्य निश्चयजनकत्वात्। सामान्यरूपा जातिस्तु निर्णीयत इति भवत्यभिधेया।

किं च खण्डमुण्डादिरूपा गोव्यक्तयो विलक्षणा इति व्यक्त्यभिधानपक्षे गोशब्दोच्चारणे सति विलक्षणाकारैव बुद्धिः स्यात् एकाकारा तु बुद्धिरुत्पद्यते गौरिति। अतो जातिरभिधेया। अपि च गोत्वान्वये सति गोशब्दप्रयोगात् गोत्वव्यतिरेके अश्वादिषु गोशब्दप्रयोगाभावाच्च गोत्वजातिरभिधेया।

लिङ्गसंख्यादिव्यवहाराङ्गत्वमपि जातेः व्यक्त्यभेदात् उपपद्यते। यदा तु जातेः व्यक्तेश्च भेद एव तदा जातिवाचिशब्दानां व्यक्तौ लक्षणाङ्गीकारात् लिङ्गसंख्याकारकादीनां तत्रान्वयात् नानुपपत्तिः कापि। यत्र तु "पशुना यजेत" "अरुणया क्रीणाति" इत्यादौ करणत्वश्रवणं तत्र पशुत्वारुण्यादिजातिगुणयोरमूर्तयोरपि द्रव्यपरिच्छेदद्वारा मुख्यमेव करणत्वमुपपन्नम्। अधिकरणसंप्रदानादिरूपं तु अमूर्तयोस्तयोर्जातिगुणयोरसंभवात् जातिव्यक्त्योः गुणगुणिनोश्चाभेदं स्वीकृत्य वा व्यक्तिगुणिनोः लक्षणां स्वीकृत्य वा समर्थनीयम्। तस्माज्जातिरेवाभिधेया न व्यक्तिरिति सिद्धम्।

मणिग्रन्थस्थाः गवादिपदशक्तिविचाराः

मणिकाराः शब्दखण्डे शक्तिवादाख्ये प्रकरणे प्रथमतः पदानां कार्यान्विते शक्तिरिति मतमनूद्य विस्तरेण दूषयामासुः। ततोऽन्वितपदार्थे एव पदानां शक्तिरिति निर्णीते सति पदशक्यः पदार्थः क इति विचारं प्रास्तुवन्।

तत्र व्यक्तेः पदार्थत्वं निरस्य प्राभाकरमतानुसारेण जातेः पदार्थत्वं व्यक्तिबोधप्रकारं च प्रत्यपादयन्। ततः भट्टमते जातिरेव शक्या लाघवात्, व्यक्तिस्तु आक्षेपलभ्येति न्यरूपयन्।

ततः मण्डनमिश्रमतेऽपि जातिरेव शक्या, व्यक्तिधीस्तु लक्षणयेति उपापीपदन्। ततो जात्यादिविशिष्टे शक्तिरिति स्वमतं सयुक्तिकं प्रातिष्ठिपन्। सर्वमिदं ग्रन्थे संगृहीतम्। ततो विज्ञासवः जानीयुः।

न्यायकुसुमाञ्जल्यनुसारेण गवादिपदशक्तिविचारः

कुसुमाञ्जलौ द्वितीयस्तबके जातिरेव पदार्थः न व्यक्तिः इति मीमांसकमतमनूद्य, तथा सति शब्दात् व्यक्त्यलाभप्रसङ्ग इति दूषयित्वा तत आक्षेपतो व्यक्तेर्लाभ इत्याशङ्क्य विस्तरेण तद्दूषितम्। तथा हि कोऽयमाक्षेपो नाम, न तावत् अनुमानम्। अनन्ताभिः व्यक्तिभिः सह संगतिग्रहः यथा न संभवति, तथा ताभिः सह अविनाभावरूपव्याप्तिग्रहस्याप्यसंभवात्। संभवे वा तद्वदेव संगतिग्रहस्यापि संभवात् व्यक्तिशक्तिपरित्यागानौचित्यात्।

नन्वर्थापत्तिराक्षेप इति चेत् — न। अर्थापत्तिस्थले उपपादकं विना किंचित् अनुपपन्नं हि सत् स्वोपपादकतया आक्षिपति। यथा रात्रिभोजनं विना अनुपपन्नं दिवा अभुञ्जानस्य पीनत्वं रात्रिभोजनमाक्षिपति। प्रकृते व्यक्तेराक्षेप इत्युक्ते उपपादकत्वेनाभिमतया आक्षेप्यया व्यक्त्या विना कोऽर्थोऽनुपपन्न इति पृच्छामः। न च जातिरेवानुपपन्नेति वाच्यम्। व्यक्तिनाशव्यक्त्यनुत्पाददशायामपि व्यक्तिं विना जातेः सत्त्वात्।

ननु न जात्या व्यक्त्याक्षेपः, किं तु व्यक्तिज्ञानं विना जातिज्ञानमनुपपन्नमिति जातिज्ञानेन व्यक्तिज्ञानमाक्षिप्यत इति चेत् — न। जातिमात्रे शक्तिरिति वदतस्तव व्यक्तिज्ञानाभावेऽपि शब्दात् जातिज्ञानस्योत्पादात्।

ननु ज्ञानस्य व्यक्तिविषयकत्वं विना जातिविषयकत्वमनुपपन्नमिति जातिविषयकत्वेन व्यक्तिवषयकत्वस्य आक्षेप इति चेत् — तर्हि ज्ञानस्य व्यक्त्यविषयकत्वे जातिविषयकत्वासंभवात् शब्दात् जायमानं ज्ञानं जातिव्यक्त्युभयविषयकमेव

स्वीकार्यमिति किमनुपपन्नं सत् किं प्रतिपादयेत्। ज्ञातं हि अनुपपन्नं सत् अज्ञातं ज्ञापयेत्। उभयोरपि ज्ञातत्वे आक्षेप्याक्षेपकभावायोगात्। तथा च आक्षेपात् व्यक्तिभानासंभवात् गवादिशब्दानां जातिविशिष्टव्यक्तिशक्तत्वमावश्यकमिति।

वैयाकरणा अपि जातिविशिष्टव्यक्तिशक्तिपक्षमेव आद्रियन्ते इति भाष्यकैयट-भूषणादिग्रन्थोद्धारपूर्वकं विस्तरेण ग्रन्थे न्यरूपयम्।

विशिष्टाद्वैते जातिविशिष्टव्यक्तिशक्तिस्वीकारः

विशिष्टाद्वैतवेदान्तिनोऽपि जातिविशिष्टशक्तिपक्षमेव समर्थयन्ते। तत्त्वमुक्ता-कलापे[१९] —

> व्यक्तिः शब्दैर्न बोध्या यदि, न खलु भवेदन्वितज्ञप्तिसिद्धिः
> तच्छक्तिर्व्यक्तिमात्रे न च भवति, यतः स्वोपलम्भादिबाधः।
> धर्मो धर्मी च नैकं किमपि, न च तयोर्भिन्नयोरप्यभेदः
> तस्मात् तां तद्विशिष्टामभिदधति पदान्यन्यथा गत्यभावात्।।
> जातिं व्यक्त्या विहीनां स्पृशति न धिषणा तेन जातौ प्रवृत्ता
> शक्तिर्व्यक्तिं स्पृशेच्चेत् स्थित इह वचसां तद्विशिष्टावगाहः।
> जातेर्बोधः स्वहेतोः, स्थितिरपि हि भवेत् क्वापि गोत्वोक्तिनीत्या
> शब्दात् तत्पारतन्त्र्यं स्फुरति यदि, पराबोधने तन्न शक्यम्।।

इत्यादिश्लोकैः जातिविशिष्टे शक्तिः निगमान्तमहादेशिकैः स्थापिता।

तर्कताण्डवकारमतम्

द्वैतवेदान्तनिष्ठाः व्यासतीर्थश्रीचरणाः तर्कताण्डवे जातिशक्तिपक्षे दोषाष्टकं, व्यक्तिलक्षणापक्षे दोषनवकं, व्यक्त्याक्षेपपक्षे दोषषट्कं, विशिष्टशक्तिपक्षे दोषाष्टकं च प्रदर्श्य व्यक्तिशक्तिपक्षं समर्थितवन्तः। जात्यादिकं तु प्रत्येकं तेषु तेषु शब्देषु प्रवृत्तिनिमित्तमात्रमिति न्यरूपयन्।

गदाधरभट्टाचार्यमतम्

गदाधरभट्टाचार्याः शक्तिवादान्ते जातिशक्तिवादे व्यक्तिशक्तिवादे व्यक्त्याक्षेपवादे व्यक्तिलक्षणापक्षे च गुणदोषविचारं कृत्वा जातिविशिष्टशक्तिवादं समस्थापयन्। सर्वमिदं मया ग्रन्थे सुष्ठु प्रतिपादितम्। जिज्ञासवः अवलोकयन्तु।

---

[१९] त.मु.क. ४-७८, ७९

अद्वैतवेदान्तिनां मतम्[२०]

वेदान्तपरिभाषोक्तरीत्या शक्तिवादः संगृह्यते। पदार्थो द्विविधः शक्यो लक्ष्यश्चेति। तत्र शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः। यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः। सा च पदार्थान्तरम्। सिद्धान्ते कारणेषु कार्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात्। सा च तत्तत्पदजन्यपदार्थ-ज्ञानरूपकार्यानुमेया। तादृशशक्तिविषयत्वं शक्यत्वम्। पदशक्यत्वं च जातेरेव। न व्यक्तेः। व्यक्तीनामानन्त्येन गुरुत्वात्। कथं तर्हि व्यक्तिभानमिति चेत् — जातेः व्यक्तिसमानसंवित् संवेद्यत्वात्।

यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती न तु ज्ञाता। जातौ तु सा ज्ञाता हेतुः। न च व्यक्त्यंशे शक्तिज्ञानमपि कारणम्, गौरवात्। अथ वा व्यक्तेर्लक्षणया अवगमः। यथा नीलो घटः इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा, तथा जातिवाचकस्य तद्विशिष्टे लक्षणा। तदुक्तम् — अनन्यलभ्यः शब्दार्थ इति।

निपातार्थविचारः

स्वराद्यन्तर्गणानां चादीनां प्रादीनामुपसर्गाणां च निपातसंज्ञा भवति। तथा "अधिरीश्वरे" इत्यतः प्राक्पठितानां च केषांचित् निपातसंज्ञा विहिता। तेषां निपातसंज्ञकानां शब्दानां द्योतकत्वं वाचकत्वं वेति विषये नैयायिकानां वैयाकरणानां च मतभेदो दृश्यते। नैयायिकाः प्रादीनां द्योतकत्वं चादीनां वाचकत्वं च आचक्षते। वैयाकरणाः निपातसंज्ञकानां सर्वेषामपि द्योतकत्वमेव, वैषम्ये बीजाभावादिति मन्यन्ते।

नैयायिकमतम्

तत्र नैयायिकमतमनूद्यते। तत्त्वचिन्तामणौ शब्दखण्डे उपसर्गवादः इति किंचित् प्रकरणमस्ति। तत्रेत्थं निरणायि —

उपसर्गास्तु द्योतकाः न तु वाचकाः। द्योतकत्वं च धातोरर्थविशेषे तात्पर्य-ग्राहकत्वम्। तदुपसंदानेन तत्र शक्तिर्वा; न तु धात्वर्थाभिधायकत्वम्। पौनरुक्त्यापत्तेः।

ननु प्रजयतीत्यादौ प्रकर्षस्य, विजयते इत्यादावतिशयस्य, अभ्यागच्छतीत्या-दावाभिमुख्यस्य सामीप्यस्य च प्रतीतौ उपसर्गान्वयव्यतिरेकानुविधानात् पदान्त-

---

[२०] वे.प. पृ. २६५

राणामिवोपसर्गाणामप्यर्थविशेषे शक्तिः। न च प्रतिष्ठत इत्यत्र गमनविषयकधीर्न स्यात्। प्रशब्दस्य प्रकर्षवाचित्वेन अतिशयेन गमनार्थधीप्रसङ्गादिति वाच्यम्। तत्र प्रशब्दस्य धात्वर्थावरुद्धार्थत्वात्। तच्च गमनमेव। धातोरिव तस्याप्यनेकार्थत्वादिति चेत्।

अत्रोच्यते। आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्वम्। अतः प्रतिष्ठत इत्यत्र गमनं धात्वर्थ एव। प्रशब्दार्थत्वे आख्यातार्थभावनान्वयो न स्यात्। प्रकृतिप्रत्यययोः संभूयान्वयबोधकत्वनियमात्। एवं च प्रोत्तरस्थात्वेन गमने शक्तिरिति प्रशब्दः शक्तावच्छेदको न शक्त इति औपसन्दानिकी शक्तिरेव द्योतकत्वम्।

यद्यपि प्रकर्षाभिमुख्यसामीप्यादेरुपसर्गवाच्यत्वेऽपि तद्विशिष्टधात्वर्थान्वयो भावनायां संभवत्येव, ओदनं पचति इत्यत्र ओदनविषयकपाकान्वयवत्; तथापि उपसर्गस्य शक्तावच्छेदकत्वं न शक्तत्वम्, गौरवात्। तथा च प्रोतरजित्वेन प्रकृष्टजये शक्तिः। एवं हि क्लृप्तविशेष्यशक्तेः विशेषणविषयकत्वमात्रं कल्प्यते। अन्यथा तु शक्त्यन्तरमेव।

न चैवं जिपूर्वप्रत्वेन प्रकृष्टजये शक्तिरस्त्विति वाच्यम्। धात्ववाच्यत्वे भावनानन्वयप्रसङ्गात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः।

अथवा प्रतिष्ठत इत्यत्र स्थितिविरोधिलक्षणया धातोः गमनोपस्थितिः। प्रशब्दस्तु तात्पर्यग्राहकः। अनन्यलभ्यस्य शब्दार्थत्वात्। प्रजयतीत्यादावपि विशेष्यवाचकस्य धातोः विशिष्टे लक्षणा। विशेष्यात् विशिष्टस्यान्यत्वात्। प्रादिस्तात्पर्यग्राहकः। न हि शक्तिं विनापि धातुतः प्रतीतिसंभवे शक्तिकल्पनं युक्तम्। अनन्यलभ्यस्य शब्दार्थत्वात्।

यदि चोपसर्गस्य वाचकत्वं स्यात् तदा "निपातस्यानर्थकस्यापि प्रातिपदिकसंज्ञा वक्तव्या" इति वार्तिकमनर्थकं स्यात्। अर्थवत्सूत्रेणैव तस्य प्रातिपदिकसंज्ञाया लाभात्। तस्मात् उपसर्गस्य द्योतकत्वमेव।

न च व्यतिसे इत्यत्र धातोरभावात् उपसर्ग एव वाचक इति वाच्यम्। तत्र लुप्तस्य स्मृतस्य धातोरेवार्थप्रत्यायकत्वात्। धातुलोपमजानतां तु तत्रार्थप्रत्ययाभावात् इति।

जगदीशतर्कालंकारेण तु चादीनां निपातानां वाचकत्वं प्रत्यपादि। एतेन निपातसंज्ञकेषु उपसर्गाणां द्योतकत्वं चादीनां वाचकत्वं च नैयायिकाभिमतमिति स्पष्टम्।

वैयाकरणमतम्

अत्राहुः भूषणसारकाराः — प्रादयो द्योतकाः चादयो वाचकाः इति नैयायिकमतमयुक्तम्। वैषम्ये वीजाभावात्। तथा हि —

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते यथा।।

येन हेतुना प्रादयो द्योतकाः तेनैव हेतुना चादयो निपाताः द्योतकाः। अयं भावः — ईश्वरमनुभवतीत्यादौ अनुभवादिरूपोऽर्थः प्रतीयते। स च न धात्वर्थः। भवतीत्यत्रापि अनुभवादिप्रतीत्यापत्तेः। नोपसर्गार्थः, तथा सति तस्य आख्यात-प्रकृत्यर्थत्वाभावेन तत्राख्यातार्थकालादेः अनन्वयापत्तेः। प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वमिति व्युत्पत्तेः। अनुगच्छतीत्यादावपि अनुभवार्थप्रतीत्यापत्तेश्च। नापि उपसर्गविशिष्टधात्वर्थः। गौरवात्। अतो भूधातोरेव विद्यमानत्वार्थकस्य अनुभवे लक्षणा। उपसर्गस्तात्पर्यग्राहक इत्यस्तु। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति।

तच्च चादिषु निपातेष्वपि तुल्यम्। चैत्रमिव पश्यतीत्यादौ चैत्रपदस्य सादृश्यविशिष्टे लक्षणा। इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वादिति। तत्र स्वयं युक्त्यन्तरमाह — उपास्येते हरिहरौ इति। तत्र हि उपासना किमुपसर्गार्थः, उत उपसर्गविशिष्टस्य धातोः, अथवा धातुमात्रस्य। नाद्यः, तथा सति स्वार्थफलव्यधि-करणव्यापारवाचकत्वरूपस्य सकर्मकत्वस्यानुपपत्तेः। आस्-धातोः उपासनारूप-फलवाचकत्वाभावात्। न चेष्टापत्तिः। ततः कर्मणि लकारानापत्तेः। न द्वितीयः, गौरवात्। तृतीये तु आगतं द्योतकत्वम्। तात्पर्यग्राहकत्वलाभात्। तत् चादिष्वपि तुल्यमित्याह —

तथान्यत्र निपातेऽपि लकारः कर्मवाचकः।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः।।

अन्यत्र — साक्षात्क्रियते अलंक्रियते ऊरीक्रियते शिव इत्यादौ। अत्रापि धातोः तत्तदर्थकर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वक्तव्यमिति उपसर्गवत् चादीनामपि द्योतकत्वमिति भावः।

न च चादिनिपातानां वाचकत्वे "चार्थे द्वन्द्वः"[२१] इत्यादिसूत्रमेव प्रमाणम्, प्रादीनां वाचकत्वे तु प्रमाणानुपलम्भात् द्योतकतैवोचितेति वाच्यम्। प्रादीनां

---

[२१] सू. २.२.२९

वाचकत्वेऽपि "ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्"[२२] इत्यादिसूत्राणां प्रमाणत्वात्। एवमन्या अपि युक्तयो द्रष्टव्याः।

निपातानां द्योतकत्वं मीमांसकसंमतम्

आकृत्यधिकरणवार्तिके —

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णये।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः।।
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
तदर्थवाचकौ तौ तु वाचकः स विचार्यते।।

इत्युक्तम्। अयमनयोः कारिकयोरर्थः — नामाख्यातोपसर्गनिपातभेदेन चतुर्विधे पदे द्विविधस्य नामाख्यातरूपस्य अर्थनिर्णयः क्रियते। कुतः? संशयोत्पत्तेः। नामार्थो जातिर्वा, व्यक्तिर्वा, धात्वर्थो व्यापारः फलं वा, उभयं वा इति संदेहे तन्निर्णयस्य कर्तव्यत्वात्। उपसर्गनिपातयोस्तु अर्थनिर्णयो न क्रियते। हि = यतः तयोः उपसर्गनिपातयोस्तु अर्थाभिधाने व्यापारः शक्तिलक्षणान्यतररूपः नैव विद्यते। तौ यदर्थद्योतकौ यस्यार्थं द्योतयतः स नामाख्यातात्मको वाचकः शब्दः विचार्यते — इति। अनेनोपसर्गनिपातयोः द्योतकत्वमेव कुमारिलाभिमतमिति स्पष्टम्।

नागेशमतम्

नागेशस्तु लघुमञ्जूषायां सूदूरं विचार्य एवं निर्णयति स्म — उपसर्गाणां द्योतकत्वमेव। तदनुसारेण सर्वेषां निपातानां द्योतकत्वकथनं न युक्तम्। किं तु केषांचिन्निपातानां द्योतकत्वं केषांचित् वाचकत्वम्। तत्राप्येकस्यैव निपातस्य कार्यवशेन वाचकत्वं द्योतकत्वमपीत्येव युक्तम्। सर्वेषां निपातानां वाचकत्वमिति तु न युक्तम् — इति। एतत् सर्वं सोदाहरणं ग्रन्थे विवृतम्। निपातार्थविचार-प्रसक्तानुप्रसक्त्या नञर्थविचारः एवकारार्थविचारः इवशब्दार्थविचारः अन्येषामपि केषांचिन्निपातानामर्थविचारः नानामतानुसारं ग्रन्थे विस्तरेण प्रस्तुताः सन्ति। तेऽपि जिज्ञासुभिस्सावधानं द्रष्टव्या इति प्रार्थये।

समासार्थविचारः

"समर्थः पदविधिः"[२३] इति सूत्रम्। पदसंबन्धी यो विधिः कार्यं स समर्थाश्रितो बोध्य इति सूत्रार्थः। समासस्य पदविधित्वात् स समर्थपदाश्रितो भवति। तत्र

---

[२२] सू. ३.३.१२६
[२३] सू. २.१.१

किमिदं सामर्थ्यमिति जिज्ञासायां व्यपेक्षारूपमिति नैयायिकादयः एकार्थीभाव-रूपमिति वैयाकरणाः। एतत्तत्वं प्रथमतो बुद्धौ धारणीयम्। तदर्थम्। उपोद्घात-रूपेण किंचित् प्रस्तूयते।

सामर्थ्यं द्विविधम् व्यपेक्षालक्षणम् एकार्थीभावलक्षणं च। तत्र स्वस्वार्थप्रति-पादकानां पदानामाकाङ्क्षावशात् यः परस्परमन्वयः तत् व्यपेक्षाभिधं सामर्थ्यम्। विशिष्टा अपेक्षा व्यपेक्षेति व्युत्पत्तेः। संबद्धार्थः समर्थ इति व्युत्पत्तेश्च। इदं च राज्ञः पुरुष इत्यादिवाक्य एव भवति। तत्र च एकैकस्य शब्दस्य यो यः संनिहितः योग्यश्च तेन तेनान्वयो भवति। यथा राज्ञः पुरुषोऽश्वश्चेति, राज्ञो देवदत्तस्य च पुरुष इति, ऋद्धस्य राज्ञः पुरुष इति च। एकार्थीभावलक्षणं सामर्थ्यं तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथक् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। संगतार्थः समर्थः संसृष्टार्थः समर्थ इति व्युत्पत्तेः। संगतिः संसर्गश्च एकीभाव एव। यथा संगतं घृतं तैलेनेति एकीभूतमिति गम्यते, यथा वा संसृष्टोऽग्निरिति एकीभूत इति गम्यते इति भाष्याच्च। इदं च सामर्थ्यं राजपुरुष इत्यादिवृत्तावेव। अत एव ऋद्धस्य राजपुरुष इत्येवं राज्ञि पुरुषविशेषणे ऋद्धत्वविशेषणं नान्वेति। विशिष्टस्यैकपदार्थतया राज्ञः विशिष्टपदार्थैकदेशत्वात्। देवदत्तस्य गुरुकुलमित्यत्र तु उपसर्जनस्य गुरोः नित्यसापेक्षत्वात् समासः। यदा गुरुवत् देवदत्तोऽपि विशेष्ये प्रधाने कुल एवान्वेति, तत्र गुरुणा कुलस्य उत्पाद्यत्वसंबन्धेनान्वयः। देवदत्तेन तु कुलस्य तदीयगुरूत्पाद्यत्वसंबन्धेनान्वयः गुरुगर्भः। उक्तं च हरिणा —

संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते।। इति,

समुदायेन संबन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह।।

इति च। एकार्थीभावश्च अलौकिकविग्रहवाक्ये कल्प्यते। यथा लादेशभूतशतृ-शानचोः अप्रथमासामानाधिकरण्यं लकारेऽपि कल्प्यते तद्वत्। अत एव —

"लस्य अप्रथमासमानाधिकरणेनार्थेनायोगात् आदेशेऽनुपपत्तिः। तस्य क्वापि प्रयोगाभावात्।" इत्याक्षिप्य, "आदेशे सामानाधिकरण्यं दृष्ट्वा अनुमानात् गन्तव्यं प्रकृतेरपि तद्भवति" इति "लटः शतृशानचौ" इति सूत्रभाष्ये समाहितम्।

"सिद्धानां शब्दानामन्वाख्यानात् पचन्तं देवदत्तं पश्येत्यादिप्रयोगदर्शनात् स्थानिनोऽपि लस्य प्रक्रियार्थं कल्पितस्य अप्रथमासामानाधिकरण्यमनुमीयते"

इति तत्र कैयटः। अत्र प्रक्रियार्थं कल्पितस्येत्युक्त्या अन्यस्यापि प्रक्रियार्थं कल्पितस्य बोधकत्वकल्पना सूचिता।

अलौकिकविग्रहवाक्ये श्रूयमाणानां शब्दानां कल्प्तशक्तित्यागे मानाभावात् प्रत्येकशक्तिसहकृतया समुदायशक्त्या विशिष्टार्थोपस्थितिर्भवति। ततश्च अयमेकार्थीभावः अजहत्स्वार्था वृत्तिः इतीष्यते। वृत्तिविषयपदानां प्रत्येकमनर्थकत्वमाश्रित्य जहत्स्वार्था वृत्तिस्तु नाश्रयितुं युक्ता। महाबाहुः सुपन्थाः इत्यादौ आत्वाद्यनापत्तेः। वृत्तौ महदादिशब्दानामनर्थकत्वात्। अर्थवद्ग्रहणसंभवे अनर्थकस्य "आन्महतः" इत्यादौ ग्रहणायोगात्। तदुक्तम् — "जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी" इति। अवयवार्थविरुद्धो यत्र समुदायार्थः तत्रैव सेति तदर्थः। यथा अश्वकर्णपाण्डवादौ इति वैयाकरणमतसारः।

नैयायिकास्तु — वाक्यवत् समासेऽपि व्यपेक्षापक्षमेव अवलम्ब्य विशिष्टशक्तिमनङ्गीकृत्यैव समासघटकानामितरवृत्तिघटकानां च पदानां स्वस्वार्थान्वयबोधं निर्हन्ति। मतद्वयग्रन्थाधारेण तत्तत्समासार्थान्वयबोधः ग्रन्थे प्रतिपादितोऽस्ति। तत्तन्मतानुकूला युक्तयश्च प्रतिपादिताः।

समासविभागः

भूषणसारे —

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः।।

इति समासः षड्विधः। सुबन्तस्य सुबन्तेन समासः यथा — राजपुरुष इत्यादिः। सुबन्तस्य तिङन्तेन समासः, यथा — पर्यभूषयत्, अनुव्यचलत्। "गतिमता उदात्तवता तिङापि समास" इति वार्तिकात् समासः। सुपां नाम्ना समासः, यथा — कुम्भकारः इत्यादिः। "उपपदमतिङ्"[२४] इति सूत्रेण समासः। स च "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषया भवति। उत्तरपदे सुबुत्पत्तेः प्रागित्यर्थः। सुपां धातुना समासः, यथा — कटप्रूः, आयतप्रूः। अत्र उत्तरपदं धातुमात्रं न सुप्तिङन्तम्। "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजिश्रीणां दीर्घश्च" इति वार्तिकात्। तिङां तिङा समासः, यथा — पिबतखादता, पचतभृज्जता। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकादिगणान्तर्गणसूत्रात् समासः। तिङां सुबन्तेन समासः, यथा — जहिस्तम्बः। "जहिकर्मणा

---

[२४] पा.सू. २.२.१०

बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति'' इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। अयं षड्विधोऽपि समासः ''सह सुपा''[२५] इत्यत्र योगविभागेन भाष्ये व्युत्पादितः।

समासविभागान्तरपरिशीलनम्

समासश्चतुर्विधः अव्ययीभावद्वन्द्वतत्पुरुषबहुव्रीहिभेदात् इति विभागोऽपि प्रायोवादः। भूतपूर्वः दृन्भूः काराभूः आयतस्तूः वागर्थाविव इत्याद्यसंग्रहात्।

तथा पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानः तत्पुरुषः, उभयपदार्थ-प्रधानः द्वन्द्वः, अन्यपदार्थप्रधानः बहुव्रीहिः इत्यादिलक्षणमपि प्रायिकम्। उन्मत्त-गङ्गम्, सूपप्रति, अर्धपिप्पली, द्वित्राः शशकुशपलाशमित्यादावव्याप्तेरतिव्याप्तेश्च। तथा हि — उन्मत्ता गङ्गा यस्मिन् देशे तत् उन्मत्तगङ्गम्। ''अन्यपदार्थे च संज्ञायाम्''[२६] इति सूत्रेण अव्ययीभावः। तत्रान्यपदार्थप्राधान्यसत्त्वात् बहुव्रीहि-लक्षणस्यातिव्याप्तिः। पूर्वपदार्थप्राधान्याभावात् अव्ययीभावलक्षणस्याव्याप्तिश्च। सूपप्रति — सूपस्य लेशः इत्यर्थः। ''सुप्प्रतिना मात्रार्थे''[२७] इति सूत्रेण समासः। अत्रोत्तरपदार्थप्राधान्यसत्त्वात् तत्पुरुषलक्षणस्यातिव्याप्तिः। अर्धं पिप्पल्याः अर्ध-पिप्पली इति तत्पुरुषसमासः। अत्र पूर्वपदार्थप्राधान्यात् तत्पुरुषलक्षणस्याव्याप्तिः अव्ययीभावलक्षणस्यातिव्याप्तिश्च। द्वौ वा त्रयो वा द्वित्राः। अत्र उभयपदार्थ-प्राधान्यात् द्वन्द्वलक्षणस्यातिव्याप्तिः। अन्यपदार्थप्राधान्याभावात् बहुव्रीहिलक्षण-स्याव्याप्तिः। शशकुशपलाशमित्यत्र समाहाररूपान्यपदार्थप्राधान्यसत्त्वात् बहु-व्रीहिलक्षणस्यातिव्याप्तिः द्वन्द्वलक्षणस्याव्याप्तिश्च। सिद्धान्ते तु अव्ययीभावाधि-कारपठितत्वमव्ययीभावत्वमित्यादिलक्षणं द्रष्टव्यम्।

स्त्रीप्रत्ययार्थः व्युत्पत्तिवादरीत्या

प्रातिपदिकप्रकृतिकाः ''स्त्रियाम्'' इति अधिकारे विहिताः टाबादयः क्वचित् स्त्रीत्वम् प्रकृत्यर्थविशेषणतया बोधयन्ति यथा — अजा अश्वा गौरी ब्राह्मणी इत्यादौ। स्त्रीत्वविशिष्टा अजा इत्यादिरर्थः। स्त्रीत्वं च योनिमत्त्वम्। न च स्त्रीतात्पर्यकाजादिपदात् साधुत्वार्थः टाबादिः प्रत्ययः, न तु स्त्रीत्वं तस्यार्थः। क्वचित् स्त्रीत्वबोधश्च स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वरूपात् लिङ्गात् जायत इति

---

[२५] पा.सू. २.१.४
[२६] पा.सू. २.१.२१
[२७] पा.सू. २.१.९

वाच्यम्। खट्वा इत्यादौ प्रकृतितात्पर्यविषयत्वस्य खट्वायां सत्त्वेऽपि योनिमत्त्व-रूपस्त्रीत्वबोधाभावेन तादृशहेतोः व्यभिचारात् स्त्रीत्वासाधकत्वात्। अत्र व्यभिचारः अन्वयव्यभिचारः। खट्वायां स्त्रीप्रत्ययप्रकृतितात्पर्यविषयसत्त्वेऽपि स्त्रीत्वबोधाभावेन अन्वयव्यभिचारात् स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वस्य स्त्रीत्वबोधं प्रति अप्रयोजक-त्वादित्यर्थः।

यद्वा स्त्रीत्वबोधः लिङ्गज इत्यस्य स्त्रीत्वबोधः लिङ्गजन्यानुमितिरूप इत्यर्थः। तथा च अजः स्त्री स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वात् इत्यनुमानं प्रयोक्तव्यम्। तत्र खट्वायां योनिमत्त्वरूपस्त्रीत्वरूपसाध्याभाववत्यां स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्व-रूपहेतुसत्त्वात् व्यभिचारो हेत्वाभास इत्यर्थः। न च प्राणित्वे सतीति विशेषणं देयम्, अतः खट्वादौ न व्यभिचारः, तत्र प्राणित्वाभावेन विशिष्टहेत्वभावादिति वाच्यम्। तथापि देवतादौ व्यभिचारात्। इन्द्रादिदेवेषु टाप्प्रकृतितात्पर्यविषयत्वस्य प्राणित्वस्य च सत्वेऽपि योनिमत्वरूपस्त्रीत्वाभावात्।

वस्तुतस्तु पुंरूपाजवत्यपि प्रदेशे अजा नास्तीति प्रयोगात् नञर्थप्रतियोगिता-वच्छेदकतया स्त्रीत्वभानमावश्यकम्। तत्र स्त्रीत्वावच्छिन्नाजनिष्ठप्रतियोगिताकाभाव-सत्त्वान्न दोषः। अन्यथा अजत्वावच्छिन्नप्रतियोगिताकाभावस्य तत्र असत्त्वेन तादृशप्रयोगस्य प्रामाण्यं न स्यात्। एवं च स्त्रीत्वस्य प्रत्ययार्थत्वमावश्यकम्।

वैयाकरणमतम्

अत्र वैयाकरणाः — अजा इत्यादौ प्रातिपदिकार्थ एव स्त्रीत्वम्। तस्य च प्रातिपदिकार्थ एव अजत्वादिजातिमति विशेषणतया अन्वयः। स्त्रीप्रत्ययास्तु टाबादयः स्त्रीत्वद्योतका एव, न तु स्त्रीत्ववाचकाः। स्त्रीत्वद्योतका इत्यस्य टाप्प्रकृतिगतस्त्रीत्ववाचकत्वतात्पर्यग्राहका इत्यर्थः। अत एव —

स्वार्थो द्रव्यं च लिङ्गं च संख्या कर्मादिरेव च।
अमी पञ्चैव नामार्थाः त्रयः केषांचिदग्रिमाः।।

इति कारिकापि संगच्छते। तत्र स्वार्थः जात्यादिरूपः गवादिपदमुख्यार्थः। द्रव्यं गवादिरूपस्तद्धर्मो। लिङ्गस्य प्रातिपदिकार्थत्वमावश्यकम्। नात्र ब्राह्मणः, अपि तु ब्राह्मणी इत्यादौ पुंस्त्वबोधकपदान्तराभावेन पुंस्त्वस्य नञर्थप्रतियोगितावच्छेदक-तया भानानुपपत्तेः। ब्राह्मणादिपदाच्च जात्यादेः द्रव्यस्य च भानं नियतमेव। लिङ्गभानं तु तात्पर्यवशात् क्वाचित्कम्। ब्राह्मणीत्यादौ पुंस्त्वाबोधात् इत्याहुः।

एवं तद्धितकृदादीनामप्यर्थाः तेषां प्रकृत्यर्थेनान्वयप्रकारश्च द्रष्टव्यः। सर्वासु वृत्तिषु व्यपेक्षात्मकं सामर्थ्यमेव नैयायिकाभिमतम्। वैयाकरणानां तु एकार्थीभावरूपं सामर्थ्यमिति विवेकः। विस्तरो ग्रन्थे द्रष्टव्य इति शम्।

इति
विद्वज्जनविधेयः
एन्. एस्. रामानुजताताचार्यः

विषयसूची

शब्दार्थसंबन्धविचारः पृ. 1-115

न्यायदर्शनानुसारेण शब्दार्थसंबन्धनिरूपणम्.....1
संकेतरूपस्य समयस्य शब्दार्थसंबन्धत्वम्.....3
न्यायमञ्जर्यां संकेतस्य शब्दार्थसंबन्धत्वनिरूपणम् 5
तत्र पूर्वपक्षः 5
सिद्धान्तः.....7
शब्दार्थयोः अविनाभावो न संबन्धः इति निरूपणम्.....7
न्यायभूषणे संकेतस्य शब्दार्थसंबन्धत्वनिरूपणम् 9
शब्दार्थयोः स्वाभाविकसंबन्धस्य निरासः..... 10
मीमांसकमतेन शब्दार्थसंबन्धनिरूपणम् 11
प्रकरणपञ्चिकायां प्रत्याय्यप्रत्यायकभावस्य संबन्धत्वप्रतिपादनम् 13
शब्दार्थसंबन्धविषये नव्यनैयायिकमतम् 14
पदवाक्यरत्नाकरोक्तरीत्या संकेतस्य वृत्तित्वनिरूपणम्..... 15
तत्र मीमांसकमतदूषणम्..... 15
अपभ्रंशानां वाचकत्वविचारः 15
नैयायिकमतेन संकेतस्वरूपपरिष्कारः 16
संकेतस्य नित्यानित्यभेदेन द्वैविध्यम्..... 17
नागेशकृते नैयायिकमतानुवादतद्दूषणे 18
नागेशदूषणसमाधानपूर्वकं संकेतस्य शब्दार्थसंबन्धत्वसमर्थनम्..... 19
बोधकारणत्वघटितस्य संकेतस्य संबन्धत्वोपपादनम्..... 21
अर्थबोधकत्वमेव शक्तिरिति वैयाकरणभूषणकारमतम्..... 23
तत्र संभवतामाक्षेपाणां परिहाराः 23
बोधकत्वरूपशक्तिग्राहकम्, लक्षणोच्छेदस्य इष्टत्वं च 25
लक्षणावृत्तिस्वीकारे अनुपपत्तयः 25
लाक्षणिकपदानां वाचकत्वे नानार्थत्वशङ्कानिरासः..... 27
मणिग्रन्थोक्तरीत्या बोधकत्वं शक्तिरिति वादस्य उपक्षेपः परिशीलनं च 28
तत्र आक्षेपः 28
सिद्धान्तः..... 29

बोधकत्वं शक्तिरिति भूषणकारादिमतस्य खण्डनम्..... 29
शक्त्यतिरिक्तलक्षणायाः समर्थनम्..... 30
बोधकत्वमेव शक्तिरिति वेदान्तदेशिकमतम्..... 31
बोधकत्वातिरिक्ता शक्तिरिति स्वमतेन निगमनम्..... 31
नैयायिकमते लक्षणोच्छेदापत्तिपरिहारः..... 32
शब्दार्थयोस्तादात्म्यं संबन्ध इति नागेशमतम्..... 33
बौद्धार्थस्थापनम्..... 36
उक्तस्य नागेशमतस्य परिशीलनम्..... 38
बौद्धार्थखण्डनम्..... 42
शब्दार्थसंबन्धः कः? अत्र महाभाष्यकाराशयः..... 44
तत्र कैयटः..... 44
तत्रोद्योतः..... 45
कैयटः..... 45
उद्योतः..... 45
वाक्यपदीयानुसारेण शब्दार्थसंबन्धनिरूपणम्..... 45
शब्दार्थसंबन्धसद्भावे लिङ्गप्रतिपादनम्..... 49
वाक्यपदीये अपभ्रंशविचारः..... 50
शब्दार्थयोः कार्यकारणभावसंबन्धः इति मतम्..... 53
मीमांसकमतेन शब्दार्थसंबन्धनिरूपणम्..... 54
तत्र जैमिनिसूत्रप्रदर्शनम्..... 54
अथ अलंकारशास्त्रोक्तरीत्या शक्तिविचारः..... 56
शक्तिग्रहोपायाः..... 60
लक्षणानिरूपणम्..... 62
मणिग्रन्थानुसारेण लक्षणानिरूपणम्..... 62
लक्षणास्थले शक्त्या निर्वाह इत्याक्षेपः..... 62
तस्य समाधानम्, तात्पर्यज्ञानस्योपयोगश्च..... 62
लक्षणायाः वृत्त्यन्तरत्वस्थापनम्..... 64
लक्ष्यार्थस्य केन रूपेणोपस्थितिरिति विचारः..... 65
लक्षणायाः निष्कृष्टं स्वरूपम्..... 67
पदानामर्थे शक्तिः स्वस्मिंस्तु लक्षणा..... 68
पदस्य स्वबोधकत्वं वृत्तिं विनैवेति मतम्..... 69

तात्पर्यमेव लक्षणेति मतविमर्शः 69
तात्पर्यज्ञानस्योपयोगः 69
वक्त्रभिप्रायो लक्षणेति मतान्तरस्य परामर्शः 70
शक्यसंबन्धः किंरूप इति विवेचनम् 70
संप्रदायमतम्..... 71
लक्षणायाः बीजं किमिति निरूपणम्..... 71
अन्वयानुपपत्तिरेव लक्षणायां बीजं न तु तात्पर्यानुपपत्तिरिति मणिकृन्मतम्..... 72
लक्षणास्थले पदान्न लक्ष्यस्मृतिः अपि तु पदशक्यात् इति प्राचां मतम्..... 73
लाक्षणिकपदं नानुभावकम् इति निरूपणम् 73
लाक्षणिकमप्यनुभावकमिति नव्यमतम् 74
वाक्यलक्षणाविचारः..... 75
बृहन्मञ्जूषानुसारेण लक्षणाविचारः..... 76
शक्यादशक्योपस्थितिर्लक्षणेति मतम् 77
लक्षणायाः निमित्तम्..... 79
लक्षणायाः विभागः गौणी शुद्धा चेति..... 80
न्यायसूत्रोक्तानि लक्षणायाः निमित्तानि..... 86
न्यायपरिशुद्धिस्थविशेषाः..... 86
न्यायकौस्तुभे लक्षणाविचारः 87
गङ्गादिपदानां तीरादौ शक्तिरेवेति पूर्वपक्षः..... 87
तत्र सिद्धान्तः..... 88
लक्षितलक्षणा वृत्त्यन्तरम् इति प्राचां मतम्..... 88
लक्षितेन भ्रमरपदेन शक्त्यैव बोधोऽस्तु इत्याक्षेपः तत्परिहारश्च..... 89
प्राचां मतस्य निरासः 89
शक्यपरंपरासंबन्धेन लक्षणा लक्षितलक्षणा, सा न वृत्त्यन्तरम् इति मिश्रमतम्..... 89
द्विरेफपदं पङ्कजादिपदवत् योगरूढमिति नवीनमतम् 89
लक्षणाद्वैविध्यम्..... 90
जहत्स्वार्था, अजहत्स्वार्था च..... 90

जहदजहल्लक्षणा 91
गौणी वृत्तिः 92
गौणीवृत्तिविषये मीमांसकमतम् 92
तत्सिद्धिः 92
जातिः 93
सारूप्यम् 93
प्रशंसा 94
भूमा 94
लिङ्गसमवायः 94
लघुमञ्जूषानुरोधेन लक्षणा-गौणीवृत्तिविचारः 94
लक्षणायां बीजम् 94
तात्पर्यग्रहो लक्षणाबीजम् 95
लक्षणाभेदः 95
वैयाकरणसिद्धान्तनिष्कर्षः 98
तत्र न्यायसूत्रसंवादः 99
एतद्वैयाकरणमतविमर्शः 100
निष्कर्षः 102
अतिरिक्तायाः लक्षणावृत्तेः स्वरूपम् 102
नवीनानाम् आलंकारिकाणां मतम् 104
नव्यनैयायिकमतम् 104
तात्पर्यस्य लक्षणात्वनिरासः 105
प्रयोक्तुरभिप्रायो लक्षणेतिमतनिरासः 105
शक्यादशक्योपस्थितिर्लक्षणेति मतनिरासः 105
शक्यनिष्ठः अशक्यसंबन्धः लक्षणेति मतस्य निरासः 106
वृत्तिवार्तिकसमालोचनम् 106
स्वबोध्यसंबन्धो लक्षणेति मतस्य निरासः 107
शक्याविनाभावस्य लक्षणात्वनिरासः 110
उपरचारः न वृत्त्यन्तरम् अपि तु लक्षणैव 110
गौणी वृत्तिः 111
निरूढलक्षणा 111

आधुनिकलक्षणा 111
देशिककृतः वृत्तिविभागः 111
तर्कताण्डवानुसारेण शब्दवृत्तिनिरूपणम् ११२
व्यञ्जनावृत्तिनिरूपणम् ११३

पदार्थविचारः पृ. 117-219

न्यायमञ्जरीकृतं पदशक्यार्थनिरूपणम् 121
आकृतिपदार्थः 121
आकृतिशक्तिवादः 122
आकृतिशक्तिवादनिरासः 122
व्यक्तिशक्तिवादः 123
व्यक्तेः शब्दार्थत्वे मीमांसकानामाक्षेपः 124
गवादिपदानां दण्ड्यादिपदवैलक्षण्यम् 125
व्यक्तिबोधस्यान्यथासिद्धत्वम् 125
अमूर्तानामपि साधनत्वसंभवः 126
व्यक्तेः पदवाच्यत्वम् इति सिद्धान्तः 127
व्यक्तिशक्तौ गौरवाभावः 128
सामान्यविशेषयोः युगपद्ग्रहणाक्षेपः 129
तत्समाधानम् 129
शब्दप्रत्यक्षयोर्वैलक्षण्यशङ्कासमाधानम् 129
शब्दस्य जातिमात्रवाचकत्वानुपपत्तिः 130
अन्विताभिधानवादे व्यक्तिबोधस्यावश्यकता 131
जात्याकृतिव्यक्तिषु शक्तिवादोपसंहारः 131
जातिरहितपदार्थस्थले गतिप्रदर्शनम् 131
गुणवाचिशब्देषु विशेषः 132
क्रियावाचिशब्देषु विशेषः 132
उपसर्गादिवाच्यार्थनिर्णयः 133
उपसर्गाणां क्वचित् विरुद्धार्थत्वम् 133
उपसर्गाणां वाचकत्वम्, उत द्योतकत्वम्? 134
महाभाष्यानुसारेण पदार्थनिरूपणम् 134
महाभाष्यकारमतनिरूपणम् - आकृतेः पदार्थत्वमतम् 135

प्रख्याविशेषात् आकृतेः पदार्थत्वम् 135
द्रव्यं पदार्थ इति व्याडिमतम् 136
मीमांसकमतेन नामार्थनिरूपणम् 138
शास्त्रदीपिकायामनुक्ताः कौस्तुभोक्ता विषयाः 141
पदानां जातिवाचित्वमिति सिद्धान्तः 143
पदशक्यार्थविषये मणिग्रन्थोक्ता विषयाः 147
प्राभाकरमतेन पदानां जातौ शक्तिः 148
भट्टमतम् 155
अर्थापत्त्या व्यक्तिबोधेऽनुपपत्तयः 158
न्यायकुसुमाञ्जलौ व्यक्तेराक्षेपतो लाभ इति मीमांसकमत-
खण्डनप्रकारः 159
जातिविशिष्टस्य शक्यत्वम् इति मणिकारनिरूपणम् 161
शक्तिवादे भट्टाचार्यप्रदर्शितः पन्थाः 163
शक्तिवादे अनूदितं मीमांसकमतम् 163
जातिशक्तिवादेऽपि व्यक्तिशक्तेरत्याज्यत्वम् 166
कुब्जशक्तिवादखण्डनम् 167
भट्टमतनिरासः 169
शक्तिवादे मण्डनमतम् 170
व्यक्तिलक्षणामतेऽनुपपत्तयः 171
व्यक्तिलक्षणापक्षस्य निर्दोषत्वमित्याक्षेपः तत्समाधानं च 171
शक्तिवादे प्राभाकरमतोपन्यासः 172
न्यायकौस्तुभस्थरीत्या शक्तिवादः 173
दीधितिकारमतम् 174
जातिशक्तिवादनिरासः 175
शब्दशक्तिप्रकाशिकोक्तरीत्या शक्तिविचारः 175
पटत्वाद्युपलक्षिते धर्मिणि शक्तिरिति दीधितिकारमतम् 177
संस्थानविशिष्टव्यक्तौ शक्तिरिति मतम् 178
मतान्तरम् 179
तर्कताण्डवोक्ता शक्तिः 180
जातिशक्तिवादे दोषाः 180
भाट्टोक्तव्यक्तिलक्षणाभङ्गः 182
व्यक्त्याक्षेपपक्षे दोषाः 183

नैयायिकोक्तविशिष्टशक्तिभङ्गः 184
अरुणाधिकरणसरणिविवरणी इति ग्रन्थे जातिमात्रशक्तिवादे
दोषोद्भावनपूर्वकं जातिविशिष्टव्यक्तौ शक्तेः समर्थनम् 186
गुणवाचकशब्दानां गुणिपर्यन्तत्वम् 193
तत्र मुक्तावलीकारमतम् 193
भूषणसाररीत्या नामपदशक्तिविचारः 194
जातिरेका प्रातिपदिकार्थः इति पक्षः 194
केवलव्यक्तिशक्तिवादः 196
आकृतिविशिष्टे शक्तिः 197
शाब्दबोधे वाचकशब्दस्यापि भानम् 198
मण्यनुसारेण अपभ्रंशानां शक्तत्वविचारः 201
तत्र पूर्वपक्षः 201
सिद्धान्तस्तु 202
साधुत्वस्वरूपविचारः 203
तत्र पूर्वपक्षः 203
सिद्धान्तः 205
आधुनिकसंकेतितशब्दानां साधुत्वविचारः 205
तत्र आक्षेपः 206
समाधानम् 206
भूषणसारग्रन्थानुसारेण अपभ्रंशसाधुताविचारः 207
मीमांसकमतेन साध्वसाधुशब्दविवेकः 208
शक्तेः रूढ्यादिभेदेन चातुर्विध्यम् 210
न्यायकौस्तुभानुसारेण शब्दानां चतुर्धा विभागः 213
पङ्कजादिशब्दे रूढिशक्तेरावश्यकता 213
मणिकारमतपरिशीलनम् 214
मीमांसकमतम् 214
वैयाकरणमतम् 214
योगरूढयौगिकरूढ्योर्वैलक्षण्यम् 215
मुक्तावलीग्रन्थानुसारेण शक्तपदविभागः 215
न्यायकौस्तुभानुसारेण व्यञ्जनावृत्तिपरिशीलनम् 216
आलंकारिकमतानुवादः 216
कौस्तुभे उक्तालंकारिकमतपरिशीलनम् 217

रसगङ्गाधरप्रदर्शितनव्यमतपरामर्शः 218
व्यञ्जनावृत्तिस्वीकारस्य आवश्यकता 218

निपातार्थविचारः पृ. 221-298

शब्दशक्तिप्रकाशिकायां निपातस्य लक्षणम् 221
नञर्थविचारः 221
न्यायकौस्तुभे उपसर्गाणां निपातानां च द्योतकत्वविचारः 224
शाब्दिकमतनिरासः 225
साक्षात्क्रियत इत्यादौ कर्मणि लकारोपपत्तिः 225
निपातानां वाचकत्वे शङ्कापरिहारौ 226
व्यतिसे इत्यत्र उपसर्गस्य वाचकत्वमावश्यकम् इत्याक्षेपः तत्समाधानं च 226
निपातार्थनिर्णयः शब्दकौस्तुभानुसारम् 227
निपातार्थनिर्णयः भूषणसारानुसारम् - निपातानां द्योतकत्वं च 228
प्राद्युपसर्गाणां वाचकत्वम् 230
निपातानां वाचकत्वे अनुपपत्तयः 230
नञः द्योतकत्वमेवेति निरूपणम् 231
निपातानां द्योतकत्वे मीमांसकसंमतिः 232
निपातेषु केचित् द्योतकाः केचिद्वाचकाः इति मतम् 233
तत्परिशीलनम् 233
निपातार्थविचारः लघुमञ्जूषायाम् 234
निपातानां द्योतकत्वम् 234
वाचकत्ववादिमतखण्डनम् 235
उपसर्गाणां द्योतकत्वम् 236
निपातद्योतकत्वविषये नागेशमतम् 237
इवशब्दार्थविचारः (मञ्जूषानुसारम्) 241
न्यायकौस्तुभकारेण इवशब्दार्थविचारः 243
मतान्तरेण सादृश्यपदार्थनिरूपणम् 244
चन्द्र इव मुखमित्यत्र उपमानोपमेयोभयविशेष्यकबोधः इति मतानुवादः 245
उक्तमतनिराकरणम् 246

साधारणधर्मस्य इवार्थत्वे विशेषकथनम्.....247
गज इव गच्छति इत्यादौ बोधप्रकारः.....247
सादृश्यमतिरिक्तः पदार्थः इति निरूपणम्.....248
मणिग्रन्थानुसारेण उपसर्गार्थविचारः.....251
नञर्थविचारः.....253
शिरोमणिकृतनञ्वादानुसारं नञर्थः.....253
अन्योन्याभावबोधनिर्वाहः.....256
न्यायकौस्तुभानुसारेण नञर्थविचारः.....258
नञर्थविषये शाब्दिकमतद्वयानुवादः.....258
उक्तशाब्दिकमतद्वयनिरासः.....259
संसर्गाभावत्वान्योन्याभावत्वविचारः.....260
प्रतियोग्यारोपस्याभावबुद्धिहेतुत्वत्वसमर्थनम्.....260
प्रकारान्तरेण संसर्गान्योन्याभावलक्षणं तन्निरासश्च.....261
संसर्गाभावत्वान्योन्याभावत्वनिष्कर्षः.....261
ध्वंसप्रागभावयोरपि नञ्-पदवाच्यता.....261
नव्यमते अत्यन्ताभावस्यान्योन्याभावस्य च नञर्थता.....262
नञा अत्यन्ताभावान्योन्याभावयोर्बोधे नियामकम्.....263
पर्युदासः प्रसज्यप्रतिषेधश्च नञर्थ इति प्रवादस्य तात्पर्यम्.....263
भूषणसारानुसारेण नञर्थविचारः.....264
मञ्जूषानुसारेण नञर्थविचारः.....267
असमासे नञर्थः.....268
शिरोमणिमतपरिशीलनम्.....270
नञर्थान्योन्याभावनिरूपणम्.....271
मीमांसकमतखण्डनम्.....272
शङ्काविशेषसमाधानम्.....275
प्रतियोगिनः अभावेऽन्वयप्रकारः.....276
प्रतियोग्यारोपस्याभावज्ञानहेतुता.....277
भूषणपरिशीलनम्.....278
एवकारार्थनिर्णयः.....279
मञ्जूषानुसारमेवकार्थनिर्णयः.....280
न्यायकौस्तुभरीत्या एवकारार्थः.....281
तत्र आक्षेपसमाधाने.....282

पूर्वोक्तनियमाभाव इति प्रतिपादनम् 283
नव्यमतनिरूपणम् 283
चैत्रस्यैवायं भ्राता इति वाक्यजन्यबोधविचारः 284
अन्यानुयोगिकस्य योगव्यवच्छेदस्य एवकारार्थत्वम् 284
अन्यानुयोगिको व्यवच्छेद एव सर्वत्र एवकारार्थः 285
मतान्तरानुवादतन्निरासौ 285
परिशिष्टम् (त्रिंशच्छ्लोकीतः) केषांचिदव्ययानामर्थः 286
नचेति वाच्यमिति वाक्यार्थविचारः 286
ननुशब्दघटितवाक्यार्थः 287
चेत् इतिशब्दस्यार्थः 287
चेच्छब्दस्य अन्योऽर्थः 288
चेच्छब्दस्य जिज्ञासार्थकत्वम् 288
चेच्छब्दस्यार्थान्तरम् 288
यद्यपि, तथापिशब्दयोरर्थः 289
यदि च-तदाशब्दयोरर्थः 290
यदितदाशब्दयोरर्थान्तरम् 290
यदिशब्दस्य आहार्यधीरर्थः 291
आकारशब्दार्थः 291
ददात्यर्थः 292
मध्येशब्दार्थः 292
अपेक्ष्यशब्दार्थः 292
वर्जयित्वापदार्थः 294
द्रव्याण्यपेक्ष्य पार्थिवानि न्यूनसंख्याकानि इति वाक्यार्थः 294
पार्थिवान्यपेक्ष्य द्रव्याण्यधिकसंख्याकानि इति वाक्यार्थः 294
तत्र मतान्तरम् 295
यद्वा-अथवापदयोरर्थः 296
परं तु, अपि तु, किं तु, इत्येतेषामर्थः 296
विकल्पोत्तरसप्तम्यर्थः 296
अत्रैव मतान्तरम् 297
विकल्पोत्तरसप्तम्याः समानयुक्तिकत्वार्थकत्वम् 297
एवकारार्थः 297
गुणादिषु एकादिशब्दार्थः 297

समासार्थविचारः पृ. 299-396

समासलक्षणम्.....299
शब्दशक्तिप्रकाशिकानुसारं समासलक्षणम्.....299
समासलक्षणम् (व्याकरणग्रन्थेषु).....300
एकार्थीभावविषये मणिकारमतम्.....302
समासे एकार्थीभावविषये न्यायकौस्तुभगताः विशेषाः.....303
वैयाकरणमतानुवादः.....303
तत्खण्डनम्.....304
नव्यवैयाकरणमतानुवादः.....304
उक्तवैयाकरणमतदूषणम्.....305
वैयाकरणमतान्तरम्.....306
उक्तवैयाकरणमतान्तरखण्डनम्.....307
वैयाकरणनवीनमतम्.....307
तत्खण्डनम्.....307
एकार्थीभावविषये जगदीशमतम्.....308
भूषणसारानुसारेण समासे एकार्थीभावनिरूपणम्.....309
समासे विशिष्टशक्तौ साधकान्तरम्.....312
व्यपेक्षावादिनैयायिकमीमांसकादिमतम्.....314
तन्मतपरिशीलनम्.....315
गूढार्थतत्त्वालोके वैयाकरणमतानुवादः.....318
उक्तवैयाकरणमतपरिशीलनम्.....320
अत्र वैयाकरणस्य आक्षेपः.....322
पुनः समासशक्त्यङ्गीकार इत्याक्षेपः.....324
तत्र समाधानम्.....324
व्यपेक्षावादे युक्त्यन्तरम्.....325
समासविभागः.....326
शब्दशक्तिप्रकाशिकायां समासस्य नित्यानित्यभेदेन द्वैविध्यम्.....326
समासविभागः भूषणसारे.....328
प्राचीनानां मतम्.....328
लघुमञ्जूषायां समासलक्षणं समासविभागश्च.....329
अव्ययीभावः मणिग्रन्थानुसारम्.....330

अव्ययीभावः शब्दशक्तिप्रकाशिकायाम् 330
अव्ययीभावः लघुमञ्जूषायाम् 331
तत्पुरुषसमासनिरूपणं तत्त्वचिन्तामणौ शब्दखण्डे 332
लुप्तविभक्तिस्मरणस्यानावश्यकत्वम् 334
समासे विशिष्टशक्तिनिरासः 334
तत्पुरुषसमासनिरूपणं शब्दशक्तिप्रकाशिकायाम् 338
तत्पुरुषसमासविभागः 339
नञ्तत्पुरुषविचारः 343
लघुमञ्जूषानुसारं तत्पुरुषविचारः 344
लघुमञ्जूषानुसारं कर्मधारयः 345
मणिग्रन्थानुसारं कर्मधारयसमासविचारः 347
शब्दशक्तिप्रकाशिकायां कर्मधारयविचारः 348
विशेषणविशेष्ययोर्मिथः व्यभिचार एव कर्मधारयः 350
तदाद्युत्तरपदकः कर्मधारयः 350
शब्दशक्तिप्रकाशिकानुसारम् उपपदसमासः 352
शब्दशक्तिप्रकाशिकानुसारं द्विगुसमासः 352
तद्धितार्थद्विगुः 353
महाभाष्यकृन्मतम् 354
उत्तरपदद्विगुः 354
समाहारद्विगुः 354
शब्दशक्तिप्रकाशिकानुसारं बहुव्रीहिसमासः 355
दक्षिणपूर्वा, पूर्वोत्तरा 356
अस्तिक्षीरा नास्तिक्षीरा गौः 356
उपदशाः शकुनयः 357
अधिकदशाः पुरुषाः 357
बहुव्रीहौ कस्य पदस्य कुत्र लक्षणेति विचारः 358
बहुव्रीहिसमासविग्रहवाक्यलक्षणम् 359
बहुव्रीहिविभागः 361
बहुव्रीहेः विभागान्तरम् 361
लघुमञ्जूषानुसारेण बहुव्रीहिनिरूपणम् 362
मीमांसकमतखण्डनम् 365

सिद्धान्तः 366
बहुव्रीहिविभागः 367
बहुव्रीहौ विशिष्टशक्तिस्वीकारे अरुणाधिकरणन्यायानुकूल्यम् 367
मतान्तरम् (नागेशमतम्) 370
तत्र कैयटसंवादः 370
मणिग्रन्थानुसारेण द्वन्द्वसमासविचारः 371
मतान्तरम् 374
मतान्तरम् 374
स्वमतम् 375
शङ्का 375
समाधानम् 375
शङ्का 376
समाधानम् 376
शङ्का 376
समाधानम् 376
शङ्का 376
समाधानम् 376
शङ्का 377
समाधानम् 377
शङ्कासमाधाने 377
निगमनम् 377
शङ्कासमाधाने 378
मतान्तरनिरासः 379
सरूपैकशेषः 379
समाहारद्वन्द्वः 379
विरूपैकशेषः 380
शब्दशक्तिप्रकाशिकायां द्वन्द्वसमासविचारः 381
प्राचीनमतखण्डनम् 381
मीमांसकमतखण्डनम् 382
द्वन्द्वसमासविभागः 386
लघुमञ्जूषानुसारं द्वन्द्वसमासः 387
दीक्षितादिमतानुवादः 387
उक्तमतखण्डनम् 388

लघुमञ्जूषानुसारेण एकशेषः 389
मुक्तावल्यनुसारेण समासार्थविचारः 389
बहुव्रीहिः 389
दिनकर्यां मतान्तरम् 391
द्वन्द्वसमासः 391
दिनकर्यां मतान्तरम् 393
समाहारद्वन्द्वः 393
एकशेषः 394
कर्मधारयः 395
अव्ययीभावः 395

तद्धितार्थविचारः पृ. 397-414

तद्धितार्थः (व्युत्पत्तिवादे) 397
तद्धितवृत्तिनिरूपणं लघुमञ्जूषायाम् 398
मीमांसकमतम् 405
मतान्तरम् 405
कतिपयतद्धितार्थः 405
पञ्चमः 405
कल्पप् 408
काकतालीयम् 408
कृत्वसुच् 409
मयट् 410
अभूततद्भावे च्विः 410
वीप्सा 410
स्त्रीप्रत्ययार्थः व्युत्पत्तिवादे 412

कृदर्थविचारः पृ. 415-422

लघुमञ्जूषायां कृदर्थविचारः 415
भावार्थकप्रत्ययाः 416
तुमुन् 417
क्त्वाणमुलादयः 417

मतान्तरम् (स्वमतम्) 419
न्यायकौस्तुभानुसारेण क्त्वाप्रत्ययार्थविचारः..... 419
पूर्वकालीनत्वान्वयानुपपत्तिशङ्का तत्समाधानं च..... 419
समानकर्तृकत्वान्वयानुपपत्तिशङ्कासमाधाने..... 420
मणिकारानुयायिमतेन क्त्वाप्रत्ययार्थप्रतिपादनम्..... 420
भावः क्त्वाप्रत्ययार्थ इति वैयाकरणमतम्..... 421
समानकर्तृकत्वादेः संबन्धत्वानुपपत्तिः..... 421
कृतिरेव क्त्वाप्रत्यययार्थ इति मतम्..... 421

शाब्दबोधमीमांसा

सुबन्तपदार्थविचारात्मकः तृतीयो भागः

शब्दार्थसंबन्धविचारः

न्यायदर्शनानुसारेण शब्दार्थसंबन्धनिरूपणम्

न्यायसूत्रकारः महर्षिः गौतमः, शब्दः न पृथक्प्रमाणम्। सः अनुमानविधयैव अर्थप्रत्यायकः। यथा हि प्रत्यक्षेणाज्ञायमानं साध्यं ज्ञातेन लिङ्गेन पश्चान्मीयतेऽनुमानस्थले, तथैव ज्ञातेन (श्रुतेन) शब्देन पश्चात् अर्थो ज्ञायते प्रत्यक्षादिनानवगम्यमानः इति शब्दोऽपि लिङ्गविधयैवार्थबोधकः इति —

"शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्"[१] इति सूत्रेणाशङ्कितवान्। ततः, यत्र प्रमाणान्तरत्वं = द्वयोः प्रमाणयोः भेदः भवति तत्र प्रमाणयोः अर्थबोधनप्रकारे वैलक्षण्यं दृश्यते यथा प्रत्यक्षानुमानयोः अनुमानोपमानयोश्च। प्रत्यक्षस्थले हि अज्ञायमानात् इन्द्रियात् अर्थज्ञानं भवति, अनुमानस्थले च ज्ञातात् = ज्ञायमानात् लिङ्गात् अर्थज्ञानं भवति। उपमानस्थले सादृश्यज्ञानादर्थप्रतिपत्तिः, नैवमनुमानस्थले इति प्रमाणप्रवृत्तिभेदात् प्रमाणभेदः। शब्दानुमानस्थले तु नैवं प्रवृत्तिभेदोऽस्ति। ज्ञातादेव शब्दादर्थप्रतीतेः, ज्ञातादेव लिङ्गात् अर्थप्रतीतेश्च। अतः शब्दोऽनुमानमेवेत्याशङ्कितवान् —

"उपलब्धेरद्विप्रवृत्तित्वात्"[२] इति सूत्रे। अपि च संबद्धयोः हेतुसाध्ययोर्मध्ये हेतोः दर्शनानन्तरं संबन्धस्मृतौ सत्यां साध्यप्रमितिर्भवति अनुमानस्थले, तथैव संबद्धयोः शब्दार्थयोर्मध्ये शब्दविषयकश्रावणप्रत्यक्षानन्तरं संबन्धस्मृतौ सत्यामर्थप्रतीतिर्भवति शब्दस्थले इति शब्दस्य नानुमानात् पृथक् प्रामाण्यमिति — "सम्बन्धाच्च"[३] इति सूत्रेण शङ्कितवान्। तत्र समाधानमवोचत् — "आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः"[४] इति। प्रत्यक्षानवगम्यमानानां स्वर्गः अप्सरसः उत्तराः कुरवः सप्त द्वीपाः समुद्रः लोकसंनिवेशः इत्यादीनामर्थानां न शब्दमात्रात् प्रत्ययः। किं तर्हि अयं शब्दः आप्तैरुक्तः इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययः भवति। अनुमानस्थले तु नैवमिति प्रवृत्तिभेदसद्भावात् शब्दस्य अनुमानातिरिक्तप्रमाणत्वमिति तदर्थः। एवं च सूत्रद्वयोक्तशङ्काद्वयनिरासो जातः। यदुक्तं 'संबन्धाच्चे'ति तत्र भाष्यकारः समाधत्ते शब्दार्थयोः संबन्धः कश्चित्

---

[१] न्या.सू. २.१.४९
[२] न्या.सू. २.१.५०
[३] न्या.सू. २.१.५१
[४] न्या.सू. २.१.५२

अङ्गीक्रियते, प्राप्तिरूपस्तु संबन्धो नाङ्गीक्रियते। प्राप्तिर्नाम संयोगः एकार्थसंयोगः समवायो वा। कुतो नाङ्गीक्रियत इति चेत् — प्रत्यक्षतस्तावच्छब्दार्थप्राप्तेः नोपलब्धिः, अतीन्द्रियत्वात् स्वर्गादिरूपस्यार्थस्य। अपि च यदि शब्दार्थयोः प्राप्तिलक्षणः संबन्धः स्यात् तदा शब्दान्तिके वा अर्थः स्यात् अर्थान्तिके वा शब्दः स्यात् उभयं वा उभयत्र स्यात्। तत्र नाद्यः पक्षः युक्तः इत्याह — "पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः"[५] इति। यदि शब्दान्तिकेऽर्थः स्यात् तदा अन्नम् इति शब्दोच्चारणे सति अन्नरूपस्यार्थस्य प्राप्त्या तेन उदरपूरणं स्यात्, अग्निः इति शब्दोच्चारणे सति अग्निरूपार्थप्राप्त्या तेन शरीरदाहः स्यात्, असिः इति शब्दोच्चारणे सति खड्गरूपस्यार्थस्य प्राप्त्या तेन शरीरस्य छेदनं स्यात्। अर्थान्तिके शब्द इति द्वितीयः पक्षो न युक्तः, स्थानकरणाभावादिति चशब्देन सूच्यते। स्थानं कण्ठादि, करणं प्रयत्नविशेषः। अर्थान्तिके स्थानप्रयत्नविशेषयोरनुपपत्त्या शब्दस्योच्चारणं न संभवतीति नार्थान्तिके शब्दः। उभयप्रतिषेधाच्च 'उभयं वोभयत्र' इति तृतीयपक्षोऽपि न युक्तः। एतावता प्राप्तिलक्षणः संबन्धः शब्दार्थयोः निराकृतः। संबन्धस्तु कश्चिदस्त्येव। अन्यथा — अमुकशब्दात् अमुक एवार्थोऽवगम्यत इति व्यवस्थाया अनुपपत्तेः इत्याह — "शब्दार्थव्यवस्थानादप्रतिषेधः"[६] इति। संबन्धस्येति शेषः। अस्ति च शब्दार्थयोः संबन्धोऽनुज्ञातः, अस्ति च प्रतिषिद्धः। अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः। प्राप्तिलक्षणस्तु शब्दार्थयोः संबन्धः प्रतिषिद्धः" इति वदता भाष्यकारेण वाच्यवाचकभावरूपः संबन्धः स्वीकृतः। कस्तर्हि शब्दार्थयोः संबन्धः इत्याशङ्कायामुक्तवान् — "न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य"[७] इति। अत्र भाष्यम् — "न संबन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि। समयकारितम्। यत्तदवोचाम अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः समयं तमवोचाम" इति। अनेन शब्दार्थयोः न प्राप्तिः संबन्धः, अपि तु समयः इत्युक्तं भवति। कोऽसौ समयः इत्याशङ्क्य भाष्यकारेणोक्तम् — "अस्य शब्दस्येदमर्थजातमभिधेयमिति चाभिधानाभिधेयनियमनियोगः" इति।

इतश्च सामयिकः शब्दादर्थसंप्रत्ययः, न स्वाभाविकः, "जातिविशेषे चानियमात्"[८] शब्दादर्थप्रत्ययः समयकृतः, न स्वाभाविकः। ऋष्यार्यम्लेच्छानां यथेच्छं अर्थबोधनार्थं शब्दप्रयोगो दृश्यते। आर्या हि यवशब्दात् दीर्घशूकविशेषं प्रतियन्ति,

---

[५] न्या.सू. २.१.५३
[६] न्या.सू. २.१.५४
[७] न्या.सू. २.१.५५
[८] न्या.सू. २.१.५६

म्लेच्छास्तु कङ्गुमिति इदमनियतार्थकत्वं न स्याच्छब्दस्य स्वाभाविकसंबन्धेनार्थ-बोधकत्वे। जातिशब्देन दीर्घशूकत्वादयः गृह्यन्ते। न्यायमञ्जरीकारास्तु जातिशब्देनात्र देशो विवक्षितः। क्वचिद्देशे कश्चिच्छब्दः देशान्तरप्रसिद्धमर्थमुत्सृज्य ततोऽर्थान्तरं बोधयति। यथा तस्करवाचकः चोरशब्दः दाक्षिणात्यैः ओदने प्रयुज्यते। एतच्चार्थस्य सामयिकत्वपक्षे युज्यते। नित्ये तु सम्बन्धेऽर्थव्यभिचारो न स्यात्।

न्यायवार्तिककारैः — "आप्तोपदेशसामर्थ्याच्छब्दार्थसंप्रत्ययः"[९] इति सूत्रव्या-ख्यानावसरे — "अस्ति शब्दार्थयोः संबन्धः अनुज्ञातः, अस्ति च प्रतिषिद्धः। वाच्यवाचकभावलक्षणः संबन्धोऽनुज्ञातः, अस्य शब्दस्यायमर्थो वाच्य इति। यः पुनरयं स्वाभाविकः शब्दार्थयोः संबन्ध इति कैश्चिदुच्यते स प्रतिषिद्ध इति" इत्युक्तम्। अनेन मीमांसकवत् न स्वाभाविकः वाच्यवाचकभावः अपि तु ईश्वरेच्छारूपसमयकृतः स संबन्धः शब्दार्थयोः नैयायिकानामिति प्रतीयते।

संकेतरूपस्य समयस्य शब्दार्थसंबन्धत्वम्

अत्रेदं विचारणीयम् — अस्येदमिति षष्ठीविशिष्टवाक्यप्रतिपाद्यः यः संबन्धः वाच्यवाचकभावरूपः स किं समयरूपः अथवा समयकृतः अन्यः इति। समयशब्दार्थश्च कः? इति।

"यत्तदवोचाम अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दार्थयोः संबन्ध इति, समयं तमवोचाम" इति भाष्यपर्यालोचने वाच्य-वाचकभावः न समयातिरिक्त इति ज्ञायते।

"संबन्धवादिनापि चायमवर्जनीयः"[१०] इति **भाष्येण** "अयं च वाच्यवाचक-भावलक्षणः संबन्धः स्वाभाविकशब्दार्थसंबन्धवादिनाप्यनुज्ञेयः इति **वार्तिकेन** च समयोऽवश्यमभ्युपगन्तव्य इत्युक्तम्। कुतः इत्याकाङ्क्षायाम् —

"न हि स्वाभाविकसंबन्धवादिनोऽनुपयुक्तशब्दार्थसंबन्धस्य शब्दग्रहणाद्विशेष-प्रत्ययो भवति" इति वार्तिककारेणोक्तम्। "अयमस्य वाचकः" इति वा "अस्मादयं बोद्धव्य इति वा संकेतं यः जानाति स एव शब्दार्थयोः स्वाभाविकं संबन्धं ज्ञातुं शक्नोति नान्यथा। असति संकेते घटशब्दकम्बुग्रीवादिमतोरेव संबन्धः न घटशब्दपटयोरिति कथं व्यवस्थापयितुं शक्येतेति वार्तिकाशयः।

---

[९] न्या.सू. २.१.५०

[१०] न्या.भा. २.१.५५

तात्पर्यटीकायाम्[११] एवं प्रत्यपादि – शब्दार्थयोः स्वाभाविकः संबन्धः तादात्म्यरूपो वा प्रत्याय्यप्रत्यायकभावो वा प्राप्तिरूपो वा (संयोगरूपः)। प्रत्यक्षलक्षणसूत्रस्थेन अव्यपदेश्यपदेन तादात्म्यं शब्दार्थयोः निराकृतम्। प्राप्तिनिराकरणहेतुनैव प्रत्याय्यप्रत्यायकभावोऽपि निराकृतः। प्राप्तिरूपस्तु संबन्धः 'पूरणप्रदाहपाटनानुपलब्धेश्च' इति सूत्रकारेण भाष्यकारेण च निराकृतः। परिशेषात् समय एव संबन्धः। कोऽयं समयः अभिधानाभिधेयनियमनियोगः। अभिधानाभिधेययोर्नियमः गोशब्दस्य सास्नादिमानेवार्थः एवमश्वशब्दस्य केसरादिमानेवेति व्यवस्था। तस्मिन्नियोगः बोद्धव्य इति भगवतः परमेश्वरस्य सर्गादौ, सोऽयं समयः। तस्मिन्नुपयुक्ते ज्ञाते शब्दार्थव्यवस्था भवति। संबन्धवादिनोऽपि चायमवर्जनीय इति। येऽपि मीमांसका वैयाकरणा वा स्वाभाविकं शब्दार्थयोः संबन्धमास्थिषत, तेषामपि संबन्धः नैव सत्तामात्रेण गमकः अपि तु ज्ञातः सन्। विज्ञाने चायमस्य वाचक इति वा अस्मादयं बोद्धव्य इति वा संकेत एवोपायः। वृद्धव्यवहारोऽपि गवादिशब्दानां देवदत्तादिशब्दवत् संकेतपूर्व एव। तद्वरमस्तु संकेत एव। कृतमत्र स्वाभाविकेन संबन्धेन। संकेतादेव प्रयोगप्रतिपत्तिव्यवहाराणामुपपत्तेः — इति।

अनेनापि शब्दार्थयोः संकेत एव संबन्ध इति स्पष्टम्। शब्दार्थयोः स्वाभाविकसंबन्धनिराकरणपरं 'जातिविशेषे चानियमात्' इति सूत्रं तात्पर्यटीकायामेवं व्याख्यातम्। स्वाभाविको हि संबन्धः कस्यचिच्छब्दस्य केनचिदर्थेनास्ति, न सर्वस्य सर्वेण। तथा सति अस्य शब्दस्यायमर्थ इति व्यवस्था न स्यात्। तथा च ऋष्यार्यम्लेच्छानां अर्थविशेषनियमो न स्यात्। तथा हि यवशब्दः आर्यैः दीर्घशूके पदार्थे प्रयुज्यते। म्लेच्छैस्तु प्रियङ्गौ। एवं त्रिवृच्छब्दम् ऋषयः स्तोत्रीयानवके प्रयुञ्जते, आर्यास्तु लताविशेषे। सोऽयमनियमो न स्यात् स्वाभाविके सम्बन्धे। न हि स्वभावतो रूपेण सम्बद्धः आलोकः सहस्रेणापि शिल्पिभी रसादिसंबद्धः कर्तुं शक्यः। यतस्ततो रसादयो गम्येरन्। नापि तत्र संकेतेन स्वाभाविकः संबन्धो व्यज्यते। असत्त्वात्। सदेव हि व्यज्यते नासत्। न खलु यत्र घटो नास्ति तत्र तं प्रदीपः शक्तो व्यङ्क्तुम्। सोऽयमनियमः शब्दादर्थप्रत्ययस्य सामयिकत्वे युज्यते, पुरुषेच्छाधीनत्वात्, तस्याश्चानियमात्। न च वाच्यं सर्व एव शब्दाः सर्वैरेवार्थैः स्वभावतः संबद्धाः, संकेतवशात्तु अर्थविशेषनियता इति। प्रमाणाभावात्। जातिभेदेनार्थभेदप्रत्ययस्तु संकेतभेदादप्युपपद्यते इति। एवं च जातिशब्दः यथाश्रुतपरतयैव भाष्यकारेण च व्याख्यातः। वार्तिककारेण जयन्तभट्टेन च देशपरतया

---

[११] ता.टी. २.१.५३

व्याख्यातः। तत्र कारणमुक्तं तात्पर्यटीकायाम् — नन्वार्यदेशवर्तिनां म्लेच्छानामार्य-व्यवहारनिश्चितसंकेतानां नानियम इत्यत आह वार्तिककारः — जातिविशेषशब्देन देशोऽभिधीयत इति।

अभिधानाभिधेयनियमनियोग इत्यत्र नियोगशब्दः संकेतपर्यायः। 'संकेतेन तु नियम्यन्ते' इत्यादिटीकाग्रन्थात्। संकेतोऽपि इच्छारूपः। 'सोऽयमनियमः सांमयिकत्वे उपपद्यते, पुरुषेच्छाधीनत्वात्' इति टीकाव्यवहारात्। परं तु न्यायमञ्जर्यां संकेतः इच्छारूप इति क्वचित्, ज्ञानरूप इति च क्वचित् व्यवहृतम्।

न्यायमञ्जर्यां संकेतस्य शब्दार्थसंबन्धत्वनिरूपणम्[१२]

शब्दस्यार्थेन सह कोऽपि संबन्धो नास्ति। न हि तयोः कुण्डबदरयोरिव संयोगः, तन्तुपटयोरिव समवायो वा संबन्धः प्रत्यक्षेण दृश्यते। तन्मूलकत्वादेव संबन्धान्तराण्यपि न सन्ति। 'मुखे शब्दमुपलभामहे' भूमावर्थम् इति तयोः असंबन्धमेव लोकोऽनुभवति। नाप्यनुमीयते शब्दस्यार्थेन संबन्धः, क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणानुपलम्भात् न शब्ददेशेऽर्थः संभवति। नाप्यर्थदेशे शब्दः, शब्दोत्पत्तिहेतूनां स्थानकरणप्रयत्नानां घटाद्यर्थदेशेऽभावात् इत्याक्षिप्य, उच्यते। न संयोगसमवायाख्यसंश्लेषरूपः संबन्धोऽस्माभिरङ्गीक्रियते। नापि कार्यकारणभावः निमित्तनिमित्तिभावः आश्रयाश्रयिभावः इत्यादयः संबन्धाः। नापि वह्निधूमयोरिव अविनाभावः संबन्धः। पूर्वोक्तदोषादेव। अपि तु शब्दार्थयोः समयः संबन्धः। समयो नाम अभिधानाभिधेयनियमनियोगः, अयं शब्दः अस्यार्थस्य वाचकः इति यः नियमः व्यवस्था तत्प्रयोजकः नियोगः इच्छेति यावत् इति समाहितम्।

तत्र पूर्वपक्षः

ततः — ननु यथा संश्लेषः संबन्धो न संभवति तथा समयोऽपि संबन्धो न भवितुमर्हति। समयो हि पुरुषकृतः संकेतः- इच्छा। न च पुरुषेच्छया वस्तुनियमः संभवति, पुरुषेच्छायाः उच्छृङ्खलत्वात्। यथा हि पुरुषेच्छावशात् शब्दो वाचकः, अर्थो वाच्यः, एवं तद्वशात् अर्थो वाचकः शब्दोऽपि वाच्यः कुतो न भवति। किं च विनापि 'धूमात् वह्निप्रतिपत्तिर्भवतु' इति पुरुषेच्छायां धूमात् वह्निप्रति-पत्तिर्भवति, सत्यामपि जलप्रतीतिच्छायां धूमात् जलप्रतीतिर्न भवति। अतः न इच्छानियन्त्रितोऽर्थप्रतीतिनियमः। किं तु यथा धूमाग्न्योः नैसर्गिक एवाविनाभावो नाम संबन्धः। तस्य संबन्धस्य ज्ञानार्थं भूयोदर्शनादिकं निमित्तमपेक्ष्यते। एवं

---

[१२] न्या.मं. पृ. ५९१

शब्दार्थयोः स्वाभाविकः शक्तिरूपः संबन्धः, तद्व्यञ्जनार्थं वृद्धव्यवहाराद्युपाय-समाश्रयणम्। न च शब्दार्थयोः स्वाभाविके संबन्धे सति दीपादिवत् स्वत एवार्थप्रकाशकत्वसंभवात् किं तद्व्यञ्जनापेक्षणेनेति वाच्यम्। शब्दस्य ज्ञाततया ज्ञापकत्वात्। ज्ञातस्य सतः ज्ञापकस्य धूमादेः अयं स्वभावः यत् संबन्ध-ज्ञानसहकारेणैव स्वज्ञाप्यार्थज्ञापकत्वमिति। दीपादयस्तु सत्तया प्रत्यक्षकारक-सामग्र्यन्तर्गतत्वात् न संबन्धज्ञानसापेक्षा भवन्तीति विशेषः। शक्तिस्तु शब्दस्य स्वाभाविकी न पुरुषकृता, यथा दीपादे रूपप्रकाशनशक्तिः।

अपि चाभिधानाभिधेयनियोगरूपः समयोऽपि ज्ञानमेव। ज्ञानं चात्मनि वर्तते, न शब्दार्थयोरिति न तस्य शब्दार्थसंबन्धत्वम्।

किं च समयः क्रियमाणः प्रत्युच्चारणं वा क्रियते, प्रतिपुरुषं वा, सृष्ट्यादौ वा सकृदीश्वरेणेति विकल्पाः। तत्राद्यपक्षे प्रत्युच्चारणं पूर्वकृत एव समयः क्रियते नूतनो वेति विकल्पे नूतनस्य क्रियमाणस्यार्थप्रत्यायनसामर्थ्यं कथमवगम्यते, नूतनत्वादेव। नूतनेनैव एतावता अनवगतार्थप्रत्यायनसामर्थ्येन यद्यर्थावगतिः, तदा केवलेन शब्देनैव तथा बोधोऽस्तु, किं समयेन?

प्रतिपुरुषं समयः भिन्नः अभिन्नो वा क्रियते। आद्ये प्रतिपुरुषं शब्दभेदकृत-समयभेदात् एकवस्तुविषयकज्ञानानुपपत्तिः। समयभेदस्थलेऽर्थभेदप्रतीतेरेव दर्श-नात्, यथा गोशब्दस्य सास्नादिमानर्थः, केसरादिमान् अश्वशब्दस्यार्थ इति। अभेदपक्षेऽपि कृतस्य करणायोगात् ज्ञानमेव समयस्य करणमित्युक्तं भवति। ततो वरं स्वाभाविकशक्तेरेव ज्ञानमिति।

सर्गादावीश्वरेण सकृत् संबन्धकरणमित्यप्ययुक्तम्। तथाविधकालस्यैवा-संभवात्। न हि शब्दार्थव्यवहाररहितः कश्चन काल उपपद्यते। तस्मान्नित्यस्यैव संबन्धस्य वृद्धव्यवहारादितो ज्ञानं न तु करणम्।

किं च शक्तिशून्यः समयमात्रशरणः शब्दो यद्यर्थप्रत्यायकः अक्षिनिकोचः — अक्षिचेष्टाविशेषः। कशाङ्कुशप्रतोदाभिघातः — ध्वनिविशेषः। तस्य यथा भीत्युत्पादनेन अपसर्पणहेतुत्वम् तथा शब्दस्यार्थबोधकत्वं भवेत्। तदा शब्दः अक्षिनिकोचहस्तसंज्ञादिभ्यो न भिद्येत। ततश्च कशाङ्कुशप्रतोदाभिघाततुल्यः स्यात्। तथा च "शब्दादर्थं प्रतिपद्यामहे" इति लौकिको व्यपदेशो बाध्येत। "समयादर्थं प्रतिपद्यामहे" इति व्यपदेशः स्यात्। किं च समयः शब्दार्थसंबन्ध इति पक्षे सर्वशब्दानां डित्थडवित्थादियदृच्छाशब्दतुल्यत्वं स्यात्। ततश्च गवाश्वादि-शब्दानां नियतार्थबोधकत्वं न स्यात्।

यदप्युक्तं 'जातिविशेषे चानियमात्' इति। तदपि न। एकस्यैव शब्दस्यानेकेष्वर्थेषु अनेकशक्तिसंभवात् यत्रार्थे शब्दस्य शक्तिग्रहः तस्यार्थस्य प्रतीतिरिति व्यवस्थायाः संभवात्। अथवा आर्यदेशप्रसिद्ध एव शब्दानामर्थः, इतरस्तु म्लेच्छजनसंमतोऽनादरणीय इति। तस्मात् समयपक्षस्यातिदौर्बल्यात् शब्दार्थयोः स्वाभाविकः शक्तिरूपः संबन्धः इति न तत्र पुरुषस्य प्रभविष्णुता – इति पूर्वपक्षः।

सिद्धान्तः

अत्रोच्यते। न नित्यः संबन्धः उपपद्यते। शब्दवत् अर्थवच्च तृतीयस्य तस्य प्रत्यक्षादिना प्रमाणेनानवगम्यमानत्वात्।

न च शक्तिरूपस्य संबन्धस्य शब्दार्थाश्रितत्वात् न पृथक्तया प्रतीतिरिति वाच्यम्। शक्त्याख्यस्य स्वरूपसहकार्यतिरिक्तस्य पदार्थस्य प्रागेव विस्तरेण दूषितत्वात्। न हि शक्तिः प्रत्यक्षगम्या, द्रव्यस्वरूपवत् तस्याः अनुपलम्भात्। नाप्यनुमेया, कार्याणां शक्तिं विनापि उपपद्यमानत्वात्।

यदुक्तं समयस्य पुरुषेच्छाधीनत्वात् तस्याश्च निरङ्कुशप्रसरत्वात् वाच्यवाचकव्यत्ययः स्यात् — वाच्यो वाचकः स्यात्, वाचको वाच्यः स्यादिति। तन्न। शक्तिस्वीकारेऽपि सा शक्तिः शब्द एव वर्तते न त्वर्थ इति कुत इति शङ्कायां योग्यतावशात् इति त्वया समाधेयतया शक्त्यभावपक्षेऽपि योग्यतावशात् शब्द एव वाचकत्वम् न त्वर्थे इति समाधानस्य तुल्यत्वात्। का पुनर्योग्यतेति चेत् — क्रमविशेषोपस्कृतः गत्वादिजातियोगः। गकारोत्तरौकारत्वादिसामान्यसंबन्धो यस्मिन् अस्ति स वाचकत्वे योग्यः। गोत्वादिजातियोगः यस्मिन्नस्ति स वाच्यत्वे योग्यः। यथा हि द्रव्यत्वाद्यविशेषेऽपि वीरणत्वादिजातिमतां कटनिष्पादने योग्यता, तन्तुत्वादिसामान्यवतां च पटनिष्पादने। न च तत्र शक्तिरस्ति। तस्मात् असत्यामपि शक्तौ सामान्यविशेषसंबन्धस्य नियामकत्वात् न वाच्यवाचकयोर्व्यत्ययप्रसङ्गः।

शब्दार्थयोः अविनाभावो न संबन्धः इति निरूपणम्

न च शब्दार्थयोः धूमाग्न्योरिव अविनाभाव एव संबन्धोऽस्तु इति वाच्यम्। धूमाग्न्योर्हि सबन्धः प्रतीयमानः एवं प्रतीयते धूमोऽग्निं विना न भवतीति। शब्दार्थयोस्तु संबन्धः प्रतीयमानः एवं प्रतीयते "अयमर्थोऽस्माच्छब्दात प्रतीयते" इति। अतोऽविनाभाववलक्षण्यं शब्दार्थसंबन्धस्य। अत एवावगतिपूर्विकैवावगतिरिहेति अनुमानाच्छब्दस्य भेद उक्तः। अयमाशयः – धूमवह्न्योर्हि अविना-

भावः न पुरुषकल्पितः, किं तु सहजः। शब्दार्थयोस्तु संबन्धः न तथा सहजः, किं तु कल्पितः। ततश्च 'अस्मात् पदात् अयमर्थो बोद्धव्य' इति संकेतस्यावगमानन्तरमेव अर्थावगम इति।

यत्तु शब्दस्य धूमादेरिव ज्ञापकत्वात् संबन्धज्ञानसापेक्षत्वमुक्तम्। तत्रोच्यते। धूमस्य वह्निज्ञापकत्वं न स्वाभाविकम्। अग्न्यविनाभूतत्वं तस्य स्वाभाविकं बलम्। तस्मिन् बलेऽज्ञाते वह्निप्रतीतिरेव न जायत इति वह्निप्रतीत्यर्थं अविनाभावरूपबलग्रहणं युक्तम्। इह तु शब्दे अर्थप्रतीतिशक्तिरेव स्वाभाविकी भवताङ्गीक्रियते। सा यदि स्वाभाविकी, किं तत्ज्ञानापेक्षणेन, दीपादिवत् ज्ञाननिरपेक्षप्रकाशकत्वसंभवात्।

यच्चोक्तं — समयस्य ज्ञानात्मकत्वात् आत्मनि वृत्तिः। न शब्दार्थयोः। अतः कथं तस्य शब्दार्थसंबन्धत्वमिति। तन्न। शब्दार्थयोः समयाश्रयत्वाभावेऽपि समयविषयत्वात् ज्ञानात्मकस्य समयस्य विषयतासंबन्धेनार्थनिष्ठत्वात् शब्दनिष्ठत्वाच्च तत्संबन्धत्वोपपत्तेः।

यदपि कथितम् — समयमात्रशरणे शब्दे स्वीक्रियमाणे 'शब्दादर्थं प्रतिपद्यामहे' इति व्यपदेशो न स्यात्, 'समयादर्थं प्रतिपद्यामहे' इति व्यपदेशः स्यात् — इति। स्वाभाविकशक्तिपक्षेऽपि 'शक्तेरर्थं प्रतिपद्यामहे' इति व्यपदेशः स्यात् शब्दादर्थं प्रतिपद्यामहे' इति व्यपदेशो न स्यादिति तुल्यम्। न चेष्टापत्तिरिति वाच्यम्। 'अविनाभावादग्निं प्रतिपद्यामहे, न धूमात्' इति व्यपदेशप्रसङ्गात्। धूमाङ्गत्वात् अविनाभावस्य न तथा व्यपदेश इति तु प्रकृतेऽपि तुल्यम् शब्दाङ्गत्वात् समयादेरिति।

यदपि चागादि — स एव शब्दस्यार्थः, यत्रैनमार्याः प्रयुञ्जते न म्लेच्छजनप्रसिद्ध इति। तदेतत् कथमिव शपथमन्तरेण निर्णीयेत। न हि म्लेच्छदेशे प्रयुज्यमानेभ्यः शब्देभ्यः अर्थप्रत्ययो न जायते, बाध्यते, संदिग्धो वा। तथा च कथं न स शब्दार्थः। न चार्याणामर्थविशेषे प्रसिद्धिः म्लेच्छप्रसिद्धेर्बाधिकेति वाच्यम्। आर्यप्रसिद्धेः म्लेच्छप्रसिद्धिर्बाधिकेति विपरिवर्तप्रसङ्गात्। अक्षादिशब्दवत् यवादिशब्दानां नानार्थत्वोपपत्त्या देशविशेषेणार्थविशेषव्यवस्थायाः आश्रयणेन व्यवस्थितविकल्पस्य संभवात्। पिकनेमाधिकरणे[१३] भवद्भिः (मीमांसकैः) म्लेच्छप्रसिद्ध्यनुसारेण पिकनेमादिशब्दानामर्थस्य निर्णीतत्वेन म्लेच्छप्रसिद्धेरप्यादरणीयत्वात्। "पिक इति कोकिलो ग्राह्यः, नेमोऽर्धम्, तामरसं पद्मम्, सत इति दारुमयं पात्रम्, परिमण्डलं शतच्छिद्रम्" इति तत्रस्थं शाबरं भाष्यम्।

---

[१३] १.३.५

अवेष्ट्यधिकरणे[१४] राजशब्दम् आन्ध्रप्रसिद्धार्थपरतया वर्णितवन्तो भवन्तः। तथा च भाष्यं तत्रत्यम् — "जनपदपुरपरिरक्षणमनुजीवत्यपि क्षत्रिये राजशब्दमान्ध्राः प्रयुञ्जते। आन्ध्राणां प्रयोगो न विरोत्स्यते" इति।

यदप्युक्तं समयः प्रत्युच्चारणं, प्रतिपुरुषं, सर्गादौ सकृद्वेति, तदपि सर्गादौ ईश्वरेण सकृदेव समयकरणमित्यस्मत्सिद्धान्तात् न क्षतिकरम्।

अत एव न सर्वशब्दानां यदृच्छातुल्यत्वम्। केषांचिदेव शब्दानामस्माभिरद्यत्वे संकेतकरणात्। तथा चेश्वरसंकेतितः शब्दः शक्त इत्युच्यते। आधुनिकसंकेतितस्तु यदृच्छाशब्द इति महान् विशेषः। तस्मात् शब्दार्थसंबन्धः न स्वाभाविकः अपि तु सामयिकः समयश्च अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरसंकेतः। [अयं संकेतः ज्ञानरूप इच्छारूपो वेति न्यायमञ्जरीग्रन्थात् न स्पष्टः] इति न्यायमञ्जर्यां सिद्धान्तितम्।

न्यायभूषणे संकेतस्य शब्दार्थसंबन्धत्वनिरूपणम्

न्यायभूषणकारास्तु[१५] वेदस्यापौरुषेयत्वेऽपि पुरुषकृतं समयमपेक्ष्यैवार्थं प्रतिपादयति वैदिकः शब्दः। अन्यथा हि बालगोपालादीनामपि वेदपाठश्रवणमात्रात् तदर्थबोधः स्यात्। न हि संकेतशून्याः शब्दाः क्वचिदप्यर्थमभिदधाना दृश्यन्ते। संकेतश्च यद्यनाप्तेन पुरुषेण क्रियते, तदा तदीयसंकेतमपेक्ष्य अर्थमभिदधतो वेदस्याप्रामाण्यमेव प्रसज्येत। संकेतः आप्तेन कृतश्चेत् आप्तप्रामाण्यादेव वेदस्य प्रामाण्यमङ्गीकृतं स्यादिति व्यर्थं वेदस्यापौरुषेयत्ववर्णनम्।

ननु संकेताभावेऽपि सम्बन्धबलादेव शब्दाः अर्थमवगमयन्तीति चेत् — स सम्बन्धः अनित्यो वा नित्यो वा। अनित्यत्वे संकेतपक्षोक्तदोषः। अनित्यत्वे हि कृतकः स अनाप्तेन कृतो वा आप्तेन कृतो वा? आद्ये वेदस्याप्रामाण्यापत्तिः। द्वितीये आप्तप्रामाण्यादेव वेदप्रामाण्यमिति व्यर्थं वेदस्यापौरुषेयत्ववर्णनमिति। संबन्धस्य नित्यत्वपक्षे सर्वेषां वेदपाठश्रोतॄणां तदर्थावगमप्रसङ्गः। ननु संबन्धः ज्ञानविषयः सन्नेव अर्थं बोधयति। ज्ञानं च संकेतात् भवति, यथा पितापुत्रयोः स्थित एव संबन्धः अयमस्य पुत्र इति संकेतेनाभिव्यज्यते। अतः नोक्तप्रसङ्ग इति चेन्न। शब्दार्थयोः संबन्धसत्त्वे प्रमाणाभावात्। यथा पितापुत्रयोः जन्यजनकभावरूपः संबन्धः अन्वयव्यतिरेकाभ्यां प्रतीयते, नैवं शब्दार्थयोः संबन्धविशेषसत्त्वे प्रमाणमस्ति।

---

[१४] २.३.३

[१५] न्या.भू. पृ. ३९८

ननु शब्द एव वाचकः, अर्थ एव वाच्य इति व्यवस्था असति संबन्धे न युज्यते। तस्मात् वाच्यवाचकव्यवस्थैव शब्दार्थसंबन्धे प्रमाणम्। न च संकेत-कारिता सा व्यवस्थेति वाच्यम्। विपर्ययेणापि वाच्यवाचकभावप्रसङ्गात्। अस्य शब्दस्यायमर्थो वाचकः, अस्यार्थस्य चायं शब्दोऽभिधेयः (वाच्यः) इत्यपि हि संकेतः कर्तुं शक्यते।

किं च संकेतपक्षेऽनवस्था च प्रसज्यते। तथा हि — यदि संकेतबलेनैव शब्दोऽर्थं प्रतिपादयति, स संकेतः नावाचकेन शब्देन कर्तुं शक्यते। यस्य कस्यापि शब्दस्य यस्मिन् कस्मिंश्चिदपि अर्थे संकेतस्य कर्तुं शक्यतया अव्यवस्थाप्रसङ्गात्। तथा च वाचकः शब्दः संकेतकरणे हेतुः। तस्य वाचकत्वं च संकेतान्तरबलात्। संकेतान्तरमपि वाचकशब्देनैव करणीयम्। तस्य वाचकत्वं चान्यस्मात् संकेतादित्यनवस्था प्रसज्यते। अतः शब्दार्थयोः संकेतातिरिक्तः स्वाभाविकः संबन्धोऽङ्गीकरणीयः इति चेत् —

अत्रोच्यते। यत्तावत् व्यवस्थादर्शनादिति। तन्न। शब्द एव वाचकः अर्थ एव वाच्य इति व्यवस्थायाः शक्तिनिमित्तकत्वात्। या एषां शब्दानामभिधात्री शक्तिः सार्थेषु नास्ति इति तेनेयं व्यवस्था। अन्यथा सर्वेषां कारकाणां व्यञ्जकानां च अमुककार्योत्पादकत्वम् अमुककार्यव्यञ्जकत्वमिति व्यवस्थायाः दर्शनात् कार्यैः व्यङ्ग्यैश्च साकं स्वाभाविकः संबन्धः प्रसज्येत।

अत्रेदं चिन्त्यम्। शक्तिशब्देन किमभिधीयते। संकेतश्चेत् पूर्वोक्ताव्यवस्था तथैवावतिष्ठते। तस्या अर्थनिष्ठत्वाभावे शब्दार्थसंबन्धत्वानुपपत्तिश्च। संकेतातिरिक्तं सामर्थ्यं चेत् मीमांसकमतप्रवेश इति।

यदप्युक्तम् अनवस्थाप्रसङ्गादिति। तदप्ययुक्तम्। वाचकशब्देनैव संकेतः क्रियत इति नियमानङ्गीकारात्। अन्यथापि हि संकेतः क्रियते। यथाङ्गुल्या निर्दिश्य हस्तेन संस्पृश्य वा अयं गौरिति संकेतं करोति। तस्मात् समयबलेनैव शब्दानां वाचकत्वात् न स्वाभाविकः संबन्धोऽस्ति।

शब्दार्थयोः स्वाभाविकसंबन्धस्य निरासः

किं च एकस्यैव शब्दस्य देशभेदेनार्थभेदः दृश्यते। यथा चोरशब्दस्तस्कर-मार्येष्वभिधत्ते, द्रविडेष्वोदनम्। स्वाभाविकसंबन्धे तु ईदृशस्यानियमस्यानुपपत्तिः। न हि धूमः क्वचिदग्निं प्रतिपादयति, क्वचिज्जलम् इति। किं च लोके यत्र यत्रार्थे पुरुषेण शब्दः संकेत्यते तं तमर्थं प्रतिपादयन् उपलभ्यते। शब्दार्थयोः स्वाभाविकसंबन्धे तु पुरुषेच्छानुसरणानुपपत्तिः। न हि वह्निना स्वाभाविक-

संबन्धवान् धूमः पुरुषेच्छानुसारेण कदाचिद्वह्निं कदाचिज्जलं वा अवगमयति। पुत्रादिषु च स्वेच्छया नामकरणं दृश्यते। तस्मात् स्थित एव संबन्धः संकेतेन ज्ञाप्यत इत्ययुक्तम्।

ननु वैदिकशब्दानामेवार्थैः सह स्वाभाविकः संबन्धः। इतरशब्दानां तु सांकेतिक इति विभागोऽस्तु इति चेत् — न। तत्र प्रमाणाभावात्। न हि वैदिकलौकिकशब्दयोर्विशेषोऽस्ति, येन एकत्र शब्दार्थयोः संबन्धः स्वाभाविकः, अन्यत्र सांकेतिक इति कल्प्येत। नामाख्यातोपसर्गादीनामुभयत्राविशेषात्।

किं च नन्दविक्रमादित्यश्रीहर्षादिव्यवहारवत् सर्वव्यवहाराणामादिमत्त्वात् सांकेतिकत्वमेव। आदिमत्त्वेऽपि समयकारप्रभावात् अन्यस्माद्वा कुतश्चिन्निमित्तात् भूयस्स्वपि देशादिषु कश्चित् व्यवहारः प्रसिद्धिं गतः कश्चिन्न। रामरावणयुधिष्ठिरादिनामान्येव प्रसिद्धार्थानि अद्यापि व्यवहरन्ति न सर्वपुरुषनामानि। निघण्टावुक्तानामपि पर्यायनाम्नां किंचित् बहुषु शास्त्रेषु लोकेषु च प्रसिद्धार्थं किंचिन्न। नैतावता स्वाभाविकः सांकेतिकश्चेति संबन्धे भेदः युक्तः।

किं च संकेतस्य यदि असामर्थ्यं स्यात् तदा अन्यः कल्प्येत। यदा त्वेकत्रापि संकेतस्य सामर्थ्यमिष्टं तदा अन्यत्रापि समयादेव शब्दानां बोधकत्वं भविष्यतीति व्यर्था संबन्धान्तरकल्पना। न च तर्हि सर्वत्र स्वाभाविकसंबन्ध एवास्त्विति वाच्यम्। तथात्वे चोरादिशब्दानां देशविशेषेऽर्थभेदप्रतीत्यनुपपत्तेः इत्युक्तत्वात्। न च प्रत्येकं शब्दस्य सर्वैरर्थैः संबन्धस्वीकारान्न दोष इति वाच्यम्। तर्हि गोशब्दात् सर्वार्थप्रतीतिप्रसङ्गात्। समयापेक्षणादप्रसङ्ग इति चेत् — तर्हि समय एवास्तु, किं स्वाभाविकसंबन्धकल्पनेन?

किं च प्रत्येकं शब्दस्य सर्वैरर्थैः संबन्धोऽस्ति, स पुरुषकृतेन समयेन नियन्त्रितः अर्थविशेषप्रतीतिहेतुर्भवतीति स्वीकारे वैदिकशब्दानां संकेतयितृपुरुषानङ्गीकारेऽर्थप्रतिपादकत्वं न स्यात्। तदङ्गीकारे च पौरुषेयापौरुषेयशब्दयोर्न कश्चिद्विशेषः स्यात्। किं दोषवान् वेदेषु संकेतयिता अथ गुणवानिति शङ्का च स्यात्। तच्छङ्कया चाप्रामाण्यशङ्कापि स्यादिति व्यर्थोऽयं वेदस्यापौरुषेयत्वप्रयासः। इति न्यायभूषणे सांकेतिकत्वसमर्थनप्रकारः शब्दादर्थप्रत्ययस्य।

मीमांसकमतेन शब्दार्थसंबन्धनिरूपणम्

शास्त्रदीपिकायां प्रत्याय्यप्रत्यायकभाव एव शब्दार्थयोः संबन्ध इति सयुक्तिकं निरूपितम्। तथा हि — न तावत् शब्दार्थयोः संयोगः संबन्धः, क्षुरादिशब्दोच्चारणे मुखस्य पाटनप्रसङ्गात्। नापि कार्यकारणभावः, द्वयोरपि नित्यत्वात्। नापि

प्रत्याय्यप्रत्यायकभावः, असति संबन्धे प्रत्यायकत्वासंभवात्। केन संबन्धेन शब्दोऽर्थं प्रत्याययतीत्येतदेव हि निरूप्यते। तत्र प्रत्यायकत्वादेव प्रत्यायकत्व-मित्युक्ते आत्माश्रयदोषापत्तिः। तस्मान्नास्ति संबन्धः। असति च संबन्धे वस्त्वन्तरस्य वस्त्वन्तरबोधकत्वासंभवात् अनिरूपितहेतुविशेषं स्वप्रज्ञानवत् यादृच्छिकं शब्दार्थज्ञानं न प्रमाणं भवितुमर्हति।

स्यादेवं यद्यसंबन्धः शब्दार्थयोः, अस्ति च संबन्धः प्रत्याय्यप्रत्यायकत्वरूपः। असत्येव संबन्धान्तरे स्वभावत एव शब्दोऽर्थस्य प्रत्यायकः, अर्थश्च प्रत्याय्य इत्ययमेव संबन्धो भविष्यति।

यच्चेदमिन्द्रियलिङ्गादिवत् संनिकर्षव्याप्त्यादिसंबन्धानपेक्षमर्थप्रतिपादनम् इदमेवा-भिधानमित्युच्यते। यथेन्द्रियं संनिकर्षमपेक्षते लिङ्गादिकं वा व्याप्त्यादि, तथायं शब्दो न भवति। किं तु संनिकर्षाद्यनपेक्षमेव यदर्थप्रतिपादनं इदमेवाभिधानमुच्यत इत्यर्थः। एतदुक्तं भवति — अर्थप्रतिपत्तिफलकः शब्दव्यापारोऽभिधानक्रिया। तस्यां च प्रतिपत्त्याख्यफलशालितया यदर्थस्य कर्मत्वं तत् वाच्यत्वम्, शब्दस्य च विवक्षावशेन यत् कर्तृत्वं करणत्वं वा तत् वाचकत्वमिति। अनेनैवाभिप्रायेण "संज्ञासंज्ञिलक्षणः संबन्धः" इति भाष्यकारेणोक्तम्।

किं पुनः शब्दस्यार्थप्रतिपादकत्वे प्रमाणम्, शब्दानन्तरमर्थप्रतिपत्तिरेव। अनन्यथासिद्धार्थप्रत्ययान्यथानुपपत्तिप्रसूतार्थापत्तिरेव प्रमाणमिति यावत्। नन्विय-मभिप्रायानुमानद्वारेणैवोपपन्ना। नेति ब्रूमः। अर्थाभिप्रायशून्येनापि स्वापाद्यवस्थायां परवशप्रयुक्तैरपि शब्दैरर्थप्रतिपत्तिदर्शनात्। तथा पुरुषान्तरकृतमपौरुषेयं वा वेद-वाक्यम् अर्थज्ञानशून्यैरपि प्रयुज्यमानं व्युत्पन्नानामर्थबुद्धिं जनयत्येव। तस्मात् प्रत्यायकः शब्दः।

ननु स्वभावत एव यदि शब्दोऽर्थं प्रत्याययति तदा प्रथमश्रवणे कुतो न प्रत्याययति प्रत्यायकत्वरूपसंबन्धग्रहणात् पश्चादेव कुतः प्रत्याययति। तथा च गोशब्दः न गोत्ववाचकशक्तिमान् संबन्धग्रहणात् पूर्वमप्रतिपादकत्वात्, देवदत्त-शब्दवत्। प्रत्यायकत्वशक्तिमत्त्वे प्रथमश्रुत एव प्रत्याययेदिति विपक्षे बाधकस्तर्क इति चेन्न। सहकारिविरहात्। शब्दस्य अर्थप्रत्यायने प्रत्यायकत्वरूपसंज्ञात्वज्ञानं सहकारिकारणम्, नेत्रस्येवालोकः। प्रथमश्रवणे च तादृशसहकारिविरहात् न प्रत्यायकत्वम्। तदुक्तम् —

यत् साधकतमत्वेन कस्यचित् किंचिदुच्यते।
तस्यानुग्राहकापेक्षा न स्वशक्तिविघातिनी।

न हि तत् करणं लोके वेदे वा किंचिदीदृशम्।
इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता।

इति। तेन यः पुरुषान्तरेभ्यः अयं शब्दोऽस्य संज्ञेति ज्ञातवान् तस्यैव प्रत्याययति अर्थं, नान्यस्येति न दोषः। यथाहुः —

शरीरात्ममनोयोगादसाधारणताबलात्।
विज्ञानासत्तिभावाच्च चक्षुः करणमिष्यते।
तथैवेहापि संबन्धज्ञानमङ्गं प्रसिद्धितः। इति।

एवं च संबन्धान्तरापेक्षां विना प्रत्यायकत्वमेव शब्दस्यार्थेन संबन्ध इति मीमांसकमतमिति सूत्रभाष्यादितोऽवगम्यते।

प्रकरणपञ्चिकायां प्रत्याय्यप्रत्यायकभावस्य संबन्धत्वप्रतिपादनम्

प्रकरणपञ्चिकायां[१६] पूर्वोक्तरीतेरपि रीत्यन्तरेण स्पष्टतया प्रतिपादितमिति स ग्रन्थोऽत्र तथैवोल्लिख्यते। कः पुनरर्थः? अभिधेयः। अभिधेय एव कः? येन सह शब्दस्यापौरुषेयः संबन्धः। अथ कः संबन्धः? प्रत्याय्यप्रत्यायकभावः। न तर्ह्यपौरुषेयः संबन्धः, स्वभावतः शब्दस्याप्रत्यायकत्वात्। यदि हि स्वभावत एव शब्दोऽर्थं प्रत्याययेत् ततः प्रथमश्रुतः किं न प्रत्याययेत्? ततोऽवगच्छामः अपेक्षते किंचित् शब्द इति। देवदत्तादिपदेषु च पुरुषसंकेतायत्ता अर्थप्रतीतिर्दृष्टेति, गवादिपदेष्वपि तदपेक्षैवाश्रीयते। तदपेक्षा चेदर्थावगतिः, न तर्ह्यपौरुषेयं शब्दस्यार्थ-प्रत्यायकत्वम्।

उच्यते। यद्यपि प्रथमश्रुताच्छब्दादर्थं नावबुध्यते, तथापि स्वाभाविकमेव शब्दस्यार्थप्रत्यायकत्वम्, न पुनः संकेतापेक्षम्। तथा हि —

वृद्धयोर्व्यवहरतोः एकस्य वाक्यं श्रुत्वा, परस्य प्रवर्तमानस्य प्रवृत्त्या बुद्धिमनुमाय तस्याश्च बुद्धेः शब्दश्रवणानन्तरभावित्वात् शब्दस्य तद्धेतुतां निश्चिनोति। किं तु तेषां पार्श्ववर्तिनां व्युत्पित्सूनां तस्मात् शब्दात् स्वयमर्थमजानतां पुनरियं शङ्का जायते — यदि प्रत्यायकः शब्दः, ततोऽ-स्माकमपि कुतो नार्थं बोधयति। अथ अप्रत्यायकः, तदा वृद्धस्य कथं बोधं जनयतीति। एवं शङ्कमानानां तेषां पुनरेषा कल्पना प्रसरति — नूनमस्ति कश्चिदस्य वृद्धस्य विशेषः यतोऽर्थमवबुध्यत इति। कोऽसौ विशेष इति निर्णयतां पुनः शब्दश्रवणे सति वृद्धव्यवहाराधीनार्थप्रत्यायकत्वज्ञानमात्रेण स्वस्यार्थावगम-दर्शनात् अर्थप्रत्यायकत्वज्ञानमेव विशेषः इति निश्चयो जायते। न च संकेतज्ञानं

[१६] प्र.पं. पृ. २३२-२३४

वृद्धस्य विशेष इति कल्पना शक्या, तदानीं संकेतस्यैवाप्रतीतेः। व्युत्पन्नेतरशब्दार्थो हि संकेतादर्थमवबुध्यमानः संकेतं प्रतिपद्यते, नान्यथा।

ननूत्तरकालं संकेतदर्शनात् किमिति संकेतमूलकं प्रत्यायकत्वं नाश्रीयते। न। शब्दस्वभावत एवार्थप्रतीतिरूपकार्यसिद्धेः। यदि हि शब्दमात्रादर्थप्रतीतिर्न सम्पद्यते ततः संकेतोऽपि तत्कारणमिति कल्प्येत + नान्यथा। उपपद्यते तु शब्दमात्रादेवार्थावगतिः पूर्वोक्तेन मार्गेण।

नन्वेवं सति देवदत्तादिपदेष्वपि कथं संकेतस्य कारणत्वम्। उच्यते। प्रत्यक्षदृष्टस्तत्र संकेतः न तु कल्पयितव्यः। तेन देवदत्तादिपदेषु संकेतस्यैवार्थप्रतीतिकारणत्वम्। गवादिपदेषु तु केवलकार्यदर्शनमात्रकल्पनीयो नावकाशं लभत इति अपौरुषेयः शब्दानामर्थेन प्रत्याय्यप्रत्यायकभावलक्षणः संबन्ध इति सिद्धम्।

एवं च मीमांसकमते शब्दानामर्थप्रत्यायकत्वं यदस्ति तदेवार्थेन सह संबन्धः, तत्तु न संकेतसापेक्षमिति स्वाभाविकमित्युच्यते। आधुनिकसंकेतितपदेषु तु संकेतसापेक्षं प्रत्यायकत्वमिति विशेषोऽवगम्यते।

शब्दार्थसंबन्धविषये नव्यनैयायिकमतम्

गदाधरभट्टाचार्यैः शक्तिवादारम्भे — "संकेतो लक्षणा चार्थे पदवृत्तिः" इत्युक्तम्। वृत्तिर्नाम शाब्दबोधौपयिकः संबन्धः। तथा चार्थप्रतियोगिकः पदानुयोगिकः अर्थानुयोगिकः पदप्रतियोगिको वा शाब्दबोधौपयिकः संबन्धः संकेतो लक्षणा चेति तदर्थः। संबन्धे शाब्दबोधौपयिकत्वं च शाब्दबोधजनकोपस्थितिजनकज्ञानविषयत्वम्। शक्तिलक्षणान्यतरात्मकपदपदार्थसंबन्धज्ञानवतो हि पुरुषस्य पदज्ञानमर्थोपस्थितिद्वारा शाब्दबोधं जनयति। एतदनन्तरं च भट्टाचार्यैः — वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते। इदं पदमिममर्थं बोधयत्विति, अस्माच्छब्दादयमर्थो बोद्धव्य इति वा इच्छा संकेतरूपा वृत्तिः। तत्राधुनिकसंकेतः परिभाषा। तया चार्थबोधकं पदं पारिभाषिकम्, यथा शास्त्रकारादिसंकेतितनदीवृद्ध्यादिपदम्। ईश्वरसंकेतः शक्तिः। तया च अर्थबोधकं पदं वाचकम्। यथा गोत्वादिविशिष्टबोधकं गवादिपदम्। तद्बोध्योऽर्थो गवादिर्वाच्यः, स एव मुख्यार्थ इत्युच्यते — इति अभिहितम्। एवं वदतां भट्टाचार्याणामयमाशयः – यथा आधुनिकसंकेतितेषु नदीवृद्धिदेवदत्तादिपदेषु संकेतमूलकमेव अर्थप्रत्यायकत्वं दृश्यते तथा गोघटादिपदेष्वपि संकेतमूलकमेव प्रत्यायकत्वम्। संकेताश्रयश्चेश्वरः। तथा च घटादिपदानि संकेतज्ञानपूर्वकमर्थप्रत्यायकानि पदत्वात् देवदत्तादिपदवत्

इत्यनुमानेन सर्वेषां पदानां कृत्रिममेवार्थप्रत्यायकत्वं न स्वाभाविकमर्थप्रत्यायकत्वं केषांचिदपीति मीमांसकमते दोष उक्तो भवति।

पदवाक्यरत्नाकरोक्तरीत्या संकेतस्य वृत्तित्वनिरूपणम्[१७]

ननु यदि पदपदार्थयोः संबन्धः स्यात् तदैव तज्ज्ञानस्य (पदज्ञानस्य) उद्बोधकविधया अर्थस्मारकत्वं संभवति, ततश्च शाब्दबोधजनकत्वमपि पदस्योपपन्नं भवेत्। पदस्यार्थेन सह संबन्धस्तु दुर्वचः, न हि पदमर्थेन सह संयोगसमवाय-तद्घटितव्याप्त्यादिभिः संबद्धम्। तथा सति अन्नशब्दोच्चारणे सति तत्संयुक्तस्य तत्समवेतस्य तद्व्यापकस्य वा भक्तरूपस्यार्थस्यापि मुखे संबन्धप्रसङ्गात् मुखपूरणमापद्येत। एवमग्न्यादिपदोच्चारणेऽपि तत्तदर्थस्य मुखेन सह संबन्धप्रसङ्गात् प्रदाहपाटने अप्यापद्येताम्।

न चाभिधानाम्नी पदस्यार्थेन सह संगतिः सप्तपदार्थातिरिक्तेति वाच्यम्। आधुनिकसंकेतितानां टि-घु-भादिशब्दानां नाट्यशास्त्रसंकेतितानामङ्गुल्याद्यभि-नयानां च अर्थेन सह अतिरिक्तसंबन्धप्रसङ्गात्।

तत्र मीमांसकमतदूषणम्

यत्तु मीमांसकैरुक्तम् — गोबुद्धिजनकतैव गोपदस्य गवि संगतिः, सैव शक्तिः। न च गोज्ञाननिरूपितशक्तेः पदे सत्त्वेऽपि गोनिरूपितशक्तेः तत्राभावात् तन्निरूपकत्वमादाय पदार्थे क्रियमाणः गोपदशक्यत्वव्यवहारोऽनुपपन्नः इति वाच्यम्। तन्मते मुख्यं तत्पदशक्यत्वं तज्जन्यत्वमेव। तच्च गोज्ञान एवास्तीति गोज्ञानस्यैव गोपदशक्यत्वम्। तत् गवि आरोप्य गौर्गोपदशक्येति व्यवह्रियते। तथा च गवि शक्यपदस्य लक्षणाभ्युपगमेनादोषात्। तद्विषयकज्ञानजनकतया गृहीतं पदं तदर्थस्मारकम्, यथा वह्निविषयकज्ञानजनकतया गृहीतो धूमः वह्नेः स्मारकः। गोबुद्धिजनकत्वविषयकज्ञानजन्यसंस्कारेण पदज्ञानसहकृतेन जनितं पदार्थस्मरणं शाब्दबोधं प्रति हेतुः। यदाहुरभियुक्ताः —

> इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
> अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा। इति।

अपभ्रंशानां वाचकत्वविचारः

ननु तद्बुद्धिजनकत्वस्यैव तच्छक्तित्वेऽपभ्रंशशब्देभ्यः शाब्दबोधोपगमे तेषामपि वाचकत्वं स्यात्। तेभ्यः शाब्दबोधानुपगमे अव्युत्पन्नानामविशेषदर्शिनां

---

[१७] प.वा.र. पृ. ५७

(अपभ्रंशो न वाचक इति ज्ञानरहितानां) पामराणां गाव्यादिशब्दश्रवणानन्तरं गां शाब्दयामि इत्यनुव्यवसायस्य सर्वजनसिद्धस्यापलापः इति चेन्न। अपभ्रंशेषु बुद्धिजननयोग्यतारूपशक्तेरभावेऽपि तद्भ्रमेण बोधजनकत्वस्वीकारात्। व्युत्पन्नास्तु गाव्यादिभिरपभ्रंशशब्दैः गवादिसाधुशब्दमनुमाय स्मृत्वा वा तत एव गवादिकं बुध्यन्त इति स्वीकारात्। तदुक्तं हरिणा —

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः।
न शिष्टैरनुमन्यन्ते पर्याया इव साधवः।
न यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः।
अम्माम्मेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तत्र व्यक्ते भवति निर्णयः।
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते।

इति। भवतु वा अपभ्रंशेष्वपि बुद्धिजनकत्वरूपं वाचकत्वम्। व्याकरणेन तु दैवीनां वाचां = संस्कृतशब्दानां क्रतूपकारकत्वरूपं साधुत्वमेव व्युत्पाद्यते। "नापभ्रंशितवै न म्लेच्छितवै" (अपभ्रंशशब्दैः म्लेच्छमात्रसंकेतितशब्दैश्च यज्ञे न भाषितव्यम्) इति श्रुत्या अपभ्रंशानां परिसंख्यानात् — निवर्तनात्। तदाहुः —

प्रतिपादकतामात्रं म्लेच्छेष्वप्यवगम्यते।
वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः।

इति। साधुशब्दानां म्लेच्छमात्रसंकेतितशब्दानां अपभ्रंशशब्दानां च वाचकत्व-साम्येऽपि साधुशब्दप्रयोगे पुण्यं म्लेच्छादिशब्दप्रयोगे पापमिति नियमज्ञापनार्थमेव व्याकरणम् — इति।

तन्न। आधुनिकपाणिन्यादिसंकेतितटिघुभादिशब्देन तदर्थबुद्धिजनकताज्ञानरहित-स्यापि पुंसः "अस्माच्छब्दादयमर्थो बोद्धव्यः" इति पाणिनीच्छारूपसंकेतविषयक-ज्ञानमात्रेण अन्वयबोधस्योत्पत्त्या व्यतिरेकव्यभिचारात्। तत्परिहाराय यदि बोध-कत्वरूपशक्तिज्ञानसंकेतज्ञानयोरन्यतरस्य कारणत्वमुच्यते तदा गौरवम्। सर्वत्र संकेतज्ञानेनैव शाब्दबोधनिर्वाहात्। तथा हि —

नैयायिकमतेन संकेतस्वरूपपरिष्कारः

तादृशार्थावगाहित्वतत्पदप्रभवत्वयोः।
एकत्र बुद्धौ संकेतः शब्दस्यार्थेन संगतिः।

गवादिपदजन्यत्वगोत्वादिविशिष्टविषयकत्वैतदुभयं एकस्यां बुद्धौ "एकत्र द्वयम्" इति न्यायेन वा विशिष्टवैशिष्ट्यरीत्या वा अवगाहमानः "गोपदात् गोत्वविशिष्ट-विषयिका बुद्धिर्जायताम्" इत्याकारकसंकेत एव गोपदस्य गोत्वविशिष्टेन सह संगतिः। आद्ये गवादिपदजन्यत्वत्वावच्छिन्नप्रकारतानिरूपिता गोत्वादिविशिष्ट-विषयकत्वत्वावच्छिन्नप्रकारतानिरूपिता च या बुद्धित्वावच्छिन्नविशेष्यता तच्छा-लिनी इच्छा। द्वितीये गोत्वविशिष्टविषयकत्वनिष्ठप्रकारतानिरूपिता गोपदजन्यत्व-त्वावच्छिन्नप्रकारतानिरूपिता च या बुद्धित्वावच्छिन्नविशेष्यता तन्निरूपकगोत्ववि-शिष्टविषयकत्वावच्छिन्नप्रकारतानिरूपितगोपदजन्यबुद्धित्वावच्छिन्नविशेष्यतानिरूपकः गोपदजन्यत्वत्वावच्छिन्नप्रकारतानिरूपितगोत्वविशिष्टविषयकत्वावच्छिन्नविशेष्यता-निरूपको वा विनिगमनाविरहेण संकेतः।

संकेतस्य नित्यानित्यभेदेन द्वैविध्यम्

संकेतो द्विविधो नित्यो जन्य इत्यादिमोऽभिधा।
अपरः परिभाषा तावविशेषेण बोधकौ।

संकेतो द्विविधः नित्यः जन्यश्चेति। तत्र नित्यः संकेतः ईश्वरसमवेतः अभिधेति व्यह्रियते। जन्यः जीवसमवेतः परिभाषेत्युच्यते। तयोः संकेतत्वेन रूपेणैव अर्थस्मृतिजनकत्वं तद्द्वारा शाब्दबोधरूपानुभवजनकत्वं च।

न च संकेतस्य भगवत्समवेतस्य जीवसमवेतस्य वा पदेऽर्थे चाविद्यमानतया कथं पदपदार्थसंबन्धत्वमिति वाच्यम्। संकेतस्य स्वनिरूपितगोत्वविशिष्टविषय-कत्वनिष्ठप्रकारतानिरूपितबुद्धित्वावच्छिन्नविशेष्यतानिरूपितजन्यत्वनिष्ठप्रकारकत्वा-वच्छिन्नविशेष्यतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारतासंबन्धेन पदनिष्ठत्वात्, स्वनिरूपितगोपदजन्यत्वनिष्ठप्रकारतानिरूपितबुद्धित्वावच्छिन्नविशेष्यतानिरूपित-विषयकत्वनिष्ठप्रकारत्वावच्छिन्नविशेष्यतानिरूपितनिरूपितत्वसंबन्धावच्छिन्नप्रकारता-संबन्धेन गोत्वविशिष्टेऽर्थे च सत्त्वात् पदपदार्थसंबन्धत्वोपपत्तेः।

गदाधरभट्टाचार्यास्तु इमामेव शङ्कामुत्थाप्य यत्तुमतेन किंचित्समाधानमनूद्य तद्दूषयांबभूवुः। स्वयं तु समाधानं नावोचन्। स ग्रन्थोऽत्र लिख्यते –

एवमपि संकेतस्य संबन्धत्वे मानाभावेन निष्प्रतियोगिकतया तदसंभवेन च पदार्थोपस्थापकत्वासंभवेन वृत्तित्वानिर्वाहात्।

यत्तु स्वजन्यज्ञानविषयत्वप्रकारकेच्छाविशेष्यत्वमर्थे पदसंबन्धः, पदे चार्थस्य विपरीतः (स्वविषयकबोधजनकत्वप्रकारताकेच्छाविशेष्यत्वं)। अस्य संबन्धत्वम् शाब्दबोधान्यथानुपपत्त्या कल्प्यते इति। तदपि तुच्छम्। अक्लृप्तस्य तादृशेच्छा-

विषयत्वस्य संबन्धत्वोपगमे तादृशज्ञानविषयत्वस्वसमानकालीनविषयत्वादि-परंपराया अपि विनिगमनाविरहेण संबन्धताप्रसङ्गात्। तस्मात् पदपदार्थयोः संबन्धान्तरमेव वाच्यवाचकभाव इति वदन्ति — इति।

नागेशकृते नैयायिकमतानुवादतद्दूषणे[१८]

लघुमञ्जूषायां नागेशभट्टा इत्थं निरूपयन्ति — तत्र शक्तिः कः पदार्थ इति चेत्-अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारा इदंपदमिममर्थं बोधयतु इत्याकारा चेश्वरेच्छा। तस्याश्च यद्यपि विषयत्वरूपः संबन्धः पदे अर्थे जन्यजनकभावे बोधे च वर्तते, तथा च पदस्यैव वाचकत्वम् अर्थस्यैव वाच्यत्वम् इति व्यवस्था कथमिति शङ्का जायते, तथापि उक्ताकारायामिच्छायां बोधनिष्ठजन्यता-निरूपितजनकतावत्त्वेन यो विषयः स वाचकः, तस्यां बोधविषयत्वेन रूपेण यो विषयः स वाच्यः, अतो नातिप्रसङ्गः। न चेश्वरेच्छैव शक्तिरित्ययुक्तम्, ईश्वर-ज्ञानकृत्योरपि विनिगमनाविरहेण शक्तिरूपत्वसंभवादिति वाच्यम्। इष्टापत्तेः। एतच्छब्दजन्यार्थबोधविषयकेश्वरज्ञानमेव शक्तिरिति स्वीकारेऽपि क्षत्यभावात् इति नैयायिकाः।

तन्न। गामानयेति प्रयोजकवृद्धेनोक्तं वाक्यं श्रुत्वा प्रयोज्यवृद्धस्य गवानयने प्रवृत्तिं दृष्ट्वा एतद्वाक्यार्थज्ञानं प्रयोज्यवृद्धस्य जातमिति मध्यस्थः व्युत्पित्सुः अनुमिनोति। तदनन्तरं तादृशज्ञानं प्रति शब्द एव कारणम् उपस्थितत्वात् इति जानाति। ततः अर्थेनासंबद्धस्य शब्दस्य अर्थज्ञानकारणत्वं न संभवति इति अनु-पपत्तिज्ञानेन संबन्धः कल्प्यते। स च कल्प्यमानः संबन्धः बोधजनकत्व-घटितेच्छारूपो न भवितुमर्हति। स्वस्य अनुपपद्यमानस्वोपपादकत्वायोगात्। बोध-जनकत्वस्य अनुपपद्यमानत्वेन ज्ञानदशायां तद्घटितसंबन्धज्ञानं न संभवति इति।

किं च यदि शब्दस्य अस्माच्छब्दादयमर्थो बोद्धव्य इति इच्छाविषयत्वमेव बोधजनकत्वं तदा दण्डात् घटो भवतु इत्यकाराकेच्छाविषयत्वमेव दण्डस्य घटकारणत्वं स्यात् इति बहूपप्लवप्रसङ्गः।

किं च प्रमाणानां जनकत्वतद्घटितसमूहाभ्यामतिरिक्तेन संबन्धेन प्रमेय-संबद्धानामेव ज्ञानजनकत्वं दृश्यते। यथा चक्षुरिन्द्रियं जनकत्वतद्घटितातिरिक्तेन संयोगादिसंबन्धेन घटादिसंबद्धं सत् घटादिप्रत्यक्षजनकम्। धूमादिलिङ्गं जनकत्वा-द्यतिरिक्तव्याप्तिसंबन्धेन वह्निसंबद्धं सत् वह्निज्ञानजनकम्। तथा शब्दोऽपि जनकत्वतद्घटितातिरिक्तेन संबन्धेन संबद्धः सन्नेवार्थप्रतीतिजनक इत्येष्टव्यम्। तथा

---

[१८] ल.म. पृ. २१

च जनकत्वघटितेच्छाज्ञानयोः शब्दार्थसंबन्धत्वमयुक्तम्। अन्यथा जनकत्वादेः संबन्धत्वे सति धूमाद्वह्निज्ञानं जायतामितीच्छाविषयत्वमेव हेतुसाध्ययोः संबन्धः स्यादिति व्याप्तेरुच्छेदापत्तिः।

किं चेच्छायाः जनकत्वस्य च शब्दार्थोभयवृत्तित्वाभावेन कथं शब्दार्थ-संबन्धत्वम्। इच्छायाः पुरुषनिष्ठत्वात् जनकत्वस्य च शब्दवृत्तित्वेऽप्यर्थवृत्तित्वा-भावात्। न च पुरुषनिष्ठाया इच्छायाः स्वविषयबोधविषयत्वसंबन्धेन शब्दार्थो-भयनिष्ठत्वमिति वाच्यम्। तस्य वृत्त्यनियामकत्वेन अयं शब्दः अयमर्थो वा इच्छावानिति विशिष्टबुद्धिनियामकत्वासंभवात्। विशिष्टबुद्धिनियामकत्वस्यैव संबन्धत्वरूपत्वात्। तथा हि संबन्धिभिन्नत्वे सति उभयाश्रितत्वे सति विशिष्ट-बुद्धिनियाकमत्वं संबन्धत्वम्। तत्र आद्यसत्यन्तेन अभेदस्य संबन्धत्वनिरासः। द्वितीयेन केवलजन्यत्वजनकत्वादेः संबन्धत्वनिरासः। तृतीयेन वृत्त्यनियामकस्य विषयत्वादेः संबन्धत्वव्युदासः।

न च विषयत्वस्य संबन्धत्वाभावे किं मानमिति वाच्यम्। अयं विषयः इच्छावानिति व्यवहाराभावस्यैव प्रमाणत्वात्। न च बोधजनकत्वं शक्तिरिति पक्षे नानुपपत्तिः, शब्दवत् अर्थस्यापि शाब्दबोधनिमित्तत्वात् उभयवृत्तित्वसत्त्वात्। संबन्धिभिन्नत्वाच्चेति वाच्यम्। घटजनकत्वस्य दण्डचक्रोभयवृत्तित्वेऽपि तदुभय-संबन्धत्वाभावात्। न हि घटजनकत्वमादाय दण्डचक्रे संबद्धे इति व्यवहारोऽस्ति। एवं ज्ञाने विषयस्य कर्तुश्च कारणत्वेऽपि तयोः परस्परं विशिष्टबुद्ध्यदर्शनाच्च इति।

अनेन उपपादनेन नैयायिकसंमतस्य संकेतस्य मीमांसकसंमतस्य बोध-जनकत्वरूपस्य प्रत्यायकत्वस्य च शब्दार्थसंबन्धत्वं न संभवतीत्युक्तं भवति।

नागेशदूषणसमाधानपूर्वकं संकेतस्य शब्दार्थसंबन्धत्वसमर्थनम्

अत्राहुः — संबन्धिभिन्नत्वे सति द्विनिष्ठत्वे सति विशिष्टबुद्धिनियामकत्वं संबन्धलक्षणं, तत् संकेते नान्वेतीति यदुक्तम्, तन्न। नीलो घट इति विशिष्टबुद्ध्या सिद्धे अभेदसंबन्धे द्विनिष्ठत्वाभावेन तस्य संबन्धलक्षणत्वायोगात्। न च द्विनिष्ठत्वाभावादेवाभेदस्य न संबन्धत्वमिति वाच्यम्। अभेदसंबन्धं निराकृत्य तत्स्थाने नव्यवैयाकरणाभिमतस्य संबन्धान्तरानवच्छिन्नविशेषणविशेष्यभावस्यापि द्विनिष्ठत्वाभावेनानुपपत्तेः।

अपि च आधाराधेयभावादयः संबन्धाः न द्विनिष्ठाः। आधाराधेयभावो नाम आधारता आधेयता उभयं वा स्यात्, सर्वथापि न द्विनिष्ठः, आधारतायाः आधारमात्रवृत्तित्वात्, आधेयतायाश्च आधेयमात्रवृत्तित्वात्। यदि चाधारता स्वरूप-

संबन्धेन आधारे निरूपकतासंबन्धेन च आधेये वर्तत इति द्विनिष्ठेत्युच्यते, तदा संकेतोऽपि द्विनिष्ठः। तथा हि "घटशब्दः घटबोधजनको भवतु" इतीच्छायां घटशब्दो विशेष्यः, तत्र जनकत्वं, तत्र बोधः, तत्र च विषयितासंबन्धेन घटः प्रकारः। एवं चेच्छा विशेष्यतासंबन्धेन शब्दे, प्रकारताविशेषसंबन्धेन च अर्थे घटे वर्तते। विषयतासंबन्धस्य वृत्त्यनियामकत्वात् न तेन संबन्धेन संबन्धिनिष्ठत्वं संकेतस्येति चेत्, किं निरूपकतासंबन्धो वृत्तिनियामकः, येन निरूपकत्वेन आधेयसंबन्धिनः आधारत्वस्य द्विनिष्ठत्वं भवेत्। तस्मात् संबन्धस्य द्विनिष्ठत्वं नापेक्षितम्, अपि तु द्विसंबन्धित्वमेव। तदपि सर्वत्र नापेक्षितम्, अभेदसंबन्ध-स्वीकारादित्युक्तमेव।

एवं संबन्धत्वं न विशिष्टबुद्धिनियामकत्वम्। नियाकत्वस्य जनकत्वरूपत्वे अतीन्द्रियपरमाण्वोः संयोगे अव्याप्तिः। विशिष्टबुद्धेः प्रत्यक्षत्वे संयोगस्य विषय-विधया तज्जनकत्वं भवेत्। अतीन्द्रियपरमाण्वोः विशिष्टबुद्धिस्तु अनुमित्यादिरूपेति तद्विषयसंयोगे तज्जनकत्वं नास्तीत्यव्याप्तिः। नियामकत्वं यदि विषयत्वं तदा वस्तुमात्रेऽतिव्याप्तिः।

न च प्रकारतानिरूपिता या विशेष्यताभिन्नविषयता तद्वत्त्वं संबन्धत्वमिति न वस्तुमात्रेऽतिव्याप्तिरिति वाच्यम्। संयोगेन द्रव्यत्वप्रकारकभ्रमीयद्रव्यत्वनिष्ठ-प्रकारतानिरूपितविशेष्यताभिन्नविषयतावत्त्वं संयोगे वर्तत इति 'संयोगो द्रव्यत्वस्य संबन्धः' इति व्यवहारापत्तेः।

अथ तद्वारणाय प्रमात्मकज्ञाननिरूपितनिरुक्तविषयतावत्त्वं संबन्धत्वमित्युच्यत इति चेत्, तदा अन्योन्याश्रयः। तेन संबन्धेन तद्वद्विशेष्यकत्वे सति तेन संबन्धेन तत्प्रकारकत्वरूपप्रमात्वस्य संबन्धघटितत्वात्, निरुक्तसंबन्धत्वस्य च प्रमात्व-घटितत्वात्।

तस्मात् तस्य संबन्धत्वं तत्प्रतियोगिकत्वविशेषः, तस्मिन् संबन्धत्वं च तदनु-योगिकत्वविशेषः। तदुक्तं सिद्धान्तव्याप्तिलक्षणविचारशेषे "दर्शितं च नियमाघटितं संबन्धत्वम्" इति दीधितिव्याख्यानावसरे गदाधरभट्टाचार्यैः —

"तत्प्रतियोगिकत्वविशेष एव तत्संबन्धत्वम्, न तु तद्विशिष्टबुद्धिनियामकत्वम्, अतीन्द्रियसंबन्धे जनकत्वरूपनियामकत्वासंभवात्। तत्प्रतीतिविषयत्वरूपनियाम-कत्वनिवेशे व्याप्तेरेवानन्तर्भावात् प्रमेयमात्रेऽतिव्याप्तेश्च। न च विशेष्यतान्य-तत्प्रकारतानिरूपितविषयताया एव विवक्षणीयतया नातिप्रसङ्गः इति वाच्यम्। एवमपि संयोगादिना द्रव्यत्वादिभ्रमविषयतामादाय तस्यापि तत्संबन्धत्वापातात्। न च विषयतायां प्रमाप्रतियोगिकत्वनिवेशान्नायमतिप्रसङ्ग इति वाच्यम्। प्रमात्वस्य

तत्संबन्धानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपतया संबन्धत्वघटितत्वात्। एवं तदनुयोगिकत्वविशेष एव तत्र संबन्धत्वमिति भावः'' इति।

न च निष्प्रतियोगिकस्य संकेतस्य कथं पदप्रतियोगिकत्वरूपं पदसंबन्धत्वमिति वाच्यम्। अर्थे पदस्य स्वजन्यज्ञानविषयत्वप्रकारकेश्वरेच्छाविषयत्वं संबन्धः। तत्र च स्वत्वं परिचायकं, न संबन्धकोटिप्रविष्टम्। जन्यत्वं च पदप्रतियोगिकमिति जन्यत्वघटितस्य तस्य पदसंबन्धत्वम्। यथा वा संयोगस्य इन्द्रियप्रतियोगिकत्वेन संयुक्तविशेष्यकज्ञानप्रकारीभूतधूमत्वस्य सामान्यलक्षणाप्रत्यासत्तिरूपस्य इन्द्रिय-संबन्धत्वं तद्वदिति न कोऽपि दोषः।

बोधकारणत्वघटितस्य संकेतस्य संबन्धत्वोपपादनम्

यदपि वृद्धव्यवहारदर्शिनो बालस्य शब्दे बोधकारणत्वमनुपपन्नम् इति ज्ञानेन कल्प्यमानस्य संबन्धस्य बोधकारणत्वघटितत्वं न संभवति, बोधकारणत्व-मनुपपन्नमिति ज्ञानस्य बोधकारणत्वग्रहप्रतिबन्धकत्वात् इत्युक्तम्। तत्रोच्यते –

देवदत्तः पुरोवर्तिनं रजततया जानाति। तत् ज्ञानं भ्रमः, रजतत्वशून्ये पुरोवर्तिनि रजतत्वप्रकारकत्वात्। यज्ञदत्तस्तु अभ्रान्तः पुरोवर्तिनः रजतत्व-मनुपपन्नमिति जानन्नपि पुरोवर्ती रजतत्वप्रकारकदेवदत्तीयज्ञानविषयः इति प्रत्येति। पुरोवर्तिनो रजतत्वमनुपपन्नमिति ज्ञानं पुरोवर्तिनि रजतत्वप्रकारकमेव ज्ञानं प्रतिबध्नाति। पूर्वोक्तज्ञानं तु न पुरोवर्तिनि रजतत्वावगाहि। अपि तु तत्प्रकारका-न्यदीयज्ञानविषयत्वावगाहीति नानुपपद्यमानत्वज्ञानेन प्रतिबध्यते। अत एव भ्रम-विषयकज्ञानस्य तच्छून्ये तत्प्रकारकत्वरूपं भ्रमत्वं नास्ति। अभिहितं चेदं सर्वज्ञस्य ईश्वरस्य सविषयभ्रमज्ञातृत्वेन प्रसक्तं भ्रान्तत्वं परिहरद्भिः उदयनाचार्यैः कुसुमाञ्जलौ चतुर्थस्तबके — ''विभ्रमस्याप्रामाण्येऽपि तद्विषयस्य तत्त्वमुल्लिखतः अभ्रान्तत्वात्। अन्यथा भ्रान्तिसमुच्छेदप्रसङ्गः, प्रमाणाभावात्। तथापि आरोपि-तार्थावच्छिन्नज्ञानालम्बनत्वेन कथं न भ्रान्तत्वमिति चेन्न। यत्र यन्नास्ति तस्य तत्रावगतिरिति भ्रान्त्यर्थत्वात्। एतदालम्बनस्य च एवमुल्लिखतः सर्वत्र यथार्थत्वात्। न हि न तद्रजतम्, नापि तत्रासत्, नापि तन्नावगतम्'' इति। प्रकाशे च वर्धमानोपाध्यायैरुक्तम् — ''शुक्तौ रजतत्वप्रकारकज्ञानवानिति ज्ञानं न भ्रमः। शुक्ताविदं रजतमिति ज्ञाने रजतत्वं प्रकारः। तेन तद्भ्रमः। ईश्वरज्ञाने तु रजतत्व-प्रकारकत्वं प्रकार इति न भ्रमत्वम्। (रजतत्वप्रकारकत्ववति भ्रमे रजतत्व-प्रकारकत्वावगाहित्वात् प्रमात्वमेव) अत एव अस्मदादिरपि भ्रान्तिज्ञो न भ्रान्तः'' इति। प्रकृते च शब्दे अर्थस्य बोधजनकत्वप्रकारकेच्छाविषयत्वं संबन्धः। शब्दस्य बोधकारणत्वमनुपपन्नमिति ज्ञानं शब्दे बोधकारणत्वप्रकारकमेव ज्ञानं प्रतिबध्नाति,

न तु बोधकारणत्वप्रकारकेच्छाविषयत्वप्रकारकमपि ज्ञानम्। तस्मात् बोधकारणत्वस्यानुपपद्यमानत्वज्ञानदशायामपि संकेतरूपसंबन्धज्ञानं संभवत्येवेति न दोषः।

यच्च दण्डात् घटो भवतु इत्याकारकेच्छाविषयत्वमेव दण्डस्य घटकारणत्वं स्यादिति बहूपप्लव इत्युक्तम्।

तन्न। पदस्यार्थबोधजनकत्वं बोधकत्वेनेच्छाविषयत्वमिति वादिनः संभवत्ययं दोषः। न हि नैयायिकास्तथा मन्यन्ते। अपि तु पदगतस्यार्थबोधकत्वस्य निर्वाहकः संबन्धः अर्थबोधकत्वेनेच्छाविषयत्वमिति। न च घटजनकत्वेच्छाविषयत्वमेव कपालस्य घटजनकतानिर्वाहकः संबन्धः स्यादिति दूषणाशयः इति वाच्यम्। कपाले घटस्य समवायः संबन्धः प्रत्यक्षसिद्ध इति तस्यैव जनकत्वनिर्वाहकत्वम्, न तु जनकत्वप्रकारकेच्छाविषयत्वस्य तादृशसंबन्धत्वं कल्प्यं, गौरवात्। शब्दे तु अर्थस्य न समवायादिः संबन्धः, अग्निरित्युक्ते मुखे दाहापत्तेः। अतो बोधजनकतानिर्वाहकः संबन्धः तत्त्वेनेच्छाविषयत्वमिति वैषम्यम्।

यदपि शब्दप्रमाणमपि चक्षुरादिवत् बोधकत्वघटितसंबन्धभिन्नेन संबन्धेन प्रमेयसंबद्धं सत् अर्थबोधकं प्रमाणत्वात्। अन्यथा वह्निधूमयोरपि धूमाद्वह्निज्ञानं जायतामितीच्छाविषयत्वमेव संबन्धोऽस्तु इति व्याप्त्युच्छेदः इत्युक्तम्।

तदपि न। शब्दः बोधकत्वघटितसंबन्धभिन्नसंबन्धेन प्रमेयसंबद्धः सन् बोधकः प्रमाणत्वादिति प्रयोगे प्रमाणत्वहेतुः अप्रयोजकः, व्यभिचारशङ्कावारकतर्काभावात्।

किं च अनुमानोपमानशब्दाः परामर्श-अतिदेशवाक्यार्थस्मरणपदार्थ-स्मरणरूपज्ञानद्वारैव प्रमितिजनका इति प्रत्यक्षं चक्षुराद्यपि ज्ञानद्वारैव प्रमितिजनकं भवेत्। तथा च प्रत्यक्षप्रमाणं ज्ञानद्वारा प्रमितिजनकं प्रमाणत्वात् अनुमानादिवत् इत्याभाससाम्यम्।

अपि च वह्निधूमयोः व्याप्त्युच्छेदः इत्यत्र कोऽसौ व्याप्त्युच्छेदः। न तावत् साहचर्यनियमस्योच्छेदः, तस्य सर्वानुभवसिद्धत्वेन तदभावस्यापादयितुमशक्यत्वात्। नापि व्याप्तिज्ञानस्यानुमितिहेतुत्वोच्छेदः। तस्मिन् सति अनुमितिः तदभावे नेति अन्वयव्यतिरेकयोः कारणताग्राहकयोः सत्त्वेन हेतुत्वाभावस्याप्यापादयितुमशक्यत्वात्।

वह्निधूमयोः धूमाद्वह्निज्ञानं जायतामितीच्छाविषयत्वमेव संबन्धोऽस्तु इत्यप्यसंगतम्। तत्र तादृशेच्छाविषयत्वस्य संबन्धत्वकल्पने प्रमाणाभावात्। शब्दार्थयोस्तु संयोगसमवायसामानाधिकरण्यादयः संबन्धा न संभवन्ति। शाब्दबोधकादाचित्क-

त्वान्यथानुपपत्त्या च कश्चन संबन्धो वाच्यः। अतिरिक्तसंबन्धरूपधर्मिकल्पनामपेक्ष्य अवश्यज्ञेयस्य क्लृप्तस्य संकेतस्य संबन्धत्वकल्पने लाघवम्। तथा च लाघवज्ञानसहकृतशाब्दबोधकादाचित्कत्वान्यथानुपपत्तिरेव संकेतस्य संबन्धत्वे प्रमाणमिति।

अर्थबोधकत्वमेव शक्तिरिति वैयाकरणभूषणकारमतम्[१९]

वैयाकरणभूषणकारास्तु मीमांसकोक्तरीत्या अर्थबोधकत्वमेव पदानां शक्तिरिति निरूपयन्ति। तथा हि —

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा।

इन्द्रियाणां चक्षुरादीनां स्वविषयेषु — चाक्षुषेषु घटादिषु यथा अनादिः योग्यता-घटादिविषयकचाक्षुषादिप्रत्यक्षकारणता तथा शब्दानामपि अर्थैः सह तद्बोध-कारणतैव योग्यता, सैव शक्तिरित्यर्थः।

तत्र संभवतामाक्षेपाणां परिहाराः

ननु न बोधकारणत्वमनादिभूतं शक्तिः, आधुनिकसंकेतितदेवदत्तादिपदे तद-भावात्। अनादित्वं हि न अजन्यत्वम्, अव्यावर्तकत्वात्। अपि तु स्वजन्यबोध-समानाकारकपूर्वपूर्वबोधध्वंसकालिकत्वम्। एतत्कालिकसंकेतविशिष्टे देवदत्तादिपदे त्वीदृशमनादित्वं नास्तीति तद्विशिष्टस्य बोधकारणत्वस्याभावात्।

न चानादीति प्रसिद्धिप्रदर्शनमात्रार्थकम्, न तु तत् शक्तिशरीरे प्रविष्टम्। बोधकारणत्वमेव शक्तिः अतो नाव्याप्तिरिति वाच्यम्। संकेतग्रहं विना बोधकारणत्वज्ञानासंभवात्। संकेतनिरपेक्षस्य बोधकारणत्वज्ञानस्य शाब्दधीहेतुत्वे पित्रादिकृतसंकेताज्ञानेऽपि देवदत्तादिपदात् बोधप्रसङ्गः।

किं च लाक्षणिकस्थलेऽपि गङ्गादिपदे तीरादिबोधकत्वसत्त्वेन शक्तत्वापत्तिः। अतः संकेतज्ञानमपि कारणं वाच्यम्। तथा चावश्यापेक्षितज्ञानविषयत्वात् संकेतस्य स एव शक्तिः। आधुनिके देवदत्तादिपदे पित्रादेः संकेतः, गवादौ चेश्वरस्य संकेत इति न संकेतातिरिक्ता शक्तिरिति चेत् —

मैवम्। संकेतो हि न स्वरूपसन् हेतुः। अगृहीतसंकेतात् शब्दात् अर्थबोध-प्रसङ्गात्। नापि सामान्यतो ज्ञातः सन्। इदं प्रमेयवत् इति प्रमेयत्वादिना

---

[१९] भू.सा. पृ. २७५ - ३०६

संकेतज्ञानेऽपि शाब्दबोधप्रसङ्गात्। नापि ईश्वरादिसंकेतत्वेन संकेतज्ञानं हेतुः। ईश्वरादिसंकेतत्वेन ईश्वरादिसंकेतज्ञानशून्यानां लौकिकानां मीमांसकानां च तत्तदर्थबोधकत्वमात्रग्रहवतां गवादिपदेभ्यो बोधोत्पत्त्या व्यतिरेकव्यभिचारात्।

ननु अर्थधीजनकतावच्छेदकत्वेन संकेत-बोधकारणत्वोभयसाधारणरूपेण संकेतविषयकं ज्ञानं बोधहेतुः। संकेतः शक्तिः इति मते "इदं पदमेतदर्थसंकेतवत्" इत्याकारकं ज्ञानं बोधहेतुः। अर्थबोधजनकता तादृशज्ञाननिष्ठा। तस्यां विषयिता-संबन्धेनावच्छेदकत्वं संकेतस्य। बोधजनकत्वं शक्तिरिति मते "इदं पदमेतदर्थ-बोधकत्ववत्" इति ज्ञानमर्थधीहेतुः। तादृशज्ञाननिष्ठायामर्थधीहेतुतायां विषयिता-संबन्धेनावच्छेदकत्वं बोधजनकत्वस्य। मतद्वयसाधारण्येन तु "इदं पदमेतदर्थधी-जनकतावच्छेदकवत्" इति ज्ञानस्य हेतुत्वस्वीकारे न कोऽपि दोष इति चेत् —

मैवम्। अर्थधीजनकतानिरूपितविषयितासंबन्धावच्छिन्नावच्छेदकत्वावच्छिन्न-प्रकारताशालिज्ञानत्वेन हेतुत्वकल्पनापेक्षया "इदं पदमर्थधीजनकम्" इत्याकारक-ज्ञानस्यैव अर्थधीजनकत्वत्वावच्छिन्नप्रकारताकज्ञानत्वेन हेतुत्वकल्पने लाघवात्। तथा च सति बोधजनकत्वं शक्तिरिति पक्ष एव युक्तः। न चाधुनिकदेवदत्तादिपदे बोधकत्वज्ञानं विनापि संकेतज्ञानादेव बोधोत्पत्त्या तत्र बोधकत्वज्ञानस्य व्यतिरेकव्यभिचार इति वाच्यम्। संकेतग्रहे बोधकत्वस्यापि विषयत्वात् संकेत-ज्ञानस्य बोधकत्वज्ञानरूपतया तत्र व्यभिचाराप्रसक्तेः। "इदम्पदमेतदर्थबोधकं भवतु" इत्याकारकेच्छायाः यत् ज्ञानं तत् इच्छाविषयभूतं बोधजनकत्वमपि विषयीकरोति। इच्छाविषयकज्ञानस्य इच्छाविषयविषयकत्वमिति नियमात्।

ननु स्वातन्त्र्येण — इतराविशेषणतया बोधजनकत्वं विषयीकुर्वत् ज्ञानमेव बोधजनकमिति वाच्यम्। तथा च संकेतग्रहः इच्छाविशेषणतयैव बोधकत्वं विषयीकरोति इति न तज्ज्ञानस्य हेतुता। स्वातन्त्र्येणेत्यनुक्तौ "नेदं तद्बोधजनकं (घटपदं न पटधीजनकम्)" इति ज्ञानवतः तत्काले "अस्माच्छब्दादयमर्थो बुद्धो-ऽनेन (एतच्छब्दजन्यो य एतन्निष्ठो बोधः तद्विषयोऽयमर्थः — चैत्रनिष्ठघटशब्द-जन्यबोधविषयः पटः)" इत्याकारकज्ञानसंभवात् पटादिविषयकशाब्दबोधापत्तिः।

न च घटपदजन्यचैत्रीयज्ञानविषयः पट इति ज्ञानस्य घटपदे पटविषयक-बोधजनकत्वाप्रकारकत्वेन शक्तिज्ञानरूपत्वाभावेन तेन शाब्दबोधापादनासंभव इति वाच्यम्। घटपदजन्यबोधविषयत्वस्यार्थे भाने तुल्यवित्तिवेद्यतया घटपदे पटविषयकबोधजनकत्वभानसंभवात् इति चेत् — न।

नेदं पदं पटधीजनकमिति बाधज्ञानस्य जागरूकत्वेन पूर्वोक्तज्ञानस्य पदे बोधजनकत्वावगाहित्वासंभवात्।

न च पदे बोधकत्वज्ञानादिव अर्थे पदबोध्यत्वज्ञानादपि शाब्दबोधोदयेन पदनिष्ठं बोधकत्वमिव अर्थनिष्ठं बोध्यत्वमपि शक्तिः। एवं च घटपदजन्यचैत्रज्ञानविषयः पट इति ज्ञानं बोध्यत्वरूपशक्तिविषयकमिति तेन शाब्दबोधापादनं संभवतीति वाच्यम्। तथा सति नेदं तद्धीजनकमिति बाधग्रहोपन्यासस्य व्यर्थत्वात्। शक्तिज्ञानप्रतिबन्धकज्ञानसद्भावेन वस्तुतः शाब्दबोधो न संभवतीति ज्ञापनायैव हि बाधज्ञानमुपन्यस्तम्। यदि अर्थे बोध्यत्वमपि शक्तिः, तदा बोध्यत्वरूपशक्तिज्ञानं प्रति पदे बोधकत्वाभावावगाहिज्ञानस्य ग्राह्याभावानवगाहित्वेन अप्रतिबन्धकत्वात् तदुपन्यासो व्यर्थः। यदि च ग्राह्याभावानवगाह्यपि बोधकत्वाभावज्ञानमन्वय-व्यतिरेकाभ्यां बोध्यत्वबोधकत्वरूपोभयविधशक्तिज्ञानं प्रतिबध्नातीति तदुपन्यासो-ऽर्थवानित्युच्यते, तदा तादृशबाधज्ञानदशायां घटपदजन्यचैत्रज्ञानविषयः पटः इति ज्ञानस्यासंभवेन तेनापत्तेः असंभवान्न कोऽपि दोषः।

बोधकत्वरूपशक्तिग्राहकम्, लक्षणोच्छेदस्य इष्टत्वं च

अर्थधीजनकत्वरूपा शक्तिश्च पित्रादिसंकेतज्ञानादेव ज्ञायते। अतः संकेत-ज्ञानाधीनबोधकत्वज्ञानात् प्राक् घटादिशब्दश्रवणेऽप्यर्थबोधो न भवति। न च लक्षणोच्छेदापत्तिः। गङ्गापदे तीरबोधकत्वसद्भावेन शक्तिज्ञानादेव तीरबोध-संभवादिति वाच्यम्। इष्टापत्तेः। बोधकत्वरूपशक्तिज्ञानजनकस्य व्यवहारादेः शक्यलक्ष्योभयसाधारणत्वात्।

किं च लक्षणायाः वृत्त्यन्तरत्वे घटादिपदेऽगृहीतशक्तिकस्य प्रत्यक्षाद्युप-स्थितघटादेः घटादिपदात् शाब्दबोधानुदयात् अन्वयव्यभिचारेण प्रत्यक्षादिरूपो-पस्थितेः शाब्दबोधाजनकत्वात् शक्तिजन्योपस्थितिः लक्षणाजन्योपस्थितिश्च शाब्द-बोधं प्रति कारणम् इति कार्यकारणभावद्वयं कल्पनीयम् इति गौरवम्। लक्षणायाः शक्तिरूपत्वे तु शक्तिजन्योपस्थितित्वेन एकैव कारणतेति लाघवम्।

लक्षणावृत्तिस्वीकारे अनुपपत्तयः

अपि च लक्षणावृत्तिस्वीकारे शक्तिजन्योपस्थितिं विनापि लक्षणास्थले शाब्द-बोधः, लक्षणाजन्योपस्थितिं विनापि शक्तिस्थले शाब्दबोध इति व्यतिरेक-व्यभिचारात् तद्वारणाय अव्यवहितोत्तरत्वं कार्यतावच्छेदके निवेश्य शक्तिज्ञान-जन्योपस्थित्यव्यवहितोत्तरशाब्दबोधं प्रति शक्तिज्ञानजन्योपस्थितिः कारणम्, लक्षणाज्ञानजन्योपस्थित्यव्यवहितोत्तरशाब्दबोधं प्रति लक्षणाज्ञानजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयं गुरुभूतं कल्पनीयमिति गौरवम्। किं च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानस्य लक्षणाज्ञानस्य च कारणता कल्पनीयेति गौरवम्।

न चेदं पदमेतदर्थबोधकमिति शक्तिज्ञानस्य कारणत्वकल्पनेऽपि पदतदर्थभेदेनानेकार्यकारणभावकल्पनम् अतिरिक्तलक्षणायाः अभावेऽप्यावश्यकमिति गौरवमिति वाच्यम्। अतिरिक्तलक्षणावादिमतेऽपि गङ्गापदस्य तीरे शक्तिभ्रमदशायां तीरोपस्थितिशाब्दबोधयोः संमततया तत्तत्पदतत्तदर्थभेदेन कार्यकारणभावानन्त्यस्य साम्यात्। लक्षणाकार्यकारणभावकल्पनागौरवं परं तन्मतेऽतिरिच्यते। तथा हि — गङ्गापदस्य प्रवाहरूपशक्यार्थविषयकज्ञानमादाय एकः कार्यकारणभावः गङ्गापदशक्तिज्ञानजन्यप्रवहोपस्थितिं प्रति गङ्गापदज्ञानं कारणम्, गङ्गापदशक्तिभ्रमजन्यतीरोपस्थितिं प्रति गङ्गापदज्ञानं कारणम्, एवं तज्जन्योपस्थित्योः शाब्दबोधकारणतेत्येवं रीत्या अनन्तकार्यकारणभावेन सह लक्षणाज्ञानकारणताकल्पनाधिक्यमिति।

अथ लक्षणास्वीकर्तृमते शक्तिलक्षणोभयसाधारण्येन वृत्तिजन्योपस्थितित्वेन शाब्दबोधकारणत्वम्, वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणत्वमिति वक्तव्यम्, अतो न गौरवमिति चेत् — न। शक्तिलक्षणान्यतरत्वस्य वा शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबन्धत्वस्य वा वृत्तित्वस्य शक्तित्वापेक्षया गुरुत्वेन तस्य शाब्दबोधकारणतावच्छेदककोटौ प्रवेशायोगात्। द्वितीयस्य वृत्तित्वस्य निवेशेऽन्योन्याश्रयोऽधिकः। शाब्दबोधहेतुत्वस्य जनकतावच्छेदकधर्मघटितत्वेन जनकतावच्छेदकधर्माज्ञाने ज्ञातुमशक्यतया वृत्तित्वज्ञाने सति शाब्दबोधहेतुत्वज्ञानं तद्धेतुत्वज्ञाने सति तद्घटितवृत्तित्वज्ञानमिति।

ननु लक्षणाङ्गीकर्तृमतेऽपि शक्तिज्ञानत्वेनैव हेतुता। शक्यसंबन्धरूपलक्षणाज्ञानस्यापि शक्तिविषयकत्वेन शक्तिज्ञानत्वात्। अतो न कार्यकारणभावद्वयम् इति चेत् — न। शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयकत्वस्य आवश्यकत्वात्। तथा च तदर्थविषयकोपस्थितिं प्रति तदर्थनिरूपिततत्पदनिष्ठशक्तिज्ञानत्वेन कारणता वाच्या। लक्षणाज्ञानं च न तादृशमिति तस्य पृथगेव कारणतायाः वक्तव्यत्वात्। समानविषयकत्वानिवेशे गङ्गातीरयोः संबन्धज्ञानवतः प्रवाहे गङ्गापदशक्तिं जानतश्च "गङ्गायां घोषः" इति वाक्यात् तीरबोधप्रसङ्गः। कारणस्य शक्तिज्ञानस्य सद्भावात्।

ननूक्तदोषवारणाय वृत्तिज्ञानजन्योपस्थितिशाब्दबोधयोरेव कार्यकारणभावे समानविषयकत्वं निवेश्यताम्, मास्तु वृत्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे तन्निवेशनमिति चेत् — उच्यते। घटमानयेति वाक्यं हस्तिनं च स्मरतः घटादिपदेभ्यो घटादेः गजात् हस्तिपकस्य च समूहालम्बनस्मरणवतः घटानयनस्येव हस्तिपकस्यापि शाब्दबोधापत्तिः। समूहालम्बनस्मरणस्य घटपदवृत्तिज्ञानजन्यत्वात्।

तद्वारणाय घटविषयकशाब्दबोधं प्रति घटविषयकवृत्तिज्ञानजन्यघटोपस्थितिः हेतुः इति वाच्यम्। एवं च लक्षणाज्ञानस्य शक्तिज्ञानत्वेन हेतुत्वमसंभवदुक्तिकम्। शक्यसंबन्धरूपलक्षणाज्ञानस्य शक्तिविषयकत्वेऽपि तीरविषयकशक्तिज्ञानात्मकत्वाभावात्।

अन्ये तु अतिरिक्तलक्षणावादिनापि शक्तिप्रयोज्योपस्थितिर्हेतुरिति एक एव कार्यकारणभावः। लक्षणाज्ञानस्य शक्तिज्ञानजन्यत्वेन लक्षणाज्ञानजन्योपस्थितेः शक्तिज्ञानप्रयोज्यत्वमक्षतम्। शक्तिज्ञानजन्योपस्थितेश्चास्त्येव शक्तिज्ञानप्रयोज्यत्वम्। प्रयोज्यत्वस्य जन्यजन्यजन्यसाधारणत्वात् इत्याहुः।

तदपि न। द्विविधवृत्तिज्ञानस्यैकरूपेण कारणत्वासंभवस्य पूर्वमुपपादितत्वात्। अपि च जन्यजन्यत्वरूपस्य प्रयोज्यत्वस्य लक्षणाज्ञानजन्योपस्थिताविव विशेषणतावच्छेदकप्रकारकनिर्णयविधया घटो घटपदशक्य इति ज्ञानानन्तरं जायमाने घटपदशक्यवत् भूतलमिति विशिष्टवैशिष्ट्यावगाहिज्ञानेऽपि सत्त्वात् तद्विषयस्य भूतलस्यापि बोधापत्तिः। साक्षाज्जन्यत्वरूपस्य प्रयोज्यत्वस्य निवेशे लक्षणाज्ञानजन्योपस्थितेरसंग्रहः। तस्याः साक्षात् शक्तिज्ञानाजन्यत्वात्। उभयसाधारणमनतिप्रसक्तं च प्रयोज्यत्वं वक्तुमशक्यम्।

लाक्षणिकपदानां वाचकत्वे नानार्थत्वशङ्कानिरासः

एवं च गङ्गापदस्यापि तीरबोधकत्वात् तीरवाचकत्वमिष्टमेव। न च गङ्गापदस्य हर्यादिपदवन्नानार्थकत्वापत्तिरिति वाच्यम्। इष्टापत्तेः। यथा हर्यादिपदप्रयोगे किमत्र विष्णुर्विवक्षितः उत सूर्यः इत्यर्थसंदेहः, प्रकरणादिना तात्पर्यज्ञाने अर्थविशेषविषयकः शाब्दबोधः तथा गङ्गापदे नानार्थबोधकत्वं जानतः पुरुषस्य भवत्येवार्थसंदेहः। अन्वयानुपपत्त्यादिना तीरतात्पर्यकत्वनिश्चये तीरविषयकः शाब्दबोधो जायते। अत एव "सर्वे सर्वार्थवाचकाः" इति वैयाकरणप्रवादः संगच्छते। तथा च बोधकत्वमेव शक्तिः इति निरूपयन्ति भूषणकाराः।

विशिष्टाद्वैतवेदान्तिनोऽपि बोधकत्वमेव शक्तिरिति आतिष्ठन्ते। तथा च श्रीभाष्ये[२०] भगवद्रामानुजपादाः प्राहुः — एवं किल बालाः शब्दार्थसंबन्धमवधारयन्ति, मातापितृप्रभृतिभिः अम्बातातमातुलादीन् शशिपशुनरमृगपक्षिसर्पादींश्च एनमवेहि इमं चावधारय इत्यभिप्रायेण अङ्गुल्या निर्दिश्य तैस्तैः शब्दैः तेषु तेष्वर्थेषु बहुशः शिक्षिताः शनैः शनैः तैरेव शब्दैः तेषु तेष्वर्थेषु स्वात्मनां

---

[२०] श्रीभा. १.१.१

बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोः संबन्धान्तरादर्शनात् संकेतयितृपुरुषाज्ञानाच्च तेषु तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति इति।

मणिग्रन्थोक्तरीत्या बोधकत्वं शक्तिरिति वादस्य उपक्षेपः परिशीलनं च[२१]

मणिकारैः शब्दखण्डे बोधकत्वं शक्तिरिति पक्षोऽप्युपक्षिप्तः। तथा हि —

तत्र आक्षेपः

ननु तद्धीजनकतावच्छेदिकायाः स्वाभाविकसंबन्धरूपायाः शक्तेः तद्धीजनकता-विषयकेश्वरेच्छारूपस्य संकेतस्य वा ज्ञानात् अर्थप्रत्ययः इति आवश्यकत्वात् लाघवाच्च तद्धीजनकत्वज्ञानमेवार्थप्रतीतौ हेतुरस्तु। किं शक्तेरीश्वरसंकेतस्य ज्ञानेन। अन्यथा मीमांसकस्य स्वाभाविकसंबन्धरूपशक्तिज्ञानात् अर्थप्रत्ययः, नैयायिकस्येश्वरसंकेतज्ञानादर्थप्रत्यय इति परस्परं व्यतिरेकव्यभिचारेण एकस्यापि कारणता न स्यात्।

अपि च लौकिकानां शक्तीश्वरसंकेतयोरज्ञानेऽपि वृद्धव्यवहारात् अर्थज्ञान-जनकत्वं शब्दस्यावधार्य पश्चात् शब्दश्रवणानन्तरं अर्थज्ञानजनकत्वस्मरणादर्थ-प्रतीतिर्जायते।

न चैवं सति लक्षणोच्छेदापत्तिः। तत्राप्यर्थधीजनकत्वज्ञानादेव तीरादिबोधोप-पत्तेः, न चेष्टापत्तिः। अविलम्बेन गङ्गापदात् तीरधीप्रसङ्गादिति वाच्यम्। लाक्षणि-कस्य पदस्याननुभावकत्वेन गङ्गापदे तीरधीजनकत्वविरहात् तज्ज्ञानात् तीरधियः आपादयितुमशक्यत्वात्। लाक्षणिकस्यानुभावकत्वेऽपि तीरज्ञानजनकत्वेन ज्ञातस्य गङ्गापदस्य न तीरधीजनकत्वम्, किं तु प्रवाहज्ञानजनकत्वेनैव ज्ञातस्य, लाघवात्। तथा च विलम्बेन तीरधियः उपपत्तिः।

अथ ज्ञानविषयीभूतार्थेन यस्य संबन्धो वर्तते तस्यैव ज्ञानजनकत्वं प्रत्यक्षादौ दृष्टम्। घटसंबद्धस्यैव चक्षुषः घटज्ञानजनकत्वात्। वह्निसंबद्धस्यैव धूमस्य वह्नि-ज्ञापकत्वात्। तथा शब्दस्याप्यर्थधीजनकत्वमर्थसंबन्धं विना न संभवतीति संबन्धत्वेन रूपेण शक्तिसंकेतयोरन्यतरस्य सिद्धिरिति चेत् — न। तद्धीजनकत्वेन ज्ञातत्वस्यैव संबन्धत्वात्।

---

[२१] त.चिं.म. पृ. ६५५

न च संबन्धज्ञानं विना तद्धीजनकत्वमेव न ज्ञायत इति वाच्यम्। तवापि मते ज्ञानजनकत्वज्ञानानन्तरं ज्ञानजनकत्वान्यथानुपपत्त्या संबन्धत्वेन शक्तिकल्पनात्। अन्यथा अन्योन्याश्रयः, संबन्धज्ञाने सति ज्ञानजनकत्वज्ञानम्, ज्ञानजनकत्वज्ञाने सति संबन्धज्ञानमिति।

न च यथार्थतद्धीजनकत्वज्ञानं यत्रास्ति तत्र तत्पूर्वं संबन्धोऽस्त्येवेति वाच्यम्। ममापि मते पूर्वपूर्वेषां तद्धीजनकत्वेन ज्ञातत्वस्य पूर्वमपि सत्त्वात्।

एतावतापि शक्तिः संकेतो वा संबन्धोऽस्तु; तथात्वेऽपि तज्ज्ञानस्य नार्थप्रतीतिहेतुत्वम्, गौरवात्। किं तु तद्विषयकधीजनकत्वज्ञानस्यैव। एवं च तद्धीजनकत्वेन ज्ञातं यत् पदं यदनुभवं जनयति तस्यैव तत्र शक्तत्वात्, न तु शक्तिरीश्वरसंकेतो वेति।

सिद्धान्तः

उच्यते। देवदत्तादिपदादर्थबुद्धौ संकेतज्ञानस्य कारणत्वनिश्चयात् अन्यघटादि-पदादर्थबुद्धावपि संकेतज्ञानस्य हेतुत्वकल्पनात्। न हि अस्मात् शब्दादयमर्थो बोद्धव्य इति यस्तत्र संकेतः तज्ज्ञानं विना ततस्तदर्थप्रत्ययः। संकेतज्ञानात् पूर्वमर्थधीजनकत्वस्य अर्थधीजनकत्वज्ञानस्य वा असंभवात्।

अथ सादिदेवदत्तादिपदे संकेतज्ञानादेवार्थप्रतीतिरित्यस्तु। अनादिगवादिपदे तु संकेतज्ञानं विनाप्यर्थप्रतीतेर्भावात् न संकेतकल्पनेति चेत् —

न। पदत्वस्यैवार्थधीहेतुसंकेतवत्त्वप्रयोजकत्वे संभवति तत्र सादित्वविशेषणे गौरवात्।

बोधकत्वं शक्तिरिति भूषणकारादिमतस्य खण्डनम्

अत्राहुः — बोधकत्वज्ञानार्थं संकेतज्ञानस्यावश्यापेक्षणीयत्वात् आवश्यकज्ञान-विषयसंकेतस्यैव शक्तित्वमुचितम्। न च संकेतो न स्वरूपतः नापि सामान्यतो ज्ञातो हेतुः, अपि तु ईश्वरसंकेतत्वेन ज्ञात इति वक्तव्यम्। तच्च न संभवति, ईश्वरानङ्गीकर्तॄणां मीमांसकादीनां शाब्दबोधानुपपत्तेरिति वाच्यम्। ईश्वरसंकेतस्य शक्तित्वेऽपि तज्ज्ञानस्य परिभाषाज्ञानसाधारणसंकेतज्ञानत्वेन कारणत्वं लाघवात्। इत्थं च ईश्वरसंकेतस्य तत्त्वेन ज्ञानं नापेक्षितमिति उक्तदोषानवकाशात्। आधुनिकसंकेतस्थले बोधकत्वज्ञानाभावेऽपि संकेतज्ञानादेव शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारेण बोधकत्वज्ञानस्य कारणत्वाभावात् न बोधकत्वं शक्तिः।

अपि च वृत्तिज्ञानं शाब्दबोधे कारणमिति सर्वसंप्रतिपन्नम्। शक्तिज्ञानस्य शाब्दबोधकारणत्वे विषयितासंबन्धेन शक्तिरवच्छेदिका। बोधकत्वस्य शक्तिरूपत्वे बोधकारणतायां विषयितासंबन्धेन बोधकारणत्वस्यावच्छेदकत्वात् आत्माश्रयः। अवच्छेद्यविषयकज्ञानेऽवच्छेदकविषयकज्ञानस्यापेक्षितत्वेन बोधकारणत्वस्यैवावच्छेद्यत्वात् अवच्छेदकत्वाच्च स्वज्ञाने स्वज्ञानापेक्षणात्। तस्मादपि बोधजनकत्वं न शक्तिः।

एवं नानार्थस्थल इव घटादिपदप्रयोगेऽपि तात्पर्यज्ञानादेवार्थविशेषविषयकः शाब्दबोध इति सर्वत्र तात्पर्यज्ञानकल्पने गौरवमपि।

किं च शक्यार्थः लक्ष्यार्थः इति असंकीर्णव्यवहारः सर्वतान्त्रिकाणाम्। तादृशव्यवहारान्यथानुपपत्त्या च लक्ष्यार्थव्यावृत्तैव शक्तिर्वाच्या। एवं च गङ्गापदात्तीरोपस्थितये लक्षणावृत्तिरप्यङ्गीकरणीया। अन्यथा तीरबोधकत्वस्य गङ्गापदे सद्भावात् गङ्गापदं तीरवाचकमिति प्रामाणिकव्यवहारापत्तिः।

यदपि लक्षणायाः अङ्गीकारे शक्तिलक्षणाभेदेन कार्यकारणभावकल्पनागौरवमापादितम्, तदपि फलमुखत्वान्न दोषावहम्।

वस्तुतो लक्षणायाः अङ्गीकारेऽपि न कार्यकारणभावान्तरकल्पनागौरवम्, लक्ष्योपस्थितिसाधारणेन शक्तिप्रयोज्योपस्थितित्वेन शाब्दबोधकारणत्वाङ्गीकारात्। न च प्रयोज्यत्वं जन्यत्वरूपं जन्यजन्यत्वरूपं वा न संभवतीत्युक्तमिति वाच्यम्। अन्यथासिद्धिनिरूपकतानवच्छेदकशक्तिज्ञानोत्तरवृत्तितावच्छेदकधर्मवत्त्वरूपस्य शक्तिज्ञानप्रयोज्यत्वस्य जन्यजन्यजन्योभयसाधारणस्य सुवचत्वात्।

शक्त्यतिरिक्तलक्षणायाः समर्थनम्

अपि च शक्यसंबन्धो लक्षणा। सा च नास्तीति न वक्तुं शक्यते। गङ्गापदशक्यप्रवाहसंबन्धस्य तीरे सत्त्वात्। तज्ज्ञानात् न लक्ष्यार्थोपस्थितिः इत्यपि न वक्तुं शक्यते। येन पुंसा गङ्गापदेन तीरस्य शक्यसंबन्धरूपः संबन्धो गृहीतः तस्य एकसंबन्धिनः पदस्य ज्ञानेन अपरसंबन्धिनः तीरस्य स्मरणं भवत्येवेत्यनुभवसिद्धत्वात्। नापि लक्षणाज्ञानस्य लक्षणाजन्योपस्थितेर्वा शाब्दबोधहेतुत्वं नास्तीति युक्तम्, यत्र गङ्गापदात् शक्यसंबन्धग्रहादेव तीरमुपस्थितम्, न तु प्रवाहोपस्थित्यनन्तरमुपस्थितम्, तत्र तीरविषयकः शाब्दबोधः सर्वानुभवसिद्ध इति शक्यसंबन्धज्ञानस्य तज्जन्योपस्थितेश्च शाब्दबोधकारणत्वस्य क्लृप्तत्वात्। तथा च लक्षणायाः अकल्पनप्रयुक्तं लाघवमपि नास्ति इति बोधकत्वं न शक्तिः।

बोधकत्वमेव शक्तिरिति वेदान्तदेशिकमतम्

सेश्वरमीमांसायां[२२] बोधकत्वमेव शक्तिः इति निरूपितं वेदान्तदेशिकैः। स ग्रन्थः तथैव लिख्यते —

यत्पुनरुक्तं शब्दार्थसंबन्धस्य स्वाभाविकत्वे व्युत्पत्तेः (शक्तिज्ञानात्) पूर्वमपि बोधकत्वप्रसङ्गः इति; तदसत्। संबन्धज्ञानस्य सहकारित्वात्। अन्यथा सांकेतिकत्वेऽपि क्लृप्तसंकेतः शब्दः संकेतज्ञानात् पूर्वमेवार्थं गमयेत्। अन्वयव्यतिरेकाभ्यां तज्ज्ञानस्य सहकारित्वं निश्चितमिति वचनं तुल्यम्।

कोऽत्र संबन्धः, कथं च तज्ज्ञानस्यान्वयव्यतिरेकाविति चेत्, बोध्यबोधकभाव एव संबन्धः। तज्ज्ञानस्य सहकारित्वं व्युत्पत्तिपर्यालोचनया सिद्धम्। सा व्युत्पत्तिः कार्यार्थे सिद्धार्थे वा अस्तु। प्रथमं तावत् ज्ञायमानशब्दस्य अर्थविशेषबोधकत्वज्ञानात् पूर्वं अर्थविशेषप्रतीतिर्न जायते। बोधकत्वग्रहणात् पश्चात् उपदेशादिना वा अयं शब्दोऽस्यार्थस्य बोधक इत्येवंरूपेण तज्ज्ञानसमनन्तरं व्युत्पन्नस्य परप्रयुक्तात् तस्मादेव शब्दात्तदर्थप्रतीतिर्जायते। इन्द्रियलिङ्गयोरिव संबन्धान्तरं न किंचित् दृश्यते। अतो बोधकत्वज्ञानमेवार्थबोधहेतुत्वेनान्वयव्यतिरेकावसितम्।

सांकेतिकेष्वसांकेतिकेषु वा शब्देषु अस्य शब्दास्यायमर्थ इति व्युत्पादयद्भिरपि न संकेतः क्रियते ज्ञाप्यते वा, अपि त्वयं शब्दोऽस्य बोधक इति व्यपदिश्यते। अन्यथा स्वेच्छया संकेतकरणे सर्वस्य शब्दस्य सर्वत्र प्रयोगप्रसङ्गात्। तस्य च लोकैर्निवार्यमाणत्वात्। बहूनां च यथातथं संकेते लोकस्य परस्परवार्तानभिज्ञत्वप्रसङ्गाच्च। तथा अयं गोशब्दवाच्य इति वदन्तः पूर्वम् अमुकेन संकेतित इत्यपि न वदन्ति। तथाविधस्य कस्यचित् संकेतयितृत्वाप्रसिद्धेः, स्वयं चापरिज्ञानात्। सांकेतिकेष्वपि भाषाशब्देषु वृद्धप्रयोगमात्रमेव व्युत्पाद्यम्, न तु सन्नपि संकेतः, तज्ज्ञानमन्तरेणापि उत्तरोत्तरेषां व्युत्पित्सूनामर्थप्रतीतिदर्शनात् अविरोधाच्च।

तदेवमादिमां द्वितीयां च व्युत्पत्तिं पर्यालोचयद्भिः बोधकत्वग्रहणमेव शब्दस्य स्वार्थप्रत्यायने सहकारीति निश्चीयत इति ततः पूर्वमर्थानवगतिः परस्ताच्चावगतिः उपपद्यते। — इति।

बोधकत्वातिरिक्ता शक्तिरिति स्वमतेन निगमनम्

बोधकत्वं शक्तिरिति पूर्वमीमांसकानां सेश्वरमीमांसकानां वैयाकरणभूषणकाराणां च मतम्। बोधकत्वरूपशक्तिज्ञानं च अयमस्यार्थस्य बोधक इत्युपदेशादिना भवति। लक्षणोच्छेदापत्तिशङ्का तु इष्टापत्त्या भूषणकारेण परिहृता।

---

[२२] सेश्वरमीमांसा पृ. ४३, सू. १.१.११

वयं तु ब्रूमः। गङ्गापदस्य प्रवाहबोधकत्वं तीरबोधकत्वं च यद्यप्यस्ति, तथापि प्रवाहबोधकत्वमेव शक्तिः न तीरबोधकत्वम्। गङ्गापदेन प्रवाहबोधानन्तरं अन्वयाद्यनुपपत्तिप्रतिसन्धानानन्तरं हि तीरबोधः। तथा च बोधान्तरान्वयानुपपत्त्यादिप्रतिसन्धानव्यवधानरहितबोधजनकत्वं शक्तिरित्युक्तौ लक्षणोच्छेदापत्तिशङ्काया नावसरः, इष्टापत्तौ शक्यलक्ष्यादिविभागाभावप्रसङ्गादिचोद्यस्य परिहारे प्रयासस्य च नावसर इति। अतो गवादिसंस्कृतशब्देषु संबन्धान्तरनिरपेक्षं बोधकत्वं शक्तिरिति पक्षोऽपि युक्तियुक्त इत्येव प्रतीयते।

अत एव बोधकत्वज्ञानार्थं संकेतज्ञानस्यावश्यकत्वात् आवश्यकः संकेत एव शक्तिरित्यपास्तम्। अयमस्य बोधक इत्यादिः यः पित्रादीनामुपदेशः तत एव बोधकत्वज्ञानसंभवात् इच्छारूपसंकेतज्ञानस्यानपेक्षितत्वात्।

प्रत्यायकत्वं बोधकत्वं वा शक्तिरिति ये वदन्ति मीमांसकाः तन्मतेऽपि बोधकत्वमित्यनेन बोधजननसामर्थ्यमेव विवक्षितम्। षट्पदार्थातिरिक्तस्य शक्त्यपरपर्यायस्य सामर्थ्यस्य तैरङ्गीकारात् शब्दनिष्ठं सामर्थ्यमेव बोधकत्वं नाम। अतः बोधकत्वस्य बोधजनकतावच्छेदकत्वे आत्माश्रय इत्यादिदूषणानां न प्रसक्तिः। तर्कताण्डवेऽपि कारणसामान्ये कार्यानुकूलशक्तेरङ्गीकारात् शब्देऽपि अर्थबोधानुकूलं सामर्थ्यमेव शक्तिरित्युपपादितम्। इयांस्तु विशेषः — वह्न्यादौ दाहाद्यनुकूला शक्तिः स्वरूपसती कार्यकरी, शब्दनिष्ठा तु शक्तिः ज्ञाता सती अर्थबोधं जनयति। तदुक्तं शक्तिवादेऽपि ज्ञाने पदानां शक्तिरिति मीमांसकमतनिरूपणावसरे "दाहादिकार्ये वह्न्यादिनिष्ठशक्तेः स्वरूपसत्या एवोपयोगित्वेऽपि शाब्दबोधानुकूलशक्तेः शाब्दबोधे पदार्थोपस्थितौ च ज्ञातोपयोगित्वोपगमे बाधकाभावात्" इति "अस्तु वा तज्ज्ञानशक्त्या तस्य वाचकत्वम्" इति च।

नैयायिकमते लक्षणोच्छेदापत्तिपरिहारः

नन्वीश्वरेच्छायाः संकेतत्ववादिनां नैयायिकानां मते लक्षणायाः उच्छेदापत्तिः। गङ्गायां घोष इत्यादौ गङ्गापदेन तीरबोधात् विद्यमानसर्वविषयकत्वादीश्वरेच्छायाः तीरनिष्ठं यत् गङ्गापदजन्यबोधविषयत्वं तद्विषयकत्वमप्यङ्गीकरणीयम्। एवं च गङ्गापदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यत्वस्य तीरे सत्त्वात् तीरस्यापि गङ्गापदशक्यत्वात् इति चेत् — न।

तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छाविशेष्यत्वमेव तत्पदशक्यत्वम्। अस्माकमप्रत्यक्षायाः ईश्वरेच्छायाः लोकव्यवहाराविरोधेनाकारः

कल्पनीयः। तीरं गङ्गापदशक्यमिति व्यवहारो नास्ति। अतः विषयता गङ्गापद-जन्यबोधीया भवतु, विषयतावत् तीरं भवतु इत्याकारः तस्याः कल्प्यते। तावतापि विद्यमानसर्वविषयकत्वनिर्वाहात्। तदाकारायां चेश्वरेच्छायां तीरे गङ्गापदजन्यबोध-विषयत्वं विषयतात्वेनैव प्रकारः न तु गङ्गापदजन्यबोधविषयतात्वेन। तथा च गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपित-विशेष्यत्वस्य तीरेऽभावात् तीरस्य न गङ्गापदशक्यत्वमिति लक्षणास्वीकारः आवश्यकः।

ननु तथापि आयुर्जनकस्य वैदिकायुःपदवाच्यत्वापत्तिर्दुर्वारा। ईश्वरकर्तृके वेदे आयुर्घृतम् इति श्रूयते। तत्र आयुः — पदात् आयुर्जनकम् इत्यर्थस्य बोधो भवति। तथा च तत्कर्तुः ईश्वरस्य "आयुःपदमिदमायुर्जनकं बोधयतु" इत्याकारिका "आयुर्जनकमेतदायुःपदजन्यबोधविषयो भवतु" इत्याकारिका वा ईश्वरेच्छा (बुबोधयिषा) वाच्या। तस्यां चायुर्जनकांशे आयुःपदजन्यबोधविषयतात्वेन तादृशविषयत्वं प्रकार इति आयुःपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपित-विशेष्यतायाः आयुर्जनके सत्त्वादिति चेत् — न। एतदनुरोधेन इदन्त्वानवच्छिन्न-पदविषयताघटितनिरुक्तविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यताया एव पद-शक्यत्वरूपत्वं स्वीक्रियते। "घटः घटपदजन्यबोधविषयो भवतु" इतीच्छायां घटपदमिदंत्वेन न भासते इति इदंत्वानवच्छिन्नपदविषयताघटितनिरुक्तविषयतात्वा-वच्छिन्नप्रकारतामादाय घटादेः घटादिपदवाच्यत्वम्। वेदे सर्वत्र आयुःपदात् आयुर्जनकस्याबोधात् "(आयुर्घृतमिति वाक्यघटकम्) आयुःपदमिदमायुर्जनकं बोधयतु" इत्याकारिका बुबोधयिषा वाच्या। एवं च तदीयायुःपदविषयता इदंत्वा-वच्छिन्नेति इदंत्वानवच्छिन्नपदविषयताघटितनिरुक्तविशेष्यत्वस्य आयुर्जनके विरहेण नायुर्जनकस्य वैदिकायुःपदवाच्यत्वापत्तिः इत्याहुः।

शब्दार्थयोस्तादात्म्यं संबन्ध इति नागेशमतम्

नागेशभट्टास्तु लघुमञ्जूषायां शक्तिमधिकृत्य एवं निरूपयन्ति — पदपदार्थयोः वाच्यवाचकभावाख्यः क्लृप्तपदार्थातिरिक्तः संबन्धः शक्तिः इति अभिधेति चोच्यते। तादृशशक्तिग्राहकं च शब्दार्थयोस्तादात्म्यम्। स एव संकेतः। शक्त्युपकारकत्वात् तादात्म्यमपि शक्तिरिति व्यवह्रियते। न च शब्दार्थयोस्तादात्म्ये अन्नमित्युक्ते मुखस्य पूरणापत्तिः, पूरणहेतोरर्थस्यान्नस्य शब्दाभिन्नत्वेन तत्र सत्त्वात् इति वाच्यम्। शब्दार्थयोरत्यन्ताभेदानङ्गीकारात् भेदसमानाधिकरणाभेदरूपतादात्म्य-स्यैव स्वीकारेण उक्तापत्त्यसंभवात्।

ननु शब्दार्थयोस्तादात्म्ये किं मानमिति चेत् — उच्यते। अयं घट इत्यादिप्रत्यये घटादिरूपोऽर्थः तत्तद्वाचकशब्दानुविद्ध एव भासते। अत एव पुरोवर्तिपदार्थदर्शी तद्वाचकशब्दमजानानः "किमिदमिति न जानामि" इति ब्रूते। वाचकशब्दोपदेशानन्तरं ज्ञातमिति वदति। प्रत्ययेषु अर्थमात्रभाने न जानामीति कथं ब्रूयात्। अर्थस्य ज्ञातत्वात्। अतः शब्दानुविद्धोऽर्थो भासते। शब्दानुविद्धत्वं च शब्दतादात्म्यापन्नत्वम्।

अपि च कोकिलरूपार्थस्य पिकपदे एव शक्तिं जानतः कोकिलपदे तामजानतः पुंसः कोकिलदर्शने सति अयं कोकिल इत्यनुव्यवसायापत्तिः। ज्ञानेऽर्थमात्रस्य भानात् अर्थस्य च तेन ज्ञातत्वात्। अतो वाचकपदमपि तत्र भासत इति स्वीकार्यम्। वाचकस्य कोकिलपदस्याज्ञानात् न तस्य तथानुव्यवसायापत्तिः। किं चायं घट इति प्रत्यक्षे घटस्य विशेष्यता घटत्वस्य प्रकारता इति विषयताभाननिर्वाहार्थमपि पदभानमावश्यकम्।

यत्त्वत्र नागेशेनोक्तम् — पदपदार्थयोः बोध्यबोधकभावनियामिका शक्तिरेव संबन्ध इति तन्न युक्तम्। शक्तेरपि कार्यजनकत्वे संबन्धस्यैव नियामकत्वात्। दीपगतप्रकाशकत्वशक्तावपि संबन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात्। तदुक्तं हरिणा —

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः। इति।

पदभाने सति यत् ज्ञानं यत्पदविषयकं तत् तज्जन्यबोधीयविषयतासमान-विषयताकम् इति नियमात् घटविशेष्यकत्वादिनियमो निर्वहति।

घटादिपदानामपि घटत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्ने शक्तिः। अतो घटपदजन्यबोधे विशेष्यत्वादिकं भासते। अतः घटपदविषयकप्रत्यक्षेऽपि तत्समानविषयतादिकं भासते। व्यवसाये विषयता भासते इत्यकामेनापि अङ्गी-कार्यम्। कथमन्यथा घटमहं जानामीत्यनुव्यवसाये विषयत्वं भासेत। व्यवसाय-विषयस्यैवानुव्यसाये भानात्। व्यवसायाविषयस्यापि व्यवसायविषये विद्यमान-स्यानुव्यवसाये भानोपगमे अयं गुड इति व्यवसायानन्तरभावी अनुव्यवसायः व्यवसायविषयगुडे विद्यमानं माधुर्यमवगाहेत। विषयतायाश्च भानं न विषयत्वान्तरम्, अपि तु स्वयमेवेति नानवस्था। तस्मात् प्रत्यक्षादावपि विषयताभाननियमनिर्वाहाय पदभानमावश्यकम्।

न्यायसूत्रकारस्यापि शाब्दबोधे पदभानं संमतम्। "इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यसायात्मकं प्रत्यक्षम्"[२३] इति प्रत्यक्षलक्षणसूत्रम्। तत्र अव्यपदेश्यमित्यस्य वाचकशब्दाविषयकमित्यर्थः। एवं च प्रत्यक्षं शब्दाविषयकमिति वदन् शाब्दबोधं वाचकशब्दविषयकं मन्यते सूत्रकारः।

तस्मिन्नेव सूत्रे "शब्दविषयकत्वेन प्रत्यक्षस्य शाब्दत्वापत्तिः" इति वदतो न्यायभाष्यकारस्यापि अभिमतोऽयमर्थः। व्यवस्थिते हि शाब्दे पदभाने शब्दविषयकत्वात् प्रत्यक्षस्य शाब्दत्वामापादयितुं शक्यते। "शब्दविषयकत्वमेव शाब्दत्वं न तु शब्दजन्यत्वम्" इति तत्रैव वाचस्पतिमिश्रैरुक्तम्। तथा च नैयायिकैः शाब्दे पदभानाङ्गीकारात् अन्यत्र प्रत्यक्षादौ तदभानाग्रहो मुधैव।

तस्मात् अयं घट इत्यादिप्रत्यये तत्तद्वाचकशब्दानुविद्ध एवार्थो भासत इति सिद्धम्। किं च यत् यत्सामानाधिकरण्येन प्रतीयते तत् तदात्मकम्। अर्थः वाचकशब्दसामानाधिकरण्येन प्रतीयत इति शब्दात्मकः। तस्मात् अत्यन्तभिन्नयोः घटपटयोः घटः पट इति सामानाधिकरण्येनाप्रतीतेः, अत्यन्ताभेदेऽपि घटो घट इति सामानाधिकरण्येन प्रतीत्यभावात्, नीलो घट इति सामानाधिकरण्येन प्रतीतेः नीलघटयोरिव शब्दार्थयोरपि सामानाधिकरण्येन प्रतीतेः भेदसमानाधिकरणाभेदरूपं तादात्म्यं सिध्यति।

अपि च अतदुपायकः अतद्विषयकश्च न तत्पुरःसरो दृष्टः। सर्वोऽपि सविकल्पकप्रत्ययः शब्दपुरस्सरः। अतः सविकल्पकप्रत्ययः शब्दविषयकः शब्दोपायको वा वक्तव्यः। आद्ये अर्थज्ञानस्य शब्दज्ञानात्मकत्वेन सिद्धं शब्दार्थयोस्तादात्म्यम्। द्वितीये किं शब्दः अज्ञातः सन्नुपायः उत ज्ञातः। नाद्यः, निर्विकल्पकस्यासिद्धिप्रसङ्गात्। विशिष्टबुद्धौ विशेषणज्ञानस्य उपायत्वे एव निर्विकल्पकं सिध्यति। अज्ञातस्याप्युपायत्वे अज्ञातस्यापि घटत्वस्य अयं घट इति विशिष्टबुद्धिजनकत्वसंभवात् घटत्वज्ञानानपेक्षणेन निर्विकल्पकाङ्गीकारस्य व्यर्थत्वात्। द्वितीयपक्षे च सिद्धं नः समीहितम्। असंनिहितस्य हि न ज्ञानं संभवति। शब्दश्च न संनिहितः। अतः अर्थतादात्म्यात् अर्थसंनिधानमेव शब्दसंनिधानमिति संनिहितस्य शब्दस्य ज्ञानं भवेत्। तथा च सिद्धं शब्दार्थयोस्तादात्म्यम्।

एवं कः शब्द इति प्रश्ने "घट इत्ययं शब्दः" इत्युत्तरयन्ति। कोऽर्थ इति प्रश्नेऽपि "घट इत्ययमर्थः" इत्युत्तरयन्ति। तथा च शब्दार्थप्रश्नयोः एकाकारोत्तरदर्शनात् तन्मूलभूता तादात्म्यप्रतीतिः तया च शब्दार्थयोः तादात्म्यं सिध्यति।

---

[२३] न्या.सू. १.१.४

अपि च पदं श्रुतम्, अर्थं शृणु इति व्यवहरन्ति। अत्र चार्थपदं न शब्दपरम्, पदं श्रुतमिति पृथगभिधानात्। अपि तु अर्थपरमेव। श्रावणप्रत्यक्षविषयत्वं तु शब्दस्यैवेति शब्दतादात्म्याभावेऽर्थस्य श्रावणप्रत्यक्षविषयत्वं न संभवति। तस्मात् शब्दार्थयोः तादात्म्यमभिसन्धायैव "अर्थं शृणु" इति व्यवहरन्तीति निरुक्तप्रयोग-मूलप्रतीत्यापि शब्दार्थयोस्तादात्म्यं सिध्यति।

किं च वाच्यम् आदैचं वाचकं वृद्धिशब्दं च सामानाधिकरण्येन "वृद्धि-रादैच्"[२४] इति प्रयुञ्जानः पाणिनिरपि वाच्यवाचकयोस्तादात्म्यमभिप्रैति। प्रणव-वाच्यं ब्रह्म प्रणवं च सामानाधिकण्येन निर्दिशन्ती "ओमित्येकाक्षरं ब्रह्म" इति श्रुतिरपि वाच्यवाचकयोस्तादात्म्यं दृढीकरोति।

एवं पिनाकिनो मानभञ्जकः रामः (अर्थः) न तु तद्वाचकः शब्दः। परं तु रामशब्दे मानभञ्जकत्वं प्रतिपादयन् "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इति प्रयोगः शब्दार्थयोरभेदाध्यवसायमूलक इति तेन शब्दार्थयोस्तादात्म्यं सिध्यति।

अत एव "हिरण्यपूर्वं कशिपुं प्रचक्षते" इति प्रयोगोऽपि संगच्छते। अत्र पुरुषविशेषं हिरण्यपूर्वं कशिपुं प्रचक्षत इत्युक्तम्। हिरण्यशब्दपूर्वकत्वं कशिपुपदस्यैव। तथा च अर्थस्य हिरण्यपूर्वककशिपुपदस्य च सामानाधिकरण्येन प्रयोगः तयोस्तादात्म्यं सूचयति।

बौद्धार्थस्थापनम्

वस्तुतस्तु बौद्धयोरेव शब्दार्थयोः वाच्यवाचकभावः। तादृशयोरेव शब्दार्थयो-स्तादात्म्यम्। अतः अन्नमित्युक्ते न पूरणापत्तिः, बाह्यस्यैवान्नस्य पूरकत्वात्। आवश्यकश्च बौद्धार्थस्य वाच्यतास्वीकारः। कथमन्यथा घटोऽस्ति, घटो नास्तीति प्रयोग उपपद्यते। यदि घटशब्दस्य बाह्यसत्ताविशिष्टो घटो वाच्यः तदा घटशब्देनैव घटे बाह्यसत्तायाः बोधनात् उक्तार्थानामप्रयोगः इति न्यायेन अस्तीति प्रयोगो न स्यात्। एवं घटशब्देन घटे बाह्यसत्तायाः बोधितत्वात् तद्विरुद्धः बाह्यसत्ताभावः तत्रानुपपन्न इति सत्ताभावबोधकः नास्तीति प्रयोगोऽप्यनुपपन्नः स्यात्। यदि बुद्धिसत्ताविशिष्टो घटो वाच्यः, तदा घटशब्देन अबोधितायाः बाह्यसत्तायाः बोधनाय अस्तिपदप्रयोग उपपद्यते। घटशब्दबोध्ये बौद्धघटे अबाधितं बाह्यसत्तायाः अभावं बोधयितुं नास्तीति प्रयोगोऽप्युपपद्यते। तस्मात् बौद्धार्थ एव वाच्यः।

अपि च बौद्धार्थानङ्गीकारे शशशृङ्गं नास्तीति वाक्यात् शाब्दबोधो न स्यात्, बाह्यस्य शशशृङ्गस्यासत्त्वात्। एवम् अङ्कुरो जायत इति वाक्यादपि बोधो न

---

[२४] पा.सू. १.१.१

स्यात्। योऽङ्कुरः उत्पत्त्याश्रयः स एव तत्र शाब्दबोधे भासत इति वक्तव्यम्। तच्च न संभवति। ज्ञानसामान्ये विषयस्य कारणत्वेन विद्यमानस्यैव शाब्दबोध इति शाब्दकाले बाह्यस्य उत्पत्त्याश्रयस्य अङ्कुरस्याभावात्। बौद्धार्थाङ्गीकारे तु शशशृङ्गपदबोध्ये बौद्धे शशशृङ्गे बाह्यसत्ताया अभावः शशशृङ्गं नास्तीति वाक्येन बोध्यते। एवं तत्काले बुद्धिसिद्धाङ्कुरे उत्पत्तिः अङ्कुरो जायत इति वाक्येन बोध्यत इति न दोषः।

किं च ज्ञानसामान्ये विषयः कारणमिति संप्रतिपन्नम्। समानाधिकरणयोरेव कार्यकारणभावात् बाह्यघटादिः स्वानधिकरणमनोगतज्ञानस्य न कारणं भवितुमर्हति। बौद्धार्थस्वीकारे तु बौद्धो विषयः घटादिः मनोनिष्ठः स्वाधिकरणे मनसि ज्ञानं जनयेदिति तयोः कार्यकारणभाव उपपद्यते।

न च विषयतासंबन्धेन ज्ञानं प्रति तादात्म्येन विषयस्य विषयनिष्ठप्रत्यासत्त्या कारणत्वसंभवान्न बौद्धार्थः स्वीकरणीयः इति वाच्यम्। तादात्म्यसंबन्धस्य वृत्त्यनियामकत्वेन तेन संबन्धेन विषयस्य कारणस्य कार्यभूतज्ञानाधिकरण-वृत्तित्वासंभवेन विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावासंभवात्।

एवम् अतीतघटविषयकस्मरणात्मकज्ञाने अतीतघटस्य निरुक्तरीत्या कारणत्वं न वक्तुं शक्यते, विषयस्य अतीतस्य बाह्यघटस्य स्मरणकालेऽसत्त्वेन तत्र विषयतासंबन्धेन स्मरणस्यासत्त्वात्। विद्यमानयोरेव घटभूतलाद्योः संयोगादि-संबन्धदर्शनेन अविद्यमाने अतीतघटे विद्यमानस्य स्मरणस्य संबन्धासंभवात्। बौद्धार्थस्वीकारे तु बाह्यस्य घटस्यातीतत्वेऽपि बौद्धस्य विद्यमानत्वात् स्मरण-संबन्धः, मनोनिष्ठप्रत्यासत्त्या ज्ञानविषययोः कार्यकारणभावश्चोपपद्यते।

एवं नलरावणादिपदात् शाब्दबोधनिर्वाहायापि बौद्धार्थस्वीकरणमावश्यकम्। घटत्वादिव्यञ्जकघटादिसंस्थानानामिव नलत्वादिव्यञ्जकनलादिसंस्थानानामस्माक-मप्रत्यक्षत्वात् घटादिपदानां घटत्वादिजातिविशिष्टे इव नलादिपदानां नलत्वादि-जातिविशिष्टे शक्तिग्रहो न संभवति। फलबलात् अनादीन् नलादिविषयकसंस्कारान् कल्पयित्वा तादृशसंस्कारेणोपस्थिते शक्तिग्रहात् नलादिपदात् विशिष्य नलत्वादि-प्रकारको बोध इत्यपि न शक्यते वक्तुम्। अप्रसिद्धार्थकनलादिपदश्रवणे कः एतदर्थः इति प्रश्नस्य उपमानादिना तत्प्रतिवचनस्य चानुपपत्तेः। तस्मात् तदीयगुणसमृद्ध्यादिश्रवणोत्तरं सामान्यतो बुद्ध्या गृहीताकारे शक्तिः ज्ञायते। ततः बौद्ध एवार्थः शाब्दबोधे भासत इति बौद्धार्थस्वीकार आवश्यकः।

किं च "स भूरिति व्याहरत्, स भूमिमसृजत" इति श्रुत्या सृष्टेः प्राक् हिरण्यगर्भः भूरादिशब्देभ्यः तदर्थं ज्ञात्वा भूरादीन् लोकान् ससर्ज इत्यवगम्यते।

यदि बाह्य एवार्थः तदा बाह्यायाः भुवः तदानीमभावेन भूशब्दस्य शक्तिग्रहासंभवात् तच्छब्दात् भूविषयकबोधो न स्यात्। बौद्धार्थस्वीकारे तु हिरण्यगर्भस्य सर्वज्ञत्वात् भगवदनुग्रहाच्च वेदलाभवत् तदैव स्वबुद्धिपरिवर्तिपदार्थस्य स्थूलरूपेण भानं, तत्र संबन्धग्रहः, शाब्दबोधश्च संभवतीत्युपपद्यते। अतोऽपि बौद्धार्थः स्वीकरणीयः।

अपि च "उपदेशेऽजनुनासिक इत्"[२५] इति सूत्रे भाष्ये "को देवदत्तः" इति प्रश्ने, "अङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुः ईदृशो देवदत्तः"...इत्युक्तम्..। तत्र ईदृशपदम् एतत्सदृशार्थकम्। यदि बाह्य एवार्थः, तदा देवदत्तव्यक्तेरैक्यात् भेदघटितसादृश्यस्यासंभवात् ईदृशो देवदत्त इति वाक्यम् अपार्थकं स्यात्। बौद्धार्थस्वीकारे तु एतैः शब्दैः यादृशोऽर्थः बुद्धौ प्रतिभासते तादृशो बाह्यदेवदत्तः इत्यर्थकं पूर्वोक्तवाक्यं बौद्धबाह्यदेवदत्तव्यक्त्योः भेदघटितसादृश्यसंभवात् उपपद्यते।

असत्कार्यवादनिरूपणावसरे "बुद्धिसिद्धं तु तदसत्"[२६] इति सूत्रकर्तुः गोतमस्यापि संमतोऽयं बौद्धार्थः। तथा हि कर्तृत्वं कार्यनियतपूर्ववृत्तित्वरूपकारणत्वव्याप्यम्। उत्पत्तेः प्रागसच्च कार्यं कथमुत्पत्तिकर्तृ भवेत्, तत्ताभावे च "घटो जायते" इति कर्त्राख्यातप्रयोगः कथमुपपद्यते इत्याशङ्कापरिहाराय तत्सूत्रं प्रवृत्तम्। तत् = कार्यम् उत्पत्तेः प्राक् नाशोत्तरं च असदपि बुद्धिविषयतया सिद्धमिति सूत्रार्थः। बौद्धस्य घटस्य पूर्ववृत्तित्वात् कर्तृत्वमुपपद्यत इति परिहाराशयः। तथा च बौद्धार्थः न्यायदर्शनकर्तुः गोतमस्यापि संमतः।

एवं च बौद्ध एवार्थो वाच्यः, बौद्ध एव शब्दो वाचकः। तयोरेव तादात्म्यमिति न अन्नमित्युक्ते पूरणापत्तिः। शब्दार्थतादात्म्योपकृतश्च वाच्यवाचकभावः अतिरिक्तः संबन्धः शक्त्यपरपर्यायः। तस्य अर्थोऽनुयोगी, पदं प्रतियोगि। तादृशसंबन्धानुयोगित्वं शक्यत्वम्, तत्प्रतियोगित्वं शक्तत्वम् वाचकत्वम् — इति।

उक्तस्य नागेशमतस्य परिशीलनम्

यदुक्तं वाच्यवाचकभावाख्यातिरिक्तसंबन्धरूपसंगतिग्राहकं शब्दार्थयोस्तादात्म्यम्। तदपि शक्त्युपकारकत्वात् शक्तिरिति व्यवह्रियते इति। तन्न।

प्रमाणाभावेन शब्दार्थयोस्तादात्म्यस्यैवासिद्धेः। न चायं गौरित्यादेः सविकल्पकप्रत्ययस्य वाचकशब्दसामानाधिकरण्येनार्थावगाहित्वात् शब्दार्थतादात्म्यं सिध्य-

---

[२५] पा.सू. १.३.२
[२६] न्या.सू. ४.१.५०

तीत्युक्तमिति वाच्यम्। अस्य शब्दस्यायं शब्दो वाचकः इति शब्दार्थ-संबन्धमजानतां बालमूकादीनामप्यर्थज्ञानं जायते। मूकादिभिश्च शब्दगन्धोऽप्य-नाघ्रात इति कथं तेषामर्थज्ञानं शब्दसामानाधिकरण्यमवगाहेत। कथं वा तत्तादात्म्यमर्थानां सिध्येत्। अथ बालमूकादीनां यथा तथा वास्तु प्रतीतिः। व्युत्पन्नानां जायमानः सविकल्पकप्रत्ययः शब्दसामानाधिकरण्येनार्थमवगाहत इति तद्बलात् शब्दार्थतादात्म्यं सिध्यतीति चेत् — मैवम्। व्युत्पन्नानामपि तथा प्रतीतेरसिद्धेः। ते हि सास्नादिमतोऽर्थस्य गोशब्दो वाचक इति प्रतियन्ति, न तु अयं गोशब्द इति। यत्र च अयं गौरिति अभेदेन संबन्धबोधनं तत्रापि गोशब्दः गोशब्दप्रतिपाद्ये निरूढलाक्षणिकः।

यत्तु अज्ञातवाचकस्य पुरुषस्यार्थे ज्ञातेऽपि किमिदमिति न जानामीति व्यव-हारात्, वाचकपदोपदेश इति किमिदम् इति ज्ञातमिति व्यवहाराच्च शब्दानु-विद्धोऽर्थः सविकल्पके भासत इति।

तदपि न। अयं क इत्यादौ विधेयवाचककिंपदस्य समभिव्याहृतपदोपस्थाप्य-तावच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकत्वेन वक्तृ-जिज्ञासितो यो विशेषधर्मः तदवच्छिन्ने शक्तिः। धर्मे विशेषत्वं च विधेय-तावच्छेदकत्वेन वक्तृज्ञानविषयत्वम्। स च विशेषधर्मः प्रकरणादिना ज्ञायते। यदा प्रष्टा इमं प्राणिनं जानाति न मनुष्यम् इति प्रकरणात् ज्ञायते तदा अयं कः इति प्रश्ने, अयं मनुष्य इत्युत्तरं दीयते। यदा तु इमं मनुष्यं जानाति न ब्राह्मणम् इति ज्ञायते, तदा अयं ब्राह्मण इत्युत्तरं दीयते। अयं क इति न जानामीत्यादौ इति-शब्दसमभिव्याहृतवाक्यप्रतिपाद्यजिज्ञासाविषयधर्मविशेषविषयकज्ञानाभाववानहम् इति बोधो भवतीति वस्तुस्थितिः। प्रकृते च अज्ञातवाचकः अर्थदर्शी पुरुषः अयं क इति पृच्छति, अयं क इति न जानामीति च व्यवहरति। प्रष्ट्रा पुरोवर्ती पदार्थः सम्यगनुभूयते, परं तु तस्यार्थस्य पदविशेषवाच्यत्वं नावगतम्। तस्मात् पदविशेषवाच्यत्वप्रकारको बोधः तस्मै जननीयः इत्यभिसन्धिना अयमेतच्छब्द-वाच्यः इति वाचकशब्दमुपदिशति पार्श्वस्थः पुरुषः। ततः स्वेन जिज्ञासितस्य पदविशेषवाच्यत्वरूपस्य धर्मविशेषस्य ज्ञातत्वात् अयं क इति ज्ञातमिति व्यवहरति। एवं च सति सविकल्पकप्रत्यये पदविशेषभानं नावश्यकं भवति।

यदि पदभाने आग्रहः, तदा चैत्रादिज्ञाने तदीयपाचकत्वादिधर्मविशेषा अपि भासन्त इति स्वीकरणीयं भवेत्। नामधेये ज्ञातेऽपि अर्थगतविशेषधर्मान्तराज्ञानात् अयं चैत्रः क इत्यपि पृच्छ्यते, अयं चैत्रः क इति न जानामीति व्यवह्रियते च। अयं चैत्रः पाचकः इत्युत्तरेण तद्गते पाचकत्वधर्मविशेषे ज्ञाते, अयं चैत्रः क इति

ज्ञातम् इति व्यवह्रियते। तथा च पाचकत्वाज्ञानेन चैत्रे अज्ञातत्वव्यवहारस्य, तज्ज्ञानेन तत्र ज्ञातत्वव्यहारस्य च तुल्यत्वात् चैत्रज्ञानेऽपि पाचकत्वादि भासत इत्यापद्येत। तस्मात् पूर्वोक्तप्रकार एव साधुः। तथा च सर्वत्र ज्ञाने पदभानं नावश्यकम्।

यत्तु कोकिलरूपमर्थं जानतः कोकिलपदे तद्वाचकत्वमजानतः पुरुषस्य अयं कोकिल इत्यनुव्यसायवारणाय पदभानमावश्यकमिति। तदपि न। अयं कोकिल इति जानातीत्यादौ इतिशब्दः तत्तद्वाक्यजन्यबोधसमानाकारकपरः। इति शब्दार्थस्य तस्याभेदेन धात्वर्थज्ञानेऽन्वयः। तदुक्तं शक्तिवादे[२७] भट्टाचार्यैः युष्मदर्थनिरूपणावसरे —

"अपि तु इतिपदं तत्तद्वाक्यजन्यज्ञानसमानाकारकपरम्। तादृशश्चेतिपदार्थोऽभेदसंबन्धेन यथासंभवं धात्वर्थे धात्वर्थतावच्छेदके च ज्ञाने विशेषणमित्येवोपगन्तव्यम् —" इति। एवं च "अयं कोकिल इत्यनुव्यवसायः" इत्यस्य अयं कोकिल इति वाक्यजन्यबोधसमानाकारकानुव्यवसाय इत्यर्थः। तस्य च नापत्तिः संभवति। शाब्दबोधविषयकोकिलरूपार्थविषयकज्ञानस्य सत्त्वेन इष्टत्वात्। न च "इति ज्ञानम्" इत्यस्य पूर्वोक्तार्थाभिन्नज्ञानमित्यर्थः, अर्थज्ञानयोश्च तादात्म्याध्यास इति वाच्यम्। आन्तरत्वबाह्यत्वचक्षुर्ग्राह्यत्वतदग्राह्यत्वादिविरुद्धधर्मप्रत्यक्षे सति अर्थज्ञानयोरभेदज्ञानस्यासंभवात्।

यदपि प्रत्यक्षादौ विषयताभाननियमनिर्वाहाय पदभानमावश्यकमिति, तदपि न। यस्मिन् भासते स विशेष्यः। तस्मिन् यो भासते स प्रकारः। अयं घट इति ज्ञाने घटे घटत्वं भासत इति घटो विशेष्यः, घटत्वं प्रकारः। घटनिष्ठा विशेष्यता घटत्वनिष्ठा प्रकारता च ज्ञाननिरूपिता, न तु ज्ञानविषयः।

न च विषयत्वस्य व्यवसाये भानाभावे अनुव्यवसाये भानं न संभवतीति वाच्यम्। यतः व्यवसायो यद्विशेष्यको यत्प्रकारकश्च, स तद्विशेष्यकत्वेन तत्प्रकारकत्वेन चानुव्यवसाये भासत इत्येव नियमः। न तु व्यवसाये यद् भासते तदेवानुव्यवसाये भासत इति। तथा च व्यवसायाविषयस्यापि विषयत्वस्यानुव्यवसाये भानं संभवति।

अस्तु वा प्रत्यक्षादावपि विषयताभानम्, तथापि न पदविषयकत्वं प्रत्यक्षादीनामावश्यकम्। पूर्वोक्तनियमशरीरे यत्पदविषयकमित्यंशमपहाय तत्स्थाने यत्पदाभिलप्यमिति निवेशेन सर्वसामञ्जस्यात्। तथा च "यज्ज्ञानं यत्पदाभिलप्यं

---

[२७] श.वा. पृ. १२४

तत् तत्पदजन्यबोधविषयतासमानविषयताकम्'' इति नियमेनैव विषयता-भाननियमननिर्वाहः संभवतीति न तदर्थं पदविषयकत्वं प्रत्यक्षादीनां कल्पनीयम्।

''इन्द्रियार्थसंनिकर्षोत्पन्नम्'' इति न्यायसूत्रे अव्यपदेश्यपदं निर्विकल्पकपरम्। तेन प्रत्यक्षात्मकज्ञानस्य सविकल्पकनिर्विकल्पकभेदेन द्वैविध्यं सूचितम्। न तु शाब्दबोधेऽतिव्याप्तिवारणाय अव्यपदेश्यपदम्, येन शाब्दबोधस्य शब्दविषयकत्वं सूत्रकाराभिमतमिति कल्प्येत।

एवं चायं घट इत्यादिप्रत्यये पदभानाभावात् न शब्दसामानाधि-करण्येनार्थप्रतीतिबलात् शब्दार्थतादात्म्यं सिध्यति।

यदपि शब्दपुरस्सरत्वात् विकल्पस्य शब्दोपायकत्वं शब्दविषयकत्वं वेत्युभयथापि सिद्धं तयोस्तादात्म्यमिति। तदपि न। सविकल्पकप्रत्ययोत्पत्तेः पूर्वं नियमेन शब्दस्य अभावात्। अस्तु वा शब्दस्मरणम्। तथापि न तत्पूर्वक-स्यार्थज्ञानस्य शब्दतादात्म्यापन्नार्थविषयकत्वम्। तथा सति घटस्मरणपूर्वकस्य घटाभावज्ञानस्यापि घटतादात्म्यापन्नाभावविषयकताप्रसक्त्या घटतदभावयो-स्तादात्म्यप्रसङ्गात्।

यत्तु शब्दप्रश्नस्य अर्थप्रश्नस्य च एकाकारोत्तरदर्शनात् तयोस्तादात्म्यमिति। तन्न। शब्दानामर्थपरत्वमेव स्वाभाविकम्। 'घट इत्ययमर्थः' इत्युत्तरवाक्ये च घटपदस्य कलशरूपं वस्तु अर्थः। इतिशब्दस्याभेदोऽर्थः। तथा चायमर्थो घटाभिन्न इति तद्वाक्याधीनो बोधः। शब्दप्रश्ने, घट इत्ययं शब्दः इत्युत्तरं दीयते। तत्र घटशब्दः शब्दपरः। इतिशब्दः शब्दपरत्वद्योतकः। तथा च अयं शब्दः घटानुपूर्वी-विशिष्टाभिन्नः इति बोधः। एवं चोत्तरं वदतः पुंसः न शब्दार्थतादात्म्याध्यासः।

अपि च शब्द आकाशनिष्ठः श्रोत्रग्राह्यः, अर्थो भूतलनिष्ठः चक्षुर्ग्राह्यश्चेति विरुद्धधर्मप्रत्यक्षस्य कम्बुग्रीवादिमानर्थो न घटशब्दः इति बाधकप्रतीतेश्च सार्वजनीनत्वात् शब्दार्थयोस्तादात्म्याध्यास एव न संभवति इति।

यत्तु पदं श्रुतम्, अर्थं शृणु इति व्यवहारमूलप्रतीत्या तादात्म्यसिद्धिरिति। तदपि न। पदं श्रुतमित्यत्र श्रुधातोः श्रावणप्रत्यक्षार्थकत्वात् अर्थं शृणु इत्यत्र श्रुधातोः शाब्दबोधार्थकत्वात्। तथा च शब्दस्येवार्थस्य श्रावणप्रत्यक्षविषयत्वं नोक्त-व्यवहारेण लभ्यत इति कथं ततः तादात्म्यसिद्धिः।

एवं 'वृद्धिरादैच्'[२८] इत्यत्र वृद्धिशब्दस्य वृद्धिपदबोध्ये निरूढलक्षणा। आदैच् वृद्धिपदबोध्य इति सूत्रार्थः। "ओमित्येकाक्षरं ब्रह्म" इत्यत्रापि एकाक्षरप्रतिपाद्यं ब्रह्मेत्यर्थः, न तु एकाक्षराभिन्नं ब्रह्मेति।

"रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इत्यत्र रामशब्दार्थो यथा पिनाकिनो मानभङ्गहेतुः तथा रामनामापि स्ववाच्यार्थद्वारा मानभङ्गप्रयोजकमित्यर्थात् न तादात्म्याध्यासः।

"हिरण्यपूर्वं कशिपुं प्रचक्षते" इत्यत्र कशिपुपदं हिरण्यशब्दपूर्वककशिपु-पदप्रतिपाद्ये लाक्षणिकम्, हिरण्यपदं तात्पर्यग्राहकम्। यथा गभीरायां नद्यां घोषः इत्यत्र नदीपदं गभीरनदीतीरलाक्षणिकम्, गभीरपदं तात्पर्यग्राहकं तद्वत्। तस्मान्नात्रापि तादात्म्याध्यासः।

बौद्धार्थखण्डनम्

यदपि बौद्ध एवार्थः शक्यः बौद्ध एव शब्दो वाचकः बौद्धयोरेव शब्दार्थयोस्तादात्म्यमित्यादि, तदपि न। बौद्धार्थस्य अप्रामाणिकत्वात्। न च घटोऽस्ति, घटो नास्तीति प्रयोगोपपत्तये बौद्धार्थः स्वीकरणीय इत्युक्तमिति वाच्यम्। न हि तत्र घटपदस्य बाह्यसत्ताविशिष्टो घटोऽर्थः, येनास्तिपदवैयर्थ्यं स्यात्। अपि तु घटत्वविशिष्टोऽर्थः। एवं च घटपदेनानवगतायाः सत्तायाः बोधनाय अस्तिपदं प्रयुक्तमिति कथं तेन बौद्धसत्तायाः सिद्धिः।

एवं घटो नास्तीति वाक्यात् शाब्दबोधो न जायते। अनुयोगिविनिर्मोकेण नञः अभावबोधकत्वस्याव्युत्पन्नत्वात्। परं तु भूतले घटो नास्तीत्येव प्रयोगः। तत्र च सप्तम्यर्थो निरूपितत्वम्। असधात्वर्थ आधेयत्वम्। भूतलनिरूपिताधेयत्वाभाववान् घट इति बोधः। अतः इदं वाक्यं न बौद्धार्थसाधकम्।

यदपि शशशृङ्गं नास्ति, अङ्कुरो जायत इति वाक्यजन्यशाब्दबोधान्यथानुप-पत्त्या बौद्धार्थः सिध्यतीति। तदपि न। शशशृङ्गं नास्तीत्यस्य शशे शृङ्गाभाव इत्यर्थ इति मणिकारादिभिः स्थापितत्वात्। अङ्कुरो जायत इति वाक्यात् अङ्कुर उत्पत्त्याश्रय इति बोधो जायते। यद्यपि बोधविषयोऽङ्कुरः बोधकाले नास्ति, तथापि न बोधानुपपत्तिः। प्रत्यक्षे एव विषयस्य कारणत्वात्। शाब्दबोधे विषयस्याकारणत्वात्। अतीतानागतादिविषयकपरोक्षज्ञानोदयेन ज्ञानसामान्ये विषयस्य कारणतायाः वक्तुमशक्यत्वात्।

---

[२८] पा.सू. १.१.१

नलो राजा इत्यादौ नलपदस्य नलपदबोध्ये लक्षणा। इत्थं च नलपदबोध्यः कश्चिद्राजा इति शाब्दबोधः। अयं च बोधः बौद्धार्थं विनापि निर्वहति।

यत्तु "स भूरिति व्याहरत्, स भूमिमसृजत" इति श्रुत्या भूरादिशब्दार्थ-ज्ञानपूर्वकमेव हिरण्यगर्भसृष्टिरिति लाभेन तदानीं बाह्यायाः भुवोऽभावेन बौद्ध-पृथिव्यामेव शक्तिग्रहपूर्वकं हिण्यगर्भस्य बौद्धपृथिवीबोध इति।

तन्न। निरुक्तश्रुत्या तत्तद्वाचकशब्दोच्चारणपूर्वकं तत्तत्पदार्थान् ससर्जेति लभ्यते, न तु शब्दादर्थं ज्ञात्वा ससर्जेति। न हि स्वस्यैव शाब्दबोधजननार्थं शब्दं प्रयुञ्जानो दृश्यते। तथा च देवताधिकरणे शांकरं भाष्यम् —

"अपि च चिकीर्षितमर्थमनुतिष्ठन् तस्य वाचकं शब्दं पूर्वं स्मृत्वा पश्चात् तमर्थमनुतिष्ठतीति सर्वेषां नः प्रत्यक्षमेतत्। तथा प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दाः मनसि प्रादुर्बभूवुः। पश्चात् तदनुगतानर्थान् ससर्जेति गम्यते।" इति।

यच्च कीदृशो देवदत्त इति प्रश्नोत्तरवाक्यघटकस्य ईदृशपदस्य स्वारस्यात् बौद्धार्थसिद्धिरिति। तत्रोच्यते। ईदृशपदस्य समभिव्याहृतवाक्यप्रतिपाद्यधर्मविशिष्ट इत्यर्थः। एवं च देवदत्तव्यक्तेरैक्येऽपि ईदृशपदात् सादृश्याविषयकस्य बोधस्य संभवात् न तदनुरोधेन बौद्धार्थः स्वीकरणीयः।

यदपि 'बुद्धिसिद्धं तु तदसत्'[२९] इति न्यायसूत्रकर्तुः बौद्धार्थः संमत इति। तन्न। {ा}र्वापरसंदर्भपर्यालोचनया भाष्यतात्पर्यटीकादिपर्यालोचनया च अन्यादृशार्थे तत्सूत्र-तात्पर्यावधारणात्। तथा हि फलपरीक्षायां, अग्निहोत्रादेः कालान्तरभाविस्वर्ग-फलकत्वं व्युत्पाद्य, तन्निर्वाहकं चापूर्वं निरूप्य निष्पद्यमानं प्राङ्निष्पत्तेः नासत्, उपादाननियमात्। न सत्, विद्यमानस्योत्पत्त्यभ्युपगमे उत्पन्नस्य पुनरुत्पत्त्यापत्तेः। न सदसत्, विरुद्धयोः सत्त्वासत्त्वयोः एकत्रायोगात् इत्याशङ्क्य "उत्पाद-व्ययदर्शनात्"[३०] इति सूत्रेण असत्कार्यवादः स्थापितः। उत्पन्नो घटः नष्टो घटः इति प्रतीतेः निष्पद्यमानं प्रागसत् इति तत्सूत्रार्थः। उपादाननियमाच्च हेतोः निष्पद्यमानं प्रागसत् न संभवतीति शङ्कितम्। सा च शङ्का अवश्यं परिहरणीया। तस्याः परिहारमाह —

"बुद्धिसिद्धं तु तदसत्" इति। कार्यमुत्पत्तेः प्रागसदपि बुद्धिसिद्धं = नियत-कारणकत्वेन ज्ञातमिति पटार्थिनः तन्तूनेवोपाददते न मृदमिति सूत्रार्थः। तथा च

---

[२९] न्या.सू. ४.१.५०
[३०] न्या.सू. ४.१.४९

भाष्यम् — इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेः नियतकारणं कार्यं बुद्ध्या सिद्धम्, उत्पत्तिनियमदर्शनात्। तस्मादुपादाननियमोपपत्तिः — इति।

तत्रत्या तात्पर्यटीका च — "यच्चोक्तमुपादाननियमादिति तत्र यदि पुरुषस्योपादाननियमः पटार्थी तन्तूनेवोपाददते न वीरणम्, कटार्थी वीरणम् इति ततः तदुपादानानां तत्र तत्र कार्ये सामर्थ्यपरिज्ञानात्। तच्च सामर्थ्यमानुमानिकम्। तदिदमुच्यते 'बुद्धिसिद्धं तु तदसत्' इति। तत् असत् भावि कार्यम् अनेनैव कारणेन जन्यते नान्येनेत्यनुमानात् बुद्धिसिद्धमेवेत्यर्थः" इति।

सर्वमेतत् नागेशोक्तिपरिशीलनं शाब्दतरङ्गिण्यां पण्डितराजवेप्पत्तूरुसुब्रह्मण्यशास्त्रिवर्यैः कृतम्, तत् तथैव अत्र संनिवेशितम्। एतदुपरि पण्डिता आलोचनं कर्तुमर्हन्ति।

शब्दार्थसंबन्धः कः? अत्र महाभाष्यकाराशयः[३१]

पस्पशाह्निके महाभाष्यकारेण "किं पुनर्नित्यः शब्दः आहोस्वित् कार्यः" इत्याशङ्क्यच "संग्रह एतत् प्राधान्येन परीक्षितम् नित्यो वा स्यात् कार्यो वेति। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः — यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यम् इति समाधाय, कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्? सिद्धे शब्दार्थसंबन्धे सिद्धे शब्देऽर्थे संबन्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते। यत् कूटस्थेषु अविचालिषु भावेषु वर्तते। तद्यथा सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति। अथ कं पुनः पदार्थं मत्वा एव विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति।? आकृतिमित्याह। कुत एतत्। आकृतिर्हि नित्या द्रव्यमनित्यम्। अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः? सिद्धे शब्देऽर्थे संबन्धे चेति। नित्यो ह्यर्थवतामर्थैः संबन्धः इत्यादिना शब्दार्थसंबन्धानां नित्यत्वं, अर्थस्य नित्यत्वेऽनित्यत्वेऽपि संबन्धस्य नित्यत्वमुपपादितम्।

तत्र कैयटः

अर्थसंबन्धे चेति। द्रव्यपक्षे द्रव्यस्यानित्यत्वात् अर्थग्रहणं संबन्धविशेषणार्थमुपात्तम्। अनित्येऽर्थे कथं संबन्धस्य नित्यतेति चेत् योग्यतालक्षणत्वात् संबन्धस्य, तस्याश्च शब्दाश्रयत्वात् शब्दस्य च नित्यत्वाददोषः। इत्युक्तवान्।

---

[३१] म.भा.पस्पशाह्निकम् पृ. ५-५०

तत्रोद्योतः

योग्यता = बोधजनकत्वयोग्यता — तादात्म्यम्। तदुक्तं भाष्ये — नित्यो ह्यर्थवतामिति। शब्दानामित्यर्थः। ननु तादात्म्यस्य संबन्धत्वे कथं तस्य नित्यत्वमिति चेत् — न। नष्टभाविवस्तुनोऽपि शब्देन बोधात् बौद्धार्थेन तस्य तादात्म्यं नित्यमित्याशयात्। शब्दवृत्तिधर्मस्यैवार्थवृत्तिधर्माभेदमापन्नस्य तादात्म्यत्वेनादोषाच्च। शब्दस्य च नित्यत्वादिति। आकाशवत्तन्निष्ठः शब्दोऽपि नित्यः। व्यञ्जकाभावात्तु न सर्वदोपलम्भ इति भावः।

कैयटः[३२]

तत्र नित्यः शब्दः जातिस्फोटलक्षणः व्यक्तिस्फोटलक्षणो वा। कार्यशब्दिकानामपि प्रवाहनित्यतया। अर्थस्यापि जातिलक्षणस्य नित्यत्वम्। द्रव्यपक्षेऽपि सर्वशब्दानामसत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यता, प्रवाहनित्यतया वा। संबन्धस्यापि व्यवहारपरम्परया अनादित्वान्नित्यता।

उद्योतः[३३]

शब्दार्थयोर्नित्यत्वपक्षे तत्संबन्धस्य नित्यत्वेऽपि अनित्यत्वपक्षे कथं संबन्धस्य नित्यत्वमत आह — संबन्धस्येति। तयोरिव तस्यापि नित्यत्वमिति भावः। शब्दार्थयोः संबन्धश्च शक्तिरूपं तादस्यमेवेति भावः।

भगवता भाष्यकारेण शब्दार्थयोः कः संबन्ध इति नैव स्पष्टीकृतम्। व्याख्यातारस्तु तादात्म्यं संबन्ध इति ब्रुवन्ति। तत्र मूलप्रमाणं तु भर्तृहरेः वाक्यपदीयमेव। तथा हि संबन्धसमुद्देशे तावत् यत् प्रतिपादितं तदत्र संगृह्यते।

वाक्यपदीयानुसारेण शब्दार्थसंबन्धनिरूपणम्[३४]

ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपं च प्रतीयते।
शब्दैरुच्चरितैस्तेषां संबन्धः समवस्थितः। १।

पूर्वं जातिर्द्रव्यं च मतभेदेन शब्दार्थ इति निरूपितम्। इदानीं शब्देनार्थस्याभिधाने संबन्धो हेतुः, अन्यथा सर्वं सर्वेण शब्देन प्रत्याय्येत इति तत्र संबन्धं प्रतिपादयितुमुक्रमते। स्वानुरूपध्वनिभिरभिव्यक्तैः तत्तच्छब्दैः प्रयोक्तुः पुरुषस्य

---

[३२] म.भा. पृ.४७
[३३] म.भा. पृ.४७
[३४] वा.प. पृ.२३५

तत्तच्छब्दस्य तत्तदर्थे प्रयोगहेतुभूतं ज्ञानं तन्मूलकः अभिप्रायश्च अस्मात्पदात् अयमर्थो बोद्धव्य इतीच्छारूपः तत्तच्छब्दस्य स्वरूपं चेति त्रितयमवगम्यते। न चैतदसति संबन्धे नियमेन घटत इति तेषां शब्दार्थानां परस्परं संबन्धः समवस्थितः — स्वभावत एव निरूढः अनादिर्नित्यः न तु पुरुषसमयकृतः।

तत्र त्रिष्वपि ज्ञानादिषु शब्दाभिधेयेषु शब्दस्य बाह्यं स्वरूपं मानसं शब्दस्यान्तरङ्गमभिधेयमिति तेन मानसेन शब्देन सह बाह्यस्य शब्दस्य मुख्यः संबन्धो वाच्यवाचकभावः अभिधानियमः — अभिधायाः शब्दशक्तेर्नियामकः। अत एव प्रथमतः शब्दस्वरूपप्रतिपत्तिः। तदनन्तरं तादात्म्येन शब्दाध्यस्तस्वरूपेऽर्थक्रियाकारिण्यर्थे प्रतिपत्तिः। आभ्यामर्थस्वरूपाभ्यां सह शब्दस्य वाच्यवाचकभावलक्षणः संबन्धः। प्रयोक्त्रभिप्रायेण सह तु कार्यकारणभावलक्षणः संबन्धः।

एवं च द्विविधः संबन्धपदार्थो व्यवतिष्ठते योग्यता कार्यकारणभावश्च। तत्र योग्यतारूपः संबन्धः वाच्यवाचकभावलक्षणस्य संबन्धस्यानादेरेव अनादिः प्रयोजकः। कार्यकारणभावस्तु संबन्धः प्रागुक्त एव। शब्दार्थयोः परस्पराध्यासलक्षणस्तु संबन्धः प्रागुक्तयोः द्वयोरपि संबन्धयोर्नियामकतया मूलभूतस्तिष्ठत्येव। शब्दस्वरूपस्य मुख्यं वाच्यत्वमित्याह —

प्रतिपत्तिर्भवत्यर्थे ज्ञाने वा संशयः क्वचित्।
स्वरूपेषूपलब्धेषु व्यभिचारो न विद्यते।। २।।

शब्दैरुच्चरितैः गृहीतशक्तिकस्य अर्थे बाह्ये प्रतिपत्तिर्भवति। क्वचित् शक्तिग्रहाभावे अगृहीतशक्तिकस्य तु अर्थे प्रयोक्तुर्ज्ञाने वा संशयो भवति। शब्दस्वरूपेषु तु उपलब्धेषु — श्रोत्रेण गृहीतेषु सत्सु व्यभिचारः — शब्दस्वरूपविषयकनिश्चयाभावो न विद्यते। अतोऽर्थज्ञानयोः व्यभिचरितप्रतिपत्तिकत्वात् तयोः वाच्यत्वममुख्यम्। शब्दस्वरूपस्य तु अव्यभिचरितप्रतिपत्तिकत्वात् मुख्यमेव वाच्यत्वमिति।

अयं भावः — गोशब्दस्य कोऽर्थ इति प्रश्ने कदाचित् अयं गौः इति, कदाचिच्च अयमर्थ इत्युत्तरम्। तत्राद्ये शब्दार्थयोः अभेदावभासनात् स्वरूपमभिदधदेव शब्दोऽर्थमभिधत्त इति निश्चीयते। द्वितीयेऽपि इदंशब्दार्थशब्दयोः स्वस्वार्थाभ्यां सह अभेदावसायः स्फुट एव। स्वरूपाभेदेनैव हि अर्थपरामर्शोऽभिधानमुच्यते। वृद्धव्यवहारात् शब्दस्वरूपाविवेकेनैव तत्तच्छब्दानां संबन्धव्युत्पत्तेः — शक्तिग्रहात्।

तथा हि — अयं गौः इति शब्दार्थयोः अभेदेनैव संकेतः क्रियते। घटशब्दस्यायमर्थ इति तु भेदेन व्याख्यानं व्याख्यातृभिः क्रियते। न तु

सर्वजनसाधारणी व्यवहारदशा। अत्रापि च अयमिति इदंशब्दाभेद एवार्थे भासते। यदा गौरित्युच्यते तदायं सास्नादिमानर्थो बोद्धव्य इति संकेतप्रवृत्तिरपि अयमिति इदंशब्दाभेदेनैवार्थं परामृशति। व्यवहारफलको हि संकेतः। यथा च लौकिके व्यवहारे प्रतीतिः तथैव संकेतोऽपि न्याय्यः। लौकिके व्यवहारे च शब्दार्थयोरभेदेनैव प्रतीतिः।

प्रतीतौ हि किंचित् तटस्थमेव तामननुप्रविशदेव उपायमात्रं दृष्टं यथेन्द्रियम्। किंचित् पुनः तत्रानुप्रविशदेव प्रतीतिं जनयत् व्यधिकरणं भवति दण्ड इव यथा धूमादि लिङ्गम्। शब्दस्तु न जनकतामात्रेण अर्थप्रतीतौ संबन्धमनुभवति अपि तु तत्रार्थः शब्द्यमानः शब्दमय एवावभाति। तादृश एव हि स प्रतीतिस्वभावः। रूढत्वाच्च न भ्रमः।

ननु न वर्णमाला अर्थे समुपलभ्यत इति चेत् — दर्शनानभिज्ञत्वादेवं ब्रवीषि। अतः शृणु तावत् शब्ददर्शनरहस्यम्। इह शब्दो नाम वाचक उच्यते। अस्ति च चिच्छक्तेः व्यापारद्वयम्। वागात्मा ज्ञानात्मा चेति। तत्र वागात्मा प्राणवृत्त्यानुगृहीतोऽभिव्यज्यते, ज्ञानात्मा तु मनोवृत्त्या। तत्र योऽयं चिच्छक्तेः वागात्मा व्यापारः शब्दनापरपर्यायः अश्रूयमाणोऽपि उपांशुप्रयोगे यतः शब्द इति व्यवह्रियते सः। तस्य च प्रथममुद्भिद्यमानावस्थस्य अविभागापन्नशब्दार्थमयस्वभावस्य परवागात्मना स्वरूपेणावस्थानम्। यतः परा वाग् इति व्यवह्रियते। एतस्माच्च मलचक्रे समवस्थानम्। तदनन्तरं तु मूलचक्रात् ऊर्ध्वमागच्छत् प्राणवृत्त्यनुप्राणितमनोऽभूमिसमवलम्बितनिजस्वभावस्य वाच्यवाचकरूपभिन्नशाखाद्वयावलिम्बनः मध्यमवागात्मना हृन्नाभिचक्रयोर्मध्ये समवस्थानम्। इयं च मध्यमा वागुच्यते। अस्यां च मध्यमावस्थायां परामर्शनात्मा — परामृश्यमान एव, न तु बहिः श्रूयमाणः वाचकः शब्दः स्वाभिन्नस्य चैतन्यस्य उद्रेकात्मिकां किंचिदुन्मीलनात्मिकां परवागवस्थाम् अत्यजन्नेव स्वरूपवाच्यमुखेन = शब्दस्वरूपं स्ववाच्यं द्वारीकृत्य तदभिधानद्वारेण तदभिन्नमर्थं सामानाधिकरण्येन — स्वाभेदेन परामृशति अवबोधयति गौरयमर्थ इति।

एवं च स वाच्योऽर्थः वाचकाध्यासवान् — वाचकस्य शब्दस्य यः स्वस्मिन् तादात्म्येनाध्यासः तद्वान् तद्विषयतावान् उच्यते। तदनु च स एव स्वसामानाधिकरण्येन अर्थस्य परामर्शकः शब्दः पूर्वावस्थामवलम्बमान एव स्थानकरणाभिहननात्मावस्थामुपगतः श्रवणविषयतायोग्येन स्वरूपेण वाच्यवाचकरूपतया भेदेन व्यक्तिमासादयन् स्फुटीभवति। इयं च वैखरी वागुच्यते। एतावती अवस्थात्रये परामध्यमावैखरीरूपे, देशत्रये वा नाभिहृत्कण्ठकूपरूपे शब्दस्य

व्याप्तिः। ततश्च परवाग्रूपनिष्यन्दात्मकस्य अस्य वैखरीरूपस्य शब्दस्य परवाग्रूपानुगमात् शब्दनात्मकव्यापारवतः स्वसामानाधिकरण्येन स्वार्थरूपस्य शब्दनात् — शब्दतो बोधनात् स्वाभेदेनैव एकया वृत्त्या शक्त्याख्यया शब्दस्वरूपेण विशिष्टं स्वार्थस्याभिधानं व्यवस्थितं भवति। तद्यथा शुक्लः पटोऽयमिति अभेदेन शुक्लगुणव्याप्त्यैव युगपदेव गुणेन साकं विशेष्यस्य पटस्य प्रत्यवमर्शः। न ह्यत्र शुक्लगुणस्य पटात् पृथक् परामर्शः। एवं घटोऽयमिति सामानाधिकरण्येन घटशब्दापेक्षया प्रधानीभूतघटद्रव्यात्मकविशेष्यानुप्रवेशेनैव प्रकारतया घटशब्दस्वरूपपरामर्श इति रीत्या एकैवेयं शब्दनाभिधा प्रतीतिः शब्दार्थयोः।

क्वचित्तु शब्दस्वरूपे एव प्राधान्येन शब्दस्य विश्रान्तिः। तद्यथा "अग्निमन्तोदात्तमधीष्व" "अग्नेर्ढक्" इत्यादौ। अत्र हि सूत्रघटकस्याग्निशब्दस्य अनुकरणस्य अनुकार्यशब्दस्वरूपमेव लौकिकप्रयोगघटकं प्राधान्येनावस्थितम्। प्राधान्येन बाह्यार्थप्रतिपिपादयिषायां तु शब्दस्वरूपार्थस्वरूपयोः अभेदेनैव अव-भास इति नार्थात् पृथक् शब्दस्वरूपप्रविमर्शः। अपि तु एतस्यापि बाह्यस्यापि शब्दस्वरूपाभेदभाजोऽर्थस्य शब्दस्वरूपप्रविमर्श एव प्रविमर्शः, यतो हि घट इति प्रयुक्तेन घटशब्देन तदर्थ इव शब्दस्वरूपमपि अभिधयैव विषयीक्रियते।

ज्ञानशब्दप्रदीपा हि त्रयः प्रकाशाः येनैव प्रकाशेन परं प्रकाशयन्ति तेनैवात्मानमपि। यथा च ज्ञानमर्थं प्रकाशयति, तथैवात्मानमपि प्रकाशयति, एवं प्रदीपो रूपं द्रव्यं चावभासयन् आत्मानमप्याभासविषयत्वप्रापणेन प्रकाशयति, तथा वाचकः शब्दोऽपि अभिधेयतया अर्थं प्रकाशयन् आत्मानमप्यभिधयैव प्रकाशयतीति युक्तम्।

तत्रार्थशब्दस्वरूपयोरुभयोः शब्दाभिधेयत्वेऽपि अर्थापेक्षया स्वरूपस्यान्तरङ्गत्वात् अहेयत्वात् — (अव्यभिचारित्वात्) असाधारणत्वाच्च शब्दस्वरूपं मुख्यमभिधेयम्। अर्थो हि पर्यायान्तरेणाप्यभिधानान्नासाधारणः। स्वरूपं तु पर्यायान्तरावृत्तित्वात् असाधारणम्। अत एव शब्दस्वरूपे संकेतानपेक्षा शब्दस्य वृत्तिः। तच्च शब्दस्वरूपं जातिव्यक्तिसखण्डाखण्डपक्षभेदेन ब्रह्मकाण्डे बहुधा निरूपितम्।

तच्च स्वरूपमभिधानाभिधेयनिमित्तभेदाच्च भिन्नरूपम्। तथा हि — अग्नेर्ढक् इति सूत्रघटकमग्निशब्दस्वरूपमभिधानमेव। आग्नेय इति प्रयोगघटकं तु अभिधेयमेव। हर्यादिरूपनानार्थकशब्दस्वरूपं तु प्रवृत्तिनिमित्तभेदात् भिन्नरूपमित्याशयेन कारिकायां स्वरूपेष्विति बहुवचनम्।

वाच्यवाचकप्रवृत्तिनिमित्तभेदादपि शब्दस्वरूपं भिन्नम् इति अन्यथापि वक्तुं शक्यते। तथा हि — अर्थसंप्रत्ययकारणकोटिनिविष्टं शब्दस्वरूपं वाचकम्, अर्थपक्षनिक्षिप्तं बाह्यार्थाभेदेनाभिधीयमानं वाच्यम्, संबन्धसंवेदनसमयानुगतमभिन्नहर्यादिपदरूपश्रुतिविषयनियामकत्वादर्थे प्रवृत्तिनिमित्तमित्येवं शब्दस्वरूपभेदः। एतत्त्रितयं व्यवहाराभ्यासात् श्रवणसाम्याच्च न विवेकेनावधार्यते। श्रवणाविशेषाच्च तत् त्रितयमपि स्वरूपमिति व्यवह्रियते, न तु सर्वथैवाभेदात्। अगृहीतसंकेतस्य अर्थे तद्विषयकज्ञाने च संदेहो जायते न तु श्रुते स्वरूपे। अतोऽर्थे तद्विषयकज्ञाने च संकेतसापेक्षा शब्दस्य वृत्तिः, न तु तथा शब्दस्वरूपे। संकेताग्रे अर्थापरिज्ञानाच्च किमयं वेद वक्तेत्ययमपि वक्तृज्ञानविषयः संदेहो जायते। अगृहीतसंकेतस्यापि अक्षादिनानार्थसाधारणशब्दादेव च अक्षादावर्थे एव संदेहो जायते, न तु शब्दस्वरूपे इति शब्दस्य मुख्यमभिधेयत्वं सिद्धम्।

शब्दार्थसंबन्धसद्भावे लिङ्गप्रतिपादनम्[३५]

अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते।
योगः शब्दार्थयोस्तत्त्वमित्यतो व्यपदिश्यते।

अस्यार्थस्यायं शब्दो वाचकः, अस्य शब्दस्यायमर्थो वाच्यः इति षष्ठ्यन्यथानुपपत्त्या अस्त्येव स्वाभाविकः शब्दार्थयोः योगः इत्यवसीयते। असंबद्धानां घटपटादीनामेवमन्योन्यपारतन्त्र्येण व्यवहारायोगात्। अत एव षष्ठीबलात् तत्त्वंसंबन्धस्वरूपमुच्यत इति।

तदनन्तरं कः शब्दार्थयोः संबन्ध इति जिज्ञासायां शब्दस्याद्रव्यत्वात् अर्थेन संयोगो न संभवति, द्रव्यत्वेऽपि द्रव्यवाचकशब्दानां कथंचित् द्रव्येण वाच्येन संयोगसंभवेऽपि अद्रव्यवाचकानां गुणादिशब्दानां वाच्येन संयोगो दुरुपपादः। एवं समवायोऽपि न संबन्धः। आकाशादिशब्दानां स्वार्थेन समवायस्य संभवेऽपि घटादिशब्दानां समवायशब्दस्य च स्वार्थेन तस्य दुर्घटत्वात् इति सविस्तरं निरूप्य सिद्धान्त उक्तः —

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा।२९।

अयमर्थः — यथा इन्द्रियाणां चक्षुरादीनां स्वविषयेषु रूपादिषु अनादिर्योग्यतैव संबन्धः, तथा अर्थैः सह शब्दानामनादिर्योग्यतैव संबन्धः। सा चान्तत आध्यासिकतादात्म्यरूपे संबन्धे एव पर्यवस्यतीति।

---

[३५] वा.प. पृ. २४४

अत्र हेलाराजीयव्याख्यानं तथैव लिख्यते — समवायादिनिमित्तानपेक्षयैवोच्चरितमात्रात् शब्दात् अर्थप्रत्ययोत्पत्तेः अकृत्रिमा शक्तिरवसीयते। अर्थमात्रेण हि शब्दमात्रस्याविवियोगमप्रवृत्तसंकेता अपि प्रतिपद्यन्ते। तथा च योग्यता स्वाभाविकी सिद्धा। संकेतस्तु तामेव द्योतयति। तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता। न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः। एवं गवार्थे घटशब्दनिवेशोऽसाधुः तथा हि भाष्यम् — "यो हि गामश्व इति ब्रूयान्न जातुचित् संप्रत्ययः स्यात्"[३६] इति।

यथारुचि संकेते हि न वाचकशक्तिपुरस्कारेण अन्यविषये शब्दाः प्रवर्तन्ते प्रसिद्धार्थाः। अपि तु समयमात्रं तत्। संज्ञाशब्दानां तु सर्वसंज्ञिप्रत्यायनशक्तियुक्तत्वेऽपि विशिष्टे संज्ञिनि शक्त्यवच्छेदः सामयिकः। इयं च योग्यता शब्दानामर्थप्रतीत्यनुसारेणैव व्यवस्थापनीयेति अभेदेन शब्दार्थयोः प्रत्ययात् अध्यासफलैवावस्थितेति स एव मुख्यः संबन्धः। अत एव — अत्यन्तभिन्नत्वेन वास्तविकतादात्म्याभावादेव प्रतीतौ शब्दवदर्थस्यापि विषयभावेनापेक्षणात् द्वयोरपि प्रतीतौ पारतन्त्र्यस्य समानत्वात् द्वयो राजभृत्ययोरिव शब्दार्थयोः संबन्ध इति व्यपदिश्यते। यद्यपि चेन्द्रियाणि कारकत्वादज्ञातान्येव ज्ञानं जनयन्ति, शब्दस्तु ज्ञापकत्वात् स्वज्ञानेनान्यधीहेतुः, तथापि पुरुषप्रयत्नानपेक्षा शक्तिः साधारणीति साम्यम्।

वाक्यपदीये अपभ्रंशविचारः[३७]

ननु लोकव्यवहारेऽर्थावगमाय शब्दप्रयोगः क्रियते। अपशब्देभ्यश्चार्थावगतिः साधुशब्दजायमानार्थावगत्यपेक्षयापि साधीयसी भवति। ततस्तेषामपि साधुशब्दवत् अर्थेन सह संबन्धः स्यात् इत्याशङ्क्याह —

असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः।

अयमर्थः — कैश्चित् विद्वद्भिः असाधुरपशब्दः अनुमानेन साधुशब्दानुमानद्वारा वाचकः इष्यते, न तु साक्षात्। तथा चावाचकत्वमपशब्दानामिति। अथवा शब्दापशब्दयोः उभयोरपि अव्यवहितार्थप्रत्ययानुसारेण वाचकत्वे तुल्येऽपि शास्त्रेण शब्दापशब्दप्रयोगेषु पुण्यपापयोः नियमः क्रियते। साधुशब्दप्रयोगे पुण्यम्, अतः साधव एव प्रयोक्तव्या नासाधव इति। असाधुशब्दप्रयोगे तु पापं पुण्याभाव

---

[३६] म.भा. सू. १.२.६४
[३७] वा.प. पृ. २७५

इति असाधवो याज्ञे कर्मणि न प्रयोक्तव्याः। लोकव्यवहारे तु असाधुशब्द-प्रयोगेऽपि न पापं किं तु पुण्याभाव इति यथेष्टं साधवोऽसाधवो वा शब्दाः प्रयोक्तव्याः इति। तथा च भाष्यम् — यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः ते तत्रभवन्तो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे पुनः कर्मणि नापभाषन्ते — इति।

अयं भावः — दैवी वागशक्तैः व्यवकीर्णा बालबधिरान्धादिभिस्तदनुमितमूल-प्रकृतिर्विदुषां वाचिका। यथा बालेन उच्चारितं गगरीशब्दं श्रुत्वा तत्सादृश्येन गर्गरीशब्दं तन्मूलप्रकृतिमनुमाय विद्वांसस्ततोऽर्थं प्रतियन्ति। न हि विद्वांसोऽ-पशब्दादर्थं साक्षादवच्छन्ति। अतो नापशब्दानामर्थेन सह कश्चित् संबन्धः। अत एव पुराकल्पे अनृतादिभिरिवापभ्रंशैरपि रहिता वागासीदिति ब्रह्मकाण्डे उक्तम् —

"दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः।
अनित्यदर्शिनां त्वस्मिन् बुद्धिविपर्ययः"। १५४।

इति। अवाचका एवापभ्रंशाः, ते तु सादृश्यात् साधुशब्दमनुमापयन्ति, तेभ्योऽ-र्थसंप्रत्यय इति। तथा च संग्रहकारः – शब्दप्रकृतिरपभ्रंशः इति। अद्यत्वे तु अधर्मबाहुल्यात् अनृतादिवत् वाङ्मलानां रूढिः। तथा चाव्यवधानेनैव अपशब्देभ्योऽर्थप्रतीतौ "न म्लेच्छितवै, नापभाषितवै" "साधुभिर्भाषितव्यम्" इति शास्त्रप्रामाण्यात् साधूनामेव धर्माङ्गत्वमिति तदनुसृतिः शास्त्रेण।

किं च साधुशब्दः एकोऽभिन्नः। असाधुशब्दास्तु भिन्ना अनेके। तद्यथा पस्पशाह्निके भाष्ये — "एकस्य गोशब्दस्य बहवोऽपभ्रंशाः गावी गोणी गोता गोपोतलिका इत्येवमादयः" इति। तथा च किं साधुशब्दप्रकृतिकः असाधुशब्दः उत असाधुशब्दप्रकृतिकः साधुशब्दः इति संशये भेदस्याभेदपूर्वकत्वात् मतिभेद-प्रयुक्तानां पुरुषकल्पनानां विविधानामनियमेन पुरुषमतिविकल्परूपाणामपशब्दा-नामनन्तत्वात् अभिन्नसाधुशब्दपूर्वकत्वमेवापशब्दानां निश्चीयते इति सिद्धम् अपशब्दाः साधुशब्दप्रकृतिका इति।

परमते यथा समवायः स्वसंबन्धिद्वयस्य परस्परं संबन्धकत्वेन संबन्धो भवति, तथा समवायस्य स्वसंबन्धिभ्यां सह संबन्धकं संबन्धान्तरं नास्तीति समवायस्य संबन्धत्वं संभवति। तस्य संबन्धान्तराभ्युपगमे तु अन्योन्याश्रयचक्रकानवस्थादयो दोषाः स्युरिति पूर्वं समवायस्य संबन्धत्वप्रत्याख्यानेनाभिहितप्रायम्। व्याकरण-दर्शने तु प्रतिपाद्यप्रतिपादकनियामिका योग्यतैव संबन्धः (किं बहुना! सर्वेषां संबन्धिनां ये केचन साक्षात् संबन्धाः संयोगसमवायादयः, ये च परस्परासंबन्धाः कार्यकारणभाव-विषयविषयिभाव-प्रतियोग्यनुयोगिभावनिरूप्यनिरूपकभाव-आधा-

राधेयभावादयः तेषां सर्वेषामपि नियामिका संबन्धिनां परस्परयोग्यतैव। योग्यता-रूपस्य तु संबन्धस्य नास्ति संबन्धान्तरापेक्षा। तदाह —

संबन्धशब्दे संबन्धो योग्यतां प्रति योग्यता।
समयात् योग्यतासंविन्मातापुत्रादियोगवत्। ३१।

संबन्धशब्दः स्वार्थं योग्यतालक्षणं संबन्धं योग्यतयैव संबन्धेन प्रतिपादयति। एवं समवायशब्दोऽपि अनादिसिद्धया योग्यतयैव स्वार्थप्रतिपादकः। एवं योग्यता स्वार्थं योग्यतयैव प्रतिपादयतीत्येवं सर्वेषु शब्देषु स्वार्थेन सह योग्यतारूपस्य संबन्धस्य व्याप्तिः व्यापकता बोध्या।

ननु यदा शब्दार्थयोः शक्तिः तदन्यो वा संबन्धः तदा वृद्धव्यवहारपरम्परा-रूपस्य समयस्य संकेतापरपर्यायस्य शब्दशक्तिग्रहे उपयोग इति वक्तुं शक्यते। यदा तु शब्दार्थयोः योग्यतालक्षणः संबन्धः तदा समयस्य कुत्रोपयोग इत्यत्राह — समयादिति।

समयात् प्रागुक्तलक्षणात् शक्तिज्ञानमिव अस्मद्दर्शने योग्यताज्ञानं भवति। सा च योग्यता शब्दार्थसंबन्धरूपा अनादिसिद्धा, न तु समयेन क्रियते। यथा "अस्य पुत्रस्य इयं माता" इति मातापुत्रयोः योगः जन्यजनकभावः समयेनानेन निश्चीयत एव, न तु क्रियते। वस्तुसिद्धस्यैव मातापित्रादियोगस्य समयेन प्रतिपादनादिति।

एतदुक्तं भवति — अनादिसिद्धार्थविषयकाभिधानव्यापारवतः शब्दस्य वृद्धव्य-वहारपरम्परापरपर्यायात् समयात् स्वाभाविक्येव योग्यता निश्चीयते। न तु समयमात्रात् तदर्थायोग्येऽपि शब्दे तथाभावः तदर्थयोग्यतारूपः पुरुषेच्छाप्रयुक्तेन पुरुषप्रयत्नरूपेण समयेन कर्तुं समुचितः। इति।

ननु प्रत्यक्षपूर्वकं संज्ञाकर्म इति स्मर्यते। भाविनमपि नामार्थं प्रत्यक्षी-कृत्य ज्योतिःशास्त्रेण हस्तरेखादिना अन्यैर्वा अङ्गलक्षणैः निश्चित्य पित्रा जातस्य पुत्रस्य एकादशेऽहनि नाम क्रियत इति तदर्थः। तदुक्तं कविभिः —

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः।
निरीक्ष्य धातोर्गमनार्थमर्थवित् चकार नाम्ना रघुमात्मसंभवम्।।[३८] इति।

भागवतेऽपि अभिमन्युपुत्रस्य भगवता अश्वत्थामास्त्रात् त्रातस्य परीक्षित इति, देवरात इति संज्ञा समयकृतैव। तथा च अस्मद्विशिष्टानां पित्रादीनामस्माकं नामार्थे तत्तच्छब्दनियोगः सामयिकः — समयकृत इति चेत् — मैवम्।

---

[३८] रघुवंश ३.२१

अस्मद्विशिष्टैरपि संभावितभावियोग्यतानुसारेण पूर्वाभ्यासात् = रघुरामादि-चरितश्रवणाभ्यासजनितसंस्कारात् स्वपुत्रेऽपि पूर्वरघ्वादिष्विव रघुरामादिशब्दस्य निवेशात्। एवं च नास्मद्विशिष्टसमयकृतः स्वपुत्रे रघ्वादिपदप्रयोग इति सिद्धम्। किं च रघुरामादिगुणानामसतामपि स्वपुत्रे रागात् समारोपादपि रघुरामादिशब्द-प्रयोगोऽसामयिकोऽपि संभवति। समयलक्षणं तूक्तं प्राक् द्वितीयकाण्डे — "अना-गमश्च सोऽभ्यासः समयः कैश्चिदिष्यते।"[३९]

अस्यार्थः — किं च "किं भवानाह" इति अर्थमात्राविनाभावमवगत्य विशेषप्रश्नादवधार्यते अविदितसंकेतानपि प्रति शब्दस्य योग्यता। अर्थसामान्यज्ञानं विना विशेषप्रश्नानवतारात्। किं च, पुरुषेण अन्यत्र = स्वपुत्रादौ गवादिपदस्य संकेते कृतेऽपि प्ररूढे सास्नादिमत्यर्थे गवादिशब्दात् झटिति प्रतिपत्तिः भवति। तया च गवादिपदस्य प्ररूढ एवार्थे योग्यता निश्चीयते, न तु सामयिकेऽर्थे। किं च न हि शब्दस्यायोग्येऽर्थे नियोगः = समयः संकेतः शक्यः कर्तुमिति वक्ष्यति।
पूर्वं शब्दार्थयोर्योग्यतां संबन्धमुक्त्वा इदानीं कार्यकारणभावं संबन्धमाह —

शब्दार्थयोः कार्यकारणभावसंबन्धः इति मतम्[४०]

शब्दः कारणमर्थस्य स हि तेनोपजन्यते।
तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते। ३२।

श्रोतृबुद्धिस्थस्यार्थस्य शब्दः पूर्वं संकल्पात्मना वक्तृबुद्धौ स्थितः वक्त्रा स्थान-करणव्यापारैः अभिव्यञ्जितः श्रोतृश्रुतिविषयमनुप्राप्तः कारणम्, जनकत्वात्। शब्दार्थो ह्यर्थो बहीरूपतयावसीयमानः। वक्तृबुद्धिनिवेशिनः अर्थात् कारणभूतात् शब्दः श्रुतिविषयमनुप्राप्तः प्रतीयत इति अर्थोऽपि शब्दस्य कारणम्। एवं च शब्दार्थयोः द्वयोरपि परस्परं प्रति कार्यत्वं कारणत्वं च सिध्यति।

अयं भावः — वक्त्रा स्थानकरणैरभिव्यञ्जितः अत एव श्रोतुः श्रुतिविषयतामुपगतः अत एव श्रोतृबुद्ध्युपारूढः शब्दः श्रोतृबुद्ध्युपारूढस्यार्थस्य कारणम्। अन्वयव्यतिरेकाभ्यां सामानाधिकरण्येन च जनकत्वनिश्चयात्। यतो बहीरूपतया बाह्यार्थतादात्म्येनाध्यस्यमानः बौद्ध एवार्थः शब्दार्थः। तस्य बुद्धिस्थात् शब्दात् प्रत्ययानुपपत्तेः। अन्यच्च — शब्दस्य प्रयोगात् प्राक् विवक्षादशायां संकल्पात्मना वक्तृबुद्धिस्थात् शब्दशबलात् अर्थात् शब्दस्य उपादानकारणभूतात् स्थानकरणाभिघातरूपं निमित्तं सहकारीकृत्य जनितः शब्दः स्वोपादान-

---

[३९] वा.प. २.११८
[४०] वा.प. २८०

सहकारिकारणगतशक्तिवैजात्येन विद्युदादिप्रकाशवत् विजातीयवेगप्रचयधर्मा श्रोतृ-श्रुतिदेशमुपागतः श्रोतृबुद्धिस्थः श्रोत्रा प्रतीयत इति रीत्या अर्थोऽपि शब्दस्य कारणम्। एवं च शब्दार्थयोरुभयोरपि परस्परं कार्यत्वस्य कारणत्वस्य च वर्णनात् धूमाग्न्योः कार्यकारणभावापेक्षया वैलक्षण्येन शब्दार्थयोः अभेदेन संबन्धः तादात्म्याध्यासलक्षणः प्रतिपादितो भवति।

तथा हि उच्चारणात् प्राक् वक्तृबुद्धौ शब्दार्थयोः अभेदेनावस्थानम्। न हि तदानीं विवक्षितोऽर्थः शब्दसंमिश्रण (संभेद) रहितः। किं तु दुग्धजलवत् शब्दशबल एव। अन्तःसंजल्परूपस्य तस्यार्थस्य प्रतिभानात्। अनादिशब्द-भावनानुविद्धं हि तिरश्चां ज्ञानम्। अत एव वक्तुः स्थानकरणाभिघातरूप-व्यापारदभिव्यक्तोऽर्थस्वरूपसंमिश्रः शब्दः श्रोतृश्रुतिदेशमुपागतः श्रोतृभिः तथैव अर्थस्वरूपाच्छुरितः = अर्थस्वरूपसंमिश्रित एव अवधारितः सन्नर्थमवगमयति। प्रतिपाद्यप्रतिपादकयोर्हि = श्रोतृवक्त्रोर्हि परस्पराभिप्रायसंक्रमणं व्यवहार इति शब्दसंभिन्नतारूपां मूलावस्थां प्राप्य वक्तृबुद्धिस्थितमर्थं स्थानकरणाभिघातज-शब्दावस्थामवाप्य मूलावस्थातः परिमुक्तं वक्तृबुद्धिसमाविष्टमेवार्थं श्रोतृबुद्धौ शब्दः समर्पयति नान्यत्। श्रोतापि च समाविष्टतच्छब्दभावन एव तथैव स्ववासना-विकासानुसारेणार्थं प्रतिपद्यते। तेन च वक्तुः प्रतिपादनेन उद्बोधितशब्दवासनः श्रोता वाक्यार्थावगमपुरस्सरं गवानयनादिरूपे व्यवहारे प्रवर्तत इति।

तत्तच्छब्दतत्तदर्थवासनाशून्यानां तु न तत्तच्छब्दात् तत्तदर्थावसायः। अत एव संस्कृतभाषातो नेतरभाषामात्रविदां बोधः, तेषां संस्कृतशब्दतदर्थवासनाशून्यत्वात्।

तदेवं शब्दार्थयोः संबन्धविषये एकपक्षीभाव एव = तादात्म्याध्यासलक्षण एक एव संबन्ध इति पक्ष एव ऐकमत्येन वैयाकरणसिद्धान्तानुगुणः। न तु तयोः योग्यता संबन्धः कार्यकारणभावो वा तादात्म्याध्यासलक्षण इत्यनेके पक्षाः।

मीमांसकमतेन शब्दार्थसंबन्धनिरूपणम्

तत्र जैमिनिसूत्रप्रदर्शनम्

"औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्"[४१] इति जैमिनिः सूत्रयाम्बभूव। तत्र भाष्यम् — "औत्पत्तिक इति नित्यं ब्रूमः। उत्पत्तिर्हि भाव उच्यते लक्षणया। अवियुक्तः

---

[४१] मी.सू. १.१.५

शब्दार्थयोर्भावः संबन्धः, नोत्पन्नयोः पश्चात् संबन्धः। औत्पत्तिकः शब्दस्यार्थेन संबन्धः तस्य अग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तं प्रत्यक्षादिभिः अनवगतस्य। कथम्। उपदेशो हि भवति। उपदेश इति विशिष्टस्य शब्दस्योच्चारणम्'' इति। वेदस्यापौरुषेयत्वस्थापनाय शब्दार्थसंबन्धस्य नित्यत्वमनेन सूत्रेण स्थाप्यते। तथा हि त्रेधा ह्यत्र पुरुषानुप्रवेशः संभाव्यते पदपदार्थसंबन्धद्वारेण वाक्यवाक्यार्थ-संबन्धद्वारेण वेदाख्यग्रन्थस्यैव भारतादिवत् पौरुषेयत्वाद्वा। न त्वेतत्त्रयमप्यत्रास्ति। पदपदार्थसंबन्धस्य नित्यत्वमस्मिन् सूत्रे औत्पत्तिकशब्देनोक्तम्। वाक्यार्थज्ञानस्य पदार्थमूलकत्वं वेदस्यापौरुषेयत्वं चोपरिष्टात् भाष्यकारो वक्ष्यति।

अत्र शब्दार्थयोः नित्यत्वेनाभिमतः संबन्धः कः इति जिज्ञासायां भाष्यकार आह[४२] — स्यादेतदेवम्। नैव शब्दस्यार्थेन संबन्धः कुतोऽस्य पौरुषेयताऽ-पौरुषेयता वेति। कथम्। स्याच्चेदर्थेन संबन्धः क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणे स्याताम्, यदि संश्लेषलक्षणं संबन्धमभिप्रेत्योच्यते। कार्यकारण-निमित्तनैमित्तिकाश्रयाश्रयिभावादयस्तु संबन्धाः शब्दस्यानुपपन्ना एवेति। उच्यते। यो ह्यत्र व्यपदेश्यः संबन्धः तमेकं न व्यपदिशति भवान् प्रत्याय्यस्य प्रत्यायकस्य च यः संज्ञासंज्ञिलक्षण इति — इदं भाष्यमेवं व्याख्यातं पूर्वसूरिभिः —

न शब्दोऽर्थेन संयुक्तः, तद्देशानन्तरदेशेऽदृश्यमानत्वात् हिमवतोऽनन्तरदेशेऽ-दृश्यमानविन्ध्यवत्। एवं च धर्मिणः संबन्धस्यैव गगनकुसुमायमानतया तस्य नित्यत्वानित्यत्वरूपधर्मविचारः दूरापास्त इति शङ्कते — कुत इति। उक्त-हेतोरसिद्धिं मन्वानः शङ्कते — कथमिति। असिद्धिं परिहरन्नाह — स्याच्चेदर्थेन संबन्ध इत्यादिना। उच्चार्यमाणक्षुरमोदकशब्ददेशे मुखे पाटनपूरणयोस्तदर्थ-कार्ययोरनुपलभ्यमानत्वात् शब्ददेशानन्तरदेशेऽर्थस्यादृश्यमानत्वमित्यर्थः। इदं चा-पादनं संयोगसंबन्धमभिप्रेत्येत्याह — यदीत्यादिना। संयोगव्यतिरिक्तानां संबन्धा-न्तराणामसंभवमाह — कार्यकारणेत्यादिना। शब्दार्थयोर्द्वयोरपि नित्यत्वाङ्गीकारात् न कार्यकारणभावः निमित्तनैमित्तिकभावो वा संबन्धः। घटादिशब्दस्याकाशाश्रय-कत्वात् अर्थस्य घटादेः पृथिव्याद्याश्रयकत्वात् न शब्दार्थयोराश्रयाश्रयिभावः इति भावः। तर्हि नास्ति संबन्ध इत्यपि वक्तुं न शक्यते। संबन्धाभावे घटादिपदात् पटाद्यर्थस्यापि प्रतीत्यापत्तेः।

अस्मिन्नर्थे समाधानमुक्तं — उच्यते इत्यादिना। संज्ञासंज्ञिलक्षण इति। वाच्य-वाचकभाव इत्यर्थः। अयमाशयः — संयोगादीनां संबन्धान्तराणामसंभवेऽपि ''शब्देनार्थमभिधत्ते'' इत्यादिव्यवहारात् अर्थप्रतीत्युद्देश्यिकायां शब्दकरणिकायाम्

---

[४२] १.१.५, पृ.५२

अभिधानक्रियायां शब्दज्ञानरूपायाम् तज्जन्यप्रतिपत्तिरूपफलशालित्वेन यत् कर्मत्वं वाच्यत्वरूपमर्थस्य, तस्यामेव क्रियायां यत् करणत्वं वाचकत्वरूपं शब्दस्य तादृशो वाच्यवाचकभाव एव शक्तिरूपः शब्दार्थयोः संबन्धः इति।

अथ अलंकारशास्त्रोक्तरीत्या शक्तिविचारः

नैयायिकवत् ईश्वरसंकेतः शक्तिरित्येव आलंकारिकाणां मतमिति प्रतीयते। पदानां कुत्र शक्तिरिति विषये काव्यप्रकाशकाराः प्राहुः — शब्दस्तावत् वाचको लक्षको व्यञ्जकश्चेति त्रिविधः। अर्थोऽपि वाच्यः लक्ष्यः व्यङ्ग्यश्चेति त्रिविधः। वाचकस्य लक्षणम् —

साक्षात् संकेतितं योऽर्थमभिधत्ते स वाचकः इति। यस्य शब्दस्यार्थे संकेतो न ज्ञातः तस्मात् शब्दात् अर्थप्रतीतेरनुत्पत्त्या संकेतग्रहसहाय एव शब्दः अर्थविशेषं प्रतिपादयति। अतः यस्य शब्दस्य यस्मिन्नर्थेऽव्यवधानेन संकेतो गृह्यते स शब्दस्तस्यार्थस्य वाचकः।

अत्र व्याख्यातारः — चेष्टायामर्थप्रतिपादिकायामतिव्याप्तिवारणाय यः शब्द इति। माधुर्यादिव्यञ्जकस्पर्शादिवर्णेऽतिव्याप्तिवारणाय संकेतितमिति। न च संकेत-विशेषणं साक्षात् इत्यधिकमिति वाच्यम्। वटादिनामा प्रधानवृक्षो यत्र स ग्रामोऽपि तन्नामा, यथा वटो ग्राम इत्यादि वडगांव इति पुण्यपत्तने प्रसिद्धः। तत्र वटादिनामकवटादियोगिनि ग्रामे प्रतिपाद्ये वटादिपदे लाक्षणिकेऽतिव्याप्तिवार-कत्वात्। तत्र वटादियोगिनि ग्रामे शक्यसंकेतव्यवहितसंकेतसत्त्वात्। व्यवहितत्वं च शक्यसंकेतग्रहप्रयोज्यग्रहविषयत्वम्। स च संकेत इत्थम् — वृक्षविशेषो वटपदाद् बोद्धव्यः, तद्योगी ग्रामश्च तत्पदात् बोद्धव्य इति।

न च तत्र शक्तिरेव, वटादिपदात् ग्रामविशेषत्वेन प्रतीतेः, अन्यथा तद्वृक्षनाशे तत्प्रतीत्यनापत्तेरिति वाच्यम्। वटादियोगिनि ग्रामे वटादिपदप्रयोगस्य लक्षणयैवो-पपत्तेः। तद्वृक्षनाशेऽपि "सांप्रतिकाभावे भूतपूर्वगतिः" इति न्यायेन भूतपूर्व-शक्यसंबन्धेनापि तत्प्रतीत्युपपत्तेर्न शक्तिकल्पना। तदुक्तम् —

"तद्वृक्षच्छेदेऽपि यथाकथंचित् शक्यसंबन्धोऽस्त्येव। तादृशस्यैव लक्षणा-प्रयोजकत्वात्" इति। न च साक्षात्संकेतितवान् वाचक इत्येतावतैव सुस्थत्वे अभिधत्ते इत्यस्य वैयर्थ्यमिति वाच्यम्। वक्ष्यमाणे "भद्रात्मनः" इत्यादा-वुदाहरणेऽभिधामूलव्यञ्जके संयोगादिना अभिधायां नियमितायां द्वितीयवाच्यार्थ-व्यञ्जकतादशायामतिव्याप्तिवारणार्थत्वात्। न च तथापि तत्रातिव्याप्तिरेवेति

वाच्यम्। यथाश्रुतलक्षणसत्त्वे यस्य शब्दस्य यदा यस्मिन् काले स तदर्थवाचकः इति हि लक्षणार्थः संपद्यते इत्यतिव्याप्तेरभावात्।

इदं च यत्राव्यवधानेन संकेतो गृह्यते इत्यादिवृत्तिदर्शनात् संकेतविशेषणतया साक्षात्पदं व्याख्यातम्।

वस्तुतस्तु संयोगादिना अभिधायां नियमितायां यत्र शक्यान्तरध्वननं तत्र भद्रात्मन इत्यादौ वाचकत्वं मा प्रसाङ्क्षीदिति अभिधानक्रियाविशेषणं साक्षादिति। तत्र तु वाक्यार्थप्रतीतिव्यवधानेन तत्प्रतीतिरित्यप्रसङ्गः। संकेतितमिति तु साक्षादेव माधुर्यादिव्यञ्जके स्पर्शादिवर्णेऽतिव्याप्तिवारणायेत्युक्तमेव। संकेतितमित्यनेनैव वटादियोगिग्रामबोधकवटादिपदे नातिव्याप्तिरिति प्रदीपोद्योतप्रभासु स्पष्टम्।

तत्र संकेतितोऽर्थस्तावत् चतुर्विधः जाति-गुण-क्रिया-यदृच्छारूपः। इदं महाभाष्यकारमतम्। अथवा संकेतितोऽर्थो जातिरेव इति मीमांसकमतम्।

नन्वानयनादिव्यवहारः शक्तिग्राहकः, स च व्यक्तावेवेति तत्र शक्तिर्युक्ता न तु जात्यादाविति चेत् — न। व्यक्तिशक्तिवादे हि किं सर्वासु गोव्यक्तिषु संकेतग्रहः गोपदजन्यशाब्दबोधकारणम्, उत कस्यांचिदेकव्यक्तौ। नाद्यः, गोव्यक्तीनामनन्तत्वेन एकदा उपस्थित्यसंभवेन तासु संकेतस्य ग्रहीतुमशक्यत्वात्। न द्वितीयः, व्यभिचारात्। व्यभिचारो नाम — यस्यां गोव्यक्तौ संकेतग्रहः स्वीकृतः तदतिरिक्तायाः गोव्यक्तेः गोशब्दात् भानं न स्यात्। अतः शक्तिग्रहाविषयस्यापि भानस्वीकारे व्यतिरेकव्यभिचार इति।

तस्मात् न व्यक्तौ शक्तिः, अपि तु व्यक्त्युपाधौ जातिगुणादावेव शक्तिः। किं च व्यक्तिशक्तिपक्षे व्यक्तेरेव प्रवृत्तिनिमित्तत्वेन तस्याश्च एकत्वेन गौः शुक्ल चलः डित्थः इत्यादौ विषयविभागः — प्रवृत्तिनिमित्तभेदो न स्यात्। तदभावे च घटकलशादिपदानामिव गौः शुक्ल इत्यादिपदानामप्येकार्थवाचकत्वेन पर्यायतया सहप्रयोगो न स्यात्। तस्मात् उपाधौ जात्यादावेव संकेतः।

उपाधिः वस्तुधर्मः	वक्तृयदृच्छासंनिवेशितः (डित्थादि)
सिद्धः	साध्यः (क्रिया)
प्राणप्रदः (जातिः)	विशेषाधानहेतुः (गुणः)

उपाधिश्च द्विविधः — वस्तुधर्मः वक्तृयदृच्छासंनिवेशितश्च। वस्तुनि व्यक्तौ समवेतो धर्मः जातिगुणक्रियारूपः वस्तुतधर्मः। वक्त्रा यदृच्छया स्वेच्छया संनिवेशितः तत्तद्धर्मिणि स्थापितः डित्थादिनामरूपः वक्तृयदृच्छासंनिवेशितः।

वस्तुधर्मोऽपि द्विविधः — सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। प्राणनं प्राणः व्यवहारयोग्यता तत्प्रदः तन्निर्वाहक इत्यर्थः। सजातीयेभ्यो व्यावर्तनं विशेषः तस्य आधानं प्रत्ययः तद्धेतुः। तत्र आद्यो जातिः। जातेः प्राणप्रदत्वमुक्तं वाक्पदीये —

"न हि गौः स्वरूपेण गौः नाप्यगौः गोत्वाभिसंबन्धात्तु गौः" इति। तस्यायमर्थः गौः — गोपदोद्देश्यो धर्मी। स्वरूपेण जातिरहितव्यक्तिमात्रेण, अज्ञातगोत्वकेन धर्मिस्वरूपमात्रेण वा, न गौः — न गौरिति व्यवहारविषयः। अन्यथा घटोऽपि गौः स्यात् स्वरूपाविशेषात्। नाप्यगौः — नापि अगौरिति व्यवहारविषयः। तथा सति गौरप्यगौः स्यात्। गोत्वाभिसंबन्धात् — गोत्वान्वयज्ञानात् गौः — गौरिति व्यवहारविषयः। व्याख्यातं चेदं वाक्यं रसगङ्गाधरकारेणापीत्थमेव।

द्वितीयो विशेषाधानहेतुः शुक्लादिगुणः। लब्धसत्ताकं — जात्या प्राप्तव्यवहार-योग्यताकं वस्तु व्यक्तिः शुक्लादिना विशिष्यते — सजातीयेभ्यो व्यावर्त्यते। अत्र लब्धसत्ताकमित्यनेन उत्पन्नस्य द्रव्यस्य पश्चात् गुणेन योगः इति दर्शितम्। एवं चोत्पन्नस्य द्रव्यस्य क्षणमेकं निर्गुणत्वम्। जातियुक्तद्रव्यस्यैवोत्पत्तिः।

"जन्मना जायते जातिः" इत्यभियुक्तोक्तेः। अतो जातिगुणयोर्महान् भेद इति टीकाकाराः।

प्रदीपकारास्तु- यद्यपि शुक्लादिगुणस्य नित्यत्वाभ्युपगमे गोत्वादिना समकाल-मेव संबन्धित्वम्। तथापि शुक्लादिगुणस्य संबन्धः कदाचित् अपैत्यपि, न तु गोत्वादेरिति जातिगुणयोर्भेदः — इत्याहुः।

अत एव "वोतो गुणवचनात्"[४३] इति सूत्रे महाभाष्ये गुणलक्षणमुक्तम् —

सत्त्वे निविशतेऽपैति पृथक् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः।

इति। सत्त्वं द्रव्यम्। सत्त्वे एव निविशते इति सावधारणं व्याख्येयम्। सत्त्वमेवाश्रयत इत्यर्थः। एतेन जातिर्व्यावर्त्यते। सा हि न केवलं द्रव्ये वर्तते, अपि तु द्रव्यगुणकर्मसु। ननु द्रव्ये एव द्रव्यत्वं वर्तत इति तत्रातिव्याप्तिः, अत आह- अपैतीति। अपगच्छतीत्यर्थः। अर्थात् सत्त्वादेव। यथा फलादेः पीततायां जातायां नीलता अपगच्छति। नैवं द्रव्यत्वं द्रव्यात् अपैति। एवमपि गोत्वं गोषु वर्तते, अश्वादेश्चापैति इति तत्र अतिव्याप्तिरित्यत आह — पृथग्जातिषु दृश्यत इति। भिन्नजातीयेषु द्रव्येषु दृश्यत इत्यर्थः। गोत्वं हि द्रव्यत्वावान्तरनानाजातिषु न

---

[४३] पा.सू. ४.१.४४

दृश्यते, गुणस्तु दृश्यते। यथा, अभ्रे दृष्टा नीलता तृणादिष्वपि दृश्यते। एतेन पूर्वार्धेन सकलजातिव्यवच्छेदः।

एवं तर्हि क्रिया द्रव्ये वर्तते, ततोऽपैति, पृथग्जातिषु दृश्यते चेति तत्रातिव्याप्तिः, अत आह — आधेयश्चाक्रियाजश्चेति। आधेयः उत्पाद्यः। यथा घटादेः पाकजो रूपादिः। अक्रियाजः — अनुत्पाद्यः। यथा आकाशादेर्महत्त्वादिः। क्रिया तु सर्वाप्युत्पाद्यैवेति तस्याः द्वैविध्याभावात् गुणत्वाभावः। एवमपि द्रव्यस्य गुणत्वं प्राप्नोति। अवयविद्रव्यं हि अवयवद्रव्येषु निविशते। असमवायिकारणसंयोगनिवृत्तौ विनाशात् ततोऽपैति। भिन्नजातीयेषु च हस्तपादादिषु दृश्यते। द्विविधं च भवति नित्यानित्यभेदेन। निरवयवस्य द्रव्यस्य आत्मपरमाण्वादेर्नित्यत्वात्, अवयविद्रव्यस्य तु घटादेः अनित्यत्वात्, अत आह — असत्त्वप्रकृतिरिति। अद्रव्यस्वभाव इत्यर्थः। अत्र पृथग्जातिषु इत्यसमासः। समासे हि 'जात्यन्ताच्छ बन्धुनि'[४४] इति छः प्रसज्येत। तत्र व्यक्तिषु जात्याधारेषु पदार्थेषु दृश्यमानः जातिषु दृश्यत इत्युच्यत इति तत्त्वबोधिन्यां कैयटे च स्पष्टम्।

साध्यः पूर्वापरीभूतावयवः क्रियारूपः। साध्यः उत्पाद्यमानः पूर्वापरीभूताः क्रमिकाः अवयवाः एकदेशाः अधिश्रयणादयोऽवतारणान्ताः यस्य तथा भूतः। बौद्धः अधिश्रयणाद्यवतारणान्तव्यापारसमूहो हि पाकक्रिया। विक्लित्त्यनुकूलत्वेन तेषामनुगमान्न नानार्थता। तत्र सर्वप्रागभावे भविष्यत्त्वम्। सर्वध्वंसे भूतत्वम्। कस्यचित् वर्तमानत्वे वर्तमानत्वम्। एवं च भासमानपौर्वापर्यकावयवकत्वसमानाधिकरणो धर्मविशेषः साध्यत्वम्। क्रियारूप इति। धातुवाच्य इति यावत्। तथा च पचादीनां धातूनां क्रियायां शक्तिः। डित्थडवित्थादयः आधुनिकसंकेतिताः संज्ञाशब्दाः यदृच्छाशब्दाः।

"चतुष्टयी शब्दानां प्रवृत्तिः — जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चतुर्थाः इति महाभाष्यम् ऋलृक्सूत्रे दृश्यते। शब्दानामर्थे या प्रवृत्तिः सा प्रवृत्तिनिमित्तभेदात् प्रकारचतुष्टयवतीत्यर्थः। अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स यदृच्छाशब्दो डित्थादिः इति कैयटः। तत्र यदृच्छाशब्दो नाम वक्त्रा स्वेच्छया संनिवेशितः इति उद्योतः।

"डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषु उपाधित्वेन संनिवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मकः" इति काव्यप्रकाशकाराः।

---

[४४] पा.सू. ५.४.९

अत्र गुणक्रियायदृच्छानां जातिवत् एकत्वमाश्रित्य प्रवृत्तिनिमित्तत्वमुक्तम्। तेषामाश्रयभेदेन भेदे तु तत्रापि जातिरेव प्रवृत्तिनिमित्तमिति सर्वेषां जाति-शब्दत्वमेव। तदाहुः प्रकाशकाराः —

गुणक्रियायदृच्छानां वस्तुत एकरूपाणामपि आश्रयभेदात् भेद इव लक्ष्यते। यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात्। हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिः तत् शुक्लत्वादि सामान्यम्। गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि। बालवृद्ध-शुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थ-त्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये। तद्वान् जातिमान् अपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम् — इति।

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते। स साक्षात् संकेतितः मुख्योऽर्थ इत्युच्यते। अस्य शब्दस्य, तत्र साक्षात् संकेतितेऽर्थे मुख्यो व्यापारः अभिधेत्युच्यते। एतदुक्तं भवति — स इत्यवधारणगर्भं पदम्। साक्षात् संकेतित एवार्थो मुख्यः, मुख्यत्वेन प्रसिद्धः। प्रथमं प्रतीयमानत्वेनैवार्थस्य मुख्यत्वोपपत्तिः। तथा हि — शब्दव्यापारात् योऽर्थोऽव्यवधानेन गम्यते सोऽर्थो मुख्यः। स हि यथा सर्वेभ्यो हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते तथा सर्वेभ्यः लक्ष्यव्यङ्ग्य-तात्पर्यरूपेभ्यः प्रतीयमानेभ्योऽर्थः पूर्वमवगम्यते। तस्मात् मुखमिव मुख्य इति "शाखादिभ्यो यः"[४५] इति सूत्रेण यत्प्रत्ययः। एवं मुख्यार्थविषयकः शब्दोऽपि मुख्यः।

तथा शक्त्यपरपर्यायः संकेतितार्थबोधजनको व्यापारोऽभिधा। संकेतश्च शक्ति-ग्राहकः समयः। स च अस्मादयमर्थो बोद्धव्य इत्याकारकः इत्युद्योतः। अत एव "नाभिधा समयाभावात्"[४६] इति तयोर्भेदेन निर्देशः इत्याहुः।

शक्तिग्रहोपायाः

व्याकरणम्, उपमानम्, कोशः, आप्तवाक्यम्, वृद्धव्यवहारः, वाक्यशेषः (अर्थ-वादः) विवरणम्, प्रसिद्धपदसांनिध्यं च शक्तिग्रहोपायाः। तदुक्तम् —

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः।।" इति।

---

[४५] पा.सू. ५.३.१०३
[४६] का.प्र. २४

धातुप्रातिपदिकादीनां अर्थविशेषे शक्तिग्रहः व्याकरणात् भवति। "भू सत्तायाम्" इत्यादिः धातुपाठः धातोः भ्वादेः सत्ताद्यर्थे शक्तिग्राहकः। पाचकादिप्रातिपदिकस्यापि व्याकरणात् शक्तिग्रहो भवति। पचधातोः पाकार्थकत्वस्य तदुत्तरकृत्प्रत्ययस्य कर्त्रर्थकत्वस्य च तत्र प्रतिपादनात्। आदिना समासादिवृत्तीनां संग्रहः। "वर्तमाने लट्"[४७] इत्यादिकमपि प्रत्ययस्यार्थविशेषे शक्तिग्राहकम्।

गवये गोसादृश्यदर्शनरूपात् उपमानात् अतिदेशवाक्यार्थस्मृतिद्वारा गवयो गवयपदवाच्य इति यत् शक्तिज्ञानं जायते तत् उपमानाच्छक्तिग्रहस्योदाहरणम्। "विष्णुर्नारायणः कृष्णः" इत्यादिकोशात् शक्तिग्रहः।

एवमाप्तवाक्यादपि शक्तिग्रहः। यथा कोकिलः पिकपदवाच्य इत्याद्याप्तोच्चरितवाक्यात् पिकादिशब्दानां कोकिलादौ शक्तिग्रहो भवति।

एवं व्यवहारादपि यथा — प्रयोजकवृद्धेन घटमानयेति वाक्यमुक्तं श्रुत्वा प्रयोज्यवृद्धेन घट आनीतः, तद् दृष्ट्वा पार्शस्थो बालः घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति। ततश्च घटं नय, गां बधान इत्यादिवाक्यात् घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति। व्यवहारः शब्दप्रयोगः प्रवृत्तिनिवृत्ती च।

एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवशब्दं दीर्घशूकविशेषे आर्याः प्रयुञ्जते, कङ्गौ तु म्लेच्छाः। तत्र कुत्र शक्तिरिति संदेहे —

"यत्रान्या ओषधयो म्लायन्ते अथैते मोदमानाः इवोत्तिष्ठन्ति"

"वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च शोभन्ते यवाः कणिशशालिनः।।"

वाक्यशेषात् दीर्घशूके धान्यविशेषे शक्तिर्निर्णीयते। कङ्गौ तु शक्तिभ्रमात् प्रयोगः।

एवं "स्वर्गकामो यजेते"ति विधिवाक्यस्थस्वर्गशब्दस्य

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्।।"

इत्यर्थवादात् दुःखामिश्रसुखविशेषे शक्तिग्रह इति मणिकाराः।

एवं विवरणादपि शक्तिग्रहः। विवरणं नाम तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यत्र कलशोऽस्तीत्यनेन विवरणेन घटशब्दस्य

---

[४७] पा.सू. ३.२.१२३

कलशे शक्तिग्रहः। एवं पचति इत्यस्य पाकं करोतीति विवरणेन आख्यातस्य यत्ने शक्तिग्रहः।

एवं प्रसिद्धपदस्य सांनिध्यादपि शक्तिग्रहः। यथा — इह सहकारतरौ मधुरं पिको रौति इत्यादौ पिकशब्दस्य कोकिले शक्तिग्रह इति।

लक्षणानिरूपणम्

मणिग्रन्थानुसारेण लक्षणानिरूपणम्

आदौ मणिग्रन्थानुसारेण लक्षणा निरूप्यते — संकेत एव मुख्या वृत्तिः। तात्पर्यनिर्वाहकत्वात्। लक्षणा च वृत्त्यन्तरम्। यत्र वाच्यार्थान्वयानुपपत्त्या वाच्य-संबन्धोपस्थापिते वाक्यार्थान्वयः, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे। तदुच्यते —

वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते। इति।

लक्षणास्थले शक्त्या निर्वाह इत्याक्षेपः

अथ तीरे शक्तिरेव। शक्तिग्राहकस्य व्यवहारस्य मुख्यलक्ष्यसाधारणत्वात्, पदानां संभूय वाच्यार्थान्वयबोधकत्वमिति व्युत्पत्तेः। लाक्षणिकत्वे तु अनानु-भावकतया तद्भङ्गप्रसङ्गात्। किं च पदानि स्वजन्योपस्थितिद्वारा अन्वयबोध-जनकानि। उपस्थितिश्च शक्तिसाध्येति तीरस्य शक्त्या उपस्थितिं विना इतर-पदार्थेनान्वयो दुर्घटः। अन्यथा तीरे शाब्दत्वं तात्पर्यं च न स्यात्, तयोः शक्तिनियतत्वात्।

किं च तीरे यदि तात्पर्यं निश्चितं तदा तात्पर्यनिर्वाहकत्वेन शक्तिरेव कल्प्या, क्लृप्तत्वात्। तथा च गङ्गादिपदानां प्रवाहतीरादिनानार्थशक्तत्वमेव युक्तम्, अक्षादि-पदवत्। अतो लक्षणाख्यं वृत्त्यन्तरं न कल्पनीयम्।

तस्य समाधानम्, तात्पर्यज्ञानस्योपयोगश्च

उच्यते। गङ्गापदस्य लक्षणीयतीरादिसहस्रेषु शक्तिकल्पने तद्ग्रहार्थं लक्षणीयेषु प्रत्येकं वृद्धव्यवहारान्तरापेक्षा स्यात्। तथा च गौरवम्, अननुभवश्च। लक्षणा तु अनेकेष्वर्थेषु शक्यसंबन्धरूपा एका लक्षणीयविषयकवृद्धव्यवहारान्तरनिरपेक्षा चेति सैव लाघवात् युक्ता।

न च लक्षणीयेष्वनेकेष्वर्थेषु शक्तिकल्पने गौरवं न्याय्यम् एव, प्रामाणिकत्वात्। लक्ष्यत्वाभिमतार्थान्वयबोधस्य शक्तिं तद्ग्रहं वा विनानुपपत्तेः इति वाच्यम्। शक्तिं विनापि तीरान्वयबोधोपपत्तेः। तथा हि — व्युत्पन्नः आप्तत्वेन निश्चितस्य पुरुषस्य "गङ्गायां घोषः प्रतिवसति" इति वाक्यं श्रुत्वा विमृशति — इदं वाक्यं प्रमाणम् आप्तोक्तत्वात् — वाक्यार्थश्च संभवत्येव — यथा "वस्त्रेण पिधेहि" इत्यत्र कर्मणि द्वारेऽध्याहृते योग्येन तेन साकम् इतरपदैः स्वार्थान्वयो बोध्यते, तथा शक्त्या गङ्गापदेन स्मारितो यो मुख्यार्थः प्रवाहः तेन स्वसंबन्धात् स्मारिते योग्ये आकाङ्क्षिते च तीरे इतरपदैः स्वार्थान्वयबोधः अत्रापि संभवति — इति। ततः मुख्यार्थस्मारिते तीरे घोषादिपदैः स्वार्थान्वयबुद्धिः तस्य जायते। एवं तीरान्वित-वाक्यार्थबुद्धिः तीरनियतवृद्धव्यवहारादिदर्शनं विनैव जायते। पदानां स्मृतेन योग्येनार्थेन अन्वितस्य स्वार्थस्य प्रतिपादने व्युत्पन्नत्वात्। एवं तीरस्मृत्यनुभवयोः शक्यसंबन्धज्ञानादेवोपपत्तेः न तीरे गङ्गापदस्य शक्तिः। शक्यसंबन्ध एव च लक्षणा। पश्चात्तु परम्परया गङ्गासंबन्धितीरप्रतिपत्तिजननाय अनेनाप्तेन गङ्गापदं प्रयुक्तमिति तात्पर्यज्ञानं जायते। गङ्गास्मारिततीरान्वयबोधश्च न तात्पर्यज्ञानमपेक्षते। पूर्वोक्तन्यायत एव तीरस्य प्रथमं वाक्यार्थान्वयबोधोत्पत्तेः।

अथवा निश्चिते स्वार्थसंबन्धिनोऽन्वये संबन्धिविशेषज्ञानार्थं तात्पर्यज्ञाना-पेक्षास्तु। वस्तुतो न तदर्थमपि तदपेक्षा। योग्यताप्रकरणादिवशादेव स्वार्थसंबन्धि-विशेषलाभात्। अन्यथानुपस्थिते विशेषे तात्पर्यस्यावगन्तुमशक्यत्वात् अन्योन्या-श्रयः स्यात्। सति तात्पर्यज्ञाने विशेषनिश्चयः विशेषे ज्ञाते तात्पर्यज्ञानमिति।

शक्तिस्मारितशक्यसंबन्धो वा तज्जन्या शक्यसंबन्धस्मृतिर्वा लक्षणा। उभयथापि लक्षकपदस्य लक्ष्ये तात्पर्यज्ञानं लक्षणायामनुपयुक्तमेव। उक्तरीत्या शब्दात् परंपरया अशक्यतीरस्मृतेः तात्पर्यग्रहात् पूर्वमेव क्लृप्तकारणादुपपत्तेः।

ननु तात्पर्यज्ञानस्य लक्षणायामनुपयोगे "शक्योपस्थापितार्थे शब्दतात्पर्यात् लक्षणा" "तात्पर्याद्धि वृत्तिः" इति प्रवादयोः का गतिरिति चेत् — न। लक्षणास्थले लक्ष्ये वस्तुतस्तात्पर्यमस्तीत्येवंपरत्वात् तयोः प्रवादयोः।

नन्वेवं तात्पर्यानपेक्षणे यत्र तीरं नीरं चान्वययोग्यं तत्र कदाचित् तीरान्वयोऽपि बोध्येतेति चेत् — न। शक्त्युपस्थापितेन योग्येनाकाङ्क्षितेनैवान्वितस्याभि-धानमिति व्युत्पत्तेः।

ननु स्वार्थानुभवे पदानां हेतुत्वात् लाक्षणिकस्य अशक्तत्वे लक्ष्यानुभावक-शब्दाभावात् कथं शाब्दत्वमिति चेत् — न। द्वारमित्यादौ द्वारपदस्याध्याहृत-

पिधानान्वितस्वार्थानुभावकत्ववत् घोषपदस्य तीरान्वितस्वार्थानुभावकत्वस्वीकारात्। तदेवं वृद्धव्यवहारादिदर्शनं विनैव तीरादौ लक्षणेति स्थितम्।

लक्षणायाः वृत्त्यन्तरत्वस्थापनम्

अथवा लक्षणायां तात्पर्यज्ञानस्य हेतुत्वेऽपि लक्षणायाः वृत्त्यन्तरत्वमावश्यकम्। तथा हि — "गङ्गायां घोषः प्रतिवसति तमानय" इति वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य तीरोषितघोषानयने प्रवृत्तिं दृष्ट्वा, किं तीरेऽपि गङ्गापदस्य शक्तिः उत स्वार्थेन संबन्धात् स्मारिते तीरे तात्पर्यमात्रम्, तीरान्विताभिधानं तु पदान्तरैः, एवमप्योग्यार्थपरत्वाभावेन प्रामाण्यात् आप्तोक्तत्वोपपत्तेः इति विचिकित्सन् बालः तीरादौ न शक्तिः, तथा सति एकशक्यार्थसंबन्धिषु बहुष्वर्थेषु एकपदस्य वह्नौ शक्तिः स्यात्, एवं पदान्तरेष्वपि तेषु तेष्वर्थेषु शक्तिग्रहार्थं वृद्धव्यवहारापेक्षा च स्यात्। तथा च गौरवम्। अतः स्वार्थसंबन्धिनि तीरादौ तात्पर्यमात्रं लाघवात्, तथा च लक्षणातः एव प्रयोज्यवृद्धस्य तीरधीः न तु तत्र शक्तिरिति कल्पयति।

यस्य चैवं विमर्शः प्रथमं लाक्षणिकपदश्रवणे न जायते तस्य तत्र शक्तिबुद्धावपि यदा लक्षणाख्यवृत्त्यन्तरज्ञानं पूर्वोक्तन्यायेन जायते तदा प्रथमावगतशक्तिज्ञानं मम भ्रम इति कल्पयति, लाघवात्। अन्यथा संबन्धिसहस्रेष्वपि शक्तिकल्पनाप्रसङ्गात्।

किं च यदि तीरेऽपि शक्तिः न तीरमात्रे शक्तिः, किं तु गङ्गातीरे। तथा च विशिष्टशक्तौ विशेषणे शक्तिरावश्यकी, "नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते" इति न्यायात्।

अथ लक्षणापक्षे प्रवाहेणोपलक्षणेन व्यावृत्तस्य तीरविशेषस्यान्वयः न तु तीरान्तरस्य, तथा च प्रवाहोपलक्षिते तीरे शक्तिरस्तु, न तु तीरे प्रवाहे चोभयत्रेति चेत् — न। गङ्गापदशक्तौ प्रवाहस्य शक्यत्वेन विशेषणत्वे संभवति नोपलक्षणत्वम्। विशेषणत्वासंभवे सत्येव उपलक्षणत्वात्। अतः प्रवाह एव शक्तिः।

किं च तीरशक्तौ प्रवाहस्योपलक्षणत्वं न शक्यतावच्छेदकत्वरूपम्। तथा सति गोत्वादिवत् शक्तौ विशेषणत्वमेव स्यात्। अन्यथा शब्दात् तदुपस्थितिर्न स्यात्। तथा च गौरवात् विशेषणमात्रे शक्तिरेवास्तु। नापि शक्त्युपाधित्वम्। उपाधौ शक्तेरस्वीकारे धेनुपदात् गोत्वप्रकारिका धीर्न स्यात्। शक्तेः स्वीकारे च गौरवम्।

अन्ये तु तीरे नीरे च गङ्गापदस्य व्यवहार एव विलक्षणः। नीरे तावत् अनुपपत्तिं विनैव व्यवहारः निरुपाधिकत्वात् शक्त्युपपाद्यः। तीरे त्वनुपपत्त्या व्यवहारः इत्यौपाधिकः, स च शक्त्यभावोपपाद्यः इत्याहुः।

तन्न। लक्षणायामव्युत्पन्नो बालः प्रयोज्यवृद्धस्य तीरान्वितानयनादिरूपव्यवहारं पश्यन् शक्तिं कथं न कल्पयेत्।

लक्ष्यार्थस्य केन रूपेणोपस्थितिरिति विचारः

अथ लक्षणया तीरत्वेनोपस्थितौ तीरान्तरान्वयोऽपि स्यात्। गङ्गातीरत्वेनोपस्थितौ युगपत् वृत्तिद्वयविरोधः, गङ्गोपस्थितेः शक्तिसाध्यत्वादिति चेत् — न। लक्षणाधीनतीरस्मृतेः न गङ्गासंबन्धित्वेन तीरं विषयः। किं तु यत् वस्तुगत्या गङ्गासंबन्धि तदेव तीरत्वेन विषयः। संबन्धिदर्शनजन्यायाः स्मृतेः तत्संबन्ध्यविषयकत्वात्। यथा संबन्धिनः हस्तिनः दर्शनात् जायमाना हस्तिपकस्मृतिः न संबन्धिनं हस्तिनमपि विषयीकरोति। यथा च संबन्धिनः पदस्य ज्ञानात् जायमाना पदार्थस्मृतिः न संबन्धि पदमपि विषयीकरोति। अत एव तीरान्वितवाक्यार्थबोधेऽपि गङ्गासंबन्धित्वेन तीरं विषयः।

अपि च गङ्गायामित्यादिपदानामाप्तोक्तत्वेन प्रामाण्यात् इतरपदेन संभूयान्वयबोधकत्वरूपमेकवाक्यत्वमवगतम्। मुख्यार्थश्च इतरपदार्थेनान्वयायोग्य इति योग्यः आकाङ्क्षितश्च अमुख्यार्थोऽपि पदप्रतिपाद्यः कल्प्यते। अन्यथा एकवाक्यत्वभङ्गप्रसङ्गात्। न च योग्यतादिमता अपदार्थेनैव सहान्वयबोधकत्वं घोषादिपदानामस्तु इति वाच्यम्। गङ्गापदवैयर्थ्यप्रसङ्गात्।

गङ्गापदप्रतिपाद्यता च तीरस्य क्लृप्तेनैव स्वार्थसंबन्धेन, न तु स्वशक्त्या, गौरवात्। तीरान्वयबोधश्च इतरघोषादिपदेनैव। न च शक्त्योपस्थितस्यैव पदेनान्वयो बोध्यते भूतले घट इत्यादौ तथा दर्शनादिति वाच्यम्। लाघवेन पदोपस्थापितत्वस्यैव अन्वयप्रतियोगित्वे तन्त्रत्वात्। पदत्वावच्छिन्नोपस्थापितत्वापेक्षया शक्तिपुरस्कारेण पदत्वावच्छिन्नोपस्थापितत्वस्य गुरुत्वात्।

वस्तुतः शक्त्या पदोपस्थापितत्वं तन्त्रम्, लाघवात्। न तु स्वशक्त्या पदोपस्थापितत्वम्, स्वांशप्रवेशे गौरवात्। अस्ति च प्रवाहशक्त्या तीरोपस्थापकत्वं गङ्गापदस्य। अत एव आकाशपदोपस्थाप्यशब्दाश्रयत्वस्यान्वयधीविषयत्वम्।

यद्यपि लाक्षणिकस्य पदस्य पदान्तरेण संभूय न प्रतिपादकत्वम्, अननुभावकत्वात्। लक्ष्यस्मृतावपि न संभूयकारित्वम्। अत एव नैकवाक्यत्वमपि;

तथापि घोषादिपदानां समभिव्याहृतपदप्रतिपाद्यार्थान्वयबोधकत्वमवगतम्, तच्च न लक्षणां विनेति तां कल्पयति।

यत्तु सामान्यतो गङ्गापदार्थान्वयः इतरपदार्थे ज्ञात इति तद्रक्षणार्थं परंपरया गङ्गापदार्थप्रवाहस्मारिते तीरादौ लक्षणा कल्प्यत इति। तन्न। अयोग्यत्वात् प्रथमं गङ्गापदार्थप्रवहान्वयबोधाभावात्, अन्वयबोधेऽपि गङ्गापरिचिततीरस्य घोषान्वय-बोधेऽपि गङ्गाया अन्वयबोधाविषयत्वेन तदन्वयस्यारक्षणात्।

यत्तु — गङ्गायां घोष इत्यादेः पदस्मारितार्थान्वयबोधकत्वरूपमेकवाक्यत्व-मवगतम्। तच्च यद्यपि गङ्गापदार्थस्य प्रवाहस्य साक्षात् घोषाधारत्वायोग्यत्वान्न संभवति, तथापि योग्ये गङ्गासंबन्धितीरे घोषान्वयात् तीरावच्छेदकतया गङ्गा-पदार्थस्य घोषान्वयात् एकवाक्यत्वं संभवति। अत एव एकवाक्यत्वस्य सामान्यतोऽवगतपदार्थान्वयस्य च रक्षार्थं गङ्गापदस्मारितस्वशक्यार्थस्मारिते तीरे लक्षणाख्यं वृत्त्यन्तरं कल्प्यते। अन्यथा तयोः भङ्गप्रसङ्गात् इति। तन्न।

तीररूपार्थे घोषान्वयबोधेऽपि गङ्गापदार्थे घोषान्वयबोधानिर्वाहात्। न च गङ्गातीरत्वेनोपस्थिते घोषान्वयबोधात् तीरावच्छेदकतया गङ्गायाः अन्वयबोध-विषयत्वमस्त्येवेति वाच्यत्वम्। गङ्गापदात् प्रवाहतीरयोर्युगपदुपस्थितौ वृत्तिद्वय-विरोधात्। न हि उभयोः शक्त्या लक्षणया वा उपस्थितिः संभवति। अत एकस्य शक्त्या अपरस्य लक्षणयोपस्थितिर्वाच्येति। तथा च युगपद्वृत्तिद्वयविरोधः स्यादेव।

अथ लक्षणास्वाभाव्यात् लक्षकपदेन स्वार्थसंबन्धित्वेनैव तीरादेरुपस्थितिः। अन्यथा तीरसामान्यान्वयप्रसङ्गात्। तथा च लक्षणयैव प्रवाहोपस्थितिः इति चेत् — न।

गङ्गापदशक्यार्थप्रवाहसंबन्धात् तीरस्य स्मृतिः संभवति। न तु प्रवाहसंबन्धस्य, प्रवाहसंबन्धे प्रवाहसंबन्धाभावात्। एतदुक्तं भवति — एकसंबन्धिज्ञानमपरसंबन्धि-स्मारकम्। गङ्गापदस्य तीरस्य च संबन्धः लक्षणा। स च स्वशक्यार्थ-संबन्धात्मकः। तस्य संबन्धिनौ द्वौ गङ्गापदतीरात्मकौ। तयोरेकस्य पदस्य ज्ञानात् अपरस्य तीरस्य स्मृतिर्भवति। प्रवाहसंबन्धे तु गङ्गापदसंबन्धविरहात् उक्तसंबन्ध-संबन्धित्वं संबन्धे नास्तीति गङ्गापदज्ञानात् गङ्गापदार्थप्रवाहसंबन्धस्य स्मृतिर्न भवितुमर्हति। तथा च प्रवाहसंबन्धस्य स्मृत्यभावे तद्घटकप्रवाहस्यापि स्मृतिर्न भवतीति प्रवाहस्य लक्षणया स्मृतिर्दुरुपपादा इति।

अत एव एकसंबन्धिज्ञानात् जायमानायाः अपरसंबन्धिस्मृतेः अपरसंबन्धिनि यः संबन्धः तद्विषयकत्वनियमो न। अन्यथा पदज्ञानात् जायमानायां पदार्थस्मृतौ

पदसंबन्धस्य विषयत्वे पदस्यापि विषयता स्यात्, हस्तिज्ञानजन्यहस्तिपकस्मृतौ हस्तिसंबन्धस्य विषयत्वे हस्तिनोऽपि विषयता स्यात्।

लक्षणायाः निष्कृष्टं स्वरूपम्

लक्षणा नाम — शक्तिसादृश्याभ्यामतिरिक्तः अन्वयबोधानुकूलोपस्थितिहेतुभूतः शक्यसंबन्धः। शक्तावतिव्याप्तिवारणाय शक्त्यतिरिक्तत्वनिवेशः। गौणीवृत्तावतिव्याप्तिवारणाय सादृश्यातिरिक्तत्वनिवेशः। "अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः स्वशक्त्यसंबन्धो लक्षणा" इति मणिग्रन्थस्यात्रैव तात्पर्यम्। अपि च मणौ त्रेधा लक्षणायाः लक्षणमुक्तम्।

(१) लक्षणा च शब्दात् परम्परया अशक्यासदृशस्य अन्वयपरोपस्थितिरूपा
(२) शक्यसंबन्धात् अशक्यासदृशान्वयपरोपस्थितिरूपा वा।
(३) अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः स्वशक्यसंबन्धो लक्षणेति परमार्थः। इति।

आद्ये परम्परयेत्यस्य शक्यसंबन्धेनेत्यर्थः। शक्यस्मृतेः शक्तिस्मृतिजन्यत्वमते शक्यस्मृतावतिव्याप्तिवारणाय अशक्येति। गौणार्थोपस्थितावतिव्याप्तिवारणाय असदृशेति। शक्तिसादृश्यान्येन शक्यसंबन्धेन शब्दजन्यान्वयपरोपस्थितिः इति फलितोऽर्थः।

द्वितीये — शब्दादिति नास्तीति विशेषः।

तृतीये — शक्तिसादृश्यान्यान्वयानुकूलोपस्थितिहेतुशक्यसंबन्ध इति निष्कर्षः।

अत्र उपस्थितिहेतुरिति हेतुगर्भविशेषणम्। यस्मादुपस्थितिहेतुरत एव लक्षणा वृत्तिर्भवति, शक्तिवत्। लक्षणा वृत्तिः उपस्थितिहेतुत्वात् शक्तिवत् इति अनुमानप्रयोगोऽत्र विवक्षितः। एवं च लक्षणीयतयाभिमतेऽर्थे शक्तिं विनापि शक्यार्थसंबन्धज्ञानादेव लक्ष्यार्थोपस्थितिसंभवात् न तदर्थं शक्तिः कल्पनीया। शक्तिकार्यभूताया उपस्थितेरन्यथासिद्धत्वात् शक्यसंबन्धादेव सिद्धत्वात् इत्युक्तं भवति।

न च शक्यसंबन्धस्य लक्षणात्वे राजपुरुषादिसमासे राजपदस्य राजसंबन्धे लक्षणा न स्यात्, राजसंबन्धे राजसंबन्धाभावादिति वाच्यम्। लक्ष्यतया अभिमतो हि संबन्धः स्वस्वामिभावः। तत्र निरूपितत्वाख्यः राजसंबन्धोऽस्त्येव। तथा च राजपदशक्यः राजा तत्संबन्धः निरूपितत्वं तदाश्रये स्वस्वामिभावे (स्वत्वे वा) राजपदस्य लक्षणेत्युक्तेऽनुपपत्त्यभावात्। तदुक्तं — "राजनिरूपितपुरुषसंबन्धस्य

स्वसंबन्धसंबन्धस्य च भिन्नत्वात्'' (म) इति। राजनिरूपितपुरुषसंबन्धो नाम राजनिरूपितं पुरुषनिष्ठं स्वत्वम्। स्वसंबन्धसंबन्धो नाम स्वसंबन्धे राजसंबन्धे राजनिरूपितस्वत्वे विद्यमानः संबन्धः निरूपितत्वाख्यः।

अथ उपस्थितिहेतोः शक्यसंबन्धस्य लक्षणात्वे यत्र गङ्गापदस्य मुख्यार्थपरता गङ्गायां मत्स्य इत्यादौ तत्रापि लक्षणा स्यात्, शक्यसंबन्धस्य तीरादौ सत्त्वात्। न चेष्टापत्तिः, तत्र शक्यसंबन्धस्य उपस्थितिहेतुत्वाभावेन लक्षणात्वाभावात् इति चेन्न। उपस्थितिहेतुत्वं यदि स्वरूपयोग्यतारूपं तदा इष्टापत्तिः। फलोपधायकतारूपं तु तदा नास्त्येवेति नानुपपत्तिः कापि।

एतदुक्तं भवति — मुख्यार्थपरतास्थले उपस्थितिस्वरूपयोग्यताघटितस्य लक्षणालक्षणस्य सत्त्वेऽपि लक्ष्यार्थे तात्पर्याभावेन तीरोपस्थितिं न जनयति। तात्पर्यानुरोधेनैव वृत्तेः उपस्थितिरूपकार्यजनकत्वात्। तदुक्तम् — ''तात्पर्याद्धि वृत्तिः, न तु वृत्तेस्तात्पर्यम्'' इति।

पदानामर्थे शक्तिः स्वस्मिंस्तु लक्षणा

यदा गवादिपदानि स्वरूपपराणि तदा लक्षणैव, न तु स्वरूपे शक्तिः। गोपदं हि स्वशक्यार्थसंबन्धं पुरस्कृत्यैव स्वस्वरूपोपस्थितिं जनयति। तथा च शक्य-संबन्धरूपा लक्षणैव गवादिपदस्य स्वस्मिन्।

अन्ये तु पदानामौत्सर्गिकमर्थपरत्वम्। तदभावे (अन्वयानुपपत्त्यादिना अर्थ-परत्वाभावे) स्वपरत्वं गामुच्चारयेत्यादौ। तत्र हि अर्थस्य उच्चारणकर्मत्वं नान्वितम् इत्याहुः।

तन्न। वृत्तिं विना स्वपरत्वायोगात्। अन्यथा शक्तेरप्युच्छेदः स्यात्। तां विनाप्यर्थपरत्वसंभवात्। एवं च गवादिपदानां सास्नादिमदर्थबोधकत्वं शक्त्या, पदस्वरूपबोधकत्वं तु शक्यसंबन्धरूपया लक्षणया।

ननु जबगडदशमाहेत्यादौ निरर्थकेषु लक्षणा न स्यात्। शक्यार्थविरहेण शक्यार्थसंबन्धाभावात् इति चेन्न। न हि जबगडदशमाहेत्यत्र समुदाये क्रियान्वयः समुदायस्योच्चारणासंभवात्। किं तु द्वन्द्वानन्तरश्रुतेन क्रियापदेन प्रत्येकवर्णे स्वार्थान्वयबोधजननम्। प्रत्येकवर्णस्य च शक्तत्वेन स्वशक्यसंबन्धादेव स्वस्मिन् लक्षणा। स्तोभाक्षरेष्वप्येवम्। यत्र स्वशक्यसंबन्धं विनापि शब्दस्वरूपोपस्थितिः, तत्र सा शक्तिभ्रमादेव निर्वाह्या।

अन्ये तु निरर्थकस्य जबगडदशादिशब्दस्य स्वरूपे शक्तिरेव, वृत्त्यन्तरं विनैवोपस्थितेः शक्तिसाध्यत्वात् इत्याहुः। वस्तुतस्तु लक्षणयैव स्वरूपोस्थिति-संभवात् न तत्र शक्तिरित्युक्तत्वात् मतमेतन्न युक्तम्।

पदस्य स्वबोधकत्वं वृत्तिं विनैवेति मतम्

अन्ये तु पदस्य स्वबोधकत्वं वृत्तिं विनैव स्वभावात्। अन्येन हि अन्यस्य बोधने पटपदेनापि घटबोधप्रसङ्गात् शक्तिः कल्प्यते। स्वबोधकत्वे तु नास्ति कोऽप्यतिप्रसङ्ग इति का तत्र शक्तिकल्पनस्यावश्यकता। यथा घटस्य स्वबोधकत्वं स्वसंबन्धं विनैव।

न च पदस्य स्वभावात् स्वबोधकत्वे सर्वत्र स्वबोधप्रसङ्ग इति वाच्यम्। इत्यादिपदस्य स्वार्थान्वयानुपपत्त्यादेश्च सहकारित्वात्, यथा घटस्य स्वबोधकत्वे इन्द्रियसंबन्धाद्यपेक्षा। गौरित्ययमाहेत्यत्र इतिशब्दवशात् गोपदं स्वपरम्। गामुच्चारयेत्यत्र गोपदार्थे उच्चारणकर्मत्वान्वयानुपपत्तिः गोपदस्य स्वबोधकत्वे सहकारि।

तात्पर्यमेव लक्षणेति मतविमर्शः

यत्तु स्वार्थसंबन्धिनि तात्पर्यमेव लक्षणा। तत्तात्पर्यं च तत्प्रतीतिमुद्दिश्यो-च्चरितत्वमिति।

तन्न। लक्ष्यार्थस्मृत्यर्थं हि लक्षणा। सा च स्वार्थसंबन्धज्ञानादेव निर्वहतीति तात्पर्यस्य व्यर्थत्वात्। संबन्धज्ञानं स्मृतिहेतुत्वेन क्लृप्तम्, न तु तात्पर्यज्ञानमपि। तस्य लक्ष्यस्मृतिजन्यत्वेनान्योन्याश्रयप्रसङ्गात्, तात्पर्यज्ञाने सति लक्ष्यस्मृतिः, लक्ष्यस्मृतौ सत्यां तात्पर्यज्ञानमिति।

तात्पर्यज्ञानस्योपयोगः

तात्पर्यज्ञानं च लक्षणाबीजभूतानुपपत्तिज्ञाने अन्वयानुभवे चोपयुक्तम्। तस्मात् अशक्योपस्थितिः अशक्योपस्थितिहेतुः शक्यसंबन्धो वा लक्षणा। तात्पर्यं तु न लक्षणायाः स्वरूपम्, न वा लक्षणाकल्पनायां बीजम्।

ननु यदि तात्पर्यं न लक्षणाकल्पनायां बीजं, तदा "लक्ष्ये तात्पर्यात् लक्षणा", "तात्पर्याद्धि वृत्तिः" इति पूर्वाचार्यग्रन्थविरोध इति चेत् — न। तादृशग्रन्थयोः लक्षणास्थले वस्तुतो लक्ष्ये तात्पर्यमस्तीत्येवंपरत्वात्। तात्पर्यस्य लक्षणास्वरूपत्वे तात्पर्यादिति पञ्चम्यनुपपत्तेश्च।

किं च यदि तात्पर्यमेव लक्षणा, तदा मुख्येऽपि तत्तात्पर्यकत्वमेव वृत्तिरस्तु, किं शक्त्या। न च वृत्तिं विना तात्पर्यमेव न निर्वहतीति वाच्यम्। तर्हि लक्षणापि तात्पर्यनिर्वाहिकैव, न तु तात्पर्यमेव लक्षणा।

अपि च तात्पर्यानुपपत्तिः लक्षणाबीजम्। यदि लक्षणा तात्पर्यरूपा तदा तात्पर्यानुपपत्तिः तात्पर्यबीजमित्युक्तं स्यात्। तथा च विरोधः, तदनुपपत्तेः तद्बीजत्वाभावात्। उपपाद्योपपादकभावस्य भेदव्याप्यत्वात्।

अत एव अशक्ये तात्पर्यं न लक्षणा, वृत्तेः तात्पर्यनिर्वाहकत्वात्। न हि स्वयं स्वनिर्वाहकम्। निर्वाह्यनिर्वाहकभावस्य भेदव्याप्यत्वात्। शक्त्या शक्यसंबन्धेन वा पदादमुमर्थं जानातु इत्यभिप्रायेण पदप्रयोगः क्रियते, न तु तात्पर्यादेवायममुमर्थं ज्ञास्यतीति बुद्ध्या। तात्पर्यमात्रस्य वृत्तित्वे शक्यसंबन्धग्रहं विनापि सर्वस्य पदस्य सर्वत्र अर्थे प्रयोगः स्यात्। नानार्थोच्छेदश्च स्यात्। उक्तलक्षणयैव नानार्थ-बोधोपपत्त्या नानार्थेषु शक्तेरनावश्यकत्वात्।

वक्त्रभिप्रायो लक्षणेति मतान्तरस्य परामर्शः

अन्ये त्वाहुः — स्वार्थसंबन्धेनेदं पदमर्थं बोधयिष्यति इति वक्तुरभिप्रायो लक्षणा। तदभिप्रायज्ञानं विना श्रोतुः लक्ष्यार्थानुपस्थितेरिति।

तन्न। अयं हि अभिप्रायः शब्दप्रयोगस्य निमित्तम्, यथा इदं पदं शक्त्या अर्थं बोधयिष्यतीत्यभिप्रायः प्रयोगस्य निमित्तं तद्वत्। न तु उक्ताभिप्राय एव लक्षणा। तस्य शक्यसंबन्धापेक्षया गुरुत्वात्।

तस्मात् स्वार्थसंबन्ध एव लक्षणा, तत एव लक्ष्योपस्थितिसंभवात्। वृत्तेः उपस्थितावेवोपयोगात्। स्वार्थसंबन्धस्य चाबोधकत्वे (अनुपस्थापकत्वे) स्वार्थ-संबन्धेनायं शब्दो बोधयिष्यतीत्यभिप्रायवान् वक्ता नाप्तः स्यात्। एवं च तात्पर्यधीर्न लक्षणायामुपयुज्यते, अपि तु तात्पर्यधीरन्वयबोधे हेतुः इति पूर्वमेवोक्तम्।

शक्यसंबन्धः किंरूप इति विवेचनम्

एतावता शक्यसंबन्धो लक्षणेत्युपपादितम्। शक्यसंबन्धश्च किंरूप इति जिज्ञासायामुक्तं शक्यसंबन्धश्चाविनाभाव एवेति।

"यष्टीः प्रवेशय" "मञ्चाः क्रोशन्ति" इत्यत्रापि प्रवेशनक्रोशनसमये यष्टिधर-मञ्चस्थपुरुषयोः यष्टिमञ्चाभ्यामविनाभावोऽस्त्येवेति यष्टिमञ्चपदयोः यष्टिधरे मञ्चस्थपुरुषे च अविनाभावरूपा लक्षणा।

एवं "छत्रिणो यान्ति" "काकेभ्यो दधि रक्ष्यताम्" इत्यत्र अजहत्स्वार्थ-लक्षणोदाहरणे गमनसमये छत्रिणः तत्समूहान्तर्गतेनाच्छत्रिणाप्यविनाभावोऽस्त्येव। काककुक्कुरादीनां दध्युपघातकत्वेन युगपदुपस्थितिसमये काकस्य कुक्कुराद्यविना-भावोऽस्त्येव। यत्र तूपघातकत्वेन काकमात्रमुपस्थितं न कुक्कुरादि तत्र काकपदेऽपि उपघातकत्वेन लक्षणापि नास्ति। दध्युपघातकत्वेनानुपस्थिता-द्रक्षणोपदेशायोगात् इति संप्रदायः।

(आलोके) अथात्र छत्रिशब्दे न लक्षणा शक्तप्रकृतिप्रत्ययसमुदायरूपत्वेन वाक्यत्वात्। वाक्ये लक्षणाविरहात्। नापि छत्रपदे, तदर्थस्य त्यागात् अजहत्स्वार्थत्वानुपपत्तेः। किं चैकसार्थगन्तृत्वं न लक्ष्यतावच्छेदकम्। गन्तृत्वेन उपस्थितस्य गन्तृत्वान्वये आकाङ्क्षाविरहेण एकसार्थगन्तारो गच्छन्तीति वाक्यार्थानुपपत्तेः इति चेत् —

अत्राहुः — छत्रपद एव लक्षणा। एकसार्थवत्त्वमेव लक्ष्यम्। तथा च एकसार्थवन्तो यान्तीति वाक्यार्थः। अजहत्स्वार्थतोक्तिस्तु छत्रिवाक्यलक्षणा-भिप्रायेण अर्थपदस्य प्रतिपाद्यपरत्वाभिप्रायेण वेति।

एकसार्थवत्त्वेन छत्रस्याप्यन्वयात् अजहत्स्वार्थत्वम्। अत एव शक्यलक्ष्य-साधारण्यमुपपद्यत इत्यन्ये।

केचित्तु न प्रकृतौ छत्रिशब्दे लक्षणा। किं तु इनिप्रत्यये एवेत्याहुः।

संप्रदायमतम्

वस्तुतः शक्यसंबन्ध एव लक्षणा। संबन्धश्च अविनाभाव एव। न च प्रवाहाविनाभावस्य तीरवत् मत्स्येऽपि सत्त्वात् मत्स्येऽपि गङ्गापदस्य लक्षणा स्यादिति वाच्यम्। तात्पर्यवशात् तीरेणैवान्वयबोध इति स्वीकारात्। शक्य-संबन्धसामान्यं लक्षणेति वादिनापि प्रवाहसंयोगस्य तीरवन्मत्स्येऽपि सत्त्वात् तदन्वयबोधस्य वारणपूर्वकं तीरेणैवान्वयबोधस्य तात्पर्येणैव निर्वाह्यत्वात्।

लक्षणायाः बीजं किमिति निरूपणम्

लक्षणायाः बीजं तु तात्पर्यानुपपत्तिः, पदस्य वृत्तिं विना लक्ष्ये तात्पर्यस्या-निर्वाहात्। न तु शक्यार्थान्वयायोग्यत्वं लक्षणायां बीजम्। यष्टीः प्रवेशयेत्यत्र, अजहत्स्वार्थायां च शक्यस्यान्वययोग्यत्वेऽपि लक्षणायाः सत्त्वात्। तात्पर्या-नुपपत्तिस्तु तत्रापि वर्तते। लक्ष्ये तात्पर्यं विना लक्षणायाः अनुदयात् इति संप्रदायः।

अन्वयानुपपत्तिरेव लक्षणायां बीजं
न तु तात्पर्यानुपपत्तिरिति मणिकृन्मतम्

वस्तुतोऽन्वयपरप्रमाणशब्दस्य मुख्येऽन्वयायोग्यत्वमेव लक्षणायां बीजम्। गङ्गायां घोष इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्यग्रहात् पूर्वमेव मुख्यस्यान्वयायोग्यत्वज्ञानेन लक्षणायाः उपपादनात्।

अस्तु वा तत्रापि लक्ष्ये तात्पर्यग्रहः, तथापि मुख्येऽर्थे अन्वयानुपपत्तिरेव लक्षणाबीजम्। प्रथमोपस्थितत्वात्। तात्पर्यानुपपत्तिं विनैव लक्षणाबीजत्वसंभवाच्च।

यष्टीः प्रवेशयेत्यत्र, छत्रिणो यान्तीत्यजहत्स्वार्थायां च मुख्यस्यान्वयानुपपत्तिरेव। तथा हि प्रकरणादिना प्रवेशयेत्यस्य भोक्तृकर्मकप्रवेशनपरत्वं, यान्तीत्यस्य छत्रितदितरघटितसमूहाख्यगमनकर्तृपरत्वं च ज्ञातम्। लक्षकपदे इव इतरपदेऽपि तात्पर्यग्रहस्य वक्तव्यत्वात्। अन्यथा घोषपदस्यैव जलपरत्वे गङ्गापदे लक्षणा न स्यात्। तथा च प्रकरणात् प्रवेशनादिविशेषे तात्पर्यग्रहात् तत्र च यष्टिच्छत्रिणोरन्वयायोग्यत्वात्।

ननु यस्मात् प्रकरणात् प्रवेशयेत्यस्य यान्तीत्यस्य च विशेषपरत्वज्ञानं तस्मादेव प्रकारणात् लक्षकपदस्य लक्ष्ये तात्पर्यज्ञानं जायते। अतः प्रकरणावगतलक्ष्यतात्पर्यानुपपत्तिरेव लक्षणाबीजं भवतु इति चेत् — न। लक्षणावशात् तात्पर्यग्रहात् पूर्वमेव लक्ष्योपस्थितौ सत्यां लक्ष्ये तात्पर्यग्रहे प्रमाणाभावात्। लक्षणायाः तात्पर्यग्रहं विनापि संभवात्। अस्तु तत्र उभयानुपपत्तिः, तथाप्यन्वयानुपपत्तिरेव लक्षणाबीजम्। गङ्गायां घोष इत्यादौ तात्पर्यग्रहात् पूर्वमेव मुख्यार्थान्वयानुपपत्तेः क्लृप्तत्वात्।

ननु पदार्थविशेषस्मृतौ तदन्वयबोधे वा प्रकरणादेः सहकारिता न तु तात्पर्यग्रहे इति चेत् — न। प्रकरणादीनां शब्दसहकारित्वेऽननुगमात्। तात्पर्यव्याप्यत्वेन तेषामनुगमात् तात्पर्यग्रहे सहकारित्वं संभवति। तात्पर्यव्याप्यग्रहे च तात्पर्यग्रहः संभवत्येव।

ननु बहुव्रीहौ चित्रगुमानयेत्यादौ चित्रगोपदार्थस्यान्वययोग्यत्वात् अन्यपदार्थे तात्पर्यानुपपत्तिरेव लक्षणाबीजम् इति चेत् — न। तत्रापि प्रकरणादिना आनयपदस्य चित्रगोस्वाम्यानयनपरत्वे ज्ञाते तादृशानयने चित्रगोपदार्थस्य अन्वयानुपपत्तिरस्त्येवेत्यन्वयायोग्यत्वस्यैव अन्यपदार्थे लक्षणायां बीजत्वात्।

यद्यपि लक्षणायाम् अन्वयायोग्यत्ववत् निराकाङ्क्षत्वमप्यस्ति। तथा हि गङ्गायां घोष इत्यत्र घोषशब्दार्थस्य आभीरपल्ल्याः निबिडाधाराकाङ्क्षा अस्ति, न प्रवाहाकाङ्क्षा, एवं छत्रि-अच्छत्रिघटितसमूहकर्तृकगमनस्य न छत्रिषु आकाङ्क्षा, तेषु गमनकर्तृत्वस्यापरिसमाप्तेः, तथापि निराकाङ्क्षत्व-अन्वयायोग्यत्वोभयं न लक्षणायाः निमित्तम्। अन्यतरस्य ज्ञानेऽपि लक्षणायाः संभवात्। नाप्येकैकमेव निमित्तम्, अननुगमात्। अन्वयानुपपत्तिव्याप्यत्वेन तयोरनुगमे च अन्वयानुपपत्तिरेव लक्षणाबीजम्, तस्या उभयत्र सत्त्वात्।

लक्षणास्थले पदात्र लक्ष्यस्मृतिः अपि तु पदशक्यात् इति प्राचां मतम्

तथा च लक्षणास्थले गङ्गापदात् आदौ शक्यार्थस्मृतिः। ततः शक्यार्थान्वयानुपपत्तिज्ञानम्। ततः गङ्गापदात् पुनः शक्यार्थस्मृतिः, स्मृतशक्यात् स्वसंबन्धेन तीरस्मृतिः। शक्तेः शक्यस्मृतौ, प्रवाहस्य स्वसंबन्धेन तीरस्मृतौ सामर्थ्यावधारणात्। ततः शक्यस्मारिततीरस्य घोषपदादेवान्वयबोधः।

लाक्षणिकपदं नानुभावकम् इति निरूपणम्

अत एव लाक्षणिकं पदं नानुभावकम्। अन्वयप्रतियोगिनः तीरस्य पदादनुपस्थितेः। पदशक्यादेव तीरस्य स्मृतेः। अन्वयप्रतियोगिविषयकोपस्थितिजनकानामेव पदानामन्वयानुभावकत्वात्।

न च गङ्गापदात् स्वशक्यसंबन्धेन प्रथममेव तीरस्मृतिः, पुनः शक्यस्मरणकल्पने गौरवादिति वाच्यम्। गङ्गापदस्य स्वशक्यसंबन्धात्मकपरम्परासंबन्धेन अन्वयप्रतियोगिस्मारकत्वस्य अक्लृप्तस्य कल्पने गौरवात्। न चैहैवागत्या तत्कल्पनमिति वाच्यम्। क्लृप्तकारणताकस्मृतिद्वयादेव तीरोपस्थितिसंभवात् इति प्राञ्चः।

तन्न। गङ्गापदात् तीरस्यानुपस्थितौ तत्र सप्तम्यर्थाधारत्वान्वयानुपपत्तेः। विभक्तेः प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः। प्रकृत्यर्थत्वं च वृत्त्या प्रकृत्युपस्थाप्यत्वम्। न च प्रकृत्यर्थोपस्थाप्यार्थान्वितस्वार्थबोधकत्वं विभक्तेरस्तु, का क्षतिरिति वाच्यम्। तथा सति धूमोऽस्तीत्यत्र धूमपदार्थोपस्थाप्यवह्नौ विभक्त्यर्थान्वयापत्तेः। क्वचित् प्रकृत्यर्थे क्वचित् प्रकृत्यर्थोपस्थाप्ये विभक्त्यर्थान्वय इति स्वीकारेऽननुगमश्च।

न च प्रकृतितात्पर्यविषयार्थान्वितस्वार्थबोधकत्वं विभक्तीनामिति वाच्यम्। गौरवात्। एवं च प्रकृत्युपस्थापितार्थे विभक्त्यर्थान्वयनियमात् तीरस्य प्रकृतिभूतगङ्गापदोपस्थाप्यत्वसिद्ध्यर्थं क्लृप्तः स्वशक्यसंबन्ध एव तीरस्मारकत्वेन कल्प्यते।

परंपरासंबन्धस्यापि स्मारकत्वकल्पनात् शाब्दबोधानुकूलस्मृतिहेतुसंबन्धत्वरूपं वृत्तित्वं तस्य कल्प्यत इति।

न च गङ्गापदेन साक्षात् शक्यस्मृत्यादिकमद्वारीकृत्य तीरोपस्थितिरिति स्वीकारे तीरे शक्तिरेव स्यादिति वाच्यम्। शक्तिं विनापि तीरोपस्थितिसंभवात्।

नन्वेवमन्वयप्रतियोगितीराद्युपस्थितिजनकतया लाक्षणिकं पदमप्यनुभावकं स्यादिति चेत् — न। इतरपदार्थैः सह स्वशक्यान्वयानुभावकत्वेन क्लृप्तात् इतरपदादेव तीरानुभवसंभवेन लाक्षणिकस्याननुभावकत्वात्। स्वशक्यानुभवे पदानां कारणत्वावधारणाच्च।

अथ यदि गङ्गापदं नान्वयबोधजनकम्, तदा गङ्गापदघोषपदयोः संभूयान्वयबोधजनकत्वरूपमेकवाक्यत्वं न स्यात्। प्रमाणत्वं च न स्यात्, प्रमाजनकस्यैव प्रमाणत्वम्, प्रमायाश्च यथार्थानुभवरूपत्वात्। तथा च एकवाक्यत्वप्रमाणत्वोभयरक्षार्थं लक्षणायाः अकल्पनमेव वरम्। तत्कल्पने लक्षकस्याननुभावकतया तदुभयरक्षणासंभवात्।

न च परंपरया साक्षाद्वा अन्वयप्रतियोगिविषयकस्मृतिहेतुत्वेन प्रमाणत्वम्, स्मृतेरप्रमात्वात्। नापि तादृशस्मृतिहेतुत्वेन एकवाक्यत्वम्, वाक्यभेदेऽपि पदार्थस्मृतिसत्त्वादिति चेत् —

मैवम्। आप्तोक्तत्वाद्धेतोः गङ्गापदान्तर्भावेणान्वयप्रमाप्रयोजकत्वं संभूयान्वयबोधप्रयोजकत्वं च गृहीतम्। तदुभयमपि तीरस्मृतिद्वारा निर्वहति। तथा च प्रमाप्रयोजकत्वं प्रमाणत्वम्, संभूय अन्वयबोधप्रयोजकत्वं चैकवाक्यत्वम् — न तु जनकत्वम्। अतो न प्रमाणत्वैकवाक्यत्वयोरनुपपत्तिः लक्षणायाः कल्पने इत्युक्तं भवति।

लाक्षणिकमप्यनुभावकमिति नव्यमतम्

नव्यास्तु लाक्षणिकमप्यनुभावकम्। तावता तीरे शक्तिरिति नाशङ्कनीयम्, प्रवाहशक्तत्वेन ज्ञातादेव गङ्गापदात् शक्तिं विनापि तीरानुभवसंभवात्। यथा परमते जातिशक्तत्वेन ज्ञातादेव व्यक्त्यनुभवसंभवान्न व्यक्तौ शक्तिः, यथा वास्माकं मते पदार्थशक्तत्वेन ज्ञातादेव अन्वयानुभवसंभवान्नान्वये शक्तिस्तद्वदिति वदन्ति। लक्षणा च पदवृत्तिः न तु वाक्यवृत्तिः वृत्तित्वात् शक्तिवत्।

वाक्यलक्षणाविचारः[४८]

मण्यपेक्षया दिनकरीरामरुद्र्योरयं विचारः सुष्ठु कृतोऽस्ति। तथा हि —

अत्र मीमांसकमतानुयायिनः — गभीरायां नद्यामिति वाक्यस्य गभीरनदीतीरे लक्षणयैव उपपत्तौ गभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तम्। न च वाक्ये शक्त्यभावात् शक्यसंबन्धरूपा लक्षणापि न संभवतीति वाच्यम्। स्वबोध्य-संबन्धस्यैव लक्षणापदार्थत्वात्। गङ्गायां घोष इत्यादौ गङ्गापदबोध्यस्य प्रवाहस्य संबन्धः तीरे इति तत्र लक्षणा। गभीरायां नद्यामिति वाक्यस्य बोध्या गभीराभिन्ना नदी तत्संबन्धः तीरे इति वाक्येऽपि लक्षणा।

एवं समासात्मके चित्रगुरिति वाक्येऽपि चित्रगुपदस्य अवयवशक्त्या चित्राभिन्ना गौः स्वबोध्या। स्वजन्यबोधविषयस्यैव स्वबोध्यत्वात्। तत्संबन्धस्य स्वामिनि सत्त्वात् — इत्याहुः।

तन्न। स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वम्। गङ्गायां घोष इत्यादौ गङ्गायामित्यस्यापि तीरलाक्षणिकत्वापत्तेः। गङ्गायामिति वाक्यजन्यस्य गङ्गातीर-वृत्तिरिति शाब्दबोधस्य गङ्गाविषयकत्वात् तत्संबन्धस्य तीरे सत्त्वात्। अतः तत्त्वेन बोधकत्वं वाच्यम्।

यादृशानुपूर्व्यवच्छिन्नस्य लक्षकत्वमभिमतम्, तादृशानुपूर्व्यवच्छिन्नजनकता-निरूपितजन्यताशालिबोधविषयसंबन्ध एव तादृशानुपूर्व्यवच्छिन्नस्य लक्षणेति यावत्। एवं च गङ्गायामित्यानुपूर्वी न शाब्दबोधजनकतावच्छेदिकेति न वाक्यलक्षणापत्तिः। न चैतावतापि निर्वाहः। अपभ्रंशस्यापि लाक्षणिकत्वापत्तेः। अतः तादृशानुपूर्व्यव-च्छिन्ना तादृशानुपूर्वीनिष्ठावच्छेदकतानिरूपिका शक्त्यवच्छिन्ना विषयितासंबन्धाव-च्छिन्नशक्तिनिष्ठावच्छेदकतानिरूपिका या ज्ञाननिष्ठा बोधजनकता सैव निवेशनीया। तथा च तादृशानुपूर्व्यवच्छिन्नशक्तिज्ञानजन्यबोधविषयसंबन्धः तादृशानुपूर्व्यवच्छि-न्नस्य लक्षणेति पर्यवसानात्। वाक्यस्य च शक्त्यभावात् तस्य लक्षकत्वासंभवः।

वस्तुतस्तु स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं तदा गङ्गायां घोष इत्यादौ गङ्गापदे लक्षणानुपपत्तिः। गङ्गापदेन तत्र प्रवाहबोधाजननेन प्रवाहस्य गङ्गापदबोध्यत्वाभावात्। किं तु शक्त्या स्वजन्यस्मरणविषयत्वं स्वबोध्यत्वमिति वक्तव्यम्। न च शक्त्येत्यधिकम्। समवायेन घटपदस्मारितस्य आकाशस्यापि स्वबोध्यत्वापत्त्या तत्संबन्धज्ञानात् घटपदेन पटादेः शाब्दबोधप्रसङ्गात्। एवं च शक्यसंबन्धापेक्षया शक्त्या स्वबोध्यसंबन्धस्य गुरुत्वान्न तस्य लक्षणात्वमिति।

---

[४८] दिनकरी. पृ. ३९२

किं च गभीरायां नद्यामिति सप्तम्यन्तस्य गभीरनदीतीरलक्षकत्वे घोषे तादृशतीरवृत्तित्वबोधानुपपत्तिः। आधेयत्वबोधकपदाभावात्। नामार्थयोः भेद-संबन्धेन अन्वयस्याव्युत्पन्नतया आधेयतासंबन्धेन तीरस्य घोषेऽन्वयासंभवात्। गभीरायां नदीति सप्तमीरहितस्य तीरलक्षकत्वे सप्तम्यर्थाधेयत्वे तादृशतीरस्यान्व-यानुपपत्तिः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः गभीरायां नदी इति भागस्य सप्तमीप्रकृतित्वाभावात्। न च गभीरायां नद्यामिति सप्तम्यन्तस्य गभीर-नदीतीरवृत्तित्वे लक्षणास्त्विति वाच्यम्। तादृशतीरवृत्तित्वस्य घोषे अन्वयानुप-पत्तेः। नामार्थयोर्भेदसंबन्धेनान्वयस्याव्युत्पन्नत्वात्। तस्य अर्थवत्त्वेन अर्थवत्सूत्रेण नामत्वात्। सप्तम्यन्तभागस्य तादृशतीरवृत्तौ लक्षणामुपगम्य तस्याभेदेन घोषेऽन्वय इत्यपि न। अभेदेनान्वयबोधे समानविभक्तिकत्वस्य तन्त्रत्वात्। एवं च वाक्ये न लक्षणेति सिद्धम्।

बृहन्मञ्जूषानुसारेण लक्षणाविचारः[४९]

ननु वैयाकरणमते बोधकत्वमेव शक्तिः। तथा सति गङ्गादिपदे तीरादिबोध-जनकतायाः सत्त्वेन शक्त्यैवोपपत्तौ लक्षणाद्युच्छेदापत्तिः इति चेत् —

अत्राहुः — यस्य पदार्थस्य स्वविषयकबोधजनकत्वज्ञानात् बोधो भवति तदर्थ-निरूपितबोधकत्वं शक्तिः। यस्य पदार्थस्य स्वसंबन्धिबोधकत्वज्ञानात् बोधः तत्पदार्थनिरूपितं स्वसंबन्धिबोधकत्वं लक्षणेति व्यवस्था। गङ्गापदात् प्रवाह-विषयकबोधजनकत्वज्ञानात् प्रवाहबोधो जायत इति प्रवाहनिरूपितबोधकत्वं शक्तिः। गङ्गापदात् तीरस्य तु न तीरबोधकत्वज्ञानात् बोधः, अपि तु तीरसंबन्धि-प्रवाहबोधकत्वज्ञानादेवेति तीरे लक्षणा।

अपरे तु — गङ्गादिपदजन्यतीराद्यर्थविषयकशाब्दबोधं प्रति स्वसंबन्धि-प्रवाहबोधकत्वज्ञानस्य कारणत्वापेक्षया स्वबोधकत्वज्ञानस्यैव कारणत्वं युक्तम्। एवं च तीरादावपि शक्तिरेव। गङ्गापदं तीरबोधकमिति ज्ञाने सति, विनापि स्वसंबन्धिबोधकत्वज्ञानं तीरोपस्थितितीरशाब्दबोधयोः सर्वानुभवसिद्धत्वेन तीर-बोधकत्वज्ञानकारणतायाः आवश्यकत्वाच्च। लाक्षणिकपदानां शक्तिभ्रमेण तीर-बोधकत्वस्य त्वयाप्यङ्गीकाराच्च।

न च यत्र स्वसम्बन्धिप्रवाहादिबोधकत्वज्ञानादेव तीराद्युपस्थितितच्छाब्दबोधौ, तत्र तज्ज्ञानस्यापि कारणत्वमावश्यकमिति वाच्यम्। गङ्गापदात् तीरं बोद्धव्यमिति

---

[४९] बृ.म. पृ. २९

वक्तृतात्पर्यज्ञानस्य लाक्षणिकबोधे कारणत्वमावश्यकमिति तस्मिंस्तात्पर्यज्ञाने गङ्गापदनिष्ठस्य तीरबोधकत्वस्यापि विषयत्वेन बोधकत्व-ज्ञानस्यापि तत्र सत्त्वेन मदुक्तकारणस्य व्यभिचाराभावात्।

किं च लाघवेन स्वबोधकत्वज्ञानस्य कारणत्वे सिद्धे उक्तस्थले व्यभिचार-वारणाय मानसस्य स्वबोधकत्वज्ञानस्य कल्पनान्न दोषः। न च ज्ञानद्वयकल्पनं दोषः। फलमुखत्वात्।

किं च प्रत्यक्षादिजन्यपदार्थोपस्थितेः शाब्दबोधाहेतुत्वात् तत्तद्विषयकशाब्द-बुद्धित्वावच्छिन्नं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वे कार्य-कारणभावद्वयकल्पनगौरवम्। मम तु बोधकत्वरूपशक्तिजन्योपस्थितेरेकस्या एव हेतुत्वकल्पनमिति लाघवम्।

एवं पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुता वाच्येति गौरवान्तरम्।

किं च द्वयोरेककार्यं प्रति हेतुत्वे परस्परं व्यतिरेकव्यभिचारवारणाय कार्यतावच्छेदककोटावव्यवहितोत्तरत्वसंबन्धेन तत्तदुपस्थितिवैशिष्ट्यस्य निवेशे सुतरां गौरवम्। न च शक्तिलक्षणाज्ञानसाधारण्येन उपस्थितिं प्रति वृत्तिज्ञानत्वेन शाब्दबोधं प्रति च वृत्तिज्ञानजन्योपस्थितित्वेनैव कारणतेत्येक एव कार्य-कारणभावो ममापीति वाच्यम्। शक्तिलक्षणान्यतरत्वरूपस्य वा शाब्दबोध-हेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबन्धत्वरूपस्य वा वृत्तित्वस्य कारणतावच्छेदक-शरीरे प्रवेशापेक्षया अखण्डोपाधिरूपस्य बोधकत्वस्य निवेशे लाघवात्।

एतेन तीराद्यशक्तत्वे सति तीरादिसंबन्धिशक्तत्वं तीरलक्षणेत्यादिकमपास्तम्। तीरशक्तत्वे बाधकाभावात् इति प्राहुः।

शक्यादशक्योपस्थितिर्लक्षणेति मतम्

यत्तु शक्यादशक्योपस्थितिर्लक्षणा। सा च स्वरूपसती हेतुः। एकसंबन्धिज्ञान-विधया पदजा, शक्तिप्रयोज्या, शक्यज्ञानजन्या, शक्यतानवच्छेदकावच्छिन्नो-पस्थितिरिति तदर्थः। विधयेत्यस्योपस्थितावन्वयः। गङ्गापदेन प्रथमतः प्रवाह-स्योपस्थितिर्भवति। ततः एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति रीत्या पूर्वं प्रवाहतीरयोः सामीप्यरूपसंबन्धस्य गृहीतत्वात् तीरस्य स्मृतिर्भवति। इयं तीरस्मृतिः, पदजन्या। शक्तिज्ञानजन्यप्रवाहोपस्थितिजन्यत्वात् शक्तिप्रयोज्या। शक्यप्रवाहविषयकज्ञानजन्या शक्यतानवच्छेदकतीरत्वावच्छिन्नविषयिणी चेति सा लक्षणा स्वरूपसती तीरबोधहेतुः।

अत्र शक्तिप्रयोज्येति विशेषणानुपादाने पदजा शक्यज्ञानजन्या शक्यतानवच्छेदकावच्छिन्नविषयिका उपस्थितिः हेतुः इत्युक्तौ यत्र आकाशपदशक्यस्याप्याकाशस्य आकाशपदादेव समवायसंबन्धं पुरस्कृत्योपस्थितिः आकाशसंबन्धाच्चान्यस्य घटादेरुपस्थितिः सापि परंपरया आकाशपदजन्या शक्यस्य आकाशस्य ज्ञानात् जन्या शक्यतानवच्छेदकघटत्वाद्यवच्छिन्नविषयिणीति तद्बलात् घटादिबोधवारणाय उपस्थितौ शक्तिप्रयोज्येति विशेषणम्। उक्तोपस्थितेः आकाशपदशक्तिप्रयोज्यत्वविरहान्न दोषः।

शक्यज्ञानजन्येति विशेषणानुपादाने घटरूपार्थस्य घटपदस्य च शक्तिरूपसंबन्धग्रहवतः यत्र घटरूपार्थदर्शनेन एकसंबन्धिज्ञानविधया घटपदस्मरणं, ततः समवायसंबन्धं पुरस्कृत्य एकसंबन्धिज्ञानविधया आकाशस्य स्मरणं, तत्र आकाशस्मरणस्यापि शक्तिप्रयोज्यत्वात् घटपदज्ञानजन्यत्वाच्च शाब्दबोधः स्यात्। तद्वारणाय शक्यज्ञानजन्यत्वनिवेशः। उक्तस्थले आकाशस्मरणस्य शक्तज्ञानजन्यत्वेऽपि शक्यज्ञानजन्यत्वाभावान्न दोषः। नानार्थकहर्यादिपदे एकशक्यार्थज्ञानेन स्मृतस्य तत्संबन्धिनः अपरपदार्थस्य शाब्दवारणाय अशक्योपस्थितिः इत्युक्तम्। अपरपदार्थस्मृतिरपि शक्यस्मृतिरेव नाशक्यस्मृतिः इति न दोषः। अशक्येत्यस्य शक्यभिन्नेति यथाश्रुतार्थकत्वे सामान्यशब्दस्य विशेषे लक्षणास्थले उपस्थितस्य विशेषरूपावच्छिन्नस्यार्थस्य शक्यार्थभिन्नत्वाभावात् तत्संग्रहाय शक्यतानवच्छेदकावच्छिन्नेति तदर्थकरणम्। एवं च शक्यतानवच्छेदकविशेषरूपावच्छिन्नत्वात् तत्संग्रहः।

मुख्यार्थबाधसहकृतत्वमपि उपस्थितौ विशेषणं देयम्। अत एव "वर्णसमुदायशक्तं पदपदम्" इति जानतः पदपदात् शक्त्योपस्थितेन वर्णसमुदायेन स्वाश्रयतया उपस्थितस्य आकाशादेः अन्वमबोधापत्तिरिति निरस्तम्। मुख्यार्थबाधाभावात् — इत्याहुः।

तन्न। एतदपेक्षया बोधकत्वज्ञानस्य हेतुत्वे लाघवात्। किं चोपस्थितिहेतुरेव वृत्तिः न तूपस्थितिरेव किं चैवं लाक्षणिकं पदमिति व्यवहारस्य गौणत्वापत्तिः। तस्मात् अप्रसिद्धः शक्यसंबन्धित्वेन गृहीतो योऽर्थः तद्विषयकबोधजनकत्वं लक्षणा। प्रसिद्धार्थविषयकबोधजनकत्वं शक्तिः। प्रसिद्धत्वं च प्रचुरप्रयोगविषयत्वम्। प्रसिद्धत्वज्ञानं च क्वचित् शक्तिग्राहकव्यवहारात्, क्वचित् व्याकरणकोशादितः, क्वचित् शिष्टप्रयोगात्। शक्त्यादिनियामकतया प्रसिद्ध्यादेस्तवाप्यावश्यकत्वात्।

लक्षणायाः निमित्तम्

तत्र लक्षणाज्ञानजन्यशाब्दबोधेऽन्वयव्यतिरेकाभ्यां मुख्यार्थबाधज्ञानं कारणम्। मुख्यार्थबाधज्ञाने सति लाक्षणिकबोधः, तदभावे तदभाव इत्यन्वयव्यतिरेकौ।

न च छत्रिणो यान्ति, कुन्तान् प्रवेशय, काकेभ्यो दधि रक्ष्यताम् इत्यादौ मुख्यार्थानां छत्रि-कुन्त-काकानां समभिव्याहृतक्रियासु यथाक्रमं कर्तृत्व-कर्मत्व-अवधित्वैः अन्वये वाधाभावात्-मुख्यार्थबाधरूपनिमित्तविरहात् कथं लक्षणेति वाच्यम्। मुख्यार्थबाध इत्यनेन समभिव्याहृतपदतात्पर्यविषये तात्पर्यविषयान्वये वा मुख्यार्थतावच्छेदकरूपेण मुख्यार्थासंसर्गस्य विवक्षितत्वात्। उक्तस्थलेषु तत्तात्पर्य-विषयीभूतेषु छत्र्यछत्रिसमूहगमनभोजनार्थप्रवेशदध्युपघातकावधिकरक्षणेषु मुख्यार्थ-तावच्छेदकछत्रित्वादिरूपेण तदन्वयबाधोऽस्त्येव। अतो न दोषः।

केचित्तु — लक्ष्यार्थतात्पर्यग्राहकतया मुख्यार्थबाधस्योपयोगः। तथा हि- गङ्गायां घोष इति वाक्यं तावत् भ्रमादिरूपदोषरहितेन आप्तेन पुरुषेणोच्चरितम्। तत्र गङ्गापदं समभिव्याहृतघोषपदार्थेनानन्वितः यः मुख्यार्थः प्रवाहः तद्वाचकम्। अत एव गङ्गापदं मुख्यार्थतात्पर्यशून्यम् इत्यनुमीयते। तदनन्तरं सामान्यतः समभिव्याहृतार्थान्वितार्थतात्पर्यकमिति तात्पर्यग्रहहेतुसहकारेण मुख्यार्थातिरिक्तार्थ-तात्पर्यकत्वग्रहो जायते। अत्रैवमनुमानद्वयम् —

गङ्गापदं मुख्यार्थपरत्वाभाववत् भ्रमादिरूपदोषरहिताप्तपुरुषोच्चरितत्वे सति समभिव्याहृतघोषपदार्थानन्वितमुख्यार्थकत्वात्। गङ्गापदं मुख्यार्थान्यपरम् मुख्यार्थ-परत्वाभावात् इति।

एवं मुख्यार्थसंबन्धज्ञानमपि लक्षणाजन्यशाब्दबोधे कारणम्। अन्वयव्यति-रेकाभ्यामेव। मुख्यार्थसंबन्धज्ञाने सति लक्षणाजन्यशाब्दबोधः तदभावे तदभाव इत्यन्वयव्यतिरेकौ।

तथा रूढिप्रयोजनान्यतरदपि तत्र कारणम्। अनुभवबलात्। रूढिर्नाम-प्रयोगप्राचुर्यम्। गङ्गापदस्य हि तीरे प्रयोगप्राचुर्यमस्ति। प्रयोजनं शैत्यपावनत्वा-दिप्रतीतिः। तदुक्तं काव्यप्रकाशे —

> मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
> अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।

अन्योऽर्थो लक्ष्यते यत् सेति लक्षणायाः लक्षणम्। मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनान्यतरश्चेति त्रयं लक्षणायां हेतुः। भद्रात्मनः इति शाब्दव्यञ्जनावारणाय मुख्यार्थबाध इति। असंबन्धे लक्षणायां गङ्गापदात् यमुनातटस्याप्युप-

स्थित्यापत्तिरिति तद्वारणाय तद्योगे इति। रूपवान् घट इत्यर्थे रूपो घट इति प्रयोगवारणाय रूढितोऽथ प्रयोजनादिति। अन्यत् प्रदीपोद्योतादौ द्रष्टव्यम्।

लक्षणायाः विभागः गौणी शुद्धा चेति [५०]

लक्षणा तावत् शुद्धा गौणी चेति द्विविधा। सादृश्यातिरिक्तसंबन्धेन शक्य-संबन्ध्यर्थप्रतिपादिका शुद्धा। स्वनिरूपितसादृश्याधिकरणत्वसंबन्धेन शक्य-संबन्ध्यर्थप्रतिपादिका गौणी।

यत्तु गौणी न लक्षणान्तर्गता। विशिष्टबुद्धियोग्ये संबन्धे सत्येव लक्षणायाः प्रवृत्तेः। गङ्गायां घोष इत्यत्र तु संयोगरूपः शक्यसंबन्धः विशिष्टबुद्धियोग्यः। सादृश्यं तु न विशिष्टबुद्धियोग्यम्, सत्यपि सादृश्ये सिंहवान् देवदत्तः इति विशिष्टबुद्ध्यनुदयात् इत्याहुः।

तन्न। सादृश्यस्य विशिष्टबुद्ध्ययोग्यत्वेऽपि तस्य लक्षणात्वस्वीकारात्। यथा विपरीतलक्षणास्थले — "उपकृतं बहु नाम किमुच्यते" इत्यादौ स्वनिरूपित-विरोधाधिकरणत्वसंबन्धेन लक्षणायाः स्वीकारः तद्वत्।

ते द्विविधे अपि लक्षणे प्रत्येकं अजहत्स्वार्था जहत्स्वार्था चेति द्विविधे। शक्यार्थापरित्यागेनेतरार्थलक्षणमजहत्स्वार्था। शक्यार्थापरित्यागश्च शक्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिनान्वयित्वम्। "छत्रिणो यान्ति" "कुन्तान् प्रवेशय" "काकेभ्यो दधि रक्ष्यताम्" इत्यादौ अच्छत्र्यादिसाधारणरूपेण छत्र्यादेः, कुन्तवद्विशेषणतया कुन्तादेः, दध्युपघातकत्वादिना काकादेश्च लक्ष्यार्थान्वयिन्यां क्रियायामन्वयात् अजहत्स्वार्था लक्षणा।

स्वार्थपरित्यागेनेतरार्थलक्षणं जहत्स्वार्था गां वाहीकं पश्येत्यादौ गोपदस्य गोसदृशे लक्षणायामपि शक्यार्थस्य गोः लक्ष्यार्थगोसदृशवाहीकान्वयिक्रियान्वयि-त्वाभावात् तत्र जहत्स्वार्था लक्षणा।

तत्र शुद्धा अजहत्स्वार्था यथा शुक्लमानयेत्यादौ गुणशक्तानां शुक्लादिपदानां तद्वति द्रव्ये। शुद्धा जहत्स्वार्था यथा त्वचा ज्ञातम् इत्यादौ त्वगादिशब्दानां त्वगिन्द्रिये।

गौणी जहत्स्वार्था यथा लवणत्ववाचिनो लावण्यशब्दस्य हृदयंगमत्वसादृश्यात् शोभाविशेषे। गौणी अजहत्स्वार्था तु नास्त्येव, सादृश्यसंबन्धेन लक्षणायां मुख्यार्थस्य लक्ष्यार्थान्वयिना अनन्वयात्।

---

[५०] वै.सि.ल.म. पृ. २२

गोवाहीकोभयपरे "गाव एते समानीयन्ताम्" इत्यादौ गोवाहीकसमुदायः छत्रिन्यायेन लक्ष्यते, न तु गोसदृशत्वेन। स्वस्मिन् भेदघटितस्य स्वसादृश्यस्याभावात् इति प्राञ्चः।

यत्तु मुख्यार्थविशेषणिका लक्षणा अजहत्स्वार्था। सा च गौण्यपि; गोसदृशलक्षणायां गोः विशेषणत्वादिति। तन्न। चित्रगुरित्यादावपि परमतेऽजहत्स्वार्थतापत्तेः। तत्र चित्रगोस्वामिलक्षणायां मुख्यगोर्विशेषणत्वात्।

नव्यास्तु यदा यत्किंचिद्गोसदृशत्वेन गोवाहीकसमुदायप्रतिपादनेच्छया "गाव एते यान्ति" इति प्रयुक्तम्, तदा गौण्यपि अजहत्स्वार्था संभवत्येव। गवान्तरे यत्किंचिद्गोसादृश्यसद्भावात्। वस्तुतस्तु रूपके भेदाघटितसादृश्यस्यैव संबन्धत्वादेर्वक्ष्यमाणत्वात् तत्र अजहत्स्वार्था गौणी दुर्वारैव इति प्राहुः। प्रागुक्तोदाहरणादिगताश्च लक्षणा रूढिलक्षणात्वेन व्यवह्रियन्ते। रूढिः प्रसिद्धिः।

न चैषामर्थानां प्रसिद्धत्वे शक्तिरेवास्तु, यथा अश्वगन्धादिपदानामोषधिविशेषेषु शक्तिः तद्वदिति वाच्यम्। सप्रयोजनलक्षणास्थलीयलक्ष्यार्थापेक्षया अस्य प्रसिद्धत्वेऽपि तत्पदशक्या येऽर्थाः तदपेक्षया अप्रसिद्धत्वस्यैव सत्त्वेन लक्षणायाः सिद्धेः इत्याहुः।

वस्तुतो येषामेकार्थसंबन्ध्यपरार्थबोधकत्वं तदर्थबाधप्रतिसन्धानपूर्वकमेव, तेषु प्रयोजनाभावे निरूढलक्षणेति व्यवहारः। अन्यत्र रूढिशक्तिरेव। एवं च कुशलादिपदे यदि मुख्यार्थबाधप्रतिसन्धानपूर्वकं दक्ष इत्यर्थस्य बोधः प्रामाणिकानुभवसिद्धः तदा तत्र निरूढलक्षणा, अन्यथा तु रूढिशक्तिरेव। एवं च लक्षणा प्रकारान्तरेणापि द्विधा संपन्ना, रूढा प्रयोजनवती च। तत्र रूढा उदाहृता (कुशलादिः)।

प्रयोजनवती शुद्धा अजहत्स्वार्था यथा कुन्ताः प्रविशन्ति। अत्र भीतिपलायमानमधिकृत्य प्रवृत्ते वाक्ये कुन्तानां तात्पर्यविषयकुन्तिप्रवेशान्वयबाधात् कुन्तपदस्य कुन्तसंयुक्तपुरुषे लक्षणा। लक्ष्येषु पुरुषेषु कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्। पुरुषविशेषणतया कुन्तानां प्रवेशनक्रियान्वयः स्पष्ट एव।

प्रयोजनवती जहत्स्वार्था यथा — गङ्गायां घोषः। अत्र हि प्रवाहे घोषाधिकरणत्वबाधात् गङ्गापदेन तीरं लक्ष्यते। शक्यार्थस्य प्रवाहस्य लक्ष्यार्थतीरान्वयिना घोषाधिकरणत्वेनान्वयो नास्तीति अत्र लक्षणायाः जहत्स्वार्थात्वम्। तीरे गङ्गागतशैत्यपावनत्वादिप्रतीतिः प्रयोजनम्।

प्रयोजनवती गौणी जहत्स्वार्था यथा — गौर्वाहीक इत्यादौ। अत्र वाहीके गोत्वबाधात् गोपदेन गोसदृशो लक्ष्यते। भिन्नधर्मप्रकारकोपस्थितावपि सादृश्यातिशयमहिम्ना अभेदप्रतीतिः प्रयोजनम्।

अत्र प्रयोजनभूता अभेदप्रतीतिः मानसी। आहार्याभेदस्योपस्थितेरिति केचित्। परे तु विषयविषयिपदाभ्यां गोत्ववाहीकत्वप्रकारेण तयोरुपस्थितौ प्रसिद्धत्वादिना झटिति तत्सादृश्योपस्थितौ लक्षणया सदृशप्रकारकबोधे जाते जातस्यापि भेदज्ञानस्य सादृश्यातिशयमहिम्ना गोत्ववाहीकत्वयोः सामानाधिकरण्यसंभावनया तिरोधानेन भेदज्ञानात्मकबाधबुद्धेरभावेन अनाहार्यमेवाभेदज्ञानम्। किं च बाधज्ञानसत्त्वे "अभेदबोधो भवतु" इतीच्छोत्पत्त्यनुभवाभावात् बोधस्यैवानापत्तिः।

इयांस्तु विशेषः — यत्र प्रसिद्धः साधारणधर्मः तत्र तदुपादानं न कर्तव्यम्। यत्र तु अप्रसिद्धः, यथा — "सकलकलं पुरमेतज्जातं सुधांशुबिम्बमिव" इत्यादौ, तत्र तदुपादानं विना साधारणधर्मानुपस्थितेः तदुपादानमावश्यकमिति वदन्ति।

अभेदबुद्धेर्वैयञ्जनिकत्ववादिनां तु अनाहार्यत्वं स्पष्टमेव। वैयञ्जनिके बोधे बाधबुद्धेरप्रतिबन्धकत्वात्।

वस्तुतस्तु शब्दाधीने बोधे बाधज्ञानं न प्रतिबन्धकम्, बाधनिश्चयसत्त्वेऽपि "अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया" "एष वन्ध्यासुतो याति" इत्यादितो वाच्यार्थबोधदर्शनादिति योग्यताप्रकरणे निरूपितम्। एवं चानाहार्यत्वमभेदबोधस्य स्पष्टमेवेत्यपि वदन्ति।

यदि तु शब्दजन्यभेदकधर्मोपस्थितिकालिकत्वमात्रेण आहार्यत्वव्यवहारः तर्हि अस्तु वाहीकाभिप्रायेण प्रयुक्ते "गां पश्य" इत्यादौ तात्पर्यविषये वाहीकदर्शने मुख्यार्थगोसंसर्गबाधात् गोशब्देन गोसदृशो लक्ष्यते। सादृश्यातिशयमहिम्ना लक्ष्ये शक्यार्थभेदप्रतीतिः फलम्। एषा तु अनाहार्यैव। शब्दजभेदकधर्मोपस्थितिकालिकत्वाभावेन अधिकचमत्कारकारित्वम्। शब्दजेत्युक्तेः मुख्यार्थबाधज्ञानविधया भेदस्योपस्थितिसत्त्वेऽपि न क्षतिः। इदमेवाभिप्रेत्य "सर्वथैवाभेदावगमोऽत्र प्रयोजनम्" ईति काव्यप्रकाशकाराः। एवं च वाहीकत्वेनानुपस्थितिरेव, शुक्तौ रजतत्वारोपे शुक्तित्वेनानुपस्थितिवत्।

केचित्तु गोत्वेनैव वाहीकस्य बोधः। शक्यतावच्छेदकातिरिक्तरूपेण (अ)शक्यबोधे लक्षणाया इव शक्यतावच्छेदकरूपेण शक्यान्यबोधेऽपि तस्याः प्रसरात् न तु गोसदृशत्वेनेत्याहुः।

अन्ये तु गोत्ववाहीकत्वोभयधर्मप्रकारकवाहीकविशेष्यकबोधः "गौः" इत्यतो जायते। शक्यतावच्छेदकलक्ष्यतावच्छेदकोभयप्रकारकबुद्धेरेव एतल्लक्षणाकार्यत्वात् (गौणीजहत्स्वार्थाकार्यत्वात्)। पृथक्पदजन्यवाहीकत्वानुपस्थितिरेव सारोपातोऽस्या भेदिकेत्याहुः।

इदमेव भेदद्वयं सारोपासाध्यवसानात्वेन आलंकारिकैर्व्यवहृतम्। शब्दजविषय (उपमेय?) निष्ठासाधारणधर्मग्रहे सति यत्रान्यस्यान्यतादात्म्यप्रतीतिः सा सारोपा। तद्ग्रहेऽसत्यपि यत्रान्यस्यान्यतादात्म्यप्रतीतिः सा साध्यवसाना।

इदं भेदद्वयं शुद्धाया अपि। यथा जीवनं घृतम् इत्यादौ। अत्र हि जीवनपदेन जीवनजनकं लक्ष्यते। इतरवैलक्षण्येन तज्जनकत्वप्रतीतिः फलम्।

अपरे तु — सर्वत्रैव लक्षणाज्ञानस्य लक्ष्यतावच्छेदकशक्यतावच्छेदकोभय-प्रकारकशाब्दत्वं कार्यतावच्छेदकम्। तथैवानुभवात्। एवं च गङ्गायां घोष इत्यत्र गङ्गात्वतीरत्वाभ्यां तीरबोधः। एवं च शैत्यपावनत्वादिप्रतीत्यर्थं मध्ये शक्या-भेदविषयकं ज्ञानान्तरं नाङ्गीकरणीयमिति लाघवम्।

न चैवं प्रवाहत्वविशिष्टे घोषाभावज्ञानेन तीरादौ प्रवाहत्वाभावज्ञानेन च प्रतिबन्धात् कथं लक्ष्यार्थबोधः? कथं वा प्राङ्मते शक्याभेदबुद्धिः? कथं वा "गङ्गावृत्तिधर्माभाववत् तीरम्" इति ज्ञाने तद्वृत्तिशैत्यपावनत्वादेः तीरे प्रतीतिरिति वाच्यम्। बाधबुद्धेः शाब्दबोधाप्रतिबन्धकत्वात्।

न चैवमपि बाधबुद्ध्या जायमानबोधेऽप्रामाण्यशङ्कायाः जनने ततः चमत्का-रानापत्तिरिति वाच्यम्। लक्षणाज्ञानेन बाधग्रहाधीनाप्रामाण्यज्ञानस्य प्रतिबन्धः इति स्वीकारात्। विषयतासंबन्धेन शक्यतावच्छेदकतत्समानाधिकरणधर्मएतदन्यतर-विषयकबाधग्रहजन्याप्रामाण्यग्रहं प्रति जनकतासंबन्धेन लक्षणाज्ञानं प्रतिबन्धक-मिति प्रतिबध्यप्रतिबन्धकभावः विषयनिष्ठप्रत्यासत्त्या कल्प्यते।

"प्रवाहत्वतीरत्वप्रकारकबोधः अप्रमा" इत्याकारकः अप्रमात्वग्रहः। अयं विषयतासंबन्धेन बोधे वर्तते। तत्रैव जनकतासंबन्धेन लक्षणाज्ञानं वर्तते। लक्षणा-ज्ञानस्य तादृशबोधजनकत्वात्। "गौर्वाहीकः" इत्यादौ तु सादृश्यमहिम्नापि बाधबुद्धिस्थगनम् — इत्याहुः।

यत्तु "गौर्वाहीकः" इत्यादौ गौण्यां साधारणधर्माश्रयो जडादिः जडत्वेन लक्ष्यः। गोवृत्त्यसाधारणजडत्वप्रतीतिः फलम् इति, तन्न। "गौर्वाहीको जडः" इत्यादौ पौनरुक्त्यापत्तेः।

न चोपात्तधर्मातिरिक्तधर्ममुखेन लक्षणेति वाच्यम्। तदतिरिक्तधर्मास्फुरणेऽपि वाक्यार्थप्रतीतिदर्शनात्। "अक्षसंघाताङ्कितानि शरीराणि" "सकलकलं पुरं सुधांशुबिम्बम्" इत्यादौ श्लेषलब्धधर्मं विना धर्मान्तरस्य सर्वथैवास्फुरणाच्च।

ननु "गौर्वाहीकः" इत्यादिसारोपास्थले सदृशत्वेन लक्षणेति त्वदुक्तमप्ययुक्तम्। तथा सति सादृश्यस्य शब्दोपात्तत्वेन उपमालंकारस्य प्रसङ्गेन "गौरिव गवयः" इत्यत्रोपमा "गौर्वाहिकः" इत्यत्र रूपकम् इत्यालंकारिकसिद्धान्तभङ्गापत्तिः। न हि सादृश्यस्य वाच्यत्वे एवोपमा, "पद्मप्रतिपक्षमाननम्" इत्यादौ प्रतिपक्षशब्द-लक्ष्यत्वेऽपि सादृश्यस्योपमालंकारदर्शनात्। किं च "वाहीकोऽयं न गोसदृशः, अपि तु गौरेव" इत्यादौ सादृश्याभाववत्तया ज्ञाते सादृश्यबुद्ध्ययोगः इति चेत् —

न। भेदगर्भसादृश्यप्रतीतावुपमा, तदेव सदृशादिपदवाच्यम्, तदगर्भं सादृश्यं लक्ष्यतावच्छेदकम् इति न दोषः।

न च भेदगर्भसादृश्यवति लक्षणास्वीकारे गौर्वाहीक इत्यादावुपमापि स्यादिति वाच्यम्। अभेदप्रतिपादनेच्छाधीनायाः लक्षणायाः तत्रासंभवात्। भेदाभेदयोर्विरोधेन युगपत् बुद्धावुपारोहासंभवात्।

न चैवमुपमितिसमासे मुखचन्द्र इत्यादौ उत्तरपदस्य सदृशलक्षणायामभेदप्रतीतौ रूपकापत्तिः इति वाच्यम्। भेदघटितसादृश्यवति तत्र निरूढलक्षणास्वीकारेण अभेदप्रतीतिरूपप्रयोजनापेक्षाविरहात् इत्याहुः।

नव्यास्तु — "गौर्वाहीकः" इत्यादौ न लक्षणा। नामार्थयोरभेदनान्वय इति रीत्या उपमानोपमेययोः अभेदेनैव अन्वयः। सादृश्यमहिम्ना च अभेदबुद्ध्युपपत्तौ लक्षणायाः व्यर्थत्वात्।

किं च लक्षणास्वीकारेऽपि "राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्" इत्यादौ राजा चासौ नारायणश्चेति विशेषणसमासायत्तं रूपकं वा, राजा नारायण इवेति उपमितसमासायत्ता उपमा वेति संदेहे — यद्यत्रोपमा स्यात् तर्हि नारायणसदृशो राजेत्यर्थे नारायणे लक्ष्मीकर्तृकालिङ्गनान्वयेऽपि नारायणसदृशे लक्ष्मीकर्तृकालिङ्गनसंसर्गबाध इति रूपकमेवेत्यालंकारिकोक्तं विरुध्येत, रूपकेऽपि सदृशलक्षणायां राजाभिन्नं नारायणसदृशमित्यर्थे उक्तसंसर्गबाधतादवस्थ्यात्।

यदि तु नारायणसदृशस्य लक्ष्यस्य शक्यतावच्छेदकनारायणत्वेन भानमिति मते नायं दोषः, मतान्तरेऽपि भेदागर्भसादृश्यस्यैव लक्ष्यतावच्छेदकत्वान्न दोष इति विभाव्यते, तर्हि लक्षणाया वैयर्थ्यमेव दोषः।

वस्तुतस्तु "वाहीकोऽयमपरो गौः" इत्यादौ अपरादिशब्दैः वाहीके प्रसिद्ध-गोभेदप्रतिपादनेन विरोधात् न वाच्यार्थयोः अभेदबोधः, किं तु गोसदृशे लक्षणैव। लक्षणायाश्च न शक्यार्थयोरभेदबुद्धिः फलम्, किं तु सादृश्यातिशयबुद्धिः। तेन च सकलतत्कार्यकारित्वं फलति। एवम् "अपूर्वो गौः" इति वाहीकाभिप्रायेण प्रयुक्तेऽपि बोध्यम्। तत्रापि न प्रसिद्धगवाभेदः लक्षणायाः फलम्, अपूर्वपदेन तदभेदस्य तिरस्कारात्। वाहीकत्वाद्यप्रतीतिकृतश्चाधिकचमत्कारः। इदमेवाभिप्रेत्य "गौर्वाहीक" इत्यादावभेदरूपकातिशयोक्ती। ईदृशस्थले च ताद्रूप्यरूपकातिशयोक्ती इति कुवलयानन्दकृतः।

न चैवमुपमाया अपि रूपकत्वापत्तिः इति वाच्यम्। यत्र सादृश्यप्रतीति-कृतश्चमत्कारः तत्रोपमा, यत्र तु अभेदप्रतीतिकृतः सादृश्यातिशयप्रतीतिकृतश्च चमत्कारः तत्र रूपकम्। चमत्कारनिदानकृतो हि अलंकाराणां परस्परं भेदः।

अत्र मीमांसकाः — "गौर्वाहीकः" इत्यादौ गोशब्देन स्वशक्यार्थगतजाड्यादि-गुणसदृशजाड्यादय एव लक्ष्यन्ते। तैश्च आक्षेपेण स्वाश्रयव्यक्तिलाभः। जाति-शक्तिपक्षे आक्षेपेण व्यक्तिलाभवत्। मीमांसकमते हि जातिः पदार्थः। गौरित्यत्र गोशब्दस्य गोत्वमर्थः। आश्रयमन्तरा च जातेः स्थितिप्रतीती न भवतः इति "येन विना यदनुपपन्नं तत्तेनाक्षिप्यत" इति न्यायात् व्यक्तेराक्षेपात् बोधः। इत्याहुः।

तन्न। "जडो गौर्वाहीकः" इत्यादौ पौनरुक्त्यापत्तेः।

किं च स्वरूपतो जातिविषयकशक्तिज्ञानं स्वरूपतो जातिविषयकस्मरणं जनयत् व्यक्तिस्मरणं जनयतीति युक्तम्; व्यक्तिमविषयीकृत्य स्वरूपतो जातिभानस्यानुभवविरुद्धत्वात्। जाड्यादेस्तु जाड्यत्वादिना रूपान्तरेणैव भानात् तस्य विशेष्यतयापि भानसंभवेन धर्मिस्मारणे मानाभावात्।

न चैवं गुणिबोधकशुक्लादिपदानां गुण एव शक्तिः, गुणिनो बोधश्च आक्षेपादिति वक्तुं शक्यतया "जात्यादिः" इति काव्यप्रकाशोक्तमसंगतं स्यादिति वाच्यम्। इत एवास्वरसात् तत्र "जातिरेव वा" इति पक्षान्तरस्योक्ततया अदोषात्।

न च धर्मशक्तिज्ञानं धर्मतदाश्रयोभयविषयकबोधजनकमिति कार्यकारणभावे को दोष इति वाच्यम्। शुक्लमित्यादितो गुणपरादपि धर्मिबोधापत्तेः। वस्तुतो धर्मिणि लक्षणेत्येव तथा कार्यकारणभावं वदतामाशयः।

इयांस्तु विशेषः — जातिशक्तघटादिशब्दानां न क्वापि केवलजातिबोधकतया प्रयोगः। शुक्लादिशब्दानां तु केवलगुणबोधकतयापि प्रयोगोऽस्तीति।

केचित्तु — "ग्रामो दग्धः, पुष्पितं वनम्" इत्यादिप्रयोगे ग्रामादिपदस्य स्वार्थैकदेशपरित्यागेन तदेकदेशे वृत्तिः। तत्र जहदजहल्लक्षणाख्योऽन्योऽपि भेदः। दग्धभूयस्त्वादिद्योतनं फलमित्याहुः।

न्यायसूत्रोक्तानि लक्षणायाः निमित्तानि

न्यायसूत्रकारेण — सहचारण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधन-आधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटक-अन्न-पुरुषेष्वतद्भावेऽपि तदुपचारः[५१] — इति सूत्रे तच्छब्दावाच्यो योऽर्थः तस्मिन् तच्छब्दस्य प्रयोगे निमित्तानि दश प्रोक्तानि। अत्र सूत्रे भाष्ये वार्तिके टीकायां वा लक्षणा गौणी इति प्रभेदो नैव व्यवहृतः। अत्र सामीप्यं पुरस्कृत्य गङ्गाशब्देन तीरमभिधीयत इति सूत्रे गङ्गापदप्रयोगात् अवगम्यते। लक्षणायाः प्रसिद्धम् इदम् उदाहरणम्। अन्यत् अपि सर्वं लक्षणाया उदाहरणं भवति। सहचरणादयः शक्यसंबन्धरूपा इति प्रतीयते। अत्रोदाहरणानि पदार्थविचारावसरे प्रदर्शयिष्यन्ते।

न्यायपरिशुद्धिस्थविशेषाः

वृत्तिर्द्विधा — अभिधोपचारभेदात्। व्युत्पत्तिसिद्ध एवार्थे वृत्तिरभिधा यथा सिंहशब्दस्य मृगेन्द्रे। सा जातिगुणादिविषयभेदात् योगरूढितत्समुच्चयभेदाच्च बहुविधा। मुख्यार्थबाधे सति तदासन्ने वृत्तिरुपचारः। आसत्तिश्च द्विधा- मुख्यार्थसंबन्धः तद्गुणसंबन्धश्चेति। तत्र पूर्वेण प्रवृत्तिर्लक्षणा — यथा गङ्गायां घोषः प्रतिवसति इत्यत्र गङ्गाशब्दस्य प्रवाहविशेषरूपवाच्यसंबन्धिनि तीरे। एवं लक्षितलक्षणा ग्राह्या। द्वितीयेन प्रवृत्तिर्गौणी। यथा सिंहो देवदत्त इत्यत्र सिंहशब्दस्य शौर्यादिगुणयोगिनि देवदत्ते। तत्त्वरत्नाकरे त्वेवमुक्तम् —

अभिधानाभिधेयत्वमतः शब्दार्थयोः स्थितम्।
संबन्धोऽत्राभिधा द्वेधा बोध्या मुख्यजघन्यतः।
अभिधार्थावगत्यात्मा शब्दं व्यापारयिष्यतः।
शब्दशक्तिनिमित्ता सा स्वार्थे मुख्याभिधीयते।
स्वार्थाभिधानद्वारा स्याज्जघन्यार्थान्तरे मता। इति।

न च गौणलाक्षणिकप्रयोगयोरवाच्यविषयत्वात् अवाच्यत्वम्। संबन्धसादृश्य-मूलमात्रप्रवृत्तेरप्यनादित्वात्। तत एव विवक्षितस्थले यथोचितं प्रयोगोपपत्तेः। — इति न्यायपरिशुद्धौ प्रोक्तम्।

---

[५१] न्या.सू. २.२.६४

न्यायकौस्तुभे लक्षणाविचारः[५२]

शक्तिश्च मुख्या वृत्तिः। लक्षणापि वृत्त्यन्तरम्। तेन गङ्गायां घोषः इत्यादौ गङ्गापदादेः गङ्गातीरादौ शक्तिविरहेऽपि गङ्गातीरवृत्तिः घोषः इत्यादिशाब्दबोधस्य नानुपपत्तिः। लक्षणयैव गङ्गापदादिना गङ्गातीरादेः उपस्थित्या तादृशबोधोपपत्तेः। लक्षणा च स्वशक्यसंबन्धः स्वं लाक्षणिकगङ्गादिपदम्।

गङ्गादिपदानां तीरादौ शक्तिरेवेति पूर्वपक्षः

अत्रेदं विचार्यते — गङ्गादिपदस्य तीरादौ शक्तिरेवास्तु। लक्षणाख्यवृत्त्यन्तर-कल्पने गौरवात्, शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारणत्वात्। लाघवेन गङ्गादिपदनिरूपितशक्तिज्ञानजन्योपस्थितेरेव शाब्दधीहेतुत्वाच्च। लक्षणाख्यवृत्त्यन्तर-कल्पने लक्षणाज्ञानजन्योपस्थितेरपि शाब्दधीहेतुत्वं कल्पनीयमिति गौरवात्।

यत्तु — गङ्गादिपदस्य लक्षणीयतीरादिसहस्रार्थेषु प्रत्येकं शक्तिः कल्पनीया, तद्ग्रहार्थं वृद्धव्यवहारापेक्षा चेति लक्षणायाः कल्पनमेव युक्तम्।

न च लक्षणाग्रहार्थमपि वृद्धव्यवहारापेक्षा आवश्यकीति वाच्यम्। गङ्गायां घोष इत्याद्याप्तवाक्यं श्रुत्वा तस्य प्रामाण्योपपादनार्थमेव स्वार्थसंबन्धेन उपस्थिततीर-बोधकत्वकल्पनात्।

न च तीरादिसहस्रेषु संयोगसमवायादिनानासंबन्धानां शाब्दबोध-प्रयोजकत्वे गौरवमिति वाच्यम्। तीरादिसहस्रार्थेषु अतिरिक्तायाः शक्तेः, तज्जन्यस्मृतेः तत्र शाब्दहेतुत्वस्य च कल्पनापेक्षया क्लृप्तानां संबन्धानां क्लृप्तायाः तदधीनस्मृतेश्च शाब्दधीहेतुत्वकल्पने एव लाघवादिति।

तन्न। गङ्गादिपदस्य तीरादौ लक्षणाङ्गीकर्तृमते गङ्गायां घोष इत्यादौ प्रत्येकं गङ्गातीरादिविषयभेदेन उपस्थितेः कार्यकारणभावद्वयकल्पनाप्रसक्त्या महागौरवात्। तथा हि —

गङ्गायां घोष इत्यतः गङ्गापदस्य तीरे शक्तिभ्रमात् यत्र शाब्दबोधः, तत्र तदनुरोधेन गङ्गापदजन्यतीरशाब्दबोधं प्रति तीरविशेष्यकगङ्गापदशक्तिप्रकारक-ज्ञानजन्योपस्थितिः कारणमित्येकः कार्यकारणभावः। एवं यत्र तादृशशक्ति-ज्ञानाभावदशायां गङ्गापदस्य तीरे लक्षणाज्ञानात् शाब्दबोधः तत्र तादृशशाब्दबोधं प्रति तीरविशेष्यकगङ्गापदलक्षणाविषयकज्ञानजन्योपस्थितिः कारणमित्यपरः कार्य-कारणभाव इति कार्यकारणभावद्वयकल्पनेन गौरवम्।

---

[५२] न्या.कौ. पृ. ६२०

गङ्गापदस्य तीरे शक्तिमेवोपगम्य लक्षणानङ्गीकर्तृमते च कार्यकारणभावेनैकेनैव गङ्गापदजन्यतीरविषयकशाब्दबोधं प्रति तीरविशेष्यकगङ्गापदशक्तिविषयकज्ञानजन्योपस्थितिः कारणमित्येवंरूपेण निर्वाह इति लाघवं स्पष्टमेव — इति।

तत्र सिद्धान्तः

अत्रोच्यते। अयं मुख्यार्थः अयममुख्यार्थः इति व्यवहारानुरोधेन लक्षणाङ्गीकारः आवश्यकः। शक्यत्वलक्ष्यत्वातिरिक्तयोः मुख्यत्वामुख्यत्वयोः दुर्वचत्वात्।

किं च मुख्यार्थान्वयानुपपत्तिमनपेक्ष्यैव गङ्गापदात् प्रवाहबोधः, तामपेक्ष्यैव तस्मात् तीरादिबोधः इति वैरूप्यनिर्वाहाय लक्षणाङ्गीकार आवश्यकः। तदङ्गीकारे शक्यार्थबोधे उक्तानुपपत्तेरनपेक्षा, लक्ष्यार्थबोधे तस्याः अपेक्षेति सुवचत्वात्।

अपि च तीरादीनां तीरादिशब्दैः प्रतिपादने न शैत्यपावनत्वादिप्रतीतिः, गङ्गादिशब्दैः प्रतिपादने तु भवति तत्प्रतीतिरिति सर्वजनसिद्धस्यानुभवस्य लक्षणानङ्गीकारे न निर्वाहः। तदङ्गीकारे तु "स्वायत्ते शब्दप्रयोगे किमिति अवाचकं प्रयुञ्जामहे" इति न्यायेन तीरादिवाचकतीरादिशब्दं विहाय तदवाचकगङ्गादिपदप्रयोगस्य किं प्रयोजनमिति प्रतिसन्धानेन तादृशप्रयोगप्रयोजनानुपपत्त्या गङ्गादिशब्दैः तीरादिप्रतिपादने भवति शैत्यपावनत्वादिप्रतीत्युपपत्तिः।

इत्थं चागत्या शक्तिज्ञानलक्षणाज्ञानजन्योपस्थित्योः कारणताद्वयमङ्गीकरणीयम्। प्रामाणिकगौरवस्यादोषत्वात्।

न च शक्तिलक्षणाज्ञानयोः तज्जन्योपस्थित्योश्च परस्परजन्यबोधे परस्परस्य व्यतिरेकव्यभिचार इति वाच्यम्। स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबन्धेन तत्तद्वैशिष्ट्यस्य तत्तत्कार्यतावच्छेदककोटौ निवेशेन व्यतिरेकव्यभिचाराभावात्।

लक्षितलक्षणा वृत्त्यन्तरम् इति प्राचां मतम्[५३]

अत्र प्राञ्चः — लक्षितलक्षणापि वृत्त्यन्तरम्। तथा हि — द्विरेफो गुञ्जतीत्यादौ द्विरेफपदात् भ्रमरबोधः सर्वसिद्धः। स च न द्विरेफपदशक्त्या। तस्य बहुव्रीहिसमासात्मकतया (द्वौ रेफौ यस्येति विग्रहात्) पदसमुदायत्वेन शक्त्यभावात्। नापि द्विरेफपदलक्षणया, शक्तेरिव लक्षणाया अपि पदमात्र-वृत्तित्वात्। तस्मात् रेफशब्दस्य रेफद्वयसंबन्धिनि लक्षणायां तात्पर्यस्य ग्राहकेण द्विशब्देन समभिव्याहृत-

---

[५३] न्या.कौ. पृ. ६३६

रेफशब्देन रेफद्वयसंबन्धि भ्रमरपदं लक्ष्यते। लक्षितेन च भ्रमरपदेन तादात्म्य-रूपस्वशक्यसंबन्धेन भ्रमररूपार्थो लक्ष्यते इति द्विरेफपदस्य भ्रमरे लक्षित-लक्षणारूपं वृत्त्यन्तरमावश्यकम्।

लक्षितेन भ्रमरपदेन शक्त्यैव बोधोऽस्तु इत्याक्षेपः तत्परिहारश्च

अथ द्विरेफपदलक्ष्यभ्रमरपदेन शक्त्यैव भ्रमरबोधसंभवेन भ्रमरपदस्य न भ्रमरे लक्षणा इति चेत् — न। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन भ्रमरस्य द्विरेफपदलक्षितभ्रमरपदार्थत्वेऽपि द्विरेफपदार्थत्वाभावेन तत्र द्विरेफपदोत्तर-विभक्त्यर्थान्वयानुपपत्तेः। मन्मते च द्विरेफपदस्यैव लक्षितलक्षणा वृत्तिरिति भ्रमरस्य द्विरेफपदार्थत्वान्नानुपपत्तिः। एवं च लक्षितस्य भ्रमरपदस्य लक्षणा लक्षितलक्षणा। सा च द्विरेफपदस्य वृत्तिः — इति वदन्ति।

प्राचां मतस्य निरासः

तदसत्। द्विरेफपदलक्ष्यभ्रमरपदेन शक्त्यैव भ्रमरबोधसंभवे तत्र लक्षणाया असंभवेन लक्षितशक्तेरेव वृत्तित्वौचित्यात्। भवन्मते लक्षितलक्षणाया इव मन्मते लक्षितशक्तेरपि द्विरेफपदवृत्तितया भ्रमरस्य द्विरेफपदार्थत्वसंभवेन तत्र विभक्त्यर्था-न्वयानुपपत्तेरभावात्।

शक्यपरंपरासंबन्धेन लक्षणा लक्षितलक्षणा, सा न वृत्त्यन्तरम् इति मिश्रमतम्

मिश्रास्तु — शक्यसंबन्धो हि लक्षणा, न तु शक्यस्य साक्षात्संबन्ध एव, गौरवात्। एवं च परम्परासंबन्धेन लक्षणैव लक्षितलक्षणा। स्वशक्यपद-घटितलक्षणा सेति तु यावत्। तथा च परंपरासंबन्धेन लक्षणाया एव लक्षित-लक्षणात्वेन द्विरेफपदस्य स्वलक्ष्यभ्रमरपदोपस्थाप्यत्वरूपेण स्वलक्ष्यभ्रमरपद-घटितपरंपरासंबन्धेन भ्रमरत्वरूपेण भ्रमररूपार्थोपस्थापकत्वसंभवात् द्विरेफपद-लक्षणयैवोपपत्तेः नातिरिक्तलक्षितलक्षणाख्यवृत्तिकल्पनम् — इति प्राहुः।

द्विरेफपदं पङ्कजादिपदवत् योगरूढमिति नवीनमतम्

नवीनास्तु — द्विरेफपदात् उपदर्शितपरम्परासंबन्धेन भ्रमरत्व-वर्वरत्व-स्रस्तरत्व-प्रस्तरत्वादीनामनियतोपस्थितौ तस्य भ्रमरपर्यायत्वमनुपपन्नम्। तस्मात् रेफपदस्य रेफघटितपरंपरासंबन्धित्वेन लक्षणा। एकदेशे रेफे द्विपदार्थस्या-भेदेनान्वयः।

अस्तु वा द्विपदस्य तात्पर्यग्राहकतया परंपरासंबन्धरूपलक्षणयैव द्विरेफसंबन्धी लक्ष्यः। स च योगार्थ एव, यौगिकव्युत्पत्तिप्रयोज्यत्वात्। स च प्रस्तरादावतिप्रसक्त इति भ्रमरत्वविशिष्टे रूढिः। तथा च रेफद्वयसंबन्ध्यभिन्नो भ्रमरः इति द्विरेफपदात् बोधः। तथा च द्विरेफपदं योगरूढमेव, पङ्कजलवणादिपदवदिति प्राहुः।

लक्षणाद्वैविध्यम्

जहत्स्वार्था अजहत्स्वार्था चेति लक्षणा द्विविधेति मुक्तावलीन्यायकौस्तुभादौ प्रत्यपादि। जहदजहल्लक्षणेति तृतीयापि विधा तर्कसंग्रहदीपिकाप्रकाशिकादौ प्रतिपादिता। तत्तत्त्वमिदानीं निरूप्यते। स्वार्थपदं परित्यज्य जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा इत्यपि व्यवहरन्ति।

"यत्र वाच्यार्थस्यान्वयाभावः तत्र जहल्लक्षणा, यथा मञ्चाः क्रोशन्तीति" इति दीपिका। तस्या अयमर्थः — यस्मिन् पदे लक्षणाघटकवाच्यार्थविषयकशाब्दबोधजनकत्वाभावः तत्पदनिष्ठा लक्षणा जहल्लक्षणा। स्वघटकशक्याविषयकशाब्दबोधप्रयोजकलक्षणा जहल्लक्षणा, तन्निरूपकं पदं जहल्लाक्षणिकम् इति प्राञ्चः।

एतन्मते मञ्चाः क्रोशन्तीत्यादौ मञ्चादिपदस्य केवलपुरुषत्वावच्छिन्ने लक्षणास्वीकारे पुरुषाः क्रोशन्तीति बोधस्यैव जायमानतया सा जहल्लक्षणैव। मञ्चस्थपुरुषत्वावच्छिन्ने लक्षणास्वीकारे मञ्चस्थपुरुषाः क्रोशन्तीति बोधस्यैव जायमानतया तादृशबोधस्य लक्षणाघटकशक्यविषयकतया सा अजहल्लक्षणैव।

नव्यास्तु — यत्र = यादृशपदे, वाच्यार्थस्यान्वयाभावः = समभिव्याहृतपदार्थे स्वशक्यार्थस्य संबन्धाभावः, स्वशक्यानन्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधजनकत्वमिति यावत्। तादृशपदनिष्ठा लक्षणा जहल्लक्षणेत्यर्थः। तथा च स्वघटकशक्यानन्वितसमभिव्याहृतपदार्थविषयकशाब्दप्रयोजकलक्षणा जहल्लक्षणा, तन्निरूपकं पदं जहल्लाक्षणिकम्। एतन्मते मञ्चाः क्रोशन्तीत्यत्र मञ्चपदस्य केवलपुरुषत्वावच्छिन्नलक्षणेव मञ्चस्थपुरुषत्वावच्छिन्नलक्षणापि जहल्लक्षणैव। उभयोरपि लक्षणयोः स्वघटकशक्यानन्वितक्रोशनरूपसमभिव्याहृतपदार्थविषयकशाब्दबोधप्रयोजकत्वात्।

जहत्स्वार्था, अजहत्स्वार्था च

"यत्र वाच्यार्थस्याप्यन्वयः तत्राजहल्लक्षणा" इति दीपिकाग्रन्थः। तस्यायमर्थः — यत्पदे लक्षणाघटकशक्यार्थविषयकबोधजनकत्वम्, लक्षणाघटकशक्यान्वितसमभिव्याहृतपदार्थविषयकबोधजनकत्वं वा तत्पदनिष्ठा लक्षणा अजहल्लक्षणेति। तथा च

स्वघटकशक्यार्थविषयकशाब्दबोधप्रयोजकलक्षणा, स्वघटकशक्यान्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधप्रयोजकलक्षणा वा अजहल्लक्षणा। तन्निरूपकं पदमजहल्लाक्षणिकमिति पर्यवसितम्।

"योद्धुं छत्रिणो गच्छन्ति" इत्यादौ छत्रिपदस्य एकसार्थवाहित्वे लक्षणा। एकसार्थवाहित्वं च छत्रिरथगजतुरगोष्ट्रादिघटितसमुदायघटकत्वम्। तदेवोद्देश्यतावच्छेदकम्। तादृशघटकत्वावच्छेदेनैव गमनकर्तृत्वरूपविधेयान्वयस्वीकारात् तादृशसमुदायघटकत्रिचतुरादिगमनकाले योद्धुं छत्रिणो गच्छन्तीति न प्रयोगः। शक्यार्थस्य छत्रिणोऽपि शाब्दबोधविषयत्वात् गमनकर्तृत्वान्वितत्वाच्च छत्रिपदलक्षणायाः अजहल्लक्षणात्वम्।

जहदजहल्लक्षणा

"यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहल्लक्षणा" यत्पदे शक्यैकदेशमविषयीकृत्य, शक्यैकदेशानन्वितत्वे सति वा, एकदेशविषयकशाब्दबोधजनकत्वं एकदेशान्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधजनकत्वं वा तत्पदे जहदजहल्लक्षणा। तथा च शक्यविशेषणाविषयकशक्यविशेष्यविषयकशाब्दबोधप्रयोजकलक्षणा वा शक्यविशेषणानन्वितशक्यविशेष्यान्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधप्रयोजकलक्षणा वा जहदजहल्लक्षणा, तन्निरूपकं पदं जहदजहल्लाक्षणिकमित्युक्तं भवति। यथा तत्त्वमसीति। अत्र तच्छब्दस्य सर्वज्ञत्वविशिष्टात्मशक्ततया युष्मच्छब्दस्य किंचिज्ज्ञत्वविशिष्टात्मशक्ततया तयोः नीलघटपीतघटयोरेव ऐक्यासंभवेन तच्छब्दशक्ययुष्मच्छब्दशक्ययोः ऐक्यप्रतिपादकोक्तश्रुतेरप्रामाण्यापत्त्या तत्पदशक्यैकदेशसर्वज्ञत्वं युष्मत्पदशक्यैकदेशकिंचिज्ज्ञत्वं च परित्यज्य तत्पदयुष्मत्पदयोः केवलात्मत्वावच्छिन्ने लक्षणा स्वीकार्या।

इदमुदाहरणं तु जीवब्रह्मणोरैक्यं ब्रुवतां मताभिप्रायेण। नैयायिकमतरीत्या तु सोऽयं देवदत्त इत्यादौ तत्तांशस्येदानीमसंभवात् हानम्, इदंत्वांशस्य संभवादहानमिति जहदजहल्लक्षणामाचक्षते।

परे तु घटोऽनित्य इत्यादौ घटत्वस्येव सोऽयं देवदत्त इत्यादौ तत्तांशस्योत्पलक्षणतया भाने न किंचित् बाधकमिति किं जहदजहल्लक्षणयेति वदन्ति — इति नीलकण्ठप्रकाशिकायाम्।

न्यायमते "स कीचकैर्मारुतपूर्णरन्ध्रैः" इत्यत्र कीचकपदं जहदजहल्लक्षणाया उदाहरणम्। तत्र तस्य विशेषणांशं परित्यज्य विशेष्यवेणुमात्रबोधकत्वादिति रामरुद्र्याम्।

गौणी वृत्तिः

"गौण्यपि लक्षणैव लक्ष्यमाणगुणसंबन्धस्वरूपा यथा अग्निर्माणकः इति" दीपिका।

ननु गङ्गायां घोषः इत्यत्र तीरे शक्यस्य प्रवाहस्येव "अग्निर्माणवकः इत्यादौ माणवके शक्यस्याग्नेः साक्षात्संबन्धो न संभवतीति कथं लक्षणया निर्वाह इति चेत् – उच्यते। शक्यसंबन्धो हि लक्षणा। स च क्वचित् साक्षात्संबन्धः, क्वचित् परम्परासंबन्धः। एवं च शक्यस्याग्नेः स्वनिष्ठशुचित्ववत्त्वसंबन्ध एव लक्षणा इति प्रकाशिकाकाराः।

नृसिंहशास्त्रिणस्तु — गौण्यपीत्यत्र अपिना लक्षितलक्षणा गृह्यते। तथा च द्विरेफमानयेत्यादौ द्विरेफादिपदनिरूपितभ्रमरादिनिष्ठलक्षितलक्षणायाः स्ववाच्यरेफ-द्वयघटितपदवाच्यत्वरूपशक्यप्रतियोगिकपरम्परासंबन्धरूपत्वात् यथा लक्षणाया-मन्तर्भावः, तथा गौण्या वृत्तेरपि सादृश्यात्मकशक्यसंबन्धरूपत्वात् लक्षणाया-मन्तर्भावः इत्याहुः।

गौणीवृत्तिविषये मीमांसकमतम्

पूर्वमीमांसायां प्रथमाध्यायचतुर्थपादे तत्सिद्धिपेटिकायां "तत्सिद्धिजातिसारूप्य-प्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः" इति सूत्रेण तत्सिद्धिः जातिः सारूप्यं प्रशंसा भूमा लिङ्गसमवाय इति षट् गौण्या वृत्तेः निमित्ततया निर्दिष्टानि। लक्षणायाः निमित्तानि तु सहचरणेत्यादिन्यायसूत्रे निर्दिष्टानि।

तत्सिद्धिः

तत्र तत्सिद्धिर्नाम तत्कार्यकारित्वम्। यथा "यजमानः प्रस्तरः" इत्यत्र यजमान-पदं यजमानकार्यकर्तृत्वरूपं गुणं पुरस्कृत्य प्रस्तरं बोधयति। तेन प्रस्तरस्य स्तुतिः फलति। यजमाननिष्ठकार्यकर्तृत्वसजातीयकार्यकर्तृत्वाश्रयः प्रस्तर इति बोधः।

ननु अध्यारोपितार्थवृत्तित्वे गौणत्वं लोके प्रसिद्धम्। सिंहत्वस्य देवदत्ते आहार्यारोपात्। न च तत् वेदे संभवति। आरोपकपुरुषाभावादिति चेत् – विनाप्यारोपं सिंहशब्दस्य सादृश्यमात्रविवक्षया देवदत्ते काव्यलोकयोः प्रयोग-दर्शनात्। अतः स्वशक्यगुणसजातीयगुणयोगनिमित्तकत्वं गौणत्वम्। सिंहनिष्ठ-क्रूरत्वसमानजातीयक्रूरत्वयोगाच्च सिंहपदस्य देवदत्ते प्रवृत्तेः सिंहो देवदत्त इत्यत्र लक्षणसमन्वयः। पुष्पादौ खसंबन्धित्वारोपेण चारोपितं खपुष्पशब्दार्थमङ्गीकृत्य

तद्वृत्तिगुणानामसत्त्वादीनां सिद्धान्ते सत्त्वाच्च न खपुष्पं भवत्सिद्धान्त इत्यादावव्याप्तिः। अतश्च एतादृशगौणत्वस्य अस्त्येव वेदेऽपि संभवः।

यद्यपि च रूपकादिस्थले "सौन्दर्यस्य तरङ्गिणी" इत्यादौ आरोपेणापि गौणी वृत्तिर्दृष्टा, तथापि सादृश्यमात्रेणापि उपमालंकारस्थले सानुभूयमाना नापह्नोतुं शक्या।

अतश्चोभयसाधारण्येन स्वशक्यसमवेतवत्ता गौणी वृत्तिः। समवेतवत्त्वं च क्वचिदारोपितत्वसंबन्धेन, क्वचिच्च स्वसमानजातीयगुणवत्तासंबन्धेनेति भेदः। अत्र च सिंहपदेन शक्त्या सिंहोपस्थित्यनन्तरं लक्षणया क्रूरत्वोपस्थितिरिति प्राञ्चः।

वस्तुतस्तु — एकसंबन्धिदर्शनेनापरसंबन्धिस्मरणमिति स्मारकविधयैव तदुपस्थितिः। गौणीज्ञानकार्यतावच्छेदकं चोक्तसंबन्धान्यतरसंबन्धेन स्वशक्यसमवेतधर्मप्रकारकदेवदत्तविशेष्यकशाब्दत्वमिति न क्रूरत्वादीनामशाब्दत्वप्रसङ्गः। न च गौण्याः लक्षणातो न भेदः इति वाच्यम्। स्वशक्यवृत्तिगुणानामेव यत्र संबन्धित्वेन रूपेण बोधः तत्र लक्षणा, क्रूरत्वत्वादिना बोधे तु गौणी इति तयोर्भेदात्।

जातिः

जन्म। प्रजापतिमुखाज्जातत्वमग्निब्राह्मणयोः श्रुतम्। "अग्निर्वै ब्राह्मणः" इत्यत्र एकमुखप्रभवत्वं गुणं पुरस्कृत्य अग्निशब्दो ब्राह्मणे वर्तते। अग्निनिष्ठप्रजापतिमुखप्रभवत्वसजातीयप्रजापतिमुखप्रभवत्ववान् ब्राह्मणः इति बोधः।

सारूप्यम्

सारूप्यं नाम शक्यनिष्ठगुणसजातीयगुणवत्त्वम्। यथा आदित्यो यूपः इत्यत्र आदित्यवृत्तितेजस्वित्वादिगुणसजातीयगुणवत्त्वं पुरस्कृत्य आदित्यशब्दः यूपे वर्तते।

ननु सर्वत्र सारूप्यमेव निमित्तम्, कोऽत्र विशेषः? उच्यते। चक्षुर्ग्राह्यत्वं तेजस्वित्वादि अत्र निमित्तमिति प्राञ्चः।

वस्तुतस्तु — अन्यत्र शक्यनिष्ठगुणस्यैव स्वसमानजातीयगुणवत्तासंसर्गेण प्रकारत्वान्निमित्तता। न तु सारूप्यस्य, तस्य संसर्गत्वात्। इह तु शक्यनिष्ठगुणसजातीयगुणवत्त्वरूपस्य सारूप्यस्यैव समवायादिसंसर्गेण प्रकारत्वात्तदेव निमित्तमिति विशेषः।

प्रशंसा

"अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वाः" इत्यत्र अपशुशब्दः घटादौ मुख्यः गवाश्वगतप्राशस्त्याभावरूपगुणयोगात् अजादौ गौणः सन् लक्षणया गवाश्वस्तुत्यर्थः। प्राचां मते तु नञ्समासान्तर्गतपशुशब्देन गवाश्वगतं प्राशस्त्यं लक्षयित्वा नञा तदभावरूपो गुण उपस्थाप्यत इति विशेषः। सर्वथा प्रशंसा गौणीनिमित्तघटिकेति सिद्धम्।

भूमा

बहुत्वम्। सृष्टीरुपदधातीत्यत्र सृष्टिवाचकशब्दघटितमन्त्रगतबहुत्वसमानाधिकरणसमुदायाश्रितत्वगुणयोगेन सृष्ट्यसृष्टिमन्त्रात्मकसमुदायिनः बोध्यन्ते।

लिङ्गसमवायः

अल्पत्वम्। प्राणभृत उपदधातीत्यत्र प्राणभृदल्पत्वसमानाधिकरणसमुदायाश्रयत्वगुणयोगेन प्राणभृत्समुदायाश्रयीभूतसकलमन्त्रेषु गौणी।

लघुमञ्जूषानुरोधेन लक्षणा-गौणीवृत्तिविचारः[५४]

लक्षणायां बीजम्

अन्वयाद्यनुपपत्तिज्ञानसहकृतेन शक्यतया गृहीतार्थसंबन्धज्ञानेन उद्बुद्धो यः शक्तिसंस्कारः तज्जन्यबोधो लक्षणा। गङ्गायां घोष इत्यत्र शक्यार्थे प्रवाहे घोषान्वयानुपपत्तिज्ञानमस्ति। तथा शक्यतया गृहीतो योऽर्थः प्रवाहः तत्संबन्धि तीरमिति ज्ञानं वर्तते। तेन ज्ञानेन गङ्गापदस्य तीरे वर्तमानायाः शक्तेः यः संस्कारः तस्य उद्बोधो भवति। तेन तीरस्य बोधो भवतीति क्रमः। एतन्मतानुसारेण गङ्गापदस्य तीरेऽपि शक्तिः। शक्तिविषयकश्च संस्कारः ईदृशस्थले जन्मान्तरीणोऽपि।

वस्तुतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजम्। अन्यथा गङ्गायां घोष इत्यादौ घोषादिपदेऽपि मत्स्यादौ लक्षणापत्तिः, तावताप्यन्वयानुपपत्तेः परिहारात्।

एवं रूढिप्रयोजनान्यतरदपि लक्षणाबीजम्। कुशल इत्यादौ प्रवीण इत्यर्थे रूढिः। गङ्गायां घोषः इत्यत्र शैत्यादिप्रतीतिः प्रयोजनम्।

---

[५४] ल.म. पृ. ११४

तात्पर्यग्रहो लक्षणाबीजम्

अत्रेदं बोध्यम्। गङ्गायां घोष इत्यादौ प्रथमतः शक्यार्थस्य उपस्थितिः। तदनन्तरं तद्विषयकान्वयबोधः प्रवाहवृत्तिर्घोष इति। ततः तस्मिन् बोधे वक्तृतात्पर्याविषयत्वग्रहः। तेन च स बोधोऽप्रमा इत्याकारकोऽप्रामाण्यग्रहः। ततो लाक्षणिकार्थबोधः। शक्यार्थान्वयबोधं विना तत्र तात्पर्याविषयत्वग्रहस्यासंभवात्। पदार्थद्वयसंसर्गविषयकज्ञानस्यैवान्वयबोधत्वात्। न च हर्यादिपदवत् गङ्गादिपदानां नानार्थत्वापत्तिरिति वाच्यम्। प्रसिद्धानानार्थविषयकबोधजनकत्वमेव नानार्थत्वमिति स्वीकारात्। गङ्गापदात् तीरबोधस्याप्रसिद्धत्वात्। संबन्धज्ञानस्याकारश्च तीरसंबन्धिप्रवाहबोधकं गङ्गापदम् इति वा गङ्गापदशक्यप्रवाहसंबन्धि तीरमिति वा। शक्यसंबन्ध एव लक्षणेत्यन्ये (तार्किकाः)। अत्र पक्षेऽपि संयोगसंयुक्तवृत्तित्वरूपसंबन्धद्वयरूपा एका लक्षणा। तीरे प्रवाहसंयोगः, तीरत्वे प्रवाहसंयुक्तवृत्तित्वम्। एवं च लक्ष्यतावच्छेदकेऽपि लक्षणा भवत्येव। अन्यथा शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्।

अपरे तु लक्ष्यतावच्छेदके न लक्षणा। लक्ष्यलक्ष्यतावच्छेदकाभ्यामुभाभ्यां सह शक्यार्थस्य अनारोपितैकसंबन्धासंभवात्। तस्मात् विशेष्य (लक्ष्य)गतसंबन्धज्ञानस्य कार्यतावच्छेदकं लक्ष्यतावच्छेदकप्रकारकलक्ष्यविशेष्यकबुद्धित्वमिति अलक्ष्यस्यैव लक्ष्यतावच्छेदकस्य शाब्दबोधे भानमित्याहुः।

अन्ये तु (मीमांसकाः) शक्यसंबन्धज्ञानजन्या लक्ष्यार्थोपस्थितिर्लक्षणा। स्वविषयसंबन्धिवाचकत्वसंबन्धेन चैषा पदनिष्ठा। स्वम् — उपस्थितिः। वृत्तित्वं तु शाब्दबोधजनकपदपदार्थसंबन्धत्वम्। एतन्मतेऽपि स्फुटमेव लक्ष्यतावच्छेदकेऽपि लक्षणा। पदादपि शाब्दबोध एव न स्मृतिः। यत्र कमलानि कमलानीत्यादौ सौरभविशिष्टकमलबोधस्तत्रापि एकस्य कमलपदस्य सौरभविशिष्टे लक्षणा।

लक्षणाभेदः

सा लक्षणा द्विधा गौणी शुद्धा च। स्वनिरूपितसादृश्याधिकरणत्वसंबन्धेन शक्यसंबन्ध्यर्थप्रतिपादिका गौणी। स्वं शक्यार्थः। तदतिरिक्तसंबन्धेन शक्यसंबन्ध्यर्थप्रतिपादिका शुद्धा।

प्रकारान्तरेणापि सा द्विविधा अजहत्स्वार्था जहत्स्वार्था च। स्वशक्यार्थापरित्यागेनेतरार्थबोधनम् आद्या। तदपरित्यागश्च शक्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिनान्वयित्वम्। यथा च्छत्रिणो यान्तीत्यत्र एकसार्थवाहित्वेन रूपेण छत्रिणां गमनेऽन्वयः, कुन्तान् प्रवेशय इत्यत्र तीक्ष्णत्वेन रूपेण कुन्तानां

प्रवेशेऽन्वयः, काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वेन रूपेण काकानां रक्षणेऽन्वयः। तथा च उभयसाधारणरूपेण शक्यलक्ष्ययोरेकान्वये अजहत्स्वार्था लक्षणेत्युक्तं भवति।

स्वार्थपरित्यागेनेतरार्थबोधनं जहत्स्वार्था। परित्यागश्च शक्यार्थस्य केनापि रूपेण लक्ष्यार्थान्वयिनानन्वयित्वम्। यथा गां वाहीकं पश्येत्यादौ। अत्र गोपदस्य गोसदृशे लक्षणायामपि शक्यार्थस्य गोः लक्ष्यार्थान्वयिदर्शनक्रियान्वयित्वविरहात् जहत्स्वार्थात्वं लक्षणायाः।

त्वचा ज्ञातमित्यादौ त्वगादिशब्दानां त्वगिन्द्रिये निरूढलक्षणा। असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकं तत्संबन्ध्यपरार्थबोधे निरूढलक्षणेति व्यवहारः। अन्यथा रूढिशक्तिरेव।

प्रयोजनवती तु लक्षणा कुन्ताः प्रविशन्तीत्यत्र भीत्या पलायमानमधिकृत्य प्रवृत्ते वाक्ये कुन्तानां तात्पर्यविषयकुन्तिप्रवेशेऽन्वयबाधात् कुन्तपदस्य तत्संयुक्ते पुरुषे लक्षणा। लक्ष्यार्थे पुरुषे शक्यार्थकुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्।

गङ्गायां घोष इत्यत्र प्रवाहे घोषाधिकरणत्वबाधात् गङ्गापदेन प्रवाहसंबन्धि तीरं लक्ष्यते। गङ्गागतशैत्यपावनत्वयोस्तीरे प्रतीतिः प्रयोजनम्।

गौर्वाहीक इत्यत्र गोसादृश्यविशिष्टे गोपदस्य लक्षणा, गवाभेदप्रत्ययः फलम्। न च गवाभेदस्य बाधितत्वात् कथं तत्प्रतीतिरिति वाच्यम्। व्यञ्जनाजन्यशाब्दबोधे बाधज्ञानस्याप्रतिबन्धकत्वात्।

केचित्तु गौर्वाहीक इत्यादौ साधारणधर्माश्रयो जडादिः जडत्वेन लक्ष्यः। तत्र गवाभेदप्रतीतिद्वारा गोवृत्त्यसाधारणजडत्वप्रतीतिः फलम्। न च गौर्वाहीको जड इत्यादौ पौनरुक्त्यमिति वाच्यम्। जडत्वातिरिक्तलक्ष्यतावच्छेदकव्युदासे जडपदस्य तात्पर्यात्। सदृशत्वेन लक्षणेति वादिनोऽपि सादृश्यस्य विशिष्य साधारण-धर्मप्रतीतिं विना पर्यवसानाभावेन प्रसिद्ध्यादिना तत्पर्यवसानं वाच्यमिति अन्यथानुपपत्त्या प्रसृतायाः लक्षणायाः साधारणधर्मविशिष्टे एवौचित्यात्।

एतेन गौर्वाहीक इत्यादौ गोशब्देन स्वशक्यगतजाड्यादिगुणसदृशजाड्यादय एव लक्ष्यन्ते। तैश्च जातिशक्तिनये व्यक्तिलाभवत् स्वाश्रयव्यक्तिलाभ इति मीमांसकोक्तं परास्तमित्याहुः।

ग्रामो दग्धः पुष्पितं वनमित्यादौ दग्धादिपदानि अर्शआद्यजन्तानि इति अर्थवत्सूत्रभाष्ये उक्तत्वात् लक्षणैव न। दग्धपदस्यैव दग्धगृहवद्वाचकत्वात्।

अन्ये तु तत्र जहदजहल्लक्षणा। ग्रामादिपदस्य स्वार्थैकदेशं परित्यज्य तदेकदेशे (गृहे) वृत्तेः। दग्धभूयस्त्वादिद्योतनं फलमित्याहुः।

अत्रारुचिबीजं तु उक्तरीत्या तत्र तदभाव एव। किं च तत्त्वमसीत्यादौ तत्सत्त्वेऽपि द्वितीयभेदेनैवास्याःसंग्रहः। स्वार्थैकदेशत्यागेऽपि तत्त्यागसत्त्वात्। आद्येन तु न संग्रहः, नञः प्रतियोगितावच्छेदकावच्छिन्नाभावबोधकत्वादिति।

केचित्तु (मीमांसकास्तु) — ज्ञाप्यसंबन्धेन उद्बुद्धशक्तिसंस्कारतो बोधो लक्षणा। गभीरायां नद्यां घोष इत्याद्यनुरोधात्। तथा हि न तावत् गभीरपदं तीरलक्षकम्। नद्यामित्यस्यानन्वयापत्तेः। न हि तीरं नदी। नापि नदीपदं लक्षकम्। गभीरपदार्थानन्वयात्। न हि तीरं गभीरम्। न च पदद्वये प्रत्येकं सा। तथा च गभीरपदस्य गभीरतीरे, नदीपदस्य नदीतीरे लक्षणेति वाच्यम्। गभीरत्वविशिष्टनदीतीरबोधानापत्तेः। न च नदीपदेन गभीरनदीतीरं लक्ष्यते, गभीरपदं तात्पर्यग्राहकमिति वाच्यम्। विनिगमनाविरहात्। न च नदीपदस्य द्रव्यवाचकतया साक्षात्संबन्धानुरोधेन तत्रैव लक्षणेति वाच्यम्। गभीरपदस्यापि नित्यगुणिबोधकतया तेनापि साक्षात्संबन्धस्यैव सत्त्वात्। अतः समुदाये (गभीरायां नद्याम्) इत्यत्र लक्षणाङ्गीकार्या। न हि समुदाये शक्तिरस्ति, येन शक्यसंबन्धरूपा लक्षणा तत्र स्यात्। अतो ज्ञाप्यसंबन्ध इत्युक्तम्। गभीरायां नद्यामिति वाक्यस्य ज्ञाप्यः गभीराभिन्ननदी तत्संबन्धस्तीरे।

समुदाये लक्षणाङ्गीकारादेव अर्थवादवाक्यानां प्राशस्त्ये लक्षणायाः सिद्धिः। "वायुर्वै क्षेपिष्ठा देवता" इत्यादिवाक्यस्य वायुदेवताकं कर्म प्रशस्तमित्यर्थलक्षकत्वात्। न च सर्वत्र वाक्ये विशेष्यपदस्यैव लक्षणा, इतरपदानां तात्पर्यग्राहकत्वाच्च वाक्यलक्षणाप्रवाद इति वाच्यम्। "विश्वरूपो वै त्वाष्ट्रः" इत्यादौ विशेष्यपदानामप्यनेकत्वेन कस्य पदस्य लक्षणेत्यत्र विनिगमकाभावात्।

नन्वपभ्रंशेऽपि बोधसत्त्वात् बोध्यसंबन्धरूपायाः लक्षणायाः आपत्तिः, अतः शक्यसंबन्धरूपैव लक्षणा एष्टव्येति चेन्न। अपभ्रंशे लक्षणाया इष्टत्वात्। अत एव काव्यप्रकाशकारैः लक्ष्यस्य व्यञ्जकतायां साहेतीत्यादि प्राकृतोदाहरणं दत्तम्।

साहेति सहि सुहंअ खणे खणे दूमिआसि मज्झकए।
सम्भावणेहकरणिज्जसरसिंअ दाव विरइंअ तुमए। इति प्राकृतम्।
साधयन्ती सखि सुभगं क्षणे क्षणे दूनास्ति मम कृते।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया। इति संस्कृतम्।

मदर्थं नायकं वशीकुर्वन्ती त्वं हे सखि! मदर्थं क्षणे क्षणे दूषितासि। सद्भावस्नेहाभ्यां सदृशं यत् करणीयं तत् त्वया कृतमिति तदर्थः। अत्र मत्प्रियं रमयन्त्या

त्वया शत्रुत्वमाचरितमिति लक्ष्यते। तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्। तार्किकैरपि छत्रिणो यान्तीत्यादौ छत्रिपदस्य एकसार्थवाहित्वेन छत्र्यच्छत्रिसमुदाये लक्षणां वदद्भिः पदसमुदाये लक्षणानुमता इत्याहुः।

वैयाकरणसिद्धान्तनिष्कर्षः

परे तु — गङ्गायां घोषः इत्यादौ तीरे शक्यतावच्छेदकस्य प्रवाहत्वस्य आरोपः। तथा चारोपितेन प्रवाहत्वेन रूपेण तीरस्य बोधो भवति। सोऽपि शक्त्यैव। तथा च गङ्गापदवाच्यत्वेन प्रसिद्धो यः प्रवाहः तदन्यस्य तीरस्य आरोपितशक्यतावच्छेदकप्रवाहत्वरूपेण बोधो भवतीति कृत्वा लक्षणेति व्यवहारः।

छत्रिणो यान्तीत्यादावपि अच्छत्रिषु छत्रिसाहचर्यात् छत्रित्वारोपः। काकेभ्यो दधि रक्ष्यताम् इत्यादावपि दध्युपघातकेषु सर्वेष्वपि काकत्वारोपः।

एवं शक्यतावच्छेदकरूपेण व्यक्तिविशेषबोधेऽपि लक्षणेति व्यवहारः। यथा कमलानि कमलानि इत्यादौ कमलत्वेन रूपेण सौरभविशिष्टकमलबोधः।

लक्षणास्थले शक्यतावच्छेदकारोपेण लक्ष्यार्थबोध इत्यत्र भाष्यमपि प्रमाणम्। तथा हि पुंयोगादाख्यायाम्''[५५] इति सूत्रे भाष्ये गोपीत्यादौ गोपसंबन्धि-स्त्रीत्वेन लक्षणायां तस्येदमिति शास्त्रेण तादृशार्थेऽण्प्रत्ययान्तस्यैव साधुत्वनियमात् असाधुत्वापत्तिं दूषणमभिधाय, नावश्यमयमेवाभिसंबन्धो भवति तस्येदमिति किं तु तन्मूलकः सोऽयमित्यप्यभिसंबन्धोऽस्ति इत्युक्त्वा, चतुर्भिः प्रकारैः अतस्मिन् स इत्येतद् भवति तत्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यात् मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय इत्युक्तम्। सोऽयमित्यपीत्यादेः सोऽयमित्यपि विशेष्यविशेषणभावोऽस्तीत्यर्थः। तत्र च कैयटेनोक्तम् — ''आरोप्यते ताद्रूप्यम्, न तु मुख्यमित्यर्थः'' इति। आरोपे च हेतवः तात्स्थ्यादयः। शक्यतावच्छेदकप्रकारक एव लक्ष्यार्थबोध इति भाष्याभिप्रायः। तत्प्रकारकप्रतीतिविशेष्यप्रसिद्धार्थत्वं मुख्यत्वम्, तादृशाप्रसिद्धार्थत्वं च गौणत्वम्।

न च गङ्गायां घोष इत्यादावारोपितगङ्गात्वेन बोधेऽपि तस्य बोधस्य भ्रमत्वात् शास्त्रज्ञानवतां सर्वथा भ्रमत्वेन ग्रहाच्च तदुत्तरं गङ्गागतशैत्यपावनत्वादिप्रतीतिरूपं फलं न सिध्येत्, प्रमात्मकज्ञानस्यैव कार्यसाधकत्वात्। अत एव शुक्तिरजतज्ञाने भ्रमत्वज्ञानवतो न प्रवृत्तिरिति वाच्यम्। मध्ये व्यञ्जनया मुख्यगङ्गापदार्थाभेदस्यापि प्रतीतेः। वैयञ्जनिकबोधे च बाधज्ञानेन नाप्रामाण्यग्रह इत्यदोषात्।

---

[५५] पा.सू. ४.१.४८

"शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा" इति तु कस्यचित् प्रमादोक्तिः। यद्वा शक्यतावच्छेदकान्यरूपत्वेन गृहीतेऽर्थे लक्षणा शक्यतावच्छेदकारोप इति तदर्थः। यथा तीरत्वविशिष्टस्य गङ्गात्वेन बोध इति। अत एव गङ्गायां मीनघोषौ स्त इत्युपपद्यते। अन्यथा मीनस्य नीरत्वावच्छिन्नेऽन्वयेन घोषस्य तु तीरत्वावच्छिन्नेऽन्वयेन उभयोरेकधर्मावच्छिन्नेऽन्वयाभावेन द्वन्द्वसमासोऽसाधुः स्यात्। मम तु गङ्गात्वेनैव तीरबोधात् एकधर्मावच्छिन्नेऽन्वयसत्त्वेन न क्षतिः।

अजां ग्रामौ नयति इत्यत्र न द्वन्द्वः, अजायाः व्यापारे ग्रामस्य संयोगेऽन्वयः इत्युभयोरेकत्रान्वयाभावात्। अजाविधनौ देवदत्तयज्ञदत्तावित्यत्र यथासंख्यान्वये न द्वन्द्वः। पयः पयो नयतीत्यत्र द्वन्द्वापवादः एकशेषश्च न। एकधर्मावच्छिन्नेऽन्वये एव द्वन्द्वः इत्यस्वीकारे तु उक्तस्थलेऽपि द्वन्द्वः स्यात्।

प्रवाहत्वेन नीरतीरयोरुभयोर्बोधादेव युगपद्वृत्तिद्वयविरोधोऽपि न। अन्वयानुपपत्त्या च युगपदेव गङ्गात्वेनैव नीरतीरयोरुपस्थितिः। काकेभ्यो दधि रक्ष्यतामित्यादावपि विडालादौ काकत्वमारोप्यते।

तत्र न्यायसूत्रसंवादः

"सहचरणस्थानतादर्थ्यवृत्तमानधारण-
सामीप्ययोगसाधनाधिपत्येभ्यो
ब्राह्मणबालकटराजसक्तुचन्दनगङ्गा-
शकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः" —

इति। तस्य भावः तद्धर्मः तदभावेऽपि तदुपचारः तच्छब्दव्यवहार इत्यर्थः। स च तद्धर्मारोपेण। आरोपनिमित्तानि च सहचरणादीनि। प्रत्येकमुदाहरणानि च पश्चात् प्रदर्शयिष्यन्ते। अत्र सूत्रे न्यायवार्तिककारः —

साहचर्यं नाम यष्टिकया संबन्धः, तत्संबन्धात्तु यष्टिकावानित्येव स्यात्, न तु यष्टिकेति। यष्टिकावानिति तु मुख्य एव। तस्मादुपचारबीजमन्यद्वक्तव्यम्; उच्यते। यष्टिकायां तावदयं यष्टिकाशब्दो यष्टिकात्वजातिनिमित्तकः। तत्र संयुक्तसमवेतां जातिं ब्राह्मणे समवायेनाध्यारोप्य ब्राह्मणं यष्टिकेत्याह इत्याह। अनेन शक्यतावच्छेदकारोपः लक्षणेति वार्तिकाभिप्रायः स्पष्टः। यष्टित्वारोपो ब्राह्मणे साहचर्यात्, मञ्चत्वारोपो बालेषु तात्स्थ्यात्। गङ्गायां तीरधर्मस्याधारत्वस्यारोपः तत्सामीप्यात् इत्यादिकं न्यायसूत्रव्याख्यानेषु दृश्यते।[५६] एवं च शक्यार्थप्रवाहेणात्यन्तसामीप्ये

---

[५६] शा.त. पृ. ११९

गङ्गायां तीरधर्मं घोषाधारत्वमारोप्य गङ्गायां घोष इति प्रयोगः। व्यवहितसामीप्ये तु तीरे गङ्गात्वमारोप्य गङ्गायां घोष इति प्रयोगः।

एतद्वैयाकरणमतविमर्शः

अथ पूर्वानूदितवैयाकरणमते लक्षणावृत्तेः स्वरूपं विचार्यते। "बोधे लक्षणा-व्यवहारः" इत्युक्तेः न बोधस्य लक्षणात्वम्। बोधौपयिकवृत्तेरेव लक्षणात्वात्। तस्मात् बोधे सति लक्षणाव्यवहारः इति तदुक्तिः व्याख्यातव्या।

"शक्यतावच्छेदकारोपो लक्षणेति वैयाकरणाः" इति ग्रन्थान्तरे दर्शनात्, मञ्जूषायामपि अन्नं प्राणाः, चन्दनं तुला इत्यादौ आहार्यारोपस्यैव लक्षणात्वात् इत्युक्तेः शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा" इति श्लोकघटकलक्षणापदस्य शक्यतावच्छेदकारोपार्थकतया व्याख्यानात् "आरोप्य प्रयोगः" इत्युक्तेश्च शाब्द-बोधसमानाकारः शब्दप्रयोगहेतुः वक्तृनिष्ठः तीरे गङ्गात्वारोपः गङ्गापदस्य तीरे लक्षणेति प्रतिभाति।

परं तु शक्यतावच्छेदकारोपाख्यविलक्षणवृत्तिस्वीकारे सर्वेषां शब्दानां सर्वार्थ-वाचकत्वस्वीकारो व्याहन्येत। तस्मात् लक्षणाख्यवृत्त्यन्तरस्वीकारो व्यर्थः।

किं च "अन्वयानुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसंबन्धज्ञानेन उद्बुद्धशक्ति-संस्कारतो बोधे लक्षणेति व्यवहारः" इति मञ्जूषाग्रन्थं 'बोधे' इति प्रतीकमुपादाय, 'तस्मिन् सति तज्जनकतादृशसंस्कारे तच्छक्तौ वा लक्षणेति व्यवहार इत्यर्थः' इति व्याचख्युः वैद्यनाथभट्टाः। अतो ज्ञायते अप्रसिद्धार्थे शक्तिरेव लक्षणेति।

अपि च इयं लक्षणा इत्यनुक्त्वा लक्षणेति व्यवहारः इति कथनेन अतिरिक्ता लक्षणा नास्तीति गम्यते। वैयाकरणमते सर्वेषां शब्दानां सर्वार्थवाचकत्वात् शास्त्रज्ञानां लक्षणाव्यवहारः कथमुपपद्यत इति शङ्का निरासाय लक्षणानिरूपक-ग्रन्थावतारश्च एतमर्थमुपोद्बलयति।

"व्यक्तिविशेषबोधे वा लक्षणेति व्यवहारः" इति वदता ग्रन्थकृता "कमलानि कमलानि" इत्यत्र कमलपदस्य सौरभविशिष्टकमलव्यक्तिविशेषे लक्षणा स्वीकृता। न च तत्र शक्यतावच्छेदककमलत्वस्य कमलव्यक्तिविशेषे आरोपः संभवति; समवायेन कमलत्वस्य तत्र सत्त्वात्। न च तत्रापि कमलत्वे व्यक्तिविशेषभिन्न-कमलवृत्तित्वारोपे पर्यवसितः। स च शक्यतावच्छेदकविशेष्यकारोपः न शक्यता-वच्छेदकारोपपदेन व्यपदेशार्हः। शक्यतावच्छेदकप्रकारकारोपस्यैव शक्यतावच्छेद-कारोपशब्देन व्यवहारात्। अतश्च निरुक्तस्थले लक्षणाव्यवहारो न स्यात्।

तस्मात् शक्तिविशेष एव लक्षणाव्यवहारविषयः। एवं च लक्षणास्थले शाब्दबोधः शक्यतावच्छेदकरूपेण लक्ष्यार्थविषयकः। प्रयोक्तुरपि तत्समान-विषयकः प्रयोगहेतुभूतः शक्यतावच्छेदकारोपः इत्याशयेन "शक्यतावच्छेदकारोपो लक्षणेति" ग्रन्थान्तरे व्यवहार उपपद्यते।

न च लक्षणास्थले सर्वत्र शाब्दबोधः न शक्यतावच्छेदकारोपात्मकः, कमलानि कमलानीत्यत्र तदसंभवादिति वाच्यम्। तत्रारोपस्यानावश्यकत्वात्।

न चैवं सति "आरोपितशक्यतावच्छेदकरूपेण बोधे लक्षणाव्यवहारः" इति ग्रन्थासंगतिरिति वाच्यम्। आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पद-वाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे शक्त्यैव व्यक्तिविशेषबोधे वा लक्षणाव्यवहार इति ग्रन्थो योजनीयः। न तु व्यक्तिविशेषेत्यत्रापि आरोपितेत्यादितृतीयान्तस्यान्वयो विवक्षितः।

तथा च शक्यत्वेन प्रसिद्धान्यव्यक्तिबोधौपयिकी शक्तिः व्यक्तिविशेषबोधौपयिकी शक्तिश्च लक्षणापदेन व्यवह्रियत इति तदाशयः।

प्राचीनवैयाकरणाश्च[५७] स्पष्टमेव लक्षणा नाम वृत्त्यन्तरं नास्तीति वदन्ति। तेषामयमभिसन्धिः — व्यवहारः शक्तिग्राहकप्रमाणेषु मूर्धन्यः। स च लक्ष्यत्वाभि-मतेऽपि तुल्यः। न च प्रवाहे गङ्गाव्यवहारः स्वाभाविकः तीरे तु औपाधिकः इति व्यवहारस्य नोभयसाधारण्यमिति वाच्यम्। गङ्गायां घोषः प्रतिवसति तमानयेत्युक्तौ तीरान्वितघोषानयनरूपव्यवहारेण व्युत्पित्सोः तीरेऽपि गङ्गापदशक्तिज्ञानसंभवात्। तस्मात् शक्तिग्राहकव्यवहारस्य मुख्यलाक्षणिकोभयसाधरणत्वात् लाक्षणिकत्वाभि-मतेऽपि शक्तिरेव। लक्षणाख्यवृत्त्यन्तरकल्पने गौरवात्।

न च गङ्गायां घोष इत्यत्र गङ्गापदशक्यप्रवाहसंबन्धरूपा लक्षणा तीरे क्लृप्तैवेति वाच्यम्। न हि लक्षणानास्तित्ववादिनः शक्यसंबन्धमेव निषेधन्ति, अपि तु तस्य पदपदार्थसंबन्धत्वं, तज्जन्योपस्थितेः शाब्दबोधानुकूलत्वं चेति।

ननु शक्यसंबन्धरूपा लक्षणा क्लृप्ता। तस्यां च तीरादिरूपसंबन्धिस्मृति-जनकत्वमपि क्लृप्तमेव। परं तु लक्षणावादिना शक्यसंबन्धप्रयोज्यतीरोपस्थितेः शाब्दबोधानुकूलत्वरूपो धर्मः कल्प्यते। शक्तिवादिना तु गङ्गापदस्य शक्तिरूपो धर्मोऽपि कल्पनीयः। एवं च धर्मिकल्पनातो धर्मकल्पनस्य ज्यायस्त्वात् तदेवो-चितम्। किं च शक्तिवादिनोऽपि गङ्गापदजन्या तीरस्मृतिः तीरशाब्दबोधानुकूलेति संमतम्। तादृशतीरस्मृतिजनकत्वं च क्लृप्तस्य शक्यसंबन्धस्यैव कल्पयितुमुचितम्,

---

[५७] शा.त. पृ. १२७

न तु अक्लृप्तायाः शक्तेः। एवं गङ्गापदस्य लक्षणीयतीरादिषु अनेकार्थेषु शक्तिकल्पनया गौरवमिति चेत् — मैवम्।

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा।

इति हर्युक्तेः बोधकत्वमेव शक्तिः। गङ्गापदं च तीरबोधकमिति तवापि संमतम्। ततश्च गङ्गापदे तीरबोधकत्वरूपायाः शक्तेः क्लृप्ततया तत्र शाब्दबोधानुकूलतीरोपस्थितिजनकत्वकल्पनमप्युचितमेव। एवं लक्षणीयानां सर्वेषामर्थानां बोधकत्वस्य गङ्गापदे क्लृप्तत्वात् नानेकार्थेषु शक्तिकल्पनागौरवम्।

निष्कर्षः

अत्रेदं तत्त्वम्। वाचकः लक्षकः इत्यसंकीर्णः प्रामाणिको व्यवहारः सर्वतान्त्रिकाणामस्ति। गङ्गापदस्य तीरेऽपि शक्तिस्वीकारे यः शब्दो यस्मिन्नर्थे प्रचुरप्रयोगेण प्रसिद्धः स शब्दः तदर्थवाचकत्वेन व्यवह्रियते, यस्मिन्नर्थे न प्रसिद्धः, तत्र लक्षकत्वेन व्यवह्रियते। तीरादौ गङ्गापदस्य प्रचुरप्रयोगाभावात् गङ्गापदं तीरवाचकमिति न व्यवहारः अपि तु तीरलक्षकमिति, इति व्यवहारनयने क्लेशः।

अपि च बोधकत्वस्य शक्तित्वसंभवे एव गङ्गापदे तीरबोधकत्वसत्त्वेन तीरे शक्तिः सिद्धा भवेत्। पदे बोधजनकत्वान्यथानुपपत्त्या कल्प्यमानः संबन्धः न बोधकत्वरूपः भवितुमर्हतीति पूर्वमेव निरूपितम्। तस्मात् लक्षणाव्यावृत्तस्यैव शक्तिस्वरूपस्य धर्मिग्राहकप्रमाणसिद्धत्वात् लक्ष्योपस्थितये लक्षणावृत्तिः स्वीकरणीयैव।

अतिरिक्तायाः लक्षणावृत्तेः स्वरूपम्

लक्षणा अतिरिक्ता वृत्तिः इति पूर्वोक्तरीत्या सिद्धत्वात् तस्याः स्वरूपं कीदृशमिति इदानीं विचार्यते।

केचित् प्राचीननैयायिकाः[५८] लक्ष्यार्थबोधं प्रति लक्षणाज्ञानकारणतायाः सर्वसंप्रतिपन्नत्वात् गङ्गायां घोष इत्यादौ तीरविषयकशाब्दबोधे शक्यप्रवाहसंबन्धितीरतात्पर्यज्ञानस्य कारणत्वेन क्लृप्तत्वात् लक्ष्यार्थबोधकारणज्ञानविषयस्य तात्पर्यस्य लक्षणात्वकल्पनमुचितमिति शक्यसंबन्धिविषयक-प्रतीतिच्छयोच्चरितत्वपर्यवसितं शक्यसंबन्धिनि तात्पर्यं लक्षणेति वदन्ति।

---

[५८] शा.त. पृ. १३२

अन्ये तु शक्ये तात्पर्यस्य लक्षणात्वाभावात् अशक्ये तात्पर्यं लक्षणेति निरूपयन्ति।

अपरे तु प्रयोक्तुरभिप्रायविशेषाज्ञाने लक्ष्यतीराज्ञानात् अवश्यं ज्ञेयः स्वार्थ-संबबन्धेन गङ्गापदं तीरं बोधयिष्यतीति प्रयोक्तुरभिप्रायो लक्षणेति प्रतिपन्नाः।

अन्ये जरन्नैयायिकाः शक्यादशक्योपस्थितिः लक्षणा। गङ्गायां घोष इति वाक्य-श्रवणे गङ्गापदात् शक्यस्य प्रवाहस्य स्मृतिः जायते। ततः तत्र घोषाधारत्वान्वया-नुपपत्तिप्रतिसन्धानम्। ततः स्मृतगङ्गापदात् पुनः शक्यस्य प्रवाहस्य स्मृतिः। सा लक्षणा। ततः तीरान्वयबोधः।

न च वारद्वयं शक्यप्रवाहोपस्थितिकल्पनायां प्रमाणाभावात् शक्यसंबन्धेन गङ्गापदमेव तीरस्मारकं स्वीक्रियतामिति वाच्यम्। संबन्धिज्ञानं तत्तत्संबन्धि-ज्ञानत्वेनापरसंबन्धिस्मारकमिति गङ्गापदस्य शक्तिसंबन्धेन प्रवाहस्मृतिप्रयोजकत्वं, प्रवाहस्य स्वसंबन्धितीरस्मृतिप्रयोजकत्वं च क्लृप्तम्। एवं च स्मारकत्वेन क्लृप्ताभ्यां गङ्गापदप्रवाहाभ्यामेव शाब्दबोधोपयोगिन्याः तीरोपस्थितेः संभवात् गङ्गापदस्य शक्यसंबन्धेन तीरस्मारकत्वं न कल्प्यते, गौरवात्। इत्थं च लाक्षणिकं पदं नानुभावकमिति प्रवादोऽपि संगच्छते। पदं हि वृत्त्या स्वजन्योपस्थितिद्वारा शाब्द-बोधे कारणम्। गङ्गापदं च न शाब्दबोधविषय-संसर्गप्रतियोगिस्मारकमिति न तीरानुभावकमिति प्रतिपादयन्ति।

"शाब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते।"

"यस्य तु शब्दव्यापारगम्यार्थपर्यालोचनया अवगतिः तस्य लाक्षणिकत्वम्" इति अभिधानवृत्तिमातृकायां वदन्तो मुकुलभट्टाः शक्यादशक्योपस्थितिर्लक्षणेति पक्ष-मनुसरन्ति। तत्त्वचिन्तामणावप्ययं पक्षो विवेचितः, पूर्वं प्रदर्शितश्च।

केचन मीमांसकाः — शक्यनिष्ठः अशक्यसंबन्धो लक्षणा। सा च पदार्थवृत्तिः। शक्त्या गङ्गापदेन स्मृतः प्रवाहः स्वसंबन्धि तीरं स्मारयति। अतः शक्यार्थः लक्ष्यार्थस्मारकः। एवं च गङ्गापदार्थप्रवाहनिष्ठः तीरसंयोगो लक्षणेति वदन्ति।

अपरे तु मीमांसकाः वाक्ये लक्षणायाः स्वीकारानुरोधेन स्वबोध्यसंबन्धो लक्षणेति वदन्ति। यथा गभीरायां नद्यां घोष इत्यत्र गभीरायां नद्यामिति पदसमुदायरूपवाक्यस्य गभीरनदीतीरे लक्षणा। तादृशपदसमुदायेन बोध्यायाः गभीराभिन्ननद्याः संबन्धस्य तत्तीरे सत्त्वात्।

वृत्तिवार्तिककृतस्तु — मुख्यार्थसंबन्धेन शब्दस्य प्रतिपादकत्वं लक्षणा। प्रतिपादकतामात्रं चाभिधायामतिप्रसक्तम्, शक्त्या प्रतिपादकत्वस्याभिधात्वात् इत्याहुः।

नवीनानाम् आलंकारिकाणां मतम्

शक्यतावच्छेदकारोपविषयनिष्ठः शक्यसंबन्धो लक्षणा। गङ्गापदशक्यप्रवाहसामीप्यं गङ्गापदस्य तीरे लक्षणा। तया च गङ्गापदात् तीरत्वविशिष्टस्य स्मृतिः जायते। यद्रूपविशिष्टतया गृहीते संबन्धग्रहो जातः, एकसंबन्धिज्ञाने सति तेनैव रूपेणापरसंबन्धिनः स्मरणस्यानुभवसिद्धत्वात्। परं तु पदजन्यतीरत्वविशिष्टस्मृत्या गङ्गात्वेन तीरविषयकः गङ्गावृत्तिः घोषः इत्याकारकः शाब्दबोधो जायते। तीरे घोषः इति प्रयोक्तव्ये सति गङ्गापदशक्यार्थप्रवाहगतशैत्यपावनत्वादिप्रतिपत्तये हि गङ्गायां घोष इति प्रयुज्यते। गङ्गात्वेन तीरशाब्दबोधे सत्येव तीरे गङ्गावृत्तिधर्मविशेषप्रतिपत्तिः जायते। तदुक्तं काव्यप्रकाशे — तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः — इति।

इत्थं चानुभवानुरोधात् शक्यतावच्छेदकप्रकारकलक्ष्यार्थविषयकशाब्दबोधे लक्षणाज्ञानस्य कारणत्वं कल्प्यते। न च पदार्थोपस्थितिशाब्दबोधयोः समानप्रकारकयोरेव कार्यकारणभावात् तीरत्वप्रकारकतीरस्मृत्या गङ्गात्वप्रकारकतीरविशेष्यकशाब्दबोधो न संभवतीति वाच्यम्। निरुक्तानुभवानुरोधेन लाक्षणिकबोधातिरिक्तशाब्दबोध एव समानप्रकारकपदार्थोपस्थितेः हेतुत्वं कल्प्यते इत्यदोषात्। न च गङ्गात्वेन रूपेण घोषाधारत्वानन्वयनिश्चयस्य सत्त्वात् गङ्गात्वेन घोषाधारत्वावगाही शाब्दबोधो न संभवतीति वाच्यम्। समानप्रकारकत्वे सति समानविशेष्यकस्यैव अयोग्यताज्ञानस्य प्रतिबन्धकत्वात् गङ्गात्वेन प्रवाहे घोषाधारत्वानन्वयनिश्चयेऽपि गङ्गात्वेन तीरे घोषाधारत्वशाब्दबोधे बाधकाभावात्। तस्मात् लक्षणया गङ्गापदात् तीरत्वेनोपस्थितस्यापि तीरस्य गङ्गात्वेनैव शाब्दबोध इति वदन्ति।

नव्यनैयायिकमतम्

नव्यनैयायिकास्तु सर्वेषां शब्दानां सर्वार्थवाचकत्वे मानाभावात् गङ्गापदस्य तीरे न शक्तिः। गङ्गापदोपस्थापिततीरस्य शाब्दबोधे भानात् शाब्दबोधौपयिकतीरस्मृतिप्रयोजकः गङ्गापदतीरयोः कश्चन संबन्धो वाच्यः। पदज्ञानस्य एकसंबन्धिज्ञानविधयैव पदार्थोपस्थितिजनकत्वनियमात्। यत्र शक्यसंबन्धज्ञानादेव तीरमुपस्थितं तत्र तीरान्वितशाब्दबोधस्य सर्वानुभवसिद्धत्वात् शाब्दबोधहेतुस्मृतिप्रयोजकः संबन्धः शक्यार्थसंबन्ध एवेति सैव लक्षणा। गङ्गायां घोष इत्यत्र गङ्गापदस्य स्वशक्यप्रवाहसामीप्यं लक्षणा।

तात्पर्यस्य लक्षणात्वनिरासः

शक्यसंबन्धिप्रतीतिच्छयोच्चरितत्वरूपं शक्यसंबन्धिनि तात्पर्यं तु न लक्षणा। यतः वृत्त्या पदोपस्थापितार्थे प्रकरणादिना वक्तृतात्पर्यज्ञानं जायते। लक्ष्यार्थस्मृतये लक्षणावृत्तिज्ञानमपेक्षितम्। शाब्दबोधानुकूलपदार्थस्मृत्यौपयिकसंबन्धस्य वृत्तित्वात्। तात्पर्यस्य तज्ज्ञानं पदार्थस्मृतेः पूर्वं न संभवतीति सा वृत्तिर्न स्यात्। शक्यसंबन्धस्यैव लक्षणात्वसंभवेन तदतिरिक्तांशस्य वैयर्थ्यं च। एवं तात्पर्यानुपपत्तेः लक्षणाबीजत्वं न स्यात्। स्वानुपपत्तेः स्वबीजत्वासंभवात्।

अपि च प्रवाहे तात्पर्यं गङ्गापदस्य शक्तिः स्यात्। न चेष्टापत्तिः, शक्त्यतिरिक्तायाः लक्षणाया एवासिद्धिप्रसङ्गात्। यदि तात्पर्यनिर्वाहकतया तात्पर्यातिरिक्ता शक्तिः स्वीकरणीया, स्वस्य स्वनिर्वाहकत्वानुपपत्तेरिति मन्यते तदा लक्ष्यार्थतात्पर्यनिर्वाहकतया तात्पर्यातिरिक्तैव लक्षणावृत्तिः स्वीकरणीयेति तुल्यम्। एतेन अशक्ये तात्पर्यं लक्षणेत्यपि निरस्तम्।

प्रयोक्तुरभिप्रायो लक्षणेतिमतनिरासः

एवं स्वार्थसंबन्धेन गङ्गापदं तीरं बोधयिष्यतीति प्रयोक्तुरभिप्रायोऽपि न लक्षणा। यथा गङ्गायां मीनः इत्यत्र गङ्गापदं शक्त्या प्रवाहं बोधयिष्यतीति वक्तुः अभिप्रायो निमित्तं तथा प्रयोगे, न तु स एव गङ्गापदस्य शक्तिः। तथा स्वार्थसंबन्धेन गङ्गापदं तीरं बोधयिष्यतीति वक्तुरभिप्रायोऽपि गङ्गायां घोष इति प्रयोगे निमित्तं न तु स एव लक्षणा।

किं चास्मिन् मतेऽपि शक्यसंबन्धेन तीरस्मारकत्वस्य गङ्गापदे सिद्धत्वात् क्लृप्तशक्यसंबन्धस्यैव लक्षणाख्यवृत्तित्वं स्वीकर्तुमुचितम्।

शक्यादशक्योपस्थितिर्लक्षणेति मतनिरासः[५९]

नापि शक्यादशक्योपस्थितिर्लक्षणा। तथा सति घटपदजन्यघटोपस्थितिरेव घटपदस्य शक्तिः किं न स्यात्? यदि तु शाब्दबोधानुकूलोपस्थित्यौपयिकः पदपदार्थसंबन्ध एव वृत्तिः, अतो न शक्योपस्थितिः शक्तिरित्युच्यते, तदा अशक्यतीराद्युपस्थितिरपि न लक्षणाख्या वृत्तिः।

किं च प्रत्यक्षादिप्रमाणान्तरोपस्थितस्य शाब्दबोधे भानाभावेन तद्विषयकशाब्दबोधे पदजन्यतदुपस्थितेः हेतुतायाः वक्तव्यत्वात् तीरस्य गङ्गापदादनुपस्थितत्वेन तस्य शाब्दबोधे भानमेव न स्यात्।

---

[५९] शा.त. पृ. १३९

एवं गङ्गापदात् तीरस्यानुपस्थितौ तदुत्तरसप्तम्याः तीरान्विताधारताबोधकत्वं न स्यात्, प्रत्ययानां प्रकृत्युपस्थापितार्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः। न च प्रत्ययानां प्रकृत्यर्थोपस्थापितार्थान्वितस्वार्थबोधकत्वव्युत्पत्तिरपि स्वीक्रियते, अतः गङ्गापदार्थप्रवाहोपस्थापिततीरान्विताधारताबोधकत्वं सप्तम्याः संभवतीति वाच्यम्। तथा सति शब्दं जानातीति वाक्यात्ज्ञाने आकाशविषयकत्वावगाहिशाब्दबोधापत्तेः द्वितीयाप्रकृत्यर्थेन शब्देन आकाशस्य समवायेनोपस्थापितत्वात् आकाशान्वित-विषयतायाः द्वितीयया बोधनसंभवात्।

न च प्रत्ययानां प्रकृतितात्पर्यविषयार्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिः स्वीक्रियते, तीरस्य गङ्गापदतात्पर्यविषयत्वात् तेन विभक्त्यर्थान्वयः। शब्दं जानातीत्यत्र आकाशस्य शब्दपदतात्पर्यविषयत्वाभावात् न तेन विभक्त्यर्थान्वय इति वाच्यम्। स्वोपस्थापकप्रकृतिकत्वरूपप्रकृत्यर्थत्वापेक्षया स्वप्रतिपादनेच्छयो-च्चरितप्रकृतिकत्वरूपस्य प्रकृतितात्पर्यविषयत्वस्य गुरुत्वेन तद्घटितस्य धर्मस्य अतिगुरुत्वेन प्रत्ययजन्योपस्थितिजन्यतावच्छेदकत्वायोगात्।

अपि च वह्नितात्पर्येण धूमोऽस्तीति प्रयोगे धूमपदतात्पर्यविषयवह्निना प्रत्य-यार्थान्वयबोधः स्यात्। अतः प्रत्ययानां प्रकृतितात्पर्यविषयार्थान्वितस्वार्थबोध-कत्वमिति व्युत्पत्तिर्न शोभना। प्रकृत्युपस्थापितार्थान्वितस्वार्थबोधकत्वं प्रत्यया-नामिति व्युत्पत्तिरेव युक्ता। तथा च तीरस्य प्रकृत्या अनुपस्थापने तदन्विता-धारताबोधकत्वं सप्तम्या न स्यादिति प्रकृत्या उपस्थितिसंपादनाय तीरे गङ्गापदस्य लक्षणा स्वीकार्यैव।

शक्यनिष्ठः अशक्यसंबन्धः लक्षणेति मतस्य निरासः

एतेन शक्यनिष्ठः अशक्यसंबन्धः लक्षणा इति सा पदार्थवृत्तिः इत्यप्यपास्तम्। पूर्वोक्तसरण्या गङ्गायां घोष इत्यादौ सप्तम्याः तीरान्विताधारताबोधकत्वानुपपत्तेः।

वृत्तिवार्तिकसमालोचनम्

"मुख्यार्थसंबन्धेन[६०] शब्दस्य प्रतिपादकत्वं लक्षणा" इति वृत्तिवार्तिकं समालोच्यते।

मुख्यार्थसंबन्धेनेति तृतीयान्तार्थस्य मुख्यार्थसंबन्धप्रयोज्यत्वस्य षष्ठ्यन्तार्थस्य शब्दनिष्ठत्वस्य च प्रतिपादकत्वेऽन्वयात् मुख्यार्थसंबन्धाधीनं शब्दनिष्ठं प्रतिपत्ति-

---

[६०] शा.त. पृ. १४१

जनकत्वं लक्षणेति वाक्यार्थः संपद्यते। तत्र गङ्गाशब्दस्य तीरप्रतिपत्तिजनकतायां मुख्यार्थसंबन्धः कथं प्रयोजक इति वक्तव्यम्। संबन्धिनो गङ्गापदस्य अपर-संबन्धितीरस्मृतिजनकतायां संबन्धविधया मुख्यार्थसंबन्धः प्रयोजक इति यद्युच्यते; तदा शाब्दबोधानुकूलपदार्थोपस्थित्यौपयिकसंबन्धत्वरूपं वृत्तित्वं मुख्यार्थसंबन्धस्य क्लृप्तमिति तस्यैव लक्षणात्वमुचितम्, न तु तत्प्रयोज्यायाः प्रतिपत्तिजनकतायाः; मानाभावात् गौरत्वाच्च।

न च मुख्यार्थसंबन्धेनेति तृतीयार्थः अवच्छिन्नत्वम्, प्रतिपादकत्वेऽन्वेतीति मुख्यार्थसंबन्धावच्छिन्ना प्रतिपादकता लक्षणेति वाक्यार्थ इति वाच्यम्। लक्ष्य-निष्ठस्य मुख्यार्थसंबन्धस्य शब्दनिष्ठायां प्रतीतिजनकतायामवच्छेदकत्वासंभवात्। स्वप्रतियोगिवाचकत्वसंबन्धेन तस्य पदनिष्ठत्वेऽपि जनकतावच्छेदकत्वेनाभिमतस्य मुख्यार्थसंबन्धस्यैव वृत्तित्वसंभवे निरुक्तपरंपरासंबन्धेन तदवच्छिन्नायाः प्रतीति-जनकतायाः लक्षणात्वकल्पने गौरवात्।

न च प्रतिपादकत्वं प्रतिपत्त्यनुकूलो व्यापारः। तृतीयान्तार्थस्य मुख्यार्थ-संबन्धप्रयोज्यत्वस्य प्रतीतावन्वयः। एवं च मुख्यार्थसंबन्धप्रयोज्यप्रतीत्यनुकूल-व्यापारः लक्षणेति वाक्यार्थ इति वाच्यम्। संबन्धत्वेन क्लृप्तस्य मुख्यार्थसंबन्धस्य लक्ष्योपस्थितिप्रयोजकतया तस्यैव लक्षणाव्यापारत्वसंभवेन व्यापारान्तरकल्पनायां प्रमाणाभावात्, मुख्यार्थसंबन्धो लक्षणेत्येव वक्तुमुचितत्वात्।

यदि च धान्येन धनवानित्यत्रेव मुख्यार्थसंबन्धनेत्यत्र तृतीयार्थः अभेदः। स च व्यापारान्वयी। मुख्यार्थसंबन्धाभिन्नः प्रतिपत्त्यनुकूलो व्यापारः लक्षणेति वाक्यार्थ इति मन्यते, तदा लक्षणायाः संबन्धनिमित्तकत्वप्रतिपादकेन "तस्मात् सादृश्य-गर्भतदन्यसंबन्धनिमित्तकतया गौणी शुद्धा चेति लक्षणायाः द्वैविध्यम्" इत्यग्रिम-ग्रन्थेन विरोधः।

स्वबोध्यसंबन्धो लक्षणेति मतस्य निरासः

वाक्ये[६१] लक्षणानुरोधात् स्वबोध्यसंबन्धो लक्षणेति मीमांसकोक्तमपि चिन्त्यम्।

पदविशेषघटितवाक्यानुपूर्व्याः लक्षकतावच्छेदकत्वकल्पने गौरवात्। उभय-वादिसंप्रतिपन्नया पदलक्षणयैव निर्वाहसंभवाच्च।

तथा हि — गभीरायां नद्यां घोष इत्यत्र नदीपदस्यैव गभीरनदीतीरे लक्षणा, न वाक्यस्य। न च गभीरपदस्य लक्षणा वा नदीपदस्य लक्षणा वेत्यत्र विनिगमना-

---

[६१] शा.त. पृ. १४२

विरह इति वाच्यम्। नीलायां यमुनायां घोषः शुक्लायां गङ्गायां घोष इत्यादौ नीलशुक्लादिविशेषणपदशक्यार्थेन लक्ष्यस्य तीरस्य स्वाश्रयसंयुक्तत्वरूपः परंपरा-संबन्धः, विशेष्ययमुनागङ्गादिपदार्थेन तु साक्षात्संबन्ध इति विनिगमकसद्भावेन विशेष्यवाचकपदे एव लक्षणायाः क्लृप्तत्वात्, गभीरायां नद्यां घोष इत्यत्रापि विशेष्यवाचकनदीपदे एव तत्कल्पनाया उचितत्वात्। तस्मात् पदलक्षणयैवोपपत्तेः वाक्ये लक्षणा नावश्यकी।

तथा च तीरे गङ्गापदशक्यार्थसंबन्धः लक्षणा तस्य द्वौ संबन्धिनौ गङ्गापदं तीरं च। तत्र एकसंबन्धिनः गङ्गापदस्य ज्ञानात् अपरसंबन्धिनः तीरस्य स्मृतिः जायते। एवं शक्तिरूपसंबन्धं पुरस्कृत्य प्रवाहस्यापि स्मृतिः जायते। एवं च गङ्गापदस्य येन येनार्थेन संबन्धग्रहो जातः तस्य सर्वस्यापि स्मरणे, स्मृतस्य शक्यार्थप्रवाहस्य घोषपदार्थान्वयानुपपत्तिप्रतिसंन्धाने च सति वृत्त्युपस्थापिते तीरे प्रकरणादिना तात्पर्यज्ञानमुदेति। ततः तीरान्वितघोषविषयकः शाब्दबोधो भवतीति क्रमः। न च प्रवाहवृत्तिर्घोष इति बोधाजनने कथं तत्रानुपपत्तिप्रतिसन्धानं संभवतीति वाच्यम्। वाक्यार्थस्यापूर्वत्वेऽपि शाब्दबोधात् पूर्वं तात्पर्यज्ञानस्येव, तत्तत्पदार्थस्मरणे सति अनुपपत्तिप्रतिसन्धानस्यापि संभवाविरोधात्। यद्रूपवत्त्वेन गृहीते संबन्धज्ञानं, एक-संबन्धिज्ञानेन तेनैव रूपेण अपरसंबन्धिनः स्मृतिः अनुभवसिद्धा। तीरत्वविशिष्टे संबन्धज्ञानं जातमिति गङ्गापदात् तीरत्वेनैव तीरस्य स्मृतिः। समानप्रकारकयोरेव पदार्थोपस्थितिशाब्दबोधयोः कार्यकारणभावात् तीरत्वेनैव तीरशाब्दबोधः।

इत्थं च शक्यतावच्छेदकप्रवाहत्वप्रकारेण लक्ष्यस्य तीरस्य बोध इति स्वीकृत्य, तदनुसारेण शक्यतावच्छेदकप्रकारकलक्ष्यार्थबोधं प्रति लक्षणाज्ञानस्य कारणत्वं, समानप्रकारतया पदार्थोपस्थितिशाब्दबोधयोः कार्यकारणभावस्य लाक्षणिकबोधा-तिरिक्तविषयकत्वं च न कल्पनीयम्।

न च गङ्गात्वेन तीरस्याभाने गङ्गागतशैत्यपावनत्वादीनां तीरे प्रतीत्यसंभवात् प्रयोजनालाभ इति वाच्यम्। मानसात् तीरस्य गङ्गापदप्रतिपाद्यत्वज्ञानात् गङ्गागतशैत्यपावनत्वादीनां तीरे प्रतीतिसंभवात् यत्तु — देवदत्ते अजधनत्वस्य यज्ञदत्ते अविधनत्वस्य चान्वयतात्पर्येण "अजाविधनौ देवदत्तयज्ञदत्तौ" इति प्रयोगवारणाय समस्यमानपदार्थयोरेकधर्मावच्छिन्नेऽन्वये एव द्वन्द्वसमाससाधुतायाः स्वीकरणीयतया गङ्गापदलक्ष्यतीरस्य तीरत्वेन बोधे "गङ्गायां मीनघोषौ स्तः" इत्यत्र मीनघोषयोरेकधर्मावच्छिन्नान्वयाभावात् द्वन्द्वो न साधुः स्यादिति गङ्गात्वेन लक्ष्यतीरबोध आवश्यक इति।

तन्न। समयस्यमानपदार्थयोरेकपदोपस्थाप्यान्वयित्वे द्वन्द्वसमाससाधुतास्वीकारेऽपि निरुक्तप्रयोगवारणसंभवात्। तत्र एकपदोपस्थाप्यान्वयाभावात्। गङ्गायां मीनघोषौ स्त इत्यत्र तीरत्वेन भासमानस्यापि तीरस्य मीनान्वयिप्रवाहोपस्थापकगङ्गापदेनैवोपस्थापितत्वात् तदन्वयेऽपि द्वन्द्वसाधुतानिर्वाहात्।

न चैतादृशनियमस्वीकारे "अजाग्रामौ नयति" इति प्रयोगः साधुः स्यात्, नीधातुनोपस्थापितसंयोगे ग्रामस्य, तेनैवोपस्थापितायां संयोगावच्छिन्नक्रियायामजायाश्च अन्वयविवक्षायामेकपदोपस्थाप्यान्वयित्वस्य अक्षतत्वादिति वाच्यम्। तुल्यतया एकपदोपस्थाप्यताया एव द्वन्द्वसाधुताप्रयोजकत्वोपगमात्। नीधातोः संयोगावच्छिन्नक्रियानुकूलव्यापारे शक्तत्वात् तद्धातुना संयोगस्य व्यापारविशेषणविशेषणतया, क्रियायाः व्यापारविशेषणतया चोपस्थापितत्वात् तयोस्तुल्यतया एकपदोपस्थाप्यत्वाभावात् उक्तान्वयविवक्षायां द्वन्द्वस्यासाधुत्वात्। गङ्गायां मीनघोषौ स्त इत्यत्र तु लक्ष्यतीरस्यापि शक्यप्रवाहस्येव विशेष्यतया गङ्गापदेनोपस्थापितत्वात् तुल्यतया एकपदोपस्थाप्येऽन्वयित्वं मीनघोषयोः अस्तीति द्वन्द्वसाधुतानिर्वाहाच्च।

अथ वा गङ्गायां मीनघोषौ स्त इत्यत्र गङ्गापदस्य गङ्गातीरोभयत्वावच्छिन्ने लक्षणा। मीनघोषोभयत्वावच्छिन्नं गङ्गातीरोभयत्वावच्छिन्नवृत्ति इति शाब्दबोधः। तदुत्तरं मीने प्रवाहवृत्तित्वस्य घोषे तीरवृत्तित्वस्य च मानसो बोधो जायते। इत्थं च द्वन्द्वे समस्यमानपदार्थयोः एकधर्मावच्छिन्नान्वयनियमस्वीकारेऽपि न दोषः। गङ्गापदलक्ष्यतावच्छेदकोभयत्वरूपैकधर्मावच्छिन्नान्वयित्वस्य अक्षतत्वात्। तस्मात् शक्यतावच्छेदकरूपेण लक्ष्यार्थभानं नावश्यकम्।

अत एव लाक्षणिकपदघटितवाक्यजन्यः शाब्दबोधः न भ्रमः, तीरत्वादिनैव लक्ष्यतीराद्यवगाहनात्। "आयुर्घृतम्" इति वेदवाक्यजन्यः आयुर्जनकं घृतम् इत्याकारकः शाब्दबोधः प्रमैवेति शाब्दबोधसमानाकारकज्ञानवतः वेदकर्तुः भ्रमवत्त्वं नापादयितुं शक्यते। अन्यथा आयुष्ट्वेन घृतशाब्दबोधस्य भ्रमत्वात् प्रयोगहेतुभूततत्समानाकारज्ञानवतः वेदकर्तुरीश्वरस्य भ्रमत्वमापद्येत। आयुष्ट्वेन घृतबोधस्य आयुष्ट्वाभाववद्घृतविशेष्यकायुष्ट्वप्रकारकतया भ्रमत्वात्।

"कमलानि कमलानि"[६२] इत्यत्र लाक्षणिककमलपदात् सौरभविशिष्टकमलत्वेन बोधः। दण्डवान् रक्तवदण्डवान् इत्यत्रेव विधेयांशे सौरभवैशिष्ट्यरूपाधिकावगाहिबोधजननात् न व्युत्पत्तिविरोधः।

---

[६२] शा.त. पृ. १४५

वृक्षः महीरुहः इति व्याख्यानवाक्ये वृक्षपदस्य वृक्षपदप्रतिपाद्ये लक्षणा। वृक्षपदप्रतिपाद्यत्वमहीरुहत्वयोः उद्देश्यतावच्छेदकविधेयतावच्छेदकयोः भेदात् अभेदान्वयबोधः सम्यक् उपपद्यते।

"अतद्भावेऽपि तदुपचारः" इति न्यायसूत्रावयवं अतच्छब्दस्य तेन शब्देनाभिधानमिति विवृण्वन्ति भाष्यकाराः। "सहचरणात् यष्टिकां भोजयेति यष्टिकासहचरितब्राह्मणोऽभिधीयते" इत्यादिना तेन शब्देनाभिधाने निमित्ततया सहचरणादिकमेव निरूपयन्ति, न त्वारोपम्। इत्थं च केषांचित् प्राचीननैयायिकानां शक्यतावच्छेदकारोपस्वीकारोऽपि नादरणीयः। तथैव उपपद्यते — "शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा" इत्यभियुक्तोक्तिः।

शक्याविनाभावस्य लक्षणात्वनिरासः

केचित्तु शक्याविनाभाव एव लक्षणा। शक्यविनाभूतस्यार्थस्य लाक्षणिकस्थले शाब्दबोधाभावात् मञ्चाः क्रोशन्ति इत्यादावपि मञ्चपदलक्ष्यार्थे पुरुषे क्रोशनकाले शक्यार्थाविनाभावः वर्तते इति न लक्षणानुपपत्तिः इत्याहुः।

तन्न समञ्जसम्। घटमुञ्चारयेत्यादौ घटशब्दस्य स्वस्मिन् लक्षणायाः नैयायिकसिद्धायाः अनुपपत्तेः। घटपदशक्यार्थेन कलशेन घटशब्दस्य देशतः कालतो वा अविनाभावस्याभावात्।

यत्रान्वययोग्यौ शक्याविनाभूतौ द्वावर्थौ संभवतः, तत्र एक एव शक्याविनाभूतोऽर्थः शाब्दबोधे भासते इत्यस्य तात्पर्येणैव निर्वाह्यत्वात्। शक्यसंबन्धमात्रस्य लक्षणात्वेऽपि, तात्पर्यविरहेणैव शक्यविनाभूतस्यार्थस्य शाब्दबोधवारणसंभवात् शक्याविनाभावस्य लक्षणात्वस्वीकारो व्यर्थश्चेति।

तस्मात् शक्यसंबन्धो लक्षणा। संबन्धश्च साक्षात्परंपरासाधारणः। गङ्गायां घोष इत्यत्र तीरे शक्यप्रवाहस्य साक्षात्संबन्धः। इन्द्रा स्थूणा इत्यादौ शक्यस्य इन्द्रस्य तत्कर्मकपूजाप्रयोजनकत्वादिकं परंपरासंबन्धः।

उपरचारः न वृत्त्यन्तरम् अपि तु लक्षणैव

केचित् उचाराख्या लक्षणाव्यतिरिक्ता जघन्या वृत्तिरस्ति। अनियतसंबन्धेन शक्यार्थादन्यत्र वृत्तिरुपचारः। यथा मञ्चाः क्रोशन्तीत्यत्र मञ्चपदस्य पुरुषे। मञ्चपुरुषसंबन्धस्यानियतत्वात्। नियतसंबन्धेनान्यत्र वृत्तिर्लक्षणा, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे। प्रवाहतीरयोः संबन्धस्य नियतत्वात् — इति वदन्ति।

तत्तु न समञ्जसम्। संबन्धे अवान्तरवैलक्षण्यसत्त्वेऽपि शक्यसंबन्धस्योभयत्र तुल्यत्वात् उपचारस्य लक्षणायामेवान्तर्भावस्योचितत्वात्।

गौणी वृत्तिः

अत्र केचित् — लक्षणातिरिक्ता गौणी जघन्या वृत्तिरस्ति। सिंहो माणवक इत्यत्र सिंहशब्दस्य माणवके वृत्तिः गौणी। न चात्र शक्यसिंहसादृश्यसंबन्धेन सिंहपदस्य माणवके वृत्तिः लक्षणैवेति शङ्कनीयम्। यतः शक्यसंबन्धरूपा वृत्तिः संबन्धितीरादिकमुपस्थापयति। तस्य शाब्दबोधे भानायैव लक्षणावृत्तेः स्वीकारात्। न तु तस्यैव शाब्दबोधे भानम्, स्वस्य स्वोपस्थापकत्वाभावात्। ततश्च सिंहसादृश्यस्य लक्षणात्वे तस्य शाब्दबोधे भानं न निर्वहति। तस्मात् शक्यवृत्तिलक्ष्यमाणगुणसंबन्धः गौणी वृत्तिः। सिंहपदस्य सिंहवृत्तिशौर्यादि गुणलक्षणया तद्वति माणवके वृत्तिः। तदुक्तम् —,"लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता" इति। अत एवेयं वृत्तिद्वयात्मिका लक्षणापेक्षया दुर्बला इति वदन्ति।

अत्रोच्यते — सादृश्यविशिष्टानुयोगिकः शक्यसंबन्धः गौणी वृत्तिः। सिंह-शब्दस्य सादृश्यविशिष्टे लक्षणा। सादृश्यं च सिंहवृत्तिशौर्यादिगुणवत्त्वम्। तच्च लक्ष्यतावच्छेदकम्। तदवच्छिन्नानुयोगिकः शक्यसंबन्धः लक्षणैव। सादृश्य-पर्यवसितगुणैः स्वावच्छिन्नानुयोगिकत्वसंबन्धात् सा गौणीति व्यवह्रियते। "लक्ष्य-माणगुणैर्योगात् वृत्तेरिष्टा तु गौणता" इत्यस्यायमेवार्थः। गुणानां लक्ष्यमाणत्वकथनं लक्ष्यतावच्छेदकत्वाभिप्रायकम्, वृत्तौ स्वावच्छिन्नानुयोगिकत्वरूपयोगविशेषपरि-चयायैव। इत्थं च लक्ष्यतावच्छेदकगुणानां शाब्दबोधे भानमुपपद्यते। अतो न गौणी वृत्तिद्वयात्मिका अतिरिक्ता।

निरूढलक्षणा

अनादितात्पर्यविषयीभूतार्थनिष्ठा लक्षणा निरूढलक्षणा। तात्पर्ये अनादित्वं च स्वप्रयोज्यशाब्दबोधध्वंसकालीनस्वप्रयोज्यशाब्दबोधसामान्यकत्वम्।

आधुनिकलक्षणा

सादितात्पर्यवती लक्षणा आधुनिकलक्षणा। सा आधुनिकलक्षणा सांप्रतिक-लक्षणा स्वारसिकलक्षणेत्येवं व्यह्रियते।

देशिककृतः वृत्तिविभागः[६३]

न्यायपरिशुद्धौ वेदान्तदेशिकाः प्राहुः —

---

[६३] न्या.प. पृ. १५०

वृत्तिर्द्विधा — अभिधोपचारभेदात्। व्युत्पत्तिसिद्धार्थ एव वृत्तिरभिधा यथा सिंहशब्दस्य मृगेन्द्रे। सा जातिगुणादिविषयभेदात् योग-रूढि-तत्समुच्चयभेदाच्च बहुविधा।

मुख्यार्थबाधे सति तदासन्ने वृत्तिरुपचारः। आसत्तिश्च द्विविधा मुख्यार्थसंबन्धः तद्गुणसंबन्धश्चेति। तत्र पूर्वेण प्रवृत्तिर्लक्षणा। यथा गङ्गायां घोषः प्रतिवसतीत्यत्र गङ्गाशब्दस्य प्रवाहविशेषरूपवाच्यसंबन्धिनि तीरे। एवं लक्षितलक्षणा ग्राह्या। द्वितीयेन प्रवृत्तिर्गौणी। यथा सिंहो देवदत्त इत्यत्र सिंहशब्दस्य शौर्यादिगुणयोगिनि देवदत्ते।

अयं विभागो युक्ततम इति प्रतीयते। यतो हि न्यासूत्रकारः गोतममहर्षि "सहचरणस्थाने"त्यादि सूत्रे उपचारनिमित्तानि कथयन् लक्षणागौण्योरुदाहरणानि च प्रदर्शयन् उपचारशब्दः लक्षणागौण्योः साधरण इति सूचयति। अधिकमन्यत्र।

तर्कताण्डवानुसारेण शब्दवृत्तिनिरूपणम्[६४]

शब्दस्य वृत्तिः त्रिधा अभिधा लक्षणा गौणी चेति। तत्र आद्या मुख्यवृत्तिरित्युच्यते। द्वितीयतृतीये त्वमुख्यवृत्ती इति। वृत्तिश्च शब्दस्य तात्पर्यरूपमर्थप्रतिपादकत्वम्। तत्र शक्त्या प्रतिपादकत्वमभिधा। अभिधापि त्रेधा रूढिः योगः योगरूढिश्चेति। तत्र अखण्डशक्त्या प्रतिपादकत्वं रूढिः। न तु समुदायशक्ती रूढिः। एकाक्षरप्रत्ययादौ समुदायाभावात्। योगविवक्षया प्रयुक्ते मण्डपादिशब्दे रूढिव्यवहारापाताच्च। अवयवशक्तिसापेक्षा वृत्तिर्योगः। यथा कुम्भकारौपगवराजपुरुषादिशब्देषु। न तु अवयवशक्तिरेव योगः। एकैकस्याः अवयवशक्तेः रूढित्वात्। शक्तिमेलनस्य अवयवे समुदाये चाभावात्। रूढि-विवक्षया प्रयुक्ते मण्डपादिशब्दे योगव्यवहारप्रसङ्गाच्च। अवयवशक्तिसापेक्ष-समुदायशक्त्या अर्थप्रतिपादकत्वं योगरूढिः, यथा पङ्कजादिशब्देषु। अयं हि अवयवशक्त्या पङ्कजनिकर्तृत्वं समुदायशक्त्या पद्मत्वं च बोधयति।

मुख्यार्थसंबन्धो वा तं निमित्तीकृत्य वृत्तिर्वा लक्षणा मुख्यार्थसादृश्यं वा तन्निमित्तीकृत्य वृत्तिर्वा गौणी। द्वे अपि रूढारूढभेदेन प्रत्येकं द्विविधे। तत्र रूढलक्षणा यथा मञ्चाः क्रोशन्तीति। अरूढलक्षणा यथा गङ्गायां घोष इति। रूढगौणी यथा मृद्गवादौ गवादिशब्दस्य। अरूढगौणी यथा सिंहो देवदत्त इति।

---

[६४] त.ता. पृ. १०९

व्यञ्जनावृत्तिनिरूपणम्

शक्तिलक्षणाभ्यामतिरिक्ता व्यञ्जनाख्या वृत्तिः ध्वनिकारादिभिः स्वीकृता। व्यक्तिविवेकादिग्रन्थेषु तन्निराकरणमवलोक्यते। तत्त्वचिन्तामणिग्रन्थे अस्या वृत्तेः प्रस्तावः न दृश्यते। न्यायमञ्जर्यामस्ति प्रस्तावः। प्रायो नैयायिकाः व्यक्तिविवेक-ग्रन्थमेवानुसरन्तीति प्रतीयते। शाब्दतरङ्गिण्यां[६५] पक्षद्वयमुपन्यस्तम्। तदेवात्र संगृह्यते। व्यञ्जना नाम —

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरनेकार्थधीकृत् व्यापृतिरञ्जनम्।।

नानार्थकशब्दघटितवाक्यप्रयोगे शक्त्या प्रकृतार्थबोधानन्तरं अप्रकृतार्थबोधो जायते स च व्यञ्जनया साध्यः। यथा अयं गौरवितो महान्। अयं गौः अवितः मेषात् महान् महत्परिमाणः इत्येकोऽर्थः। अयं गोरवितः पूजितः महानित्यपरोऽर्थः। श्लोके वाचकत्वस्य नियन्त्रणं नाम एकार्थमात्रविषयकतात्पर्यनिर्णयजननद्वारा शाब्दबोधानुकूलत्वम्। अवाच्यार्थः अतात्पर्यार्थः। तात्पर्यविषयातिरिक्तार्थबोधानु-कूलो व्यापारो व्यञ्जनेति तदर्थः।

अपि च —

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयात् यत्र गतो भवान्।।

इत्यत्र वाक्यार्थबोधानन्तरं जायमानः तव गमने मम मरणं भविष्यतीति बोधोऽनुभवसिद्धः व्यञ्जनयैव निर्वाह्यः।

एवं गतोऽस्तमर्कः इति वाक्यप्रयोगे मानिनीं प्रति हठं मा गा इति, ब्राह्मणान् प्रति सन्ध्या उपास्यतामिति, वणिजः प्रति पण्यान्यपसार्यन्तामिति, च बहूनां बहुविधार्थप्रतीतिर्भवति। सा च शक्त्या लक्षणया वा न घटत इति व्यञ्जनावृत्तिः स्वीकरणीयेति व्यञ्जनावादिनः।

अन्ये त्वाहुः — शाब्दबोधजनकपदार्थोपस्थितिजनकज्ञानविषयः पदपदार्थ-संबन्धो हि वृत्तिः। शाब्दविषयस्य पदार्थस्य पदात् शक्तिरूपसंबन्धज्ञानेन यथोपस्थितिः, न तथा व्यञ्जनारूपपदतदर्थसंबन्धज्ञानेन शाब्दधीविषयतादृश-पदार्थोपस्थितिर्भवति। अतो वृत्तिलक्षणमेव नास्ति व्यञ्जनायाम्। पूर्वोदाहृत-नानार्थस्थलेऽपि प्रकृताप्रकृतयोरर्थयोः शक्त्यैव बोधे बाधकाभावात् न प्राकरणिकबोधानन्तरं अप्राकरणिकार्थबोधानुरोधेन व्यञ्जनावृत्तिः स्वीकार्या।

---

[६५] पृ. १४८

"गच्छ गच्छसि चेत् कान्त" इत्यादावपि अनुमानेनैव "तव गमने मम मरणं भविष्यतीति प्रत्ययः। मरणं विना पुनर्जन्मासंभवात्। व्याप्तिरूपं नियतसंबन्धमवलम्ब्यैव शब्दः अर्थविशेषव्यञ्जक इति व्यक्तिवादिनामपि वक्तव्यम्। अनुमानप्रकारश्च" गमनं मया न कर्तव्यम्, प्रियामरणहेतुत्वादिति। एवं चावश्याश्रयणीयसंबन्धमूलकानुमानेनैव विवक्षितप्रतीति निर्वाहात् न व्यञ्जना कल्पनीया।

रसिकास्तु — अर्थप्रतीतिक्रियायाः कारकः शब्दः। कारकेण क्रियानुकूलव्यापारवता भवितव्यम्। शब्दनिष्ठः अर्थप्रतिपादनानुकूलव्यापार एव वृत्तिरित्यभिधीयते। सा च त्रिविधा अभिधा लक्षणा व्यञ्जना चेति। यथा वह्निनिष्ठायाः दाहजननसामर्थ्याख्यशक्तेः दाहजनने स्वरूपत उपयोगेऽपि पदगता बोधजननसामर्थ्यात्मिका शक्तिः ज्ञातैवोपयुज्यते, तथा पदवृत्तिषु अभिधाया लक्षणायाश्च ज्ञातायाः एवोपयोगेऽपि व्यञ्जना स्वरूपसती अर्थप्रतीतावुपयुज्यते।

आवश्यकी च व्यञ्जनावृत्तिः। तथा हि स्वाधीनेऽपि वाचकशब्दप्रयोगे लाक्षणिकान् शब्दान् प्रयुञ्जते व्युत्पन्नाः। अतो गङ्गातटे इत्यनुक्त्वा गङ्गायां घोषः इत्यभिधानं किमपि प्रयोजनं प्रतिपादयितुमेवेति निश्चीयते। तच्च प्रयोजनं शैत्यपावनत्वादिकम्। तत्प्रतीतिश्च व्यञ्जनाव्यापारादृते न संभवति।

अपि च काव्यस्य जीवितं हि रसः। तत्प्रतीतिश्च चमत्कारकारिणी। रसप्रतीतिश्च चमत्कारकारिणी। सा च व्यञ्जनयैव। रस इति वा शृङ्गार इति वा पदेनाभिधानेऽपि विभावानुभावादीनामप्रतीतौ चमत्कारो नोदेति। विभावादीनां प्रतीतौ तु शब्देनानभिधानेऽपि चमत्कार उदेति। एवमन्वयव्यतिरेकाभ्यां विभावादिमुखेन रसप्रतीतिरेव चमत्कारकारिणीति निश्चिनुमः। तदुक्तं — "रसः स्वप्नेऽपि न वाच्यः" इति।

यत्तु शब्दश्रवणानन्तरं यावानर्थः प्रतीयते तत्र सर्वत्रापि शब्द एव निमित्तम्। शब्दस्य च व्यापारोऽभिधा। सा दीर्घदीर्घतरा। यथा बलवता प्रेरितः इषुः एकेनैव वेगाख्येन व्यापारेण वर्मच्छेदम् उरोभेदं प्राणहरणं च रिपोः विधत्ते, तथा शब्दः एकेनैवाभिधाव्यापारेण पदार्थस्मरणं, वाक्यार्थानुभवं व्यङ्ग्यत्वामतार्थप्रतीतिं च जनयति। अतो व्यङ्ग्यत्वाभिमतोऽर्थोऽपि वाच्य एव। तात्पर्यविषयस्यैव शब्दार्थत्वात्। अतो व्यञ्जनावृत्तिर्नास्तीति।

तन्न। वाक्यार्थानुभवस्यैव अभिधासाध्यत्वविरहेण तदनन्तरभाविव्यङ्ग्यार्थप्रतीतेः सुतरां तदसाध्यत्वात्। वेगव्यापारस्य स्वरूपत एव जनकतया दीर्घदीर्घतरत्वसंभवेऽपि, अभिधायाः ज्ञाताया एव अर्थप्रतिपत्त्यनुकूलत्वात् व्यङ्ग्यत्वाभि-

मतार्थनिष्ठत्वेन पूर्वं तज्ज्ञानाभावेन तया तथा बोधासंभवात्। संकेतग्रहसापेक्षाया एवाभिधायाः उपयोगात् व्यङ्ग्ये संकेतग्रहाभावेन सुतरामभिधया निर्वाहासंभवात्।

इदं तु बोध्यम्। नागेशभट्टाः लघुमञ्जूषायां वृत्तिनिरूपणावसरे व्यञ्जनाख्य-वृत्तेरावश्यकत्वं समर्थयन्ति। वेदान्तिनः व्यञ्जनानिराकरणे नैर्भर्यरहिताः। अत एव श्रीमधुसूदनसरस्वत्यः वेदान्तकल्पलतिकायां "व्यञ्जनाख्या अपरा वृत्तिरित्यालं-कारिकाः।" इत्यादिना तन्मतमुपन्यस्य "तन्न तस्या अर्थापत्तावन्तर्भावस्य महिम्ना दर्शितत्वात्" इत्यादिना दूषयित्वा पुनरन्ते "यदि च नार्थापत्तावन्तर्भवति, तर्हि अस्तु सापि शब्दवृत्तिरिति न काप्यस्माकं क्षतिः" इत्युपसंहरन्ति स्म।

नैयायिकैः व्यञ्जना निरस्ता।

एवं नीलकण्ठकृतायां तर्कसंग्रहदीपिकाप्रकाशिकायां व्यञ्जनाविचारावसाने — "यदि पुनरानुभाविको लोकानां स्वरसवाही शब्दादमुमर्थं प्रत्येमीत्यनुभवः तदा वैयञ्जनिकी वृत्तिः गीर्वाणगुरूणामपि अशक्यवारणेति व्यञ्जनावृत्तिसिद्धिः निष्प्रत्यू-हेति मन्तव्यम्।" इति ग्रन्थः व्यञ्जनानिराकरणे नैर्भर्याभावं प्रतिपादयति। अतः प्रायः सर्वदार्शनिकसंमता अनुभवारूढा व्यञ्जनावृत्तिः सर्वथा स्वीकरणीयेति।

इति शब्दार्थसंबन्धविचारः

पदार्थविचारः

एतावता प्रबन्धेन शब्दार्थसंबन्धविचारः प्रस्तुतः। अथ पदार्थविचारः सप्रपञ्चं प्रस्तूयते —

"ते विभक्त्यन्ताः पदम्"[१] इति सूत्रम्। तच्छब्देन पूर्वसूत्रप्रस्तुताः विकृताः वर्णाः परामृश्यन्ते। ते = यथादर्शनं विकृताः वर्णाः विभक्त्यन्ताः पदसंज्ञका भवन्ति। विभक्तिश्च द्विविधा नामिकी = सुप् आख्यातिकी = तिङ् चेति। ब्राह्मणः, पचतीत्युदाहरणम्। तथा च सुबन्तं तिङन्तं च पदमित्युक्तं भवति। उपसर्ग-निपातानामव्ययसंज्ञकत्वात् "अव्ययादाप्सुपः"[२] इति सूत्रेण लुप्तां सुपमाश्रित्य पदसंज्ञकत्वम्। पदसंज्ञार्थमेव ततः सुपो लोपविधानात्। तत्र सुबन्तस्य नामरूपस्य पदस्यार्थः क इति परीक्ष्यते। गौरिति पदमुदाहरणम्। गोपदस्य किं व्यक्तिरर्थः उत आकृतिः अथ वा जातिरिति संशयः। संशयबीजं तु तेषां संनिधिः = अविना-भावः। अविनाभावेन वर्तमानासु व्यक्त्याकृतिजातिषु गौरिति शब्दः प्रयुज्यते। तत्र न ज्ञायते किमन्यतमः पदार्थः उत सर्वे इति। तत्र व्यक्तिः गोपदार्थ इति व्यक्तिवादिनः। व्यक्तिर्नाम द्रव्यम्। तथा हि — "याशब्दसमूहत्यागपरिग्रहसंख्या-वृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचारात् व्यक्तिः"[३] याशब्दादीनां व्यक्तौ प्रयोगात् व्यक्तिः पदार्थः।

"या गौस्तिष्ठति, या गौर्निषण्णा" इत्यादौ यदि गोशब्दस्य जातिरर्थः स्यात् तदा तस्या एकत्वात् तिष्ठति, निषण्णेति तस्याः विशेषणमनर्थकम्। व्यक्तिवाचित्वे तु स्थित्याद्यनाश्रयगोव्यक्तिव्यावर्तनाय तद्विशेषणमिति सार्थक्यम्। एवं गवां समूहः गोसमूह इति व्यवहारः गोशब्दस्य गोत्वजातिवाचित्वे न संगच्छते। एकत्वाज्जातेः तत्समूहासंभवात्। व्यक्तिवाचित्वे तु तासामनेकत्वेन तद्घटितसमूहसंभवात् गोसमूह इति व्यहार उपपत्स्यते।

"वैद्याय गां ददाति" इति गोपदार्थस्य त्यागः — देयत्वमवगम्यते। व्यक्तेः पदार्थत्वे तत् संगच्छते। जातेस्त्वमूर्तत्वात् तन्न संगच्छते। एवं परिग्रहः — स्वत्वेनाभिसंबन्धः "कौण्डिन्यस्य गौः, ब्राह्मणस्य गौः" इति। स्वत्वसंबन्धरूपः

---

[१] न्या.सू. २.२.५८
[२] पा.सू. २.४.८२
[३] न्या.सू. २.२.६०

परिग्रहः द्रव्यवाचकत्वपक्षे युज्यते, न जातिवाचकत्वपक्षे। जातेरमूर्तत्वात्। संबन्धभेदरूपः परिग्रहः द्रव्यभेदात् युज्यते जातेस्त्वेकत्वात् स न युज्यत इति वा अर्थः। एवं "दश गावः, विंशतिः गावः" इति संख्यानं द्रव्यपक्षे युज्यते। जातेस्तु एकत्वात् दशत्वादिसंख्यावत्त्वं तस्याः न युज्यते। एवं 'अवर्धत गौः' इति गोपदार्थे वृद्धिमत्त्वं प्रतीयते। वृद्धिर्नाम समवायिकारणवतः = सावयवस्य द्रव्यस्यावयवोपचयः। इयं वृद्धिर्निरवयवायां जातौ न घटते। एवमपचयोऽपि। एवं वर्णसंबन्धः "शुक्ला गौः कपिला गौः" इति द्रव्यस्य गोपदार्थत्वे घटते। जातेर्निर्गुणत्वान्न घटते। एवं समासः गोहितं गोसुखम् इति गोपदार्थे द्रव्ये सुखादियोगात् संगच्छते। जातौ तदयोगात् न संगच्छते। एवम् अनुबन्धः सरूपप्रजननसंतानः गौर्गां जनयतीति व्यपदिश्यमानः द्रव्यस्योत्पत्तिधर्मकत्वात् युज्यते न जातेः, विपर्ययात् इति।

इमं व्यक्तिपक्षं खण्डयति — "न तदनवस्थानात्"[४] न व्यक्तिः पदार्थः, कस्मात्? अनवस्थानात् = जातिं विना व्यक्तेः अवस्थित्यभावात्। अतः "या गौस्तिष्ठति, या गौर्निषण्णा" इत्यत्र जात्या अविशिष्टं द्रव्यमात्रं न गोपदेनाभिधीयते, अपि तु जातिविशिष्टम्। यदि जातिरहितं व्यक्तिमात्रमभिधेयं स्यात् तदा यस्यां कस्यामपि अश्वादिव्यक्तावपि गौरिति प्रत्ययः स्यात्। एवं समूहादिष्वपि द्रष्टव्यम्। गोसमूह इतिशब्दात् अश्वसमूहस्यापि प्रतिपत्तिः स्यादिति।

यदि न व्यक्तिः पदार्थः तदा व्यक्तौ गवादिशब्दानां कथं प्रयोग इत्याशङ्क्य जातिसहचरितत्वात् व्यक्तेः जातिवाची शब्दः व्यक्तौ लाक्षणिक इत्याशयेनोक्तं सूत्रकृता —

"सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः"[५]

इति। तत्पदाशक्यस्यापि तत्पदेनाभिधानं दशभ्यो हेतुभ्यो भवति। अत्राभिधानं गौण्या लक्षणया वा।

सहचरणात् — "यष्टिकां भोजय" इत्यत्र यष्टिकाशब्देन यष्टिकासहचरितो ब्राह्मणो लक्षणया अभिधीयते।

स्थानं — स्थितिः। "मञ्चाः क्रोशन्ति" इत्यत्र मञ्चे स्थितिं पुरस्कृत्य मञ्चशब्देन मञ्चस्थिताः पुरुषा अभिधीयन्ते।

---

[४] न्या.सू. २.२.६१
[५] न्या.सू. २.२.६२

तादर्थ्यात् — "कटं करोति" इत्यत्र कटार्थेषु वीरणेषु कटशब्दः वर्तते।

वृत्तात् — "यमो राजा कुबेरो राजा" इत्यत्र यमकुबेरवृत्तयोगात् राजा यमकुबेरशब्दाभ्यामभिधीयते।

मानम् "आढकसक्तवः" इत्यत्र आढकपरिमाणयोगात् आढकशब्देन सक्तवोऽभिधीयन्ते।

धारणात् — "तुलायां धृतं चन्दनं तुलाचन्दनम्" इति।

सामीप्यात् — "गङ्गायां गावश्चरन्ति" इत्यत्र गङ्गासमीपे गावः चरन्तीत्यर्थः प्रतीयते।

योगात् — "कृष्णेन रागेण योगात् शाटकः कृष्णः" इत्यभिधीयते।

साधनात् — "अन्नं प्राणा" इत्यत्रान्नस्य प्राणसाधनत्वात् अन्नशब्देन अन्नसाधनकः प्राणोऽभिधीयते।

आधिपत्यात् — "अयं पुरुषः कुलम्" इत्यत्र कुलाधिपतित्वात् पुरुषः कुलशब्देनाभिधीयते।

यदि "गौः" इत्यस्य पदस्य न व्यक्तिरर्थः, अस्तु तर्हि —

"आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः"[६]

आकृतिः पदार्थः, अवयवानां नियतः संनिवेशः आकृतिः। तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं — अवयवसंनिवेशव्यवस्था द्रव्यभेदबुद्धिः "अयं गौरयमश्वः" इत्येवंरूपा सिध्यति। यस्य ग्रहणात् सत्त्वव्यवस्थानं सिध्यति स गोशब्दार्थो भवितुमर्हति।

अयं पक्षोऽपि न युक्तः। यस्य जात्या योगः तं जातिविशिष्टमर्थमभिधत्ते गोशब्दः। न चावयवसमूहरूपाया आकृतेर्जात्या योगोऽस्ति, अपि तु नियतावयवसंनिवेशविशिष्टस्य द्रव्यस्य। तस्मात् न आकृतिः पदार्थ इति।

अस्तु तर्हि जातिः पदार्थः —

"व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः"[७]

मृद्गवकं — मृन्निर्मिता गौः। "गां प्रोक्षय, गामानय, गां देहि" इति निर्दिश्यमानानां प्रोक्षणानयनदानादीनां मृद्गवकेऽप्रसङ्गात् गोत्वजातियुक्ते एव

---

[६] न्या.सू. २.२.६३

[७] न्या.सू. २.२.६४

तत्संभवात् जातिरेव पदार्थः। अस्ति हि मृद्गवकेऽपि व्यक्तिः आकृतिश्च। यदभावात् तत्र प्रोक्षणाद्यभावः सा जातिः गोपदार्थ इति।

अयं जातिपक्षोऽपि न युक्तः —

"नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः"[८]

जातेरभिव्यक्तिः आकृतिव्यक्ती अपेक्षते। न ह्यगृह्यमाणायामकृतौ व्यक्तौ च जातिमात्रं शुद्धं गृह्यते। तस्मान्न जातिः पदार्थः।

कस्तर्हि पदार्थः? न हि अर्थशून्यं पदं भवितुमर्हति इत्यत्राह —

"व्यक्त्याकृतिजातयस्तु पदार्थः"[९] इति। तुशब्दः विशेषणार्थः = व्यावर्तनार्थः। किं विशिष्यते = व्यावर्त्यते। प्रधानाङ्गभावनियमः। तथा च विशेषण-विशेष्यभावानियमेन व्यक्त्याकृतिजातयः पदार्थ इति। यदा हि भेदस्य विवक्षा विशेषावगतिश्च तदा व्यक्तिः प्रधानम्, जात्याकृती अङ्गम्। यथा "गौर्निषण्णा" इत्यत्र। यदा तु भेदोऽविवक्षितः सामान्यावगतिश्च भवति तदा जातिः प्रधानम्, व्यक्त्याकृती अङ्गम्। यथा "गौर्न हिंस्या" इत्यत्र। चित्रलिखिते गवि आकृतेः प्राधान्यम्, इतरयोः जातिव्यक्त्योरङ्गत्वम्।

तत्र के व्यक्त्यादय इत्याकाङ्क्षायां तासां क्रमशो लक्षणान्याह सूत्रकारः —

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः[१०] व्यज्यत इति व्यक्तिः इन्द्रियग्राह्येत्यर्थः। न सर्वं द्रव्यं व्यक्तिः अपि तु यो गुणविशेषाणां स्पर्शान्तानां, गुरुत्वघनत्वद्रवत्वसंस्काराणां अव्यापिनश्च परिमाणस्य यथासंभवमाश्रयः तद् द्रव्यं मूर्तिः परस्परसंयुक्ता-वयवकत्वात्।

आकृतिर्जातिलिङ्गाख्या[११] यया जातिः जातिलिङ्गानि च प्रख्यायन्ते सा आकृतिः।

समानप्रसवात्मिका जातिः[१२] भिन्नेषु समानाकारकबुद्धेर्जनयित्री जातिरित्यर्थः।

अत्र सूत्रकारेण व्यक्त्याकृतिजातीनां तिसृणामपि पदशक्यत्वं प्रतिपादितम्। अत्र विषये विशेषतो विमर्शः न्यायमञ्जर्यां कृतः इति तद्रीतिमवलम्ब्य कः पदार्थ इति निर्णयं कुर्मः।

---

[८] न्या.सू. २.२.६५
[९] न्या.सू. २.२.६६
[१०] न्या.सू. २.२.६७
[११] न्या.सू. २.२.६८
[१२] न्या.सू. २.२.६९

न्यायमञ्जरीकृतं पदशक्यार्थनिरूपणम्

द्विविधः शब्दः। पदं, वाक्यं च। तत्र पदार्थपूर्वकत्वाद्वाक्यार्थस्य प्रथमं पदार्थो निर्दिश्य निरूप्यते। पदं च द्विविधम्। नाम, आख्यातं च। उपसर्गनिपात-कर्मप्रवचनीयानामपि नामस्वेवान्तर्भावमाचक्षते। तदुक्तं "सुप्तिङन्तं पदम्"[१३] इति। इहापि सूत्रकृदाह — "ते विभक्त्यन्ताः पदम्"[१४] इति। तत्र तिङन्त-पदार्थचिन्ता वाक्यार्थविचारावसरे करिष्यते। वाक्यार्थोपयोगित्वात्। क्रियायां हि वाक्यं परिसमाप्यते। सुबन्तानां त्वर्थ इदानीं विर्चायते। जातिशब्दाः, क्रियाशब्दाः, गुणशब्दाः, द्रव्यशब्दा इति पदात्मानः सुबन्ताः शब्दाः चतुर्विधा भवन्ति। तत्र गवादिजातिशब्दानां गोत्वादिजात्यवच्छिन्नव्यक्तिमात्रमर्थः।

ननु शुक्लादिगुणाधिकरणं क्रियाश्रयश्च द्रव्यं व्यक्तिः, सास्नाद्यवयवसंनिवेशरूपा आकृतिः, शाबलेयादिसकलगोपिण्डसाधारणं रूपं जातिः इति लक्षणलक्षितानां व्यक्त्याकृतिजातीनां संनिधाने समुच्चारितः एष गोशब्दः इतरतिरस्कारेण कथं जातिमन्मात्रवाचकतामवलम्बेत? इत्याशङ्कामुत्थाप्य न्यायमञ्जर्यां विचार्य निर्धारितं विषयं प्रस्तुमः।

आकृतिपदार्थः[१५]

तत्र का नाम आकृतिः सा किं जातिः उत तदतिरिक्ता? "व्यक्त्याकृति-जातयस्तु पदार्थः"[१६] इति सूत्रे जातेः पृथक् आकृतेर्निर्देशात् जात्यतिरिक्ता आकृतिः सा चावयवसंस्थानरूपेति गौतमस्य मतम्।

जैमिनिस्तु "आकृतिस्तु क्रियार्थत्वात्"[१७] इत्याकृतिरेव जातिरिति मन्यते। भाष्यकारः शबरस्वाम्यपि — "सास्नादिविशिष्टा आकृतिरिति ब्रूमः"[१८] इत्याह। वार्तिककारोऽपि —

> जातिमेवाकृतिं प्राहुः व्यक्तिराक्रियते यया।
> सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम्।।

इत्यवोचत्। तन्मतं गोतमस्य नाभिमतम्। लोकोऽपि "यत्राकृतिस्तत्र गुणा वसन्ति" इत्यवयवसंनिवेशात्मिकामाकृतिं व्यपदिशति। तस्मात् अवयवसंनिवेश

---

[१३] पा.सू. १.४.१४
[१४] न्या.सू. २.२.५८
[१५] न्या.म. पृ.४७
[१६] न्या.सू. २.२.६६
[१७] जै.सू. ९.३.३३
[१८] शा.भा. १.१.५

एव आकृतिरुच्यते। तस्याश्च शब्दार्थता उपपद्यते न वेति परीक्षार्हता अस्त्येव, न जैमिनिवदुपेक्षितुं सा युक्ता। तस्मात् व्यक्त्याकृतिजातिसंनिधौ गोशब्दस्य प्रयोगात् तस्य कोऽर्थ इति विचार्यते।

आकृतिशक्तिवादः

अत्राकृतिवादिनस्तावदाहुः — प्रयोगतदधीनप्रतिपत्तिभ्यां किल अयमस्य शब्दस्यार्थ इति शब्दार्थनिश्चयो भवति। वृद्धाः यस्मिन्नर्थे गोशब्दं प्रयुञ्जते, श्रोतारश्च यमर्थं ततो जानन्ति स तस्यार्थः। तत्र गोशब्दः केसरादिमति न प्रयुज्यते, सास्नादिमति च प्रयुज्यते इति असाधारणसंनिवेशविषयक एव स इत्यवगम्यते। अपि च प्रत्यक्षविषयेऽर्थे गौरित्यादिपदं प्रयुज्यते। प्रत्यक्षं च आकृतिविषयकम्। अश्वपिण्डसंनिवेशात् विलक्षणो हि गोपिण्डसंनिवेशः इन्द्रियेण प्रतीयते। अवयवसंनिवेशकृतमेव च वस्तूनां परस्परवैलक्षण्यम्। अतः प्रत्यक्षविषयेऽर्थे पदं प्रयुज्यमानम् आकृतावेव वर्तितुमर्हति। न च गामानय, गां प्रेषय इत्यादिव्यवहारविषयः आनयनादिक्रियायोगः आकृतावसंभवी, अतः कथमाकृतिः शब्दार्थ इति वाच्यम्। व्यक्तिद्वारा आकृतौ क्रियायोगस्य संभवात्। एतदुक्तं भवति — स्वाश्रयाश्रयत्वसंबन्धेन आकृतौ क्रियान्वय इति।

आकृतिशक्तिवादनिरासः[१९]

तदयुक्तम्। प्रतिव्यक्ति भिन्नस्यैवावयवसंस्थानस्य दर्शनात् आनन्त्यव्यभिचाराभ्यां संबन्धज्ञानासंभवात्। तथा हि — न नियतस्य शाबलेयसंनिवेशस्य गोशब्दो वाचकः। तादृशसंनिवेशाभावेऽपि बाहुलेयसंनिवेशे गोशब्दप्रयोगदर्शनेन व्यभिचारात्। न च त्रैलोक्यान्तर्गतसकलगोपिण्डगतसंनिवेशवाचकत्वं गोशब्दस्य युक्तम्। आनन्त्यात् सकलसंनिवेशेषु संबन्धग्रहासंभवात्। ततश्च नाकृतिः शब्दार्थः। किं च आकृतौ प्रेषणादिक्रियान्वयानुपपत्तेश्च नाकृतिः शब्दार्थः। न हि "गामानय" इत्युक्ते मृत्स्नामयीं गामानयति कश्चित्। तत्र हि गवाकृतिरस्ति। अपि तु आकृतिविशिष्टां व्यक्तिमेवानयति।

ननु जातिवाचकत्वपक्षेऽपि गोत्वजातेः सर्वत्र सत्त्वेन गामानयेत्युक्ते किमिति मृद्गवकं नानीयते। उच्यते। हस्ती तर्हि कुतो नानीयते। गोत्वजातेः सर्वत्र सत्त्वेऽपि व्यञ्जकव्यक्तिनियमात् या व्यक्तिः गोत्वजातेर्व्यञ्जिका सैव आनीयत इति यद्युच्यते, हन्त तर्हि सास्नादिमत्प्राणी गोत्वजातेरभिव्यञ्जक इति सास्नादि-

---

[१९] न्या.म. पृ. ४८

मत्प्राण्येवानीयते न मृद्गंव इति नातिप्रसङ्गः। संनिवेशरूपाया आकृतेर्गोशब्द-वाच्यत्वे तु मृद्गवेऽपि तत्सद्भावात् "गौरानीयताम्" इत्युक्ते मृद्गवानयनप्रसङ्गः न वारयितुं शक्यते।

किं च गोशब्दस्य आकृतिवाचित्वे शुक्लादिगुणवाचिभिः पदान्तरैः सह गो-शब्दस्य सामानाधिकरण्यं यत् दृश्यते शुक्ला गौश्चरति इत्यादि तन्न संगच्छते। व्यक्तेरेव शुक्लादिगुणाश्रयत्वेन आकृतेः तदाश्रयत्वाभावात्। अतो व्यक्तेः शब्दार्थ-त्वमेव वरम्। व्यक्तौ क्रियान्वयः संभवति। जातौ च संबन्धग्रहः सुलभः। आकृतौ तु तदुभयमपि न संभवतीति सुतरां न वाच्यत्वम्। तस्मात् जातिव्यक्त्योर्मध्ये कतरस्याः शब्दवाच्यत्वम् इत्येव निर्णयः संपादनीयः। तत्र व्यक्तिवादिनो वदन्ति —

व्यक्तिशक्तिवादः[२०]

प्रयोगस्य चोदनायाश्च व्यक्तावेव सामञ्जस्यात् व्यक्तिरेव पदार्थः। "अग्निषोमीयं पशुमालभेत" "व्रीहीन् प्रोक्षति" इत्यादयः आलम्भनविशसनप्रोक्षणादिविधयः न जातौ संगता भवन्ति। न हि जातिरालभ्यते विशस्यते प्रोक्ष्यते वा। अपि च षड् देयाः, द्वादश देयाः, चतुर्विंशतिर्देया इति न जातिः षडादिसंख्याभिर्युज्यते अपि तु व्यक्तिः। अतः सैव शब्दार्थः।

अपि च "यदि पशुरुपाकृतः पलायेत अन्यं तद्वर्णं तद्वयसमालभेत" इति श्रूयते। यदि जातिः शब्दार्थः स्यात् तदा अन्यस्य आलम्भः श्रूयमाणो नोपपद्यते। अन्यस्यानीयमानस्य पशुद्रव्यस्य सैव जातिः। तत्रान्यत्वसंबन्धः व्यक्तेरवकल्पते न जातेः इत्यतोऽपि व्यक्तिः शब्दार्थः।

किं च गौर्वर्धते इत्युपचयः, गौः क्षीयत इत्यपचयः, गोसमूह इति संघातः, गोस्वामी चैत्र इति स्वस्वामिभावः, इत्यादिकल्पनाः व्यक्तिपक्षे संगच्छन्ते न जातिपक्षे जातावुपचयाद्यभावात्। न च केवलव्यक्तेः शब्दार्थत्वे आनन्त्यव्यभि-चाराभ्यां संबन्धग्रहः दुःशक वाच्यम्। जात्युपलक्षितव्यक्तेर्वाच्यत्वस्वीकारेण संबन्धग्रहस्य सुलभत्वात्। किं च प्रत्यक्षविषयेऽर्थे पदवृत्तिरिष्टा परैरपि। व्यक्ति-विनाकृतं सामान्यमात्रं न प्रत्यक्षगोचरः। तस्मात् व्यक्तेरेव जात्युपलक्षितायाः पदार्थत्वं युक्तमिति।

---

[२०] न्या.म. पृ. ५०

व्यक्तेः शब्दार्थत्वे मीमांसकानामाक्षेपः[२१]

तदेतत् जैमिनीयाः न क्षमन्ते। तथा हि — व्यक्तिमात्रं वा शब्दार्थ इष्यते? जातिविशिष्टा वा व्यक्तिः। न तावत् व्यक्तिमात्रम्। न हि यस्यां कस्यांचित् व्यक्तौ गोशब्दं वक्तारः प्रयुञ्जते। न च यां कांचित् व्यक्तिं गोशब्दात् श्रोतारः प्रतिपद्यन्ते। एतदुक्तं भवति — यस्याः कश्याश्चित् नियतायाः व्यक्तेः गोशब्दवाच्यत्वस्वीकारे अन्यस्याः व्यक्तेः गोशब्दवाच्यत्वं न स्यात्। सर्वासां व्यक्तीनां गोशब्दवाच्यत्वाङ्गीकारे तु आनन्त्यात् वाच्यत्वग्रहः न संभवतीति।

अथ गोत्वविशिष्टव्यक्तिः गोशब्दार्थ इत्युत्यते, तदा गोत्वमेव गोशब्दार्थ इत्युक्तं भवति, न व्यक्तिः। कथमिति चेत् — श्रूयताम्। यदि हि व्यक्तिः शब्दार्थो भवेत्, व्यक्त्यन्तरेषु न प्रयुज्येत। यदि व्यक्त्यन्तरेऽपि प्रयुज्यते, सर्वव्यक्तिसाधारणजातिरेव तर्हि शब्दार्थ इति।

ननु व्यक्तेः शब्दार्थत्वे व्यक्त्यन्तरस्यापि व्यक्तित्वात् शब्दार्थत्वं संभवतीति चेत् — मैवम्। व्यक्तौ चेत् गोशब्दः प्रयुज्यते, कर्कादिव्यक्तावपि प्रयुज्येत। यत्र प्रयोगोऽस्य दृष्टः तत्र प्रयुज्यत इति चेत् — अद्य जातायां गवि गोशब्दप्रयोगो न स्यात्। पूर्वमस्यां गोशब्दप्रयोगस्यादृष्टत्वात्। अतो दर्शनमप्रयोजकम्। जगति विद्यमानानां सर्वगवां केनापि द्रष्टुमशक्यत्वात् तत्र प्रयोगस्यापि द्रष्टुमशक्यत्वात्।

किं च व्यक्तेः शब्दार्थत्वे "इयं वा गौः इयं वा गौः" इति प्रतिपत्तिः स्यात्, न तु "इयमपि गौः" इति। अपिना अनुगतार्थप्रतीतिसूचनेन व्यक्तेरनुगतत्वाभावात्। जातेस्तु अनुगततया "इयमपि गौः" इति प्रतीतिर्युज्यते। तथा चेयं प्रतीतिः गोत्वजातिं पुरस्कृत्यैव प्रवर्तत इति वक्तव्यम्। तच्च गोत्वमवगतं वा अनवगतं वा नियामकमिति संशये नानवगतं नियामकम्, अतिप्रसङ्गात् — अवगतं चेत् कुतस्तदवगच्छामः? शब्दात्, अन्यतो वा? नान्यतः, शब्दातिरिक्तस्य प्रमाणस्यासंनिधानात्। शब्दाच्चेत् तर्हि शब्दः प्रथमतरं गोत्वे प्रवर्तितुमर्हति। "नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते" इति न्यायात्।[२२]

ननु गोशब्दः जातिं विशेषणत्वेन व्यक्तिं विशेष्यत्वेन च वक्ष्यति। न वक्तुं शक्नोति, अतिभारप्रसङ्गात्। यद्यपि जातिव्यक्त्योर्द्वयोरपि प्रतीतिर्भवति, तथापि नोभयत्र शब्दस्याभिधात्री शक्तिः, अन्यतरत्र शक्त्या अन्यतरप्रतीतौ आक्षेपादेव अन्यतरान्तरप्रतीतेरुपपत्तेः। तत्र किं जातौ वर्तमानः शब्दः व्यक्तिमाक्षिपति अथवा

---

[२१] न्या.म. पृ. ५१

[२२] न्या.म. पृ. ५२

व्यक्तौ वर्तमानः जातिमाक्षिपतीति विचारे जातेर्विशेषणत्वात् पूर्वं प्रतिपत्तिरिति सैव शब्दस्यार्थो भवितुमर्हति। तस्यां च शब्दादवगतायां तत एवाक्षेपात् व्यक्त्यवगमो भविष्यतीति नोभयत्र शाब्दो व्यापारः।

गवादिपदानां दण्ड्यादिपदवैलक्षण्यम्[२३]

ननु दण्डिशब्दात् यथा दण्डतद्वतोर्विशेषणविशेष्ययोः प्रतिपत्तिर्भवति तथा गोशब्दात् विशेषणविशेष्ययोः गोत्वतद्वतोः प्रतीतिर्भविष्यति। कोऽस्य गोशब्दस्यातिभार इति चेत् — दृष्टान्तस्य विषमत्वात्। तत्र हि प्रकृतिप्रत्ययविभागेनोभयप्रतीतिरवकल्पते। दण्डशब्दः प्रकृतिर्विशेषणमभिधत्ते। मत्वर्थीयप्रत्ययश्च विशेष्यम्। गोशब्दे तु नैषा रीतिः संभवति। गोशब्दस्यैकस्यैव सत्त्वात्। तथा च एको गोशब्दो विशेषणे विशेष्ये वा वर्तेत। विशेष्ये चेद्वर्तेत, विशेषणबोधनाय प्रमाणान्तरमपेक्षेत। विशेषणे तु वर्तमानः तत् अवगमय्य विशेष्यमप्याक्षेपात् बोधयतीति न कश्चित् दोषः।

व्यक्तिबोधस्यान्यथासिद्धत्वम्

अयमस्ति सर्वेषामात्मसाक्षिकोऽनुभवः (प्रत्यक्षं) यत् गोशब्दे उच्चरिते व्यक्तिरवगम्यत इति। व्यक्तिः किं शब्दादवगम्यते उत जातेरिति विवेको न प्रत्यक्षः। स विवेकः युक्त्या अवगम्यते। उभयाभिधाने गौरवात् विरम्य व्यापारस्य चासंवेदनात्, शब्दात् जात्यवगमे सति अन्तरेणापि शब्दं व्यक्तिप्रतीतेः दर्शनात् जातित एवैषा व्यक्तिप्रतीतिः। जातिप्रतीतिश्च शब्दादिति निश्चीयते। भवद्भिरपि (न्यायवैशेषिकनिष्ठैरपि) विशेषणज्ञानपूर्विका विशेष्यावगतिरिष्टा। यथाह कणादः — "समवायिनः श्वैत्यात् श्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते कार्यकारणभूते"[२४] इति।

अस्यायमर्थः — समवायप्रतियोगिभूतं श्वेतरूपं यत् या च श्वेतरूपबुद्धिः तदुभयस्मात् अयं श्वेत इति रूपविशिष्टद्रव्यबुद्धिः। अतः ते श्वेतद्रव्यबुद्धिश्वैत्यबुद्धी कार्यकारणभूते इति।

यत् पुनरभिहितम् — आलम्भनविशसनप्रोक्षणादिक्रियायोगात् व्यक्तिः शब्दार्थ इति।[२५] तदप्यनैकान्तिकम्। जातावपि क्वचित् क्रियान्वयदर्शनात् — "श्येनचितं चिन्वीत" इति। नन्वत्रापि व्यक्तेरेव कार्याङ्गत्वम्, नामूर्तायाः जातेरिति चेत् — मैवम्। न ह्यत्र श्येनः साधनत्वेन निर्दिश्यते "पशुना यजेत" इतिवत्। अपि तु

---

[२३] न्या.म. पृ. ५३
[२४] वै.सू. ८.१.९
[२५] न्या.म. पृ. ५४

"कर्मण्यग्न्याख्यायाम्"[२६] इति सूत्रेण अग्न्याधान-स्थानविशेषाख्यायां 'चिञ् चयने' इति धातोः कर्मण्युपपदे कर्मण्यर्थे क्विप् विहितः। श्येनः चीयमानः श्येनचित्। चयननिर्वर्त्यः श्येन इति शब्दार्थोऽवगम्यते। न च श्येनव्यक्तिः चयनेन निर्वर्तयितुं पार्यते। चयनं नामेष्टकानां संयोजनम्। न हि तेन पक्षी जायते। तदाकृतिकं तु अग्न्याधानस्थानं चयनेन निर्वर्तयितुं शक्यम्। तथा च श्येनाकृतिसदृशाकृतिकमग्न्याधानस्थानं कुर्यात् इति वाक्यार्थः। अतोऽत्र आकृतिरूपायाः जातेः क्रियाङ्गत्वं न व्यक्तेः।

ननु श्येनव्यक्तिसदृशं स्थानं कुर्यात् इत्येव वाक्यार्थः।[२७] स च व्यक्तिसादृश्येन संपद्यते। अतो न जातिवाचित्वमिति चेन्न। व्यक्त्यन्तरवैसादृश्यस्यापि संभवात्। यो ह्येकया व्यक्त्या सदृशः सोऽन्यैर्विसदृशोऽपि भवति।

अमूर्तानामपि साधनत्वसंभवः

यत्तु अमूर्ताया जातेर्न क्रियाङ्गत्वमिति। नैष दोषः। अमूर्तानामपि गुणकर्मणां साधनत्वस्य अस्माभिः (मीमांसकैः) अङ्गीकारात्। यथा "अरुणया क्रीणाति" इति अमूर्तस्य आरुण्यस्य गुणस्य क्रयसाधनत्वं "अभिक्रामं जुहोति" इति अमूर्तायाः अभिक्रमणक्रियायाः होमसाधनत्वं च बोध्यमानं स्वीकृतमेव। जात्या आक्षिप्तायाः लक्षितायाः वा व्यक्तेः आलम्भनविशसनादियोगः उपपद्यते। यथा हस्तेन कृतं कार्यं पुरुषेण कृतम् इति वदन्ति, यथा चक्षुषा इन्द्रियेण संपाद्यं दर्शनं "पुरुषः पश्यति" इति पुरुषकर्तृकं वदन्ति व्यक्तिसाध्यं कार्यं जातिसाध्यतया व्यपदिशति श्रुतिरिति नानुपपत्तिः कापि।

आत्मा तावत् सर्वकर्मस्वधिकृतः कर्ता च।[२८] स स्वयममूर्तत्वात् देहेन्द्रियद्वारेण औदुम्बरीसंमार्जनाज्यावेक्षणादीनि कर्माणि निष्पादयन् तेषु कार्येषु कर्ता भवति। एवं जातिरपि व्यक्तिद्वारा क्रियां निर्वर्तयन्ती तत्साधनतां भजिष्यते।

तस्मात् जातिरेव क्रियाङ्गम्। तस्याश्च क्रियाङ्गत्वं व्यक्तिद्वारकम्, आत्मवत्। एवं षड् देयाः, इति षडादिसंख्यासंबन्धः "अन्यं तद्वर्णं तद्वयसमालभेत" इति अन्यत्वसंबन्धश्च जातौ व्यक्तिद्वारा उपपद्यते। उपचयापचयादिकमपि व्यक्तिद्वारा जातावुपपन्नम्। संबन्धग्रहणं च जातेः शब्दार्थत्वे सुलभम्। व्यक्तेः शब्दार्थत्वे तु आनन्त्यव्यभिचाराभ्यां तत् दुःशकमिति पूर्वमेवोक्तम्।

---

[२६] पा.सू. ३.२.९२
[२७] न्या.म. पृ. ५५
[२८] न्या.म. पृ. ५६

यत्पुनरुक्तम् — प्रत्यक्षविषये पदं वर्तते। प्रत्यक्षस्य च निष्कृष्टं सामान्यमात्रं न विषयः, अपि तु व्यक्तिः सामान्याश्रयभूतेति — तत्र वार्तिककारेण समाधानमभ्यधायि प्रत्यक्षस्य हि चित्रात्मकं वस्तु विषयः।

"न च तत् तादृशं किंचित् शब्दः शक्नोति भाषितुम्।
सामान्यांशानपोद्धृत्य पदं सर्वं प्रवर्तते।।"[२९]

इति। प्रत्यक्षं तावत् नानाधर्मसमूहविशिष्टचित्राकारवस्तुविषयकं भवितुमर्हति। पदं तु सामान्यांशानेव विषयीकृत्य प्रवर्तते। तस्माज्जातिरेव पदार्थ इति मीमांसकमतम्।

व्यक्तेः पदवाच्यत्वम् इति सिद्धान्तः[३०]

अत्रोच्यते। न जातिः पदस्यार्थो भवितुमर्हति। पदं हि विभक्त्यन्तो वर्णसमुदायः, न प्रातिपदिकमात्रम्। पदे च प्रकृतिप्रत्ययौ परस्परान्वितमर्थं प्रतिपादयतः इति स्थितम्। द्वितीयादिश्च विभक्तिः प्रातिपदिकादुच्चरन्ती प्रातिपदिकार्थान्वितत्वेन स्वार्थं प्रतिपादयति। (प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति व्युत्पत्तेः) विभक्त्यर्थः कारकं लिङ्गं संख्या च। एतत्त्रितयं न प्रातिपदिकार्थे जातावन्वेति, अयोग्यत्वात्। न हि जातिः कारकम्, न वा स्त्रीत्वादिलिङ्गवती, न वा द्वित्वादिसंख्यावती। न च प्रातिपदिकस्य व्यक्तौ लक्षणास्वीकारात् लक्ष्यार्थव्यक्तौ विभक्त्यर्थलिङ्गसंख्यादीनामन्वयान्नानुपपत्तिरिति वाच्यम्। आदौ प्रकृतिः कंचिदर्थं वदति। ततोऽर्थान्तरं लक्षयति। तद्गतत्वेन विभक्तिः लिङ्गसंख्याद्यभिधत्त इति नायं प्रतीतिक्रमः। किं तु पदश्रवणसमनन्तरमेव "पशुना" इत्यादौ करणत्वपुंस्त्वएकत्वविशिष्टा व्यक्तिरवगम्यते। जात्यन्वितत्वेन लिङ्गसंख्याद्यभिधानं त्वसंगतम् इति।

ननु प्रातिपदिकार्थजातिगतत्वेनैव विभक्त्या स्वार्थोऽभिधीयते। स तु विभक्त्यर्थः जातौ साक्षादसंभवन् व्यक्तिद्वारको भविष्यति, आत्मवत्। आत्मा ह्यमूर्तत्वात् देहेन्द्रियद्वारेण तत्तत्कार्याणि कुर्वन् कर्ता भवतीत्युक्तमिति चेत् — मैवम्। आत्मनो ज्ञानप्रयत्नादियोगित्वेन कारकत्वोपपत्तेः। जातेस्तु साक्षान्न मनागपि व्यापारलेशसंस्पर्श इति स्वतो दुर्लभं तस्याः कारकत्वम्। अतः कथं तत्र विभक्त्यर्थान्वयः? तस्मात् जातिविशिष्टायां व्यक्तौ विभक्त्यर्थकारकादेरन्वयप्रतीतेः अनुभवात् जात्यनुरञ्जिता व्यक्तिरेव पदार्थः।

---

[२९] श्लो.वा. ६२
[३०] न्या.म. पृ. ५७

यत्तु "श्येनचितं चिन्वीत" इत्यत्र जातौ क्रियान्वय इत्युक्तम्। तन्न। तत्रापि संस्थानरूपायामाकृतावेव कार्यान्वयात्। इष्टकासमूहस्य श्येनव्यक्त्या सादृश्यं नास्ति व्यक्त्यन्तरेण वैसादृश्यस्यापि दर्शनादिति यदि, तर्हि सुतराममूर्तया जात्या सह सादृश्यमिष्टकासमूहस्य नावकल्पत इति नेदं जातौ क्रियान्वयस्योदाहरणम्।

किं च "गां देहि" इत्यादिप्रयोगेषु जातिमद्व्यक्तावेव क्रियान्वयात् जातिमानेव पदार्थः। "शुक्ला गौः" इत्यादिसामानाधिकरण्यमपि जातिमतः पदार्थत्व एव संगच्छते। जातौ शुक्लत्वाद्यभावात्।

ननु जातिमानित्यस्य जातिरस्यास्तीति व्युत्पत्त्या जातिमान् विशेष एव वाच्यः।[३१] विशेषस्य वाच्यत्वे च आनन्त्यव्यभिचारौ तदवस्थौ। किं च शब्देनानुच्यमाना जातिः कथमुपलक्षणं भवेत् जातिव्यक्त्योरुभयोरभिधाने च शब्दस्य अतिभार इत्युक्तमिति चेत् — उच्यते। न इदन्तया निर्दिश्यमानः शाबलेयादिर्विशेषः जातिमान्। नापि त्रैलोक्यवर्ती व्यक्तिव्रातः तद्वान्। किं तु जात्याश्रयः कश्चित् अनुल्लिख्यमानशाबलेयादिविशेषः (गोत्व)जातिमानित्युच्यते। सामान्याश्रयत्वाच्च नानन्त्यव्यभिचारयोरवसरः। एतदुक्तं भवति — गोत्वाश्रये गोपदशक्यत्वज्ञानं गोत्वाश्रयविशेष्यकशाब्दज्ञानकारणमिति स्वीकारात् न व्यभिचारः न वा शक्तिग्रहस्य असंभव इति।

व्यक्तिशक्तौ गौरवाभावः[३२]

विशेषणमनभिधाय विशेष्यमभिदधाति गवादिशब्दः इति नाभ्युपगच्छामः। येन विशेषणे विशेष्ये च शक्तिद्वयात् शब्दस्य भारः स्यात्। सामान्याश्रये एकां शक्तिं स्वीकुर्वतः मते को नाम शब्दस्य अतिभारः?

एवं —

"तद्वतो नास्वतन्त्रत्वादुपचारादसंभवात्।
वृत्तिरूपस्य भिन्नत्वात् राज्ञि भृत्योपचारवत्।।"

इति प्रमाणसमुच्चयोक्तदूषणस्यापि नावकाशः। तथा हि —

किं च प्रत्यक्षं तावत् आश्रयविकलं जातिमात्रं न गोचरयति। अपि तु जात्याश्रयम्। अतः प्रत्यक्षविषये प्रवर्तमानः शब्दोऽपि प्रत्यक्षसमानविषयकमेव ज्ञानं जनयेदिति जात्याश्रय एव शब्दस्य शक्तिः।

---

[३१] न्या.म. पृ. ५९
[३२] न्या.म. पृ. ६०

सामान्यविशेषयोः युगपद्ग्रहणाक्षेपः

ननु प्रत्यक्षमपि न युगपद्विशेषणं विशेष्यं च विषयीकरोति। विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् प्रथमं विशेषणमात्रप्रत्यक्षमिति स्वीकर्तव्यत्वात्। तथा च प्रत्यक्षाधीनसंबन्धज्ञानापेक्षिणः पदादपि विशेषणमात्रे धीरिति विशेषणं सामान्यमेव वाच्यम्, न व्यक्तिरिति चेत् —

तत्समाधानम्

सत्यं निर्विकल्पकं विशेषणमात्रविषयकम्। सविकल्पकं तु जातिविशिष्टव्यक्तिविषयकम्। संनिकर्षस्य जातौ व्यक्तौ च वर्तमानत्वात्। न हि सामान्यं प्रत्यक्षम्, विशेषः (व्यक्तिः) अनुमेय इति लोकव्यवहारः। तथा सति तुल्ययुक्त्या इन्द्रियं गुणमात्रग्राहकम्, गुणाश्रयोऽनुमेय इति स्यात्। तस्मात् विशेष्यपर्यन्तविषयकं सविकल्पकप्रत्यक्षम्। तत्समानविषयकं पदमपि न सामान्यमात्रनिष्ठमिति युक्तम्।

यत्तु[३३] — "सामान्यांशानपोद्धृत्य पदं सर्वं प्रवर्तते"[३४] इत्युक्तम्, तदपि केवलव्यक्त्यभिधाने आनन्त्यव्यभिचारौ स्यातामिति भीत्या उक्तम्। जात्याश्रयाभिधाने तु तद्भयाभावात् न शुद्धजातिवाचकतया शब्दः संकोचनीयः।

शब्दप्रत्यक्षयोर्वैलक्षण्यशङ्कासमाधानम्[३५]

ननु न सर्वात्मना प्रत्यक्षसमानविषयकः शब्दः, प्रतीतिसाम्यप्रसङ्गात्। न हि शब्दात् इन्द्रियाच्च तुल्ये प्रतीती भवतः। तदुक्तम्[३६] —

> अन्यथैवाग्निसंबन्धात् दाहं दग्धोऽभिमन्यते।
> अन्यथा दाहशब्देन दाहार्थः संप्रतीयते।।

अयमर्थः — अग्निसंबन्धात् दग्धः पुरुषः दाहम् अन्यथैव केवलदाहशब्दार्थापेक्षया विलक्षणतयैवाभिमन्यते। दाहशब्देन तु दाहरूपोऽर्थः अन्यथैव संप्रतीयते। दाहशब्दादुपस्थितः दाहरूपः अर्थः न शरीरव्यथादिकं करोति, अग्निसंबन्धात् अनुभूतस्तु दाहरूपोऽर्थः शरीरमतीव व्यथयतीति महान् भेदः प्रत्यक्षपरोक्षयोरिति।

---

[३३] न्या.म. पृ. ६१
[३४] श्लो.वा. ६२
[३५] न्या.म. पृ. ६१
[३६] प्रथमसंपुटे न्या.म. पृ. ८२

तत्रोच्यते — प्रत्यक्षे सकलविशेषग्रहणम्, न परोक्षे इत्यत एव प्रतिपत्त्योर्वैलक्षण्यम्, न तु सामान्यग्रहणतदाश्रयग्रहणाभ्याम्। नैतावता सामान्यमात्रनिष्ठः शब्दो भवति।

शब्दस्य जातिमात्रवाचकत्वानुपपत्तिः[३७]

किं च निष्कृष्ट(आश्रयविकल)जातिमात्रवाचकत्वे पदस्य इष्यमाणे गोशब्दात् गोत्वशब्दाच्च समाने प्रतिपत्ती स्याताम्। उभयोरपि सामान्यमात्रवाचकत्वात्। "गौः शुक्लः" इतिवच्च "गोत्वं शुक्लम्" इति बुद्धिः स्यात्। एवं चत्वारो वर्णा इति स्वार्थे ष्यञि चातुर्वर्ण्यशब्दवत् स्वार्थे एव गोशब्दात् त्वतलादिः स्यात्, न तु भावार्थे।

अथ गोशब्दः आक्षिप्तव्यक्तिकां गोत्वजातिं वदति, गोत्वशब्दस्तु व्यक्तिशून्यजातिस्वरूपमात्रं वदतीत्यनयोर्भेद इति चेत् — न। अनाक्षिप्तव्यक्तिकायाः जातेः कुत्राप्यदर्शनात्।

अथ गोशब्दश्रवणवेलायां व्यक्तिसंबद्धा जातिरवगम्यते। गोत्वशब्दे तु श्रुते व्यक्तिसंबन्धरहिता जातिः प्रतीयत इति चेत् — एवं तर्हि आश्रयवती जातिः शब्देनोच्यते चेत् जात्याश्रय उक्त एव भवति। जात्याश्रयस्यानुक्तौ आश्रयवती जातिः कथमुक्ता स्यात्? तस्मात् आश्रयं विना आश्रयिमात्रविवक्षायां त्वतलादयः प्रयुज्यन्ते। तथा च भाष्यम् — "यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशः तदभिधाने त्वतलादयः"[३८] इति। गुणः — अप्रधानः गुणजातिक्रियादिः। यादृशं गुणजातिक्रियादिकं प्रवृत्तिनिमित्तमादाय द्रव्ये शब्दः प्रवर्तते तं भावप्रत्ययः त्वतलादिरभिधत्ते इति भाष्यस्यार्थः। "गुणस्य हि भावात् द्रव्ये शब्दनिवेशः" इति भाष्यस्वारस्यात् जात्यादिमत् द्रव्यमेव शब्दवाच्यमिति महाभाष्यकाराशयः प्रतीयते। "गौः शुक्लः" इत्यादिसामानाधिकरण्यमपि जात्याश्रयवाचकत्वपक्षानुकूलमिति पूर्वमेवोक्तम्। तस्मात् —

> यथा विध्यन्तपर्यन्तो वाक्यव्यापार इष्यते।
> तथैव व्यक्तिपर्यन्तः शब्दव्यापार इष्यताम्।।

विध्यन्तः — अङ्गम्। वाक्यव्यापारः नियोगः विध्यादिः। यथा अङ्गविशिष्टस्यैव विध्यादेः वाक्यबोध्यत्वम्, तथा व्यक्तिपर्यन्तजात्यादेरेव शब्दबोध्यत्वम्। व्यक्तिबोधनं विना शब्दव्यापारोपरमाभावात्।

---

[३७] न्या.म. पृ. ६२

[३८] म.भा. ५.१.११९, Vol. IV, पृ. २९५

अन्विताभिधानवादे व्यक्तिबोधस्यावश्यकता[३९]

पदानामन्विताभिधायित्ववादिमते तत्तत्पदबोध्यजातीनां परस्परमन्वयाभावात् अनन्वितानां चाभिधानाभावात् अन्वितजातिमद्वाचकत्वमेव पदानां वक्तव्यमिति न जातिवाचकत्वम्।

जात्याकृतिव्यक्तिषु शक्तिवादोपसंहारः

सर्वमिदमभिप्रेत्य न्यायसूत्रकारेणोक्तम् — "जात्याकृतिव्यक्तयस्तु पदार्थः" इति। गुणप्रधानभावस्य जात्यादिष्वनियमेन शब्दार्थत्वमिति विशेषबोधनार्थः तुशब्दः। जातिमानेव शब्दवाच्यः इति स्थितेऽपि क्वचित् प्रयोगे जातेः प्राधान्यं, व्यक्तेरङ्गत्वम् -- यथा "गौर्न पदा स्प्रष्टव्या" इति सर्वगवीषु पादस्पर्शप्रतिषेधो गम्यते। क्वचित् व्यक्तेः प्राधान्यं जातेरङ्गत्वम् — यथा "गां बधान" "गां मुञ्च" इति नियतां कांचन व्यक्तिमुद्दिश्य प्रयुज्यते। क्वचित् आकृतेः प्राधान्यं, व्यक्तेरङ्गत्वं, जातिर्नास्त्येव — यथा "पिष्टकमय्यो गावः क्रियन्ताम्" इत्यत्र संनिवेशरूपाकृतिचिकीर्षया प्रयोगे इति। सर्वसर्वगता जातिरिति पक्षेऽपि जातिः पिष्टकमृद्गवादौ नास्ति, सास्नादिमत्प्राणिन एव गोत्वजातिव्यञ्जकत्वादिति पूर्वमेवोक्तम्।[४०] तस्मात् जातिमानेव गवादिशब्दार्थः न जातिमात्रं न वा व्यक्तिमात्रमिति सिद्धम्।

जातिरहितपदार्थस्थले गतिप्रदर्शनम्[४१]

येष्वर्थेषु जातिर्न संभवति तत्र व्यक्तिमात्रं शब्दवाच्यम्, यथा आकाशादिपदार्थे। आकाशस्यैकत्वेन जात्यसंभवेन आकाशव्यक्तिमात्रमाकाशशब्दार्थः। एवं संज्ञात्वेन प्रसिद्धानां डित्थादिशब्दानां अभिधेयस्यार्थस्यैकत्वेन जातिशून्यत्वात् व्यक्तिवाचकत्वम्। एते द्रव्यशब्दा इत्युच्यते। ये तु आकाशस्यापि कल्पभेदेन भेदमङ्गीकृत्य आकाशत्वस्य जातित्वं स्वीकृत्य आकाशशब्दस्यापि जातिमद्वाचकत्वं वदन्ति, तेषां डित्थादिसंज्ञाशब्दे का गतिः? न हि डित्थत्वं नाम जातिः संभवति, डित्थार्थस्य एकत्वेन सर्वसंप्रतिपन्नत्वात्। तदाह —

न हि डित्थत्वसामान्यं दृश्यते गगनत्ववत्।
कल्पनायास्तु नो भूमिः काचिदस्ति विपश्चिताम्।। इति।

---

[३९] न्या.म. पृ. ६३
[४०] न्या.म. द्वितीयभागः, पृ. ४९
[४१] न्या.म. पृ. ६४

गुणवाचिशब्देषु विशेषः[४२]

गुणशब्दास्तु केचित् स्वगतजात्यवच्छिन्नं गुणमभिधाय तावत्येव विरमन्ति यथा रूपरसगन्धादिशब्दाः, तेषां रूपत्वगन्धत्वाद्यवच्छिन्नमात्रवाचकत्वात्। केचित्तु स्वजात्यवच्छिन्नं गुणमभिधाय तदाश्रयद्रव्यमपि बोधयन्ति द्रव्यसामानाधिकरण्येन प्रयोगदर्शनात् यथा शुक्लादिशब्दाः, "शुक्लः पटः", "नीलमुत्पलम्" इत्यादौ तदुक्तम् —

गुणैकनियतास्तावत् गन्धरूपरसादयः।
गन्धत्वादिव्यवच्छिन्नगन्धादिगुणवाचिनः।।
तेषां न द्रव्यपर्यन्ता वृत्तिः क्वचन दृश्यते।
न गन्धः पद्ममित्यस्ति सामानाधिकरण्यधीः।।
गुणं शुक्लादिशब्दास्तु कथयन्तस्तदाश्रयम्।
द्रव्यमप्याक्षिपन्त्येव शुक्लोंऽशुरिति दर्शनात्।।

शुक्लादिशब्दा अपि यदा गुणपदोपबद्धाः भवन्ति तदा भावप्रत्ययान्तपदवत् गुणमात्रवाचकाः, न द्रव्यपर्यन्तवाचकाः। "शुक्लो गुणोऽश्वः" "शौक्ल्यमश्वः" इति द्रव्यसामानाधिकरण्येन प्रयोगादर्शनात्। "अश्वस्य शुक्लो गुणः" "अश्वस्य शौक्ल्यम्" इत्येव प्रयोगदर्शनात्।

क्रियावाचिशब्देषु विशेषः[४३]

क्रियाशब्दाश्च द्विविधा भवन्ति — केचित् क्रियायाः कर्तरि कर्मणि करणे वा प्रयुज्यन्ते, केचित् क्रियामात्रवचनाः। कर्त्रादिवाचिनस्तावत् कांचित् क्रियां निमित्तीकृत्य तद्युक्तद्रव्यबोधकाः यथा पाचकादयः। यत्रापि पाचकादिशब्दप्रयोगकाले द्रव्ये पाकादिक्रियायोगः न प्रत्यक्षमुपलभ्यते तत्रापि क्रियायोग्यतां दृष्ट्वा तच्छब्दप्रयोगमभिज्ञाः कुर्वते। न हि प्रवृत्तक्रिय एव पाचकः लावक इत्युच्यते, अन्यदापि तथा व्यवहारात्।

पाकादयस्तु शब्दाः क्रियामात्रवाचकाः। तदुक्तम् —

अन्ये पूर्वापरीभूतस्वभावपरिहारतः।
सिद्धरूपतया प्राहुः शब्दाः पाकादयः क्रियाम्।।[४४]

महाभाष्ये च "कृदभिहितो भावो द्रव्यवत् भवति, क्रियावच्च" इति।

---

[४२] न्या.म. पृ. [illegible]
[४३] [illegible]
[४४] [illegible]

क्वचित् प्रवृत्तिनिमित्तमन्यत्, अभिधेयमन्यत्। यथा पाचकादिशब्दानां प्रवृत्तौ निमित्तं क्रिया। अभिधेयास्तु कर्त्रादयः। क्वचित् प्रवृत्तिनिमित्तमेव वाच्यं भवति यथा भावप्रत्यान्तेषु गोत्वादिपदेषु।

उपसर्गादिवाच्यार्थनिर्णयः

एतावता जात्यादिप्रवृत्तिनिमित्तकपदानामर्थो निर्णीतः। अथ नामान्तर्भूतानामुपसर्गनिपातकर्मप्रवचनीयानामर्थो निर्णीयते।

उपसर्गाः प्राचुर्येण क्रियायोगे वर्तन्ते — "उपसर्गाः क्रियायोगे"[४५] इति पाणिनिस्मरणात्।

केचित्तु नामभिरभिसंबध्यन्ते — यथा ईषदर्थवाचिनः आपिङ्गः (ईषत्पिङ्गवर्णः) इत्यादयः। अन्ये क्रियागर्भाः सन्तः नाम्ना संबध्यन्ते यथा प्रगतं वयः यस्य सः प्रवयाः इति।

अन्ये तु धातोर्विचित्रार्थत्वमापादयन्तः (धात्वर्थगतविशेषबोधकाः) धातुविशेषणत्वेन संबध्यन्ते, यथोक्तम् —

उपसर्गवशाद्धातुः अर्थान्तरविलासकृत्।
प्रहाराहारसंहारविहारपरिहारवत्।।

उपसर्गाणां क्वचित् विरुद्धार्थत्वम्

ननु च क्वचित् उपसर्गो धात्वर्थमेव बाधमानो दृश्यते। यथा प्रस्थितः इति गतिनिवृत्तिवाची स्थाधातुः प्र इत्युपसर्गेण प्रवृत्तगमनवाचकत्वं प्रापितः, प्रवृत्तगमनवानिति ततः प्रतीतेः। न हीदृशं विशेषणं भवितुमर्हति —

"येन स्वार्थाविरोधेन विशेष उपजायते।
विशेषणं तदेवेष्टं न तु यत् स्वार्थनाशनम्।।"

इति स्वार्थाविरुद्धविशेषाधायकस्यैव विशेषणत्वकथनादिति चेत् — नैष दोषः। धातोरर्थान्तराभिधानसामर्थ्यमापादयन्नुपसर्गो विशेषणमिति स्वीकारात्। धातौ स्वत एव विद्यमाना अनेकार्थाभिधानशक्तिः उपसर्गेण अर्थविशेषेऽवस्थाप्यत इति उपसर्गस्य विशेषणत्वम्।

---

[४५] पा.सू. १.४.५९

उपसर्गाणां वाचकत्वम्, उत द्योतकत्वम्?[४६]

उपसर्गाः किमर्थस्य वाचकाः उत द्योतकाः इति तु प्रकृतानुपयोगित्वान्न विचार्यते। उपसर्गान्वयव्यतिरेकाभ्यां हि धात्वर्थविशेषोऽवगम्यते। ते तूपसर्गाः किं वाचकाः सन्तः विशेषमवगमयन्ति, किं वा द्योतकाः सन्तः इति यथा तथा वा भवतु, तत्र नास्माकं निर्भरः।

एवमेव समुच्चयादिवाचकानां चादिनिपातानां "वृक्षं प्रति विद्योतते विद्युत्" इति प्रयुज्यमानानां 'प्रति' इत्यादिकर्मप्रवचनीयानां चार्थः प्रयोगानन्तरभाविश्रोतृगत-प्रतीतिमनुसृत्य निर्णेतव्यः।

महाभाष्यानुसारेण पदार्थनिरूपणम्

किं पुनराकृतिः पदार्थः, आहोस्वित् द्रव्यम्। उभयमित्याह। कथं ज्ञायते। उभ-यथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इत्युच्यते। द्रव्यं पदार्थं मत्वा "सरूपाणाम्" इत्येकशेष आरभ्यते — इत्युक्तम्। तत्र प्रदीपः —

सकलशास्त्रव्यवस्था एकतरपक्षाश्रयणे न सिध्यतीति पक्षद्वयाश्रयणं प्रश्नपूर्वकं करोति — किं पुनरिति। आकृतिपक्षे केवल आश्रीयमाणे सकृद्गतौ विप्रतिषेधे इत्यादि नोपपद्यते, केवलेऽपि व्यक्तिपक्षे 'पुनः प्रसङ्गविज्ञानात्' इत्यादि न घटेत। तस्माल्लक्ष्यसिद्धये क्वचित् प्रदेशे कश्चित् पक्षः परिगृह्यते। तत्र जातिवादिन आहुः, जातिरेव शब्देन प्रतिपाद्यते। व्यक्तीनामानन्त्यात् संबन्धग्रहणासंभवात्। सा च जातिः सर्वव्यक्तिषु एकाकारप्रत्ययदर्शनात् अस्तीत्यवसीयते। तत्र गवादयः शब्दाः भिन्नद्रव्यसमवेतां जातिमभिदधति। तस्यां प्रतीतायां तत्समवायात् तदवच्छिन्नं द्रव्यं प्रतीयते। शुक्लादयः शब्दाः गुणसमवेतां जातिमाचक्षते। गुणे तु तत्संबन्धात् प्रत्ययः। द्रव्ये संबन्धिसंबन्धात् प्रत्ययः। संज्ञाशब्दानामपि उत्पत्तिप्रभृति आवि-नाशात् पिण्डस्य कौमारयौवनाद्यवस्थाभेदेऽपि स एवायमित्यभिन्नप्रत्ययनिमित्ता डित्थत्वादिका जातिर्वाच्या। क्रियास्वपि जातिर्विद्यते सैव धातुवाच्या। पठति पठतः पठन्ति इत्यादेः अभिन्नस्य प्रत्ययस्य सद्भावात् तन्निमित्तभूतजात्यभ्युपगमः।

व्यक्तिवादिनस्त्वाहुः — शब्दस्य व्यक्तिरेवाभिधेया जातेस्तूपलक्षणत्वेन (शक्यतावच्छेदकत्वेन) आश्रयणात् आनन्त्यादिदोषानवकाशः — इति।

---

[४६] पृ. ६८

महाभाष्यकारमतनिरूपणम् - आकृतेः पदार्थत्वमतम्

"सरूपाणामेकशेष एकविभक्तौ"[४७] इति सूत्रे भगवता कात्यायनेन पतञ्जलिना च किं द्रव्यं पदार्थ उत आकृतिरिति विचारः प्रवर्तितः। तत्रादौ वाजप्यायनमतेन आकृतिः पदार्थ इत्युपक्षिप्तम् — आकृत्यभिधानाद्वा एकं विभक्तौ वाजप्यायनः तत्र हेतवः —

प्रख्याविशेषात् आकृतेः पदार्थत्वम्

प्रख्या बुद्धिः तस्या अविशेषात् एकरूपत्वात् तद्विषयस्याप्यैक्यं प्रतीयते। गुणप्रमाणादिभिन्नेष्वपि गोपिण्डेषु गौर्गौरित्येकाकारप्रत्ययोदयात् अवश्यमेकेनालम्बनेन सामान्येन भाव्यमिति जातिसद्भाव एकत्वं चावसीयते।

यद्यपि प्रख्याविशेषात् ज्ञायते एका आकृतिरिति। कुतस्त्वेतत् साभिधीयत इति, तत्राह — अव्यपवर्गगतेश्च। अव्यपवर्गः अभेदः। न हि गौरित्युक्ते व्यपवर्गो गम्यते शुक्ला नीला कपिलेति। अव्यपवर्गगतेश्च मन्यामहे आकृतिरभिधीयत इति।

ज्ञायते चैकोपदिष्टम्। गौरस्य कदाचिदुपदिष्टो भवति। स तमन्यस्मिन् देशेऽन्यस्मिन् कालेऽन्यस्यां च वयोवस्थायां दृष्ट्वा जानाति अयं गौः इति। तथा च देशकालावस्थापिण्डान्तरेष्वबाधितप्रत्यभिज्ञाप्रत्ययोदयान्यथानुपपत्त्या सामान्यसद्भावोऽनुमीयते। धर्मशास्त्रं च तथा एवं च कृत्वा (आकृतिपदार्थत्वाभिप्रायेण) धर्मशास्त्रं प्रवृत्तम् "ब्राह्मणो न हन्तव्यः" "सुरा न पेया" इति। ब्राह्मणमात्रं च न हन्यते, सुरामात्रं च न पीयते। यदि द्रव्यं पदार्थः स्यात्, एकं ब्राह्मणमहत्वा एकां च सुरामपीत्वा अन्यत्र कामचारः स्यात्। नन्वेकमनेकस्थं कथं भवति। न हि देवदत्तो युगपत् मथुरायां स्रुघ्ने च भवतीत्यत आह — अस्ति चैकमनेकाधिकरणस्थं युगपत् तद्यथा एक आदित्योऽनेकाधिकरणस्थो युगपदुपलभ्यते। इतीन्द्रवद्विषयः तद्यथा एक इन्द्रोऽनेकस्मिन् क्रतुशते आहूतो युगपत् सर्वत्र भवति। एवमाकृतिर्युगपत् सर्वत्र भविष्यति। अवश्यं चैतदेवं विज्ञेयमाकृतिरभिधीयत इति — द्रव्याभिधाने ह्याकृत्यसंप्रत्ययः तत्रासर्वद्रव्यगतिः, द्रव्याभिधाने हि आकृतेरसंप्रत्ययः, तत्रासर्वद्रव्यगतिः प्राप्नोति। असर्वद्रव्यगतौ को दोषः? "गौरनुबन्ध्यः, अजोऽग्नीषोमीयः" इति एकः शास्त्रार्थं कुर्वीत, अपरोऽशास्त्रोक्तम्। अशास्त्रोक्ते च क्रियमाणे विगुणं कर्म भवति। विगुणे च कर्मणि फलानवाप्तिः। अयमाशयः — प्रत्यर्थं शब्दनिवेशः इति न्यायात् एकः शब्दः एकं गोरूपं द्रव्यं

---

[४७] पा.सू. १.२.६४

बोधयेत्। तस्य केनचिदालम्भे कृते, परैस्तेन वा गवान्तरालम्भेऽशास्त्रार्थः स्यात्। एवं न ब्राह्मणमित्यादावपि एकस्य ब्राह्मणस्यावधो विषयः, तत्रान्यविषये सर्वेषां कामचारेण वधप्रवृत्तावपि न प्रायश्चित्तं स्यात् – इति। सर्वपुरुषान् प्रति एकव्यक्तेरेव बोधनमित्यभिमानः।

चोदनायां चैकस्योपाधिवृत्तेः अष्टाकपालत्वादिरुपाधिः तस्य वृत्तिः प्रवृत्तिः। (आग्नेयमष्टाकपालं निर्वपति) एकं निरुप्य द्वितीयस्तृतीयश्च निरुप्यते। यदि च द्रव्यं पदार्थः स्यात् एकं निरुप्य द्वितीयस्य तृतीयस्य निर्वपणं न प्रकल्पेत। एतदुक्तं भवति – यदि आग्नेयादिशब्देन सामान्यमभिधीयते तदा तेनाशेषद्रव्याणामाक्षेपात् प्रतिद्रव्यमष्टाकपालत्वमुपाधिर्युज्यते। द्रव्ये तु पदार्थे एकेनैव यजमानेन सकृदष्टाकपालः पुरोडाशो निरूप्येत नान्येन, नापि तेनान्यदेत्यर्थ इति।

एवमाकृतिः पदार्थ इति पक्षमुपन्यस्य अथ द्रव्यं पदार्थ इति पक्षमुपन्यस्यति —

द्रव्यं पदार्थ इति व्याडिमतम्

द्रव्याभिधानं व्याडिः द्रव्यस्याभिधानमिति व्याडिराचार्यो मन्यते। तथा च लिङ्गवचनसिद्धिः एवं च कृत्वा लिङ्गवचनानि सिद्धानि भवन्ति ब्राह्मणी ब्राह्मणः ब्राह्मणौ ब्राह्मणा इति। जातौ तु लिङ्गसंख्ययोरभावात्। चोदनासु च तस्यारम्भात्। चोदनासु च तस्यारम्भान्मन्यामहे द्रव्यमभिधीयत इति। गौरनुबन्ध्यः, अजोऽग्नीषोमीयः इति आकृतौ चोदितायां द्रव्ये आरम्भण-आलम्भन-प्रोक्षण-विशसनादीनि क्रियन्ते। आकृतिपक्षे कर्मसबन्धित्वेन आकृतिश्चोद्यते द्रव्ये तु कार्यं प्रवर्तते। अयुक्तं चैतत्। न ह्यन्यचोदनेनान्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति। तस्मात् द्रव्यमेव शब्देनाभिधीयत इति न्याय्यम्।

न चैकमनेकाधिकरणस्थं युगपत् न खल्वेकमनेकाधिकरणस्थं युगपदुपलभ्यते। न ह्येको देवदत्तो युगपत् स्रुघ्ने भवति मथुरायां च। न हि हेतुरहितेन आदित्यदृष्टान्तेन साध्यसिद्धिर्भवति। देवदत्तदृष्टान्तेन विपर्ययस्यापि साधनात्। एवं चानेकद्रव्यगता एका जातिः अभ्युपगन्तुं न शक्यते। **विनाशे प्रादुर्भावे च सर्वं तथा स्यात्** अभिव्यञ्जकविनाशे जातेस्तिरोभावात् पिण्डान्तरे श्वा इति प्रत्ययो न स्यात्। शतप्रत्यय इव एकापाये। यदा आश्रयापाये आश्रितस्याप्यपायः, अवयवापायेऽवयविन इवेति जातेर्विनाशप्रसङ्गः। एवं जातेन गोपिण्डेन गोत्वमभिव्यक्तं सर्वाश्रयवृत्तीति एकगोपिण्डप्रत्यक्षत्वे सर्वगोपिण्डप्रत्यक्षत्वप्रसङ्गः।

अस्ति च वैरूप्यम् अस्ति खल्वपि वैरूप्यं गौश्च गौश्च, खण्डो गौः मुण्डो गौः इति। जातेरेकत्वात् भेदाधिष्ठानः (भेदव्याप्यः) समुच्चयो न स्यात्। अत एव खण्डत्वमुण्डत्वादिविरुद्धधर्मयोगोऽपि स्यात्। द्रव्यस्य पदार्थत्वे तद्भेदेन समुच्चयः, विरुद्धधर्मयोगाभावश्चोपपद्येते। इति द्रव्यवादः।

अथ आकृतिवादी स्वपक्षं समर्थयते — लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात् आकृतिसद्भावः पूर्वमेव प्रत्यक्षानुमानागमप्रवृत्तिभिः प्रतिपादितः। सर्वगतत्वेऽपि तस्याः, पदार्थानां विचित्रशक्तियोगात् कश्चित् पदार्थः कांचिदेवाकृतिमभिव्यनक्ति, न तु सर्वां सर्वः। गुणाश्चात्र द्वित्वस्त्रीत्वादयो विवक्षिताः। तैश्च आकृतेरेकार्थ-समवायलक्षणः संबन्ध इति आकृतेः पदार्थत्वेऽपि लिङ्गसंख्ययोरुपपत्तिः। अनित्यत्वादिति। कदाचित् स्त्रीत्वयुक्तेन पिण्डेन आकृतिर्व्यज्यते कदाचित् पुंस्त्वयुक्तेन, कदाचिदेकाधारस्था प्रतिपाद्यते कदाचिदनेकाधारस्थेत्यर्थः।

आकृतिरेकेति सिद्धान्तात् द्विवचनबहुवचनयोरुपपत्तिः कथमिति प्रश्नोऽव-शिष्यते। अत्र भाष्यकार आह — वचनपरिहारश्चाप्युपपन्नः। इदं तावदयं प्रष्टव्यः। अथ यस्य द्रव्यं पदार्थः कथं तस्य एकवचनद्विवचनबहुवचनानि भवन्तीति। एवं स वक्ष्यति एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनम् इति। यदि तस्यापि वाचनिकानि, न स्वाभाविकानि। अहमप्येवं वक्ष्यामि एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनम् इति। न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः, द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः। उभयोरुभयं पदार्थः। कस्यचित् किंचित् प्रधानभूतं किंचित् गुणभूतम्। आकृतिपदार्थकस्य आकृतिः प्रधानभूता द्रव्यं गुणभूतम्। द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता। —

इति। प्रदीपे च — आकृतिवादी हि एवं व्याचष्टे आकृतेरेकाश्रयसंबन्ध-विवक्षायामेवकवचनं यथा पशुना यजेतेति। अनेकाश्रयसंबन्धविवक्षायां द्विवचन-बहुवचने। इति। अन्यच्च समाधानम् —

गुणवचनवद्वा। गुणवचनवद्वा लिङ्गवचनानि भविष्यन्ति। तद्यथा गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति शुक्लं वस्त्रं शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ शुक्लाः कम्बला इति। यदसौ गुणो द्रव्यं श्रितो भवति तस्य यल्लिङ्गं वचनं च तत् गुणस्यापि भवति। एवमिहापि यदसौ आकृतिः द्रव्यं श्रिता तस्य यल्लिङ्गं वचनं च तदाकृतेरपि भविष्यति।

अधिकरणगतिः साहचर्यात् आकृतावालम्भनादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आलम्भनादीनि भविष्यन्ति।

अविनाशोऽनाश्रितत्वात् द्रव्यविनाशे आकृतेरविनाशः। कुतः? अनाश्रितत्वात्। अनाश्रिता आकृतिर्द्रव्यम्, यथा गुणानां द्रव्याधीनस्थितिकत्वात् आश्रितत्वं न तथा आकृतेः। अन्यत्रापि प्रत्ययाभिधानयोराकृतिनिमित्तयोः भावान्नित्यत्वं तस्याः।

वैरूप्यविग्रहौ द्रव्यभेदात् अत्र भाष्यकारेण द्रव्यं पदार्थः, आकृतिः पदार्थ इति पक्षद्वयमुपन्यस्तम्। पक्षद्वयेऽपि दोषपरिहारः कृतः। स्वपक्षस्तु नोक्तः।

भूषणसारे मञ्जूषायां च भाष्याशयः विस्तरेण प्रकटितः। स पश्चान्नव्यमतनिरूपणावसरे विवेचयिष्यते।

मीमांसकमतेन नामार्थनिरूपणम्

पूर्वमेव न्यायमञ्जर्यां मीमांसकमतमपि भाष्यादिरीत्या अनूदितम्, दूषितं चेति प्रदर्शितम्। अथापि स्पष्टप्रतिपत्तये शास्त्रदीपिकाकौस्तुभादिकृतो निर्णयोऽत्रानूद्यते। आकृत्यधिकरणे शास्त्रदीपिकायां पूर्वपक्षसिद्धान्तरूपेण यदुक्तं तत् अनूद्यते[४८] — किमाकृतिः (जातिः) शब्दार्थः उत व्यक्तिः उत आकृतिविशिष्टा व्यक्तिरिति त्रयः पक्षाः प्राधान्यतश्चिन्त्यन्ते। यद्यपि वार्तिके —

> नियोगेन विकल्पेन द्वे वा सह समुच्चिते।
> संबन्धः समुदायो वा विशिष्टा वैकयेतरा।

इत्यष्टपक्षीमुपन्यस्य,

> गौरित्युच्चरिते सप्त वस्तूनि प्रतिभान्ति नः।
> जातिर्व्यक्तिश्च संबन्धः समूहो लिङ्गकारके।
> संख्या च सप्तमी तेषामष्टौ पक्षा द्वयोर्द्वयोः।

इत्यादिना बहवः पक्षा उपन्यस्ताः, तथापि विकल्पसमुच्चयसंबन्धसमुदायादयः सर्वे पक्षा आकृतिविशिष्टव्यक्तिपक्षनिराकरणेनैव निराकृता भवन्तीति न पृथग्विचार्यन्ते। तत्र —

> प्रयोगचोदनाभावात् व्यक्तेरेवाभिधेयता।
> न ह्याकृतिरमूर्तत्वात् व्यवहारोपयोगिनी।
> लिङ्गकारकसंख्याभिः संबन्धोऽस्या न कल्प्यते।
> सामानाधिकरण्यं च न जातिगुणशब्दयोः।

---

[४८] शा.दी १.३.१०, ३० पृ. ४३

व्यक्तिवाचित्वपक्षे तु सर्वमेतत् समञ्जसम्।
तेन शुद्धा विशिष्टा वा व्यक्तिः शब्दस्य गोचरः।

प्रयोगचोदनाभावात् — व्रीहीनवहन्तीत्यादीनामवहननाद्यनुष्ठानगोचरचोदनानां भावात् — व्यक्तिष्वेव संभवात् व्यक्तिरेव शब्दवाच्या। "व्रीहीनवहन्ति" "पशुमालभेत" "गामानय" "ब्राह्मणो न हन्तव्यः" इति यावन्तः एवमादयो विनाशिमूर्तिमद्द्रव्यगोचराः अनुष्ठानविधयः प्रतिषेधा वा ते सर्वे व्यक्तावेव संभवन्ति न जातौ। न हि जातिरवहन्तुमालब्धुमानेतुं हन्तुं वा शक्यते, नित्यत्वादमूर्तत्वाच्च। तेनानर्थकं तद्विधानं प्रतिषेधाश्च, प्राप्त्यभावात्। व्यक्तिपक्षे तूपपद्यते। तस्मात् व्यक्तिः शब्दार्थः। एवं वृक्षौ वृक्षाभ्यामिति व्यक्तौ प्रातिपदिकार्थे प्रत्ययाभिहितानि लिङ्गसंख्याकारकाणि तया संबध्यन्ते, जातेस्तु लिङ्गसंख्याशून्यत्वात् अमूर्तत्वेन अकारकत्वाच्च तैरसंबन्धः स्यात्।

सामानाधिकरण्यं च गौः शुक्ल इति — द्वयोः पदयोः शुद्धव्यक्तिवाचकत्वे एकार्थवाचकत्वात् उपपद्यते। तयोः जातिगुणविशिष्टव्यक्तिवाचकत्वेऽपि जातिगुणरूपविशेषणभेदे सत्यपि विशेष्यद्रव्यस्याभेदादुपपन्नम्। त्वत्पक्षे तु तयोः पदयोः जातिगुणमात्रवृत्तित्वात् अर्थभेदेन सामानाधिकरण्यं नोपपद्यते। एवं पुरुषो देवदत्त इति जातिद्रव्यवचनयोः दर्शयितव्यम्। तस्मात् व्यक्तिरेव पदार्थः।

न च यस्यां व्यक्तौ शब्दस्य शक्तिर्न गृहीता तस्याः कथं बोध इति वाच्यम्। जातेरुपलक्षणत्वस्वीकारेण या एवं जातीयाऽसौ गौरिति सामान्यमुपलक्षणीकृत्य शक्तिज्ञानमुत्पाद्यते। योऽयं शुक्लवासाः स देवदत्त इतिवत्। यथा च तत्रोपलक्षणभूतं वासोऽनभिधाय देवदत्त एवाभिधीयते तथेहापि जातेरुपलक्षणमात्रत्वात् सामान्यस्यानभिधाने व्यक्तय एव शुद्धा अभिधीयन्ते। व्यक्त्यानन्त्यकृतशक्तिनानात्वस्यापि न प्रसक्तिः, उपलक्षणजात्यैक्येन शक्त्यैक्यात्। आकृतिविशिष्टव्यक्त्यभिधाने तु न कश्चिद्दोषः। तस्मात् शुद्धा वा जातिविशिष्टा वा व्यक्तिरेव शब्दार्थ इति पूर्वपक्षः।

सिद्धान्तस्तु — न व्यक्तिः पदार्थः।
आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः।
संदेहाच्चरमज्ञानाच्चित्रबुद्धेरभावतः।
अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः।
आकृतेः प्रथमज्ञानात् तस्या एवाभिधेयता।
व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता।
लिङ्गसंख्यादिसंबन्धः सामानाधिकरण्यधीः।

सर्वं समञ्जसं ह्येतत् वस्त्वनेकान्तवादिनः।
लक्षणा वाभ्युपेतव्या जातेस्तेनाभिधेयता।

व्यक्तीनामनन्तत्वात् सर्वासु व्यक्तिषु शक्तिग्रहोऽसंभवी। एकस्यां व्यक्तौ शक्तिग्रहश्चेत् अगृहीतशक्तिकव्यक्तेः शाब्दबोधायोगः। अत एव शक्तिग्रहं विनापि बोधोत्पत्त्या व्यतिरेकव्यभिचारः। अनन्तासु व्यक्तिषु शक्तिस्वीकारे अनन्तशक्तिकल्पना च प्रसज्यते। न च जातेरुपलक्षणत्वात् न शक्त्यानन्त्यमिति वाच्यम्। शक्तिग्रहकाले हि जातिरुपलक्षणम्, न तु अभिधानसमये (बोधकाले)। अभिधानं हि व्यक्तिमात्रस्य। तद्यथा अक्षत्रयमेकापवरकस्थमेकापवरकस्थित्या उपलक्ष्य कश्चित् कंचिदाह — "य एतस्मिन्नपवरकेऽधुना स्थिताः तेऽक्षशब्दाभिधेयाः"। तत्र यद्यपि व्युत्पत्तिसमये अपवरकस्थितिर्नाम एकमुपलक्षणं लभ्यते, तथापि शब्दस्तदनादरेण व्यक्तित्रयमात्रमेव स्वरूपेणाभिधत्ते इति भवति शक्तित्रयमक्षशब्दस्य विदेवने विभीतके रथावयवे च। एवमिहापि।

अपि च यदि विशेषणरहितं धर्मिस्वरूपमभिधेयं तदा गोशब्दात् गोव्यक्तिः प्रतीयमाना अश्वादिव्यक्तिव्यावृत्ता न प्रतीता स्यात्। न ह्यसाधारणमाकारमन्तरेण द्रव्यं द्रव्यान्तरव्यावृत्तं प्रतीयते। ततश्च गौः इत्युक्ते सर्वत्राविशिष्टा प्रतीतिः स्यात्। यथाह भाष्यकारः — अव्यपदेश्यत्वेन सर्वत्राविशेषात् इति।

अथैतद्दोषपरिहाराय अभिधानसमयेऽपि जातेरुपलक्षणत्वं स्वीक्रियत इति चेत् — तर्हि व्यक्तिमभिदधत् शब्दः जातिमुपलक्षणमुपादाय तज्जातीयरूपेणाभिधत्ते गोजातीयमिति इति वक्तव्यम्। ततश्च प्रथमं जातिरभिधातव्या, न हि जातिमनभिधाय तज्जातीयत्वेन रूपेण व्यक्तिरभिधातुं शक्यते। ततश्च विशिष्टाभिधानमेव शब्दान्तरेणापन्नं न शुद्धाभिधानम्। विहिष्टाभिधाने च पूर्वतरं विशेषणमभिधातव्यम्, "नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते" इति न्यायात्। विशेषणाभिधाने च तत एव तदत्यन्तविनाभूतव्यक्तेः आक्षेपात् प्रतीतिसिद्धेः न तत्र अभिधानशक्तिकल्पनावसरः।

किं च गोशब्दे उच्चरिते सति गामानयेत्यादौ गोव्यक्तिषु का वा गौरानेतव्येति संदेहो जायते। न कस्यांचिन्निर्णयः। यस्मिन्विषये संदेहः न तस्य शब्दाभिधेयता, शब्दस्य निश्चयजनकत्वात्। सामान्यरूपा जातिस्तु निर्णीयत इति भवत्यभिधेया।

नन्वसत्यपि व्यक्तिविशेषनिर्णये व्यक्तिमात्रं निर्णीयत एवेति चेत् — किमिदं व्यक्तिमात्रं नाम? सामान्यं विशेषो वा। द्व्याकारैव हि वस्तुषु बुद्धिः व्यावृत्त्यनुगतरूपा। तत्र विलक्षणबुद्धिविषयः व्यक्तिः सामान्यबुद्धिविषयः सामान्यम्। तत्र

व्यक्तिसामान्योभयातिरिक्तं व्यक्तिमात्रं नाम न किंचिदस्ति वस्तुस्वरूपम्। सामान्यमेव तु मात्रशब्देनाभिधीयत इति तदेव गवादिशब्दाभिधेयम्।

किं च खण्डितशृङ्गः खण्डितदण्डो वा खण्डः, शृङ्गरहितो मुण्डः खण्ड-मुण्डादिरूपा व्यक्तयः विलक्षणा इति व्यक्त्यभिधानपक्षे गोशब्दोच्चारणे सति विलक्षणाकारैव बुद्धिः स्यात्। एकाकारा तु बुद्धिरुत्पद्यते गौरिति। अतो जातिरेवाभिधेया।

अपि च गोत्वान्वये सति गोशब्दप्रयोगात् गोत्वव्यतिरेकेऽश्वादिषु गोशब्द-प्रयोगाभावाच्च जातिरभिधेया।

व्यवहाराङ्गत्वमपि जातेर्व्यक्त्यभेदात् उपपद्यते। यदा तु जातेर्व्यक्तेश्च भेद एव तदा जातिवाचिशब्दानां व्यक्तौ लक्षणाङ्गीकारात् लिङ्गसंख्याकारकादीनां तत्र अन्वयात् नानुपपत्तिः कापि। यत्र तु "पशुना यजेत" "अरुणया क्रीणाति" इत्यादौ करणत्वश्रवणं तत्र जातिगुणयोरमूर्तयोरपि द्रव्यपरिच्छेदद्वारा मुख्यमेव करणत्वमुपपन्नम्। अधिकरणसंप्रदानादिरूपं तु अमूर्तयोस्तयोरसंभवात् जाति-व्यक्त्योः गुणगुणिनोश्चाभेदं स्वीकृत्य वा व्यक्तिगुणिनोर्लक्षणां स्वीकृत्य वा समर्थनीयम्। आह च —

तेन तल्लक्षितव्यक्तेः क्रियासंबन्धचोदना।
जातिव्यक्त्योरभेदो वा वाक्यार्थेषु विवक्षितः। — इति।

तस्माज्जातिरेवाभिधेया न व्यक्तिरिति सिद्धम्।

शास्त्रदीपिकायामनुक्ताः कौस्तुभोक्ता विषयाः[४९]

इदमत्र विचार्यते किं घटादिपदानां व्यक्तिरेव वाच्या उत जातिः इति। ये तु सहस्रसंख्याकाः पक्षाः वार्तिके उक्ताः त इह बहुविस्तरभयात् अनुपयुक्तत्वाच्च न लिख्यन्ते।

तत्र "व्रीहीनवहन्ति" "पशुमालभेत" इत्यादिविधिचोदनासु व्रीहित्वादिजातौ अवहननालम्भनयोः अमूर्तत्वनित्यत्वाभ्याम् असंभवेन "ब्राह्मणं न हन्यात्" इत्यादिप्रतिषेधचोदनासु जातेर्नित्यत्वात् हननकर्मत्वप्राप्त्यभावात् प्रतिषेधासंभवेन व्यक्तौ च अवहननालम्भनहननकर्मत्वादिसंभवात् व्रीह्यादिपदानां व्यक्तिरेव वाच्या।

---

४९ आकृत्यधिकरणं १.३.३०

किं च जातेरेकत्वेन एकत्वातिरिक्तसंख्यासंबन्धासंभवात्, अलिङ्गत्वेन च लिङ्गान्वयायोगात्, अमूर्तत्वेन च क्रियाजन्यफलाश्रयत्वादिकारकत्वायोगात् व्यक्तेश्च लिङ्गसंख्याकारकत्रितयसंबन्धस्योपपन्नत्वात् व्यक्तिरेव वाच्या।

न चैवं व्यक्तिमात्रविषयकशक्तिकल्पने घटमानयेत्यतः घटत्वबोधानापत्तिरिति वाच्यम्। जातौ लक्षणास्वीकारेण तद्बोधोपपत्तेः। न च व्यक्तौ शक्तिः जातौ लक्षणा, अथवा जातौ शक्तिः व्यक्तौ लक्षणेत्यत्र निविगमनाविरह इति वाच्यम्। व्यक्तिविशेषं विनापि व्यक्त्यन्तरे जातेः सत्त्वेन जातेर्व्यक्तिविशेषनिश्चायकत्वासंभवेन, व्यक्तेर्जातिं विना असत्त्वेन जातिविशेषनिश्चायकत्वसंभवेन च व्यक्तौ शक्तिः जातौ लक्षणेति नियामकसत्त्वात्।

वस्तुतस्तु व्यक्त्या जातिलक्षणायामेकस्मिन् पदे वृत्तिद्वयविरोधापत्तिः। न च निरूढलक्षणास्वीकारे वृत्तिद्वयविरोधो न दोष इति वाच्यम्। वृत्तिद्वयदूषकताबीजस्य "सकृच्छ्रुतं पदं सकृदेवार्थं प्रत्याययति" इति नियमभङ्गस्य सांप्रतिकलक्षणायामिव निरूढलक्षणायामपि तुल्यत्वात्। अत एव वृत्तिद्वयविरोधादेव सिद्धान्त्यभिप्रेता जात्या व्यक्तेर्लक्षणापि न सिध्यति।

अत उभाभ्यामेवं वक्तव्यम् – शक्तिग्रहस्य कार्यतावच्छेदकमेव जातिविशिष्टव्यक्तिविषयकशाब्दबोधत्वम्। तेन च यथायथं मतद्वयेऽपि जातिव्यक्तिबोधनिर्वाहः। कारणतावच्छेदकं च न घटत्वशक्तिग्रहत्वम्, शक्तेर्नैयायिकमते ईश्वरेच्छारूपत्वेन मीमांसकमते च पदार्थान्तररूपत्वेन तद्रूपशक्तित्वेन ज्ञानाभावेऽपि शाब्दबोधस्यानुभविकत्वात्।

अपि च घटत्वमित्येतस्मात् पदात् घटत्वविशिष्टविषयकशाब्दबोधप्रसङ्गः, घटत्वशक्तिग्रहसत्त्वात्। किं तु शक्यत्वसंबन्धेन घटपदवत्त्वप्रकारकनिश्चयत्वं कारणतावच्छेदकम्। तत्र शक्तेः संबन्धविधया भानेन तत्त्वेन रूपेण तदभानेऽपि न काचित् क्षतिः।

अत्र च शक्तिज्ञाने घटपदवत्त्वस्य विशेष्यतया किं भासत इति शङ्कायां न तावत् घटत्वं विशेष्यतया भासते। तथा सति जातेर्यत्र विशेष्यतया भानं तत्र तस्याः किंचिद्रूपेणैव भानमिति नियमेन घटत्वत्वरूपेणैव घटत्वभानं वक्तव्यम्। घटत्वत्वस्य च घटेतरावृत्तित्वे सति निखिलघटवृत्तित्वरूपतया अनन्तघटव्यक्तीनां घटेतरानन्तरव्यक्तीनां च धर्मितावच्छेदकशरीरे प्रवेशेन गौरवम्। ततो वरं घटव्यक्तीनामानन्त्येऽपि तासामेव विशेष्यता। तदा घटत्वजातेरेव विशेष्यतावच्छेदकतया न तत्र घटेतरव्यक्तीनां प्रवेशस्य कल्पना। अतश्च घटत्वं धर्मितावच्छेदकीकृत्य घटविशेष्यकशक्यत्वसंसर्गकघटपदवत्त्वप्रकारकनिश्चयत्व-

मेव कारणतावच्छेदकम्। तथा च व्यक्तावेव शक्तिः, शक्तिग्रहे विशेष्यतया भासमानस्यैव शक्यत्वात्। कथं तर्हि देवदत्तीयघटव्यक्तौ संकेतग्रहे सति व्यक्त्यन्तरे शब्दप्रयोगः? उच्यते। संकेतग्रहवेलायां घटत्वजातेरुपलक्षणत्वात् तदुपलक्षितसर्वव्यक्तिष्वेव शक्तिग्रहो नैकव्यक्तावेवेति न दोष इति।

अस्तु वा देवदत्तीयघटव्यक्तावेव शक्तिग्रहः, तथापि तत्कार्यतावच्छेदकम् घटत्वविशिष्टविषयकशाब्दत्वमिति घटत्वविशिष्टव्यक्त्यन्तरस्यापि बोधोपपत्तिः। अस्मिंश्च पक्षे न शक्त्यानन्त्यदोषोऽपि। यत्तु शक्तिग्रहे विशेष्यतावच्छेदकं घटत्वं तत् अनभिधेयमेव सत् धर्मिणोऽवच्छेदकम्, न तु अभिधेयं सत्। अत एवोपलक्षणतया तत् अवच्छेदकम् इत्युच्यते। यथा "योऽयं शुक्लवासाः स देवदत्तः" इत्युक्ते देवदत्तपदानभिधेयस्यापि शुक्लवस्त्रत्वस्य देवदत्तपदशक्तिग्रहे उपलक्षणत्वम्। अतोऽतिलाघवात् व्यक्तावेव शक्तिरिति मुख्यः पक्षः।

यस्तु वार्तिके अभिधेयस्यैव धर्मितावच्छेदकत्वमिति नियममङ्गीकृत्य जातिमात्रवाचकत्वपक्षापेक्षया लघुभूतत्वात् जातिविशिष्टव्यक्तिवाचकत्वपक्षोऽप्युपन्यस्तः, स व्यक्तिमात्रवाचित्वपक्षापेक्षया गुरुभूतत्वादुपेक्षितः।

किं च व्यक्तिवाचित्वपक्षे शुक्लो घट इत्यादौ पदद्वयस्याप्येकार्थवाचित्वात् सामानाधिकरण्यस्योपपत्तिः। समानविभक्तिकैकार्थकपदसमूहस्यैव समानाधिकरणत्वात्। जातिवाचित्वे तु भिन्नार्थकत्वात् न तदुपपत्तिः।

किं च जातिवाचित्वपक्षे 'यदि पशुरुपाकृतः पलायेत अन्यं तद्वर्णं तद्वयसमालभेत' इत्यत्र जातेरेकत्वेन अन्यत्वासंभवात् वयोऽवस्थाविशेषासंभवाच्च व्यक्तिवाचित्वमेव युक्तम्।

पदानां जातिवाचित्वमिति सिद्धान्तः

उक्तरीत्या व्यक्तिवाचित्वं पूर्वपक्षीकृत्य सिद्धान्तमाह सूत्रकारः — 'आकृतिस्तु क्रियार्थत्वात्' इति। न व्यक्तिवाचित्वं घटादिशब्दानाम्। तद्धि सकलव्यक्तिवाचित्वं वा स्यात् एकव्यक्तिवाचित्वं वा। नाद्यः, तथा सति व्यक्तीनामानन्त्येन अनन्तशक्तिकल्पनापत्तेः। न च जातिरुपलक्षणमिति उपलक्षणैक्याच्छक्त्यैक्यमिति वाच्यम्। उपलक्षणैक्यस्य शक्त्येकत्वानियाकत्वात्। यथा हि यत्र सैन्धवपदाभिधेयं लवणाश्वादिकमेकापवरकस्थित्या उपलक्ष्य "अस्मिन्नपवरके स्थिताः सैन्धवशब्दाभिधेयाः" इत्युच्यते तच्छ्रवणेन च सैन्धवपदशक्तिग्रहः लवणादिषु भवति तदा एकापवरकस्थितेरुपलक्षणभूतायाः एकत्वेन नैका शक्तिः अपि तु शक्यतावच्छेदकलवणत्वादिभेदात् अनेका शक्तिः कल्प्यते, तथा घटत्वादिजातेरुपलक्षणभूतायाः

शक्यतावच्छेदकत्वाभावेन तत्तद्व्यक्तित्वस्यैव शक्यतावच्छेदकत्वात् तद्भेदेन अनन्तशक्तिकल्पनापत्तिः। उपलक्षणभूतायाः शक्यतावच्छेदकत्वेऽपि अनभिहितस्य शक्यतावच्छेदकत्वानुपपत्तेः जातेरप्यभिधानविषयत्वं कल्पनीयम्। अतो व्यक्तावेव शक्तिरिति गतम्।

यदि तु घटादिपदानामेकव्यक्तिवाचित्वमिति द्वितीयपक्षः आश्रीयते, तदा घटत्वस्यातिप्रसक्तत्वेन शक्यतावच्छेदकत्वानुपपत्तेः तद्व्यक्तित्वस्यैव शक्यतावच्छेदकत्वं वाच्यम्। तदा तद्व्यक्तिविशेष्यकशक्तिस्मरणाभावे घटपदात् अर्थबोधानापत्तिः, व्यक्त्यन्तरविषयकशाब्दबोधानुपपत्तिरिति यावत्।

अपि च व्यक्तिशक्तिवादे घटत्वं धर्मितावच्छेदकीकृत्य घटः शक्यत्वसंबन्धेन घटपदवान् इत्याकारकस्य शक्तिग्रहस्य वा घटपदत्वं धर्मितावच्छेदकीकृत्य घटपदं शक्तत्वसंबन्धेन घटवत् इत्याकारकस्य शक्तिग्रहस्य वा कारणत्वमित्यत्र विनिगमनाविरहेण उभयोः कारणत्वं कल्पनीयमिति गौरवम्। परस्परजन्यज्ञाने परस्परस्य व्यतिरेकव्यभिचारवारणाय कार्यतावच्छेदककोटावव्यवहितोत्तरत्वं निवेश्य गुरुतरकार्यकारणभावद्वयं कल्पनीयमिति महागौरवं च।

जातिशक्तिवादे तु घटत्वधर्मिकशक्यत्वसंसर्गकघटपदवत्ताज्ञानस्य हेतुत्वे निरवच्छिन्नस्य धर्मित्वासंभवात् घटत्वत्वं धर्मितावच्छेदकं वाच्यमिति तच्छरीरे सकलघटानां घटेतराणां च प्रवेशात् गौरवमिति त्वयैवोक्ततया लाघवरूपविनिगमकमाश्रित्य घटपदत्वावच्छिन्नधर्मिकस्य शक्तत्वसंबन्धेन घटत्वप्रकारकस्य "घटपदं घटत्ववत्" इत्याकारकस्यैव शक्तिज्ञानस्य कारणत्वं स्वीक्रियते। तस्मिन् ज्ञाने घटत्वस्य प्रकारत्वात् स्वरूपेणैव भानमिति घटत्वत्वस्याप्रवेशान्नानन्तव्यक्तिप्रवेशशङ्काया अवकाशः। न च जातेः समवायसंबन्धेन भानस्थल एव स्वरूपेण प्रकारत्वम्, उक्तशक्तिज्ञाने तु शक्तत्वसंबन्धेन घटत्वस्य प्रकारत्वात् न स्वरूपेण भानं संभवतीति वाच्यम्। तत्र प्रमाणाभावात्। नैयायिकैरपि तथानङ्गीकारात्।

अत एव "यां कांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वं वा वक्तव्यम्" इति दीधितिव्याख्यायां "अनुभवत्वस्य स्वरूपेण प्रतियोगिताविशेषसंबन्धेन भेदेऽन्वयः" इति विवृतं तट्टिप्पणीकारैः(?) अत एव च घटत्वप्रकारकघटविशेष्यकज्ञानवानहम् इत्यनुव्यवसाये प्रकारितारूपायां प्रकारकतायां निरूपितत्वसंबन्धेन घटत्वस्य स्वरूपतो भानम्, न तु घटत्वत्वेन, व्यवसाये घटत्वत्वेन घटत्वस्याभानादित्युक्तं कूटाघटितलक्षणे भट्टाचार्यैः। अतो घटत्व एव शक्तं घटपदं न तु व्यक्ताविति सिद्धम्।

किं च व्यक्तिशक्तिवादिनापि जातिरप्यवश्यं शब्दात् भासत इत्यङ्गीकरणीयम्। अन्यथा "श्येनचितं चिन्वीत" इति विधिवाक्यार्थानुपपत्तिः। तथा हि — अत्र श्येनस्य धात्वर्थचयनं प्रति किं करणत्वेनान्वयः उत कर्मत्वेन। नाद्यः, "कर्मण्यग्र्याख्यायाम्"[५०] इति सूत्रेण "कर्मणि हनः"[५१] इति सूत्रात् कर्मणीत्यस्यानुवृत्तौ सत्यां पुनः कर्मणीत्युपादानात् "कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप् स्यात् अग्र्याधारस्थलविशेषाख्यायाम्" इति विधीयते। अतश्च श्येनश्चित इति कर्मणि वाच्ये क्विप्प्रत्यय इत्यवगमेन श्येनस्य कर्मत्वावगमात् करणत्वानुपपत्तेः।

न च "तृतीया तत्कृतार्थेन गुणवचनेन"[५२] इति सूत्रेण श्येनेन चिदिति तृतीयातत्पुरुषात् श्येनस्य करणत्वोपपत्तिरिति वाच्यम्। तृतीयान्तस्य तृतीयान्तार्थकृतगुणवाचकेन अर्थशब्देन च सह समासविधानात् शङ्कुलया खण्ड इत्यादाविव चित् शब्दस्य श्येनकृतगुणवाचित्वाभावेन तेन सूत्रेणात्र समासानुपपत्तेः।

नापि श्येनस्य धात्वर्थे कर्मत्वेनान्वय इति द्वितीयः पक्षः। श्येनव्यक्तेर्जातेर्वा इष्टकाचयनेन निर्वर्तयितुमशक्यत्वात्। अतः श्येनशब्दस्य श्येनसदृशे लक्षणां स्वीकृत्य श्येनसदृशं चीयमानं चयनेन संपादयेत् इति वाक्यार्थः संपद्यते। सादृश्यं च न व्यक्त्या सहोपपद्यते। तद्धि एकव्यक्तिसादृश्यं वा स्यात् सर्वव्यक्तिसादृश्यं वा। आद्ये अनिर्धारितव्यक्त्यन्तरविलक्षणैकव्यक्तिसादृश्यस्य इष्टकाभिः संपादनमशक्यम्। सर्वव्यक्तिसादृश्यं तु तासां परस्परं वैलक्षण्यात्, अतीतानागतव्यक्तीनामग्रहणेन तत्सादृश्याग्रहणाच्च असंभावितमेव। तस्मात् श्येन्जातीयसादृश्यं संपादयेत् इत्यर्थावगमेन अवश्यं जातिरिपि श्येनपदात् प्रतीयत इति वक्तव्यम्। अतश्च जातेरेव एकत्वेन लाघवात् प्रथमोपस्थितत्वाच्च शक्तिविषयत्वोपपत्तौ गौरवापादकं व्यक्तेः शक्तिविषयत्वकल्पनं न प्रामाणिकम्।

कथं तर्हि व्यक्तिलाभः। तदुच्यते। जातेर्व्यक्त्या सहाभेदस्याप्यङ्गीकारात् जातौ प्रतीयमानायां तदभिन्नायाः व्यक्तेरपि प्रतीतिः। यथा हि अयुतसिद्धयोः जातिव्यक्त्योः गुणगुणिनोश्च "पटे पटत्वम्, पटे शुक्लत्वम्" इति प्रतीत्या भेदः, तथा अयं गौः अयं शुक्ल इत्यादिप्रतीत्या अभेदस्यापि सिद्धेः। न चैवं व्यक्त्यभेदे व्यक्तिवत् जातेरनित्यत्वापत्तिः इति वाच्यम्। जात्यात्मना नित्यत्वेऽपि व्यक्त्यात्मना अनित्यत्वस्य अस्माकमपीष्टत्वात्।

---

[५०] पा.सू. ३.२.९२
[५१] पा.सू. ३.२.८६
[५२] पा.सू. २.३.३०

न चैवमभेदाङ्गीकारे व्यक्तेरपि वाच्यत्वापत्तेः अधिकरणवैयर्थ्यापत्तिरिति वाच्यम्। व्यक्तेर्वाच्यत्वेऽपि व्यक्त्यात्मना न वाच्यत्वम्, अपि तु जात्यात्मनेत्येवं तत्सार्थक्योपपत्तेः। तदेतन्मतं न्यायसुधायां तावन्मुख्यत्वेनैव लिखितम्। भास्कराचार्यसिद्धान्तोऽयं स्वीकृतः मीमांसकैः।

भवदेवस्तु — जातिव्यक्त्योरभेदेऽपि जातिशक्तेः साक्षाद्विषयतासंबन्धेन जातिसंबन्धिन्याः उद्देश्यताख्यविषयतासंबन्धेन व्यक्त्याप्यस्ति संबन्धः। सर्वैः व्यक्तिप्रतीतिमुद्दिश्यैव शब्दप्रयोगात्। अतश्च यथैव "यजेत स्वर्गकामः" इत्यत्र एकैव यागकृतिः यागविषयिणी स्वर्गोद्देश्यिका चेति न भेदं प्रतिपद्यते, उभयोत्पादिका च भवति, तथैव एकैव घटपदशक्तिः घटत्वविषयिणी घटोद्देश्यिका चेति न तस्यां भेदः, एकस्या एव चोभयप्रतीतिजनकत्वं न विरुध्यते। अतः जातिशक्तिज्ञानस्यैव कार्यतावच्छेदकं जातिविषयकशाब्दबोधत्वं व्यक्तिविषयकशाब्दबोधत्वं च इत्याह।

अन्ये तु — कार्यतावच्छेदकद्वयकल्पने गौरवात् जातिबोधस्य व्यक्तिबोधस्य च क्रमिकत्वाननुभवात् क्रमिकत्वाङ्गीकारेऽपि वैशिष्ट्यबोधाभावेन निर्विकल्पकस्वरूपत्वापत्तेः पूर्वोक्तस्य "घटपदं शक्तत्वसंबन्धेन घटत्ववत्" इत्याकारकज्ञानरूपस्य कारणस्य घटत्वविशिष्टविषयकशाब्दबोधत्वं कार्यतावच्छेदकम्। अतश्चैकयैव शक्त्या जातिव्यक्त्युभयबोधोपपत्तिः — इत्याहुः।

तन्न। तथा सति "चतुरो मुष्टीन् निर्वपति" "अरुणया क्रीणाति" "पशुना यजेत" इत्यादौ विशेष्यभूतायां व्यक्तावेव करणत्वान्वयद्वारा क्रियान्वयसंभवेन विशेषणभूतयोर्जातिगुणयोः करणत्वान्वयाभावप्रसङ्गेन क्रियान्वयानापत्तिप्रसङ्गात्। विशेष्यभूतमुष्ट्याद्यन्वयद्वारैव क्रियान्वयाङ्गीकारे तु "सप्तदशशरावश्चरुः" इत्यत्र निर्वापे जघन्यमुष्टिलोपेन प्रथमोपस्थितचतुस्संख्यानुग्रहो दशमे वक्ष्यमाणो न सिध्येत्। जघन्यस्यापि प्रधानस्यानुग्राह्यत्वेन मुष्ट्यनुग्रहस्यैव न्याय्यत्वापत्तेः।

अतश्च व्यक्तिलाभः कथमिति शङ्का शिष्यते। सैवं परिहरणीया — घटपदत्वं धर्मितावच्छेदककीत्य घटपदं शक्तत्वसंबन्धेन घटत्ववत् इत्याकारकज्ञानस्य कार्यतावच्छेदकं घटत्वजातिविषयकशाब्दत्वमेव, लाघवात्। व्यक्तिबोधस्तु लक्षणयेति।

न चैकस्मिन् पदे वृत्तिद्वयविरोध इत्युक्तमिति वाच्यम्। स विरोधः किमेकबोधजनने वा आपाद्यते, बोधद्वयजनने वा? अन्त्येऽपि बोधयोर्यौगपद्ये? क्रमिकत्वे वा? न तावदाद्यौ, अनङ्गीकारात्। न तृतीयः, शक्यार्थस्य पदार्थान्तरान्वयप्रमितेः

प्रागेव लक्षणाङ्गीकारात्। यथैव गङ्गापदात् शक्यस्य प्रवाहस्योपस्थितौ तस्य घोषाद्यन्वयप्रमितेः प्रागेव अनुपपत्त्या तीरे लक्षणायामपि न वृत्तिद्वयविरोधः। अत एव तत्र "सकृच्छ्रुतं पदं सकृदेवार्थं प्रत्याययति" इति नियमभङ्गरूपं दूषकता-बीजमपि नास्ति। अपि तु यत्रान्वयबोधोत्तरं तस्यैव पदस्य वृत्त्यन्तरेण यत्रार्थान्तरप्रत्यायकत्वं तत्रैव तत्। एवमिहापि शक्त्या जात्युपस्थितौ सत्यां तस्याः कर्मत्वाद्यन्वयप्रमितेः प्रागेव अनुपपत्तिवशात् व्यक्तौ लक्षणायामपि न क्रमिक-वृत्तिद्वयविरोधः न वा दूषकताबीजम्।

अत एव यत्र करणत्वान्वये नानुपपत्तिः तत्र जातिगुणयोरपि करणत्वान्वयद्वारा क्रियान्वयोपपत्तेः न लक्षितव्यक्तेः तदन्वयः।

न च क्रमिकबोधद्वयाङ्गीकरणे वैशिष्ट्यबोधाभावेव निर्विकल्प-रूपत्वापत्तिरिति वाच्यम्। इष्टापत्तेः। निर्विकल्पिकाया अप्युपस्थितेः शाब्दबोधजनकत्वे न किञ्चित् बाधकम्।

एवं जातिवाचित्वपक्षे अवघातादिक्रियान्वयः, "अन्यं तद्वर्णं तद्वयसमालभेत" इत्यन्यत्वं च लक्षितव्यक्तिमादायोपपन्नम्।

तथा क्रियाजन्यफलाश्रयत्वादिरूपे कर्मादिकारकेऽपि यत्र जातेरमूर्तत्वात् अव-घातक्रियाजन्यवितुषीभावादिफलाश्रयत्वाद्ययोगेनानन्वयः तत्र जात्या लक्षितायाः व्यक्तेरेव कर्मत्वाद्यन्वयद्वारा क्रियान्वयः, न तु जातेः। जातिस्तु तत्र व्यक्तिपरिचयोपायत्वेनैव विवक्षिता। तत्र लिङ्गसंख्ययोर्लक्षितव्यक्तावन्वयः।

यत्र तु पशुना यजेत, अरुणया क्रीणाति इत्यादौ करणत्वश्रवणं तत्र व्यापारवदसाधारणकारणत्वरूपस्य करणत्वस्य क्रयसाधनत्वानुपपत्त्या आक्षिप्त-द्रव्यपरिच्छेदरूपव्यापारद्वारेण, काष्ठानां ज्वालाद्वारेण पाककरणत्ववत् जाति-गुणयोरेव संभवात् करणत्वद्वारा क्रियान्वयसंभवात् तत्र क्रियान्वयार्थं न व्यक्तिलक्षणया शाब्दबोधः। किं तु ज्वालाया इव आर्थिक एव तस्य क्रियान्वयः।

लिङ्गसंख्ययोरपि समानपदोपात्तत्वप्रत्यासत्त्या सामानाधिकरण्यसंबन्धेन करणत्वे एवान्वयः। पार्ष्ठिको जातिगुणसंबन्धः। अतः संबन्धघटकतयैव तत्र द्रव्यबोधः।

पदशक्यार्थविषये मणिग्रन्थोक्ता विषयाः

मणिकाराः शक्तिवादे प्रथमतः पदानां कार्यान्विते शक्तिः इति मतं विस्तरेण दूषयां बभूवुः।

ततः अनन्वितपदार्थे एव पदानां शक्तिरिति निर्णीते सति पदशक्यः पदार्थः कः इति विचारः प्रस्तुतः।

तत्र व्यक्तेः पदार्थत्वं निरस्य प्राभाकरमतानुसारेण जातेः पदार्थत्वं व्यक्तिबोध-प्रकारश्च वर्णितम्।

ततः भट्टमते जातिरेव शक्या लाघवात्, व्यक्तिस्त्वाक्षेपलभ्येति न्यरूपि।

मण्डनमते जातिरेव शक्या व्यक्तिधीर्लक्षणयेति निरूपणम्। ततः जात्याकृति-विशिष्टे शक्तिरिति स्वमतनिरूपणम्।

ततः रूढियोगरूढ्यादिशक्तिनिरूपणम्, अपभ्रंशस्य शक्तत्वाशक्तत्वविचारश्च।

ततो लक्षणानिरूपणम्।

तात्पर्यस्य वृत्तित्वविचारः।

प्राभाकरमतेन पदानां जातौ शक्तिः[५३]

प्राभाकरैः पदानां स्मारकशक्तिः अनुभावकशक्तिरिति शक्तिद्वयं स्वीकृतम्। आनुभाविकी शक्तिः कार्यान्वितेऽर्थे। स्मारकशक्तिस्तु जातौ, न तु व्यक्तौ इति स्वीकुर्वन्ति। तन्मतमनूद्य विचार्यते। आनयनादिरूपो व्यवहारः व्यक्तावेवेति यद्यपि व्यक्तावेव शक्तिरुचिता। तथाप्यानन्त्यव्यभिचाराभ्यां न तत्र शक्तिः। यदि यत्र शक्तिग्रहः तत्र शाब्दधीः तदानन्तासु व्यक्तिषु शक्तिग्रहासंभवात् अगृहीत-शक्तिकव्यक्तेः शाब्दधीर्न स्यात्। यद्यन्यविषयकशक्तिग्रहात् अन्यविषयकः शाब्द-बोधः तदा शक्तिधीः शाब्दज्ञाने व्यभिचारिणी स्यात् इत्याशयः।

सर्वव्यक्तीनां शक्यत्वे न केवलमानन्त्यं दोषः, अपि च गां दद्यात् इत्यादौ सर्वगोव्यक्तीनां दानकर्मत्वानुपपत्तिश्च। न चान्यतमव्यक्तेः शक्यत्वमिति वाच्यम्। इयं व्यक्तिः शक्या अन्या वेत्यनिर्धारणात् गां दद्यादित्यादावप्रवृत्त्यापत्तेः। न च गोव्यक्तिमात्रमर्थ इति वाच्यम्। मात्रशब्दस्य कृत्स्नार्थकत्वे उक्तदोषात्। गोत्वरूपसामान्यार्थकत्वे गोशब्दात् गोव्यक्तेः अप्रतीत्यापत्तेः। न च तत्तद्व्यक्तित्वेन रूपेण सर्वा व्यक्तिः शक्या, तथा च गोपदं नानार्थम् इति वाच्यम्। तथापि प्रत्येकरूपेण सर्वासां ज्ञातुमशक्यत्वात् अनेकशक्तिकल्पने अनेकशक्यता-वच्छेदकल्पने च गौरवाच्च। अपूर्वगवि तद्व्यक्तित्वेन पूर्वं शक्तिग्रहाभावात् प्रतीत्यभावादिप्रसङ्गाच्च।

---

[५३] मणि. पृ ५५६

न च धेनुपदस्य यथा गोत्वोपलक्षिता व्यक्तिः शक्या तथा गोपदस्यापि सैव शक्या; अतो न शक्त्यानन्त्यम्, न व्यभिचारः, न सर्वासंग्रहः, न नानार्थत्वम्; गोत्वेन तासामैक्यादिति वाच्यम्। रूपान्तरेण ज्ञानविषयस्य हि रूपान्तरमुपलक्षणं भवति। यथा काकवत् देवदत्तगृहमित्यत्र गृहत्वेन ज्ञातस्य काक उपलक्षणम्, देवदत्तीयत्वमुपलक्ष्याकारः। उपलक्ष्याकारात् अन्यः आकारः उपलक्षणमिति यावत्। धेनुशब्देऽपि गोत्वेन उपलक्षणेन धानकर्मव्यक्तिविशेषः उपलक्ष्यते। तथा च उपलक्ष्यस्य यत्र उपलक्षणादन्येन आकारेण प्रतीतिः तत्रैव उपलक्षणोपलक्ष्यभावः। गोपदात्तु गोत्वेन रूपेणैव गोः प्रतीतिः इति गोत्वं कथमुपलक्षणं भवेत्। नहि गोव्यक्तीनां जातिं विना रूपान्तरमेकमस्ति ज्ञायते वा।

अपि च गामानयेत्यादौ गोत्वविशिष्टे कार्यान्वयात् गोत्वं विशेषणमेव, नोपलक्षणम्। तदन्येन कार्यान्वये उपलक्षणत्वम्, यथा "अयं वासस्वी देवदत्तशब्दवाच्यः" इत्यत्र वस्त्रम्, वस्त्र गापदवाच्यत्वानन्वयात्। अपि च वासोवत् यदि गोत्वं शक्योपलक्षणं तदा देवदत्तपदजन्यज्ञाने वासोवत् गोपदजन्यज्ञाने गोत्वमपि न स्फुरेत्।

किं च गोत्वेन व्यक्तीनामैक्यादिति यदुक्तं तदपि न। न हि गोत्वैकत्वेन गोव्यक्तीनामैक्यं क्रियते, अशक्यत्वात्। नापि ज्ञाप्यते, असत्त्वात्। न हि व्यक्तीनामैक्यमस्ति, यत् ज्ञाप्येत। न च जात्येकत्वमेव व्यक्त्येकत्वमिति वाच्यम्। असंभवात्।

न च गोव्यक्तिः गोपदशक्या, गोत्वं शक्यतावच्छेदकम्, यथा दण्डः कारणं दण्डत्वं कारणतावच्छेदकं तद्वदिति वाच्यम्। तर्हि यथा दण्डत्वस्य कारणत्वं नास्ति तथा गोत्वस्य शक्यत्वं न स्यात्। शक्यत्वाभावे च गोपदात् गोत्वोपस्थितिर्न स्यात्। उपस्थित्यभावे गोत्वस्य बोधविषयत्वं न स्यात्।

न चाशक्यस्यापि गोत्वस्य गोत्वशक्तिग्रहजन्यसंस्कारसहकृतात् गोपदात् स्वशक्यवृत्तित्वरूपपरंपरासंबन्धवशात् उपस्थितिर्भवति, धेनुपदादिव गोत्वज्ञानमिति वाच्यम्। तत्र हि धानकर्मव्यक्तिविशेषस्यावश्यमशक्यत्वेऽनुगमाय गोत्वमवच्छेदकं भवति। इह तु व्यक्तिः अतिप्रसक्तेति जातिविशिष्टैव सा शक्या स्यात्।

वस्तुतस्तु जातेः शक्योपलक्षणत्वे शक्त्यवच्छेदकत्वेन वा आवश्यकत्वात् लाघवाच्च जातिरेव शक्या स्यात् न तु व्यक्तिः। धेनुपदे तु न गोत्वस्य शक्यता, वृषभेऽपि सत्त्वेन अतिप्रसक्तत्वात्।

तस्मात् उक्तयुक्त्या व्यक्तेरपदार्थत्वेन जातिरेव पदार्थः। वस्तुतस्तु व्यक्तौ जातिर्विशेषिका अनुगमिका चावश्यं वाच्येति "नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते" इति न्यायेन जातिरेव वाच्या।

ननु जातावपि व्यक्तिरेव विशेषिका, धर्मान्तराभावात्। न च गोत्वत्वं विशेषकमिति वाच्यम्। तस्य गवेतरावृत्तित्वे सति निखिलगोवृत्तित्वरूपस्य व्यक्ति-घटितत्वात्। तथा च नागृहीतविशेषणान्यायो व्यक्तावपीति जातिर्व्यक्तिश्चेत्युभयं शक्यमिति चेत् – न। जातेः स्वत एव व्यावृत्तत्वात्। अन्यथा व्यावृत्तस्यैव व्यावर्तकत्वात् जात्या व्यक्तौ व्यावृत्ततया ज्ञातायां तया जातेर्व्यावृत्तत्वबुद्धिः, जातौ व्यावृत्तत्वज्ञाने सति तया व्यक्तेर्व्यावृत्तत्वबुद्धिरित्यन्योन्याश्रयः प्रसजति।

अपि च किमिदं स्वतो व्यावृत्तत्वम्। न तावत् स्वयमेव स्वव्यावर्तकत्वम्। स्वस्मिन् स्वस्यावृत्तेः। व्यावृत्त्यधिकरणवृत्तेरेव व्यावर्तकत्वात्। नापि व्यावर्तकं विनैव व्यावृत्तत्वम्, असंभवात्। किं तु स्वाश्रये इव स्वस्मिन्नपि इतरव्यावृत्तिबुद्धिं यः जनयति स एव स्वतो व्यावृत्त इत्युच्यते। यथा अन्त्यो विशेषः। स हि स्वाश्रये स्वस्मिंश्च व्यावृत्तिबुद्धिं जनयति। व्यावर्तकधर्मेऽपि धर्मान्तरादेव व्यावृत्तिबुद्धिरिति स्वीकारेऽनवस्था स्यात्। अत एव — "किंचिद्धि वस्तु स्वत एव विलक्षणम्" इत्याहुः। तथा च जातिः स्वाश्रये स्वस्यां च व्यावृत्तिबुद्धिं जनयतीति स्वत एव व्यावृत्ता। अतः व्यक्तेर्जातिविशेषकत्वाभावात् नोभयोः शक्यत्वम्।

अस्तु वा व्यक्त्या व्यावृत्ततया बोधिता जातिरेव पदार्थो लाघवात्। न तु जात्या व्यावृत्ततया बोधिता व्यक्तिः उभयं वा पदार्थः, गौरवात्, व्यक्तेर्नानात्वात्। कुतस्तर्हि व्यक्तिधीः? जातिशक्तादेव पदात्। कथमन्यशक्तात् पदात् अन्यधीः? स्वभावात्। न च जातिशक्तस्य पदस्य व्यक्तिबोधकत्वस्वभाव एव व्यक्तिशक्तिं विना न संभवतीति वाच्यम्। गोपदं हि नियमेन जातिव्यक्ती बोधयति। तस्मिन् बोधे गोपदस्य जातिशक्तिधीरेव सहकारिणी कल्प्यते। जातेरेकत्वेन लाघवात् नागृहीतविशेषणान्यायेन आवश्यकत्वाच्च। न तु व्यक्तिशक्तिधीरपि सहकारिणी गौरवात्। जातिशक्तिज्ञाने सति व्यक्तिशक्तिज्ञानं विना व्यक्तिबोधविरहस्याभावाच्च। यथा तव (नैयायिकस्य) पदार्थशक्तादेवान्वयधीः। तथा च जातिशक्तिज्ञानत्वं कारणतावच्छेदकम्, जातिविशिष्टविषयकज्ञानत्वं कार्यतावच्छेदकमिति न दोषः।

यद्वा जातिशक्तमेव पदं व्यक्तिं बोधयति, अशक्यत्वेऽपि जात्याश्रयत्वमेव बोधनियामकम्। एतदुक्तं भवति — जातिशक्तं पदं जातिं व्यक्तिं च बोधयति। तत्र

जातिबोधे जातिशक्तिधीः नियामिका, व्यक्तिबोधे स्वरूपसत् जात्याश्रयत्वं सहकारीति। यथा जात्यादिशक्तं पदमशक्यमपि स्वार्थान्वयं बोधयति इति दृष्टान्तः।

ननु किमनेन प्रयासेन, व्यक्तावपि शक्तिरेवास्तु जात्याश्रयत्वस्य व्यक्तिधीप्रयोजकत्वकल्पने गौरवादिति चेन्न। अन्यलभ्यस्य अपदार्थत्वात्। अन्यथा अन्वयोऽपि शक्यः स्यात्, लक्षणोच्छेदश्च। तीरेऽपि शक्तिसंभवात्।

अथवा जातिशक्तिज्ञानात् जातिधीर्भवन्ती व्यक्तिमपि विषयीकरोति।[५४] उभयोरेकवित्तिवेद्यत्वनियमात्। न हि व्यक्तिं विना जातिर्भासते। यो येन विना न भासते तद्धीहेतुः तमपि बोधयति। यथा ज्ञानमनुव्यवसायादौ विषयं विना न भासत इति ज्ञानधीहेतुः ज्ञानविषयमपि बोधयति। यथा वा अधिकरणसिद्धान्तः ज्ञानादिनित्यत्वं बोधयति तद्वत्। "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः"[५५] इति न्यायसूत्रम्। "यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते, न तैर्विना सोऽर्थः सिध्यति, तेऽर्था यदधिष्ठानाः सोऽधिकरणसिद्धान्तः" इति भाष्यम्। तथा च कार्यत्वेन क्षित्यादौ कर्तरि ज्ञानादिमति अनुमीयमाने सति ज्ञानादेः सर्वविषयकत्वं नित्यत्वं च विना कर्तृत्वं न निर्वहतीति पक्षधर्मताबलात् ज्ञाननित्यत्वादिकं लभ्यते। अन्यथा — जातिशक्तंपदस्य व्यक्त्यबोधकत्वे पदं जातिमपि न बोधयेत्। केवलायाः जातेः प्रतीत्यभावात्। तथा च जातिशक्तिकल्पनं व्यर्थम्। तस्मात् जातिज्ञानार्थं क्लृप्ता शक्तिः व्यक्तिमपि बोधयति। जातेर्व्यक्तेश्च एकवित्तिविषयत्वनियमात्।

ननु व्यक्तौ शक्तिं विना एकवित्तिवेद्यत्वं न स्यात्। शक्तेरेव ज्ञानविषयत्वप्रयोजकत्वात्। न हि व्यक्तिज्ञानमहेतुकं जातिहेतुकं वा, व्यक्तिज्ञानस्य सदातनत्वप्रसङ्गात्। नापि जातिधीहेतुकम्, जातिधीव्यक्तिधियोर्भेदापत्तेः इति चेत् — न। जातिशक्तिज्ञानस्यैव व्यक्तिज्ञानजनकत्वात्।

ननु जातिं विना प्रत्यक्षादिना व्यक्तिज्ञानात् जातिज्ञानसामग्रीतोऽन्यैव व्यक्तिज्ञानसामग्री। कदाचित् जातिविशिष्टव्यक्तिज्ञानं च उभयज्ञापकसामग्रीद्वयसमाजादार्थम्। जातिभासकसामग्री संयुक्तसमवायः, व्यक्तिभासकसामग्री च संयोगः, उभयोः मेलनात् जातिविशिष्टव्यक्तिप्रत्यक्षं भवति। इदमेवार्थसमाजग्रस्तमित्युच्यते। अर्थसमाजग्रस्तत्वं च सामग्रीसमुदायप्रयोज्यत्वम्, सामग्रीद्वयप्रयोज्यत्वमिति यावत्। भवति हि नीलेतरघटत्वं विशेषणविशेष्यांशप्रयोजकसामग्रीद्वयप्रयोज्यम्। अर्थसमाजग्रस्तस्य च कार्यतावच्छेदकत्वं नाङ्गीक्रियते इति चेत् —

---

[५४] त.चिं. पृ. ५६४
[५५] न्या.सू. १.१.३०

उच्यते। जातिव्यक्तिविषयकप्रत्यक्षादिज्ञाने सामग्रीद्वयस्य पृथगेव हेतुत्वम्, इन्द्रियसंयोगः व्यक्तिप्रत्यक्षं प्रति हेतुः इन्द्रियसंयुक्तसमवायः जातिप्रत्यक्षं प्रति हेतुरिति कल्प्यते, पृथगन्वयव्यतिरेकग्रहात्। शब्दाधीने तु व्यक्तिबोधे जातिशक्तिज्ञानमेव हेतुः लाघवात्, न तु सामग्र्यन्तरं व्यक्तिशक्तिज्ञानात्मकम्। जातिशक्तिज्ञानसत्त्वे व्यक्तिशक्तिज्ञानविलम्बेन व्यक्तिज्ञानविलम्बाभावात्। एवं च जातिशक्तत्वेन ज्ञातं पदं जातिविशिष्टव्यक्तेः स्मारकम् अनुभावकं च।

ननु पदानां ज्ञापकत्वात् ज्ञान एव शक्तिः। तथा च यत् पदं यद्विषयकज्ञानोत्पादने शक्तम्, तत् तत्पदशक्यम्। गवादिपदात् गोत्वगोव्यक्त्युभयविषयकज्ञानस्य जायमानतया गवादिपदस्योभयविषयकज्ञाने शक्तिरिति जातिव्यक्त्युभयं शक्यम् इति चेत् — न।

यद्विषयकत्वेन ज्ञाता (ज्ञाने) शक्तिः शाब्दबोधे उपयुज्यते तत् शक्यम्। जातिविषयकत्वेन ज्ञाता शक्तिरेव च उपयुज्यत इति जातिरेव शक्या। न तु व्यक्तिविषयकत्वेन ज्ञातायाः शक्तेरुपयोग इति न व्यक्तिः शक्या। न च पदशक्यज्ञाने नियमेन यो विषयः स शक्य इति वाच्यम्। तथा सति वृद्धव्यवहारानुमिते शाब्दानुभवे विषयाणां अन्वय-अन्वयसंबन्धिमितिमातृणामपि शक्यत्वप्रसङ्गात्।

एवं च शब्दस्य जातिव्यक्त्युभयविषयकज्ञानजनकत्वात् उभयत्रापि शब्दशक्तिः अस्ति।[५६] परं तु जात्यंशे सा ज्ञाता सती बोधहेतुः व्यक्त्यंशे तु स्वरूपसती हेतुरिति कुब्जशक्तिवादः। तद्विषयकत्वेन ज्ञानशक्तिकशब्दजन्यज्ञानविषयत्वं वाच्यत्वम्। तत्तु जातेरेव। व्यक्तेः शक्यत्वेऽपि न वाच्यत्वम्। ज्ञानशक्तिकपदजन्यज्ञानविषयत्वाभावात्। न चैतत् पारिभाषिकं न यौक्तिकम् इति शङ्कनीयम्। शब्दजन्यज्ञानविषयत्वं यस्य तस्य वाच्यत्वमिति स्वीकारे लक्ष्यार्थस्यापि शब्दजन्यज्ञानविषयत्वेन वाच्यत्वापत्तेः, व्यक्तेः शक्यत्वेऽपि व्यक्तिज्ञानत्वेन न कारणत्वमिति व्यक्तिविषयकत्वेन ज्ञानशक्तिकशब्दजन्यज्ञानविषयत्वाभावान्न तस्याः वाच्यत्वम्।

ननु न जातिरर्थः।[५७] व्यवहारागोचरत्वेन तत्र शक्तिग्रहासंभवात्। कारकविशिष्टा क्रिया हि व्यवहारविषयः। जातिर्न तावत् क्रिया, नित्यत्वात्। न कर्त्रादि कारकम्, क्रियानाश्रयत्वेन कर्तृत्वाभावात्, कर्तृव्यापारानाश्रयत्वेन करणत्वाभावात्, अचेतनत्वेन संप्रदानत्वायोगात्, जात्या सह विभागाभावेन अपादानत्वा-

---

[५६] त.चिं. पृ. ५६७
[५७] त.चिं. पृ. ५६८

योगात्, क्रियानाधारत्वेन अधिकरणत्वाभावाच्च इति चेत् — न। उक्तन्यायेन जातौ शक्तिग्रहात् जातिविषयकसविकल्पके नियमेन व्यक्तेरपि विषयतया व्यक्तौ आनयनादिक्रियान्वयः। सविकल्पकं च निर्विकल्पकद्वारा जातिजन्यमिति परस्परया जातेरपि कारकान्वयः। परम्परा स्वविषयकनिर्विकल्पकज्ञानजन्यज्ञानविषयवृत्तित्वम्।

यद्वा न केवलायाः व्यक्तेः कारकत्वम्। न हि गौः गच्छतीत्यत्र व्यक्तिमात्रं यातीति कस्यचित् प्रतीतिः। किं तु जातिविशिष्टायाः व्यक्तेः कारकत्वम्। तथा चोभयमपि कारकम्।

श्रीकरस्तु — केवलजातेः व्यक्तेश्चाकारकत्वात् क्रियायामाश्रयतया व्यक्तेरन्वयः, जातेस्तु अवच्छेदकतया अन्वयः। जात्यवच्छिन्नव्यक्तौ क्रियान्वय इति यावत्। आरुण्यवत्। अरुणया एकहायन्या गवा सोमं क्रीणातीत्यत्र गोः करणत्वेन क्रयान्वयः, आरुण्यस्यावच्छेदकत्वेनान्वयः। एवं च जातिशक्तपदात् जातेरनुभवः शाब्दः, व्यक्तेस्तु औपादानिकः, तस्याः शक्यत्वाभावात् इत्याह।

श्रीकरमते पदस्य जातौ व्यक्तौ च शक्तिः, जातौ शक्तिः ज्ञाता सती उपयोगिनी, व्यक्तौ शक्तिस्तु स्वरूपसती।

अन्ये तु व्यक्तौ स्वरूपसतीमपि शक्तिमनङ्गीकुर्वाणाः जातिशक्त्यैव व्यक्तिबोधं निर्वहन्ति।[५८] तथा हि — जातिशक्तमेव पदं जातिव्यक्त्योः स्मृतिमनुभवं च जनयति। अतो व्यक्तेरपि शाब्दत्वम्। न च वृत्त्यधीनान्वयानुभवविषयस्यैव शाब्दत्वात् व्यक्तौ शक्त्यनङ्गीकारे कथं शाब्दत्वमिति वाच्यम्। जातिव्यक्त्योरेकवित्तिवेद्यत्वनियमेन जातिशक्तादेव पदात् जातेरनुभवकाले तस्मिन्ननुभवे व्यक्तिरपि भासत इति जातिशक्त्यधीनान्वयानुभवविषयत्वस्य व्यक्तौ सत्त्वेन व्यक्तेः शाब्दत्वोपपत्तेः। अन्यथा जातेरप्यनुभवो न स्यात् व्यक्तिं विना जातेरननुभवात्। एतदभिप्रायेणैव जातिशक्तिरेव व्यक्तिं बोधयतीति गुरवः।

किं च योऽर्थः शक्त्या उपस्थापितः (शक्तिप्रयोज्यस्मृतिविषयः) तद्विषयकानुभवं प्रति पदानां कारणत्वम्। अतः जातिशक्त्या एकवित्तिवेद्यत्वेन जातिवदुपस्थापितायाः व्यक्तेरनुभवः पदादेव भवति। न च तच्छक्त्या उपस्थापितार्थानुभवं प्रत्येव पदस्य कारणत्वम्, व्यक्तेरनुभवस्तु व्यक्तौ शक्त्या नोपस्थापित इति कथं व्यक्त्यनुभवस्य पदकारणकत्वमिति वाच्यम्। तत्तच्छक्त्या उपस्थापितस्येति निवेशे गौरवात्, शक्त्या उपस्थापितस्यानुभवं प्रति पदानां कारणत्वमित्येव

---

[५८] त.चिं. पृ. ५७०

स्वीकारात्। व्यक्तेस्तु जातिशक्त्या उपस्थापितत्वमुक्तरीत्या अस्त्येवेति व्यक्त्यनुभवस्य पदहेतुकत्वाक्षतेः। न चाशक्यव्यक्तितात्पर्यकत्वे पदस्य व्यक्तौ लक्षणा स्यादिति वाच्यम्। यथा किल जातिशक्त्यैव व्यक्तेर्ज्ञानात् न व्यक्तौ शक्तिः तथा लक्षणापि न। न च लक्षणानङ्गीकारे अशक्यव्यक्तौ शब्दस्य मुख्यः प्रयोगः स्यात् इति वाच्यम्। इष्टापत्तेः। शक्त्या साक्षादुपस्थितेऽर्थे शब्दस्य मुख्यत्वम्, न तु स्वशक्त्या साक्षादुपस्थितेऽर्थे, स्वशब्दवैयर्थ्यात्। तथा च जातिशक्त्या साक्षादुपस्थितत्वं व्यक्तेरस्तीति तत्र शब्दस्य मुख्यत्वम्।

किं च जातिशक्तात् शब्दात् व्यक्तिधीः यदि नाङ्गीक्रियते तदा व्यक्तौ शक्तिरेव स्यात् अन्यथा व्यक्तिधीर्न स्यात्। परं तु जातिशक्तादेव शब्दात् एकवित्ति-वेद्यत्वनियमात् व्यक्तिधीसंभवेन व्यक्तिशक्तिरनावश्यकी।

अत्र केचित् — पदजातिभ्यामेको जातिव्यक्त्युभयविषयकोऽनुभवः उत्पाद्यते। तत्र जात्यंशभाने पदस्य हेतुत्वम्, व्यक्त्यंशभाने जातेर्हेतुत्वमित्याहुः। तन्न। व्यक्त्यनुभवे जातेः कारणत्वापेक्षया शक्तिज्ञाने उपस्थितव्यक्त्यवच्छेदकत्व-कल्पनमेव जातेर्युक्तम्। तथा च जातिशक्त्यधीनजात्यवच्छिन्नव्यक्त्युपस्थित्या जात्यवच्छिन्नव्यक्तिबोधः इत्युक्तं भवति। जातेः व्यक्त्यनुभवं प्रति हेतुत्वे तस्याः शब्दातिरिक्तप्रमाणत्वापत्तिश्च।

यतः जातिशक्तादेव पदात् व्यक्त्यन्वयबोधः अत एव "व्रीहीनवहन्ति" इत्यादौ न व्यक्तौ लक्षणा। व्यक्तिलक्षणया साध्यायाः व्यक्त्युपस्थितेः जातिशक्त्यैव सिद्धेः। अस्तु वा गवावच्छेदकत्वेन आरुण्यादिवत् (गोविशेषणतया आरुण्यादौ क्रया-न्वयवत्) व्रीह्यवच्छेदकत्वेन व्रीहित्वेऽप्यवघाताद्यन्वय इति — इति।

अत्रोच्यते। गोत्वज्ञाने गोज्ञाने वा शक्तं पदमित्याकारः शक्तिग्रहः। तथा च शक्ये ज्ञानविषयतया अवच्छेदकत्वं जातेः अस्ति, अतः जातेर्वाच्यत्वम्। विषयतासंबन्धेन यद्विशिष्टज्ञानं शक्यं तदेव वाच्यमिति यदुक्तं, तत्रेदमालोचनीयम्। शक्ये ज्ञाने विषयतया जातेरवच्छेदकत्वमपि व्यक्तिमादायैव प्रतीयेत, न केवलाया जातेः; व्यक्तिं विना जातेरप्रतीतेः। तथा च जातेः अवच्छेदकत्वे "नागृहीत-विशेषणा बुद्धिर्विशिष्टेषूपजायते" इति न्यायेन जातिव्यावर्तकव्यक्तेरप्यवच्छेदकत्व-मवर्ज्यमिति जातिवत् व्यक्तिरपि वाच्या। ननु यत्र प्रथमोपस्थितत्वं तत्र तन्न्यायावतारः, न चात्र तथेति चेन्न। तद्ग्रहं विना यत्र विशेष्यस्य ग्रहो न संभवति तत्रैव तन्न्यायप्रवृत्तेः। अन्ये तु यत्र व्यक्त्या व्यावृत्ता जातिस्तथात्वेन ग्राह्या तत्र प्रथमं व्यक्तिज्ञानमावश्यकमित्याहुः। तस्मात् भवता जातिव्यक्त्योरेकवित्तिवेद्यत्व-नियमो वा त्यक्तव्यः व्यक्तेर्वाच्यत्वं वा स्वीकरणीयम्।

अपि च यद्धर्मवत्तया ज्ञात एव यत्र यस्य ज्ञानं स तत्रावच्छेदकः। व्यक्तिज्ञानत्वेन ज्ञाते एव ज्ञाने शक्तिधीरिति व्यक्तेरवच्छेदकतया व्यक्तेरपि शक्यत्वम्।

एवंक्रमेण जातिशक्तमेव पदं व्यक्तेरपि स्मारकमनुभावकं चेति निरूप्य, ततः आक्षेपात् व्यक्तेः बोध इति भट्टमतं, लक्षणया व्यक्तेर्बोध इति मण्डनमतं चानूद्य विवेचितम्। तथा हि —

भट्टमतम्[५९]

भट्टमतं तावदित्थम् — जातिरेव पदशक्या, लाघवात्। लाघवं तु पूर्वमेव गुरुमतनिरूपणावसरे प्रदर्शितम्। व्यक्तिस्तु आक्षेपलभ्या।

ननु नाक्षेपः संभवति। यत्र द्वयोः भिन्नवित्तिवेद्यत्वं तत्रैव अन्यतरेणान्यतरस्याक्षेपः संभवति। जातिव्यक्त्योस्तु एकवित्तिवेद्यत्वात् कथमाक्षेपः। न च एकवित्ति-वेद्यत्वमेव कथमिति वाच्यम्। समानानां भावो हि सामान्यम्। समानव्यक्तिवृत्तिधर्म इति यावत्। सामान्यमेव च जातिः। तथा च जातेः व्यक्तिघटितमूर्तिकतया व्यक्तिभानं विना भानं नास्तीति तयोरेकवित्तिवेद्यत्वादिति चेत् — न।

यदि सामान्यत्वेन रूपेण जातिः शक्या स्यात् तदैव व्यक्त्या विना जातेर्न भानम्। स्वरूपतो जातेः शक्यत्वे नास्ति व्यक्त्या सह भानस्यावश्यकता। न च सामान्यत्वं जातेः स्वरूपम्। सामान्यत्वस्य जातिधर्मत्वात्। अन्यथा निर्विकल्पके कथं जातिः व्यक्त्या विना भासते।

ननु सामान्यत्वेन अप्रतीता जातिः व्यक्तितो भिन्नतया कथं शब्देनाभिधेया स्यात् इति चेन्न। शब्देन व्यक्तितो भिन्नतया जातेरबोधनात्।

ननु इतरव्यावृत्ता जातिरेव शब्दवाच्या। तस्याः इतरव्यावृत्तत्वज्ञानाभावो व्यक्तिविशेषानाक्षेपकत्वात्। न हि गोत्वस्य अश्वादिव्यावृत्तत्वज्ञानाभावे गोव्यक्त्याक्षेपकत्वं स्यात्। जातेर्व्यावर्तिका च व्यक्तिरेव। न चानुगतत्वं जातिनिष्ठं जातेरितरव्यावर्तकमिति वाच्यम्। अनुगतत्वमपि अनुगम्यमानव्यक्तिं विना न भासत इति व्यक्त्या वा अनुगतत्वेन वा जातेर्व्यावृत्तिबुद्धिः नियमेन व्यक्तिविषयिण्येव स्यात् इति। तस्मात् जातिवित्तिवेद्या व्यक्तिरिति चेत् — न।

---

[५९] त.चि. पृ. ५७८

स्वतो व्यावृत्तजातिस्वरूपस्य वाच्यत्वात्। व्यक्तेः अनुगतत्वस्य वा जाति-व्यावर्तकत्वे, जातिर्व्यक्तेर्व्यावर्तिका व्यक्तिर्जातेर्व्यावर्तिकेत्यन्योन्याशयः स्यात्, अनवस्था वा स्यात्।

ननु गौरिति पदात् प्रथमं गोत्वधीः ततः क्रमेण गोत्वे व्यक्तिव्याप्यत्वज्ञानं पक्षधर्मताज्ञानं च, ततो व्यक्त्यनुमितिरिति ज्ञानपरम्परायाः कल्पनापेक्षया जाति-व्यक्त्योर्युगपत्प्रतीतिरित्येव युक्तम्। न च क्रमेण प्रतीतावपि सूक्ष्मकालभेदाग्रहात् यौगपद्यप्रतीतिर्भ्रमरूपेति वाच्यम्। यौगपद्ये बाधकाभावात्। ततश्च जातिविषयक-ज्ञानविषयत्वं व्यक्तेरिति चेत् — न।

व्युत्पत्त्यधीनं हि शब्दस्य बोधजनकत्वम्। लाघवेन जातिमात्रस्य शक्यतया पदादुपस्थितेः तन्मात्रबोधकत्वं शब्दस्य। अतो व्युत्पत्ति (शक्तिग्रह) पर्यालोचनया जातिव्यक्त्योर्युगपत् ज्ञानमसिद्धम्। अत एव ज्ञानपरंपराकल्पनमपि युक्तम्। अन्यथा आख्यातवाच्या कृतिः। तया कर्ता आक्षिप्यत इति सिद्धान्तोऽपि न स्यात्। सकर्तृकाया एव कृतेरवगमप्रसङ्गात्।

नापि जातिविषयकं ज्ञानं व्यक्तिविषयकमिति नियमः। प्रत्यक्षादौ तस्य नियमस्य उभयधीहेतुमेलनाधीनत्वात्।

अत एव न जातिधीहेतौ व्यक्तिधीहेतुसहकारित्वमिति नियमः। कारणमेलनस्य कार्यमेलकत्वात्।

अपि च प्रतीतेः जातिमात्रविषयकत्वमनुमानेनापि सिध्यति। अनुमान-प्रयोगश्च — गोत्वजातिः गोव्यक्त्यविषयकप्रतीतिविषयः जातित्वात् गोभिन्न-भावत्वाद्वा।

अथ यत् यत्परतन्त्रं तत् तेनैकवित्तिवेद्यं = तद्विषयकज्ञानविषयः, यथा अर्थपरतन्त्रं ज्ञानमर्थेन सह एकवित्तिवेद्यम्।[६०] जातिश्च व्यक्तिपरतन्त्रेति व्यक्तौ भासमानायामेव भासते। तथा च प्रयोगः — जातिः व्यक्तिविषयकज्ञानविषयः व्यक्तिपरतन्त्रत्वात् अर्थपरतन्त्रज्ञानवत् इति, इति चेत् — न।

परतन्त्रत्वं हि न परसमवेतत्वम्, गन्धादिषु व्यभिचारात्। गन्धादिर्हि स्वभिन्न-पुष्पादिसमवेतः, तथापि न पुष्पवित्तिवेद्यः, चाक्षुषपुष्पज्ञाने गन्धादेरविषयत्वात् इति।

नापि तद्धीनिरूप्यत्वं तत्परतन्त्रत्वम्। तज्ज्ञानजन्यज्ञानविषयत्वरूपस्य तस्य पक्षे जातावभावेनासिद्धेः। न हि जातिर्व्यक्तिज्ञानजन्यज्ञानविषयः।

---

[६०] त.चि. पृ. ५८०

नापि तस्मिन् भासमान एव भासमानत्वं तत्। साध्याविशिष्टत्वात्। तस्मिन् भासमान एव भासमानत्वं नाम तद्विषयकज्ञानविषयत्वम्। तदेव च साध्यमिति।

नापि तद्विशेषणत्वेनैव भासमानत्वं तत्परतन्त्रत्वम्। असिद्धेः। गोपदात् गौरित्याकारिकाया एव प्रतीतेर्दर्शनात् व्यक्त्याक्षेपवादिना तत्प्रतीतेः जातिमात्र-विषयकत्वस्वीकारेण तस्याः व्यक्तिविशेषणतया जातिविषयकत्वाभावात्।

न च परमते गवि गोत्वमिति प्रतीतेरङ्गीकारात् तस्याः गोविशेषणतया गोत्वविषयकत्वमस्तीति वाच्यम्। तथापि निर्विकल्पके विशेषणत्वं विनापि जातेर्भासमानतया व्यक्तिविशेषणतयैव भासमानत्वमिति हेतोरसिद्धिः।

न चैवं सति पदात् जातिनिर्विकल्पकापत्तिः इति वाच्यम्। इष्टापत्तेः। गोत्वादि-पदात् जातिविषयकस्मरणस्य निर्विकल्पकस्यैवोदयात्।

न च विशिष्टज्ञानस्यैव संस्कारजनकत्वेन, तेन समानप्रकारकस्मरणस्यैव जननात् जातिमात्रस्मरणमसिद्धम्। जातिमात्रस्मरणाभावादेव जातिमात्रविषयकः शाब्दा-नुभवोऽपि नेति वाच्यम्। जातिविशिष्टविषयकसंस्कारादेव पदेन जात्यं-शोद्बोधे सति जातिमात्रस्मरणोत्पत्तेः। व्यक्त्यंशोद्बोधे सति तत एव संस्कारात् जातिं विना कदाचित् व्यक्त्यंशस्मरणम्।

अस्तु वा गुरुमत इव निर्विकल्पकस्यापि संस्कारजनकत्वम्। जातिमात्र-शक्तपदात् तन्मात्रविषयकसंस्कारोद्बोधात् जातिमात्रस्मरणसिद्धेः। न च स्मरणं विशिष्टज्ञानरूपमेवेति वाच्यम्। तथा सति अनुभवस्यापि विशिष्टज्ञानरूपतया निर्विकल्पकासिद्धिप्रसङ्गात्।

एतावता जातिव्यक्त्योरेकवित्तिवेद्यत्वविरहात् जातिशक्तात् पदात् जातौ भासमानायां व्यक्तिरपि भासत इति मतं निरस्य व्यक्तेराक्षेपत एव भानमिति निरूपितम्। वस्तुतः तयोरेकवित्तिवेद्यत्वेऽपि प्रथमदर्शने जातिमात्रभानवत् शब्दात् गोत्वस्मरणं निर्विकल्पकमेव। गोत्वे विद्यमानस्य गोव्यक्तिवृत्तित्वविशिष्टत्वस्य पदशक्त्यविषयत्वेन गोत्वस्मरणाविषयत्वात्।

न च स्मरणं न निर्विकल्पकम्, इन्द्रियाजन्यत्वात्। इन्द्रियजन्यं हि ज्ञानं निष्प्रकारकं निर्विकल्पकमिति वाच्यम्। स्मृतित्वम् आलोचनवृत्ति, ज्ञानत्व-साक्षाद्व्याप्यधर्मत्वात् अनुभवत्ववत् इत्यनुमानेन स्मृतेरपि निर्विकल्पकत्व-साधनात्। अनुमितित्वादौ व्यभिचारवारणाय साक्षादिति।

ननु आक्षेपात् जायमाना व्यक्तिधीः न व्यक्तित्वेन गोत्वातिरिक्तरूपेण वा व्यक्तिं विषयीकरोति, गौरित्येव प्रतीतेः। व्यक्तित्वेन प्रतीतौ व्यक्तिरित्येव प्रतीतिः स्यात्।

गोत्वातिरिक्तरूपेण प्रतीतौ द्रव्यम्, पशुः इत्यादिरेव प्रतीतिः स्यात्। नापि गोत्वेन व्यक्तिविषयिणी। तथा सति गोत्वविशिष्टा आक्षेप्या स्यात्। तथा च गोत्वस्याक्षेप्यान्तर्गततया कथं तत् आक्षेपकं स्यात् इति चेत् — न। विशेषण-विशेष्ययोर्भेदेन विशिष्टान्तर्गतं विशेषणं स्वभिन्नस्य विशेष्यस्याक्षेपकम् इति स्वीकारेण विरोधाभावात्।

न च एतावता गोत्वेन निर्विशेषणकव्यक्तेराक्षेप इत्युक्तं भवति। तथा सति गोत्वाश्रयव्यक्तिविशेषस्य आक्षेपः कथं स्यादिति वाच्यम्। गोत्वं व्यक्त्याश्रितं जातित्वात् इत्यनुमाने पक्षधर्मताबलात् गोत्वाश्रयव्यक्तिसिद्धेः। अर्थापत्त्या वा गोत्वाश्रयव्यक्तिसिद्धिः। गां विना गोत्वमनुपपन्नम् इत्यर्थापत्त्या गोत्वाश्रयस्य सिद्धिः।

ननु व्यक्त्या विना किमनुपपन्नम्? न गोत्वं तद्बुद्धिर्वा; व्यक्तिं विनापि गोत्वस्य तद्बुद्धेश्च सिद्धेः। तथा च कथमर्थापत्तिः इति चेत् — न। व्यापकं विना व्याप्यस्यासिद्धेः। व्यापिका व्यक्तिः। व्याप्या जातिः।

अर्थापत्त्या व्यक्तिबोधेऽनुपपत्तयः

अत्रेदमालोचनीयम्[६१] — गामानयेत्यतो गोत्वविशिष्टे क्रियान्वयबोधात् तादृश-बोधं प्रति गौरित्याकारकं गोविशेष्यकज्ञानं कारणम्। विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वात्। गौरित्याकारकं गोविशेष्यकज्ञानं च गोशब्दादेव भवतीति वक्तव्यम्, न तु आक्षेपात्। आक्षेपाद्धि गोत्वं व्यक्त्याश्रितमिति बुद्धिः न तु गौः इति। अनया च बुद्ध्या व्यक्तौ क्रियान्वयोऽपि न सिध्यति। गोत्वस्य आश्रितत्वेनान्वयितया निराकाङ्क्षत्वात्। राजपुरुषमान-येत्यत्र पुरुषान्वयितया निराकाङ्क्षस्य राज्ञः यथा आनयनेऽन्वयो न संभवति तद्वत्। क्रियान्वये वा व्यक्तिमानयेति बोधः स्यात् न तु गामानयेति।

किं च गोत्वं न व्यक्तिव्याप्यम्, येन गोत्वेन व्यक्तिः आक्षिप्येत। न हि यत्र यदा वा गोत्वं तत्र तदा व्यक्तिः इति वा यत् सामान्यं सा व्यक्तिरिति वा नियमोऽस्ति। प्रलयादौ गोत्वे सत्यपि व्यक्तेरभावेन व्यभिचारात्।

नापि गोत्वं गवाश्रितं गोत्वत्वात् इत्यनुमितिः। गोत्वत्वस्य पदादनुपस्थितत्वेन तल्लिङ्गकानुमित्यसंभवात्। अपि च पक्षतावच्छेदकहेत्वोरैक्येन व्याप्तिग्रहकाल एव उद्देश्यसिद्धेः सिद्धसाधनं च।

---

[६१] त.चि. पृ. ५८४

नापि गोत्वं व्यक्त्याश्रितं जातित्वात् इत्यनुमानसंभवः। जातित्वस्य पदादनुपस्थितेः। तथा च गोपदश्रवणानन्तरं नियमतो व्यक्तिधीरनुभवसिद्धा न स्यात्। अपि च जातित्वस्य नित्यत्वे सत्यनेकसमवेतत्वरूपस्य व्यक्तिघटिततया जातिवित्तिवेद्यैव व्यक्तिः स्यात्।

ननु गोत्वमेव लिङ्गम्, तच्च पदादुपस्थितमेवेति चेन्न। तथा सति गोत्वं गवाश्रितं गोत्वादित्यनुमानम्। तथा च गोत्वं गवि वर्तते, गवाश्रितत्वं गोत्वे वर्तत इति साध्यहेत्वोः व्यधिकरणत्वेन गम्यगमकभावो न स्यात्। लिङ्गं हि व्याप्यं व्यापकं विना अनुपपन्नं सत् स्वाश्रये व्यापकमुपपादकं चावगमयति। न ह्यत्र लिङ्गगोत्वाश्रये व्यक्त्याश्रितत्वबुद्धिः इति। तस्मादाक्षेपादनुमानाद्वा न व्यक्तिबुद्धिः।

न्यायकुसुमाञ्जलौ व्यक्तेराक्षेपतो लाभ इति मीमांसकमतखण्डनप्रकारः[६२]

न्यायकुसुमाञ्जलौ द्वितीयस्तबके जातिरेव पदार्थः न व्यक्तिः इति मीमांसकमतमनूद्य, तथा सति शब्दात् व्यक्त्यलाभप्रसङ्ग इति दूषयित्वा तत आक्षेपतो व्यक्तेर्लाभ इत्याशङ्क्य विस्तरेण तद्दूषितम्। तथा हि — कोऽयमाक्षेपो नाम? न तावत् अनुमानम्। अनन्ताभिः व्यक्तिभिः सह संगतिग्रहवत् अविनाभावरूपव्याप्तिग्रहस्याप्यसंभवात्। संभवे वा तद्वदेव संगतिग्रहस्यापि संभवात् व्यक्तिशक्तिपरित्यागानौचित्यात्।

ननु जातेः कृत्स्नव्यक्तिगतव्यक्तित्वं प्रति व्याप्यत्वमिति चेत् — न। जात्यतिरिक्तस्य व्यक्तित्वाख्यसामान्यस्याभावात्, व्यक्तित्वस्य प्रतिव्यक्ति भिन्नत्वात्। व्यक्तित्वाख्यसामान्यसत्त्वेऽपि वा व्यापकीभूततदनुमितावपि व्यक्त्यनुमित्यभावाच्च। यद्वा जातिवदेव व्यक्तित्वसामान्यस्यापि वाच्यत्वमेवास्तु, किमनुमित्या? अस्थिरत्वानन्त्यरूपदोषाभावेन संगतिग्रहे बाधकाभावादिति।

नन्वर्थापत्तिराक्षेप इति चेत् — न। अर्थापत्तिस्थले उपपादकं विना किंचित् अनुपपन्नं हि सत् स्वोपपादकमाक्षिपति। यथा रात्रिभोजनं विना अनुपपन्नं दिवा अभुञ्जमानस्य पीनत्वं रात्रिभोजनमाक्षिपति। प्रकृते व्यक्तेराक्षेप इत्युक्ते उपपादकत्वेनाभिमतया आक्षेप्यया व्यक्त्या विना कोऽर्थोऽनुपपन्न इति पृच्छामः। न च जातिरेवानुपपन्नेति वाच्यम्। व्यक्तिनाशव्यक्त्यनुत्पाददशायामपि व्यक्तिं विना जातेः सत्त्वात्।

अथ एकव्यक्तिनाशतदनुत्पादसमये जातिः स्यान्नाम। व्यक्तिमात्रं विना तु जातिर्न तिष्ठतीति चेत् — न। मात्रपदार्थाभावात्। किमत्र व्यक्तिमात्रमिति

---

[६२] न्या.कु. पृ. ११३

व्यक्तिसामान्यं व्यक्तित्वमभिमतम् उत सर्वा व्यक्तयः। नाद्यः, व्यक्तित्वरूप-सामान्यस्य एवमाक्षेपेऽपि विशेषानाक्षेपस्य पूर्वमुक्तत्वात्। नान्त्यः, अनन्तानां तासां दुर्ग्रहतया आक्षेपायोगात्। गामानयेत्यादौ सर्वत्र सर्वव्यक्त्याक्षेपासंभवाच्च।

ननु न जात्या व्यक्त्याक्षेपः; किं तु व्यक्तिज्ञानं विना जातिज्ञानमनुपपन्नमिति जातिज्ञानेन व्यक्तिज्ञानमाक्षिप्यत इति चेत् — न। जातिमात्रे शक्तिरिति वादिनस्तव व्यक्तिज्ञानाभावेऽपि शब्दात् जातिज्ञानस्योत्पादात्।

ननु ज्ञानस्य व्यक्तिविषयकत्वं विना जातिविषयकत्वमनुपपन्नमिति जाति-विषयकत्वेन व्यक्तिविषयकत्वस्याक्षेप इति चेत् — तर्हि ज्ञानस्य व्यक्त्य-विषयकत्वे जातिविषयकत्वासंभवात् शब्दात् जायमानं ज्ञानं जातिव्यक्त्युभय-विषयकमेव स्वीकार्यमिति किमनुपपन्नं किं प्रतिपादयेत्। गृहीतं हि अनुपपन्नं सत् अगृहीतं प्रतिपादयेत्। उभयोश्च गृहीतत्वे आक्षेप्याक्षेपकभावायोगात्।

ननु शक्तिविशेषात् व्यक्तिग्रहणमेव आक्षेपः। शक्तिः स्वरूपसती कार्यकरी, संगतिस्तु ज्ञायमाना कार्यकरी। पूर्वा व्यक्तिविषयिणी, परा जातिविषयिणी। तथा च — यथा धूमादिलिङ्गं सामान्यतो वह्निव्याप्यं पर्वतीयवह्निनिरूपितव्याप्त्यभावेऽपि विशेषस्यैव पक्षधर्मत्वात् तद्बलात् पर्वतीयवह्न्यनुमितिं जनयति, तथा शब्दो व्यक्तिविषये संगत्यभावेऽपि स्वरूपसच्छक्तिबलात् व्यक्तिरूपविशेषमुपस्थापयतीति चेत् — उच्यते। किं जातिव्यक्त्योः प्रतीती क्रमेण भवतः उत युगपत्। नाद्यः, संगतिज्ञानरूपकारणस्य स्वरूपसच्छक्तिरूपकारणस्य च सत्त्वेन अपेक्षणीयान्तरा-भावेन च शक्तिविशेषस्य क्षणं जोषं स्थित्वा पश्चात् कार्यकरत्वायोगात्। यदि व्यक्तिज्ञानार्थं जातिज्ञानमपेक्षणीयं, तदा शब्दे किं शक्तिकल्पनया? संगतिज्ञानात् जातिज्ञानं, जातिज्ञानाच्च व्यक्तिज्ञानमित्येव सुवचतया जातिज्ञानेनैव व्यक्ति-ज्ञानस्य सिद्धेः।

अस्तु तथैवेति चेत् — न। व्यक्त्यविषयकजातिज्ञानासंभवात् न संगतेर्जाति-मात्रोपस्थापकत्वमित्युक्तत्वात्। जातिसामग्र्याः व्यक्तिसामग्रीघटितत्वनियमस्य प्रत्यक्षमात्रविषयकतया शब्दात् जातिमात्रोपस्थितिसंभवेऽपि शब्दस्य जातिज्ञान-कारणत्वं, जातेश्च व्यक्तिज्ञानकारणत्वमिति त्वन्मते जातिरूपसप्तमप्रमाण-कल्पनापत्तेः।

नन्वाक्षेपादिपक्षस्य दूषितत्वात् एकसम्बन्धिज्ञानमपरसंबन्धिस्मारकमिति रीत्या जातिज्ञानात् जायमानं व्यक्तिज्ञानं स्मरणात्मकमिति न जातेः अनुभवरूपप्रमा-करणान्तरत्वप्रसक्तिरिति चेत् — न। तथा सति अननुभूतव्यक्तिस्मरणासंभवेन

कविकाव्यादावननुभूतापूर्वार्थान्वयबोधासंभवप्रसङ्गात्। अतो न क्रमिकी जाति-व्यक्त्योः प्रतीतिः।

अस्तु तर्हि युगपत्तयोः प्रतीतिरिति चेत् तर्हि एकैव संगतिर्जातिमिव व्यक्तिमप्युपस्थापयतीति वक्तुं शक्यतया जातौ संगतिः व्यक्तौ शक्तिरिति शक्तिभेदकल्पनं मुधा। एवं च यथा सामान्यविषया शक्तिरेकैव तद्वति पर्यवस्यति, तथा सामान्याश्रया संगतिस्तद्वति पर्यवस्येत् — इति। अनेन जातिविशिष्टे संगतिरिति निरूपितं भवति।

जातिविशिष्टस्य शक्यत्वम् इति मणिकारनिरूपणम्[६३]

वयं तु ब्रूमः इत्यादिना जातिविशिष्टं पदशक्यम् इति मणिकारैः निरूपितम्। तथा हि — व्यक्तिर्यदि न पदार्थः तदा विभक्त्यर्थसंख्याकर्मत्वादेर्व्यक्तावनन्वयः स्यात्, सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति व्युत्पत्तेः। न च प्रकृतितात्पर्यविषयार्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्त्यर्थ इति वाच्यम्। तथा सति लक्षणोच्छेदापत्तेः। गङ्गायां घोष इत्यत्र सप्तम्यर्थाधेयत्वान्वयाय प्रकृत्यर्थत्वं तीरस्य संपादयितुं हि गङ्गापदस्य तीरे लक्षणा आश्रीयते। प्रकृतितात्पर्य-विषयार्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तौ तु तीरस्य प्रकृतितात्पर्य-विषयत्वात् तत्राधेयत्वान्वयोपपत्तौ लक्षणास्वीकारो व्यर्थः। न चैतावन्मात्रेण न लक्षणोच्छेदः, तात्पर्यनिर्वाहार्थमेव लक्षणाकल्पनादिति वाच्यम्। एवमपि प्रकृत्यर्थत्वस्थाने प्रकृतितात्पर्यविषयत्वनिवेशे गौरवात्।

नन्वाख्यातार्थसंख्या आक्षिप्ते कर्तर्यन्वेति, तथा आक्षिप्तायां व्यक्तौ सुबर्थान्वयः इति चेत् — न। आख्यातार्थसंख्यायाः प्रथमान्तार्थेऽन्वयात् नाक्षिप्तकर्तर्यन्वयः। पदान्तरादुपस्थितत्वमात्रेण आक्षिप्तत्वव्यवहारः। अत एव न व्यक्तेराक्षेपः, अपि तु गोपदाल्लक्षणया गोव्यक्तिधीरिति मण्डनः। यदाह —

> जातावस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति।
> नित्यत्वाल्लक्ष्यमाणायाः व्यक्तेस्ते हि विशेषणे। इति।

उच्यते। शक्यार्थादन्येन रूपेण ज्ञाते भवति लक्षणा। यथा गङ्गापदशक्यादन्येन रूपेण तीरत्वेन ज्ञाते गङ्गापदस्य लक्षणा। न चेह गोपदे गोत्वादन्येन रूपेण व्यक्तेः ज्ञानम्, किं तु गोत्वेनैव। व्यक्तित्वेन सास्नादिमत्त्वेन च लक्ष्यत्वे गोपदात् व्यक्तित्वादिरूपेणैव धीः स्यात् न तु गौरिति।

---

[६३] त.चि. पृ. ५८६

ननु "स्वार्थादन्येन रूपेण" इत्यप्रमाणकम्। तथा च गोत्वेनैव व्यक्तेर्लक्ष्यत्वम्। गोत्वविशिष्टव्यक्तौ लक्षणेति यावत्। शक्यगोत्वसंबन्धस्य गोत्वविशिष्टे सद्भावात् इति चेत् – न। गोत्वे हि न साक्षादानयनान्वय इति व्यक्तिविशेषणतया तदन्वयेऽमुख्यत्वं स्यात्। लक्षणयापि गोत्वविशिष्टैव व्यक्तिः क्रियान्वयिनी प्रतीयत इति गोत्वविशिष्टे लक्षणास्वीकारे गोत्वेऽपि लक्षणा स्यात्। तथा च युगपत् वृत्तिद्वयविरोधः प्रसजति। एकदा एकस्मिन् वृत्तिद्वयं न संभवतीति तदर्थः। तथा च गोत्वे शक्तिः गोत्वविशिष्टे लक्षणेति स्वीकारे गोत्वे शक्तिर्लक्षणा चेति वृत्तिद्वयमङ्गीकार्यं स्यात्। एतत्परिहाराय गोत्वेऽपि शक्तिं परित्यज्य लक्षणा-स्वीकरणमेव वरम्। न च तदपि संभवति। शक्यसंबन्धाभावात्।

अपि च जातिमात्रे न शक्तिः न वा व्यक्तौ लक्षणा। जातिमात्रे व्यक्तिमात्रे वा मुख्यप्रयोगाभावात्। शक्तिलक्षणयोर्मुख्यप्रयोगमूलकत्वात्। प्रयोगो हि प्रवृत्त्यादि-व्यवहारहेतुभूतज्ञानोत्पादनार्थः। न च जातिमात्रनिर्विकल्पात् व्यक्तिमनादाय केवलजातौ व्यवहारः। व्यवहारस्य विशिष्टज्ञानसाध्यत्वात्। न च गां पश्य गौरस्तीत्यादौ जातौ मुख्यप्रयोगोऽस्तीति वाच्यम्। तत्रापि गोत्वविशिष्टस्यैव ज्ञानं व्यवहारश्च।

तस्मात् जातिव्यक्त्योः नियमेन एकवित्तिवेद्यत्वात् व्यवहारस्य च जाति-विशिष्टव्यक्तिविषयकत्वात् जातिविशिष्टव्यक्तिः शक्येत्येव युक्तम्।

न च तृतीयाविभक्तेः करणत्वैकत्वयोरिव गोपदस्य गवि गोत्वे च शक्तिरस्तु, विशिष्टे सा मास्तु इति वाच्यम्। तथा सति गोत्वं गोव्यक्तिश्चेति बोधः स्यात्, न तु गौरिति।

न च तृतीयार्थकरणत्वैकत्वयोरन्वयस्यान्यलभ्यत्वात् न शक्यता, तथा गोगोत्वयोर्वैशिष्ट्यस्यान्यलभ्यत्वात् न तत्र शक्तिरिति वाच्यम्। अन्वयो हि स्मर्य-माणपदार्थयोर्योग्यतादिबललभ्यः। न च गोगोत्वयोरन्वयस्तथा। निर्विकल्पकोप-स्थितिविषययोस्तयोर्योग्यतादिप्रतिसन्धानासंभवात्। अन्वयितावच्छेदकरूपेणोप-स्थितयोरेव परस्परमन्वयसंभवाच्च। तस्मात् गोपदस्य गोत्वविशिष्टव्यक्तौ शक्तिः। शक्यता च गोः गोत्वस्य वैशिष्ट्यस्येति त्रयाणामपि। वैशिष्ट्यं च समवायरूपः संबन्धो वा, ज्ञातो घट इत्यत्रेव विशेषणताविशेषो वा अतिरिक्तं वेत्यन्यदेतत्।

"एवं गोत्वादिजातिविशेषवदवयवसंयोगरूपा आकृतिरपि गोपदशक्या, गोपदात् जात्याकृतिविशिष्टस्यैवानुभवात्" इति मणिग्रन्थः।

एवं च गवादिपदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिः। जात्याकृतिव्यक्तीनां प्रत्येकमात्रपरत्वे लक्षणैव। प्रत्येकस्य शक्यात् विशिष्टादन्यत्वात्। अत एव

पिष्टकमय्यो गाव इत्यत्र गोशब्दस्य गवाकृतिसदृशाकृतौ लक्षणा। तत्र गोत्व-जातिविरहात्। यथा गुरुमते कार्यत्वविशिष्टशक्ताया लिङः लोके कार्यत्वपरत्वेन कार्यत्वे लक्षणा तद्वत्।

अत एव "व्यक्त्याकृतिजातयस्तु पदार्थः" इति पारमर्षसूत्रम्। तत्रैकवचनम् एकयैव शक्त्या तिसृणामेकवित्तिवेद्यत्वसूचनाय। प्रत्येकवाच्यत्वे तु पदार्था इति बहुवचनं स्यात् – इति मणिकारप्रदर्शितः पन्थाः।

शक्तिवादे भट्टाचार्यप्रदर्शितः पन्थाः

शक्तिवादे परिशिष्टकाण्डे गदाधरभट्टाचार्याः मणिरीत्यैव एवं निरूपयन्ति-गवादिशब्दात् संस्थानरूपाकृतेरपि बोधस्य आनुभविकतया गोत्वादिजातिवत् आकृतिरपि गोशब्दवाच्ये विशेषणम्। तस्याश्च वाच्यविशेषणत्वेऽपि न प्रवृत्ति-निमित्तत्वम् (शक्यतावच्छेदकत्वम्) साक्षात्संबन्धेन वाच्यवृत्तित्वाभावात्। अवयवसंयोगरूपायास्तस्याः स्वसमवायिसमवेतत्वसंबन्धेनैव गवादिवृत्तित्वात्।

अत्र शक्त्या जात्याकृत्योः एकतरविनिर्मोकेणापरभानविरहात् लाघवाच्च जात्याकृत्युभयविशिष्टे गवादिपदस्य एकैव शक्तिः स्वीक्रियते।

न च शक्यविशेषणभेदात् शक्तिभेदः इति वाच्यम्। तद्भेदेऽपि पुष्पवन्तादि-पदवत् धेन्वादिपदवच्च शक्त्यैक्यस्य संभवात्। एकविशिष्टापरावच्छिन्ने शक्तिरिति तु न सत्। विशेष्यविशेषणभावे विनिगमनाविरहेण जातिविशिष्टाकृतिविशिष्टे आकृतिविशिष्टजातिविशिष्टे च शक्तिप्रसङ्गात्, तदपेक्षया उभयविशिष्टे शक्तौ लाघवात्। गवाद्यंशे साक्षात् जात्याकृत्युभयप्रकारकबोधस्यानुभवसिद्धत्वाच्च। यत्र केवलाकृतिविशिष्टे गवादिपदतात्पर्यं यथा पिष्टकमय्यो गाव इत्यादौ, तत्र केवला-कृतिविशिष्टे गोपदस्य लक्षणा। जात्याकृतिविशिष्टायां व्यक्तौ शक्तेरैक्यं "जात्या-कृतिव्यक्तयस्तु पदार्थः" इति न्यायसूत्रे बहुवचनमुपेक्ष्य पदार्थ इत्येकवचनान्तं निर्दिष्टवतो महर्षेरप्यनुमतम्।

शक्तिवादे अनूदितं मीमांसकमतम्

मीमांसकास्तु — गवादिपदानां जातिरेव वाच्या न तु व्यक्तिराकृतिर्वा। व्यक्तौ शक्तिरिति मतेऽपि स्वरूपतः किंचिदप्रकारेण व्यक्तेः ग्रहासंभवेन शक्तिज्ञाने व्यक्त्यंशे प्रकारीभूतायां जातौ शक्तेः शक्यतावच्छेदकतायाः वा अवश्यकल्प-नीयतया व्यक्तावपि तत्कल्पनायां गौरवात् प्रयोजनविरहाच्च।

न च जातिशक्तिमते इव व्यक्तिशक्तिमतेऽपि गोत्वादिजातयः शक्तौ तज्ज्ञाने चोपलक्षणतया भासमानाः शाब्दबोधे भासन्त इति न तत्र शक्यत्वम् इति वाच्यम्। जातेरुपलक्षणत्वासंभवात्। गवादिपदानां गोत्वाद्युपलक्षिते शक्तत्वे द्रव्यत्वाद्युपलक्षितेऽपि शक्तत्वेन गवादिपदेभ्यः द्रव्यत्वाद्यवच्छिन्नस्य अभ्रान्तानामपि शाब्दबोधापत्तेः।

यथा व्यक्तिशक्तिमते जात्यंशे शक्यता शक्यतावच्छेदकता वा तद्विशेषणेनानवच्छिन्ना तथा जातिशक्तिमतेऽपि जातिनिष्ठा शक्यता किंचिदनवच्छिन्नेति न गोत्वत्वादिप्रवेशप्रयुक्तगौरवशङ्का। न हि जातिशक्तिमतेऽपि जातिः शाब्दबोधे किंचिद्धर्मप्रकारेण भासते, येन प्रकारलाभार्थं प्रकारविशेषमन्तर्भाव्य शक्तिः कल्पनीया स्यात्, अपि तु स्वरूपत एव।

अथ जातिशक्तिवादे "गोत्वं गोपदशक्यम्" इत्याकारकः शक्तिग्रहः गोत्वत्वधर्मितावच्छेदककः इति वक्तव्यम्। तस्य निर्धर्मितावच्छेदककत्वे "गोत्वं गोपदशक्यत्वाभाववत्" इत्याकारकगोत्वत्वधर्मितावच्छेदककविपरीतनिश्चयकालेऽपि संभवात्। गोत्वप्रकारकशाब्दबोधापत्तिः। समानधर्मितावच्छेदककज्ञानयोरेव प्रतिबध्यप्रतिबन्धकभावात् किंचिद्धर्मावच्छिन्नविशेष्यकतदभाववत्ताज्ञानस्य किंचिद्धर्मानवच्छिन्नविशेष्यकतद्वत्ताबुद्धावप्रतिबन्धकत्वात्। न च विपरीतज्ञानमपि निर्धर्मितावच्छेदककमिति वाच्यम्। अभावबुद्धेरनुयोगितावच्छेदकावच्छिन्नानुयोगिकत्वनियमादिति स्पष्टं पञ्चलक्षण्यादौ। तथा च गोत्वत्वस्य शक्तिग्रहे धर्मितावच्छेदकतया भाने गोत्वत्वस्य शक्यतावच्छेदकत्वं दुर्वारम्। यत् यद्धर्मावच्छिन्ने यत् अवगाहते तत् असति बाधके तत्र धर्मे तदवच्छेदकत्वमवगाहते, अधिकरणतादिग्रहवत् इति नियमात्। ततश्च सकलगोव्यक्तीनां शक्यतावच्छेदकशरीरे प्रवेशात् गौरवम्।

अवच्छेदकत्वांशे भ्रमत्वं स्वीकृत्य गोत्वत्वस्य शक्यतानवच्छेदकत्वमित्युक्तावपि गोत्वापेक्षया गवेतरत्वादिघटितस्य गोत्वत्वस्य गुरुशरीरत्वात् गुरुशरीरगोत्वत्वादेः शक्तिज्ञाननिष्ठकारणतायां धर्मितावच्छेदकतात्मकविषयतानिवेशात् गौरवं दुर्वारमेव। व्यक्तिशक्तिवादे तु नायं दोषः, स्वरूपतो गोत्वनिष्ठधर्मितावच्छेदकताकस्य "गौर्गोपदशक्या" इत्याकारकस्य शक्तिज्ञानस्यैव कारणत्वादिति चेत् — न।

जातिशक्तिमते पदविशेषणतापन्नशक्तौ निरूपितत्वसंबन्धेन स्वरूपतो गोत्वप्रकारकस्य "गोपदं गोत्वे शक्तम्" इत्याकारकस्य वा, पदे शक्तिसंबन्धेन स्वरूपतो गोत्वप्रकारकस्य गोपदं गोत्ववत्" इत्याकारकस्य वा शक्तिज्ञानस्य

शाब्दबोधहेतुत्वाङ्गीकारात्। तथा च कारणतावच्छेदककोटौ गोत्वत्वविषयतायाः अप्रवेशात् लाघवमेव। न हि समवायसंबन्धेनैव जातेः स्वरूपतः प्रकारता नान्यसंबन्धेनेति नियमोऽस्ति। "घटमहं जानामि" इत्याकारके प्रकारित्व-संबन्धावच्छिन्नघटत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नज्ञाननिष्ठप्रकारतानिरूपितात्मनिष्ठविशेष्यताकेऽनुव्यवसायात्मकमानसप्रत्यक्षे प्रकारितासंबन्धेन घटत्वस्य स्वरूपतः ज्ञानांशे प्रकारत्वोपगमात्।

न च समवायेन धर्मिविशेषणतापन्नस्यैवान्यत्र घटत्वादेः संबन्धान्तरेण स्वरूपतः प्रकारत्वम् इति नियमात् घटं जानामीत्यनुव्यवसाये समवायेन घटविशेषणतापन्नस्य घटत्वस्य ज्ञाने प्रकारितासंबन्धेन स्वरूपतः प्रकारत्वं युज्यते "गोपदं गोत्वे शक्तम्" इत्यत्र ज्ञाने तु गोविशेषणतानापन्नस्य गोत्वस्य अन्यत्र शक्तौ निरूपितत्वसंबन्धेन स्वरूपतः प्रकारत्वं स्वीकृतमिति उक्तनियमभङ्गा-पत्तिरिति वाच्यम्। परतः प्रामाण्यग्रहवादिमते अयं घट इत्याकारकस्वरूपतो घटत्वप्रकारकज्ञानविषयकानुव्यवसाये "घटमहं जानामि" इत्याकारके प्रकारि-तायां निरूपितत्वसंबन्धेन वा, ज्ञाने प्रकारितासंबन्धेन वा घटविशेषणतानापन्न-घटत्वस्य स्वरूपतो भानाङ्गीकारेण तादृशनियमस्य अप्रामाणिकत्वात्।

प्रामाण्यस्य स्वतोग्राह्यत्वमते अयं घटः इत्याकारकज्ञानस्यैव प्रामाण्याव-गाहितया तदुत्तरं तैः प्रामाण्यसंशयानङ्गीकारेणानुव्यवसाये घटत्वादिविशिष्ट-घटादिरेव भासते। तदाकारोऽपि घटं जानामीत्यादिः। अतः समवायेन धर्मिविशेषणतापन्नघटत्वादेः प्रकारितायां भानम् इत्यतः परतोग्राह्यत्वमते इत्युक्तम्। तन्मतेऽनुव्यसाये प्रकारितायां निरूपितत्वसंबन्धेन, प्रकारितासंबन्धे वा ज्ञाने घटत्वादेः भानमावश्यकम्, न तु घटत्वविशिष्टघटादेः। अन्यथा तदुत्तरं 'इदं ज्ञानं घटे घटत्वप्रकारकं न वा, घटत्वाभाववति घटत्वप्रकारकं न वा' इति संशयानुपपत्तेः। अस्तु वा प्रकृतेऽपि गवादिविशेषणतापन्नस्यैव गोत्वादेः शक्तौ निरूपितत्वसंबन्धेन, पदे वा शक्तत्वसंबन्धेन स्वरूपतः प्रकारता। गवादेश्च शक्तौ पदे वा स्वसमवेतनिरूपितत्वस्वसमवेतवाचकत्वरूपपरंपरासंबन्धेन प्रकारता। शक्तिज्ञानं च "स्वसमेवतनिरूपितत्वसंबन्धेन गोमच्छक्तिमत्पदम्" इत्याकारकम्, "स्वसमवेतनिरूपितशक्तिसंबन्धेन गोमत् पदम्" इत्याकारकं वा। तादृश-शक्तिज्ञानीया गवादिविषयता च न शाब्दबोधजनकतावच्छेदिका। परंपरासंबन्धेन प्रकारताया जनकतावच्छेदकत्वापेक्षया साक्षात्संबन्धावच्छिन्नप्रकारतायाः जनकता-वच्छेदकत्वे लाघवात्। तथा च व्यक्तौ शक्तिर्न सिध्यति।

जातिशक्तिवादेऽपि व्यक्तिशक्तेरत्याज्यत्वम्

अथ जातिशक्तिमतेऽपि शाब्दबोधे व्यक्तिभानमावश्यकम्। अन्यथा गौर्नष्टा, गौर्जाता, गामनयेत्यादौ समभिव्याहृतपदार्थनाशाद्यन्वयस्य जातौ बाधात्। स्वाश्रयाश्रितत्वरूपपरंपरासंबन्धेन जातौ समभिव्याहृतपदार्थान्वयस्वीकारेऽपि अन्वयितावच्छेदकतया गोत्वत्वादिभानापत्तेः। न हि स्वरूपेण पदार्थस्य पदार्थान्तरान्वयान्वयितया भानं कैश्चित् स्वीक्रियते। जातेः स्वरूपत उपस्थितायाः प्रकारतया भानसंभवेऽपि पदार्थान्तरान्वयविशेष्यतया भानं न संभवति। निर्धर्मितावच्छेदककशाब्दबोधस्य प्रवृत्त्याद्यनुपयोगितया तत्स्वीकारासंभवात्।

अपि च जातौ परंपरासंबन्धेन समभिव्याहृतपदार्थान्वयोपगमे उक्तरीत्या गोत्वत्वेन गोत्वस्य शाब्दबोधे भानस्य वक्तव्यतया शक्तावपि गोत्वत्वान्तर्भावापत्तिः। गोत्वत्वस्य शक्तावप्रवेशे शक्तिज्ञानेन गोत्वत्वानुपस्थितौ गोत्वत्वेन रूपेण गोत्वस्य शाब्दबोधानुपपत्तेः। प्रकारान्तरेण गोत्वत्वाद्युपस्थितेः शाब्दबोधहेतुत्वे जातित्वादिना गोत्वाद्युपस्थितिकालेऽपि गौर्नष्टेत्यादिवाक्यात् जातिर्नष्टेत्यादिशाब्दबोधापत्तिः।

एवं च जातिमात्रवाचकत्वेनाभ्युपगतपदस्यापि व्यक्तिबोधजनकतायामविवादात् व्यक्तिशक्तिरत्याज्यैव।[६४] यत्पदं शक्तिभ्रमं लक्षणाग्रहं च विना इतरपदानुपस्थाप्यदर्थान्वयबोधजनकं तत् तदर्थशक्तमिति व्याप्तेः। तादृशव्याप्त्यनङ्गीकारे जातावपि शक्तिर्न सिध्येत्, साधकान्तराभावात्।

एवं शक्तेरीश्वरसंकेतरूपत्वे व्यक्तिबोधजनकत्वस्य पदेऽबाधितत्वेन ईश्वरेच्छायाः विद्यमानसर्वविषयकतया पदनिष्ठव्यक्तिबोधकत्वविषयकत्वमावश्यकमिति व्यक्तेः शक्यत्वं दुरपह्नवम्। ईश्वरेच्छया पदे यद्बोधकत्वं विषयीक्रियते तस्यैव शक्यत्वमिति नियमात्।

एवं ज्ञाने पदानां शक्तिरिति मतेऽपि तद्विषयकज्ञानसमर्थपदमेव तच्छक्तमित्यङ्गीकारात् व्यक्तिज्ञानसमर्थपदस्य व्यक्तिशक्तत्वमवर्ज्यं जातिशक्तत्ववत्। व्यक्तेः शक्यत्वं शक्तिनिरूपकज्ञानविषयत्वात् जातिवत् इति चेत् —

व्यक्तिशक्तावस्माकं नास्ति वैमत्यम्। अपि तु व्यक्तिज्ञानत्वेन व्यक्तिशाब्दबोधहेतुतायामेव वैमत्यम्। एतदुक्तं भवति पदानां व्यक्तौ जातौ च शक्तिः। व्यक्तौ स्वरूपसती शक्तिः बोधोपयोगिनी, जातौ तु ज्ञायमाना। अत एव कुब्जा

---

[६४] श.वा. पृ. १७७

शक्तिरिति गीयते। कुब्जत्वं वाच्यत्वव्यहारानियामकत्वम्। न हि शक्तिनिरूपक-ज्ञानविषयत्वमात्रेण वाच्यता, तादृशज्ञानेऽन्वयस्यापि विषयतया तस्य वाच्यता-पत्तेः। किं तु शक्तिज्ञानस्य तद्विषयकत्वेन तद्विषयकशाब्दधीजनकत्वं तत्त्वमेव वाच्यताव्यवहारनियामकम्। कुब्जशक्तिमते गोपदं गोत्वज्ञानशक्तम् इत्या-कारकस्यैव शक्तिज्ञानस्य स्वीकारात् तस्य च गोत्वविषयकत्वेन रूपेण गोत्वशाब्दबोधं प्रति कारणत्वात् गोत्वस्य वाच्यत्वम्। अन्वयांशे कुब्जशक्ति-सत्त्वेऽपि यथा अन्वयविषयकत्वं शक्तिज्ञानजनकतायां नावच्छेदकमिति न तस्य वाच्यत्वव्यवहारः, तथा व्यक्त्यंशे कुब्जशक्तिसत्त्वेऽपि व्यक्तिविषयकत्वस्य शक्तिज्ञाननिष्ठजनकतायामनवच्छेदकत्वात् न व्यक्तौ वाच्यत्वव्यवहारः।

ननु गोत्वविषयकशाब्दत्वावच्छिन्नं प्रति गोत्वविषयकज्ञानजनकशक्तिज्ञानत्वेन कारणत्वे कारणत्वग्रहात् पूर्वं शक्तौ तादृशकारणत्वग्रहो दुर्घटः, तद्घटित-कारणतावच्छेदकाग्रहे कारणत्वग्रहोऽपि दुर्घट इत्यन्योन्याश्रय इति चेत् —

तर्हि यद्विषयकत्वविशिष्टज्ञानविषयकत्वेन शक्तिज्ञानस्य शाब्दधीजनकता, यद्विषयकत्वेन वा शाब्दधियः शक्तिज्ञानजन्यता तत्त्वमेव वाच्यताव्यवहार-नियामकम्। तथा च शक्तिज्ञानत्वावच्छिन्नजनकतानिरूपितशाब्दत्वावच्छिन्नजन्य-तानिरूपितविषयत्वनिष्ठावच्छेदकताकावच्छेदकतापर्याप्त्यधिकरणं वाच्यताव्यवहार-नियामकमिति पर्यवसितम्।

कुब्जशक्तिवादखण्डनम्

अयं च कुब्जशक्तिवादः न विचारसहः। सर्वलाक्षणिकस्थलेऽपि अन्वयबोधस्य आनुभविकत्वेन लाक्षणिकस्याप्यनुभावकत्वस्यावश्यकतया तत्र लक्ष्यार्थे कुब्ज-शक्तिप्रसङ्गात्। अतो नानुभवजननसामर्थ्यम् ईश्वरसंकेतो वा वृत्तिरूपा शक्तिः, अपि तु पदार्थान्तरमेव। सा च जातावेव कल्प्यते न तु व्यक्त्यादाविति न तत्र कुब्जशक्तिरपीति तत्त्वम्।

अथ व्यक्तेर्गवादिपदावाच्यत्वे गवादिपदात् व्यक्तेः स्मरणमनुभवश्च न स्यात्। न च पदावाच्यस्याप्यन्वयस्येव व्यक्तेः शाब्दबोधे भानं नानुपपन्नमिति वाच्यम्। तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मप्रकारकपदार्थस्मृतेः हेतुतया गोत्वप्रकारक-शाब्दबोधे गोत्वप्रकारकस्मरणस्यापेक्षिततया संबन्धग्रहाविषयत्वात् व्यक्तेः स्मरणाभावे सति व्यक्तेः शाब्दानुभवविषयतायाः दुरुपपादत्वात्। अन्वयस्य संसर्गविधयैव शाब्दबोधे भानात् शाब्दधियः अन्वयांशे निष्प्रकारकतया तदुप-स्थित्यनपेक्षणेन वाच्यत्वानुपयोगात् इति चेत् —

अत्र भाट्टाः — पदान्न व्यक्तेः स्मरणमनुभवो वा। किं त्वाक्षेपादेव व्यक्तिधीः। आक्षेपिका च जातिरेव। आक्षेपश्च अनुमानमर्थापत्तिर्वा। अर्थापत्तिश्चानुपपद्यमानत्वज्ञानम्। अनुपपद्यमानत्वं च तदभावप्रयोज्यसत्त्वाभाववत्त्वम्। एतच्च तन्मते प्रमाणान्तरम्। यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाधिकरणकभोजनकर्तृत्वाभाववान् पीनो देवदत्त इति प्रथमं शाब्दबोधः। पश्चात् दिवाभोजनाभाववतो देवदत्तस्य रात्रिभोजनं विना पीनत्वमनुपपन्नमिति अर्थापत्तिप्रमाणात् रात्रिभोजनवान् पीनो देवदत्त इति अर्थापत्तिप्रमा जायत इति भट्टानुयायिनः।

केचित्तु — तादृशशाब्दबोधानन्तरं तादृशदेवदत्तो रात्रिभोजनकर्तेति औपादानिको बोधो जायते। शाब्दसामग्रीसहकारेण अनुपपत्तिज्ञानात् यत् ज्ञानं जायते स एव औपादानिको बोध इति वदन्ति।

न च जातिव्यक्त्योरेकाधिकरणवृत्तित्वाभावात् कथं जात्या व्यक्त्याक्षेपः, आक्षेप्यसमानाधिकरणस्यैव आक्षेपकत्वात् इति वाच्यम्। तादात्म्यसंबन्धेन जातेः आधेयतासंबन्धेन व्यक्त्याक्षेपकत्वे विरोधाभावात्। आधेयतासंबन्धेन व्यक्तिः जातावस्ति, जातौ जातिस्तादात्म्येन संबद्धेति द्वयोः सामानाधिकरण्यम्। एकाधिकरणसंबद्धत्वमेव च सामानाधिकरण्यम्। तथा च गोत्वं गवाश्रितं गोत्वात् जातेर्वा, यन्नैवं तन्नैवम् इत्यनुमानम्। व्यक्त्याश्रितत्वं विना जातिर्नोपपद्यत इत्यर्थापत्तिः।

वस्तुतस्तु — गामानयेत्यादौ स्वाश्रयवृत्तित्वरूपपरम्परासंबन्धेन आनयनकर्मत्वादौ गोत्वादिजातेरन्वयः शाब्दः। तदनन्तरं आनयनकर्मत्वे स्वाश्रयवृत्तित्वसंबन्धेन गोत्ववत्त्वं आधेयत्वसंबन्धेन गोमत्त्वविरहेऽनुपपन्नमिति ज्ञानम्। ततः आनयनकर्मत्वे आधेयतासंबन्धेन गोव्यक्तिप्रकारिका धीः। यद्यप्याक्षेपात् प्रागेव परंपरासंबन्धघटकतया शाब्दबोधे व्यक्तिर्भासते, तथापि कर्मत्वांशे गोत्वावच्छिन्नव्यक्तेः प्रकारतया भाननिर्वाहाय आक्षेपस्य आदरः।

गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगितानवच्छेदकधर्मत्वात्, किंचिदाश्रितं वा जातित्वात् इत्यनुमानतो व्यक्तिलाभस्तु न सार्वत्रिकः। तादृशहेतूपस्थितेरसार्वत्रिकत्वात्। गवादिपदात् तादृशरूपेण गोत्वादेः अनुपस्थितेः।

अथ गवादिपदात् व्यक्तेः अस्मरणे गोत्वादिस्मरणमेव कथमुपपद्यते? किं गवादिपदात् गोत्वप्रकारकस्मरणम्? उत गोत्वविशेष्यकस्मरणम्? आद्ये व्यक्तेर्विशेष्यतया भानमावश्यकम्। द्वितीये च गोत्वत्वस्य प्रकारतया भानमावश्यकमिति गोत्वत्वघटकतया गोव्यक्तिभानमवर्जनीयम्। गोत्वत्वं हि

गवेतरावृत्तित्वे सति निखिलगोवृत्तित्वम्। न च व्यक्त्यघटितजातित्वादि प्रकारेण गोत्वस्मरणमिति वाच्यम्। स्वरूपत एव जातेः शक्यतया तेन प्रकारेण स्मरणासंभवात्। संभवे वा गोत्वांशे निष्प्रकारकशाब्दज्ञानानुपपत्तेः तादृश-स्मरणस्यानुपयोगित्वात् इति चेत् —

न। गवादिपदात् आलोचनरूपस्य निर्विशेष्यकस्य निष्प्रकारकस्य च गोत्वादि-स्मरणस्योपगमात् — इति वदन्ति।

भट्टमतनिरासः

तदसत्। गवादिपदात् स्वरूपतो गोत्वादिज्ञाने ततो व्यक्त्याक्षेपासंभवात्। व्याप्यतावच्छेदकप्रकारकव्याप्यज्ञानस्यैव व्यापकाक्षेपकत्वात्। न च स्वाश्रय-निष्ठत्वसंबन्धेन शाब्दधीविषयभूतेन गोत्वविशिष्टकर्मताकत्वेन हेतुना आनयनादौ गोविशिष्टकर्मताकत्वमनुमेयमिति वाच्यम्। विशिष्टसाध्यस्य गोविशिष्टकर्मताव-कत्वस्य ग्राहकाभावेन अनुमितेः पूर्वमग्रहात् साध्यव्याप्तेर्ग्रहीतुमशक्यत्वात्। एवं गौरानीयतामित्यादौ गोपदात् स्वरूपतो गोत्वोपस्थितौ तस्य च शाब्दबोधे विशेष्यतया भानोपगमे निर्धर्मितावच्छेदककशाब्दस्वीकारापत्तिः। न चेष्टापत्तिः, जातेर्यत्र विशेष्यतया भानं तत्र किंचिद्रूपेणैव भानमिति नियमात्।

एवं गौरानीयतामित्यादिवाक्यश्रवणानन्तरं गवादावानयनकर्मत्वज्ञानमावश्य-कम्, अन्यथा आनयनकर्मत्वादिना गवादौ प्रवृत्त्यनुपपत्तेः। तच्च ज्ञानमानुमानिकं भवन्मते। गौः आनयनकर्मत्ववती स्वाश्रयवृत्तित्वसंबन्धेन आनयनकर्मत्व-विशिष्टगोत्वात् इत्यनुमानं वक्तव्यम्। तच्च न संभवति, पक्षे साध्यसंदेहदशायां स्वाश्रयवृत्तित्वसंबन्धेन आनयनकर्मत्वविशिष्टगोत्वरूपहेतुनिश्चयासंभवात्। अविशे-षितगोत्वस्य तु हेतुत्वं न संभवति, तस्य आनयनकर्मत्वरूंपसाध्यशून्यगोवृत्तित्वेन व्यभिचारित्वात्। अतो व्यक्तेः शाब्दबोधे एव विशेष्यविधया भानमावश्यकम्। न तु व्यक्तेः आक्षेपः अनुमितिर्वा।

एतेन जातिवाचकपदात् जातिबोधः शाब्दः, व्यक्तिबोधस्त्वौपादानिक इति श्रीकरमतमप्यपास्तम्। उपादानस्यार्थापत्तिरूपत्वेन भट्टमताविशेषात्।

न च जातिरेव व्यक्तिबोधिका, व्यक्तिबोधस्य जातिकरणकत्वमेव औपादा-निकत्वमिति वाच्यम्। जातेः सप्तमप्रमाणत्वापत्तेः। तदपेक्षया व्यक्तिशक्तिकल्पनाया एवोचितत्वात्।

एवं जातेर्नित्यतया सर्वदैव तदुपादानकव्यक्तिबोधवारणाय जातिहेतुकव्यक्तिबोधे जातिशक्तिज्ञानघटितजातिशाब्दसामग्र्याः सहकारित्वमावश्यकमिति तादृशसामग्र्या एव व्यक्तिज्ञानप्रयोजकत्वसंभवेन जातेः करणत्वकल्पनं व्यर्थम्।

न च जातिनिरपेक्षाया जातिभासकसामग्र्याः व्यक्तिज्ञानप्रयोजकत्वे व्यक्त्यंशेऽपि शाब्दत्वमावश्यकम्; तथा सति च वृत्तिज्ञानजन्यव्यक्तिस्मृतेरप्यपेक्षा स्यात्; जातेः व्यक्तिधीकरणत्वे तु व्यक्त्यंशे औपादानिकत्वमेव, न तु शाब्दत्वमिति न वृत्तिज्ञानजन्यव्यक्तिस्मृत्यपेक्षेति वाच्यम्। व्यक्तिज्ञानांशे जातेः करणत्वे व्यक्त्यंशे अशाब्दत्वोपगमसंभवे जातेरकरणत्वेऽपि तत्संभवात्। वृत्तिज्ञानजन्यस्मृत्यभावेनैव अशाब्दत्वसंभवात्। न च जातेरकरणत्वे बोधे व्यक्तिभानं किंप्रयोज्यमिति वाच्यम्। न किंचित्प्रयोज्यम्। तावतापि क्षतिविरहात्। एतदुक्तं भवति- श्रीकरादिमतेऽपि मातृविषयकत्वस्य वृत्तिज्ञानादिप्रयोज्यत्वाभावेऽपि घटादि-शाब्दबोधे तादृशशाब्दसामग्रीप्रयोज्यमितिमातृविषयकत्ववत् व्यक्तिविषयकत्वस्य वृत्तिज्ञानजन्यतानवच्छेदकत्वेऽपि तादृशसामग्र्या एव तत्प्रयोजकत्वसंभवात्।

शक्तिवादे मण्डनमतम्

व्यक्तेरपि बोधः शब्दादेव, न त्वाक्षेपादितः। व्यक्तिशाब्दबोधे व्यक्तौ शक्त्यभावो नानुपपत्तिं प्रयोजयति। शक्त्यभावेऽपि लक्षणात एव व्यक्तिबोधसंभवात् इति मण्डनमिश्रमतम्। तदुक्तम् —

जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति।
नित्यत्वाल्लक्ष्यमाणायाः व्यक्तेस्ते हि विशेषणे।

इति। अस्तित्वनास्तित्वे = उत्पादविनाशौ। गौरुत्पद्यते, गौर्नश्यति इत्यादितः उत्पत्त्याश्रयत्वविनाशप्रतियोगित्वादिना व्यक्तिरेव विवक्ष्यते, गोत्वादौ तद्बाधात्। अतो व्यक्तिबोध आवश्यकः। स च लक्षणयैवेति भावः।

लक्षणा च जातिप्रकारेणैव व्यक्तिं बोधयति न तु व्यक्तित्वादिनेति नानुभव-विरोधः। नीलादिपदस्य शक्यनीलादिगुणपुरस्कारेण लक्षणया गुणिबोधकत्ववत् शक्यगोत्वादिजातिपुरस्कारेण लक्षणया गवादिपदस्य व्यक्तिबोधकत्वेऽविरोधात्। न च "स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा" इत्युक्तत्वात् स्वार्थात् स्वशक्यात् अन्येन तीरत्वादिना बोधे लक्षणा भवति। प्रकृते तु शक्येन गोत्वादिनैव व्यक्तिबोधात् कथं व्यक्तौ लक्षणेति वाच्यम्। तत्र स्वार्थपदस्य शक्यता-वच्छेदकार्थकत्वात्। तथा च शक्यतावच्छेदकादन्येन रूपेण ज्ञाते लक्षणा भवति। जातिशक्तिवादे जातिः शक्या, न शक्यतावच्छेदिका। ततश्च शक्यतावच्छेदका-दन्येन रूपेण गोत्वजात्या ज्ञातायां व्यक्तौ लक्षणास्वीकारे न कापि क्षतिः।

व्यक्तिलक्षणामतेऽनुपपत्तयः

अत्रेदं चिन्त्यम् — गवादिपदात् लक्षणया गोत्वादिप्रकारकबोधस्वीकारे जातिशक्तिरन्वयबोधे नापेक्ष्यते, लक्ष्यतावच्छेदकताया एव जातिभानप्रयोजकत्वसंभवात्।

न च गोपदस्य जातौ शक्त्यभावे व्यक्तौ शक्यसंबन्धरूपा लक्षणा न निर्वहतीति लक्षणानिर्वाहार्थं जातौ शक्तिः कल्प्येति वाच्यम्। लक्षणानिर्वाहार्थं शक्तिकल्पने गवादिपदस्य गोत्वादाविव द्रव्यत्वादावपि विनिगमनाविरहेण शक्तिकल्पनप्रसङ्गात्। द्रव्यत्वादिसंबन्धेनापि गवादिव्यक्तौ लक्षणायाः संभवात्।

न च गोपदस्य द्रव्यत्वे प्रयोगविरहात् न तत्र शक्तिरिति वाच्यम्। गोपदस्य गोत्वेऽपि स्वातन्त्र्येण प्रयोगाभावात् तत्रापि शक्त्यनुपपत्तेः।

किं च शक्यसंबन्धरूपलक्षणानिर्वाहाय शक्तेः कल्पने तस्याः वृत्तित्वं नोपपद्यते। उपस्थितिद्वारा यादृशसंबन्धज्ञानं साक्षात् शाब्दबोधजनकं तस्यैव वृत्तिपदार्थत्वात्। लक्षणाद्वारा जातिशक्तेरूपयोगे च साक्षात् तज्ज्ञानस्य शाब्दबोधाजनकत्वात् वृत्तित्वानुपपत्तिः।

व्यक्तिलक्षणापक्षस्य निर्दोषत्वमित्याक्षेपः तत्समाधानं च

अथ आकृतिविशिष्टायामेव व्यक्तौ लक्षणा। आकृतिप्रकारेण व्यक्तिबोधस्य नैयायिकानामप्यनुमतत्वात्। तत्र शक्त्युपस्थितजातेरन्वय उपगम्यते।

न च आकृतावेव शक्तिः जातिविशिष्टे लक्षणेति वैपरीत्यमेव किं न स्यादिति वाच्यम्। आकृतेरवयवसंयोगरूपायाः अनन्तत्वात् तदपेक्षया एकस्यां लघीयस्यां च जातावेव शक्तिकल्पनाया उचितत्वात्।

न चावयवसंयोगनिष्ठा जातिरेव शक्या भवतु, व्यक्तौ तदन्वयश्च स्वाश्रयसमवायिसमवेतत्वरूपपरंपरासंबन्धेन स्वीक्रियतामिति वाच्यम्। आकृतिप्रकारकव्यक्तिबोधस्यानुभविकत्वात्। अवयवसंयोगनिष्ठजातौ शक्तिकल्पने च तत्प्रकारेणैव व्यक्तिबोधः स्यादिति आकृतिप्रकारकबोधानुपपत्तिरेव आकृतिगतजातौ शक्तिकल्पने बाधिका। लक्ष्यार्थव्यक्त्यनुपरक्तायां केवलजातौ गवादिपदप्रयोगविरहः न शक्त्यभावसाधकः, अनुकूलतर्काभावात्। तत्राप्रयोगस्यैव तदशक्यत्वे प्रयोजकत्वात्। जातौ प्रयोगविरहस्य चासिद्धत्वात्। न च द्वाभ्यां वृत्तिभ्यामेकपदेन जातिव्यक्त्युभयविषयकैकबोधानुपपत्तिरिति वाच्यम्। तात्पर्यसत्त्वे वृत्तिद्वयाधीनबोधोपगमे क्षतिविरहात्।

न चैवं केवलं मुख्यार्थजातितात्पर्येण गवि नित्यत्वम् इति स्वारसिक-प्रयोगापत्तिरिति वाच्यम्। शक्त्या स्वरूपत उपस्थितायाः जातेः समानपदोपात्त-धर्मिण्येव आश्रयतासंबन्धेन अन्वयस्य व्युत्पन्नत्वात्।

न च गामानयेत्यादौ अन्वयितावच्छेदकरूपेणानुपस्थितायाः जातेः आनयन-कर्मत्वादावन्वयानुपपत्तिरिति वाच्यम्। व्युत्पत्तिवैचित्र्येण प्रकारतया स्वरूपत उपस्थिताया जातेरन्वयस्वीकारे क्षतिविरहात् — इति रीत्या मण्डनाचार्यमतं परिष्क्रियते चेत् को दोष इति चेत् — तथापि स्वरूपतो गोत्वान्वयबोधस्यापि लक्ष्यार्थे आकृतिविशिष्टव्यक्तौ स्वीकारे तादृशान्वयबोधं प्रति योग्यताज्ञानादीनां कारणताकल्पनाधिक्यम्। आकृतिविशिष्टो न गोत्वाभाववान् इति निश्चयाभावस्य, आकृतिविशिष्टो गौः इति ज्ञानस्य वा कारणत्वं कल्प्यम्। एवं आकृतिविशिष्ट-व्यक्त्युपस्थितेः जात्युपस्थितेश्च पृथक् कारणत्वं कल्प्यम्। एवं गोत्वादिविशिष्ट-व्यक्तिविषयकशाब्दबोधसामग्र्याः अनुमित्यादिप्रतिबन्धकतायां सामग्रीघटकतया जातिव्यक्तिविषयकोपस्थितिद्वयस्य निवेशनीयतया गौरवम्। तस्मात् जात्याकृति-विशिष्टव्यक्तौ शक्तिरिति पक्ष एव साधीयान्।

शक्तिवादे प्राभाकरमतोपन्यासः

प्राभाकरास्तु — जातौ शक्तिं स्वीकुर्वन्तः शाब्दबोधे व्यक्तिभानं लक्षणां विनैव समर्थयन्ति। तथा हि — जातिशक्तिज्ञानादेव व्यक्तेः स्मरणं शाब्दबोधश्च। न च निर्विकल्पकरूपं जातिस्मरणम्। निर्विकल्पकानङ्गीकारात्।

ननु स्मरणे संस्कारस्य संबन्धज्ञानमेवोद्बोधकम्। तत्र यदंशे उद्बोधकं तदंशस्यैव स्मरणम्, अन्यथा उदासीनस्यापि स्मरणापत्तिः। एवं च शक्तिरूप-संबन्धज्ञाने व्यक्त्यंशाभानात् कुतो व्यक्तेः स्मृतिः इति चेत् —

न। व्यक्तिमविषयीकृत्य गोत्वस्य ज्ञानासंभवेन गोत्वोद्बोधकस्य शक्तिज्ञानस्यैव व्यक्त्युद्बोधकत्वात् तदुद्बुद्धसंस्कारवशात् जातिव्यक्त्युभयस्मरणसंभवात्।

हस्तिना साकं हस्तिपकस्य संबन्धग्रहकाले संबन्धितावच्छेदके हस्तित्वे संबन्धाग्रहेऽपि हस्तिसंबन्धिहस्तिपकज्ञानात्मकोद्बोधकवशात् जायमाने हस्तिस्मरणे हस्तित्वस्य प्रकारतया भानवत् व्यक्तिसंबन्धज्ञानमन्तरेणापि जातिसंबन्धि (शक्त) पदज्ञानात् जायमाने जातिस्मरणे व्यक्तेर्विशेष्यतया भाने विरोधविरहात्।

ननु जातिशक्तिज्ञाने नियमतो जातिप्रकारेण व्यक्त्यभानात् तज्जनितसंस्कारात् नियमेन व्यक्तिस्मरणासंभव इति चेत् — न। व्यक्तिविषयकप्रत्यक्षादिसंस्कारादेव व्यक्तिस्मरणसंभवात्।

अथ भवतु जातिशक्तपदज्ञानात् जातिप्रकारेण व्यक्तिस्मरणं, तथापि जातिप्रकारकशाब्दबोधो न संभवति। तद्धर्मप्रकारकधर्मिविषयकशाब्दबोधे तद्धर्मप्रकारेण धर्मिणि गृहीतवृत्तिकपदज्ञानजन्यायाः तद्धर्मप्रकारकोपस्थितेः हेतुत्वात् इति चेत् — मैवम्। शक्तिलक्षणासाधारणस्य अनतिप्रसक्तवृत्तित्वस्य दुर्वचतया शक्तित्वशक्यसंबन्धत्वाभ्यामेव तयोर्निवेशनीयतया शक्तिलक्षणाधीनपदार्थोपस्थित्योः कारणताभेदस्य व्यक्तिशक्तिवादिनामप्यावश्यकतया शक्त्यधीनपदार्थोपस्थितेः धर्मिणमनिवेश्य तद्धर्मगृहीतशक्तिकपदज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनैव तद्धर्मप्रकारकधर्मिविशेष्यकशाब्दबोधहेतुतायाः कल्पयितुमुचितत्वात्। इत्यादिना प्राभाकरसंमतः जातिशक्तिवादः समर्थितः। तस्य दूषणं तु शक्तिवादे नोपलभ्यते।

न्यायकौस्तुभस्थरीत्या शक्तिवादः[६५]

नन्वेवं पदानां कार्यान्विते अन्विते वा शक्तिविरहे कुत्र गवादिपदानां शक्तिरिति चेत् — अत्राहुः — गवादिपदानां गोत्वादिविशिष्टगवादिव्यक्तौ शक्तिः। "जात्याकृतिव्यक्तयः पदार्थः"[६६] इति सूत्रे च आकृतिपदं वैशिष्ट्यपरम्।

अत्रेदमवधेयम् — "व्यक्त्याकृतिजातयस्तु पदार्थः" इति न्यायसूत्रपाठः। तत्सूत्रानन्तरं निर्दिष्टक्रमेण व्यक्तेः आकृतेः जातेश्च लक्षणबोधकानि त्रीणि सूत्राणि वर्तन्ते — "व्यक्तिर्गुणविशेषाश्रयो मूर्तिः"[६७] "आकृतिर्जातिलिङ्गाख्या"[६८] "समानप्रसवात्मिका जातिः"[६९] इति। तत्रावयवसंस्थानमेवाकृतिपदेन विवक्षितम्। कौस्तुभकारास्तु जातिः वैशिष्ट्यं व्यक्तिः इति त्रिषु पदस्यैका शक्तिः। जातिविशिष्टव्यक्तौ शक्तिः इति प्रवादस्यायमेवार्थ इति सिद्धान्तमभिसन्धाय तस्य सूत्रारूढत्वोपपादनाय आकृतिपदस्य वैशिष्ट्यपरत्वमभिधाय "जात्याकृतिव्यक्तयः पदार्थः" इति व्युत्क्रमेण पदानि विन्यस्य न्यायसूत्रमुदाजह्रुः इति टिप्पणीकाराः। मणिकारैरपि "जात्याकृतिव्यक्तयः पदार्थः" इत्येव सूत्रमुद्धृतम्। शक्तिवादे गदाधरभट्टाचार्यैरपि तथैव।

---

[६५] न्या.कौ. पृ. ५२७
[६६] न्या.सू. २.२.६३
[६७] न्या.सू. २.२.६६
[६८] न्या.सू. २.२.६७
[६९] न्या.सू. २.२.६८

दीधितिकारमतम्[७०]

दीधितिकारादयस्तु — गवादिपदानां व्यक्तावेव शक्तिः, न गोत्वादिजात्यंशेऽपि। न चैवं शाब्दबोधप्रयोजकशक्त्यभावात् गोत्वादीनां शाब्दबोधे प्रकारतया भानानुपपत्तिरिति वाच्यम्। पदार्थांशे गोत्वादिधर्मस्य शाब्दबोधप्रकारतायां गोत्वाद्यंशे तत्पदशक्यतावच्छेदकत्वस्यैव प्रयोजकत्वात्। शक्यतावच्छेदकत्वं च संकेतीयतत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकत्वम्, न तु बोधविषयतावच्छेदकतया संकेतविषयत्वरूपं विशेषणविधया वाच्यत्वम्। तथा च तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मावच्छिन्नत्वविशिष्टतादृशविशेष्यतासंसर्गकशक्तिज्ञानस्यैव कारणत्वमिति गोत्वादीनां शाब्दबोधे प्रकारतया भानानुपपत्तिर्न। प्राभाकरास्तु गवादिपदानां गोत्वादिविशिष्टे शक्तिकल्पने गौरवात् नागृहीतविशेषणान्यायेन गोत्वादौ शक्तिकल्पनस्य आवश्यकत्वाच्च लाघवेन केवलगोत्वादावेव शक्तिः। न चैवं गवादिपदात् गोत्वादिविशिष्टान्वयबोधानुपपत्तिः, विशिष्टे शक्तिविरहादिति वाच्यम्। गोत्वादिविशिष्टविषयकशाब्दबोधत्वस्यैव गोत्वादिशक्तिज्ञानकार्यतावच्छेदकत्वोपगमेन केवलगोत्वादिशक्तिज्ञानादेव गोत्वादिविशिष्टान्वयबोधसंभवात्।

अथैवं पश्वादिस्थलेऽपि पशुत्वाद्युपाधिशक्तिज्ञानस्यैव पशुत्वादिविशिष्टविषयकशाब्दबोधत्वं कार्यतावच्छेदकमित्युपगमेन पशुत्वादिशक्तिज्ञानादेव पशुत्वादिविशिष्टविषयकबोधोपपत्तौ तत्रापि पशुत्वादिविशिष्टशक्त्युच्छेदापत्तिः। न चेष्टापत्तिः, उपाधिप्रवृत्तिनिमित्तकस्थले लोमवल्लाङ्गूलादिमत्त्वरूपशुत्वादिविशिष्टे एव शक्तिरिति तत्सिद्धान्तविरोधादिति चेत् —

न। जातेर्व्यक्तिविषयकज्ञानविषयत्वनियमेन जातिप्रवृत्तिनिमित्तकस्थले उक्तरीतेः संभवेऽपि उपाधेस्तदाश्रयव्यक्तिविषयकज्ञानविषयत्वनियमाभावेन तत्रोक्तरीतेरसंभवेन व्यक्तिभानार्थं विशिष्टशक्त्यङ्गीकारस्यावश्यकत्वात्।

न च गोत्वादौ शक्त्युपगमे गोत्वं गोपदशक्यमिति शक्तिज्ञानहेतुतायां गोघटितस्य गोत्वत्वादेः विशेष्यतावच्छेदकतया निवेशे गौरवम्। गोत्वविशिष्टे शक्तिस्वीकारे च गौर्गोपदशक्येत्याकारकशक्तिज्ञानहेतुतायां अखण्डस्य गोत्वादेः विशेष्यतावच्छेदकतया निवेशे लाघवमिति विशिष्टशक्तिस्वीकार एवोचित इति वाच्यम्। गोत्वादौ शक्तिस्वीकारेऽपि तादात्म्येन गोत्वादेरेव विशेष्यतावच्छेदकतया निवेशेना गौरवादिति वदन्ति।

---

[७०] न्या.कौ. पृ. ५२९

जातिशक्तिवादनिरासः[७१]

तदसत्। केवलजातिशक्तिस्वीकारे गवादिपदात् कदाचित् समवायेन गोत्वादिविशिष्टस्य बोधः, कदाचिच्च कालिकसंबन्धेन गोत्वादिविशिष्टस्य बोध इत्यत्र नियामकाभावप्रसङ्गात्। जातेः व्यक्तिवित्तिवेद्यत्वनियमेन समवायेन गोत्व-विशिष्टस्यैव बोधः स्यादिति।

विशिष्टशक्तिस्वीकारे तु यदा समवायेन गोत्वादिविशिष्टे शक्तिज्ञानं तदा सम-वायेन गोत्वादिविशिष्टस्य शाब्दबोधः, यदा च कालिकसंबन्धेन गोत्वादिविशिष्टे शक्तिज्ञानं तदा कालिकसंबन्धेन गोत्वादिविशिष्टस्य शाब्दबोधः इति नियमसंभवात्।

न च केवलगोत्वादिशक्तिज्ञानादेव तात्पर्यवशात् तत्तत्संबन्धेन गोत्वादि-विशिष्टतत्तच्छाब्दबोधनियमसंभव इति वाच्यम्। सत्यपि तात्पर्यज्ञाने वृत्तिज्ञानं विना शाब्दबोधानुदयात्।

किं च प्रत्यक्षे जातेः व्यक्त्या सहैव भानमिति नियमेऽपि शाब्दबोधे तथा नियमाभावेन उक्तरीत्या केवलजातिशक्तिज्ञानात् विशिष्टान्वयबोधो दुरुपपाद इति विशिष्टशक्तिस्वीकार आवश्यक इति दिक् इति।

गदाधरभट्टाचार्यैस्तु शक्तिवादान्ते इमामेव शङ्कामुद्भाव्य समाहितम् – एवं सति ज्ञानशक्तिरेवादरणीया। तथा च गवादिपदस्य समवायेन गोत्वादि-प्रकारकज्ञान एव शक्तेरुपगमात्। ततो नाभ्रान्तानां संबन्धान्तरेण तत्प्रकारकधीः, तत्संबन्धेन तत्प्रकारकशक्तिग्रहस्यैव तादृशबोधहेतुत्वात् — इति।

वैयाकरणा अप्युक्तरीत्यैव जातिशक्तिपक्षं व्यक्तिशक्तिपक्षं चोपन्यस्य जाति-विशिष्टव्यक्तिशक्तिपक्षमेव समर्थयांबभूवुः = भूषणसारे मञ्जूषायां च नामार्थ-निर्णयप्रकरणे। नूतनयुक्त्यभावात् तदनुवादस्त्यज्यते।

शब्दशक्तिप्रकाशिकोक्तरीत्या शक्तिविचारः[७२]

शब्दशक्तिप्रकाशिकायां जगदीशतर्कालंकारैः —

निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः।
यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते।

प्रकृतिः द्विविधा नाम धातुश्चेति। प्रातिपदिकं नामेत्यनर्थान्तरम् इत्युक्त्वा नाम्नो लक्षणमुक्तम् —

---

[७१] न्या.कौ. पृ. ५३३
[७२] श.श.प्र. पृ. ६८

येन स्वीययदर्थस्य मुख्यतः प्रतिपादने।
स्वोत्तरप्रथमापेक्ष्या तन्नाम स्यात्तदर्थकम्।।

इति। यादृशशब्देन स्वोपस्थाप्ययदर्थमुख्यविशेष्यकान्वयबोधार्थं स्वोत्तरप्रथमाविभक्तिरपेक्ष्यते तादृशः शब्द एव तदर्थकं नाम। घटादयो हि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थमुख्यविशेष्यकं बोधमुत्पादयन्ति, न त्वन्यथा। न हि घट इत्यादित इव घटादित्यादितोऽपि घटादिमुख्यविशेष्यकः सुबर्थसंख्यादेरवगमः। ततः तच्च नाम चतुर्विधम् —

रूढं च लक्षकं चैव योगरूढं च यौगिकम्।
तच्चतुर्धा, परे रूढयोगिकं मन्यतेऽधिकम्।

इत्युक्तम्। ततः रूढ नाम्नः लक्षणं विभागश्च —

रूढं संकेतवन्नाम सैव संज्ञेति कीर्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा। १७ ।

इति कारिकया प्रादर्शि। यन्नाम यादृशार्थे संकेतितमेव न तु यौगिकमपि तद्रूढम्। योगरूढं तु पङ्कजादिपदं न तथा। रूढनामैव संज्ञापदेनाभिलप्यते, न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः, येन विभागव्याघातः स्यात्।

संज्ञायाश्च त्रयो भेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञाः, संकेतशून्यत्वात्। ये तु रूढस्य नाम्नश्चतुर्विधत्वमाहुस्तन्मतमुपन्यस्यति —

जातिद्रव्यगुणस्पन्दैर्धर्मैः संकेतवत्तया।
जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः।

गोगवयादिपदानां गोत्वादिजात्या, पश्वाढ्यादिपदानां लाङ्गूलधनादिद्रव्येण, धन्यपिशुनादिपदानां पुण्यद्वेषादिगुणेन, चलचपलादिपदानां कर्मणा अवच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यम्। यदुक्तं दण्ड्याचार्यैः —

शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः।
चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः।

इति। तदेतज्जडमूकादिशब्दानामन्यशून्यादिशब्दानां च असंग्रहापत्त्या परित्यक्तम्। जडपदं चेष्टारहिते, मूकपदं वाग्विधुरे, मूर्खपदं विद्यारहिते शक्तम्, न तत्र जात्यवच्छिन्ना शक्तिः, किं तु अभावावच्छिन्नेति तेषामनुपग्रहात् विभागन्यूनता। यदि तु जडादिपदं चेष्टादिरहितप्राण्यादावेव शक्तम्, तथा च पश्वादिवत् तदपि द्रव्यावच्छिन्नशक्तिकमित्युच्यते, तदा अन्यशून्यादिपदानामनुपग्रहः। अन्यपदस्य भेदवति शून्यपदस्य अत्यन्ताभाववति शक्तेः। तत्र नैमित्तिकसंज्ञायाः लक्षणमाह —

जात्यवच्छिन्नसंकेतवती नैमित्तिकी मता।
जातिमात्रे हि संकेताद् व्यक्तेर्भानं सुदुष्करम्।

यन्नाम जात्यवच्छिन्नसंकेतवत् सा नैमित्तिकी संज्ञा। यथा गोचैत्रादिः। सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रम् इत्यादिना जातिमात्रशक्तिवादे शाब्दबोधे व्यक्तिभानानुपपत्तिं प्रसाध्य आक्षेपेण अनुमानेन लक्षणया व्यक्तिभानमिति पक्षान् पूर्वोक्तयुक्तिभिर्निरस्य जातिविशिष्ट-व्यक्तौ शक्तिः स्थापिता। ततः पारिभाषिक्याः औपाधिक्याश्च संज्ञायाः क्रमेण लक्षणमुक्तम् —

उभयावृत्तिधर्मेण संज्ञा स्यात् पारिभाषिकी।
औपाधिकी त्वनुगतोपाधिना या प्रवर्तते। २२ ।

इति। उभयावृत्तिधर्मावच्छिन्नसंकेतवती संज्ञा पारिभाषिकी। यथा आकाश-डित्थादि। सा हि द्वितयावृत्तिधर्मेणैव शब्दादिना तदाश्रयमभिधत्ते।

न चाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः इति वाच्यम् पटादिपदस्यापि पटादौ निरवच्छिन्नशक्तिप्रसङ्गात्। ननु पटे शक्तमपि पटपदं न पटत्वावच्छिन्न-शक्तिमदिति ग्रहोत्तरं ततः पटत्वविशिष्टस्याननुभवात् अवश्यं तच्छक्तिरवच्छिन्नेति चेत् — शब्दवति शक्तमप्याकाशपदं न शब्दवत्त्वावच्छिन्नशक्तिमत् इत्येवं ग्रहदशायामाकाशादिपदात् न शब्दवत्त्वेन गगनस्य प्रतीतिः, ततः शब्दवत्त्वा-वच्छिन्नैव तत्र शक्तिरिति विभाव्यताम्।

पटत्वाद्युपलक्षिते धर्मिणि शक्तिरिति दीधितिकारमतम्

एतेन यत् दीधितिकारैरुक्तम् — पटत्वाद्युपलक्षिते शक्यतावच्छेदकत्वेना-गृहीतपटत्वाद्यवच्छिन्ने धर्मिण्येव शक्तिग्रहः पटत्वेन रूपेण पटानुभवं प्रति हेतुः, शक्तिग्रहविशेष्यतावच्छेदकत्वस्यैव शाब्दधीप्रकारतानियामकत्वात्। अतः मास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः। परं तु पटत्वाद्युपलक्षितव्यक्तिष्वेव शक्तिः, न तु पटत्वादिजातौ — इति।

तदपि प्रत्युक्तम्। पटे शक्तमपि पटपदं न पटत्वावच्छिन्नशक्तिमत् इति ग्रहोत्तरं पटत्वविशिष्टस्याननुभवात् भवन्मतै तथानुभवापत्तेः। शब्दोपलक्षिते धर्मिणि शक्तिग्रहादेव आकाशादिपदात् धर्म्याकाशांशे निष्प्रकारकस्मरणमन्वयानुभव-श्चोपपद्यत इति तु नानुभविकम्, न वा यौक्तिकम्।

अनुगतोपाध्यवच्छिन्ने संकेतवती संज्ञा औपाधिकी। यथा भूतदूतादिः। आत्मा-वृत्तिविशेषगुणवत्त्वरूपानुगतोपाध्यवच्छिन्नसंकेतवान् भूतशब्दः। वार्ताहारकत्वा-

वच्छिन्नवाचकः दूतशब्दः। शब्दादिस्तु सखण्डोपाधिरपि नानुगतः, द्वितयावृत्तित्वात्। अतः पारिभाषिके गगनादिपदे नातिप्रसङ्गः। ये तु जात्यवच्छिन्नसंकेतवतामपि चैत्रादिपदानां पारिभाषिकत्वमाहुः तेषां मते त्रैविध्यमन्यथा निर्वक्ति —

यद्वाधुनिकसंकेतशक्ति स्यात् पारिभाषिकम्।
जात्या नैमित्तिकं शक्तमौपाधिकमुपाधिना।

यत्रार्थे यन्नाम आधुनिकसंकेतवत् तदेव तत्र पारिभाषिकम्। यथा पित्रादिभिः पुत्रादौ संकेतितं चैत्रादिनाम, यथा वा शास्त्रकृद्भिः सिद्ध्यभावादौ संकेतिता पक्षतापि। जात्यवच्छिन्नशक्तिमन्नाम नैमित्तिकम्, यथा गोगवयादि। यत् उपाध्यवच्छिन्नशक्तिमन्नाम तत् औपाधिकम्, यथा आकाशपश्वादि। आधुनिकस्तु संकेतो न शक्तिः, नित्यस्यैव संकेतस्य शक्तित्वात्। तदुक्तं भर्तृहरिणा —

आजानिकश्चाधुनिकः संकेतो द्विविधो मतः।
नित्य आजानिकस्तत्र या शक्तिरिति गीयते।
कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृतः।

इति। न च पित्रादिना संकेतिते चैत्रादिपदे नित्यसंकेतसत्त्वे मानमस्ति। "द्वादशेऽहनि पिता नाम कुर्यात्" इति श्रुतेः पितृकर्तव्यसंकेतविधानमात्रपरत्वात्। चैत्रादिपदस्य नित्यसंकेतरूपशक्तिमत्त्वे पूर्वपूर्वप्रयुक्तत्वप्रसङ्गाच्च। तस्य शक्तिमत्त्वस्य पूर्वपूर्वप्रयुक्तत्वव्याप्यत्वात्।

चैत्रादिपदानामिव पारसीकादिशब्दानां संकेतवत्त्वाविशेषेऽपि न तेषां धर्मकर्मण्युपयोगः। "साधुभिर्भाषितव्यम्। "नापभ्रंशितवै" इति श्रुत्या धर्मकर्मणि तेषां प्रयोगस्य निषेधात्।

संस्थानविशिष्टव्यक्तौ शक्तिरिति मतम्

ननु गवादिपदं गोत्वादिनेव संस्थानविशेषेणापि विशिष्ट एव गवादौ शक्तमिति गवादावपि गवादि नाम औपाधिकं स्यात्, संस्थानरूपोपाद्यवच्छिन्नशक्तिनिरूपकत्वात्।[७३] न च गवादिपदस्य नैमित्तिकत्ववत् औपाधिकत्वे क्षतिविरहात् इष्टापत्तिरिति वाच्यम्। तथा सति तेन रूपेण विभागानुपपत्तेः मिथो विरुद्धधर्मस्यैव विभाजकत्वादिति चेत् —

न। संस्थानस्य शक्यत्वेऽपि गोत्वापेक्षया गुरुत्वेन शक्यतानवच्छेदकत्वात्। तथा च संस्थानावच्छिन्नशक्तिनिरूपकत्वरूपमौपाधिकत्वं गवादिपदस्य नास्तीति न

---

[७३] श.श.प्र. पृ. १२६

औपाधिकत्वम्। अपि तु गोत्वजात्यवच्छिन्नशक्तिनिरूपकत्वान्नैमित्तिकत्वमेव। न च तावता गवादिपदस्य संस्थानमशक्यमिति शङ्कनीयम्। गवादिपदात् गोत्वादिजातेरिव सास्नादिलक्षणविलक्षणाकृतेरपि प्रकारतया अनुभवेन तस्यापि शक्यत्वात्। तथा च सूत्रम् –

"जात्याकृतिव्यक्तयस्तु पदार्थः" इति। पदार्थः – गवादिपदशक्यः। त्रिष्वेकशक्तिसूचनाय पदार्थ इत्येकवचनम्। विभिन्नशक्तौ तु विशकलितानां परस्परविशेष्यविशेषणभावानापन्नानां गोत्वसंस्थानव्यक्तीनां बोधस्य प्रसङ्गात्। न चेष्टापत्तिः। गौर्नित्या गौर्गुणः इत्यादौ गोपदस्य जातावाकृतौ च लक्षणाविरहप्रसङ्गात् इति सांप्रदायिकाः।

नव्यास्तु — जातिव्यक्त्योरेकशक्तिलाभाय सूत्रे पदार्थ इत्येकवचनम्। आकृतिरूपसंस्थाने तु पृथगेव शक्तिः। शक्त्या एकपदोपस्थाप्ययोरपि आकृतिव्यक्त्योः भेदसंबन्धेन अन्वयबोधः व्युत्पत्तिवैचित्र्यात्। संस्थानस्य पृथक्शक्यत्वादेव संस्थानानुपस्थितौ केवलगोत्वादिप्रकारेण व्यक्तेरवगमः शक्त्यैव संपद्यते।

यद्येवं संस्थानव्यक्त्योरेवैका शक्तिः, गोत्वादिजातावेव शक्त्यन्तरम्। जातिवैशिष्ट्यं तु युष्मन्मते पदार्थविधयेवास्मन्मते वाक्यार्थविधया भासत इत्येव किं न स्यात् इति चेत् — न स्यादेव। समवायमन्तर्भाव्य समवायेन गोत्ववति शक्तिस्वीकारात् समवायस्य पदार्थविधया भानमेवोचितम्। स्वाश्रयसमवेतत्वरूपपरंपरासंबन्धेन संस्थानवति शक्तिस्तु न, गुरुत्वात् इति परंपरासंबन्धस्य पदार्थविधया भानायोगात् इत्याहुः।

वस्तुतस्तु — वैशिष्ट्यविधुराभ्यां चन्द्रत्वसूर्यत्वाभ्यामवच्छिन्नैकशक्तिमतः पुष्पवन्तपदस्येव गोत्वसंस्थानाभ्यामवच्छिन्नैकशक्तिमतः गवादिपदस्यापि जात्यवच्छिन्नशक्तिमत्तया नैमित्तिकसंज्ञात्वेऽपि नौपाधिकसंज्ञात्वम्, सखण्डोपाधिमात्रावच्छिन्नशक्तिमत एव नाम्नः औपाधिकसंज्ञात्वात्।

मतान्तरम्

सौत्रमाकृतिपदं न संस्थानपरम्, परं तु आक्रियतेऽनेनेत्याकृतिः इति करणव्युत्पत्त्या आकारनिरूपकार्थकं जातिव्यक्त्योः संसर्गपरमेव। अन्यथा समवायादेरपि संबन्धविधया गवादिपदशक्यार्थत्वेन तदनुक्त्या न्यूनतापत्तेः। तथा च जातिः व्यक्तिः संबन्धश्चेति त्रितयं पदशक्यमिति सूत्रार्थः। न चाकृतेरशक्यत्वे जात्याकृतिभ्यां क्वचिदपि गवादेरनुभवो न स्यादिति वाच्यम्। तादृशस्यानुभवस्य

जात्याकृतिविशिष्टे गवादिपदस्य शक्तिभ्रमेण लक्षणया वा संपादनीयत्वात् इति मतान्तरम् स्वगुरुचरणोक्तं तर्कालंकारैः प्रदर्शितम्।

तर्कताण्डवोक्ता शक्तिः[७४]

तर्कताण्डवकारैः व्यासतीर्थश्रीचरणैः जातिशक्तिवादे जातिविशिष्टशक्तिवादे च दोषान् प्रदर्श्य व्यक्तिशक्तिवादः समर्थितः। तथा हि —

जातिशक्तिवादे दोषाः

(१) जातिविशिष्टव्यक्तिबोधं प्रति जातिशक्तिज्ञानत्वेन कारणत्वस्वीकारे येन रूपेणोपस्थिते संबन्धिनि यस्य संबन्धो गृह्यते तेन रूपेण एकसंबन्धिप्रतीतिः अपरसंबन्धिनं ज्ञापयतीति अनुमित्यादौ कार्यकारणभावः क्लृप्तः। यथा धूमत्वेन रूपेणोपस्थिते धूमे संबन्धिनि यस्य वह्नेः व्याप्तिरूपः संबन्धो गृह्यते, तेन धूमत्वेन रूपेण धूमरूपैकसंबन्धिप्रतीतिः वह्निलक्षणमपरसंबन्धिनं ज्ञापयतीति अनुमितिस्थले हस्तिपकस्मृत्यादिस्थले च क्लृप्तम्। तथैव शाब्दस्थलेऽपि गोपदत्वेन रूपेण गोपद-रूपे संबन्धिन्युपस्थिते गोत्वविशिष्टगोव्यक्तेः शक्तिलक्षणः संबन्धो गृहीत इति गोपदत्वेन रूपेण गोपदरूपैकसंबन्धिप्रतीतिः अपरं गोत्वविशिष्टगोरूपमर्थं ज्ञापय-तीत्युपपद्यते। गोत्वविशिष्टेऽगृहीतसंबन्धात् गोपदात् गोत्वविशिष्टज्ञानस्वीकारे क्लृप्तकार्यकारणभावमतिक्रम्य जातिविशिष्टव्यक्तिज्ञाने जातिशक्तिज्ञानत्वेन कारण-तेति कल्पने कार्यकारणभावान्तरकल्पनाख्यं गौरवमापद्यते।

(२) किं चैवं व्यक्त्यंशे शक्तिज्ञानत्वेन कारणता, जातिविशिष्टव्यक्तिविषयक-शाब्दज्ञानत्वेन कार्यतेति विपरीतं किं न स्यात्।

(३) एवं पदार्थशक्तिज्ञानत्वेन कारणता, योग्येतरान्वितपदार्थविषयकशाब्द-ज्ञानत्वेन कार्यतेत्यापत्त्या अन्विते शक्तिज्ञानस्य कारणता न स्यात्।

(४) किं च व्यक्त्यविशेषिते गोत्वे न गोपदस्य शक्तिग्रहः यत्किंचिच्छक्यमिति ज्ञानेन अश्वत्वादिव्यावृत्तगोत्वस्य शक्यत्वासिद्धेः। किं तु व्यक्त्या विशेषिते गोत्वे इति नागृहीतविशेषणान्यायो भवतां विपरीतफलः।

न च गोत्वस्य स्वत एवेतरव्यावृत्तत्वात् स्वतस्सिद्धेनेतरव्यावृत्तत्वेन ज्ञाते गोत्वे शक्तिग्रह इति वाच्यम्। गोत्वं शक्यमिति ज्ञाने इतरव्यावृत्तेरनुल्लेखात्। उल्लेखे इतरव्यावृत्तिरेव गोपदप्रवृत्तिनिमित्तं स्यात्, नागृहीतविशेषणान्यायात्, न तु इतर-व्यावृत्तत्वविशिष्टं गोत्वम्।

---

[७४] त.ता. पृ. २२७

न च गोत्वत्वेन ज्ञाते गोत्वे शक्तिग्रहः इति वाच्यम्। गवेतरावृत्तित्वे सति निखिलगोवृत्तित्वादन्यस्य गोत्वत्वस्य अभावेन गोत्वत्वे व्यक्तेः द्विः अनुप्रवेशात्।

(५) किं चैवं त्वदभिमता गङ्गाशब्दादेः तीरादौ लक्षणा मण्डपं भोजयेत्यादौ मण्डपशब्दस्य गृहविशेषसंबन्धिनि पुरुषे रुढिपूर्वकलक्षणा (मण्डपशब्दस्य गृहविशेषे रूढत्वात् तत्पूर्विका लक्षणा) च न स्यात्। तत्रापि तीरत्वपुरुषत्वे एव लक्ष्ये, तीरपुरुषौ तु लक्षणां विना नागृहीतविशेषणान्यायेन वा एकवित्तिवेद्यतया वा प्रतीयते इत्येव सुवचत्वात्।

(६) किं च व्यक्तेरशक्यत्वे घटमानयेत्यादौ व्यक्तौ कर्मत्वादिरूपविभक्त्यर्थान्वयो न स्यात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्, व्यक्तेश्चाशक्यत्वेन घटादिप्रकृत्यर्थत्वाभावात्।

न च व्यक्तेरशक्यत्वेऽपि एकवित्तिवेद्यतया प्रकृतिप्रतिपाद्यत्वात्तत्र विभक्त्यर्थान्वय इति वाच्यम्। तथा सति पूर्वत्वापरत्वादेरन्योन्यसापेक्षत्वेन एकवित्तिवेद्यत्वात् यत्र विपरीतलक्षणया अपराभिप्रायेण पूर्वमानयेति पूर्वपदं प्रयुक्तं तत्र पूर्वपदस्य अपरलक्षणा न स्यात्। लक्षणां विनैव द्वितीयाविभक्त्यर्थकर्मत्वस्य पूर्वपदार्थेन एकवित्तिवेद्येऽपरपदार्थेऽन्वयसंभवेन अपरमानयेत्यर्थोपपत्तेः। एवमेव अपरमानयेत्यत्राप्युक्तदिशा पूर्वमानयेत्यर्थोपपत्तेः।

अपि च लक्ष्यार्थाभिप्रायं विनैव यत्र पूर्वमानयेति मुख्यार्थे प्रयोगः तत्र स्थले पूर्वप्रातिपदिकात् अनन्तरं श्रूयमाणविभक्त्यर्थकर्मत्वान्वयः अपरपदार्थे स्यात्। पूर्वपदार्थेन सहैकवित्तिवेद्यत्वस्य त्वदुक्तविभक्त्यर्थान्वयप्रयोजकस्य तत्र सत्त्वात्।

(७) अपि च जातिमात्रस्य पदार्थत्वे गोपदात् जातिविशिष्टव्यक्तिधीर्न स्यात्। न च समानसंवित्संवेद्यतयैव तद्धीरिति वाच्यम्। तद्वैशिष्ट्यांशे तदभावात्। वैशिष्ट्यस्यापि जातिवित्तिवेद्यत्वे निर्विकल्पकोच्छेदप्रसङ्गात्। जातिविषयकनिर्विकल्पकज्ञानस्य एकवित्तिवेद्यतया व्यक्तिविषयकत्ववत् वैशिष्ट्यस्यापि जातिवित्तिवेद्यत्वे जातिवित्तेः वैशिष्ट्यविषयकत्वापत्त्या वैशिष्ट्याविषयकनिर्विकल्पकोच्छेदः स्यात्।

(८) किं च 'अविशेषिते गोत्वे न शक्तिग्रहः' इत्यादिना पूर्वोक्तयुक्त्या व्यक्तिविशेषणकगोत्वे शक्तिर्ग्राह्येति तादृशशक्तिज्ञानजन्या शाब्दधीरपि व्यक्तिविशेषितगोत्वविशेषणकव्यक्तिविषया स्यात्। न च तथानुभवः। गौरित्यनेन गोत्वविशेषणकव्यक्तेरेव प्रतीतेः।

तस्मात् जात्यंश एव शक्तिज्ञानस्य हेतुत्वे (१) सामग्र्यन्तरकल्पनापत्तिः (२) व्यक्त्यंश एव शक्तिज्ञानं हेतुरिति वैपरीत्यापत्तिः (३) अन्वयप्रतिबन्दी (४) गोत्वे शक्तिग्रहदशायां व्यक्तेर्द्विरनुप्रवेशापत्तिः (५) गवादिपदानां जातावेव शक्तौ गङ्गादिशब्दानां तीरत्वादावेव लक्षणाप्रसङ्गः (६) एकवित्तिवेद्यत्वमात्रेण विभक्त्यर्थान्वये पूर्वमानयेत्यादौ परादेरपि तत्प्रसङ्गः (७) जातिवैशिष्ट्यांशप्रतीत्यनुपपत्तिः (८) गोशब्देन व्यक्तिविशेषितगोत्वविशेषणकव्यक्तिधीप्रसङ्गश्चेत्यष्टौ दोषाः।

भाट्टोक्तव्यक्तिलक्षणाभङ्गः[७५]

भाट्टास्तु — आनन्त्यव्यभिचाराभ्यां व्यक्तौ शक्तिग्रहासंभवात् जातिरेव शक्या। जातिविशिष्टा व्यक्तिस्तु लक्ष्या। एवं च व्यक्तेः तीरवत् प्रकृतिजन्यज्ञानविषयत्वात् तत्र विभक्त्यर्थान्वयो युक्तः। यद्वा व्यक्तिराक्षेपलभ्येति न तत्र वृत्तिः कल्प्येत्याहुः। तत्र लक्षणापक्षे नव दोषाः प्राप्नुवन्ति। तथा हि –

(१) पूर्वोक्तरीत्या व्यक्तौ शक्तिसंभवे शब्दसंबन्धिजातिसंबन्धरूपपरंपरा-संबन्धात्मकलक्षणाङ्गीकारे गौरवात्।

(२) वाक्यस्थसर्वपदानां व्यक्तिलक्षकत्वे लाक्षणिकं पदं नानुभावकमिति मते व्यक्तेरनुभवानुपपत्तेश्च।

(३) किं च गङ्गात्वादिरूपात् स्वार्थात् अन्येन तीरत्वादिना रूपेणोपस्थित एव तीरादौ गङ्गादिपदस्य लक्षणा दृष्टा। न चात्र व्यक्तिः गोत्वादिजातिं विना रूपान्तरेणोपस्थिता, गौरिति प्रतीत्या जातिव्यक्त्योरेवोल्लेखात्।

(४) किं च गां पश्य, गौस्तिष्ठति इत्यादौ सत्यपि जातेः पदार्थान्वययोग्यत्वे अन्वयानुपपत्त्यनुसन्धानं विनैव जातिविशिष्टव्यक्तिप्रतीतेः न तत्र लक्षणा संभवति, बीजाभावात्।

(५) प्रत्युत गौर्नित्या, गौर्जातिः इत्यादौ व्यक्त्यन्वयानुपपत्त्यैव जातिधीरिति बीजसद्भावात् जातावेव लक्षणा स्यात्

(६, ७) किं च यस्यां व्यक्तौ आनयनादिव्यवहारेण शक्तिग्रहः यस्यां व्यक्तौ गौर्नष्टा, गौर्दीर्घा, गौः शुक्ला, गौः सास्नादिमती गौरनेका गौर्गच्छति इति प्रयोगप्राचुर्यं च तस्यां व्यक्तौ लक्षणा, तद्विपरीतायां जातौ शक्तिरिति साध्वीयं व्यवस्था। न हि जातौ नाशादिकमस्ति। तथा च प्रमितत्यागः अप्रमितस्वीकार इति दोषद्वयम्।

---

[७५] त.ता. पृ. २२९

(८) अपि च शब्दोऽनित्यः कृतकत्वात् घटवदित्यनित्यत्वानुमाने घटपद-शक्यार्थस्य घटत्वस्यैव दृष्टान्तत्वापत्त्या तत्रानित्यत्वरूपसाध्याभावेन साध्य-वैकल्यदोषः स्यात्।

(९) शब्दो नित्यः श्रावणत्वात् शब्दत्ववत् इत्यनुमाने साध्यवैकल्याभावः स्यात् — इति।

तस्मात् (१) व्यक्तौ मुख्यवृत्तिसंभवेऽपि लक्षणाश्रयणम् (२) व्यक्तेरनुभवानुप-पत्तिः (३, ४) लक्षणाबीजाभावः (५) जातावेव बीजसत्त्वाल्लक्षणाप्रसङ्गः (६) प्रमितत्यागः (७) अप्रमितस्वीकारः (८) अनित्यत्वानुमाने घटवदिति दृष्टान्तोक्त्यनुपपत्तिः (९) नित्यत्वानुमान एव दृष्टान्तोक्तिप्रसङ्गश्चेति दोषनवकम्-व्यक्तौ लक्षणेति पक्षे।

व्यक्त्याक्षेपपक्षे दोषाः

जातिः शब्दशक्या, व्यक्तिस्तु आक्षेपगम्येति पक्षे दोषषट्कं प्रसजति। तथा हि —

(१) व्यवहारादिना गृहीतशक्तेर्व्यक्तेः शब्दात् साक्षात् धीसंभवे शब्दबोध्यया जात्या आक्षेपकल्पनं गौरवावहम्।

(२) धूमादित्यत्र धूमाक्षिप्तवह्नेः धूमशब्दार्थत्वाभावेन तत्र यथा विभक्त्यर्थान्वयो न भवति तथा गामानयेत्यादौ जात्याक्षिप्तगवि विभक्त्यर्थकर्मत्वाद्यन्वयो न स्यात्। विभक्तीनां प्रकृतिरूपशब्दार्थान्विस्वार्थबोधकत्वव्युत्पत्तेः।

(३) किं च जातिर्व्यक्त्याश्रितेत्याकारकाक्षेपजन्यप्रतीतौ जातिरूपपक्षविशेषण-भूताश्रितत्वोपसर्जनभूतायाः व्यक्तेः शाब्दत्वेऽपि उपसर्जनत्वात् राजपुरुषमानयेत्यत्र उपसर्जनस्य राज्ञ इव आनयनान्वयो न स्यात्।

(४) अपि च वह्न्यविवक्षया प्रयुक्तेन धूमपदेन वह्नेरिव गौरस्तीत्यादौ व्यक्त्य-विवक्षया प्रयुक्तेन गोपदेन व्यक्तिधीर्न स्यात्। आक्षेपे बीजभूतायाः अनुपपत्तेर-भावात्।

(५) किं च गोत्वेन गोत्वविशिष्टा व्यक्तिराक्षिप्यते वा? अन्यविशिष्टा व्यक्ति-राक्षिप्यते वा? अविशिष्टा व्यक्तिराक्षिप्यते वा? नाद्यः, आक्षेप्यशरीरे प्रविष्टस्य गोत्वस्याक्षेपकत्वायोगात्। न द्वितीयः, गौरिति ज्ञाने गोत्वव्यक्त्योरेवोल्लेखेन अन्य-धर्मानुल्लेखात्। न तृतीयः, व्यक्तिमात्रस्याश्वादिसाधारणतया गौरित्युल्लेखायोगात्।

अश्वादिव्यावर्तकगोत्वविशिष्टत्वेनैव गोपदादिना गोव्यक्तिप्रतीतेः अविशिष्टव्यक्ति-प्रतीतेरनुभवविरुद्धत्वात्।

(६) अपि च गोत्वमपि न स्वरूपमात्रेण ज्ञातमाक्षेपकम्। प्रमेयत्वादिरूपेण ज्ञानेऽपि गोव्यक्तिविशेषाक्षेपप्रसङ्गात्। किं तु व्याप्यतावच्छेदकावच्छिन्नतया ज्ञातम्। न च व्यक्तिं विना तदवच्छेदकमस्तीति व्यक्तेः प्रागेव ज्ञाततया कथं तस्याः आक्षेप्यत्वम्। अन्यथा गौरिति प्रत्यक्षज्ञानस्यापि जातिरेव विषयः, व्यक्तिस्त्वाक्षेप्येति स्यात्।

तस्मात् (१) व्यक्तेः शब्दादेव धीसंभवे आक्षेपकल्पनमम्, (२) आक्षिप्तस्य विभक्त्यर्थान्वयानुपपत्तिः (३) उपसर्जनीभूतायाः व्यक्तेः क्रियान्वयानुपपत्तिः (४) गौरस्तीत्यादावक्षेपबीजाभावेन व्यक्तिप्रतीत्यनुपपत्तिः (५) आक्षेप्यानुपपत्तिः (६) आक्षेपकानुपपत्तिश्चेति दोषषट्कम्।

नैयायिकोक्तविशिष्टशक्तिभङ्गः[७६]

जात्याकृतिविशिष्टव्यक्तिः पदार्थ इति नैयायिकमते दोषनवकं प्रसज्यते। तथा हि —

(१) गुणकर्मादिपदेषु तद्विशेषस्पर्शरूपउत्क्षेपणावक्षेपणादिपदेषु द्रव्यविशेष-वाच्यात्मादिपदेषु चावयवसंयोगविशेषरूपाकृतेरेवाभावात्। द्रव्यादिपदेषु ब्राह्मणादि पदेषु चानुगताकृतेरभावाच्च।

(२) किं च गवादिपदैर्जात्याकृतिवत् सर्षपादिपदैः परिमाणादेः, द्रव्यादिपदैः द्रव्यत्वसमनियतगुणादेः, पृथिव्यादिशब्दैः पृथिवीत्वसमनियतगन्धादेरपि प्रतीत्या तत्तज्जात्याकृतिभ्यामिव परिमाणगुणगन्धादिनापि विशिष्टा व्यक्तिः सर्षपद्रव्य-पृथिव्यादिपदार्थः स्यात्।

(३) किं चाकृतेरपि गोशब्दार्थत्वे गौः सास्नादिमतीति सहप्रयोगानुपपत्तिः।

(४) किं च विशिष्टा व्यक्तिः पदार्थः इति कोऽर्थः?

अनेका गोव्यक्तयः एकेन गोत्वेनेव जात्यादित्रयमेकेन क्रोडीकृतमेकपदार्थ इति वा, यद्वा जात्यादिविशिष्टमेकमेव शक्यं, प्रवृत्तिनिमित्तं विशिष्टत्वमिति; किं वा व्यक्तिरेव शक्या, जात्याकृती तु प्रवृत्तिनिमित्ते इति। नाद्यः, जात्याकृतिव्यक्तिषु तिसृषु अनुगतस्य एकस्य क्रोडीकारकस्याभावात् अभानाच्च। न द्वितीयः

---

[७६] त.ता. द्वितीयभागः. पृ. २३८

व्यक्तिवत् विशिष्टत्वस्य आनन्त्यात्, विशिष्टत्वस्य चाजातित्वेनाननुगतत्वात् अननुगमतादवस्थ्यात्।

किं चैवं शाब्दधीर्विशिष्टविषयिका विशिष्टत्वप्रकारिका च स्यात्। न चेष्टापत्तिः। गोविशेष्यकगोत्वप्रकारकबुद्धेरेवानुभवात्। न तृतीयः, त्वन्मते आख्याते कृतित्वजातेरिवात्रापि लाघवात् गोत्वजातेरेव प्रवृत्तिनिमित्तत्वौचित्यात्। तथा च द्वयोः प्रवृत्तिनिमित्तत्वे गौरवम्।

(५) किं च जात्याकृत्योर्मध्ये एकविशेषितापरस्य प्रवृत्तिनिमित्तत्वे द्वयोरपि व्यक्त्यैव संबन्धस्य प्रतीत्या अन्योन्यं विशेषणविशेष्यभावस्याप्रतीतेरनुभवविरोधः।

(६) समुदितयोर्द्वयोः प्रवृत्तिनिमित्तत्वे जातिवत् आकृतेरपि प्रवृत्तिनिमित्तत्वेन गोशब्दोत्तरत्वप्रत्ययेनाकृतेरपि प्रतीत्यापत्त्या "गोत्वं नित्यं, गोत्वं जातिः" इति धीर्बाधितविषया स्यात्। आकृत्यंशे नित्यत्वजातित्वयोरभावात्।

(७) अपि च जात्याकृत्योरुभयोः प्रवृत्तिनिमित्तत्वे अनुगताननुगताभ्यां कृष्यमाणा व्यक्तिः त्रिशङ्कुवत् नानुगता नाप्याननुगतेति स्यात्। यथा त्रिशङ्कुर्नाम राजा विश्वामित्रेण स्वर्गं प्रापितोऽपि देवैः पात्यमानः विश्वामित्रेण प्रतिरुध्यमानो न पतति, देवैर्निष्कास्यमानो न स्वर्गं प्राप्नोति; तथा व्यक्तिरप्यनुगतत्वाननुगतत्वबहिर्भूता स्यात्। तथा च व्यक्तौ शक्तिग्रहो दुश्शक आपद्येत। अतः केवलजातेरेव प्रवृत्तिनिमित्तत्वमुपेयम्।

(८) उभयोः जात्याकृत्योः प्रत्येकं निमित्तत्वे पिष्टकमय्यो गाव इत्यत्र गौणलाक्षणिकत्वं न स्यात्। गोत्वमनित्यमित्याद्यपि प्रमाणं स्यात्, आकृतेरनित्यत्वात्। गोशब्दस्य गोत्वशब्दस्य च अक्षशब्दवत् अक्षत्वशब्दवच्च नानार्थत्वं स्यात् — इति दोषत्रयम्।

तस्मात् जात्याकृतिविशिष्टव्यक्तेः पदार्थत्वे (१) गुणकर्मादिपदेष्वननुगमः (२) सर्षपादिशब्दानां परिमाणविशेषविशिष्टे शक्त्यापत्तिः (३) सहप्रयोगानुपपत्तिः (४) गौरवम् (५) एकविशिष्टाया अन्यस्याः प्रवृत्तिनिमित्तत्वेऽनुभवविरोधः (६) स्वतन्त्रयोः समुदितयोः प्रवृत्तिनिमित्तत्वे गोत्वं नित्यमित्यादेरप्रामाण्यापत्तिः (७) त्रिशङ्कुवत् उभयतः पाशा रज्जुः। (८) प्रत्येकं निमित्तत्वे दोषत्रयमिति दोषदशकम्।

तस्मात् व्यक्तय एव वाच्याः, जात्यादिकं तु प्रत्येकं तेषु तेषु शब्देषु प्रवृत्तिनिमित्तमिति तर्कताण्डवकाराः।

अरुणाधिकरणसरणिविवरणी इति ग्रन्थे जातिमात्रशक्तिवादे दोषोद्भावनपूर्वकं जातिविशिष्टव्यक्तौ शक्तेः समर्थनम्

सत्यं त्रिविधाः जातिशब्दाः गुणशब्दाः क्रियाशब्दाश्चेति। न चैतावता तेषां तत्तन्मात्रवाचित्वं कल्पयितुं शक्यम्। प्रयोगप्रतीतिभ्यां विरोधात्। तथा हि- "गामानय शुक्लां दण्डेन" "अग्नीषोमीयं पशुमालभेत" "गौश्चाश्वश्चाश्वतरश्च गर्दभश्च" "ब्राह्मणो न हन्तव्यः" "व्रीहीन् प्रोक्षति" इत्यादिकं सर्वं लौकिकं वैदिकं च वाक्यं क्रियागर्भतया जात्यादिविशिष्टव्यक्तिगोचरमेव। न हि केवलं जाति-गुणादिकमानेतुमालब्धुं दातुं हन्तुं प्रोक्षितुं वा शक्यम्। अतः प्रयोगप्रतीतिभ्यां जात्यादिविशिष्टे तावत् वृत्तिरङ्गीकरणीया।

तत्र यदुक्तं प्रथमोपस्थितत्वात् लाघवाच्च विशेषणमात्रे शक्तिरिति, तद्विपरीतम्। आश्रयप्रतीतिमन्तरा जातिगुणयोरेवाप्रतीतेः। दृष्ट एव हि प्रथमं व्यक्तिमात्रे पश्चात् व्यञ्जकविशेषात् जातिगुणादिप्रत्ययः।

किं च चक्षुस्संयुक्तसमवेतजातिविषयकचाक्षुषत्वावच्छिन्नं सति चक्षुस्संयुक्त-समवायः कारणम्। तस्य च संयोगपूर्वकत्वात् द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुस्संयोगस्य कारणत्वात् जात्यादिप्रतीतेः प्राक् सामग्रीवशात् जायमानं द्रव्य-प्रत्यक्षं विना बाधकेन नापहर्तुं शक्यम्। यदि च संयोगस्यान्याधीनस्थितिकत्वेन कादाचित्कत्वेऽपि नित्यस्य समवायस्य प्रागेव सिद्धत्वात् युगज्जातिव्यक्त्योः प्रतीतिरविरुद्धेत्युच्यते तथापि न जातेः प्रथमोपस्थितत्वम्।

अथ स्यात् — अयं दण्डीति ज्ञानवत् अयं घट इति ज्ञानमपि विशिष्टज्ञानत्वात् विशेषणज्ञानपूर्वकम्। विशेषणज्ञानं च न विशिष्टार्थविषयकम्, अनवस्थाप्रसङ्गात्। अतो जातिगुणादिमात्रविषयकं तदिति प्रथमोपस्थिति-र्जात्यादेर्दुर्वारेति। सत्यम् विशिष्टज्ञानं विशेषणज्ञानजन्यमिति। तदेव च विशेषण-ज्ञानं न जात्यादिमात्रविषयकम् जात्यादिप्रत्यायकसामग्र्याः तदाश्रयप्रत्यायक-सामग्रीघटितमूर्तिकतया तज्जन्यज्ञानस्य जात्यादिविषयकत्ववत् तदाश्रयविषयकत्व-स्यापि सामग्रीवशसंपन्नस्य दुरपह्नवत्वात्। न चैवमनवस्था, विशेषणज्ञानस्य वैशिष्ट्याविषयकत्वेन विशिष्टज्ञानवैलक्षण्यादिति प्राञ्चः।

नवीनास्तु — संयोगसमवायाभ्यां व्यक्तितद्वृत्तिधर्मयोरिव संयुक्तविशेषणता-विशेषसंनिकर्षेण वैशिष्ट्यस्यापि प्रतीतेरनिवार्यत्वात् न वैशिष्ट्याविषयकत्वं प्रथमज्ञानस्य। किं तु निरवच्छिन्नविषयताकत्वमेव। विशिष्टज्ञानत्वं तु अवच्छिन्न-विषयताकत्वमिति नानवस्थाप्रसङ्ग इत्याहुः। अतो विशेषणज्ञानकारणत्वबलादपि न जात्यादिमात्रस्य प्रथमोपस्थितत्वम्।

किं च न विशेषणज्ञानं जात्यादिविषयकमेवेति निश्चेतुं शक्यम्। विशेषण-विशेष्यभावे कामचारात्। घटे घटत्वम् इत्यादौ हि व्यक्तिरेव जातिविशेषणत्वेन प्रतीयते।

न च तत्रापि घटे इत्यंशे जातिर्विशेषणतया भासत एवेति वाच्यम्। तथा सति घटो घट इत्यादौ तद्धर्मविशिष्टे तद्धर्मस्य आकाङ्क्षाविरहेणान्वयानुपपत्तिवत् तद्धर्मविशिष्टस्य तद्धर्मेऽप्याकाङ्क्षाविरहेणान्वयानुपपत्तिप्रसङ्गात्। तद्धर्मवृत्ति-प्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेनान्वयबोधं प्रति तद्धर्मभेदस्य कारण-त्वाङ्गीकारवत् तद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धिं प्रति तद्धर्मभेदस्य कारणत्वाङ्गीकाराच्च।

तथा च घटे घटत्वमिति बुद्धौ केवलव्यक्तेः विशेषणतया भानात् तज्ज्ञानमपि पूर्वभावीति जातिज्ञानस्यैव पूर्वभावित्वमिति न नियमः।

अथ स्यात्[७७] — अस्तु प्रत्यक्षस्थले सामग्रीवशात् व्यक्तेरप्युपस्थितिः। शाब्द-बोधस्थले तु जातेरेव प्रागुपस्थितिरावश्यकी, तदभावे प्रवृत्तिनिमित्तापरिज्ञानेन वाच्यत्वस्यैवानिश्चयात्। न च प्रवृत्तिनिमित्तधर्मस्य धर्मिणि संबन्धज्ञानस्यापि तत्रापेक्षितत्वात् तज्ज्ञानस्य च संबन्धिद्वयज्ञानपूर्वकत्वात् व्यक्तिप्रतीतिरप्यावश्य-कीति वाच्यम्। तथापि जातेः प्रथमोपस्थितेरवारणादिति।

अत्रोच्यते। प्रवृत्तिनिमित्तोपस्थितिः किं प्रात्यक्षिकी विवक्षिता उत शाब्दी। आद्ये तस्याः प्रागुक्तयुक्त्या आश्रयोपस्थितिमूलकत्वं दुर्वारम्। द्वितीये च तदुपस्थितिः किं शब्दान्तरेण उत प्रकृतेनैव शब्देन। नाद्यः, अनवस्थानात्। घटत्वादिपदानामपि प्रकृतिप्रत्ययसमुदायरूपतया "तस्य भावस्त्वतलौ" इति सूत्रेण भावार्थविहितत्वप्रत्ययान्ततया प्रकृत्यर्थज्ञानाधीनत्वात् भावशब्दप्रवृत्तिनिमित्त-परतया आत्माश्रयाच्च।

अत एव न द्वितीयः। किं च शब्दात् प्रवृत्तिनिमित्तोपस्थितिः किं शक्त्या उत वृत्त्यन्तरेण। नाद्यः, प्रवृत्तिनिमित्तोपस्थितेः प्राक् शक्तेरज्ञानात्, अत एव न द्वितीयः। शक्त्यभावे तन्मूलकवृत्त्यन्तरस्याप्यभावात्।

किं च केयं जातिर्नाम? किं सास्नाद्यवयवसंस्थानविशेष एव? किं वा तदनाश्रयात् व्यावृत्तः तदाश्रययावदनुवृत्तः तद्भिन्नः तद्व्यङ्ग्यो धर्मविशेषः? आद्ये संस्थानविशेषस्य द्रव्येणानतिभेदात् द्रव्यप्रतीतिं विना संस्थानप्रतीत्यभावात् द्रव्यप्रतीतिः प्रागवश्यकी। द्वितीये च व्यञ्जकप्रतीतेः प्राक् जातिग्राहकसामग्र्यभावेन

---

[७७] अ.स.वि. पृ. ५८

जातिप्रतीतिरेवाशक्या। अत एव दूरस्थे वृक्षादौ किमयं चूतः पनसो वेति संदेहः। वेदेऽपि "न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणाः वेति" इत्यादौ व्यञ्जकाप्रतीतिमूलक एव संशय इति "शास्त्रदृष्टविरोधाच्च" इत्यादावुक्तम्।

इयांस्तु विशेषः प्रथमे द्रव्यंप्रत्ययमात्रापेक्षो जातिप्रत्ययः, द्वितीये तु द्रव्यसंस्थानोभयप्रतिपत्तिसापेक्ष इति।

किं च घटो नास्ति, घटो नश्यति, घटमानय, घटेन जलमाहर, घटाय यतते, घटादन्यः पटः, घटस्य स्वरूपम्, घटे रूपम् इत्यादौ सर्वत्र प्रतियोगित्वकर्मत्वकरणत्वादिकं सर्वमपि द्रव्यमात्रान्वय्येवेति जातिवाचित्वे सर्वत्र लक्षणायाः कल्पनीयतया गौरवात्।[७८] क्वापि जातौ मुख्यव्यवहारादर्शनेन लक्षणाकल्पनानुन्मेषाच्च। सत्यपि प्रचुरप्रयोगे लक्षणाकल्पने च वाचकलाक्षणिकवैपरीत्यापत्तेश्च। व्रीहिभिर्यजेत इत्यादौ सर्वत्र व्रीह्यादिपदानां लाक्षणिकत्वे सति 'न विधौ परः शब्दार्थः' इति न्यायस्य निर्विषयकत्वापाताच्च।

एतेन अनन्यथासिद्धप्रयोगस्यैव शक्तिग्राहकत्वात् आक्षेपलक्षणादिभिः अन्यथासिद्धव्यक्तिप्रतीतिकः शब्दप्रयोगः न व्यक्तौ शक्तिं कल्पयितुं शक्नोतीति परास्तम्।

प्रचुरतरप्रयोगस्य केनापि रूपेणान्यथासिद्ध्यसहिष्णुत्वात्। दृष्टा हि गङ्गाग्र्यादिपदानां प्रयोगप्राचुर्यात् प्रवाहज्वलनादौ शक्तिः, तदभावात्तु तीरमाणवकादौ लक्षणा च।

तदेवं गौर्नित्येत्यादिक्वाचित्कप्रयोगात् जातावेव गवादिपदानां युक्ता लक्षणेति न तदनुरोधात् प्रचुरप्रयोगविषयेषु व्यक्तिषु लाक्षणिकत्वं युक्तमाश्रयितुम्।

किं च साधकाभावात् बाधकसद्भावाच्च न जातिमात्रस्य गवादिशब्दवाच्यत्वम्। शक्तिग्राहकेषु व्याकरणादिषु तावत् गवादिपदानां जातिमात्रशक्तौ न किंचित् प्रमाणमुपलभामहे।

व्याकरणं तावत् "गमेर्डोस्" इत्यादिकं गमनादिक्रियाकर्तृविशेषवाचित्वं गवादिपदानां प्रदर्शयति। जातिस्तु अमूर्तत्वेन न क्रियाकर्त्री इति न तस्याः वाच्यत्वम्।

"तस्य भावस्त्वतलौ" इत्यादि वाच्यतावच्छेदकगोचरत्वतलादिविधानं च त्वतलाद्यन्तगोत्वादिपदाभिधेयायास्तस्याः गवादिपदावाच्यत्वं गमयति। अत एवोक्तम् — "यस्य हि भावात् द्रव्ये शब्दविशेषस्तदभिधाने त्वतलौ इति। एवं

---

[७८] अ.स.वि. पृ. ६१

व्यक्तिगोचरत्वोपजीविषु सरूपादिसूत्रेषु. सर्वत्र व्यक्त्याख्यायाम् इत्यनभिधानात् "जात्याख्यायामेकस्मिन् बहुवचनम्"[७९] इति क्वाचित्कनिर्देशाच्च सर्वत्र व्यक्तेरेवाभिधेयत्वं गम्यते एकार्थीभावादयश्च सर्वेऽपि व्यक्तिवाचित्वमेवावगमयन्ति।

"चादयोऽसत्त्वे"[८०] इत्यादिपर्युदासाच्च व्यक्तिर्वाच्येत्यध्यवसीयते।

एवं "तस्यापत्यम्"[८१] "तत आगतः"[८२] "तेन रक्तं रागात्"[८३] इत्यादयः परे परार्धं निर्देशाः "ध्रुवमपायेऽपादानम्"[८४] इत्याद्यपादानसंज्ञाविधयश्चात्रैव उपष्टम्भकाः।

उपमानं च सादृश्यप्रतीतिमुपजीव्य प्रवर्तमानं न व्यक्तिवाचकतामन्तरेण घटते।

लिङ्गविशेषनिर्णयविशेषपुरस्कारेण प्रवृत्तः कोशोऽपि तद्योग्यव्यक्तिवाचितामेव कल्पयति।

व्यवहारस्याप्यानयनादियोग्यव्यक्तिवाचकत्वग्राहकत्वं स्पष्टमेव।

वाक्यशेषोऽपि "यत्रान्या ओषधयो म्लायन्ते अथैते मोदमानास्तिष्ठन्ति" इत्यादि मोदमानत्वसिद्ध्यादियोग्यव्यक्तिविशेषमेव विविनक्ति।

विवरणमपि सर्वं क्रियागर्भतया नामूर्तजात्यालम्बनम्। प्रसिद्धपदसांनिध्यमपि "वसन्ते सहकारे पिको मधुरं रौति" इत्यादि द्रव्यवाचित्व एव स्वरसम्।

अतो न गवादिशब्दस्य जातिमात्रवाचित्वे किंचिदस्ति साधकम्।

बाधकानि च भूयांसि उपलभ्यन्ते। तथा हि — प्रसिद्धमेव तावत् पदान्तरान्वयदौर्घट्यरूपं बाधकम्। किं च यदि जातिरेव गवादिशब्दार्थः तदा जातिर्व्यक्तिनिष्ठेतिवत् गौर्व्यक्तिनिष्ठेत्यपि प्रयोगः स्यात्।

गवादिपदानां जातिमात्रविषये प्रयोगे त्वलादिनैरपेक्ष्यं च स्यात्। न हि गङ्गादिपदानि प्रवाहविषयप्रयोगे भावप्रत्ययान्तान्युपलभ्यन्ते।

तत्तल्लिङ्गता च शब्दानामाकस्मिकी स्यात्। न हि लाक्षणिकानां लक्ष्यानुसारात् लिङ्गभेदः। गङ्गापदादावदर्शनात्। एवं वचनभेदोऽपि न स्यात्, द्वित्वबहुत्वयोस्तत्र सर्वथा अनन्वयात्। न च आक्षिप्तद्रव्याभिप्रायकः तन्निर्देश इति शङ्क्यम्।

---

[७९] पा.सू. १.२.५८
[८०] पा.सू. १.४.५७
[८१] पा.सू. ४.१.९२
[८२] पा.सू. ४.३.७४
[८३] पा.सू. ४.२.१
[८४] पा.सू. १.४.२४

पुरुषमानय, मातरमभिवादय इत्यादौ आक्षिप्तपित्रादिवाचिनां तवेत्यादीनां विशेषणतयैव भानदर्शनेन सुबर्थस्य संख्यादेः प्रकृत्यर्थविशेष्यान्वयिनः प्रकृत्यर्थजात्याक्षिप्तद्रव्यान्वययित्वायोगात्। आक्षिप्तस्य तस्य आक्षेपकविशेषणतयैव प्रतीतेः।

एतेन आक्षिप्तद्रव्याभिप्रायेण सर्वोपपत्तिः इत्यपि प्रयुक्तम्।

किं चैवं खण्डो गौः, शुक्लो गौः इत्यादि सामानाधिकरण्यं न घटते, खण्डत्वादेः जातावनन्वयात्। अत एव च "अकूटयाकर्णयाकाणया" इति श्रौतनिर्देशाश्चानुपपन्नाः स्युः।

यत्तु लक्ष्यद्रव्याभिप्रायेण तदुपपादनम्, तदपि लक्ष्यस्य क्वापि वाक्ये विशेषणप्रयोगादर्शनात् उपेक्ष्यम्। न हि गङ्गायां घोष इत्यादौ तीरासाधारणं विशेषणं केनापि वाक्ये प्रयुज्यते। प्रत्युत गभीरायां नद्यां घोष इत्यादौ शक्यार्थाभिप्रायकमेव विशेषणं प्रयुज्यते।

किं च यदि जातिवाचकादेव गवादिशब्दात् व्यक्तिः आक्षेप्या, तदा गोत्वादिशब्दादपि कुतो नाक्षिप्यते। आक्षेपिकाया जातेरुभयत्र प्रतीत्यविशेषात्। शब्दसामर्थ्यविशेषात् गोशब्दात् आक्षेपतो व्यक्तिप्रतीतिः न गोत्वशब्दात् इति चेत् तर्हि शक्तिरेव तत्सामर्थ्यमिति कृतं विवादेन। न हि शब्दस्य अर्थविशेषप्रतिपादने शक्तिमन्तरेणान्यत् सामर्थ्यमस्ति। तस्मात् अपृथक्सिद्धविशेषणाभिधायिनां शब्दानां विशेष्यपर्यन्तैव शक्तिरादर्तव्येति न प्रयोगप्रत्यययोरन्यथासिद्धिशङ्का युक्ता।

किं च यथा यववराहाधिकरणे 'यवमयश्चरुर्भवति' 'वाराही उपानहावुपमुञ्चते' 'वैतसे कटे प्राजापत्यान्त्संचिनोति' इत्यादौ यववराहादिशब्दानामार्यानार्यभेदेन प्रियङ्गुपायसादिषु प्रयुज्यमानानामार्यप्रसिद्धिप्राचुर्यात् 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमानास्तिष्ठन्ति' इत्यादिवाक्यशेषसहकृतात् दीर्घशूकादौ शक्तिः प्रियङ्ग्वादौ लक्षणेत्युच्यते, यथा च पीलुशब्दस्य वृक्षे प्रचुरप्रयोगाच्छक्तिः गजे तु क्वाचित्कः प्रयोगः तत्सादृश्यात् गौण इत्युच्यते, यथा वा दशमे "चरुर्हविर्विकारः स्यात्" इत्यत्र याज्ञिकप्रचुरप्रसिद्ध्या चरुशब्दो हविर्विशेषे मुख्यः स्थाल्यां तु तत्संबन्धात् लाक्षणिक इत्युच्यते, एवमत्रापि प्रचुरप्रयोगात् गवादिपदानां व्यक्तौ शक्तिः, गौर्नित्या अनुवृत्तो गोव्यवहारः इत्यादिक्वाचित्कस्तु जातिविषयकः प्रयोगः विशेषणमात्रलक्षणया नेतव्यः। तस्मात् जातिविशिष्टव्यक्तावेव शक्तिः।

यत्तु व्यक्त्यानन्त्यात् शक्त्यानन्त्यमिति; तत्रेदं वक्तव्यम्। अस्तु शक्तिविषयव्यक्त्यानन्त्यम्, तथापि कथं शक्तिभेदः। न ह्ययमस्ति नियमः यत् विषयभेदे विषयिभेद इति। ज्ञानेच्छादिष्वनेकविषयकेष्वपि ऐक्यदर्शनात्। न हि समूहालम्ब-

नादिषु विषयभेदवत् ज्ञानभेदः प्रत्यक्षः। यदि च तत्रानेकविषयताप्रयोजक-सामग्रीसाचिव्यात् एकमेव ज्ञानमनेकविषयकमुत्पद्यत इति कल्प्यते, तदा प्रकृतेऽपि तद्बलात् एकैव शक्तिः सर्वविषयणी कल्प्यताम्।

न चात्रातीतानागतसर्वव्यक्त्युपस्थापकसामग्र्येव असिद्धेति वाच्यम्। गोत्वादि-सामान्यस्यैव तदुपस्थापकत्वात्। तथा च यथा महानसीयधूमादिगतधूमत्वादि-सामान्येन यावद्धूमव्यक्त्युपस्थितौ तत्र वह्निव्याप्तिग्रहः, यथा वा दण्डघटाद्योः कार्यकारणभावग्रहे दण्डत्वघटत्वादेरवच्छेदकत्वकल्पनात् अतीतानागतदण्डघटा-दावपि तदवच्छेदकधर्मसंबन्धात् कारणत्वकार्यत्वाद्यन्वयः, यथा वा व्रीह्यादिषु तण्डुलादिद्वारकक्रत्वपूर्वसाधानत्वावच्छेदेन प्रोक्षणादिसंबन्धात् वाक्यान्तरविहिते-ऽपि यवादौ अन्वयितावच्छेदकधर्मसंबन्धात् प्रोक्षणादिसंबन्धः, तथा गोत्व-सामान्येन उपस्थितासु सर्वासु गोव्यक्तिषु शक्तिग्रहेण वा पुरोवर्तिन्यामेव गोव्यक्तौ गोत्वावच्छेदेन शक्तिग्रहाद्वा तथाविधगोत्ववत्तयावगतेषु व्यक्त्यन्तरेषु शक्तिग्रहः सुलभः। गोत्वादेः शक्यतावच्छेदकत्ववत् शक्यत्वमपीष्टमेवेति न कापि हानिः।

अपि च विनाप्यनुपपत्त्यादिप्रतिसन्धानं जातिविशिष्टेऽन्वयबोधदर्शनेन व्यक्तौ लक्षणाकल्पने बीजाभावः।[८५] संबन्धितावच्छेदकाप्रतिपत्तौ संबन्धरूपलक्षणायाः दुर्ज्ञेयतया गोव्यक्त्यादौ अन्यस्य संबन्धितावच्छेदकस्य अभावेन गोत्वादेरेव संबन्धितावच्छेदकत्वे लक्ष्यतावच्छेदकस्य तस्य शक्यत्वानुपपत्तिश्च। 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा' इत्युक्तलक्षणावृत्तिस्वरूपविरोधेन गोत्वेन रूपेण लक्ष्यत्वायोगश्च। अन्वयितावच्छेदकावच्छिन्नत्वेनानुपस्थिते गोत्वादौ पदान्तरार्था-न्वयस्यैवाप्रसक्त्या तदन्यथानुपपत्तिरूपकल्पनामूलविरहेण लक्षणाकल्पनानुन्मेषश्च।

शक्यलक्ष्ययोः जातिव्यक्त्योः युगपत्प्रतीतौ स्वीकृतायां युपद्वृत्तिद्वयविरोधः, क्रमेण प्रतीतौ विरम्यव्यापारत्वप्रसङ्गः, "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायविरोधः। अन्यथा सर्वादिसूत्रे तपरसूत्रे . हलन्त्यम् इत्यादौ च तत्तदर्थान्तरप्रतीत्यर्थं तन्त्रावृत्त्येकशेषान्यतमाश्रयणस्य क्लेशैकफलत्वप्रसङ्गात्।

अपि च शक्यलक्ष्ययोः क्रमिकप्रतीतिविषयत्वेऽपि तयोः परस्परमन्वय-बोधानुपपत्तिः। एकहरिपदबोध्ययोः अश्वसूर्ययोः परस्परमाधाराधेयभावेनान्वयबोध-वारणाय तत्पदीयवृत्तिविशेष्यवृत्तिप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति तदितरपदीयवृत्तिज्ञानजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुतायाः कल्पनीयतया प्रकृते तादृशहेत्वभावात्।

---

[८५] अ.स.वि. पृ. ६७

नामार्थनिष्ठाभेदातिरिक्तसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्द-बोधं प्रति विशेष्यतासंबन्धेन प्रत्ययजन्योपस्थितेर्हेतुतानिर्णयेन नामार्थयोर्जाति-व्यक्त्योर्भेदेनान्वयबोधस्याव्युत्पन्नत्वाच्च।

एवकारार्थीभूतान्ययोगव्यवच्छेदाद्योः खण्डशः शक्तिस्वीकारमत इव व्युत्पत्ति-वैचित्र्याश्रयणे कल्पनागौरवाच्च। निपातातिरिक्तनामार्थयोरेव भेदेनान्वय इति नियमेन निपातरूपैवकारार्थयोः भेदान्वयसंभवेऽपि इह निपातातिरिक्तपदार्थयोः जातिव्यक्त्योः तथा अन्वयासंभवाच्च।

अपि चान्वयितावच्छेदकरूपेणानुपस्थितगोव्यक्तौ गोत्वस्यान्वयासंभवः। न च गोत्वस्यान्वयितावच्छेदकतया प्रकारतया च भानमस्तु इति वाच्यम्। घटो घट इति घटत्ववति घटत्वान्वयबोधवारणाय तद्धर्मवृत्तिप्रकारतानिरूपितविशेष्यता-वच्छेदकतासंबन्धेन शाब्दबोधं प्रति तद्धर्मभेदस्य हेतुतया गोत्वे गोत्वभेदविरहेण गोत्वविशिष्टे गोत्वान्वयाङ्गीकारायोगात्। विशिष्टशक्तिवादे तु नैते दोषा इति जातिविशिष्टव्यक्तिरेव वाच्या न जातिमात्रम्।

अस्तु वा जातेः प्रथमोपस्थितिः, तथापि तस्याः व्यक्तिवाच्यतां प्रत्येव प्रयोजकत्वोपपत्तेः न स्वमात्रवाच्यतां प्रति प्रयोजकत्वम्।

यदपि अन्यलभ्यायाः व्यक्तेः न वाच्यत्वं कल्पयितुं युक्तमित्युक्तम्। तदयुक्तम्। अनुपपत्त्यप्रतिसन्धानेऽपि गवाद्यनुभवात् गौर्नित्येत्यादौ व्यक्तौ नित्यत्वान्वयानुप-पत्तिप्रतिसन्धानजन्यजातिप्रतीतेः शक्तिग्रहजन्यत्वं, गामानयेत्यादौ अन्वयानुपपत्त्य-प्रतिसन्धानजन्यगवादिव्यक्तिप्रतीतेः वृत्त्यन्तरमूलकत्वमिति कल्पनायाः उपहास्य-त्वाच्च। गोत्वादिशब्देनापि विनाप्यनुपपत्तिप्रतिसन्धानं गवादिप्रतीत्यापत्तेश्च।

ननु गोशब्दस्यायं महिमा यदनुपपत्तिप्रतिसन्धानं विनापि लक्ष्यार्थप्रत्याय-कत्वमिति चेन्न। गोत्वादिशब्दान्तरेषु अदृष्टस्य माहात्म्यस्य कल्पनायां प्रमाणा-भावात्। पदगतमाहात्म्यस्य शक्त्यतिरिक्तस्य दुर्वचतायाः प्रागेवोक्तत्वाच्च। तस्मात् गवादिपदानां जातिविशिष्टा व्यक्तिर्वाच्या।

पूर्वोक्तं सर्वमभिप्रेत्योक्तं च तत्त्वमुक्ताकलापे[८६] —

> जातिं व्यक्त्या विहीनां स्पृशति न धिषणा, तेन जातौ प्रवृत्ता
> शक्तिर्व्यक्तिं स्पृशेच्चेत्, स्थित इह वचसां तद्विशिष्टावगाहः।
> जातेर्बोधः स्वहेतोः स्थितिरपि हि भवेत् क्वापि गोत्वोक्तिनीत्या
> शब्दात् तत्पारतन्त्र्यं स्फुरति यदि पराबोधने तन्न शक्यम्। ७७ ।

---

[८६] त.मु.क. श्लो. ७८, ७९, ८०

व्यक्तिः शब्दैर्न बोध्या यदि न खलु भवेदन्वितज्ञप्तिसिद्धिः
तच्छक्तिर्व्यक्तिमात्रे न च भवति यतः स्वोपलम्भादिबाधः।
धर्मो धर्मी च नैकं किमपि न च तयोर्भिन्नयोरप्यभेदः
तस्मात्तां तद्विशिष्टामभिदधति पदान्यन्यथा गत्यभावात्। ७८ ।

जातौ शक्तिर्लघुत्वात् भवति च वचसां भाषणं जातिमात्रे
भेदो निष्कर्षकेभ्यस्त्विह परमजहल्लक्षणाया निरूढिः।
इत्युक्तं कैश्चिदेवं यदि भवति तदोपाधिशब्देऽपि नीतिः
मन्दं वैषम्यमात्रं भवतु च नियतिः प्रत्ययैर्लक्षणायाः। ८० ।

गुणवाचकशब्दानां गुणिपर्यन्तत्वम्

गवादिशब्दवत् अरुणादिशब्दोऽपि गुणविशिष्टवाचक एवाङ्गीकर्तुं युक्तः न गुणमात्रवाचकः। तथा हि रूपरसगन्धादयः शब्दाः गुणमात्रवाचिनोऽपि द्रव्यपर्यन्तत्वविक्षायां मतुबन्ता एव प्रयुज्यन्ते रूपवान् गन्धवानिति। अमी पुनररुणादयः शब्दाः यथैव घटस्यारुणः पटस्य शुक्ल इत्यादिषु गुणमात्रे प्रयुज्यन्ते, तथैव अरुणो घटः शुक्लः पट इत्यादिषु विनैव मतुपं तद्वति द्रव्ये प्रयुज्यन्ते। तुल्यरूपयोश्च प्रयोगप्रत्यययोः एकत्रैव मुख्यत्वमपरत्र लाक्षणिकत्वं च न कल्पयितुं युक्तम्, विनिगमनाविरहात्। अन्यथा सैन्धवादिष्वपि तदापत्तेः नानार्थसामान्य-विलयापत्तिः। अत एव च यववराहादिषु पील्वादिषु च प्रसिद्धेः आर्यानार्यगतत्वेन वाक्यशेषानुगुण्यतदभावाभ्यां च वैषम्यं यत्नेनोपपाद्यते।

एतेन गुणवचनेभ्यो मतुपो लुगनुशासनं द्रव्ये निरूढलक्षणां कल्पयतीत्युक्तिरपि निरस्ता। यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन प्रत्ययलोपे तत्प्रकृतिभागस्यैव तदभिधायकत्वनैयत्यस्य वैयाकरणमतसिद्धत्वात् इति।

तत्र मुक्तावलीकारमतम्[८७]

एवं कोशादपि शक्तिग्रहः। सति बाधके क्वचित् त्यज्यते। यथा नीलादिपदानां नीलरूपादौ तद्विशिष्टे च शक्तिः कोशेन व्युत्पादिता "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इति। तथापि लाघवात् नीलादावेव शक्तिः, नीलादिविशिष्टे तु लक्षणेति।

दिनकरी — लाघवादिति। नीलादिमत्त्वापेक्षया नीलत्वादिजातेः लघुतया शक्यतावच्छेदकत्वादिति भावः। नीलादिविशिष्टे तु लक्षणेति। "गुणवचनान्मतुपो

---

[८७] मुक्तावली पृ. ३६७

र्लुगष्टः'' इति वचनात् लुप्तेन मतुपैव विशिष्टार्थबोधसंभवेऽलं लक्षणयेत्यपि वदन्ति।

रामरुद्री — लघुतयेति। अनन्तानां नीलत्वादिविशिष्टानां नीलादिरूपाणां शक्यतावच्छेदकत्वकल्पनमपेक्ष्य एकस्याः नीलत्वादिजातेः स्वरूपतः शक्यतावच्छेदकत्वे लाघवात्, जातेः स्वरूपतोऽपि भानसंभवेन स्वरूपतस्तथात्वे बाधकाभावादिति भावः। गुणवचनादिति। गुणवाचकान्नीलादिशब्दात् मतुपः तदस्यास्तीत्यर्थे विहितस्य मतुबर्थकप्रत्ययस्य लोपो व्याकरणप्रणेतृभिरिष्ट इत्यर्थकात् गुणवचनादिति व्याकरणस्मृतेरपि समुदायार्थः।

अत्र च नीलो घटोऽस्तीत्यादौ सर्वत्रैव शाब्दबोधात् पूर्वं लुप्तमतुबर्थकप्रत्ययकल्पनामपेक्ष्य नीलादिरूपविशिष्टे नीलादिपदानां लक्षणाकल्पनमेव ज्यायः। किं चास्मृतमतुपः पुरुषस्य शाब्दबोधानुपपत्तेः। अनुभूयते च तादृशानुपूर्वीज्ञानात् मतुपोऽस्मरणेऽपि शाब्दबोध इति अपिवदन्तीभ्यामस्वरसः सूचितः।

भूषणसाररीत्या नामपदशक्तिविचारः

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः।

एकं - जातिः, द्विकं - जातिव्यक्ती, त्रिकं - जातिव्यक्तिलिङ्गानि, चतुष्कं - जातिव्यक्ति - लिङ्गसंख्याः, पञ्चकं - जातिव्यक्तिलिङ्गसंख्याकारकाणि प्रातिपदिकार्थ इति पक्षाः भाष्यादौ निरूपिता इत्यर्थः।

जातिरेका प्रातिपदिकार्थः इति पक्षः

तत्रादौ जातिरेका प्रातिपदिकार्थ इति पक्षो निरूप्यते। अत्र जातिपदेन तत्तत्पदार्थासाधारणो धर्मो गृह्यते। तेन अभावत्वाकाशत्वादीनां नित्यानेकसमवेतत्वरूपजातित्वाभावेऽपि न क्षति। एतस्यैव शास्त्रे स्वार्थपदेन व्यवहारः। जातेः पदार्थत्वे मानं तु — "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"[८८] इति सूत्रे "सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् सिद्धम्" इति वार्तिकम्। "आकृतिं वाजप्यायनः" इति सरूपसूत्रस्थं भाष्यं च। युक्तिरपि एकस्या जातेर्वाच्यत्वे लाघवम्। व्यक्तीनां त्वेनकासां वाच्यत्वे गौरवम्।

न च व्यक्तीनामपि प्रत्येकमेकत्वात् विनिगमनाविरह इति वाच्यम्। एवं हि एकस्यां व्यक्तौ शक्त्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेतधर्माश्रयत्वं शक्य-

---

[८८] पा.सू. १.२.५९

संबन्ध इति गौरवम्। जातौ शक्तिं स्वीकृत्य व्यक्तौ लक्षणायां तु आश्रयत्वं शक्यसंबन्ध इति लाघवात्। न च गोत्वादिजातिविशिष्टव्यक्तिषु शक्तिस्वीकारात् नानन्त्यादिदोष इति वाच्यम्। नागृहीतविशेषणन्यायात् जातेर्वाच्यताया एव युक्तत्वात्।

नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छति इति न्यायशरीरम्। विशेषणा-विषयकबुद्धिर्विशेष्यं नावगाहत इति तदर्थः। विशेष्यविषयकत्वस्य विशेषण-विषयकत्वव्याप्यत्वमिति यावत्। तथा च विशिष्टशक्तिवादे विशिष्टशक्तिग्रहस्य विशेषणविषयकत्वावश्यकतया तदुभयविषयकत्वस्य पदार्थोपस्थित्यादिकारणता-वच्छेदकत्वकल्पनापेक्षया विशेषणविषयकत्वमात्रस्यैव तदवच्छेदकत्वकल्पना लाघवादुचितेति जातावेव शक्तिः सिध्यति।

व्यक्तिबोधस्तु लक्षणया। एवं च तत्र विक्त्यर्थान्वयोऽप्युपपद्यते। आक्षेपात् व्यक्तिबोध इति तु न। आक्षेपलभ्यार्थे विभक्त्यर्थान्वयासंभवात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः। तदुक्तम् —

> गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
> शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत्। इति।

ननु व्यक्तिलक्षणाभ्युपगमे युगपद्वृत्तिद्वयविरोध इति सिद्धान्तभङ्गः, गौरस्तीति वाक्यात् अनुभूयमानव्यक्तिबोधानुपपत्तिश्च लक्षणाबीजस्यान्वयानुपपत्तेस्तत्राभावात् इति चेत् — न। सति तात्पर्ये गङ्गायां घोषमत्स्यौ स्तः इत्यत्र वृत्तिद्वयस्य सर्वैरभ्युपगमात् तादृशन्यायः युगपत् शक्तिः तात्पर्याविषये लक्षणा च नेत्येवंपर इति तद्विरोधाभावात्। तात्पर्यानुपपत्तिसत्त्वाच्च न व्यक्तिलक्षणानुपपत्तिः। युगपद्वृत्ति-द्वयविरोधाभ्युपगमे तु जातिव्यक्त्योरभेदपक्षमुपगम्य विभक्त्यर्थान्वय उपपदानीयः तदुक्तम् —

> तेन तल्लक्षितव्यक्तेः क्रियासंबन्धचोदनात्।
> जातिव्यक्त्योरभेदो वा वाक्यार्थेषु व्यवस्थितः। इति।

वस्तुतस्तु जातिविशेष्यकशक्तिग्रहस्य जातिविशिष्टव्यक्तिशाब्दबोधे हेतुत्व-कल्पनात् न व्यक्तिभानानुपपत्तिः नापि अशक्यभानापत्तिः, तस्य तद्वैशिष्ट्याभावात् इति जातिशक्तिवादविष्कर्षः।

अन्ये तु जातिशक्तिवादमित्थमुपपादयाम्बभूवुः। मास्तु व्यक्तेर्भानम्। आनय-नादिक्रिया केवलायां जातावसंभवन्ती व्यक्तिसाहित्येन निष्पाद्यते। समाहारे

पाणिपादसाहित्येन वादनक्रियावत्। तदुक्तं "तद्धितार्थ"[८९] इति सूत्रे भाष्ये — आकृतावालम्भनादीनां संभवो नास्तीति कृत्वा तत्सहचरिते द्रव्ये भविष्यति। यथा अग्निरानीयतामित्युक्ते केवलस्याग्नेरानयनासंभवात् अचोदितमपि पात्रमानीयते। एतदेवाग्नेरानयनं यत् पात्रस्थस्य। तथा आकृतावालम्भनादीनि चोद्यमानानि सामर्थ्यात् साहचर्यात् द्रव्येऽभिनिविशन्ते। सर्व एवाकृतेर्योगोऽन्तर्भावितद्रव्याया इति द्रव्यद्वारकः संबन्धः संपद्यते" इति। साहचर्यं संबन्धः। सरूपसूत्रे भाष्येऽपि स्फुटोऽयमर्थः। हरिरप्याह — "व्यक्तौ कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते" इति।

गोत्वादिपदानां तु गोत्वादिधर्मिवृत्तिधर्म एव शक्तिरिति न तत्र गोविशेष्यको बोधः। जातेराश्रयावियोगेऽपि केवलायास्तस्याः शब्दवाच्यत्वं नानुपपन्नम्। जलादौ दृश्यमानस्य मुखस्य स्वस्थानवियोगेऽपि मुखादिपदबोध्यत्ववत्। शक्यतावच्छेदकता तु जातिगतधर्मस्यैवेति।

इदमपि मतं जात्या व्यक्त्याक्षेपे पर्यवस्यति। तच्च "न चापदार्थे प्रत्ययार्थान्वय" इति दूषणग्रस्तम्।

केवलव्यक्तिशक्तिवादः

यद्वा केवला व्यक्तिरेव शब्दार्थः। केवलव्यक्तिपक्षे एव अण्-ग्रहणस्य एकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात्। जातिपक्षे अत्वादिजातिविशिष्ट-सर्वग्रहणसंभवात् अण्-ग्रहणस्य एकेनैव शब्देन द्वयोर्बहूनां वा प्रत्यायनसंभवात् सरूपसूत्रस्य च वैयर्थ्यात्। युक्तियुक्तोऽपि व्यक्तिपक्षः। व्यवहारेण व्यक्तावेव शक्तिग्रहात्। शक्यतावच्छेदकजातेरैक्याच्च शक्तेरैक्यमिति न गौरवमपि।

न च विशिष्टे शक्तिस्वीकारे घटत्वमपि वाच्यं स्यात् शक्यतावच्छेदकत्वात्। तथा च नागृहीतविशेषणान्यायेन घटत्वादिकमेव वाच्यमस्त्विति वाच्यम्। अकारणत्वेऽपि दण्डत्वादेः कारणतावच्छेदकत्ववत् अलक्ष्यत्वेऽपि तीरत्वादेः लक्ष्यतावच्छेदकत्ववत् अशक्यस्यापि घटत्वादेः शक्यतावच्छेदकत्वसंभवात्। तथा च जात्युपलक्षितव्यक्तौ शक्तिरित्युक्तं भवति। तदुक्तम् —

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसंबन्धो न च व्यभिचरिष्यति।

इति। भावानां - व्यक्तीनाम् आनन्त्येऽपि, एकम् - अनुगतजात्यादिधर्मम्, उपलक्षणम् - अशक्यत्वेऽपि शक्यव्यावर्तकम्, कृत्वा - अभ्युपगम्य गवादिशब्दः

---

[८९] पा.सू. २.१.५१

सुकरसंबन्धः सुग्राह्यशक्तिः न च शक्तिग्रहाविषयव्यक्तिं बोधयिष्यति। गोत्वादि-सामान्यलक्षणया सर्वास्वेव व्यक्तिषु शक्त्यवधारणात् इति भावः।

आकृतिविशिष्टे शक्तिः

वस्तुतस्तु — "न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः द्रव्यपदार्थकस्य चाकृतिर्न पदार्थः उभयोरुभयं पदार्थः" इति भाष्यात् आकृतिविशिष्टं द्रव्यं वाच्यम्। यद्यप्युक्तभाष्यात् विशकलितयोरेवाकृतिव्यक्त्योः शक्तिग्रहविषयता लभ्यते। तथापि "कस्यचित् किंचित् गुणभूतं किंचित् प्रधानम्" इति उत्तरभाष्यपर्यालोचनेन विशिष्टे शक्तिर्निर्णीयते।

एकमित्यस्य चायमभिप्रायः — शक्तिज्ञाने विषयतावच्छेदिका जातिरेकैव। तथा च घटत्वप्रकारकघटविशेष्यकबोधेऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुतेति। द्विकमित्यस्यापि विशेषष्यविशेषणभावापन्ने जातिव्यक्ती शक्ये इत्यर्थः। त्रिकमिति। जातिव्यक्तिलिङ्गानीत्यर्थः। सत्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्। सत्त्वाद्यन्यतमस्य आधिक्यं पुंस्त्वम्। तत्तच्छब्दनिष्ठं तत्तदर्थनिष्ठं च तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते।

पुंलिङ्गः शब्द इति व्यवहारात् "तस्माच्छसो नः पुंसि"[९०] स्वमोर्नपुंसकात्"[९१] इत्यादिसूत्रप्रामाण्याच्च लिङ्गं शब्दनिष्ठम्।

"स्तनकेशवती नारी लोमशः पुरुषः स्मृतः" इत्यादिस्मृतिलक्षितमर्थनिष्ठं लिङ्गं न चात्र शास्त्रे आश्रयितुं शक्यम्। दारानित्यादौ शस्प्रकृत्यर्थे तदभावेन नत्वाद्यानापत्तेः। तथा च भाष्यम् — "एकार्थशब्दान्यत्वात् दृष्टं लिङ्गान्यत्व-मवयवान्यत्वाच्च" इति। एकस्मिन्नर्थे "पुष्यस्तारका नक्षत्रम्" इति लिङ्गनानात्व-दर्शनात् "कुटी कुटीरः" इत्यादौ रेफस्यावयवस्योपजनेऽपि लिङ्गभेददर्श-नाच्चान्यदेव शब्दनिष्ठं लिङ्गमिति तदर्थः।

एवं च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे नपुंसकत्वमेवेति। सर्वत्रैव अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु इति व्यवहारः तटः तटी तटमिति चोपपद्यते। अर्थनिष्ठस्य लिङ्गस्य व्यवहारनियामकत्वे तु स्त्रीव्यक्तिः वस्तुपदार्थ-पदाभ्यां न व्यवह्रियेत, एवं पुरुषादिरपि व्यक्त्यादिशब्दैः न व्यवह्रियेत। स्तन-केशादिरूपलौकिकलिङ्गस्य खट्वादावभावेन तद्वाचकात् खट्वशब्दात् स्त्रीप्रत्यया-नापत्तिश्च।

---

[९०] पा.सू. ६.१.१०३
[९१] पा.सू. ७.१.२३

न च पदार्थशब्दवत् पशुशब्दस्य स्त्रीव्यक्तौ प्रवृत्त्या छाग्या अपि यागाङ्गत्वापत्तिरिति वाच्यम्। पशुनेति नाभावदर्शनेन पुंस एव यागाङ्गत्वं न स्त्रिया इति निर्णयात्। न च व्यक्त्यादिशब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं शङ्क्यम्। व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा संभवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात्।

नन्वन्वयव्यतिरेकाभ्यां कारकादिकं प्रत्ययस्यैव वाच्यम्। प्रत्ययादेव तेषामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्च इति चेन्न। प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि कारकादिबोधात् प्रकृतिवाच्यत्वकल्पनात्। लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्च। प्रकृतिप्रत्ययोरन्यतरस्य लिङ्गादिवाचकत्वे युक्तिसाम्यादेव पूर्वोक्तपक्षेषु नाभिनिवेशः।

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः" इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात्।

शाब्दबोधे वाचकशब्दस्यापि भानम्

एवं तत्तदर्थवाचकः शब्दोऽपि अर्थेन सह शाब्दबोधे भासते।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।

इति भर्तृहर्युक्तेः। शाब्दबोधात्मकः प्रत्ययः शब्दानुगमादृते शब्दविषयकत्वविनाकृतः नास्ति। सर्वमपि ज्ञानं शब्देनानुविद्धं शब्देन संबद्धं भासते। अनुव्यवसायो यथा अर्थविशिष्टं ज्ञानं विषयीकरोति तथा शब्दविशिष्टमपि ज्ञानं विषयीकरोतीत्यर्थः। घटोऽस्ति पटोऽस्तीत्यादिवाक्यश्रवणान्तरं शाब्दबोधे जाते घटं शाब्दयामीत्याकारकानुव्यवसायो जायते। तत्रार्थस्य विषयविधया भानं तु सर्वसिद्धमेव। तत्रार्थे शब्दः प्रकारतया भासते। यः शब्दः ज्ञातः सन्नर्थमुपस्थापयति स एव शब्दो भासते नान्य इति घटोऽस्तीति वाक्यजन्यशाब्दबोधे घटशब्दस्यैव भानं, न तु कलशकुम्भादिपदस्य। एवं च शब्दावच्छिन्नार्थविषयकत्वात् शाब्दबोधस्य शब्दोऽपि शब्दवाच्यः।

अपि च विष्णुमुच्चारयेत्यादौ अर्थस्योच्चारणासंभवेन विष्णुशब्दस्यैवोच्चारणकर्मत्वं वाच्यमिति शब्दोऽपि शब्दार्थः। न च तत्र शब्दे लक्षणेति वाच्यम्। निरूढलक्षणायाः शक्त्यनतिरेकात्। जबगडदशमुच्चारयेत्यादौ वाच्यस्यार्थस्याभावेन शक्यसंबन्धरूपलक्षणाया असंभवाच्च।

उक्तं च वाक्यपदीये —

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते। इति,

विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते — इति च।

ग्राह्यत्वं - बोध्यत्वम्, ग्राहकत्वं - बोधकत्वम्। एते-ग्राह्यत्वग्राहकत्वे। पृथगवस्थिते इत्यनेन तयोरसमनियतत्वं दर्शयति। दीपादिरूपतेजसः विषयसंनिधाने उक्तशक्तिद्वयं प्रत्यक्षसिद्धम्। तदसमवधाने तु ग्राह्यत्वमेव यथा, तथा शब्दस्याप्यर्थाबाधे उक्तशक्तिद्वयम्, तद्बाधे तु ग्राह्यत्वमेवेति तदर्थः।

विषयत्वमिति। स्वस्य विषयतामसंपाद्य शब्दैरर्थो न बोध्यते। स्वजन्यार्थबोधत्वस्य स्वविषयकत्वव्याप्यत्वादिति भावात्। अयं भावः — शब्दार्थयोरभेदमते तन्मूलकाध्यासात् शब्दात् अर्थाकारवृत्तौ जायमानायां शब्देनापि तस्यां स्वाकार-समर्पणमिति — शाब्दबोधस्य शब्दविषयकत्वसिद्धिरिति।

अत्र वदन्ति[१२] — "न सोऽस्ति प्रत्ययो लोके" इत्युक्तत्वात् किं ज्ञानत्वावच्छेदेन शब्दविषयकत्वं प्रतिज्ञायते उत "ग्राह्यत्वं ग्राहकत्वं" इत्यादिपद्यद्वयात् शाब्दबोधत्वावच्छेदेन शब्दविषयकत्वम्, किं वा शाब्दत्वसामानाधिकरण्येन तत्त्वम्।

नाद्यः। घटादिप्रत्यक्षाव्यवहितप्राक्क्षणे घटादिपदोपस्थितेरनियतत्वेन तादृशप्रत्यक्षस्य घटादिपदविषयकत्वासंभवात्। एवं घटाद्यनुमितावपि घटादिपदभानं न संभवति। व्याप्तिग्रहे व्यापकतया व्याकतावच्छेदकतया वा घटादिपदाभानात्। तदनन्तरं 'घटपदं साक्षात्करोमि' 'घटादिपदमनुमिनोमि' इत्यनुव्यवसायाभावाच्च।

न द्वितीयः। घटपदज्ञानजन्योपस्थितेः घटविषयकत्वेऽपि पदविषयकत्वाभावेन घटपदस्य शाब्दज्ञानविषयत्वासंभवात्। किं च पदज्ञानस्य संबन्धिज्ञानविधया अर्थस्मारकत्वेन संबन्धिनः हस्तिनः हस्तिपकस्मृतौ भानाभाववत् अर्थस्मृतौ पदस्य भानासंभवः।

किं च घटो न घटशब्दः इति सार्वजनीनप्रतीत्या शब्दार्थयोस्तादात्म्ये मानाभावेन नार्थाकारवृत्तेः शब्दाकारतासंभवोऽपि। घटशाब्दबोधानन्तरं घटपदं शाब्दयामि इति प्रतीतेः सार्वजनीनत्वे क्षणविलम्बसहिष्णुता संभवेदपि। न च तस्याः तथात्वमिति न किंचिदेतत्।

---

[१२] भू.सा. पृ. २२७

अपि च भिन्ने विषयेऽनुमितिसामग्र्याः बलवत्तया यत्र भिन्नविषयकानुमितिसामग्रीकाले घटत्वविशिष्टविषयकशाब्दधीर्जायतामितीच्छाबलात् घटशाब्दधीर्जायते, घटशाब्दबोधेच्छाविरहविशिष्टाया एव भिन्नविषयकानुमितिसामग्र्याः बलवत्त्वात्, तत्र घटभाने घटांशे घटपदभानं दुरुपपादम्। घटपदविषयकशाब्दबोधेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्याः प्रतिबन्धिकायाः सत्त्वात्।

नापि तृतीयः। सिद्धसाधनात्। विष्णुमुच्चारयेत्यादौ विष्ण्वादिशब्दानां लक्षणया शाब्दबोधविषयतायाः परैरपि स्वीकारात्।

"मतौ छः सूक्तसाम्नोः"[९३] इति सूत्रस्थं "योऽसावाम्नाये अस्यवामशब्दः पठ्यते स छप्रकृतेः अस्यवामीयेत्यादौ पदार्थः अत एव प्रातिपादिकत्वात् छसिद्धिः" इति भाष्यम्।

"शब्दपूर्वकश्चार्थस्य संप्रत्ययः, इह शास्त्रे शब्दे संभवादर्थस्य निवृत्तिः"

इति भाष्यं "स्वं रूपं" इति सूत्रस्थं, क्वचित् शाब्दबोधे शब्दो विषयः इत्येव बोधयति।

अत्राहुः परीक्षाकाराः भैरवमिश्राः[९४] — अत्रेदं वक्तव्यम् सर्वत्र ज्ञाने शब्दस्य भानमित्येव सिद्धान्तः। प्रत्यक्षे संनिकर्षाभावात् भानाभाव इति तु वक्तुमशक्यम्। जातिव्यक्त्योस्तादात्म्यवत् शब्देनापि सह तादात्म्यसत्त्वेन इन्द्रियसंबद्धतादात्म्यस्य संभवात्। न चैवं तद्वाचकस्य सर्वस्य शब्दस्य भानापत्तिरिति वाच्यम्। परनये चक्षुस्संयुक्तसमवायसंनिकर्षेण घटत्वनिर्विकल्पककाले द्रव्यत्वस्यापि निर्विकल्पकापत्त्या अदृष्टविशेषस्य कालविशेषस्य वा नियामकत्वं कल्प्यते, तथास्मन्मतेऽपि संभवात्।

"वृद्धिरादैच्" इति सूत्रनिर्देशेन "ओमित्येकाक्षरं ब्रह्म" इति श्रौतव्यवहारबलेन च शब्दार्थयोस्तादात्म्यात् अर्थनिरूपितव्याप्त्यवगाहिपरामर्शस्यैव शब्दविषयकतया तद्बलात् अनुमितौ अर्थविशेषणतया शब्दभानसंभवाच्च।

एवं शब्दार्थयोस्तादात्म्यस्य भेदाभेदरूपतया अभेदस्योद्भूतत्वविवक्षया घटं साक्षात्करोमीत्येवानुभवः। पदजन्या पदार्थस्मृतिस्तु शब्दप्रकारिकैव भवति। हस्तिपकत्वेन हस्तिपकस्मृतौ विशेषणतया हस्तिनोऽपि भानं भवत्येव।

एवं सति घटो न घटशब्द इत्यनुभवोऽपि भेदस्य उदभूतत्वविवक्षया उपपद्यते।

---

[९३] पा.सू. ५.२.५९

[९४] भू.सा. पृ. २२९

एवं भिन्नविषयकानुमितिसामग्रीकाले घटशाब्दबोधो जायतामिति या इच्छा तस्याः अर्थाभिन्नशब्दविषयकत्वमपीति शब्दविषयकबोधेच्छाविरहविशिष्टानुमिति-सामग्रीरूपप्रतिबन्धकविरहात् शब्दभानं शाब्दबोधे उपपद्यते — इति।

मण्यनुसारेण अपभ्रंशानां शक्तत्वविचारः[९५]

अपभ्रंशानां शक्तत्वं साधुत्वं चास्ति वा न वेति आदौ मणिग्रन्थानुसारेण निरूप्यते।

तत्र पूर्वपक्षः

ननु पङ्कजपदस्येव अपभ्रंशानामपि शक्तिः भवतु, ततो नियमेनार्थप्रतीतेः जायमानत्वात्। व्यवहाराधीनस्य शक्तिग्रहस्य अपभ्रंशेष्वपि अविशेषात्। अन्यथा असति वृत्त्यन्तरे तेभ्योऽर्थप्रतीतिरेव न स्यात्। न च तेषु लक्षणया अर्थप्रतीतिरिति वाच्यम्। मुख्यार्थबाधरूपमूलविरहात् लक्षणायाः असंभवात्। सति हि शक्यार्थे तद्बाधमूलकलक्षणावकाशः। न च श्रुतेन अपभ्रंशेन स्मारितात् साधुशब्दादन्वयबोधः इति वाच्यम्। साधुशब्दमजानतामपि पामराणामपभ्रंश-शब्दादर्थप्रतीतेः। तत्समानार्थकसंस्कृतशब्देन पामराणामर्थाप्रतीतेश्च।

न च अपभ्रंशे शक्त्यारोपात् ततोऽर्थप्रत्यय इति वाच्यम्। आरोपे प्रमाणा-भावात् व्यवहारात् जाते शक्तिज्ञाने बाधकाभावाच्च। न च वास्तविकशक्तिसाध्यं कार्यं शक्त्यारोपात् भवितुमर्हति। आरोपितात् दहनात् दाहप्रसङ्गात्।

अथ अज्ञायमानकरणात् कार्योत्पत्तिस्थले आरोपितरूपं न कार्यकारि, अत एव आरोपितदहनात् न दाहः। ज्ञायमानकरणस्थले आरोपितमपि रूपं कार्यकारि, यथा ज्ञायमानो धूमः वह्न्यनुमितिं जनयति। वह्निज्ञप्तिप्रयोजकस्य धूमत्वस्य बाष्पे आरोपात्मकभ्रमादपि वह्न्यनुमितिर्भवत्येव। प्रकृते च शक्तेर्ज्ञायमानाया एव अर्थप्रतीतिहेतुत्वात् आरोपितशक्तिकादपभ्रंशात् अर्थधीः भवितुमर्हतीति चेत् — तर्हि बाष्पे धूमारोपात् जायमानायाः वह्न्यनुमितेरयथार्थत्वमिव अपभ्रंशे शक्त्यारोपात् जायमानस्य शाब्दबोधस्याप्ययथार्थत्वं स्यात्। यदि च विषयाबाधात् यथार्थं तदा अपभ्रंश एव शक्तिः साधुशब्द एव शक्त्यारोप इति किं न स्यात्?

न चापभ्रंशानां सादित्वात् देवदत्तादिशब्दवत् आधुनिका एव तत्र संकेताः, गवादिपदानां त्वनादित्वात् तत्र शक्तिरिति वाच्यम्। सजातीयप्रयोगजन्य-प्रयोगविषयत्वरूपस्य भ्रमाद्यजन्यत्वरूपस्य वा अनादित्वस्यापभ्रंशेऽपि सत्त्वात्।

---

[९५] त.चि. शब्दखण्डः. पृ. ६३८

तत्तद्देशीयापभ्रंशेऽपि संकेतयितॄणामस्मरणेन तत्राधुनिकसंकेतः न तु शक्तिरिति वक्तुमशक्यत्वाच्च।

न चापभ्रंशानां देशभेदेन एकत्रार्थे बहुत्वात् संस्कृतस्य तु देशभेदेऽप्येकत्वात् लाघवेन संस्कृतशब्द एव शक्तिरिति वाच्यम्। प्रमाणवतो गौरवस्यापीष्टत्वात्। अन्यथा नानार्थकशब्दोच्छेदप्रसङ्गः, लाघवादेकत्रैवार्थे शक्तिरिति सुवचत्वात्। अर्थान्तरप्रतीत्यन्यथानुपपत्त्या अनेकेष्वर्थेषु शक्तिरिति यदि, तर्हि अपभ्रंशेभ्यः अर्थप्रतीत्यन्यथानुपपत्त्या तेष्वपि शक्तिं को वारयेत्। ननूभयोः शक्तत्वे अयं शब्दः साधुः अयमसाधुः इति विभागाभावात् अयं साधुरयमसाधुरिति प्रामाणिक-व्यवहारानुपपत्तिः। "साधुभिर्भाषितव्यम्" नापभ्रंशितवै" न म्लेच्छितवै इति वैदिकविधिनिषेधानुपपत्तिश्च। विधिनिषेधयोः साध्वसाधुविभागमूलकत्वादिति चेत् — तर्हि शक्तत्वाविशेषेऽपि अभियुक्तेन्द्रपाणिन्यादिप्रणीतव्याकरणोपगृहीतानामेव संस्कृतशब्दानामेव साधुत्वमस्तु। अपभ्रंशेषु इन्द्रादिभिः साधुत्वं न स्मर्यत इति न तेषां साधुत्वम्। संस्कृतशब्दविषयका एव "साधुभिर्भाषितव्यम् इत्यादिविधयः। तेषामेव धर्मोपयोगित्वं, स्वभावात् बीजस्येवाङ्कुरे। तस्मादपभ्रंशा अप्यर्थ-प्रत्यायकत्वात् शक्ताः न तु साधव इति पूर्वपक्षः।

सिद्धान्तस्तु[९६]

संस्कृते शक्तावप्यपभ्रंशे शक्त्यारोपादेव तदर्थप्रतीत्युपपत्त्या एकत्रैव शक्ति-र्लाघवात्। अनन्यलभ्यस्यैव शब्दार्थत्वात्। अन्यथा लक्षणादिवृत्त्यन्तरोच्छेद-प्रसङ्गः। तीरादावपि शक्तेरेव संभवात्। तदाह भगवान् जैमिनिः "अन्यायश्चानेक-शब्दत्वम्"[९७] इति। सा च शक्तिः संस्कृतशब्दे एव, सर्वशब्दे एव, सर्वदेशे तस्यैकत्वात्; नापभ्रंशेषु। तेषां प्रतिदेशमेकत्रार्थे भिन्नभिन्नरूपाणां शक्तिकल्पने गौरवात्। न च संस्कृते पर्यायशब्दानामनेकेषामेकत्रार्थे शक्तिकल्पने गौरवमिति वाच्यम्। अपभ्रंशेष्वपि देशभेदेन पर्यायाणां शब्दानां नानात्वसाम्यात्।

न च देशभेदेऽपि प्राकृतस्यैकरूपत्वात् तत्रैव शक्तिः इति वाच्यम्। संस्कृत-प्रभवतत्समदेशिभेदेन प्राकृतस्याप्यनेकत्वात्। एवं च संस्कृतातिरिक्तशब्देषु शक्त्यारोपादर्थप्रतीत्युपपत्तौ नापभ्रंशे शक्तिः।

ननु म्लेच्छादीनां संस्कृतमजानतां कथं संस्कृतस्थशक्तेः अपभ्रंशे आरोपः। उच्यते।

---

[९६] त.चि. शब्दखण्डः. पृ.६४१

[९७] जै.सू. १.३.२६

केनचित् गौः इति शब्दे प्रयोक्तव्ये प्रमादात् गावीशब्दे प्रयुक्ते व्युत्पन्नस्तेन गोशब्दमुन्नीय ततो गां प्रतीत्य गावीशब्दं प्रयुक्तवान्। पार्श्वस्थश्च व्युत्पित्सुः गावीशब्दादेवायं गां प्रतीतवान् इत्यवगम्य गावीशब्दमेव गोशक्तत्वेन प्रतीत्य अन्येषां व्युत्पादको बभूव। ततः प्रभृति अपभ्रंशे शक्तत्वभ्रमः। यथाहुः —

अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः। इति।

एवं च प्रथमव्युत्पन्नस्यापभ्रंशादेव स्मारितसाधुशब्दात् अर्थप्रत्ययः, तन्मूलकश्च अस्मृतसाधुशब्दानामपि शक्तिभ्रमात्, शक्तिमत्तया ज्ञायमानस्यैव शाब्दज्ञान-हेतुत्वात्।

यत्तु जनकस्य शक्तिज्ञानस्य भ्रमत्वे शाब्दबोधस्याप्ययथार्थत्वं स्यात् लिङ्ग-भ्रमजन्यानुमितेरिवेत्युक्तम्। तन्न। न हि शक्तिज्ञानयाथार्थ्यं शाब्दबोधयाथार्थ्ये प्रयोजकम्, अनाप्तोक्ते वह्निना सिञ्चतीत्यादौ शक्तिज्ञानप्रमात्वेऽपि शाब्दज्ञान-प्रमात्वविरहेणान्वयव्यभिचारात्। नापि जनकज्ञानभ्रमत्वेन अयथार्थत्वम्, भ्रमानु-व्यवसाये विषयविधया जनकस्य भ्रमस्य भ्रमत्वेऽपि भ्रमत्वविरहेणान्वयव्यभि-चारादेव।

अपि तु योग्यताज्ञानस्य भ्रमत्वमेव शाब्दभ्रमत्वे प्रयोजकम्। अपभ्रंशस्थले शक्तिज्ञानस्य भ्रमत्वेऽपि योग्यताज्ञानस्य प्रमात्वात् शाब्दज्ञानप्रमात्वमुपपद्यते।

साधुत्वस्वरूपविचारः

तत्र पूर्वपक्षः

न किमिदं साधुत्वं नाम। न तावत् प्रतिपादकत्वम्, अपभ्रंशेऽतिव्याप्तेः, तस्याप्यर्थप्रतिपादकत्वात्।

नापि यस्य यत्रानादिः प्रयोगः स तत्र साधुः। "हेऽलयो हेऽलय इति वदन्तोऽसुराः पराबभूवुः" इति वेदे श्रवणात् अर्यर्थकेऽपभ्रंशेऽलिशब्देऽनादि-प्रयोगविषयेऽतिव्याप्तेः।

देवदत्तादिसंज्ञाशब्दे साधुत्वेन संमतेऽव्याप्तेश्च। लौकिकगौणलाक्षणिकयोः असाधुत्वापत्तेश्च, गौणार्थे लक्ष्यार्थे चानादिप्रयोगविरहात्। न चेष्टापत्तिः। "यजमानः प्रस्तरः" "आयुर्घृतम्" इत्यादिगौणलाक्षणिकयोः वैदिकयोः असाधुत्वप्रसङ्गात्।

किं च प्रयोगस्यानादित्वं यदि सजातीयप्रयोगपूर्वकत्वं तदा अपभ्रंशेऽति-व्याप्तिः। तत्रापि सजातीयप्रयोगपूर्वकत्वस्य सत्त्वात्, न च अपभ्रंशस्यादिमप्रयोगे

तद्विरहान्नोक्तदोष इति वाच्यम्। सर्गाद्यकालीनसाधुशब्दप्रयोगे तद्विरहेणा-व्याप्त्यापत्तेः।

नापि भ्रमाद्यजन्यत्वमनादित्वम्। अपभ्रंशेऽपि तत्सत्त्वात्।

ननु साधुत्वं गत्वादिव्यापिका जातिः। न च तस्या अनुपलब्धा अभावः शङ्कनीयः। व्याकरणसंस्कारविशिष्टश्रोत्रग्राह्यत्वात्। न च संज्ञाशब्दानाम-साधुत्वापत्तिः, तत्र व्याकरणसंस्काराभावादिति वाच्यम्। तत्रापि प्रकृतिप्रत्यय-योरूहस्य संभवात्। न च गाव्यादिशब्देऽपि प्रकृतिप्रत्ययोहसंभवात् साधुत्वं स्यादिति वाच्यम्। यत्रार्थे तथा संभवः तत्र तथैव साधुत्वस्येष्टत्वात्। गवाद्यर्थे तु गावीशब्दस्य न प्रकृतिप्रत्ययसंभव इत्यसाधुत्वमेव इति चेत् — न। साधुत्वस्य जातिरूपत्वे जातेः सप्रतियोगिकत्वविरहेण सर्वस्य शब्दस्य सर्वत्रार्थे साधुत्वापत्तेः।

ननु गोशब्दः अश्वे प्रयुक्तः साधुरेव, अश्वस्य ज्ञापकस्तु न भवति, अश्वशक्तत्वेन गोशब्दस्य अज्ञानादिति चेत् — एवं हि गावीशब्दोऽपि गं गणपतिं अवितुं शीलमस्येति व्युत्पत्त्या क्वचिदर्थे साधुरिति साधुत्वजातिबलात् गव्यपि साधुः स्यात्। गोप्रतिपादकशब्देषु गोसाधुत्वं जातिरिति प्रतिशब्दं विषयभेदेन साधुत्वजातिभेदस्वीकारे च अननुगमः।

ननु जातिर्यदि न प्रतियोगिनिरूपणनिरूप्या तदा तारत्वजातिरपि इतरनिरूपण-निरूप्या न स्यात् इति चेन्न। कुत्रापि जातेरितरनिरूपणनिरूप्यत्वाभावात्। जातेरुत्कर्षस्यैव तथात्वात्।

नापि यज्ञे प्रयोगार्हत्वं साधुत्वम्। एकमवच्छेदकं विना प्रतिशब्दमर्हत्वस्य दुर्निरूप्यत्वात्। "साधुभिर्भाषितव्यम्" इत्यादिना साधुत्वेनैव यज्ञे विधानात्। तथा चात्माश्रयः। चाण्डालादिभिरुच्चार्यमाणस्यापि घटादिशब्दस्य साधुत्वात्, द्विजादिभि-रपि यज्ञबहिर्भावेण प्रयुज्यमानस्य घटादिशब्दस्य साधुत्वाच्च।

नापि धर्मजनकशब्दत्वं साधुत्वम्, आर्तत्राणाद्यर्थमुच्चरितेऽपभ्रंशेऽपि तत्सत्त्वेन साधुत्वापत्तेः। पतितेनोच्चार्यमाणे घटमानयेत्यादिशब्दे धर्मजनकत्वविरहेण साधुत्वानापत्तेश्च।

नापि वेदस्थशब्दत्वं साधुत्वम्। अपभ्रंशेऽलिशब्देऽतिव्याप्तेः। संज्ञाशब्दे तदभावेनाव्याप्तेश्च। "भाषायां सदवसश्रुवः"[९८] इत्यादिना अनुशिष्टेषु भाषामात्र-प्रयुक्तेषु साधुशब्देषु वेदस्थत्वाभावेन अव्याप्तेश्च।

---

[९८] पा.सू. ३.२.१०८

किं च वेदस्थत्वं यदि साधुत्वं स्यात् तदा अलिशब्दस्य अरिविषयेऽसाधुत्वं भ्रमरविषये साधुत्वमिति व्यवस्था न स्यात्। न हि अलिशब्दः भ्रमरविषये वेदस्थः, अरिविषये वेदस्थत्वाभावात् इति युज्यते। एकत्र वेदस्थत्वतदभावयोर्विरोधात्।

नापि व्याकरणव्युत्पाद्यशब्दत्वं साधुत्वम्। देवदत्तादिसंज्ञाशब्दे तदभावेनाव्याप्तेः। व्याकरणं हि साधुशब्दानां साधुत्वान्वाख्यापकम्। तथा च साधुत्वे सिद्धे व्याकरणव्युत्पाद्यत्वम्, व्याकरणव्युत्पाद्यत्वे साधुत्वमिति अन्योन्याश्रयत्वात्।

सिद्धान्तः

उच्यते — यः शब्दः यत्रेश्वरेण संकेतितः स तत्र शक्तः साधुरित्युच्यते। परेषां शब्दार्थयोः स्वाभाविकसंबन्धवत् अस्माकमीश्वरसंकेतस्य साधुत्वनियामकत्वात्। यथा या काचिदोषधी नकुलदंष्ट्रास्पृष्टा सा विषं हन्ति, तथा प्रतिपादकत्वाविशेषेऽपि ईश्वरसंकेतिता एव शब्दाः धर्मोपयोगिनः, स्वभावात्। तद्विषयका एव "साधुभिर्भाषितव्यम्" इत्यादिविधयः।

ईश्वरसंकेतज्ञानं च व्यवहारात्, उपमानात्, प्रसिद्धार्थपदसामानाधिकरण्यात्, आप्तोपदेशात्, वाक्यशेषात् कोशात्, अभियुक्तेन्द्रपाणिन्यादिप्रणीतशब्दानुशासनाच्च। तेषां साध्वसाधुविभाग एवाधिकारात्। तदुक्तम् —

> 'तत्र तत्त्वमभियोगात् स्यात्' इति।
> अभियुक्ताश्च ये तत्र यन्निबद्धप्रयोजनाः।[९९]
> ते तत्र गुणदोषाणां ज्ञाने चाधिकृता मताः। इति।

न च साधुत्वे सिद्धे शब्दानुशासनम्, तस्मिंश्च सति साधुत्वधीरित्यन्योन्याश्रय इति वाच्यम्। पूर्वपूर्वशब्दान्वाख्यानेन साधुत्वमवगम्य उत्तरोत्तरानुशासनप्रवृत्तेः। सृष्ट्यादौ भगवत्सकाशात् तत्प्रणीतव्याकरणाद्वा साधुत्वनिश्चयेन उत्तरव्याकरणप्रवृत्तिः।

आधुनिकसंकेतितशब्दानां साधुत्वविचारः

नन्वाधुनिकमैत्रादिशब्दानामीश्वरसंकेताभावात् असाधुत्वे यज्ञादौ तत्प्रयोगो न स्यादिति चेत् — न। "द्वादशेऽहनि पिता नाम कुर्यात्" इत्यनेन द्वादशाहः कालिकपित्रुच्चारणविषयनामत्वेन रूपेण सामान्येन तेषामपीश्वरसंकेतविषयत्वात्।

---

[९९] त.चि. पृ. ६४९

अथ शास्त्रकारसंकेतितशब्दात् अश्वादिषु संकेतितगवादिशब्दाद्वा कथमर्थ-प्रत्ययः, शक्तितदारोपवृत्त्यन्तराणामभावादिति चेत् — न। येन शब्देनोपस्थितेऽर्थे गवादिशब्दसंकेतग्रहः तस्मादेव गवादिपदेन स्मारितात् अर्थप्रत्ययात् यथा चेष्टया स्मारितात् पदात् इति संप्रदायः।

तत्र आक्षेपः

अत्र वदन्ति — न तावत् ईश्वरसंकेतितत्वं साधुत्वम्। तस्य निष्प्रति-योगिकत्वेन सर्वत्र सर्वस्य साधुत्वापत्तेः। नापि यः शब्दः यत्रेश्वरेण संकेतितः स तत्र साधुः। गौणलाक्षणिकयोरव्याप्त्यापत्तेः, गौणे लक्ष्ये चार्थे ईश्वरसंकेतविरहात्।

नन्वीश्वरसंकेतबलादर्थोपस्थापकत्वं साधुत्वम्। तच्च साक्षात् परंपरया वेति नोक्तदोष इति चेन्न। एवमपि बाधति ग्राम गाम इति केवलयोः प्रकृतिप्रत्यययोः साधुत्वापत्तेः। न च बाधतीति समुदायस्यासंकेतितत्वादसाधुत्वमिति वाच्यम्। बाधत इत्यस्याप्यसाधुतापत्तेः। ईश्वरसंकेतमज्ञात्वापि व्याकरणव्युत्पाद्यत्वमवधार्य साधुत्वव्यवहाराच्च। शक्तत्वं साधुत्वमित्यपि न, ईश्वरसंकेतितत्वपक्षोक्तदोषग्रासात्-इति।

समाधानम्[१००]

अत्रोच्यते। व्याकरणव्युत्पाद्यत्वं साधुत्वम्। ईश्वरसंकेतितत्वं वृत्तिमत्त्वं वा पदसाधुत्वमिति न युक्तम्, केवलस्य साधुत्वापत्तेः। न चेष्टापत्तिः, केवलस्यापि यज्ञे प्रयोगापत्तेः। तदर्थमेव साधुत्वविचारणात्। प्रयोगश्च वाक्यस्यैवेति तत्साधुत्वमेवेह विचारणीयम्। तच्च नेश्वरसंकेतित्वम्, असंभवात्। अतो व्याकरणव्युत्पाद्यत्वमेव साधुत्वम्। यः शब्दः यस्मिन्नर्थे व्याकरणव्युत्पादितः स तत्र साधुः।

अत एव गावीशब्दो व्याकरणोक्तव्युत्पत्त्या यमर्थं प्रतिपादयति स तत्र साधुः, असाधुरन्यत्र। नाम्नामपि "उणादयो बहुलम्"[१०१] इत्यादिना व्युत्पादनात्। केवल-प्रकृतिप्रत्यययोः बाधति ग्रामगाम इत्यादेश्च न व्युत्पाद्यत्वम्। तत्प्रयोग-स्यानभिधानात् 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः' इति निषेधाच्च।

गौणलाक्षणिकस्थलेऽपि यद्यपि गङ्गायामित्यादिपदं न तीरे व्याकरणेन व्युत्पादितम्, तथाप्यर्थवतः सुपो विधानात् अर्थवत्त्वेन सामान्यतस्तत्रापि साधुत्वम्।

---

[१००] त.चि. पृ. ६५२
[१०१] पा.सू. ३.३.१

तस्मात् शक्तत्वमीश्वरसंकेतितत्वं वा अज्ञात्वापि साधुत्वव्यवहारात् ज्ञात्वापि साधुत्वाव्यवहाराच्च न तत् साधुत्वम्। न च साधुत्वे सिद्धे व्याकरणव्युत्पाद्यत्वम्, तद्व्युत्पाद्यत्वे सिद्धे साधुत्वमित्यन्योन्याश्रय इति वाच्यम्। पूर्वपूर्वव्याकरणतः साधुत्वमवगम्य उत्तरोत्तरव्याकरणेन व्युत्पादनमित्युक्तत्वात्।

भूषणसारग्रन्थानुसारेण अपभ्रंशसाधुताविचारः

नन्वेवं भाषादितो बोधदर्शनात् बोधकतारूपा शक्तिः तत्रापि स्यात्। तथा च साधुतापि स्यात्। शक्तत्वमेव साधुत्वमिति व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते —

असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः।

असाधुः - गाव्यादिः, अनुमानेन - साधुशब्दमनुमाय, (स्मारयित्वा) वाचकः - बोधकः कैश्चिदिष्यते। तथा च लिपिवत् तेषां साधुस्मरण एवोपयोगः, न तु साक्षादर्थवाचकत्वम्, अतो न साधुत्वम् इति पूर्वार्धस्य भावः।

उक्तं हि वाक्यपदीये —

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः।
न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
ते यतः स्मृतिमात्रेण तस्मात् साक्षादवाचकाः।
अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः।
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते।

साधुष्वनुमानेन - साधुशब्दविषयकस्मरणद्वारा। तादात्म्यमुपगम्य साधुगवादिशब्दतादात्म्यप्रकारकज्ञानविषयतामापाद्य वेत्यर्थः। एवकारो वार्थे। अवाचकत्वे युक्तिमाह - न शिष्टैरिति। यतस्तेऽपभ्रंशाः साधवः पर्याया इव शिष्टैः स्मृत्यादिना न प्रतिपाद्यन्ते, अतो न वाचकाः इत्यर्थः। ते साधुष्वित्युक्तमर्थं विशदयति- अम्बाम्बेति। अव्यक्तमिति भाषणक्रियाविशेषणम्। तद्विदाम् - अव्यक्तशब्दश्रोतॄणाम्। व्यक्ते - साधुशब्दे, स्मृते सतीति शेषः। निर्णयः - तदर्थशाब्दबोधः। साधुव्यवहितः - साधुशब्दस्मृतिद्वारकः।

ननु अपभ्रंशानां साक्षादवाचकत्वे किं मानम्? शक्तिकल्पकव्यवहारादेः तुल्यत्वादिति चेत् - सत्यम्। तत्तद्देशभेदभिन्नेषु तेषु तेषु शक्तिकल्पने गौरवात्। न चापभ्रंशानां पर्यायशब्दतुल्यता शङ्कनीया। पर्यायसंस्कृतशब्दानां सर्वदेशेष्वेकत्वात् विनिगमनाविरहेण सर्वत्र शक्तिकल्पना। न ह्यपभ्रंशे तथा एकजातीयता येन तत्रापि विनिगमकाभावात् शक्तिकल्पना स्यात्। एकजातीयत्वस्य शक्तिकल्पनायामतन्त्रत्वे शक्तिमत्त्वाविशेषात् साधूनां पर्यायाणामिवापभ्रंशानामपि कोशादौ गणना प्रसज्येत। एवं च शक्तत्वमेवास्तु साधुत्वमिति नैयायिक-मीमांसकादीनां मतम्।

स्वमतमाह — वाचकत्वाविशेषेऽपीत्युत्तरार्धेन। अयं भावः — अपभ्रंशानामशक्तत्वे ततो बोधः न स्यात्। न च साधुशब्दस्मरणात् ततो बोधः। साधुशब्दान् अविदुषां पामराणामपि बोधात्। तेषां साधुशब्दात् अबोधाच्च। न च शक्तिभ्रमात्तेभ्यो बोध इति वाच्यम्। बोधकत्वस्याबाधेन बोधकत्वरूपशक्तिग्रहस्य भ्रमत्वाभावात्। नन्वपभ्रंशानां शक्तत्वे साधुता स्यादित्यत आह — नियमः पुण्यपापयोरिति।

तथा च पुण्यजननयोग्यत्वं साधुत्वम्, पापजननयोग्यत्वमसाधुत्वम्। तज्ज्ञापकं च कोशादि व्याकरणादि च। एवं च यः शब्दः यत्रार्थे व्याकरणेन व्युत्पादितः स तत्र साधुः इति पर्यवसितम्।

मीमांसकमतेन साध्वसाधुशब्दविवेकः

व्याकरणप्रामाण्याधिकरणे भाट्टदीपिकायां खण्डदेवभट्टाचार्यैः साररूपेण प्रत्यपादीत्थम् — स्मृत्यधिकरणन्यायेन सिद्धमपि व्याकरणप्रामाण्यमाक्षिप्यते। नियमद्वयार्थं हि व्याकरणम्। "साधूनेव प्रयुञ्जीत" इत्येकः, "गवादय एव साधवः न गाव्यादयः" इत्यपरः। न च नियमद्वयस्य मूलं संभवति। न तावदत्र प्रत्यक्षादिकं मूलम्, तेषां धर्माधर्मन्योरप्रवृत्तेः। वेदवाक्यस्य मूलतया कल्पनायामपि प्रतिशब्दं "गोशब्देनाभिदध्यात् न गावीशब्देन" इत्येवं कल्पनस्यानन्तश्रुतिपाठासंभवादसंभवः। "साधुभिर्भाषेत नासाधुभिः" इत्येवमनुगतैकश्रुतिकल्पनं च न संभवति। साधुत्वस्य निर्वचनासंभवात्। न हि साधुत्वं नाम अर्थप्रत्यायकत्वम्, अनादित्वे सति वाचकत्वं वा। गाव्यादिष्वपशब्देष्वपि सत्त्वात्। अपशब्दानां क्वचित् वाचकत्वाभावे गवादिषु गौणत्वस्याप्यसंभवाच्च। अतो वाचकत्वाविशेषान्न व्याकरणेन नियमः संभवतीति चेत् — उच्यते। प्रयोगप्रत्यययोः साधुशब्दापभ्रंशजानां गाव्यादिशब्दानां साधुशब्दोपस्थापनद्वारा उपपत्तेः न वाचकत्वकल्पना। अनेकशक्तिकल्पनापत्तेः। इदानींतनानां च शक्तिभ्रमात् तौ = प्रयोगप्रत्ययौ। न च

घटकलशादिपदवत् विनिगमनाविरहः। पाणिन्यादिप्रणीतव्याकरणस्यैव नियामकत्वात्। न च निर्मूलत्वम्, प्रयोगनियमे "साधूनेव प्रयुञ्जीत" इत्येवंविधाया एकस्या एव श्रुतेर्मूलत्वात्।

साधुत्वं चानादिवाचकत्वम्, अनपभ्रष्टत्वम् वा, व्याकरणाभ्यासजनितसंस्कारव्यङ्ग्या जातिर्वा प्रमाविषयवृत्त्या (वृत्तिप्रमया) अर्थप्रतिपादकत्वं वा। तदभावश्च असाधुत्वम्।

प्रत्यक्षैव च श्रुतिः "न म्लेच्छितवै म्लेच्छो ह वा एष यदपशब्दः" इति मूलम्। अयं च निषेधः प्रकरणात् ज्योतिष्टोमाङ्गम्। यज्ञमात्रेऽपि च निषेधः "याज्ञे कर्मणि नियमोऽन्यत्रानियमः" इति महाभाष्यानुसारात्। साधुप्रयोगनियमात् परं फलोदय इत्यपि "एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति" इति वचनात् सिध्यति। अत्र हि प्रयोगाश्रितः साधुनियमः फलोद्देशेन विधीयते। रागप्राप्तस्यापि च साधुप्रयोगस्य "तस्मादेषा व्याकृता वागुद्यते" इति वचनादाश्रयत्वसिद्धिः।

"गवादय एव साधवः न गाव्यादयः" इति साधुत्वस्वरूपनियमस्य तु अनादिप्रयोगपरंपरैव मूलम् इति।

एतावता उक्ताः सर्वेऽपि विषयाः भगवता जैमिनिना —

"प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात्"[१०२]
शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम्"[१०३]
"अन्यायश्चानेकशब्दत्वम्"[१०४]
"तत्र तत्त्वमभियोगविशेषात् स्यात्"[१०५]
"तदशक्तिश्चानुरूपत्वात्"[१०६]
"एकदेशत्वाच्च विभक्तिव्यत्यये स्यात्"[१०७]

इति सूत्रेषूट्टङ्किताः। भाष्यकारैः शबरस्वामिभिः विवृताः। वार्तिककारैः कुमारिलभट्टैश्च सुदूरं विवेचिताः। त एव मणिकारादिभिः संगृहीताः अस्माभिः प्रदर्शिता इति विस्तरभयादुपरम्यते। शास्त्रगाम्भीर्यस्य नास्त्यवधिः।

---

[१०२] जै.सू. १.३.२४
[१०३] जै.सू. १.३.२५
[१०४] जै.सू. १.३.२६
[१०५] जै.सू. १.३.२७
[१०६] जै.सू. १.३.२८
[१०७] जै.सू. १.३.२९

शक्तेः रूढ्यादिभेदेन चातुर्विध्यम्

शक्तिस्तावत् रूढिः, योगः योगरूढिः यौगिकरूढिः इति चतुर्विधा, तद्युक्तं पदमपि रूढं यौगिकम्, योगरूढम्, यौगिकरूढं चेति चतुर्विधमिति नैयायिकाः। तदुक्तं शब्दशक्तिप्रकाशिकायाम्[१०८] —

रूढं च लक्षकं चैव योगरूढं च यौगिकम्।
तच्चतुर्धा परै रूढयौगिकं मन्यतेऽधिकम्।

इति। किंचिन्नाम क्वचिदर्थे रूढमेव, यथा गोप्रभृतौ गवादि। 'गमेर्डोः' इत्याद्यौणादिकप्रत्ययस्य शक्तिविरहेण यौगिकत्वायोगात्। किंचित् योगरूढमेव, यथा पङ्कजाते पद्मादौ पङ्कजादि। किंचित् यौगिकमेव, यथा पाककर्त्रादौ पाचकादि। रूढयौगिकमप्यधिकं नाम यथा मण्डपमहारजतादि। तद्धि कदाचिदवयववृत्त्या योगार्थमेव, कदाचिच्च समुदायशक्त्या रूढार्थमेवाभिधत्त इति केषांचिन्मतम्। तथा हि मण्डपपदं मण्डं पिबतीति व्युत्पत्त्या कदाचित् मण्डपानकर्तारं, कदाचिच्च रूढ्या गृहमभिधत्ते। एवं महारजतपदं कदाचित् महच्च तद्रजतं चेति व्युत्पत्त्या बृहत् रजतं, कदाचिद्रूढ्या सुवर्णं बोधयति।

रूढस्य लक्षणमुक्तम्[१०९] —

रूढं संकेतवत् नाम सैव संज्ञेति कीर्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा।

इति। इदं पूर्वमेव विवृतम्।

योगरूढस्य लक्षणम् —

स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकृन्मिथः।
योगरूढं न यत्रैकं विनान्यस्यास्ति शाब्दधीः।

यन्नाम स्वावयववृत्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकृत् तन्नाम योगरूढम्। यथा पङ्कज-कृष्णसर्प-धर्मादि। तद्धि स्वघटकानां पङ्कजनधातुडप्रत्ययानां वृत्तिलभ्येन पङ्कजनिकर्त्रादिना समं स्वशक्यस्य पद्मादेः अन्वयानुभावकं पङ्कजनिकर्तृ पद्ममित्यनुभवस्य सर्वसिद्धत्वात्। तथा च यादृशानुपूर्वी स्वाश्रयशक्ययादृशार्थधर्मिकस्वाश्रयावयववृत्त्युपस्थाप्ययादृशार्थप्रकारकान्वयबोधजनकतावच्छेदिका तादृशानुपूर्वीविशिष्टं नाम तादृशार्थघटिततादृशार्थे योगरूढम् इत्युक्तं भवति।

---

[१०८] श.श.प्र. पृ. ७२
[१०९] श.श.प्र. पृ. ७६

इयांस्तु विशेषः — यत् रूढमपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ्यर्थस्येव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकम्। यथा "मण्डपे शेते" इत्यत्र रूढ्यर्थस्य गृहस्यैव बोधकं न योगार्थस्य, मण्डपानकर्तुः शयनान्वय-योग्यताविरहात्, "मण्डपं भोजय" इत्यत्र योगार्थस्य मण्डपानकर्तुरेव बोधकम्, न तु रूढ्यर्थस्य गृहस्य। तस्य भोजनकर्मतयान्वययोग्यताविरहात्। योगरूढं तु पङ्कजादिपदम् अवयववृत्त्या रूढ्यर्थमेव न तु रूढ्यर्थविनाकृतं केवलं योगार्थमन्यं वा, समुदायशक्त्या चावयवार्थमेवानुभावयति, न तु योगार्थविनाकृतं रूढ्यर्थमन्यं वा; व्युत्पत्तिवैचित्र्यात् तथैव साकाङ्क्षत्वात्।

अत एव "पङ्कजं कुमुदम्" इत्यत्र पङ्कजनिकर्तृत्वेन कुमुदस्य "भूमौ पङ्कजमुत्पन्नम्" इत्यादौ पद्मत्वेन स्थलपद्मस्य बोधः पङ्कजपदलक्षणयैव संपादनीयः।

मीमांसकास्तु — पङ्कजादिपदेभ्यः केवलस्यैव योगार्थस्य केवलस्य रूढ्यर्थस्य वा बोधव्युदासाय तादृशार्थयोः मिथः साकाङ्क्षात्वनियमो न कल्प्यते। किं तु रूढ्यर्थभिन्नधर्मिकयोगार्थप्रकारकशाब्दबोधं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वं कल्प्यते। तेन रूढेः अज्ञानदशायां अवयवशक्त्यैव "पङ्कजं कुमुदम्" इत्यादौ पङ्कजनिकर्तृत्वादिना कैरवादेर्बोधः। एवं रूढ्यर्थविशेष्यकयोगार्थाप्रकारक-पङ्कजपदजन्यशाब्दबोधं प्रति योगशक्तिज्ञानस्य प्रतिपबन्धकत्वं कल्प्यते। तथा चावयवशक्तेरज्ञाने समुदायशक्त्यैव "भूमौ पङ्कजमुत्पन्नम्" इत्यादौ पद्मत्व-प्रकारेण स्थलपद्मादेः बोधः भवति। अत एव च तैलपदं योगशक्त्या तिलप्रभवं, रूढ्या च विलक्षणद्रवद्रव्यपर्यवसितं स्नेहं तैलत्वजात्यवच्छिन्नं बोधयत् योग-रूढमपि "तैलं पत्रम्" इत्यादौ रूढ्यर्थविनाकृतयोगार्थस्य, "तैलं सार्षपम्" इत्यादौ योगार्थविनाकृतरूढ्यर्थस्य च प्रत्येकस्य शक्त्यैव बोधकमित्याहुः। तन्मतमुपन्य-स्यति —

> रूढ्यर्थभिन्ने योगार्थबुद्धौ रूढेर्विरोधिताम्।
> वदन्ति केचिदेकैकबुद्धिस्तैः क्वचिदिष्यते।

मणिकृतस्तु —

> यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
> तेन तेनान्वितः स्वार्थः पदैरेवाभिधीयते।

इत्युक्तरीत्या रूढ्यर्थयोगार्थयोः युगपदुपस्थितौ आकाङ्क्षाज्ञानादिसहकारात् तयोः प्रथमतः अन्वयबुद्धिदशायामेव योगार्थस्य रूढ्यर्थस्य वा नान्यत्रान्वयः, न तु

तयोरेव परस्परं साकाङ्क्षत्वमिति नियमः, रूढ्यर्थभिन्ने योगार्थस्य बोधने रूढिधियः प्रतिबन्धकत्वं वा; प्रमाणाभावात्। एवं च यत्र स्थलविशेषे योगार्थ-रूढिलभ्यार्थयोः तात्पर्याग्रहात् = पङ्कजपदं पङ्कजनिकर्तृत्वेन पद्मं बोधयतु इति तात्पर्यग्रहविरहात्, पद्मं पङ्कजनिकर्तृभिन्नमिति बाधादिसमवधानाद्वा नान्वयधीः, तत्र योगशक्त्या पङ्कजातत्वेन कुमुदादेः समुदायशक्त्या च पद्मत्वेन स्थल-कमलस्य बोधो भवत्येवेत्याहुः। तन्मतं प्रदर्शयति — रूढ्यर्थे इति —

रूढ्यर्थेऽन्यत्र वा यत्र यदाकाङ्क्षादिनिश्चयः।
तदैव तत्र योगार्थस्यान्वयो मणिकृन्मतः।। इति।

रूढ्यर्थे — समुदायशक्त्युपस्थापिते, अन्यत्र — पदान्तरवृत्त्युपस्थापिते वा कुमुदादौ यत्र धर्मिणि अवान्तरवृत्तिलभ्यार्थस्य यदा आकाङ्क्षादिनिश्चयः तदा तत्र तस्यान्वयबोध उत्पद्यते शाब्दबोधापेक्षितसकलकारणवत्त्वात्।

नन्वेवं सति रूढ्यर्थभिन्ने योगार्थस्यान्वयबोधवारणाय रूढेर्योगापहारित्वं यत् प्राचीनैरुक्तं तदसंगतं स्यादिति चेत् — न। तथाविधप्राचीनोक्तेः रूढ्यर्थमात्रे योगार्थान्वयबोधसामग्रीस्थलाभिप्रायकत्वात्।

योगरूढं विभजते

सामासिकं तद्धितान्तमिति तत् द्विविधं भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः।

तत् योगरूढं समासात्मकं तद्धितान्तं पूर्वं पश्चाद्वा तद्धितविशिष्टं चेति द्विविधम्। कृदन्तस्य पङ्कजादियोगरूढस्य समास एवान्तर्भाव इति नाधिक्यम्। तत्र हि "उपपदमतिङ्" इति समासः। तद्धितान्तमित्युक्ते बहुगुड इत्यादेः संग्रहो न स्यादिति तद्धितान्तमित्युक्तम्। समासस्य कृष्णसर्पादिकमुदाहरणम्। कृष्णाभिन्न-सर्पत्वेन कृष्णसर्पत्वाख्यजातिविशेषावच्छिन्नबोधकत्वात्। तद्धितान्तस्य वासु-देवादिकमुदाहरणम्, वसुदेवापत्यत्वेन कृष्णत्वजात्यवच्छिन्नबोधकत्वात्। यौगिकं लक्षयति विभजते च —

योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम्।
समासस्तद्धितान्तं च कृदन्तं चेति तत् त्रिधा।

यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रति हेतुः तन्नाम तादृशार्थे यौगिकम्। योगरूढं तु कृष्णसर्पादिपदं योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य। तच्च यौगिकं त्रिविधं समासः तद्धितान्तं कृदन्तं चेति। द्वन्द्वसमासोऽपि स्वघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिराद्यर्थस्य यत्किं-

चित्क्रियान्वयबोधकतया यौगिक एव। सर्वं चेदं समासादिकं रूढान्यत्वेन विशेषणीयम्। अतः कृष्णसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढे नातिप्रसङ्गः। ब्राह्मणी श्वश्रूः शूद्रेत्यादौ ङीबादेः स्त्रीत्वविशिष्टे तादृशं नाम यौगिकमेव। अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढमेव। नातो विभागव्याघातः — इति निरूपयन्ति।

न्यायकौस्तुभानुसारेण शब्दानां चतुर्धा विभागः[११०]

जात्यादिविशिष्टवाचकत्वेन व्यवस्थितेषु शब्देषु केचन शब्दाः केवलयौगिकाः यथा पाचकपाठकादयः। केचन केवलरूढाः यथा गवादिशब्दाः। केचन योगरूढाः यथा पङ्कजादिशब्दाः। केचन यौगिकरूढाः यथा उद्भिदादिशब्दाः।

पङ्कजादिशब्दे रूढिशक्तेरावश्यकता

ननु पङ्कजादिशब्दस्य यौगिकत्वमेवास्तु, किं रूढ्येति चेत् न। पङ्कजादिशब्दात् योगशक्त्या पङ्कजनिकर्तृकुमुदादिविषयकशाब्दबोधापत्ति-वारणाय पङ्कजशब्दस्य पद्मे रूढिस्वीकारस्य आवश्यकत्वात्। न च रूढि-स्वीकारेपि आपत्तिर्दुर्वारेति वाच्यम्। रूढिज्ञानस्य पङ्कजनिकर्तृत्वेन कुमुदादि-बोधं प्रति प्रतिबन्धकत्वाङ्गीकारेणोक्तापत्तिवारणात्। तदुक्तं — "रूढिर्योगाप-हारिणी" इति।

ननु पद्मान्यविशेष्यकपङ्कजनिकर्तृत्वप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति पङ्कजपदं पद्मे शक्तमित्याकारकरूढिज्ञानत्वेन प्रतिबन्धकत्वं न संभवति, तादृशरूढिज्ञानकाले कर्दमजादिपदात् पङ्कजनिकर्तृत्वेन कुमुदादिबोधानुदय-प्रसङ्गात्। न च पङ्कजपदजन्यतादृशशाब्दत्वावच्छिन्नं प्रति उक्तरूपेण रूढि-ज्ञानस्य प्रतिबन्धकत्वोपगमान्नोक्तदोष इति वाच्यम्। तता सत्यपि उक्तरूढिज्ञान-काले समुदायलक्षणया पङ्कजपदात् पङ्कजनिकर्तृत्वेन कुमुदादेर्बोधानुपपत्तेः। न च पङ्कजपदजन्यपद्मान्यविशेष्यकपङ्कजनिकर्तृत्वप्रकारकशाब्दबोधं प्रति समुदायलक्षणाग्रहाभावविशिष्टं पङ्कजपदं पद्मे शक्तमिति रूढिज्ञानं प्रतिबन्धकम्। अतो न लक्षणया बोधानुपपत्तिरिति वाच्यम्। लक्षणाग्रहस्योत्तेजकत्वं स्वीकृत्य तदभाववैशिष्ट्यस्य प्रतिबन्धकतावच्छेदककोटौ निवेशे गोरवादिति चेत् —

मैवम्। अवयवशक्त्या पङ्कजपदजन्यपद्मान्यविशेष्यकपङ्कजनिकर्तृत्वप्रका-रकशाब्दत्वावच्छिन्नं प्रति उक्तरूढिज्ञानत्वेन प्रतिबन्धकत्वम्।

---

[११०] न्या.कौ. पृ. ५३४

मणिकारमतपरिशीलनम्।

मणिकारास्तु नियमतो रूढ्या स्मृतं पद्ममेव व्यक्तिवाचकडप्रत्ययेन पङ्कजनिकर्तृतया अनुभाव्यते। व्यक्तिवाचिनां संनिहितविशेषपरत्वनियमादिति रूढिज्ञानस्य प्रतिबन्धकत्वे मानाभाव इत्याहुः।

तच्चिन्त्यम्। उक्तरीत्या पद्मेनैव सह प्रथमं योगार्थान्वयविषयकबोधेपि कुमुदादितात्पर्यग्रहवशात् पुनः पङ्कजपदानुसन्धानेन योगादेव कुमुदादिशाब्दबोधवारणाय रूढिज्ञानस्य प्रतिबन्धकतायाः आवश्यकत्वात्।

मीमांसकमतम्

मीमांसकास्तु — पद्मत्वस्य प्रयोगोपाधित्वाभ्युपगमेनैव उक्तापत्तिवारणे रूढिज्ञानस्य प्रतिबन्धकतायां मानाभावः। तथाहि पङ्कजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबन्धेन शाब्दत्वावच्छिन्नं प्रति तादात्म्येन पद्मत्वस्य हेतुत्वकल्पनानन्नोक्तापत्तिः। पद्मत्वं प्रयोगोपाधिः इति प्राचीनप्रवादस्याप्ययमेवार्थः इति वदन्ति।

वैयाकरणमतम्

वैयाकरणास्तु रूढिज्ञाननिरूपितप्रतिबध्यतायां पद्मान्यविशेष्यकत्वनिवेशे पङ्कजनिकर्तृत्वप्रकारकबोधमात्रे रूढिज्ञानस्य प्रतिबन्धकतया तदंशायां गौरवेण पङ्कजनिकर्तृत्वेन पद्मस्यापि न बोधः, किं तु पद्मत्वेनैवेति पङ्कजादिपदं रूढमेवेति योगरूढः शब्दो नास्त्येव। तदुक्तम् —

"जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।
पङ्कजं यमुना देवः पद्मनाभो युधिष्ठरः।।" इत्याहुः।

तदसत्। पङ्कंजमस्तीति वाक्यात् पङ्कजनिकर्तृपद्ममित्याकारकबोधस्य सर्वानुभवसिद्धतया प्रामाणिकगौरवस्यादोषत्वात्।

स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन उक्तरूढिज्ञानविशिष्टान्यशाब्दबोधं प्रति रूढिज्ञानं प्रतिबन्धकमिति स्वीकारेण अस्माकमपि (योगरूढमङ्गीकुर्वतां) पद्मान्यधर्मिकत्वस्य रूढिज्ञानप्रतिबध्यकतायामनिवेशेन गौरवाभावाच्च। उक्तरूढिज्ञानं = पङ्कजपदं पद्मे शक्तमित्याकारकं रूढिज्ञानम्।।

योगरूढयौगिकरूढ्योर्वैलक्षण्यम्

अथ योगार्थरूढ्यर्थयोः योगरूढे यौगिकरूढे च भानात् यौगिकरूढस्य योगरूढात् अवैलक्षण्येन कथं तयोः पार्थक्येनोक्तिः इति चेत् —न। योगरूढस्थले पङ्कजादिपदादिवत् एकदा एकस्य धर्मिणः योगरूढिभ्यां बोधः। यौगिकरूढिस्थले तु उद्भिदादिपदात् कदाचित् योगशक्त्या तरुगुल्मादीनां बोधः, कदाचिच्च उद्भिदा यजेतेत्यत्र रूढिशक्त्या यागविशेषबोधः इति वैलक्षण्यस्य स्फुटत्वात् इति।

मुक्तावलीग्रन्थानुसारेण शक्तपदविभागः[१११]

शक्तं पदम्। तच्चतुर्विधम् — यौगिकं रूढं योगरूढं यौगिकरूढं चेति। यत्रावयवार्थ एव बुध्यते तद्यौगिकं यथा पाचकादिपदम्। यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या अर्थो बुध्यते तत् रूढम्, यथा गोमण्डलादिपदम्। यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तत् योगरूढं यथा पङ्कजादिपदम्। तथा हि — पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलया अवयवशक्त्या कुमुदेऽपि प्रयोगः स्यादिति वाच्यम्। रूढिज्ञानस्य केवलयौगिकार्थबुद्धौ प्रतिबन्धकत्वात्। न च रूढिज्ञानस्य यौगिकार्थबुद्धौ प्रतिबन्धकत्वे पद्मेऽपि योगार्थस्य पङ्कजनिकर्तृत्वस्य बोधो न स्यादिति वाच्यम्। पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपङ्कजपदयोगजन्यपङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मत्वावच्छिन्नविशेष्यकयोगार्थप्रकारकबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वात् इति प्राञ्चः।

अत्र मते रूढिज्ञानस्य विरोध्यविषयकस्य जनकज्ञानाविघटकस्य च प्रतिबन्धकत्वं दुर्वचम् इत्यस्वारस्यम्।

मणिकारास्तु — समुदायशक्त्युपस्थापितपद्मे अवयवार्थपङ्कजनिकर्तुरन्वयबोधो भवति, तत्परतया उपस्थितत्वात्। तथा च पद्मे तात्पर्यसत्त्वेन रूढ्यर्थयोगार्थयोः परस्परान्वयबोधकाकाङ्क्षादिसामग्र्यान्तरसत्त्वेन च रूढ्यर्थे एव योगार्थान्वयो न कुमुदादाविति न रूढिज्ञानस्य यौगिकार्थबुद्धौ प्रतिबन्धकत्वम्।

यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते, कुमुदत्वेन बोधे च तात्पर्यं तत्र पङ्कजनिकर्तृकुमुदत्वेन बोधः लक्षणया भवति। यत्र तु कुमुदत्वेन बोधे न

---

[१११] मुक्तावली पृ. ३८१

तात्पर्यं पद्मत्वस्य च बाधः तत्र पङ्कजनिकर्तृत्वेन कुमुदबोधः अवयवशक्त्यैव निर्वाह्यः।

यत्र स्थलपद्मादावयवार्थबाधः तत्र समुदायशक्त्या पद्मत्वेनैव रूपेण स्थलपद्मादेर्बोधः। यदि तु स्थलपद्मं पद्मविजातीयमेव। तदा रूढ्यर्थतावच्छेदकपद्मत्वजातेरभावेन लक्षणयैव पङ्कजपदात् स्थलपद्मस्य बोधः।

यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधः तत् यौगिकरूढम्। यथा उद्भिदादिपदम्। तत्र हि उद्भेदनकर्ता तरुगुल्मादिर्बुध्यते, यागविशेषोऽपीति निरूपयन्ति मुक्तावलीकाराः।

न्यायकौस्तुभानुसारेण व्यञ्जनावृत्तिपरिशीलनम्[११२]

आलंकारिकमतानुवादः

काव्यमुख्यं प्रयोजनं रसवादः। विभावानुभावादिसंवलितम् आनन्दांशे भग्नावरणं "रसो वै रसः" इति श्रुतिप्रतिपाद्यं मनोवृत्तिरूपरत्याद्यवच्छिन्नचैतन्यमेव रसः। काव्यात् तत्प्रतीतिः शक्त्यादिना न संभवतीति तत्प्रतीतये व्यञ्जनाख्या वृत्तिः स्वीकरणीया। शब्दश्रवणानन्तरं क्रमेण यावानर्थः प्रतीयते स सर्वोपि शब्दशक्त्या प्रतीयत इति वक्तुं न शक्यते, अतिप्रसङ्गात्। नापि लक्षणया व्यङ्ग्यप्रतीतिः। लक्षणया प्रयोगे हि प्रयोजनमपेक्षितम्। गङ्गायां घोष इत्यादौ गङ्गापदस्य लाक्षणिकस्य प्रयोगे प्रयोजनं गङ्गाप्रवाहगतशैत्यपावनत्वादेः घोषादौ प्रतीतिः। सापि यदि लक्षणया भवति तदा तस्याः प्रयोजनं वक्तव्यम्। तदपि लक्षणयेति चेत् अनवस्था स्यादिति प्रयोजनमतिरिक्तव्यञ्जनाव्यापारसाध्यम् इत्यङ्गीकरणीयम्। व्यङ्ग्यार्थबोधे बाधज्ञानं न प्रतिबन्धकम्।

"गतोस्तमर्कः" इत्येकस्य वाक्यस्य श्रवणे, बोद्धॄणां वैचित्र्यात् नावः बन्धनीयाः इत्यादयो बहवो अर्थाः प्रतीयन्ते। न तावता शक्यार्थभेदे इव वाक्यभेदः।

असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य मानसं मृदुलैः करैः।।

इत्यादौ प्रकरणेनाप्रकृतार्थे पदशक्तेः कुण्ठीभावात् प्रकृतार्थोपस्थित्या प्रकृतवाक्यार्थबोधानन्तरं श्लिष्टपदरचनया कविसंरम्भावधारणात् जायमानः अप्रकृ-

---

[११२] न्या.कौ. पृ. ७०८

तार्थबोधः व्यञ्जनयैव भवति, न शक्त्या। प्रकृताप्रकृतयोरुपमानोपमेयभावबोधोपि तथैव भवति। एवम — "वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्" इत्यादौ वाच्येन गमननिषेधेन विधेः गमनस्य प्रतीतिः अनुभवसिद्धा व्यञ्जनयैव भवति, न शक्त्या। वाच्यव्यङ्ग्ययोः अत्यन्तवैलक्षण्यात्। नापि वाच्येन लिङ्गेन व्यङ्ग्यस्य लिङ्गिनः अनुमितिः संभवति। पक्षवृत्तितया प्रमाणसिद्धेन निश्चित-साध्यव्याप्तिमता च लिङ्गेन भवितव्यम्। निरुक्तस्थलेषु वाच्यस्य व्यभिचारि-साधारणत्वेन निश्चितव्याप्तिमत्वं न संभवति, न वा पक्षधर्मत्वं प्रमाणावधृतमिति अतिरिक्तेन व्यञ्जनाव्यपारेण प्रतीतिः। पदतदेकदेशवर्णसंघटनाचेष्टादीनामर्थविशेष-व्यञ्जकत्वं सर्वानुभसिद्धं नापलापार्हम्।

वस्तुतस्तु तत्तद्बीजनकत्वमेव व्यञ्जना। सैव सर्वत्र वृत्तिः। न शक्तिः, न वा लक्षणा। व्याकरणादिभिः बोधकत्वानुशासने अभिधेति, बाधज्ञानतात्पर्यानुप-पत्तिप्रतिसन्धानोत्तरं बोधकत्वे लक्षणेति, बाधिताद्यर्थबोधकत्वे व्यञ्जनेति च शास्त्र-ज्ञानां व्यवहारः। जनकत्वं चातिरिक्तः पदार्थः। इत्थं च गुणालंकारादि-विशिष्टकाव्यार्थभावनया शकुन्तलात्वादिविशेषधर्मं परित्यज्य स्त्रीत्वादिना प्रतीतैः विभावादिभिः व्यञ्जितवृत्तिरूपरत्याद्यवच्छिन्नचैतन्यं स्वयं प्रकाशम् आनन्दांशे भग्नावरणं विभावादिसंभिन्नमभिव्यक्तं रसः। सा चाभिव्यक्तिः अपरोक्षरूपेति कौस्तुभानुवादग्रन्थसारांशः।

कौस्तुभे उक्तालंकारिकमतपरिशीलनम्

न्यायकौस्तुभकृतः यद्यपि काव्यरसिकाः रसिकैः आलंकारिकैः विरचितासु प्रक्रियासु आदरविशेषवन्तः, तथापि ध्वननव्यापारानङ्गीकर्तृन्यायदर्शनसिद्धान्त-प्रतिष्ठापनधुरंधरतया न्यायवासनया औपनिषददर्शनसंमतां आत्मनः स्वयंप्रकाश-चैतन्यस्वरूपतामानन्दस्वरूपतां च परित्यज्य ब्रह्मानन्दानुभवसब्रह्मचारिणं रसानु-भवमनादृत्य लघ्व्या सरण्या आलंकारिकं मतं कटाक्षयन्ति। तथाहि — चैतन्य-स्यातिप्रसक्तत्वात् रत्याद्यवच्छिन्नं चैतन्यं रस इत्यस्य रत्यादिः रसः इत्येव पर्यवसितोर्थः। शब्देन विभावानुभावादीनामुपस्थितौ सत्यां काव्यार्थभावनया रत्यदिर्भासते। तादृशं मानसं भानमेव रसाभिव्यक्तिः। तदनन्तरं लोकोत्तराह्लादो जायते। रसाभिव्यक्तिः आनन्दजनकत्वात् आनन्दविषयकतया उपचर्यते। काव्य-जन्यविभावाद्युपस्थितिजन्यत्वात् रसाभिव्यक्तेः काव्यप्रयोज्यत्वमेव, न काव्य-जन्यत्वम्। अतो न शब्दगतव्यञ्जनाव्यापारात् रसाभिव्यक्तिरिति।

रसगङ्गाधरप्रदर्शितनव्यमतपरामर्शः

इत्थम् अभिनवगुप्ताचार्यसंमतां रसाभिव्यक्तिं तत्करणव्यञ्जनां च परामृश्य, अनिर्वचनीयख्यातिमवलम्ब्य रसगङ्गाधरे प्रदर्शितं नव्यमतसिद्धं रसाभिव्यक्ति-प्रकारमुपवर्ण्य दूषयांबभूवुः कौस्तुभकाराः। तथाहि — काव्यात् विभावादिज्ञाने व्यञ्जनाव्यपारेण दुष्यन्तादौ शकुन्तलाविषयकरतौ गृहीतायां सहृदयतोल्लासितस्य काव्यार्थभावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वेनावच्छादिते स्वात्मनि साक्षिभास्यः अनिर्वचनीयः शकुन्तलाविषयकरत्यादिः जायते। स एव रसः। सोप्युक्तदोषेण जन्यःदोषनाशेन नाश्यश्च। तादृशानिर्वचनीयरत्युत्पत्यनन्तरमानन्दो जायते। तेन भेदाग्रहात् तादृशानिर्वचनीयरतौ आनन्दत्वव्यवहारः। व्यञ्जनया काव्योत्थापितदुष्यन्तादिगतशकुन्तलादिविषयकरत्या सह एकत्वाध्यवसायात् निरुक्तरसः व्यङ्ग्यः वर्णनीयश्चेत्युच्यते इति नव्यानां मतविशेषः।

व्यञ्जनावृत्तिस्वीकारस्य आवश्यकता

अत्र वदन्ति — सहृदयानां काव्यार्थभावनया ब्रह्मानन्दानुभवसदृशः रसानुभवो जायत इत्यनुभवलिद्धम्। विभावादिभिरुस्थितरत्यादेः अलौकिकमानसबोध एव जायते, तस्य वाक्यप्रयोज्यतैव न वाक्यजन्यता। शब्दात् प्रत्येमीत्यनुभवस्यापि प्रयोज्यत्वविषयकत्वम्, आस्वादस्य रसविषयकत्वमौपचारिकमिति कथनं कौस्तु-भकृतां स्वीयवासनाविजृम्भितम्। व्यङ्ग्यत्वाभिमतानामर्थानामलौकिकमानसबोधे-नैव निर्वाहे तुल्ययुक्त्या पदोपस्थापितपदार्थानां संसर्गानुभवस्यापि अलौकिक-मानसबोधत्वोपगमसंभवेन शाब्दबोधाख्यविलक्षणप्रमितेरेवासिध्या तत्करणस्य-प्रमाणस्यैव विलयापत्तिः। यदि तु "शब्दात् अमुमर्थं शृणोमि, शाब्दयामि" इति स्वारसिकानुभवबलेन शाब्दबोधाख्यविलक्षणप्रमितिः सिध्यतीत्युच्यते, तदा तु "शब्दादमुमर्थं प्रत्येमि" इति व्यङ्ग्यत्वाभिमतार्थप्रत्ययस्य शब्दजन्यत्वावगाहिस्वा-रसिकप्रतीतिबलात् व्यङ्ग्यार्थबोधोप्यलौकिकमानसातिरिक्तः सिध्यत्येव। न चासं-बद्धं काव्यं तं तमर्थं बोधयितुं प्रभवतीति व्यङ्ग्य व्यञ्जकभावाख्यः संबन्धः अवश्यं स्वीकरणीयः। स एव व्यञ्जनावृत्तिः इत्यभिधीयते। यद्यपि इयं पदशक्तिरिव न ज्ञाता सती पदार्थस्मृतिद्वारा संसर्गानुभवं जनयति, नापि पद-मात्रवृत्तिः। किं तु पदतदर्थवर्णरचनाचेष्टादिसाधारणी इति वैलक्षण्यमस्ति। तथापि अभिधेयाविनाभूतार्थप्रतीतिर्लक्षणा इति नये ज्ञातत्वस्य पदार्थस्मारकत्वस्य च विरहेपि यथा लक्षणावृत्तिर्भविष्यति, तथैव व्यञ्जनापि वृत्तिर्भविष्यति। अनुगतं च वृत्तित्वं दुर्वचमिति शक्तिवादे गदाधरभट्टाचार्यैः प्रपञ्चितम्। तस्मात् कविभारतीनां

रमणीयतासंपादिका व्यञ्जनावृत्तिः स्वीकरणीया। समासोक्त्यलंकृतं "अयमैन्द्री-मुखं पश्यन् रक्तश्चुम्बति चन्द्रमाः" इति काव्यं, प्राचीप्रारम्भसम्बन्धाश्रयश्चन्द्रः जारसंबन्धिपरनायिकावदनचुम्बनाश्रयः इति व्यङ्ग्यार्थसंसृष्टवाच्यार्थबोधजननेनैव चमत्कृतिमादधाति। ततश्च "अन्यथा वृत्तेः पदव्यापारत्वनियमेन व्यञ्जनायाः पारि-भाषिकवृत्तित्वोपगमापत्तेः, तदुपगमे प्रमाणाभावाच्च" इति कौस्तुभोक्तिः वासना-मात्रविजृम्भिता इति।।

इति पदार्थविचारः

निपातार्थविचारः

शब्दशक्तिप्रकाशिकायां निपातस्य लक्षणम्[१]

स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः।
सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः ।।

यःशब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रति असमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थे निपातः । चादयो निपाताः स्वार्थे समुच्चयादौ नामाद्यर्थस्याभेदान्वयबोधं प्रत्ययोग्याः । न हि स्मृतमनुभूतं चेत्यादितः कस्यापि स्मृताभिन्नः समुच्चय इत्यादिरनुभवः, किं तु 'स्मृतानुभूतयोः समुच्चयः' 'स्मृतमनुभूतं समुच्चितम्' इत्यादिरेव इति चादिषु निपातलक्षणसमन्वयः । स्तोकं पचतीत्यादौ प्रकृतिधातुरपि स्वार्थे नामार्थस्य स्तोकादेस्तादात्म्यं बोधयंस्तत्समर्थ एवेति न तत्रातिव्याप्तिः। सुबादिषु प्रत्ययेष्वतिव्याप्तिवारणाय सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः इत्युक्तम्। यादृशस्वार्थे इत्युक्त्या 'चः शब्दः' इत्यादौ चः शब्दाभिन्न इत्येवं नामार्थस्य शब्दस्याभेदान्वयबोधं प्रति समर्थतया असंभवस्य नावकाशः। तत्र चः शब्दपरः न तु समुच्चयरूपार्थपरः समुच्चयरूपार्थे तु शब्दान्तरार्थस्याभेदान्वयबोधं प्रत्यसमर्थ एवेति नासंभवः। एवं च चः शब्दः इत्यत्र स्वपरतायां चशब्दो नामैव न निपातः। समुच्चयपरतायामेव स निपात इत्युक्तं भवति।

पुरन्दरप्रभृतौ नाम्नि तु निपातव्यपदेशः सूत्रानिष्पाद्यत्वप्रयुक्तो भाक्तः। केवले इत्युक्त्या 'कार्तिक्यादौ यन्न दानं तदत्यन्तविनिन्दितम्' इत्यादौ यच्छब्दार्थस्य नञर्थे तादात्म्येनान्वयात् नञि निपातलक्षणाव्याप्तिशङ्कायाः नावकाशः। तत्र हि न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः, किं तु दानावच्छिन्ने। तथा च तत्र कार्तिकी-वृत्तिदानाभावरूपो यो दानाभावः सोऽत्यन्तविनिन्दित इत्यन्वयबोधः।

नञर्थविचारः

न च शोभनं स्वः दिवा, नक्तम् इत्यत्र अव्ययस्य स्वरादिशब्दस्य स्वार्थे स्वर्गादौ शोभनपदार्थाभेदान्वयसाकाङ्क्षत्वात् तत्र निपातलक्षणाव्याप्तिरिति वाच्यम्। तद्दशायां स्वरादिशब्दस्य नामत्वेन निपातत्वाभावात्। प्रादयस्तूपसर्गा न सार्थकाः इति स्वार्थस्याप्रसिद्धया न तेष्वतिव्याप्तिः। यदि तु सार्थकाः तदा तेषां निपातत्वमिष्टमेव।

---

[१] श.श.प्र. पृ. ५३ - ६३

ननु स्वरादिशब्दवत् नञादिर्नामैव। कथमन्यथा जातौ सत्ता नास्तीत्यादौ सत्ताभावे जातिवृत्तित्वाश्रयताबोधः। आख्यातार्थद्वारा क्रियान्वये प्रथमान्तपदोपस्थाप्यत्वस्य तन्त्रत्वात् प्रकृते सप्तम्यर्थनिरूपितत्वान्वितधात्वर्थवृत्तित्वान्विताख्यातार्थाश्रयत्वस्य नञर्थेऽन्वयसंभव इति नञादेरलक्ष्यतया तत्रातिव्याप्तिवारणायोपात्तस्य केवले इत्यस्य वैयर्थ्यमिति चेत् — उच्यते । जातौ सन्ता नास्तीत्यत्र सन्तायां जातिवृत्तित्वस्य समवायसंबन्धावच्छिन्नाधेयतानिरूपितस्वरूपसंबन्धेनात्यन्ताभावः नञा प्रत्याय्यते न तु सत्ताया अभावः। प्रथमान्तपदानुपस्थाप्यत्वेन नञर्थे तत्रास्तित्वादिक्रिया-न्वयायोगात्।

जातौ जाती न स्त इत्यत्र जातिद्वयत्वावच्छिन्नाभावस्य एकत्वेन तत्र तिङर्थद्वित्वस्य पर्याप्तिसंबन्धेनान्वयासंभावाच्च।

ननु समवायेन जातौ सत्ता नास्ति इत्यादौ समवायसंबन्धावच्छिन्नजाति-वृत्तित्वस्याप्रसिद्धया भवदुक्तबोधानुपपत्तिः। अस्मन्मते च तत्र समवायाव-च्छिन्नसत्ताभावे जातिवृत्तित्वबोधान्नानुपपत्तिः इति चेत् — न। समवायेन जातौ सत्ता नास्तीत्यत्र समवायपदस्य समवायसंबन्धावच्छिन्नाधेयत्वनिरूपितस्वरूपसंबन्धा-वच्छिन्नप्रतियोगिताकत्वे लक्षणा। परेषामपि सत्ताभावस्य समवायावच्छिन्नत्वासंभवेन समवायावच्छिन्नप्रतियोगिताकत्वे समवायपदलक्षणायाः आवश्यकत्वात्।

यत्तु प्रथमार्थः प्रतियोगित्वम्। तत्र समवायावच्छिन्नत्वस्यान्वय इति। तत् साहसम्। प्रथमायाः प्रतियोगित्वार्थकत्वस्य क्वचिदप्यकल्पनात्।

विशिष्टसत्ता गुणे नास्तीत्यादिकस्तु प्रयोगो यदि प्रमाणम्, तदा आघोयत्व-स्याव्याप्यवृत्तित्वेन विशिष्टसत्तात्वावच्छेदेन सत्तायां गुणवृत्तित्वाभावसत्त्वात् निर्वाह्यः। विशिष्टस्यातिरिक्तत्वात् इत्यपि कश्चित्।

ननु —

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे।।

इत्यादौ क्रोधाभावः मात्सर्याभावः लोभाभावः अशुभमत्यभावश्च पुरुषोत्तमभक्तानां भवन्ति इत्यन्वयबोधे नञां प्रथमान्तत्वाभावेन तदर्थे आख्यातार्थद्वारा भवन-क्रियान्वयायोगात् अवश्यं नञादिनिपातानां प्रकृतित्वं स्वीकार्यम्। अन्यथा क्रोधो मात्सर्यं लोभोऽशुभमतिश्च न भवन्ति इत्येवं क्रोधादौ भवनकर्तृत्वाभावस्य बोधनेऽनेकनञां व्यर्थतापत्तेः इति चेत् —

न। अयमनेकनञामानर्थक्यप्रसङ्गः —

न तं विरिञ्चिर्न भवो न श्रीर्नापि धनाधिपः।
दातुमर्हन्ति विभवं विष्णोराराधनेन यः।।

इत्यादाविव प्रकारान्तरवादिनामपि समानः समानसमाधानश्च। एतदुक्तं भवति — विष्णोराराधनेन यो विभवो भवति तं विभवं विरिञ्चिः ब्रह्मा, भवः शिवः, श्रीर्लक्ष्मीश्च धनाधिपः कुबेरः एते दातुं नार्हन्तीत्यन्वयबोधस्य एकेन नञा संभवात् अनेकनञां वैयर्थ्यं नञर्थे तिङर्थान्वयवादिमतेऽपि संभवति। न हि विरिञ्च्यादीनां प्रत्येकाभावे विरिञ्चयभावे श्रीविरहे धनाधिपविरहे च विभवदानार्हत्वान्वयः संभवति, अयोग्यत्वात्। यदि च 'संभेदे नान्यतरवैयर्थ्यम्' इति न्यायेन अनेकनञामपि प्रयोगः साधुः, 'विषादे विस्मये हर्षे पौनरुक्त्यं न दुष्यति' इत्यादिप्राचीनसिद्धान्ताच्चेत्युच्यते, तदा क्रोधो मात्सर्यं लोभोऽशुभमतिश्च न न च भवन्तीत्यत्रापि एकेनैव नञा भवनकर्तृत्वव्यवच्छेदबोधसंभवेऽपि संभेदे नान्यतरवैयर्थ्यमित्यादिकं समाधानं तुल्यमिति।

ननु नञादिनिपातस्य विभक्त्यन्तत्वाभावे 'न ते धनं धर्म्यम्' इत्यादौ युष्मदस्मदोः स्थाने तेमेप्रभृत्यादेशो न स्यात्, पदात् परयोरेव तयोः तदनुशासनात् पदशब्दस्य विभक्त्यन्तपरत्वात् इति चेत् — न। पदात् परस्य युष्मदादेः तेप्रभृत्यादेशविधौ पदशब्दस्य साक्षात् परंपरया वा युष्मदर्थसाकाङ्क्ष-शब्दमात्रपरतया साकाङ्क्षनिपातस्याप्युपलक्षकतया 'न ते धनं धर्म्यम्' इत्यादौ नञः परस्य युष्मदः ते इति आदेशस्योपपत्तेः।

न च निभादिशब्दानां स्वार्थे सदृशादौ शब्दान्तरार्थस्य तादात्म्येनान्वय-बोधाक्षमत्वात् तत्र निपातलक्षणस्यातिव्याप्तिरिति वाच्यम्। निपातलक्षणे प्रत्यय-भिन्नत्ववत् निभादिभिन्नत्वस्यापि निवेशनीयतया अदोषात्। स चायं निपातः चतु नञ् पुनः इव एव मा स्म इत्यादिभेदात् बहुविधः।

ननु यदि प्रकृतिः प्रत्ययो निपातो वा स्वार्थोपस्थितिद्वारा अन्वयबोधं कुर्यात्, तदा प्रत्येकमात्रं निराकाङ्क्षशब्दसहकृतं वा किं न कुर्यात्। मिलितानामेव तेषामन्वयबोधकत्वं तु सर्वत्रासंभवि, निपातरहितस्यापि वाक्यस्य सत्त्वात् इत्याशङ्क्योक्तम् —

वाक्यभावमवाप्तस्य सार्थकस्यावबोधतः।
संपद्यते शाब्दबोधो न तन्मात्रस्य बोधतः।।

इति। सार्थकस्य प्रकृत्यादेः वाक्यतामापन्नस्यैव स्वार्थोपस्थितिद्वारान्वयबोधकत्वं, न तु प्रत्येकस्य निराकाङ्क्षसहितस्य वेत्यर्थः।

एवं च जगदीशग्रन्थपर्यालोचने निपातानामर्थवाचकत्वं तदभिमतमिति ज्ञायते।

न्यायकौस्तुभे उपसर्गाणां निपातानां च द्योतकत्वविचारः[२]

प्रजयतीत्यादौ प्रकृष्टजयादिः प्रतीयते। स च नोपसर्गार्थः। तथा सति तस्य प्रकृत्यर्थत्वाभावेन तत्र आख्यातार्थानन्वयापत्तेः। प्रत्ययानां स्वप्रकृत्यर्थान्वित-स्वार्थबोधकत्वव्युत्पत्तेः। नापि प्रकृष्टजयादिः ज्यादिधात्वर्थः। तथासति जयतीत्यादौ प्राद्युपसर्गं विनापि प्रकृष्टजयादिप्रतीत्यापत्तेः। किं तु जयादिधातूनां प्रकृष्टजयादौ लक्षणा। प्राद्युपसर्गाः धातोस्तादृशार्थे तात्पर्यग्राहकाः। अत एव प्राद्युपसर्गाणां द्योतकत्वप्रवादः। धातोः विशिष्टार्थे तात्पर्यग्राहकत्वमेव उपसर्गाणां द्योतकत्वम्। न च प्राद्युपसर्गाणां प्रकर्षादौ शक्तिरेवास्तु इति वाच्यम्। अनन्यलभ्यस्यैव शब्दार्थतया उपसर्गाणां धातुमन्तरेण प्रयोगाभावेन धातुत एव तल्लाभे तत्रोपसर्गाणां शक्ति-कल्पनानौचित्यात्।

ननु प्राद्युपसर्गाणां प्रकर्षादौ शक्तिरेवोचिता। प्राद्युपसर्गेण नियमतः प्रकर्षादेरुप-स्थापनात् । तस्य च धात्वर्थजयादौ आश्रयतासंबन्धेनान्वयेनैव प्रकर्षविशिष्टजयादेः लाभसंभवादिति चेत् — न।

प्रतिष्ठिते इत्याद्यनुरोधेन उपसर्गाणां शक्त्युपागमासंभवात्। तथाहि — प्रतिष्ठते इत्यादौ स्थाधातुना शक्त्या गमनं बोधयितुं न शक्यते। स्थाधातोः गतिनिवृत्तिरूपस्थितिशक्तत्वात्। "ष्ठा गतिनिवृत्तौ" इत्यनुशासनात्। नापि प्रोपसर्गेण गमनं बोधयितुं शक्यते। तथासति तस्याप्रकृत्यर्थत्वेन तत्र आख्यातार्थान्वयानुपपत्तेः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः। किं तु स्थाधातुरेव लक्षणया गमनबोधकः। प्रोपसर्गस्तु तात्पर्यग्राहक इत्यवश्यमभ्युपेयम्। तस्मात् प्रतिष्ठित इत्यादौ उपसर्गस्य द्योतकत्वावश्यकत्वे एकत्र निर्णीतः शास्त्रार्थः अन्यत्रापि भवतीति न्यायेन सर्वत्र प्राद्युपसर्गाणां धातोर्विशिष्टार्थतात्पर्यग्राहकतयोपयोगमुपेत्य द्योत-कत्वमेवोपेयम्।

ननु प्रतिष्ठते इत्यत्र उपसर्गस्य उक्तयुक्त्या द्योतकत्वेपि प्रजयतीत्यादौ वाचकत्वमेव युक्तम्, न तु द्योतकत्वम्। एकत्र द्योतकत्वेनैव सर्वत्र द्योतकत्वाङ्गीकारे , विभक्तेरपि संख्यावाचकत्वानुपपत्तेः। तत्रापि घटादिप्रकृतेः लक्षणयैव संख्या-विशिष्टार्थबोधसंभवात्। किं बहुना नञिवादिनिपातानामपि वाचकत्वविलोपप्रसङ्गः। तेषामपि स्वातन्त्र्येण पदान्तरसमभिव्याहारं विना प्रयोगाभावात् समभि-व्याहृतप्रातिपदिकैरेव लक्षणया घटाभावादिबोधसंभवादिति चेत् —

---

[२] न्या.कौ. पृ. ७५७

मैवम्। विभक्तेः संख्याद्यवाचकत्वे चैत्रः इत्यादिशब्दात् जायमानस्य एकत्वादिप्रकारक चैत्रादिविशेष्यकशाब्दबोधस्य सकलानुभवसिद्धस्यापलापप्रसङ्गात्। एकपदवाच्ययोरर्थयोः शाब्दबोधासंभवात्। पदद्वयार्थयोः संसर्गानुभवस्यैव शाब्दबोधरूपत्वात्।

एवं नञादिनिपातानामवाचकत्वे घट इव, घटो न इत्यादिशब्दात् उक्तयुक्त्या घटपदस्य एकस्यैव सादृश्याद्यर्थकत्वे शाब्दबोधापलापप्रसङ्ग इति विभक्तेः नञादिनिपातानां च संख्याभावादिवाचकत्वमावश्यकम्। उपसर्गाणामवाचकत्वे तु न कस्याप्यनुभवस्य अपलाप इति उपसर्गाणां द्योतकत्वमेव न तु वाचकत्वम्।

किं च उपसर्गाणां वाचकत्वे उपास्यते गुरुः, उनुभूयते सुखम् इत्यादौ गुर्वादिकर्मणो अभिधानं न स्यात्, तस्य धात्वर्थकर्मताविरहात् उपासनादेः उपसर्गार्थत्वात् धात्वर्थकर्मण्येव धातोः लकारविधानात्। तस्मात् तत्र कर्मणि लकारानुपपत्त्या उपसर्गाणां द्योतकत्वमेव।

शाब्दिकमतनिरासः[३]

एतेन चादयो निपाताः द्योतकाः निपातत्वात् उपसर्गवत् इत्यनुमानेन निपातानामपि द्योतकत्वे सिद्धे, चादिनिपातानां वाचकत्वम, उपसर्गाणां द्योतकत्वमिति अर्धजरतीयं नैयायिकोक्तमनादेयम्। चादीनां प्रादीनां च वैषम्ये बीजाभावेन विनिगमकाभावेन च निपातमात्रस्यैव द्योतकतायाः वाचकतायाः वा युक्तत्वाच्चेति शाब्दिकोक्तं परास्तम्।

कस्याप्यनुभवस्यापलापाभावः, उपास्यत इत्यादौ कर्मणि लकारोपपत्तिः इति च उपसर्गाणां द्योतकत्वयुक्तेः उक्तत्वात्।

साक्षात्क्रियत इत्यादौ कर्मणि लकारोपपत्तिः[४]

अथ निपातानां वाचकत्वे "साक्षात्क्रियते अलंक्रियते गुरुः" इत्यादौ साक्षात्कारादेर्निपातार्थतया धात्वर्थत्वाभावात् धात्वर्थकर्मत्वेन गुर्वादेः लकारेणाभिधानानुपपत्तिः, कर्मणि लकारासंभवादिति चेत् — न।

तत्र साक्षात्पदादेः प्रत्यक्षादिरूपफलवाचकत्वोपगमेन धातोश्च तदनुकूलव्यापारवाचकत्वोपगमेनादोषात्। शिष्यादिनिष्ठव्यापारजन्यप्रत्यक्षविषयो गुरुः इति शाब्दबोधसंभवात्। विषयतासंबन्धेन प्रत्यक्षरूपफलाश्रयत्वात् गुरोः कर्मत्वोपपत्तेः। अत एव "साक्षात् प्रत्यक्षतुल्ययोः" इति कोशोपि संगच्छते। नचैवमपि गुर्वादेः

---

[३] न्या.कौ. पृ. ७६४

[४] न्या.कौ. पृ. ७६५

कर्मत्वानुपपत्तिरेव,धात्वर्थतावच्छेदकफलशालित्वाभावादिति वाच्यम्। धातुशक्यतावच्छेदकत्वरूपस्य धात्वर्थतावच्छेदकत्वस्य फले अभावेपि धात्वर्थव्यापारे अनुकूलतासंबन्धेनान्वयित्वरूपस्य धात्वर्थतावच्छेदकत्वस्य साक्षात्पदार्थे प्रत्यक्षरूपफले सत्वात्।

निपातानां वाचकत्वे शङ्कापरिहारौ[५]

ननु चादिनिपातानां वाचकत्वे "कीदृशः समुच्चयः" इतिवत् "कीदृशः च" इत्यस्यापत्तिः। एवं "शोभनः समुच्चयो द्रष्टव्यः" इतिवत् "शोभनः च द्रष्टव्यः" इत्यस्य प्रयोगस्याप्यापत्तिरिति चेत् — न। चादिनिपातानां स्वार्थस्य परविशेषणतयैव बोधकत्वस्य व्युत्पत्तिसिद्धतया विशेषणान्वयप्रसङ्गाभावेन चाद्यर्थस्य शोभनादिपदार्थविशेष्यतया भानासंभवात्।

यत्तु — निपातानां वाचकत्वे "शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव" इत्यत्र उस्रसदृशैः शरैः रससदृशान् उदीच्यानुद्धरिष्यन् इत्यर्थकतया तत्र उस्रपदार्थस्य उद्धरणक्रियायां करणत्वाभावेन उस्रपदोत्तरतृतीयाया नैरर्थक्यप्रसङ्गः। निपातानां द्योतकत्वे तु न दोषः। उस्रपदार्थस्य उस्रसदृशस्य करणत्वसंभवेन उस्रपदोत्तरतृतीयायाः सार्थकत्वादिति —

तन्न। उपमानोपमेयवाचकपदयोः समानविभक्तिकत्वे एव उपमानोपमेयभावस्य साधुतया उस्रपदोत्तरतृतीयायाः साधुतासंपादकत्वेन नैरर्थक्यप्रसङ्गाभावात्।

यदपि निपातानां वाचकत्वे घटस्य समुच्चय इत्यर्थे "घटश्च" इत्यादौ षष्ठीं विना अनन्वयापत्तिः। प्रातिपदिकार्थयोः विभक्त्यर्थमद्वारीकृत्य भेदसंबन्धेनान्वयायोगात्। अन्यथा राजपुरुष इति वाक्यादिवान्वयापत्तेः इति।

तदपि न। प्रातिपदिकेत्यत्र निपातातिरिक्तेति विशेषणात्। किं च चादीनां न समुच्चयोर्थः, अपितु समुच्चितः। ततश्च "घटश्च" इत्यतः समुच्चिताभिन्नो घट इत्यभेदेनैवान्वयबोधः। एवं च समुच्चयस्य चकारार्थैकदेशत्वान्न तत्र सुन्दरादिविशेषणान्वयोऽपि।

व्यतिसे इत्यत्र उपसर्गस्य वाचकत्वमावश्यकम् इत्याक्षेपः तत्समाधानं च[६]

ननु "व्यतिसे" इत्यत्र वि अति इत्युपसर्गयोः वाचकत्वमावश्यकम्। तत्र धातोर्लोपेन विशिष्टार्थलक्षणायाः असंभवात्। तथाहि — वि-अति इत्युपसर्गद्वय-

---

[५] न्या.कौ. पृ. ७६६

[६] न्या.कौ. पृ. ७६९

पूर्वकात् असधातोः लडात्मनेपदमध्यमपुरुषैकवचनान्तः व्यतिसे इति। "अस" भुवि इति धातुः। अयं धातुः अदादिगणान्तर्गतः परस्मैपदी। "कर्तरि कर्मव्यतीहारे" इति सूत्रेण आत्मनेपदम्। सूत्रार्थश्च धातोः कर्तरि आत्मनेपदं स्यात् क्रियाविनिमये सतीति। अस् थास् इति स्थिते "थासः से" इति सूत्रेण लस्य थासः से स्यात्। ततः व्यति अस् से इति जाते कर्तरि शप्। तस्य लुक् "अदिप्रभृतिभ्यः शपः" इति सूत्रात्। "श्नसोरल्लोपः" इति सूत्रेण अकारलोपः। व्यतिस् से इति जाते "तासस्त्योर्लोपः" इति सूत्रेण सकारलोपः। व्यतिसे इति रूपं सिद्धम्। इत्थं चात्र धातोः लुप्तत्वात् तेन व्यत्ययरूपार्थाबोधनात् उपसर्गस्यैव व्यत्ययवाचकत्वमङ्गीकरणीयम् इति चेत् — न।

लुप्तधातोः स्मरणादेव तत्र शाब्दबोधाङ्गीकारात्। न चैवं यस्य पुरुषस्य लुप्तधातोः स्मरणं न जातं तस्य शाब्दबोधो न स्यादिति वाच्यम्। इष्टापत्तेः। इति संप्रदायः।

अत्र वदन्ति — "कर्तरि कर्मव्यतीहारे" इत्यनुशासनात् व्यतिसे इत्यादौ व्यत्ययः आत्मनेपदस्यैवार्थः। स च शक्त्या लक्षणया वेत्यन्यदेतत्। उभयथापि उपसर्गस्य द्योतकत्वमव्याहतम्। एवं च धातुलोपमजानतोपि शाब्दबोधो भवत्येवेति न तत्रानुभवापलापः — इति।

निपातार्थनिर्णयः शब्दकौस्तुभानुसारम्

शब्दकौस्तुभे प्रारम्भे अथ शब्दानुशासनम् इति भाष्यव्याख्यानावसरे अथ-शब्दार्थकथनावसरे निपातार्थविचारः प्रस्तुतः। तथा हि — अथशब्दः प्रारम्भस्य द्योतको न तु वाचकः। निपातत्वात् उपसर्गवत्। न च तेऽपि वाचका एवेति वाच्यम्। उपास्यते गुरुः, अनुभूयते सुखम् इत्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारासंभवेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैव युक्तत्वात्।

ननु उक्तयुक्त्या अस्तु उपसर्गाणां द्योतकता निपातान्तरं तु वाचकमेवेति चेत् — न। साक्षात्क्रियते अलंक्रियते ऊरीक्रियते इत्यादौ कर्मणि लकारेण कर्मीभूतस्य गुर्वादेरभिधानसिद्धये धात्वर्थं प्रति कर्मत्वस्य वाच्यत्वात्। उपसर्गत्वापेक्षया निपातत्वस्याधिकवृत्तितया तदवच्छेदेनैव द्योतकताकल्पनाच्च। सामान्ये प्रमाणानां पक्षपातात्। निपातत्वं चाखण्डोपाधिरूपं जातिरूपं शब्दस्वरूपमेव चेति पक्षत्रयेऽपि प्रादिचादिसाधारणमेव। प्रत्वादिप्रत्येकपर्यवसन्नं तदिति पक्षेऽपि प्रादीनां चादिभ्यो वैलक्षण्यानिरुक्तेः केवलानामप्रयोगेण अन्यलभ्यतापि तुल्यैव।

विजयते इत्यत्र धातोर्विशिष्टजय इव घटश्चेत्यत्र समुच्चितघटे घटशब्दस्यापि लक्षणायाः संभवात्। किं च चादीनां वाचकत्वे समानाधिकरणप्रातिपदिकार्थयोः अभेदान्वय इति व्युत्पत्तिर्निपातेतरविषयकतया विना प्रमाणं संकोचनीया स्यात्।

स्याच्च समुच्चयादिशब्दयोग इव चादियोगेऽपि घटादेः षष्ठी। किं च समुच्चयादिपदैरुपस्थिते यथा विशेषणसंबन्धः तथा चादिभिरुपस्थितेऽपि स्यात्। द्योतकत्वपक्षे तु पदार्थैकदेशत्वान्न तत्र विशेषणान्वयः। अपि च — शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव इत्यादौ उस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन् इत्यादिरर्थः। स च उस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य च तात्पर्यग्राहकत्वे सत्येव लभ्यते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकतापि भज्येत। इवशब्दात्तु तृतीया दुर्लभा। असत्त्वार्थकतया कारकविभक्त्ययोगात्। एवमपि उस्रादिभ्यस्तृतीयानन्वययस्यानुद्धाराच्च।

नन्वेवं नञ्तत्पुरुषस्य उत्तरपदार्थप्राधान्यमित्यादिसिद्धान्ता भज्येरन्निति चेत् — न। पूर्वपदद्योत्यं प्रति प्राधान्यमिति तदर्थात्। द्योत्यार्थेनापि अर्थवत्तेति प्रातिपदिकत्वसिद्धिः। अत एव येषां द्योत्योऽप्यर्थो नास्ति तु हि च स्म ह वै पादपूरणे इत्यमरकोशात् कमीमिद्विति पादपूरणार्थाः इति निरुक्ताच्च, तदर्थं निपातस्यानर्थकस्य इति वार्तिकारम्भ इत्यवधेयम्। अत एव आकृत्यधिकरणे भट्टैरुक्तम् —

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः।।
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
यदर्थद्योतकौ तौ तु वाचकः स विचार्यते।।

इति। अर्थवत्सूत्रे अधीते इत्यादौ धातोरनर्थकता, उपसर्गविशिष्टस्य वाचकतेति कैश्चिदुक्तम्। तदभ्युच्चयमात्रम्। पूर्वोत्तरमीमांसयोस्तत्र तत्र नञः पर्युदासे लक्षणेति ग्रन्था अप्येवमेव। उक्तयुक्तेः। अस्तु वा मतान्तरं निपाता वाचका इति, सर्वथापि प्रादयो द्योतकाः चादयस्तु वाचकाः इत्येवंरूपमर्धजरतीयं नैयायिकाभ्युपगतमप्रामाणिकमेव।

निपातार्थनिर्णयः भूषणसारानुसारम्[७] - निपातानां द्योतकत्वं च

अथ भूषणसारानुसारेण निपातार्थः प्रस्तूयते। प्रादयो द्योतकाः चादयो वाचका इति नैथाथिकमतमयुक्तम्। वैषम्ये बीजाभावादिति ध्वनयन् निपातानां द्योतकत्वं समर्थयते —

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते यथा।।

---

[७] भू.सा. पृ. ३२२

येन हेतुना प्रादयो द्योतकाः तेनैव हेतुना चादयो निपाताः तथा = द्योतकाः। अयं भावः — ईश्वरमनुभवतीत्यादौ अनुभवादिरूपोऽर्थः प्रतीयते। स च न धात्वर्थः। भवतीत्यत्रापि अनुभवादिप्रतीत्यापत्तेः। नोपसर्गार्थः, तथा सति तस्य आख्यात-प्रकृत्यर्थत्वाभावेन तत्राख्यातार्थकालादेः अनन्वयापत्तेः। प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वमिति व्युत्पत्तेः। अनुगच्छतीत्यादावपि अनुभवार्थप्रतीत्यापतेश्च। नापि उपसर्गविशिष्टधात्वर्थः। गौरवात्। अतो भूधातोरेव विद्यमानत्वार्थकस्य अनुभवे लक्षणा। उपसर्गस्तात्पर्थग्राहक इत्यस्तु। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति।

तच्च चादिषु निपातेष्वपि तुल्यम्। चैत्रमिव पश्यतीत्यादौ चैत्रपदस्य सादृश्यविशिष्टे लक्षणा। इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वादिति।

तत्र स्वयं युक्त्यन्तरमाह — उपास्येते हरिहरौ इति। तत्र हि उपासना किमुपसर्गार्थः ? उत उपसर्गविशिष्टस्य धातोः ? अथ वा धातुमात्रस्य ? नाद्यः,

तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपस्य सकर्मकत्वस्यानुपपत्तेः, आस्धातोः उपासनारूपफलवाचकत्वाभावात्। न चेष्टापत्तिः, ततः कर्मणि लकारानापत्तेः। न द्वितीयः, गौरवात्। तृतीये तु आगतं द्योतकत्वम्। तात्पर्यग्राहकत्वलाभात्। तत् चादिष्वपि तुल्यमित्याह —

तथान्यत्र निपातेऽपि लकारः कर्मवाचकः।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः।।

अन्यत्र — साक्षात्क्रियते अलंक्रियते ऊरीक्रियते शिव इत्यादौ। अत्रापि धातोः तत्तदर्थकर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वक्तव्यमिति उपसर्गवत् चादीनामपि द्योतकत्वमिति भावः। यद्यपि कृधातोः सकर्मकत्वमस्ति, घटः क्रियत इत्यादौ कर्मणि लकारदर्शनात्। तथापि साक्षात्कारादिरूपेष्वर्थेषु सकर्मकता न स्यात्। अन्यथा यत्र कुत्रचित् सकर्मकत्वदर्शनेन सर्वत्रैव कृञः सकर्मकत्वे वायुर्विकुरुते सैन्धवा विकुर्वत इत्यादावपि स्यात् सकर्मकत्वम्। तथा च 'अकर्मकाच्च'[८] इति सूत्रविहितात्मने-पदानुपपत्तिः।

अथ उपासनासाक्षात्कारादिर्निपातार्थोऽस्तु। 'साक्षात् प्रत्यक्षतुल्ययोः' इति कोशस्वरसात्। तदनुकूलो व्यापार एव धात्वर्थोऽस्तु। स्वस्वयुक्तनिपातान्य-तरार्थफलव्यधिकरणव्यापारवत्त्वं सकर्मकत्वमित्यपि सुवचमिति दृष्टान्तदार्ष्टान्ति-कावयुक्तौ। उभयोरर्थविशेषवाचकत्वेन द्योतकत्वाभावादिति चेत् —

---

[८] पा.सू. १.३.३५

न। नामार्थधात्वर्थयोः भेदसंबन्धेन साक्षादन्वयासंभवेन निपातार्थधात्वर्थयोरन्वयस्यैवासंभवात्। अन्यथा तण्डुलः पचतीत्यत्रापि तण्डुलस्य कर्मतासंबन्धेन धात्वर्थेऽन्वयापत्तेः।

न च निपातातिरिक्तनामार्थस्यैव धात्वर्थे भेदेन अन्वयोऽव्युत्पन्नः। निपातार्थस्य तु धात्वर्थे भेदसंबन्धेन अन्वयो भवितुमर्हतीति वाच्यम्। एवमपि भूयान् प्रकर्षः कीदृशो निश्चयः इतिवत् भूयान् प्र, कीदृशो निः इत्यपि स्यात्। अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वयः इत्यतो घोतकता तेषां स्यादिति। साधकान्तरमभिप्रेत्याह — विशेषणेति। 'शोभनः समुच्चयो द्रष्टव्य' इतिवत् 'शोभनश्च द्रष्टव्यः' इत्यस्यापत्तेः तुल्यसमाधेयत्वात् इति भावः।

प्राद्युपसर्गाणां वाचकत्वम्

न च निपातानां वाचकत्वे 'चार्थे द्वन्द्वः'[९] इत्यादिसूत्रमेव प्रमाणम्, प्रादीनां वाचकत्वे तु प्रमाणानुपलम्भात् द्योतकतैवोचितेति वाच्यम्। प्रादीनां वाचकत्वेऽपि 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्'[१०] इत्यादिसूत्राणां प्रमाणत्वात्।

निपातानां वाचकत्वे अनुपपत्तयः

अपि च निपातानां वाचकत्वे निपातानां प्रातिपदिकतया तदर्थस्यापरप्रातिपादिकार्थे षष्ठ्यादिकं विना भेदसंबन्धेनान्वयानुपपत्तिः। अन्यथा राजा पुरुष इत्यत्र राजसंबन्धी पुरुष इत्यन्वयबोधापत्तेः। ततश्च धवखदिरयोः समुच्चय इतिवत् घवस्य स्वदिरस्य चेत्येव स्यात् — धवः खदिरश्चेति न स्यात्।

ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावः निपातातिरिक्तविषयक इति नोक्तदोष इत्याशङ्क्याह —

> पदार्थः सदृशान्वेति विभागेन कदापि न।
> निपातेतरसंकोचे प्रमाणं किं विभावय।

पदार्थः नामार्थः सदृशा समानाधिकरणेन समानविभक्तिकपदोपस्थाप्येन अन्वेति, अभेदसंबन्धेनेति शेषः। विभागेन — असदृशेन असमानाधिकरणेन कदापि नान्वेति। अत्र विभागेन कदापि न इत्यनेन व्यधिकरणयोर्नामार्थयोः अभेदेनान्वयं व्यवच्छिन्दता नामार्थयोः (समानाधिकरणयोः) भेदेन नान्वय इति व्युत्पत्तिरेव प्राधान्येन प्रदर्श्यते। न च निपातातिरिक्तनामार्थयोर्न भेदेनान्वय इति न दोष इति वाच्यम्।

---

[९] पा.सू. २.२.२९

[१०] पा.सू. ३.३.१२६

व्युत्पत्तेर्निपातातिरिक्तविषयकतया संकोचे प्रमाणाभावात्, गौरवाच्च। अस्माकं मते निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः।

अत एव — उक्तव्युत्पत्तौ निपातातिरिक्तत्वविशेषणस्याप्रवेशादेव घटो नास्तीत्यादौ घटपदं घटप्रतियोगिके लाक्षणिकमिति नैयायिकाः। अन्यथा निपातस्थले भेदेनान्वयसंभवात् घटपदार्थस्य नञर्थे प्रतियोगित्वसंबन्धेनान्वयः संभवतीति घटप्रतियोगिके लक्षणां स्वीकृत्य तस्य नञर्थेऽभेदेनान्वयवर्णनमसंगतं स्यात् नैयायिकानाम्।

अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यात्। अतः द्योतकत्वमेवेत्याह —

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।
इत्यादावन्वयो न स्यात् सुपां च श्रवणं ततः।।

अत्रोस्रसदृशैः शरैः रससदृशान् उदीच्यानुद्धरिष्यन् इत्यर्थः विवक्षितः। स च उस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे सत्येव संगच्छते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिविरोधः। तथाहि — उस्रैरिति करणे तृतीया। न चोस्रोऽत्र करणम्। इवार्थस्य उस्रसदृशस्य करणत्वेऽपि तस्य करणत्वमुस्रपदोत्तरतृतीयया बोधयितुं न शक्यते। तत्प्रकृत्यर्थत्वाभावात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः। इवशब्दस्य च असत्त्वार्थकतया = लिङ्गाद्यनन्वय्यर्थकतया तदुत्तरं करणत्वार्थकतृतीयाया असंभवात्। संभवे वा श्रवणप्रसङ्गात्, उस्रपदोत्तरतृतीयाया अनन्वयप्रसङ्गाच्च। तदाह — सुपां चेति। सुपां श्रवणं चेत्यर्थः। चकारात् उस्रपदोत्तरतृतीयानन्वयः समुच्चीयते।

इत्यादावित्यादिपदात् 'वागर्थाविव संपृक्तौ पार्वतीपरमेश्वरौ वन्दे' इत्यत्र वागर्थयोः वदिकर्मत्वाभावात् तदुत्तरद्वितीयाया अनन्वयः, इवार्थस्य कर्मत्वान्वयबोधकविभक्त्यसंभवश्च संगृह्यते।

यदि च विशेषणविभक्तिरभेदार्था साधुत्वमात्रार्था वा तदापि इवशब्दस्य वाचकत्वेऽनन्वय एव। उस्रसदृशशराणां समानविभक्तिकपदोपस्थाप्यतया भेदेनान्वयायोगात्। अभेदेनान्वयोऽपि न संभवति, बाधात्। सादृश्यस्य भेदघटितत्वात्। न हि उस्राभिन्नसदृशाभिन्नः शरः इत्यर्थः संभवति।

नञः द्योतकत्वमेवेति निरूपणम्

ननु निपातानां द्योतकत्वमते अब्राह्मण इत्यादौ तत्पुरुषलक्षणस्याव्याप्तिः। उत्तरपदार्थप्रधानो हि तत्पुरूषः। पूर्वपदस्य नञः अर्थवाचकत्वाभावेन उत्तरपदार्थस्य

प्राधान्याभावात्, प्राधान्यस्य पदार्थान्तरनिरूपितत्वात्। एवमुपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावात् ततो विभक्तिश्च न स्यात् इत्यत आह —

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः।

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव। तमेवार्थमादायार्थवत्त्वात् प्रातिपदिकत्वं चोपपद्यते। द्योतकताया अपि वृत्तित्वेन तया अर्थवत्त्वस्य द्योतकेऽप्यक्षतत्वात्। न हि शक्तिलक्षणान्यतरदेवार्थोपस्थापकमिति वचनमस्ति।

वस्तुतस्तु — निपातस्यार्थवत्वाभावेन प्रातिपदिकत्वाभावेऽपि 'अव्ययादाप्सुपः' इति ज्ञापकात् निपातेभ्यः सुबुत्पत्तिः। 'निपातस्य अनर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या' इति वार्तिकाद्वा प्रातिपदिकसंज्ञा। 'कृत्तद्धितसमासाश्च'[११] इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां प्रातिपदिकत्वेन संग्रह इति वा बोध्यम्। तस्माद्युक्तं निपातानां द्योतकत्वम्।

निपातानां द्योतकत्वे मीमांसकसंमतिः

उक्तं चाकृत्यधिकरणवार्तिके —

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेः नोपसर्गनिपातयोः।।
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
तदर्थद्योतकौ तौ तु वाचकः स विचार्यते।। इति

पदे चतुर्विधे नामाख्यातोपसर्गनिपातभेदेन चतुःप्रकारे द्विविधस्य नामाख्यातरूपस्य अर्थनिर्णयः क्रियते। कुतः संशयोत्पत्तेः नामार्थो जातिर्वा व्यक्तिर्वा, धात्वर्थो व्यापारः फलं वा उभयं वा इति संदेहे तन्निर्णयस्य कर्तव्यत्वात्। उपसर्गनिपातयोरर्थनिर्णयो न क्रियते। हि — यतः तयोः उपसर्गनिपातयोः अर्थाभिधाने व्यापारः शक्तिलक्षणान्यतररूपः नैव विद्यते। तौ यदर्थद्योतकौ = यस्यार्थं द्योतयतः सः नामाख्यातात्मकः वाचकः शब्दः विचार्यत इति उक्तकारिकयोरर्थः। अनेनोपसर्गनिपातयोः द्योतकत्वमेव कुमारिलाभिमतमिति स्पष्टम्।

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते।
प्रहाराहारसंहारविहारपरिहारवत्।। इति।।

---

[११] पा.सू. १.२.४६

अत्रोपसर्गपदं निपातोपलक्षणम्। धातुपदं पदान्तरस्य। ननु निपातसत्त्वे विशिष्टार्थावगतिः, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां निपातानां ततदर्थवाचकत्वमेव युक्तम्, बोधकतारूपशक्तेरबाधात्।

किं च उक्तरीत्या = अनन्यलभ्यस्यैव शब्दार्थतया प्रजयतीत्यादौ प्रकृष्टजयस्य लक्षणया जिधातोरेव उपस्थितौ न प्रादीनां प्रकर्षाद्यर्थकत्वं, तेषां तात्पर्यग्राहकतयैवोपयोगात् इत्युक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणास्तु, तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेराह —

निपातानां वाचकत्वमन्वयव्यतिरेकयोः।
युक्तं वा, न तु तद्युक्तं परेषां मतमेव नः।।

परेषां नैयायिकानां मीमांसकानां च यन्मतं चादयो वाचकाः प्रादयो द्योतका इति, न तद्युक्तम्। अपि तु उभयेषामपि द्योतकत्वमेव वा वाचकत्वमेव वा इत्येव युक्तम् इत्याशयः।

निपातेषु केचित् द्योतकाः केचिद्वाचकाः इति मतम्

ननु सर्वेषां निपातानां वाचकत्वे अर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसंभवात् 'निपातस्यानर्थकस्य च प्रातिपदिकत्वम्' इति विधिवैयर्थ्यम्। सर्वेषां द्योतकत्वे च 'अनर्थकस्य' इति व्यर्थम्, सार्थकनिपातविरहात् तद्व्यावर्तनार्थत्वायोगात्। तथा च केचित् द्योतकाः, केचित् वाचका इत्यङ्गीकार्यमिति चेत् —

तत्परिशीलनम्

न। एवं हि चादयो द्योतकाः प्रादयो वाचकाः इति वैपरीत्यस्यावारणात्। सर्वथा अनर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्तिकारम्भस्य कैयटादौ स्पष्टत्वात्। 'कृत्तद्धितसमासाश्च'[१२] इति सूत्रे चशब्देन वार्तिकार्थस्य समुच्चितत्वेन वार्तिकस्य प्रत्याख्यातत्वाच्च।

परेषामिति बहुवचनं मीमांसकसंग्रहाय। केवलवृक्षशब्दात् समुच्चयाबोधात् चकारश्रवणे तद्बोधाच्च चकार एव तद्वाचको न तु द्योतकः।

किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या, चकारादेः द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यात् इति हि समुच्चयाधिकरणे ? स्थितम्। तदपि न युक्तम् इति भावः। तथा हि — अन्वयव्यतिरेकौ द्योतकत्वेनापि उपयुक्तौ। चकारगतद्योत-

---

[१२] पा.सू. १.२.४६

कत्वान्वयव्यतिरेकानुविधायित्वात् समुच्चयबोधतदभावयोः। घटादिपदानां समुच्चिते लक्षणा, तात्पर्यग्राहकः प्रकरणादिवत् चादिरिति स्वीकारात् न शक्तिद्वयकल्पनापि। अस्माकं लक्षणाग्रहदशायां घटदिपदात् समुच्चितघटादिबोधात् समुच्चितघटादि-विषयकशाब्दबोधं प्रति घटादिनिरूपितलक्षणाज्ञानं कारणमिति कार्यकारणभाव आवश्यकः। एवं घटाद्यर्थबोधे घटादिशक्तिज्ञानं कारणमिति कार्यकारण-भाबोऽप्यावश्यकः। वाचकतामते समुच्चितघटादिज्ञाने समुच्चितघटादिनिरूपित-शक्तिज्ञानं कारणम्, घटादिज्ञाने घटादिशक्तिज्ञानं कारणमिति कार्यकारणभावद्वयम्। एवं च पक्षद्वयेऽपि कार्यकारणभावद्वयकल्पनासाम्यात् गौरवाभावात् उभयमपि युक्तमित्यभिमतम्। अत एव —

"स वाचको विशेषाणां सम्भवात् द्योतकोऽपि वा" — इति वाक्यपदीयं संगच्छते। स निपातः विशेषाणां प्रकर्षादीनां समुच्चयादीनां च वाचकः, अथ वा द्योतक इत्यर्थः। दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन् आह — न तु तद्युक्तं परेषां मतमेव हि नः — इति।

निपातलक्षणमाह —

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः।
व्यापकत्वाच्छक्ततायास्त्ववच्छेदकमिष्यते।।

"परेषां मते यत् निपातत्वं" असत्त्वार्थकत्वे सति चादिगणपठितत्वम्, शक्तिसंबन्धेन निपातपदवत्त्वं वा निपातत्वजातिर्वा निपातत्वाख्योपाधिर्वा तदेव सकलनिपातोप-सर्गसाधारण्येन व्यापकत्वात् शक्तावच्छेदकम् अस्माकमपि। परं तु सामान्यधर्मे प्रमाणानां पक्षपातात् शक्तता द्योतकता वा तदवच्छेदेनैव गृह्यते। नैयायिकोक्तं प्रादिचाद्योर्वैषम्यं तु न युक्तम्। व्यापकत्वात् = समानधर्मत्वात्। शक्तताया इत्युपलक्षणम्, द्योतकताया इत्यपि द्रष्टव्यम्।

निपातार्थविचारः लघुमञ्जूषायाम्[१३]

निपातानां द्योतकत्वम्

अनुभूयते सुखं, साक्षात्क्रियते गुरुः इत्यादौ अनु, साक्षात् इत्यादिनिपाताः द्योतकाः। अनुभवः साक्षात्कारः इत्यादिफलानां धात्वर्थत्वम्। एवं च व्यापार-व्यधिकरणफलवाचकत्वरूपं सकर्मकत्वं धातोर्निर्वहति। कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति स्वीकारेऽपि फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफले एवान्व-

---

[१३] ल.म. पृ. ५८४

यौचित्येन धात्वर्थफलद्योतकत्वमेव निपातानामावश्यकम्। द्योतकत्वं समभिव्याहृतशब्दनिष्ठवृत्त्युद्बोधकत्वम्। क्वचित्तु क्रियाविशेषाक्षेपकत्वं तत्। यथा प्रादेशं विलिखतीत्यादौ। विः विमानक्रियाक्षेपकः। इत एव प्रादेशमिति कर्मणि द्वितीया। प्रादेशं विमाय लिखतीत्यर्थः। क्वचित्तु संबन्धपरिच्छेदकत्वं द्योतकत्वम्। यथा कर्मप्रवचनीयानाम्।

अथ शब्दानुशासनम् इत्यत्राथशब्दस्य प्रारम्भक्रियाक्षेपकत्वं कैयटादावुक्तम्। वस्तुतस्तु अत्र अथशब्दो वाचक एव। अधिकृतमिति तदर्थ इत्युद्योते। लोके अनुभू इति समुदायादेवार्थप्रतीत्या अनुविशिष्टभू इत्यस्यैव धातुत्वमिति तु नाशङ्कनीयम्। विशिष्टस्य धातुगणे पाठाभावात्। विशिष्टस्य धातुत्वे अडागमादीनां विशिष्टात् पूर्वं प्रवृत्तिः स्यात्। यथा अन्वभवत् इत्यादौ।

वाचकत्ववादिमतखण्डनम्

एतेन निपातानां द्योतकत्वसमर्थनेन वाचकत्ववादिनैयायिकमतमपास्तम्। नैयायिका हि —

उपसर्गाः द्योतकाः। तदितरनिपाता वाचकाः। "साक्षात् प्रत्यक्षतुल्ययोः" इति कोशात्। नमःपदे नमस्कारार्थकत्वस्य लोकसिद्धत्वाच्च। सकर्मकत्वं च स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचकत्वम्।

स्वं — धातुः। कर्मत्वमपि स्वस्वयुक्तनिपातान्यतरार्थफलाश्रयत्वमिति न कर्मणि लकारानुपपत्तिः इत्याहुः। अपि च उपसर्गाणां द्योतकत्वं निपातानां वाचकत्वमिति वैषम्ये बीजाभावः। अनुभूयत इत्यस्य साक्षाक्रियत इत्यनेन समत्वात्।

कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति निष्कृष्टमते द्योतकत्वं निना गत्यभावश्च। कर्मसंज्ञकः तण्डुलादिः तदन्वयी विक्लित्त्यादिः तदर्थकत्वं पचेः। तद्वत् साक्षात्क्रियते गुरुः इत्यादावपि कर्मसंज्ञकः गुर्वादिः तदन्वयी साक्षात्कारः तदर्थकत्वं कृञादेरेव, न तु साक्षादित्यादिनिपातस्य।

अपि च "लः कर्मणि च भावे चाकर्मकेभ्यः"[१४] इति सूत्रे कर्मशब्देन स्वस्वयुक्तनिपातान्यतरार्थफलाश्रयत्वेन रूपेण कर्मबोधस्य दुर्लभता। अन्यतरत्वस्य अतिगुरुत्वेन तद्घटितकर्मत्वस्य दुर्ज्ञेयता। तद्भिन्नत्वे सति तद्भिन्नो यः तद्भिन्नत्वं ह्यन्यतरत्वम्। तस्य भेदघटितत्वेन गुरुत्वम्। तद्भिन्नत्वे सति तद्भिन्नानां सर्वेषां ज्ञानासंभवेन तद्भिन्नत्वस्य दुर्ज्ञानत्वम्।

---

[१४] पा.सू. ३.४.६९

यत्तु उपसर्गो द्योतकः उपसर्गत्वात् इत्यनुमानेन नैयायिकेन उपसर्गाणां द्योतकत्वसाधने निपातानामपि निपातत्वेन हेतुना वाचकत्वाभावसाधनं युक्तम्। प्रमाणानां सामान्ये पक्षपातात्। अत्र शक्तिसंबन्धेन निपातपदवत्त्वं अखण्डं वा निपातत्वं पक्षतावच्छेदकमिति।

तन्न। निपातत्वापेक्षयापि सामान्यो यो धर्मः अव्ययत्वं तदवच्छेदेन वाचकत्वाभावसिद्ध्यापत्तेः। न चेष्टापत्तिः। स्वराद्यव्ययानां स्वातन्त्र्येण प्रयोगानापत्तेः।

अपि च निपातत्वं द्योतकत्वग्रहेऽवच्छेदकमिति न युक्तम्। तत्तदर्थनिरूपितद्योतकत्वस्य तत्तन्निपातवृत्तितया तद्वृत्त्यसाधारणधर्मस्यावच्छेदकत्वमावश्यकमिति सामान्यधर्मस्य अवच्छेदकत्वे मानाभावश्च। व्याप्यरूपेणावच्छेदकत्वे व्यापकरूपेण नावच्छेदकत्वमिति न्यायात्। अपि च निपातत्वाग्रहेऽपि बोधात् न निपातत्वं द्योतकतावच्छेदकम्।

यदपि निपातानां वाचकत्वे शोभनः समुच्चय इतिवत् शोभनश्च इत्यस्यापत्तिः। घटस्य समुच्चय इत्यस्य स्थाने घटस्य च इत्यस्याप्यापत्तिरिति। तन्न।

शब्दशक्तिस्वाभाव्येन नित्यपरतन्त्रतया निपातैः स्वार्थस्य विशेषणत्वेनैव बोधेन तत्र विशेषणानां शोभनादीनामन्वयाप्रसङ्गात्। पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति व्युत्पत्तेः।

षष्ठ्यापत्तिरपि न। घटं पटं चेत्यादौ घटम् इत्यस्य क्रियायामेवान्वयः। अत एव ततो द्वितीया। घटसमुच्चयवन्तं पटं पश्येति बोधः। तत्र समुच्चयस्य प्रतियोग्यपेक्षायां संनिहितत्वात् घटस्य प्रतियोगित्वम्।

पटे तु समुच्चयस्य भेदेनान्वयः। न तु पटसमुच्चये इति क्व षष्ठ्यापादनम्। नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया। वस्तुतोऽव्ययेषु नामत्वमेव नेत्यग्रे वक्ष्यते। (तिङर्थवादे)

यद्वा समुच्चितः चार्थः। अतो न षष्ठ्यादिप्रसक्तिः। न च समुच्चिताभिधाने सत्त्वार्थकतया द्रव्यवाचित्वात् निपातत्वाभावेऽनव्ययतया ततः सुपः श्रवणापत्तिरिति वाच्यम्। शब्दशक्तिस्वभावात् चाद्युपस्थाप्यस्यासत्वभूतत्वात्। तदुक्तम् — "समुच्चिताभिधाने च व्यतिरेको न विद्यते" इति। व्यतिरेकः — समुच्चयस्य पृथगुपस्थितिरित्यर्थः। धर्म्यंशे समुच्चिते शक्तिकल्पनगौरवं प्रामाणिकत्वान्न दोषाय।

उपसर्गाणां द्योतकत्वम्

एतावता एतदुक्तं भवति — उपसर्गाणां द्योतकत्वमेव। तदनुसारेण सर्वेषां निपातानां द्योतकत्वकथनं न युक्तम्। किं तु केषांचिन्निपातानां द्योतकत्वम्, केषांचित्

वाचकत्वम्। तत्राप्येकस्यैव निपातस्य कार्यवशेन वाचकत्वं द्योतकत्वमपीत्येव युक्तम्। सर्वेषां निपातानां वाचकत्वमिति नैयायिकोक्तं तु न युक्तम् इति।

निपातानामर्थवत्त्वमपि द्योत्यार्थमादायैव। शक्तिलक्षणाद्योतकतान्यतमसंबन्धेन बोधकत्वस्यैव अर्थवत्त्वस्वरूपत्वात्। नञ्समासे उत्तरपदार्थप्राधान्यमपि द्योत्यार्थमादायैव।

प्रतिष्ठत इत्यत्र तिष्ठतिरेव गतिवाची। धातूनामनेकार्थत्वात्। प्रशब्दस्तु तदर्थकत्वस्य तद्गतादित्वस्य च बोधक इति भूवादिसूत्रे भाष्ये स्पष्टम्। तत्र हि क्रियावचनो धातुरिति वार्तिकखण्डनावसरे तिष्ठतिरेव व्रजिक्रियाया निवृत्तिरिति भाष्ये उक्तम्।

यद्यपि लोके विशिष्टादेव विशिष्टबोध इति विशिष्ट एव क्रियावाची; तथाप्यडादिव्यवस्थार्थं धातूपसर्गयोः पृथक्कल्पनम्। अत एवान्तरङ्ग उपसर्गयोगः। अत एव उपास्यते गुरुरिति कर्मणि लकारः। एतन्मूलक एव "पूर्वं धातुरुपसर्गेण युज्यते" इति प्रवादः। अन्यथा केवलस्य आसधातोरकर्मकतया कर्मणि लकारो न स्यात्। बाह्यश्च साधनयोगः — कर्तृकर्मादिसाधनवाचकप्रत्यययोगः। अत एव संचस्कारेत्यादौ पूर्वं सुट्। ततः साधनप्रयुक्तकार्यम्।

न चैवमध्ययनमित्याद्यसिद्धिः। तत्र पूर्वम् इण्धातोः उपसर्गयोगे सवर्णदीर्घे ततो ल्युटि गुणायादेशयोः अधयनमित्यापत्तेरिति वाच्यम्।

"णेरध्ययने वृत्तम्"[१५] "प्रत्ययः"[१६] इत्यादिनिर्देशेन क्वचित् प्रत्ययनिमित्तक-कार्यात् प्राक् उपसर्गनिमित्तककार्याप्रवृत्तेर्ज्ञापनात्। एतन्मूलकमेव पठ्यते "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति" इति नव्याः दीक्षितादयः।

निपातद्योतकत्वविषये नागेशमतम्

वस्तुतस्तु "सुट् कात्पूर्वः"[१७] "गतिर्गतौ"[१८] इत्यत्र भाष्ये उक्तम् — धातूप-सर्गयोः कार्यमन्तरङ्गम्। कुत एतत्। पूर्वं हि धातुरुपसर्गेण युज्यते पश्चात् साधनेन" इति। उपसर्गेण — उपसर्गसंज्ञकेन। साधनेन — तत्प्रयुक्तकार्येणेति तदर्थः। इतर आह — नैतत् सारम्। पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां

---

[१५] पा.सू. ७.२.२६
[१६] पा.सू. ३.१.१
[१७] पा.सू. ६.१.१३५
[१८] पा.सू. ८.१.७०

निर्वर्तयति। तामुपसर्गो विशिनष्टीति। साधनेन — तत्प्रयुक्तकार्येण। हि — यतः साधनं क्रियां निर्वर्तयति — साध्यत्ववैशिष्ट्येन बोधयति। अतः पूर्वं तत्प्रयुक्त-कार्यमिति भावः। तदुक्तं भूवादिसूत्रे कैयटेन — "साधनसंबन्धाद-वसीयमानसाध्यरूपा" इति। निश्चीयमान-साध्यतेत्यर्थः। तां = तेन रूपेण बुद्धाम्। उपसर्गः — तत्संज्ञकः शब्दः। विशिनष्टि = स्वद्योत्यविशेषणवैशिष्ट्येन बोधयति। साध्यत्वेन ज्ञानं विना क्रियायोगे विहितोपसर्गसंज्ञकैः शब्दैः योगाज्ञानादिति तदर्थः। क्रियायोगश्च क्रियाविशेषणीभूतार्थद्योतकत्वमेव।

इतर आह — सत्यमेवमेतत्। यस्त्वसौ धातूपसर्गयोरभिसंबन्धः तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते पूर्वं धातुः साधनेन युज्यते। पश्चादुपसर्गेणेति तस्य आस्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति केन सकर्मकः स्यादिति।

एवमेतत् = पूर्वं साधनेन युज्यत इति यदुक्तम्, तत्सत्यमेव। तत्संबन्धं विना साध्यत्वेन प्रतीतेरपर्यवसानात्। कथं तर्हि उपसर्गकार्यस्यान्तरङ्गत्वम्। तत्राह — यस्त्वसाविति। यस्तव धातूपसर्गसंबन्धकृतत्वेनाभिमतोऽर्थः तमुपसर्गसंज्ञक-संबन्धमन्तरेणापि धातुरभ्यन्तरं कृत्वा अर्थत्वेनाङ्गीकृत्य साधनेन युज्यत इत्यर्थः।

अयं भावः — वक्ता धातोरेव विशिष्टमर्थं बुद्धौ कृत्वा साधनसंबन्ध-कार्यप्रत्यययोगेन तत्र साध्यत्वावगतौ श्रोतृबोधाय क्रियायोगनिमित्तकोप-सर्गसंज्ञकशब्दयोगं करोति। अन्यथा केवलधातुतः सर्वत्र अप्रतीयमानतया श्रोतुः तद्बोधो न स्यादिति। तदुक्तं "भूवादयः"[१९] इति सूत्रे कैयटेन — अनेकार्थत्वात् धातूनां विशिष्टोऽर्थो धातोरेव। उपसर्गस्तु बोद्धारं प्रति तदर्थद्योतक इति।

एवं च पूर्वमुपसर्गयोगो नाम तदर्थसंबन्धः। तत उपसर्गयोगात् पूर्वं साधनकार्ययोगः ततश्च उपसर्गशब्दयोग इति परिभाषाद्वयार्थः। तदुक्तं हरिणा —

धातोः साधनयोगस्य भाविनश्च क्रमाद्यथा।
धातुत्वं कर्मभावश्च तथान्यदपि दृश्यताम्।।
बुद्धिस्थादभिसंबन्धात्तया धातूपसर्गयोः।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते।। इति।

अस्यार्थः — यथा भाविसाधनसंबन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसंज्ञोच्यते यथा च भावीषिकर्मत्वमाश्रित्य उपक्रमे एवेषिकर्मत्वमुक्तम्, तथा भाव्युपसर्ग-संबन्धादुपक्रम एव विशिष्टक्रियावचनत्वं दृश्यताम्। एतदुक्तं भवति। क्रियायाः

---

[१९] पा.सू. १.३.१

अनिष्पत्तेः, सामर्थ्यात् भाविसाधनसंबन्धाश्रयणेन क्रियावचनत्वम्। एवं "धातोः कर्मणः समानकर्तृकादिच्छायां वा"[२०] इति सूत्रम्। तत्र इषिकर्मत्वस्य भावित्वात् उपक्रम एवेषिकर्मत्वमुक्तम्। द्वितीयकारिकाया अर्थः — धातूपसर्गयोः संबन्धं बुद्धिविषयीकृत्य उपसर्गार्थकृतो विशेषः धातुनैवाभ्यन्तरीकृतः पदप्रयोगकाले उपसर्गसंबन्धे सति प्रकाशते श्रोतॄणामिति। तथा —

प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशेषणैः।
प्राक् तु साधनसंबन्धात् क्रिया नैवोपजायते।।

इति च। प्रयोगार्हत्वं च प्रत्ययोत्पत्त्यनन्तरम्। तेषु शब्देषु = धातुषु सिद्धः सन्नेव विशेषणैः प्रादिभिः भेत्तव्यः = विशेष्यः। श्रोतृबोधार्थमिति शेषः।।

क्रियोपसर्गाणां द्योतकत्वमेव भाष्यसंमतम्। अत एव "उपपदमतिङ्" इति सूत्रे धातूपसर्गयोः समासमाशङ्क्य पूर्वं धातुः साधनेन युज्यते इति पूर्वं तिङि विशिष्टेनैव सामर्थ्यं स्यात्। तत्र अतिङ् इति निषेधात् न तिङन्तेनैकार्थीभाव इति समाहितम्। पूर्वं धातोरुपसर्गसंबन्धे उपसर्गस्य वाचकत्वे च तत्र समासो वारयितुमशक्य एव। तस्य वाचकत्वे केवलोऽपि धातुरुपसर्गेण युज्यत एवेति समासो वारायितुमशक्य एव स्यात्।

यद्यपि उपसर्गमुपक्रम्य — "स वाचको विशेषाणां, संभवात् द्योतकोऽपि वा" इत्युक्तं हरिणा। यथा प्रतिष्ठते इत्यत्र गतिनिवृत्तिवाचको धातुः उपसर्गो गतिवाचक इति पुञ्जराजश्च। तथापि तिष्ठतेर्धातुत्वेन यज्यादिवदनेकार्थत्वात् धातोरेव गतिरर्थः। प्रशब्दस्तु द्योतक एव। उपसर्गत्वात् प्रकरोतीत्यादिस्थप्रशब्दवत् इत्यर्थिकया

स्थादिभिः केवलैर्यच्च गमनादि न गम्यते।
तत्रानुमानाद् द्विविधात्तद्धर्मा प्रादिरुच्यते।। इति कारिकया,
क्वचित् संभविनो भेदाः केवलैरनिदर्शिताः।
उपसर्गेण संबन्धे व्यज्यन्ते प्रपरादिना।।

इत्यादिना च द्योतकत्वमेवोपसर्गाणां सिद्धान्तितम्। तद्धर्मा द्योतकत्वधर्मा। क्वचित् पचत्यादौ।

यत्र तु भावे प्रत्ययः तत्राप्यन्तरङ्गत्वात् भिन्नपदोपात्तकर्त्रादिना साधनांशे निराकाङ्क्षत्वे उपसर्गयोग इति तत्रापि न समासः। अत एव "णेरध्ययने"[२१] इत्यादि संगच्छते।

---

[२०] पा.सू. ३.१.७
[२१] पा.सू. ७.२.२६

अध्यागच्छति पर्यागच्छतीत्यादौ आगच्छतीत्यस्मादेव आगमनस्यावगत्या लौकिके शब्दव्यवहारे लाघवानादरात् स्पष्टार्थमेवाधिपर्योः प्रयोगः इति संभूयार्थ-बोधकत्वात् समुदाय एव विशिष्टार्थबोधक इति। उपसर्गस्यानर्थक-त्वमर्थान्तराबोधकत्वादिति बोध्यम्।

क्वचित्तु क्रियागतविशेषबोधकातिरिक्तनिपातानां वाचकत्वमेव। अत एव न इत्यतोऽभावबोधः। कस्य इति जिज्ञासा च दृश्यतेऽभावशब्द इव।

किं च पर्वतात् आ इत्यादौ पर्वतादर्वागित्यर्थप्रतीतेस्तस्य वाचकत्वमेवेति निरुक्ते स्पष्टम्। द्योत्यत्वे हि पञ्चमी न स्यात्, तस्य विशेषणता च स्यात्।

अत एव द्योत्यार्थस्य विशेषणत्वमिति स्वीकारादेव "स्त्रियाम्"[२२] इति सूत्रे स्त्रीत्वस्य प्रत्ययार्थत्वात् प्राधान्ये स्त्रीत्वे एकत्वस्यैव सत्त्वेन द्विवचनबहुवचन-योरनुपपत्तिः इत्याशङ्क्य द्योतकतापक्षेण समाहितं भाष्ये। तत्र हि स्त्रियाः प्रकृतिविशेषणत्वात् इत्यनेन स्त्रीप्रत्ययार्थस्य प्रकृत्यर्थविशेषणत्वात् इत्यर्थके द्योतकतापक्ष उक्तः।

तदुक्तं हरिणा —

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केचित् स्युः संभूयार्थस्य वाचकाः।।

इति द्योतकत्ववाचकत्वरूपपक्षद्वयम्। केचित् इत्युभयान्वयि, केचित् पृथगर्थाभि-धायिनः वाचकाः केचित् अनर्थका एवेत्याह आगमा इवेति तदर्थः।

प्रातिशाख्येऽपि —

नामाख्यातमुपसर्गो निपातः चत्वार्याहुः पदजातानि शब्दाः।
तन्नाम येनाभिदधाति सत्त्वं तदाख्यातं येन भावं सधातुः।।
उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्यामितरे निपाताः।
क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।
सत्वाभिधायकं नाम निपाताः पादपूरणाः।।

सधातुरिति तृतीयार्थे प्रथमा। धातुसहितेन येन वक्ता क्रियामभिदधाति तदाख्यात-मित्यर्थः। अर्थवाचका इत्यस्य मध्यमणिन्यायेन संबन्धः। इतरे नामाख्याताभ्यामन्ये निपातास्तथा ज्ञेयाः। उपसर्गो विशेषकृत् इत्यनेन तेषां द्योतकत्वं दर्शयति। पादपूरणाः पादपूरणा अपीत्यर्थः इति तद्भाष्यम्।

---

[२२] पा.सू. ४.१.३

इवशब्दार्थविचारः (मञ्जूषानुसारम्)

"शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव" इत्यादौ तु द्योतकता इवशब्दस्य। अन्यथा उस्रसदृशस्य करणत्वेऽपि उस्रस्याकरणत्वात् उस्रपदोत्तरतृतीयाया नैरर्थक्यमसाधुत्वं च स्यात्। इवशब्दात्तृतीयाविरहेण सदृशस्य करणत्वालाभश्च स्यात्। इवशब्दोत्तरं सर्वविभक्तिलुक्सत्त्वेऽपि न ताः सार्थिकाः। विभक्त्यर्थाप्रधाननिपातार्थस्य कारकत्वेनानन्वयात्।

ननु शरैरुस्रैरित्यत्र द्योतकत्वेऽपि उस्रसदृशैः शरैरित्यर्थे उस्रशब्दोत्तरं तृतीयानुपपत्तिस्तदवस्था। उस्राणां करणत्वाभावात्। उपमानोपमेययोः समानविभक्तिकत्वमिति वचनाभावात्। यद्यपि उस्रसदृशरूपोस्रपदार्थस्य करणरूपशरैरभेदान्वयात् करणे तृतीया सुलभा। तथापि सदृशस्योक्तरीत्या विशेष्यत्वानापत्तिरिति चेत् —

इष्टापत्तेः। तथा हि — इवादीनां स्वसमभिव्याहृते उपमानताद्योतकत्वम्। उपमानत्वेन प्रतीतेः उभयसाधारणधर्मविशिष्टोपमेयप्रतीतिं विनानुपपत्त्या उभयत्रापि साधारणधर्मबोधे तात्पर्यग्राहकत्वम्। उपमानत्वं च साधारणधर्मवत्त्वेन ईषदितरपरिच्छेदकत्वम्। तद्धर्मवत्तया परिच्छेद्यत्वं चोपमेयत्वम्।

एवं च चन्द्र इव मुखमाह्लादकम् इत्यादौ आह्लादकोपमानभूतचन्द्राभिन्नमाह्लादकं मुखमित्यादिरीत्या बोधः। एवं चोपमानस्य उपमेयेन समानविभक्तिकत्वम्। तेनाभेदान्वयात्।

साधारणधर्मसंबन्धश्च विशेषणतया क्वचित् यथोदाहृते। क्वचित् विशेष्यतया, यथा चन्द्र इव मुखमाह्लादयति इत्यादौ। अत्र हि उपमानचन्द्रकर्तृकाह्लादाभिन्नः मुखकर्तृक आह्लाद इति बोधः।

आलङ्कारिकनव्यास्तु चन्द्र इव मुखमाह्लादयति इत्यत्र चन्द्रसादृश्यप्रयोजको मुखकर्तृक आह्लाद इति बोधं वदन्ति। तेषां मते तयोः उपमानोपमेययोः समानवचनकत्वं दुर्लभम्। तत्र यद्यपि चन्द्रमुखयोः तत्त्वेन (चन्द्रत्वेन मुखत्वेन च) भेदः, तथापि विशेषणतया प्रतीयमानसाधारणधर्मनिमित्तकाभेदोपचारेणाभेदः। अत एव भेदप्रधाना उपमेति वृद्धाः। चन्द्रमुखयोः सादृश्यप्रतीतिस्तु आर्थी इति बोध्यम्।

इदमेव युक्तम्। घनश्याम इत्यादौ विग्रहे समासे च घनशब्दस्य तत्सदृशपरत्वे उपमानानि सामान्यवचनैः [२३] इत्यनेन उपमानत्वेन बोधकानि सामान्यधर्मविशिष्टोपमेयवचनैः समानाधिकरणैः समस्यन्ते इत्यर्थकेन समासानुपपत्तिः।

---

[२३] पा.सू. २.१.५५

घनपदस्यापि उपमेयपरत्वेन उपमानवाचकत्वाभावात्। न च भतपूर्वगत्या, उपमानवाचकत्वाभावात्। घनेन तुल्य इत्यत्र उपमानबोधकत्वेऽपि तस्य विग्रहत्वाभावात्। प्रत्यासत्त्या तत्र वृत्तौ तद्विग्रहवाक्ये चोपमानवाचकत्वस्य ग्रहणौचित्यात्। घनेन तुल्य इत्यस्य घनश्यामविग्रहवाक्यत्वे मृगचपला इत्यादौ पुंवत्त्वापत्तिः। वृत्तौ विग्रहे च सामानाधिकरण्ये सत्येव पुंवद्भावप्रवृत्तेः। एवं मृग्यादेः सादृश्यसंबन्धेनान्वयेऽपि तदनुपपत्तिः।

किं च श्यामशब्दस्योपमेयपरतया घने तदन्वयाभावेन तस्य साधारणधर्म-वैशिष्ट्येनेतरपरिच्छेदकत्वरूपोपमानत्वाभावः। तदुक्तं भाष्ये[२४] —यदि शस्त्रीव श्यामा देवदत्तेति विग्रहः। तदा देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यात्।। इति।

कैयटेऽपि — न च शब्दस्य आवृत्तिरस्ति, येनोभयगतश्यामत्वं प्रतिपादयेत्। इति। एको हि श्यामशब्दः एकगतगुणस्यैव प्रतिपादकः। न हि तस्य शाब्दान्वयं विना युक्तमुपमानत्वमिति तस्याशयः। श्यामेत्यस्य उपमेयपरत्वाभावे तु साधारणधर्म-विशिष्टोपमेयपरत्वरूपसामान्यवचनत्वाभावात् समासो न स्यात्। अत एव भाष्ये — शस्त्रीशब्दः शस्त्र्यामेव, श्यामशब्दो देवदत्तायामेव इति पक्षे सामानाधिकरण्याभावात् समासपुंवद्भावौ न प्राप्नुतः इत्युक्त्वा एवं तर्हि तस्यामेवोभयं वर्तत इति युक्तम् इत्युक्तम्। अत एवैतदुत्तरं —

शस्त्रीशब्देनाभिसंबध्यमानत्वात्।
श्यामाशब्दस्य सामान्यवचनत्वाभावः।।

इत्याशङ्कितम्। शस्त्रीशब्देनाप्यभिसंबध्यमानत्वादिति तदर्थः। बहूनां यः सामान्यमाह स एव सामान्यवचन इत्याशयेन शङ्का। ततः सिद्धान्तिना उक्तम् — श्यामत्वस्य उभयत्र शस्त्र्यां देवदत्तायां च भावात् उभयगतगुणवाचकत्वाच्च श्यामाशब्दस्य सामान्यवचनत्वम्। नावश्यं स एव सामान्यवचनः यो बहूनां सामान्यमाह द्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचनः इति। अत्र उभयगतगुणवाचकत्वादित्यनेन उभयोः साधारणधर्मसंबन्धः शाब्द इति सूचितम्। अत एव सामान्यैरिति नोक्तम्। सामान्यवचनैः इति चोक्तम्। तच्च उभयान्वयित्वेन उभयगतधर्मवाचकत्वबोधनार्थम्। श्यामाशब्दस्य द्विगतधर्मवाचकत्वेनैव सामान्य-वचनत्वं बोध्यम्। एवं च उपमानश्यामघनाभिन्नः श्यामो देवदत्त इति बोध इति भाष्यस्वरसः।

---

[२४] सू. २.१.५४

काव्यप्रकाशस्वरसोऽप्येवमेव। तत्र हि (काव्यप्रकाशे दशमोल्लासे उपमाप्रकरणे पूर्णा लुप्ता च साग्रिमा इति कारिकाव्याख्याने उपमा श्रौती आर्थी चेति द्विविधेत्यर्थप्रतिपादनावसरे —) यथेवादिशब्दाः यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते, तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् संबन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा। तेन तुल्यम् इत्यादौ प्रतीततुल्यतोपपत्तये साधर्म्यस्य आर्थत्वात् आर्थीति। यत्परा इत्यस्य यदनन्तरमुपात्ता इत्यर्थः। उपमानताप्रतीतिश्च शाब्द्येव। तेषां शब्दानामुपमानविशेषणार्थप्रतिपादकत्वे अस्या इतिना हेतुत्वेनोपादानात्।

न चैवं पुरुषो व्याघ्र इव शूरः इत्यादौ भवदुक्तरीत्या बोधे विशेषणस्य व्याघ्रस्यापि सविशेषणत्वेनासामर्थ्यात् समासो न स्यादिति वाच्यम्। उपमानत्वेन बोधकस्य तस्य साधारणधर्मांशे नित्यसापेक्षत्वेनादोषात्। सामान्यधर्मवत्त्वेन परिच्छेदकत्वं हि उपमानत्वम्। तच्च तत्त्वेन (साधारणधर्मवत्त्वेन) ज्ञातस्यैव।

यद्यप्युपमेयत्वं साधारणधर्मवत्त्वेन परिच्छेद्यत्वमेव। तस्य च तत्त्वं विधेयमिति न तन्नित्यसापेक्षम्। तथापि प्रधानस्य सापेक्षत्वेन भवत्येव समासः। प्रधाने अनेकविशेषणसंबन्धसंभवात्। देवदत्तो धनी सुन्दरश्चेतिवत्।

अस्तु वा उपमेयस्यापि नित्यसापेक्षत्वम्। परं तु तत्त्वं न समासप्रयोजकम्, किं तु गमकत्वमेवेति समासवादे वक्ष्यते। तस्य तत्त्वं नित्यसापेक्षत्वं बहुशो दृष्टमिति तत्रापि समासः स्यादिति तद्वारणाय सामान्याप्रयोग इति।

न्यायकौस्तुभकारेण इवशब्दार्थविचारः[२५]

चन्द्र इव मुखम् इत्यादौ इवशब्दार्थः सादृश्यम्। मुखे चन्द्रसादृश्यस्यानुभवसिद्धत्वात्। इवशब्दार्थे सादृश्ये चन्द्रस्य प्रतियोगितासंबन्धेनान्वयः। सादृस्यस्यानुयोगितया मुखेन्वयः। चन्द्रप्रतियोगिकसादृश्यवत् मुखमित्यन्वयबोधः।

ननु एतादृशान्वयबोधो न संभवति नामार्थयोः भेदसंबन्धेनान्वयासंभवेन इवार्थे चन्द्रस्य प्रतियोगितासंबन्धेनान्वयासंभवात् इति चेत् —

अत्र प्राचीनानुयायिनः — चैत्रस्येदं धनमित्यादौ यथा स्मामिचैत्रीयं धनमित्याकारको अन्वयबोधः, तथा चन्द्र इव मुखमित्यत्रापि सदृशचन्द्रीयं मुखमित्यन्वयबोधः। नामार्थयोर्भेदसंबन्धेनान्वयबोधे प्रकारीभूतविभक्त्यर्थनिपातार्थान्यतरोपस्थितिः

---

[२५] न्या.कौ. पृ. ८६४

कारणम्। फलानुरोधेन तथैव कल्पनात्। तथा च इवपदोपस्थापितस्य सादृश्यस्य आश्रयतासंबन्धेन चन्द्रे, चन्द्रस्य सादृश्यसंबन्धेन मुखे अन्वयः। सादृश्यस्य प्रकारतया संसर्गतया च भनमित्याहुः।

नव्यास्तु निपातातिरिक्तनामार्थयोरेव भेदेनानन्वय इति व्युत्पत्तेः निपातार्थ-नामार्थयोः भेदेन संबन्धेन अन्वयसंभवात् चन्द्रप्रतियोगिकसादृश्याश्रयो मुखमिति बोधः संभवत्येवेति वदन्ति।

अथ इवशब्दर्थभूतं सादृश्यं किंरूपमिति चेत् — उच्यते। भेदविशिष्टधर्मवत्वं सादृश्यम्। वैशिष्ट्यं च सामानाधिकरण्यरूपम्। तत्र भेदे चन्द्रस्य चन्द्रत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन धर्मे चाधेयतासंबन्धेन तस्यान्वयः। तथा च चन्द्रवृत्तिः चन्द्रभिन्नत्वविशिष्टो यो धर्मः तदाश्रयः मुखमित्यन्वयबोधः। स च धर्मः चन्द्रवृत्तिविलक्षणरूपादिकमेव। न च चन्द्रवृत्तिरूपादेः समवायेन मुखे असत्वात् कथमन्वय इति वाच्यम्। तत्तत्प्रकारकज्ञानविशेष्यत्वसंबन्धेन तद्वत्वस्य मुखे सत्वात्। चन्द्रभेदविशिष्टत्वमपि धर्मस्य स्वप्रकारकज्ञानविशेष्यत्वरूपसंबन्ध-घटितसामानाधिकरण्यसंबन्धेन। न च चन्द्रभेदविशिष्टधर्मस्य चन्द्रवृत्तित्वं न संभवतीति वाच्यम्। गुणाद्यन्यत्वविशिष्टसत्तायाः गुणवृत्तित्ववत् तस्य संभवात्।

अत्र सादृश्यान्वयबोधे उपमानोपमेययोः समानविभक्तिकत्वं तन्त्रम्। तेन चन्द्रस्येव मुखमित्यत्र न मुखे चन्द्रसादृश्यबोधः। कालिदासस्येव यश इत्यादौ च यशः पदाध्याहारेण कालिदासस्य यश इव यश इत्यन्वयः।

न च सादृश्यस्य भेदघटितत्वे "रामरावणयोर्युद्धं रामरावणयोरिव" इति प्रयोगो न स्यादिति वाच्यम्। तत्र विशिष्टवाचकस्य इवशब्दस्य तद्गतधर्मवत्व-रूपकेवलविशेष्ये लाक्षणिकत्वात्।

यद्वा एवकारवत् इवशब्दस्यापि भेदे धर्मे च शक्तिः। चन्द्रप्रतियोगिकभेदवत् चन्द्रवृत्तिधर्मवच्च मुखमित्यन्वयबोधः। "रामरावणयोर्युद्ध" मित्यत्र भेदांशमपहाय केवलतद्गतधर्मान्वयबोध इति संप्रदायः।

मतान्तरेण सादृश्यपदार्थनिरूपणम्

केचित्तु — भेदः वृत्तिसजातीयधर्मश्च सादृश्यम्। साजात्यं च यथानुभवं तत्तद्रूपेण। चन्द्र इव मुखमित्यत्र भेदे अन्वयितावच्छेदकावच्छिन्नप्रतियोगितासंबन्धेन चन्द्रस्यान्वयः। तेन मुखं मुखमिवेति नान्वयबोधः। वृत्तित्वे च निरूपकतासंबन्धेन चन्द्रस्यान्वयः। मुखे भेदतादृशधर्मयोः अधिकरणतया अन्वयः। साजात्यं च

तात्पर्यवशात् आह्लादनत्वरूप योग्यसंस्थानविशेषादिवृत्तिधर्मेण। एवं च चन्द्रभिन्नत्वे सति चन्द्रवृत्याह्लादकत्वसजातीयाह्लादकत्ववत् मुखमिति शाब्दबोधः।

कालिदासस्येव यश इत्यत्र तु यशस्संबन्धित्वेन एतस्येत्यस्याध्याहारात् एतत्पदार्थे इवार्थस्यान्वयः। एवं च कालिदासभिन्नत्वे सति कालिदासनिष्ठयशस्सजातीय-यशस्विनः एतस्य यश इति बोधः। साजात्यं च बहुपुरुषवेद्यत्वादिना उत्तमकाव्य-प्रभवत्वादिना च। नियमेन तादृशसाजात्यबोधार्थं यशःपदम्। कालिदास्येव एतस्य यश इत्यत्र एतद्वृत्तियशस्त्वेन विशेष्यतया कालिदासवृत्तियशस्सजातीययशस्त्वेन एतत्पदार्थविशेषणीयभूतसादृश्यघटकतया च इति प्रकारभेदात् न पौनरुक्त्यम्।

गगनं गगनाकारं, रामरावणयोर्युद्धम् इत्यादौ च उपमेयवाचकपदोत्तरमेवकारो अध्याहर्तव्यः। द्वितीये च उपमानवाचकं युद्धमिति। गगनमेव गगनाकारम्, राम-रावणयोर्युद्धमेव युद्धमिति पूर्णं वाक्यम्। तथा च गगनभिन्ने गगनसादृश्यं रामरावण-युद्धभिन्ने रामरावणयुद्धसादृश्यं नास्तीति शाब्दबोधः। अन्यानुयोगिको व्यवच्छेदः एवकारार्थः। अत्र गगनं गगनसादृश्यवत् इति भावान्वयबोधो न विवक्षितः, बाधात्।

यत्तु अत्र भेदाघटितसादृश्यमात्रस्यान्वयबोध इति संप्रदायविदः मतम्; तत् अतिप्रसङ्गात् अनुभवविरोधाच्च उपेक्षणीयम् — इति प्राहुः।

चन्द्र इव मुखमित्यत्र उपमानोपमेयोभय-विशेष्यकबोधः इति मतानुवादः[२६]

यत्तु चन्द्र इव मुखमित्यत्र मुखसदृशश्चन्द्रः, चन्द्रसदृशं मुखमिति उभयविशेष्यको बोधः। यथा चन्द्रस्तथा मुखम् इत्यत्र सादृश्यधर्मवांश्चन्द्रः तादृशधर्मवान्मुखमिति उपमानोपमेयोभयविशेष्यबोधस्य क्लृप्तत्वात् तत्समानाकारको बोधः चन्द्र इव मुखमिति वाक्याज्जायते इत्यनुभवसिद्धत्वात्। न च तत्र प्रकारार्थकथाल्प्रत्ययेन यत्तच्छब्दाभ्यां वाक्यभेदावगमेन चोभयविशेष्यकबोधोपगमेपि चन्द्र इव मुखमित्यत्र उपमानोपमेयोभयविशेष्यकबोधे मानाभाव इति वाच्यम्। तथा सति "हंसीव धवलश्चन्द्रः" इत्यादौ धवलः इत्युपमेयमात्रविशेष्यकबोधे बाधकाभावेन लिङ्गभेदस्य उपमादोषत्वानुपपत्तेः। उपमानोपमेयोभयविशेष्यकबोधाङ्गीकर्तृमन्मते तु तत्र धावल्यवती हंसी धावल्यवांश्चन्द्र इति उभयविशेष्यकबोधेन पुंलिङ्गधवलशब्दस्य हंस्यामन्वयासंभवात् लिङ्गभेदरूपदोषोपपत्तेः।

---

[२६] न्या.कौ. पृ. ८७२

न च तादृशान्वयासंभव एव कीदृशकारणाभावादिति शङ्कनीयम्। अनियत-लिङ्गवचनकनामार्थप्रकारकतादात्म्यसंसर्गकशाब्दबोधे समानलिङ्गवचनकनाम-जन्योपस्थितेः हेतुत्वेन तदभावात् तादृशान्वयावंभवात्। न च तादृशहेतु-तायां मानाभाव इति वाच्यम्। नीलस्य घट इत्यादावभेदान्वयबोधवारणाय तदावश्यकत्वात्। अजहल्लिङ्गस्थले = नियतलिङ्गस्थले वेदाः प्रमाणमित्यादौ लिङ्गभेदेनान्वयात् अनियतत्वनिवेशः। अथ एव मणिकृताप्युक्तम् — "भिन्न-विभक्तिकयोरिव भिन्नलिङ्गकयोरपि सामानाधिकरण्येन विशेषणविशेष्यभावाभावात्। अजहल्लिङ्गे तु लिङ्गनियमाननुशासनात्तथा" — इति। युज्यते चोपमानोपमेयोभय-विसेष्यकबोधस्वीकारणम्। अन्यथा चन्द्र इव मुखमित्यादौ उपमानोपमेययोरेक-विभक्तिकत्वेन उभयत्र सादृश्यस्य शाब्दत्वात् श्रौती उपमा। चन्द्रेण तुल्यं मुखमित्यादौ विभक्तिभेदात् सादृश्यस्य अशाब्दत्वेन आर्थी उपमा। इदं मुखं च तुल्यमित्यादौ विभक्तिसाम्येपि उपमानोपमेयभावस्य प्रसिद्धिवशादेव लाभ इति आर्थी उपमेति उपमायाः श्रौत्यार्थीविभागानुपपत्तेः इति। तन्न।

उक्तमतनिराकरणम्

उभयविशेष्यकबोधाङ्गीकारेपि "चन्द्र इव मुखं रमणीयं" इत्यादावपि उपमायाः दुष्टत्वापत्तेः। तत्रापि उपमानोपमेययोः भिन्नलिङ्गतया रमणीयत्वस्य मुखान्वितस्य चन्द्रे अन्वयासंभवात्। न च तत्र रमणीयं च रमणीयश्चेति द्वन्द्वे "नपुंसकमन-पुंसकेनैकवच्चास्यान्यतरस्याम्" इत्येकशेषे एकवद्भावे च पुलिंङ्गरमणीयशब्दस्य चन्द्रे, नपुंसकस्य तस्य मुखे अन्वयात् न दोष इति वाच्यम्। तथापि कुवलयमिव श्यामः कटाक्षः, ध्वान्तमिव केशो नीलः इत्यादावुपमायाः दुष्टत्वप्रसङ्गात्। न च तत्र दुष्टत्वमिष्टमेवेति वाच्यम्। मानाभावात्। "इष्टः पुंनपुंसकयोः प्रायेण" इति वामनोक्तेः उभयत्र सत्वात्।

न च तत्रापि श्यामं च श्यमश्चेति द्वन्द्वे "नपुंसकमनपुंसकेनैकवच्चा-स्यान्यतरस्याम्" इति सूत्रेण एकशेषे एकवद्भावे च नपुंसकश्यामशब्दस्य कुवलये, पुंलिङ्गश्यामशब्दस्य कटाक्षे अन्वयाङ्गीकारान्न दोष इति वाच्यम्। पुंलिङ्गोपमेयशब्द इव उपमानस्थले साधारणधर्मस्य उपमेयसमानलिङ्गकत्वेन तत्रापि नपुंसकस्यैव श्रवणापत्तेः। एवमेकशेषाश्रयणेन सर्वत्राप्यदुष्टत्वे वामनोक्तौ प्रायशब्दविरोधाच्च।

किं च "प्राणा इव प्रियोयं मे विद्या धनमिवार्जिता" इत्यस्यापि दण्ड्यादिभिः आलंकारिकाचार्यैः अदुष्टत्वेनाङ्गीकृतस्य दुष्टत्वप्रसङ्गाच्च। तथाहि — प्राणा इवेत्यत्र

उपमेयान्वयिनः प्रिय इत्येकवचनान्तस्य प्राणा इति बहुवचनान्तेनान्वयासंभवात्, विद्या धनमिवेत्यत्र उपमेयविद्यान्वितस्य स्त्रीलिङ्गस्य आर्जिता इत्यस्य धनमिति नपुंसकलिङ्गशब्देनान्वयासंभवेन च दुष्टत्वप्रसङ्ग इति।

साधारणधर्मस्य इवार्थत्वे विशेषकथनम्[२७]

इदं तु बोध्यम् — यत्र साधारणधर्मस्य शाब्दत्वं तत्र तद्रूपेणैव = शब्द-बोध्यतावच्छेदकेन रमणीयत्वादिनैव स इवार्थः। अन्यत्र तु धर्मत्वेनैव। इत्थं च चन्द्र इव मुखं रमणीयमित्यत्र चन्द्रप्रतियोगिकभेदसमानाधिकरणं यत् चन्द्रवृत्ति रमणीयत्वं तदाश्रयो मुखमिति बोधः। चन्द्र इव मुखमित्यत्र तु चन्द्रप्रतियोगिकभेद-समानाधिकरणचन्द्रवृत्तिधर्मवन्मुखमिति बोधः। अत एवात्र उपमायाः श्रौतीत्वम्, साधारणधर्मस्योपमानोपमेयनिष्ठतायाः इवशब्देन प्रतिपादनात्। तत्र समानाधि-करणान्तेन उपमेयवृत्तित्वम्, वृत्यन्तेनोपमानवृत्तित्वं च प्रतिपाद्यते।

न च चन्द्रान्यवृत्तित्वस्य ततो लाभेपि मुखवृत्तित्वस्य लाभाभावात् श्रौतीत्वमनुपपन्नमिति वाच्यम्। उपमेयस्य मुखस्यापि चन्द्रान्यतया चन्द्रान्यत्वेन सामान्यरूपेण उपमेये विद्यमानत्वस्य इवशब्देन बोधादेव श्रौतीत्वोपपत्तेः।

न च साधारणधर्मप्रयोगस्थले तस्यैव इवशब्देन रमणीयादिशब्देन च बोधने अन्यतरस्य व्यर्थत्वमिति वाच्यम्। उभाभ्यामेकस्यैवोपस्थापनात्।

गज इव गच्छति इत्यादौ बोधप्रकारः

ननु गज इव गच्छति, पिक इव रौति इत्यादौ कथं बोधः। गजसादृश्यस्य गमने, पिकसादृश्यस्य च शब्दात्मकरवणे बाधात् इति चेत् — उच्यते। गजशब्दस्य गजकर्तृकगमनलाक्षणिकतया, पिकशब्दस्य च पिकरवणलाक्षणिकतया गजगमन-सदृशगमनकृतिमान् पिककर्तृकरवणसदृशरवणानुकूलकृतिमान् इत्याद्याकार-कान्वयबोधाङ्गीकारात्। यद्वा तत्र स्ववृत्तिगमनसजातीयत्वरूपं स्ववृत्तिरवण-सजातीयत्वरूपं च सादृश्यम् इवार्थः। तस्य धात्वर्थे गमने रवणे च अन्वयः। न तु स्ववृत्तिगमनसजातीयगमनवत्पर्यन्तम् इवार्थः। गजवृत्तिगमनसजातीयगमनकर्ता पिकवृत्तिरवणसजातीयरवणकर्ता इति शाब्दबोध इति।

एवं च इवशब्दस्यापि वाचकत्वमेव न तु द्योतकत्वमिति सिद्धम्।

---

[२७] न्या.कौ. पृ. ८७७

सादृश्यमतिरिक्तः पदार्थः इति निरूपणम्

एवं च इवादियोगे साधारणधर्मसंबन्धरूपा उपमा वाच्या। सादृश्यप्रतीतिः आर्थी। सदृशादिपदयोगे सादृश्यप्रतीतिः शाब्दी, उपमा त्वार्थी। सादृश्यं तु साधारण-धर्मसंबन्धप्रयोज्यं सदृशादिपदशक्यतावच्छेदकतया सिद्धं, सदृशदर्शने संस्कारोद्बोध-कत्वस्य सर्वसंमतत्वेन संस्कारोद्बोधकारणतावच्छेदकतया सिद्धमखण्डमतिरिक्तः पदार्थः।

न चातिरिक्तपदार्थत्वे गोतमकणादोक्तपदार्थसंख्याविरोध इति वाच्यम्। प्रमेयपदार्थे गोतमोक्तेऽन्तर्भावात्। किं च पदार्थसंख्यानिबन्धनमुपलक्षणम्। तदुक्तं गोतमेन — संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् इति पदार्थगतसंख्यानियमस्यासिद्धिः कारणप्रमाणस्यानुपपत्तेः। उपपत्तौ न तन्नियमः साधनस्य साध्यातिरेकात् इति तदर्थं तद्व्याख्यातार आहुः। साध्यात् ज्ञेयात् संख्यैकान्तात् साधनस्य तज्ज्ञानसाधनस्य भेदे तयोरानन्त्यात् नियमो न सिध्यति। ज्ञेयात् कारणं प्रमाणं भिन्नं यदि नास्ति तदा प्रमाणाभावादेव संख्यैकान्तासिद्धिरिति भावः। साध्यातिरेकादिति। साध्यस्य आनन्त्यादित्यर्थः।

न केवलं भेद एव सादृश्यम्, अपि तु अभेदेऽपि। तथा हि — अकर्तरि च कारके संज्ञायाम्[२८] इति सूत्रे भाष्ये — नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थावगतिः। नञ्युक्तम् इवयुक्तं चान्यस्मिन् तत्सदृशे कार्यं विज्ञायते। तथा ह्यर्थो गम्यते। तद्यथा अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति। एवमिहापि अकर्तरीति कर्तृप्रतिषेधात् अन्यस्मिन्नकर्तरि कर्तृसदृशे कार्यं विज्ञायते। किं चान्यत् अकर्तृ कर्तृसदृशं कारकमित्युक्तम्। एवं च सूत्रे कारकग्रहणं प्रत्याख्यातम्। कर्तृप्रतिषेधादित्यस्य आरोपितकर्तृबोधादित्यर्थः।

अनेन हि भाष्येण अभेदेऽपि सादृश्यमिति सूच्यते। अन्यथा अन्यस्मिन्नित्यस्य वैयर्थ्यापत्तिः। सादृश्यस्य भेदनियतत्वे सदृश इत्येव सिद्धे परिभाषा-यामन्यस्मिन्नित्यस्य वैयर्थ्यं स्पष्टमेव। तथा इवशब्दयोगेऽपि भेदसादृश्ये गम्ये न तु तद्वाच्ये द्योत्ये इति प्रतीयते। इवयुक्तोदाहरणम् इवे प्रतिकृतौ[२९] इत्यधिकारे शाखादिभ्यो यत् इति सोम्य इत्यादि। तत्र सोमसदृशस्तद्भिन्नः प्रतीयते न तु सोम एव।

एतेन भेदनियतं सादृश्यमित्यपास्तम्। अस्या मुखसदृशमस्या मुखमित्या-दावभेदेऽपि सादृश्यप्रतीतेश्च। न चाभेदे साधारणधर्माभावात् कथं तत्प्रयोज्यं

---

[२८] पा.सू. ३.३.१९
[२९] पा.सू. ५.३.९६

सादृश्यमिति वाच्यम्। अनेकवृत्तिधर्मस्यैव साधारणधर्मत्वेन तत्र आवृत्या एकस्यानेकत्वात्।

अत एव अइउण् सूत्रे भाष्ये — एकां कपिलां सहस्रमृषयः एकैकशो दत्त्वा तया सर्वे ते सहस्रदक्षिणाः संपन्नाः इति श्रौतेन स्मार्तेन वा व्यवहारेण एकस्या अप्यावृत्त्या अनेकत्वं सूचितम्।

अत एव सप्तदश सामिधेन्यो भवन्ति इति श्रुतौ पठितानां त्रयोदशसामिधेनीमन्त्राणां प्रथमान्त्ययोः मन्त्रयोः त्रिरावृत्त्या सप्तदशत्वमुक्तं श्रौतसूत्रे।

अत एव एक एवाकार इति पक्षे घटिक इत्यादौ आवृत्तिकृतद्व्यच्त्वेन नौद्व्यचष्ठन्[३०] इति ठन् उक्तो भाष्ये। एवं प्रकृतेऽपि मुखस्य आवृत्त्या अनेकत्वेन एकस्यापि धर्मस्य साधारणधर्मत्वं बोध्यम्।

न चैकस्यैव आवृत्त्या अनेकत्ववत् कालादिभेदेन भेदं प्रकल्प्य मुखमिव मुखमित्यादावुपमैवास्तु इति वाच्यम्। तस्य भेदस्य शब्देनाप्रतिपाद्यत्वात्।

अत एव उपमानानि सामान्यवचनैः[३१] इति सूत्रे भाष्यम् — यदेवोपमानं तदेवोपमेयम्, क इहोपमार्थः गौरिव गौः इति उपमानोपमेयभावद्योतकेवशब्दप्रयोगे किं प्रयोजनम्। कर्मकरणरूपोपमानोपमेयभावस्य एकत्रासंभवात् इवशब्दस्यार्थान्तराभावात्। न च द्वितीयसदृशव्यवच्छेदप्रतीतिः फलमिति वाच्यम्। गोसदृशो गौः इत्यतोऽपि तत्संभवात्। अभेदेऽपि सादृश्याङ्गीकारेण तस्य बोधकत्वात् अबोधकैतत्प्रयोगः गौरिव गौः इत्यादिर्न स्यात्। एवं चोपमालङ्कारस्य अस्य सूत्रस्य चोक्तिसंभवाभाव इत्याशयकमुक्त्वा तस्माद्यत्र किंचित् सामान्यं कश्चिच्च विशेषस्तत्र उपमानोपमेये भवतः इत्युक्तम्। तत्र भिन्नगोव्यक्त्योः उपमानोपमेयभावबोधनार्थः आरोपितभेदवतोः तद्बोधनार्थो वा तत्रेवशब्दप्रयोग इत्याशङ्क्य कैयटेनोक्तम् — तस्य भेदस्य शब्देनासंस्पर्शात् सामान्यमुखेन द्रव्यावसायादिति भावः इति। तस्मादभेदेऽपि साधारणधर्मसंबन्धः तत्प्रयोज्यं सादृश्यं चावश्यं स्वीकार्यम्। काव्यप्रकाशकृतापि साधर्म्यमुपमा भेदे इति अनन्वव्यावृत्त्यर्थं भेदे इति विशेषणं वदता अभेदे साधारणधर्णसंबन्धस्याङ्गीकारात् यत्र साधारणधर्मेण सामान्यरूपताप्रतीतिः प्रत्येकरूपेण शब्दतो विशेषरूपताप्रतीतिः तत्रोपमानत्वादिप्रतीतिरिति सिद्धान्तार्थप्रतीतिः भाष्ये।

एतेन रामरावणयोर्युद्धं रामरावणयोरिव इत्यादौ कल्पभेदेन भिन्नयोः युद्धयोरुपमेति परास्तम्। तस्य भेदस्य शब्देनासंस्पर्शात्।

---

[३०] पा.सू. ४.४.७

[३१] पा.सू. २.१.५५

मुखसदृशं मुखमित्यादावपि आर्थ्याः गौरिव गौः इत्यादौ शाब्द्या उपमायाः अप्रतीतेरर्थः शाब्दश्चानन्वयः। उपमासंबन्धाभाव एवानन्वयः।

तत्रेयती मर्यादा — भेदे सदृशादिशब्दप्रयोगे आर्थी उपमा। गम्यस्योपमानोपमेयभावस्य प्रतीतेः। अभेदे तत्प्रयोगे तु अनन्वयः। सर्वथा तदप्रतीतेः। तत्र भेदसमानाधिकरणसादृश्यमुपमाव्यञ्जकम्। अनन्वयालङ्कारे एकस्यैवोपमानोपमेयत्वमिति व्यवहारस्तु तत्र सादृश्यात्।

अत एव ऊकालोऽच्[३२] इति सूत्रे भाष्ये ऊ अच् इत्येव सामर्थ्यात् उकारसदृशोऽच् इत्यर्थेनैव सिद्धे कालग्रहणं श्रूयमाणनैव उकारेण कालं विशेषयितुमिति द्विमात्रदीनां न ह्रस्वसंज्ञा इत्युक्तम्। भेद एव सादृश्यमिति वदतां मते तु उकारस्य ह्रस्वसंज्ञा दुर्लभा स्यात्, भेदाभावात्।

सादृश्यस्यातिरिक्तत्वादेव अनेनायं सदृश इत्युक्ते केन धर्मेणानयोः सादृश्यमित्येव जिज्ञासा, न तु को धर्मोऽनयोः सादृश्यम् इति। सादृश्यस्य धर्मरूपत्वे हि को धर्मोऽनयोः सादृश्यमित्येव जिज्ञासा स्यात्।

अत एव क्षमया पृथिवीसदृशः, धर्मतः सादृश्यम् इत्यादिप्रयोगः आञ्जस्येनोपपद्यते। प्रकृत्यादितृतीयायाः अगतिकगतित्वात्।

तत्र सादृश्यं व्यञ्जकधर्मभेदात्, आश्रयभेदात्, निरूपकभेदाच्च भिन्नम्। व्यञ्जकम् आह्लादकत्वादि। आश्रयः मुखादिः। निरूपकः चन्द्रादिः।

सादृश्यस्यातिरिक्तत्वादेव उभयोरुभयं वर्तते। सादृश्यमूलाभेदाध्यवसायेन उपमानस्योपमेये अभेदान्वयः इति सिद्धान्तपक्षे एवमपि सादृश्यनिमित्तं गुणो न निर्दिष्टः इति शङ्का संनिधानात् श्यामत्वमेव गुणः इति समाधानं च भाष्ये संगच्छते। सामान्यधर्मस्यैव सादृश्यरूपत्वे तदसङ्गतिः स्पष्टैव। मम तु प्रतीयमानं किंधर्ममूलकमिति शङ्का, उपात्तधर्ममूलकमेव इत्युत्तरमिति न दोषः।

एतावता इवशब्दस्य द्योतकत्वमुपपादितम्। अथ पररीत्या तस्य वाचकत्वमपि क्वचिदिति प्रदर्श्यते। हरीतकीं भुङ्क्ष्व राजन्, मातेव हितकारिणीम् इत्यादौ इवशब्दः सादृश्यवाचकः। तस्य द्योतकत्वे तु शरैरुस्त्रैरिव इत्यादाविव उपमेयसमानविभक्तिकत्वमुपमानस्य प्रसज्येत। इवार्थसादृश्ये मातुः अन्वयः। न च षष्ठ्यापत्तिः।

---

[३२] पा.सू. १.२.२७

प्रतियोगिविशिष्टसादृश्यवतः इवशब्दार्थत्वेन तदेकदेशे प्रतियोगिनि मातुः अभेदे-नान्वयात् षष्ठ्यप्राप्तेः इति।

मतमिदमसाधु। क्रियान्वये एव प्रथमायाः साधुत्वात्। अत एव तिङ्समानाधि-करणे प्रथमा, अभिहिते प्रथमा, इति चैं वार्तिकम्, प्रथमायाः कारकविभक्तित्वपरं सहयुक्तेऽप्रधाने[३३] इति सूत्रस्थं भाष्यं च संगच्छते।

वस्तुतस्तु क्रियागतविशेषद्योतकातिरिक्तनिपातस्थले तेषां निपातानां गमकसत्त्वे द्योतकता। तदभावे तु वाचकतैव। वृत्तिद्वयकल्पनागौरवात्। वृत्तिद्वयमभिधा-व्यञ्जनारूपम्।

न च तस्य वाचकत्वे सादृश्यमस्तीत्यादिवत् इवास्ति इत्याद्यपि स्यादिति वाच्यम्। तथा शिष्टप्रयोगाभावेन उपमानादिपदोपसंदानेनैव तेषां साधुत्वाङ्गीकारात्।

इति इवशब्दार्थविचारः

मणिग्रन्थानुसारेण उपसर्गार्थविचारः

तत्त्वचिन्तामणौ शब्दखण्डे[३४] उपसर्गवादः इति किंचित् प्रकरणमस्ति तत्रेत्थं निरणायि — उपसर्गास्तु द्योतकाः न तु वाचकाः। द्योतकत्वं च धातोरर्थविशेषे तात्पर्यग्राहकत्वम्। तदुपसन्दानेन तत्र शक्तिर्वा। न तु धात्वर्थाभिधायकत्वम्, पौनरुक्त्यापत्तेः।

ननु प्रजयतीत्यादौ प्रकर्षस्य, विजयते इत्यादौ अतिशयस्य, अभ्यागच्छतीत्यादौ आभिमुख्यसामीप्ययोः प्रतीतौ उपसर्गान्वयव्यतिरेकानुविधानात् पदान्तराणामिव उपसर्गाणामपि अर्थविशेषे शक्तिः।

न च प्रतिष्ठत इत्यत्र गमनविषयकधीर्न स्यात्, प्रशब्दस्य प्रकर्षवाचित्वेन अतिशयेन गमनार्थधीप्रसङ्गादिति वाच्यम्। तत्र प्रशब्दस्य धात्वर्थाविरुद्धार्थत्वात्। तच्च गमनमेव। धातोरिव तस्याप्यनेकार्थत्वात्।

न च धातोः सार्थकत्वस्य क्लृप्तत्वात् तत्रानेकार्थता युक्ता, उपसर्गे तु नैवमिति वाच्यम्। धातूनां बहुत्वात् न प्रकर्षवाचित्वं गौरवात्। किं तु प्रशब्दस्यैकस्येति तस्यापि सार्थकत्वात्। •

---

[३३] पा.सू. २.३.१९

[३४] त.चिं. शब्दखण्डः, पृ. ८५४-८५९

न च धातोरनेकार्थकत्वं क्लृप्तं नोपसर्गस्येति वाच्यम्। तर्हि धातोर्नानार्थत्वे उपसर्गानुविधानमर्थविशेषे न स्यात् अक्षादिपदे तथा दर्शनात्।

न चोपसर्गस्यापि अर्थविशेषशक्तत्वे धात्वनुविधानं न स्यादिति वाच्यम्। साधुत्वार्थमुपसर्गे धात्वनुविधानम्, धातुना विना उपसर्गस्य प्रयोगाभावात्। न तु शक्त्यै। धातोस्तु शक्तावेवोपसर्गापेक्षेति वैषम्यात्।

न च प्रजयति अभ्यागच्छतीत्यादौ सामान्यवाचकात् जयत्वादिसामान्यधर्मावच्छिन्नवाचकात् धातोरेव प्रकर्षसामीप्यादिविशिष्टस्य जयागमनादेः उपस्थितिः। तात्पर्यग्राहकत्वमात्रमुपसर्गाणामिति वाच्यम्। प्रकर्षादेः विशेषस्य अशक्यत्वेन तत्र लक्षणायां युगपद्वृत्तिद्वयापत्तेः।

एतेन अभ्यागच्छतीत्यादौ सामीप्यादिविशिष्टधात्वर्थप्रतीतेः उपसर्गाणां वाचकत्वम्। प्रतिष्ठत इत्यादौ धातोरेव गमनार्थकत्वम्। तात्पर्यग्राहकस्तु प्रशब्दः। अन्यथा धातूपसर्गार्थयोः विरोधेन अन्वयानुपपत्तेः। एवं यत्र धातूपसर्गयोर्विरोधः तत्र द्योतकत्वम्, अन्यत्र वाचकत्वमिति मतमपास्तम्। अगमनविरोधिगमनस्यैव प्रशब्दार्थत्वादिति चेत् —

अत्रोच्यते। आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्वम्। अतः प्रतिष्ठत इत्यत्र गमनं धात्वर्थ एव। प्रशब्दार्थत्वे आख्यातार्थभावनान्वयो न स्यात्। प्रकृतिप्रत्यययोः संभूयान्वयबोधकत्वनियमात्। एवं च प्रोत्तरस्थात्वेन गमने शक्तिरिति प्रशब्दः शक्तावच्छेदको न शक्तः इति औपसन्दानिकी शक्तिरेव द्योतकत्वम्।

यद्यपि प्रकर्षाभिमुख्यसामीप्यादेरुपसर्गवाच्यत्वेऽपि तद्विशिष्टधात्वर्थान्वयः भावनायां संभवत्येव। ओदनं पचतीत्यत्र ओदनविषयकपाकान्वयवत्, तथापि उपसर्गस्य शक्तावच्छेदकत्वं न शक्तत्वं गौरवात्। तथा च प्रोत्तरजित्वेन प्रकृष्टजये शक्तिः। एवं हि क्लृप्तविशेष्यशक्तेर्विशेषणविषयकत्वमात्रं कल्प्यते। अन्यथा तु शक्त्यन्तरमेव।

न चैवं जिपूर्वप्रत्वेन तत्रैव (प्रकृष्टजये) शक्तिरस्त्विति वाच्यम्। धात्ववाच्यत्वे भावनानन्वयप्रसङ्गात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः। प्रतिष्ठत इत्यत्र उपसर्गस्य शक्त्यवच्छेदकत्वमात्रकल्पनाच्च।

अथ वा प्रतिष्ठत इत्यत्र विरोधिलक्षणया धातोः विशिष्टे लक्षणा। विशेष्याद्विशिष्टस्यान्यत्वात्। प्रादेस्तात्पर्यग्राहकत्वम्। न हि शक्तिं विनापि धातुतः प्रतीतिसंभवे शक्तिकल्पनं युक्तम्। अनन्यलभ्यस्य शब्दार्थत्वात्।

यदि चोपसर्गस्य वाचकत्वं स्यात् तदा निपातस्यानर्थकस्यापि प्रातिपदिकसंज्ञा वक्तव्येति वार्तिकमनर्थकं स्यात्। अर्थवत्सूत्रेणैव तस्य प्रातिपदिकसंज्ञालाभात्। तस्मात् उपसर्गस्य द्योतकत्वमेव।

न च व्यतिसे इत्यत्र धातोरभावात् उपसर्ग एव वाचक इति वाच्यम्। तत्र लुप्तस्य स्मृतस्य धातोरेवार्थप्रत्यायकत्वात्। धातुलोपमजानतां तु तत्रार्थप्रत्ययाभावादिति।

नञर्थविचारः

शिरोमणिकृतनञ्वादानुसारं नञर्थः

पूर्वं निपातार्थविचारावसरे शब्दशक्तिप्रकाशिकानुसारेण नञर्थोऽपि संग्रहेण कथितः। रघुनाथशिरोमणिना नञ्वादाख्यः ग्रन्थो विशिष्य लिखित इति तदनुसारेण नञर्थः प्रस्तूयते।[३५]

संसर्गाभावोऽन्योन्याभावश्च नञोर्थः। तत्र चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम्। तेन घटो न इति वाक्यात् घटत्वावच्छिन्नप्रतियोगिताकात्यन्तान्योन्याभावौ प्रतीयेते। तादृशव्युत्पत्त्यनङ्गीकारे नीलघटवति भूतले रक्तघटप्रतियोगिताकात्यन्ताभावस्य सत्त्वेन घटो न इति व्यवहारस्य, नीलघटे रक्तघटप्रतियोगिताकान्योन्याभावस्य सत्त्वेन घटो न इति व्यवहारस्य च प्रसङ्गात्। अपि च नीलघटवति न पीतो घटः, पीतो घटो न नीलः इति व्यवहारः उक्तव्युत्पत्तौ साधकप्रमाणम्। नीलघटवति घटपदार्थतावच्छेदकशुद्धघटत्वावच्छिन्नाभावासत्त्वेऽपि पीतपदसमभिव्याहारलभ्यपीतघटत्वरूपान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकाभावमादाय ईदृशव्यवहारस्य प्रमाणता।

प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ। नञोऽसत्त्वे यत्र धर्मिणि येन संबन्धेन यद्वत्त्वं प्रतीयते। नञः सत्त्वे तत्र धर्मिणि तत्संबन्धावच्छिन्नप्रतियोगिताकतदभावः प्रतीयते इति तदर्थः। यथा पचति चैत्र इत्यत्र चैत्रे समवायसंबन्धेन आख्यातार्थकृतिमत्त्वं भासते। न पचति चैत्र इत्यत्र चैत्रे समवायसंबन्धावच्छिन्नकृत्यभावः प्रतीयते। यथा च चैत्रस्येदम् इत्यत्र इदमर्थे चैत्रनिरूपितं स्वत्वमाश्रयतासंबन्धेन भासते, नेदं चैत्रस्यैत्यत्र इदमर्थे चैत्रनिरूपितस्वत्वनिष्ठाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकाभावः भासते इति। चैत्रस्येदमित्यत्र षष्ठ्याः चैत्रनिरूपितं स्वत्वमर्थः, न तु चैत्रनिष्ठं स्वामित्वम्। तस्य धनाद्यवृत्तित्वेन चैत्रीयेऽपि धने नेदं चैत्रस्येति प्रयोगप्रसङ्गात्। निरूपकतायाः वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन

---

[३५] त.चि. शब्दखण्डः, पृ. १०१०-१०७६

तत्संबन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्य बोधयितुमशक्यत्वात्। आश्रयता-संबन्धावच्छिन्नस्वामित्वाभावस्यैव बोधनीयतया तस्य चैत्रस्वामिके धने सत्त्वात्।

यत्पदोपस्थाप्यस्य प्रतियोगिनः अनुयोगिनि आधाराधेयभावः न संसर्गमर्यदया लभ्यः तत्पदार्थे तत्पदार्थसंसर्गाभावबोधे अनुयोगिवाचकपदोत्तरं सप्तमी अपेक्ष्यते। यथा भूतले घटस्य आधाराधेयभावः न संसर्गमर्यादया लभ्यः, नामार्थयोः भेदसंबन्धेन अन्वयस्याव्युत्पन्नत्वात् इति भूतले घटसंसर्गाभावबोधे भूतलपदोत्तरं सप्तमी भूतले न घट इति। अत्राभावसंबन्धस्याधारतासंसर्गत्वासंभवेन तदर्थकविभक्तिं विना तद्भावनासंभवात्। अत्र तात्पर्यवशात् कदाचित् भूतलादौ घटाभावः कदाचित् घटादौ भूतलवृत्तित्वाभावः प्रतीयते। अत एव सप्तम्यन्तार्थप्रतियोगिकाभावस्यापि नञा बोधनादेव पृथिव्यां गन्धो न जले इत्यादिवाक्ये गन्धाद्येकविशेष्यकप्रतीति-जनकत्वानुभवः गन्धः पृथिवीवृत्तिः जलवृत्तित्वाभाववांश्चेत्याकारकः। न जल इत्यतो गन्धाभावे जलवृत्तित्वबोधोपगमे तु तत्प्रतीतौ अभावस्यैव विशेष्यतया पृथिव्यां गन्ध इत्यतः तद्विशेष्यकबोधानुत्पत्त्या तयोरेकविशेष्यकबोधजनकत्वानुभवो विरुध्येत।

केचित्तु सर्वत्र विशेष्ये विशेषणस्याभावो नञा प्रत्याय्यते। एतदुक्तं भवति-नञोऽसत्त्वे यत्पदार्थे यत्पदार्थो विशेषणतया भासते तत्र नञा तत्पदार्थाभावो विशेषणतया भासते। तथा च भूतले घट इत्यतो घटे भूतलवृत्तित्वस्य विशेषणतया बोधनात् भूतले न घट इत्यतोऽपि घटे भूतलवृत्तित्वाभाव एव विशेषणतया भासते, न तु घटाभावे भूतलवृत्तित्वम्। एकाकारवाक्यस्य द्विविधबोधजनकत्वोपगमे नञ्पदे सप्तम्यन्तभूतलादिसमभिव्याहारज्ञानस्य द्विविधकारणत्वकल्पनापत्तेः। उभयसाधा-रणतत्कार्यतावच्छेदकस्यान्यतरत्वादेः कथंचित् संभवेऽपि तादृशवाक्यधर्मिक-द्विविधवाक्यार्थतात्पर्यज्ञानस्य पृथक् कारणतया तत्कारणताधिक्यस्य दुर्वारत्वादिति।

अपि च भूतले घटो नास्ति घटौ न स्तः घटा न सन्तीत्यादौ विशेष्यविशेषणपदयोः समानवचनकत्वनियमेन सुप्तिङोर्वचनसाम्यनियमः उपपद्यते। अभावस्य विशेष्यत्वे तस्य ऐक्येन घटौ न स्त इत्यादौ द्विवचनादिकं न स्यात्।

न चैतन्मतेऽपि घटो नास्ति घटौ न स्तः इत्यादौ सप्तम्यर्थे निरूपितत्वं, तच्च असधात्वर्थे विद्यमानत्वे तच्च आख्यातार्थे आश्रयत्वे, तच्च नञर्थेऽभावे, स च घटेऽन्वेतीति भूतलनिरूपितविद्यमानत्वाश्रयत्वाभाववान् घट इति शाब्दबोधात् अभाव एव साक्षात् घटे विशेषणं, न तु आख्यातार्थः। तथा च कथमाख्यातान्तस्य समानवचनत्वमिति वाच्यम्।

विशेषणपदस्य साक्षात् स्वार्थविशेष्यवाचकपदेनेव स्वार्थविशेष्यनिपातार्थ-विशेष्यवाचकपदेनापि समानवचनकत्वनियमः चैत्रो न पचतीत्यादौ दृष्टत्वात् स्वीकार्य इत्याशयात् इत्याहुः।

तेषां मते जातौ न सत्ता इत्यत्र गतिश्चिन्तनीया। तत्र हि सत्तायां जातिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाभावो बोध्यते तदन्यसंबन्धावच्छिन्नवृत्तित्वाभावो वा बोध्यते। नाद्यः, जातिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वस्य अप्रसिद्ध्या तदभावस्य बोधयितुमशक्यत्वात्। न द्वितीयः। सत्तायां जातिनिरूपितैकार्थसमवायादिसंबन्धावच्छिन्नवृत्तित्वस्य सत्त्वेन तदभावस्य बाधात् बोधयितुमशक्यत्वात्।

अत एवं तैर्वक्तव्यम् — जातौ न सत्तेत्यत्र सत्तापदस्य सत्तासमवाये लक्षणा। सप्तम्यर्थश्च अनुयोगित्वम्। तथा च जात्यनुयोगिकत्वाभाववान् सत्तासमवाय इत्यन्वयबोधः। जात्यनुयोगिकत्वं च विषयतादौ प्रसिद्धमिति नानुपपत्तिः। यद्वा सत्तापदस्य सत्ताप्रतियोगिकसमवायानुयोगित्वे लक्षणा। तत्र जातिवृत्तित्वाभावो भासत इति नानुपपत्तिः इति। अत एव अगतिरित्यनुक्त्वा गतिश्चिन्तनीयेत्युक्तम्।

केचित्तु — सप्तम्यर्थान्वितस्याभावस्य विशेषणतया प्रतियोगिन्यन्वयः। तथा च भूतले घटो नास्तीत्यत्र सप्तम्याः निरूपितत्वमर्थः। तस्य असधात्वर्थे वृत्तित्वेऽन्वयः। तस्य आख्यातार्थे आश्रयत्वेऽन्वयः। तस्य नञर्थेऽभावेऽन्वयः। तस्य प्रतियोगितासंबन्धेन घटेऽन्वयः। तथा च भूतलनिरूपितवृत्तित्वाश्रयाभावप्रतियोगी घटः इत्यन्वयबोधः। जातौ सत्ता नास्तीति वाक्यात् जातिनिरूपितवृत्तित्वाश्रयाभावप्रतियोगिनी सत्ता इत्यन्वयबोधः। एवं च परंपरया क्रियाविशेष्यप्रतियोगिवाचकपदसमानवचनकत्वं क्रियापदस्य निर्वहति इत्याहुः।

एतन्मते — अभावेऽनुयोगितासंबन्धेन प्रतियोगिप्रकारकः घटो नास्तीत्यादिरेव आनुभविकः प्रत्ययः, नतु प्रतियोगिनि प्रतियोगितासंबन्धेनाभावप्रकारकोऽनुभवः।

अथैवं प्रतियोगिन्यभावस्य प्रतियोगितासंबन्ध एव न स्यादिति चेत् — का क्षतिः। नञ्-पदघटितवाक्यात् प्रतियोगिविशेष्यकाभावप्रतियोगिताप्रकारकबोधश्च न संभवति। प्रतियोगिताया अपदार्थत्वात्। न च नञ्पदोत्तरविभक्तिरेव प्रतियोगित्वार्थिका। तत्कल्पने गौरवात्। प्रथमाविभक्तेः संख्यातिरिक्तपरत्वेऽसाधुत्वात्। निपातोत्तरं विभक्त्यन्तरानुदयात्, तदनिश्चयेऽपि (नञ्-पदे विभक्त्यन्तरानिश्चयेऽपि) शाब्दबोधस्यानुभविकत्वात्। प्रतियोग्यभावयोः संबन्धं संबन्धविधया अवगाहमानस्यैव ज्ञानस्य लाघवेन प्रतियोगिविशिष्टधीविरोधितया जातौ न सत्ता इत्यादिवाक्यात् जातिधार्मिकसत्तादिसंशयादिनिवर्तकज्ञानस्यानिर्वाहश्च इत्यादिरस्वरसः।

अन्योन्याभावबोधनिर्वाहः

यत्र च विशेषणविशेष्ययोरभेदेनान्वयो व्युत्पन्नः तत्रैव नञा अन्योन्याभावो बोध्यते। यथा अयं घटो नीलः, नायं घटो नील इति। तत्र विशेषणविशेष्यपदयोः समानविभक्तिकत्वं विरुद्धविभक्तिराहित्यं वा तन्त्रम्।

प्रथमान्तत्वमित्यनुक्त्वा समानविभक्तिकत्वमिति कथनात् यजतिषु येयजामहं करोति नानुयाजेषु इत्यत्र एकवाक्यत्वानुरोधात् ये यजामहमित्यस्यानुषङ्गे गौरवाच्च यजतिषु अनुयाजभेदो बोध्यते। विशेषणविभक्तिस्तु प्रयोगसाधुत्वमात्रार्था। नामार्थयोर्भेदेनान्वयबोध एव प्रकारीभूतविभक्त्यर्थोपस्थितेः तन्त्रत्वात्। एतदुक्तं भवति। नामार्थनिष्ठप्रकारतानिरूपितनामार्थनिष्ठविशेष्यतानिरूपकबोधं प्रति विशेष्यीभवन्नामार्थप्रकारतया प्रकारीभवन्नामार्थविशेष्यतया चार्थान्तरभासकविभक्तिजन्यतदुपस्थितिः कारणम्। नामार्थविशेष्यकाभेदान्यसंसर्गकतत्प्रकारकान्वयबोध एव विभक्तिजन्यतदुपस्थितेः हेतुत्वादिति पर्यवसितार्थः। ईदृशकारणबाधान्नामार्थे नामार्थस्य साक्षान्नाभेदातिरिक्तसंबन्धेन प्रकारत्वम्। एवं च भेदान्वय एव उक्तव्युत्पत्तेः यजतिष्वनुयाजेष्वित्यादौ अभेदसंबन्धेनानुयाजादेर्यागादिविशेषणत्वे बाधकाभावात् नानुयाजेषु यजतिष्वित्यत्र यागादौ अनुयाजभेदबोधो निरपवाद इति।

येषां मते नीलं घटमानयेत्यादौ विशेषणविभक्तेः सार्थकत्वाय तस्याभेदार्थकत्वम्। न तु नीलघटयोः तादात्म्यं संसर्गः, तेषां मते नञा नामार्थे नामार्थरूपप्रतियोगिविशेषितभेदो बोधयितुं न शक्यते इति न भवत्येव तद्बोधः। अपि तु नामार्थविशेषितविभक्त्यर्थाभेदाभाव एव नेदं चैत्रस्येत्यादौ चैत्रस्वत्वाभाववन्नञा प्रत्याय्यते। एवं च नञो भेदे न शक्त्यन्तरम्। अपि तु अनीलो घट इत्यादौ अनीलादिपदेन विभक्त्यर्थाभेदविशेषणतया नीलादिभिन्नस्य बोधानुसारेण भेदवानेव लक्षणया नञर्थः। अत्यन्ताभावापेक्षया अन्योन्याभावविशिष्टस्य धर्मिणः गुरुतया तत्र शक्त्यसिद्धेः। तथा च तन्मते नामार्थयोः अन्वयबोधमात्रे भेदाभेदसाधारणान्वयबोधसामान्ये अन्तराभासमानविभक्त्यर्थोपस्थितेस्तन्त्रत्वम्। तथा च नामार्थयोरभेदेनापि न साक्षादन्वयबोधः। विशेषणविभक्तिस्तु अभेदार्थिका।

न चाभेदे प्रथमाविभक्तेरनुशासनविरहान्न तदर्थकत्वसंभव इति वाच्यम्। विशेषणपदे विशेष्यपदसमानविभक्तिकत्वानुशासनसत्त्वात् तस्यैवाभेदार्थकताग्राहकत्वात्। अन्यथा अभेदस्य संसर्गतामतेऽपि विशेषणपदोत्तरद्वितीयादेः कर्मत्वाद्यबोधकतया आनुशार्सानकत्वानुपपत्तेः।

न चैवं नीलोत्पलमित्यादिसमासवाक्यान्नीलोत्पलाद्योरभेदबोधो न स्यात्, तदर्थकविभक्तिविरहात् इति वाच्यम्। तत्र लुप्तविभक्त्यनुसंधानेन तद्बोधनिर्वाहात्। यथा चित्रगुरित्यादौ चित्रपदोत्तरविभक्त्यनुसंधानेन चित्राभिन्नगोस्वामिबोधस्तद्वत्। यद्यपि बहुव्रीहिसमासे गवादिपदमेव चित्रगवादिसंबन्धिनि लाक्षणिकम्, पूर्वपदं तात्पर्यग्राहकमिति चित्रादिपदोत्तरलुप्तविभक्त्यनुसंधानमनावश्यकम्, तथापि पूर्वपदस्य निरर्थकत्वे समस्यमानपदयोः सार्थकत्वघटितसामर्थ्यानुपपत्त्या समासानुपपत्तिरित्युत्तरपदं पूर्वपदार्थविशेषितस्वार्थसंबन्धिन्येव लाक्षणिकम्। पूर्वपदसमभिव्याहारादेव तदर्थाभेदो लक्ष्यार्थैकदेशीभूते उत्तरपदमुख्यार्थे गवि व्युत्पत्तिवैचित्र्यात् भासते इति।

एवं च यजतिषु ये यजामहं करोति नानुयाजेषु इत्यत्र अनुयाजपदोत्तरसप्तम्याः अभेदोऽर्थः, तदभावः नञा यजतिषु प्रत्याय्यते। अनुयाजाभेदाभाववद्यागेषु ये यजामहं करोतीति बोधादेकवाक्यतानिर्वाहः। प्रसज्यप्रतिषेधे तु भिन्नवाक्यता स्यात्। तथा च अभेदाभावस्य नञा बोधने यजतिष्वित्यादौ पर्युदास एव। अभावस्याविधेयतया प्राधान्याभावेन प्रसज्यप्रतिषेधत्वाभावात्।

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।।

इति प्रसज्यप्रतिषेधलक्षणात्।

एतावता यजतिषु ये यजामहं करोति नानुयाजेषु इत्यत्र प्रथमवाक्येन यजतिषु ये यजामहकरणं द्वितीयवाक्येन अनुयाजेषु तदकरणं च प्रसज्यप्रतिषेधाङ्गीकारे बोधनीयमित्यर्थभेदात् वाक्यभेदः स्यात्। तथा नानुयाजेषु इत्यत्र पूर्ववाक्यात् ये यजामहं करोतीत्यस्य अनुषङ्गः कार्य इति गौरवमिति च बाधकद्वयपर्यालोचनया पर्युदासपरत्वं निरूपितम्।

अन्ये तु नानुयाजेष्वित्यत्र नञः अनुयाजे ये यजामहमन्त्रपाठकरणप्रतिषेधपरत्वे विकल्पापत्तेःपर्युदासाश्रयणेन अनुयाजभेदपरत्वमित्याहुः।

तदसत्। विशेषनिषेधे सामान्यविधेस्तदितरपरताया ब्राह्मणेभ्यो दधि दातव्यं, कौण्डिन्याय न दातव्यमित्यादौ व्युत्पत्तिसिद्धत्वात् विकल्पानवकाशात्। तत्र हि ब्राह्मणपदं कौण्डिन्येतरब्राह्मणपरम्।

न च तत्रापि ब्राह्मणे कौण्डिन्यभेदो बोध्य इति वाच्यम्। कौण्डिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात्। न खलु महतो राज्ञः, न महतो राज्ञः इत्यत्रेव महतां राज्ञः न महतो राज्ञः इत्यत्रापि राज्ञि महदभेदभेदौ प्रतीयेते। तथा च समानविभक्तिकत्ववत्

समानवचनकत्वमपि भेदाभेदयोः बोधेऽपेक्षितम्। एको न द्वावित्यत्रेव कथंचित् समर्थनेऽपि द्वितीयस्य दातव्यमित्यस्य अनन्वयप्रसङ्गात्।

अत एव विशेषनिषेधस्थले सामान्यविधेः विशेषेतरसामान्यपरताया व्युत्पन्नत्वादेव रात्रौ श्राद्धं न कुर्वीत इत्यादौ रात्रौ श्राद्धकरणनिषेधेऽपि न विकल्पावकाशः।

एकविषयकतया पुनः अनन्यगत्या षोडशग्रहणाग्रहणयोर्विकल्पः। अत्र च षोडशग्रहणं नेष्टसाधनमिति नार्थः। ग्रहणविधिविरोधात्। ग्रहणविधिना हि षोडशिग्रहणमिष्टसाधनमिति बोध्यते। अपि तु षोडशिग्रहणाभाव इष्टसाधमित्यर्थः। व्युत्पन्नश्च नञ्समभिव्याहृतधात्वर्थस्याभावेऽपि विभक्त्यर्थान्वयः। अत एव प्राभाकराः न कलञ्जं भक्षयेदित्यादिश्रुतेः कलञ्जभक्षणाभावविषयकं कार्यमित्यर्थमाहुः।

प्रतियोग्यभावयोः प्रतियोग्यनुयोगिभावः अभावाधिकरणयोराधाराधेयभावश्च संबन्धविधया भासते। निपातितिरिक्तस्थल एव प्रातिपदिकार्थयोः भेदेनान्वये प्रकारीभूतविभक्त्युपस्थितेस्तन्त्रत्वात्।

अत एव इवाद्यर्थान्वये न षष्ठ्याद्यपेक्षा। अघटं भूतलम् असमो देश इत्यादौ समासे सामानाधिकरण्याद्यनुरोधात् नञोऽभाववत्परता।

केचित्तु प्रतियोगिपदोत्तरसुपः प्रतियोगित्वे अनुयोगित्वे वा, नञुत्तरस्य सुपः अधिकरणत्वे नञो वा अभाववति लक्षणा। विभक्त्यर्थान्योन्याभावस्य समान-विभक्तिकपदार्थयोः संसर्गाभावस्य च बोधने नञो न सामर्थ्यम्। अतः न पचति न राज्ञः इत्यादौ कृत्यादेरन्योन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयते इत्याहुः।

न्यायकौस्तुभानुसारेण नञर्थविचारः[३६]

नञर्थविषये शाब्दिकमतद्वयानुवादः

अत्र शाब्दिकाः — नञर्थो नाभावः। तथा सति अघट इत्यादौ घटभिन्नः इति बोधे पूर्वपदार्थप्राधान्यापत्त्या तत्पुरुषस्योत्तरपदार्धप्राधान्यभङ्गापत्तेः। किं च असः इत्यादौ सर्वनामकार्याभावप्रसङ्गः। तत्रापि तद्भिन्न इत्यर्थे तच्छब्दार्थस्य पूर्वपदार्थविशेषणतया तच्छब्दस्य विशेषणीभूतार्थप्रतिपादकतया उपसर्जनत्वेन संज्ञोपसर्जनीभूतास्तु न सर्वादय इति सर्वादिबहिर्भूततया सर्वनामसंज्ञाविरहात् सर्वनामसंज्ञाप्रयुक्तस्मायादि-कार्याभावप्रसङ्गः। तस्मादारोपविषयत्वं नञर्थः। तस्योत्तरपदार्थे विशेषणतया

---

[३६] न्या.कौ. पृ. ७७०

अन्वयः। तथा च उत्तरपदार्थप्राधान्यं रक्षितं भवतीति न पूर्वोक्तदोषप्रसङ्गः। यद्वा आरोप एव नञर्थः। तस्योत्तरपदार्थे विषयतासंबन्धेनान्वयः। एवं च अघट इत्यादौ आरोपितो घट इत्याद्याकारको बोधः। अस इत्यादौ तत्पदार्थस्य विशेष्यतया उपसर्जनत्वविरहात् उपसर्जनत्वप्रयुक्तसर्वनामसंज्ञाविरहनिबन्धनः सर्वनामकार्याभावप्रसङ्गरूपो दोषो न भवति। घटो नास्तीत्यादावपि आरोपितं घटास्तित्वम् इत्यादिबोधः। एवं च घटो नास्तीत्यादौ आर्थिकं मानसं घटाभावज्ञानमादाय नञर्थविशेष्यको बोध इति व्यवहारः, प्रतियोगिज्ञानप्रतिबन्धकत्वादिकं च संगमनीयम् — इत्याहुः।

शाब्दिकनव्यास्तु — समासे एव आरोपितत्वं नञर्थः। असमासे घटो नास्तीत्यादौ तु अभाव एव नञर्थः। अनुभवसिद्धाभावबुद्धेरपलापे प्रमाणाभावात् — इत्याहुः।

उक्तशाब्दिकमतद्वयनिरासः

तदुभयमप्यसत्। सर्वत्राभावबोधस्यानुभविकत्वात्। आरोपत्वस्यानुगतस्य ब्रह्मणोऽपि दुर्वचत्वेन आरोपस्य नञर्थत्वे गौरवाच्च। न चोक्तदोषः। अर्धपिप्पली इत्यादितत्पुरुषस्य पूर्वपदार्थप्राधान्येन तत्पुरुषस्योत्तरपदार्थप्राधान्यनियमस्यैवासिद्धेः। पूर्वपदार्थप्राधान्यादिना समासश्चतुर्विध इति प्रायो वाद इति वैयाकरणैरेवोक्तत्वात्। नापि अस इत्यादौ सर्वनामकार्याभावप्रसङ्गरूपो दोषः। तत्र तच्छब्दस्य सर्वनामसंज्ञायाः "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि"[३७] इति सूत्रे अनञ्-समासग्रहणात् ज्ञापकादेव सिद्धेः। तथा हि — असः शिवः इत्यादौ न सः अस इति नञ्-समासे घटकः यः तच्छब्दः ततः परस्य सोर्लोपवारणाय हि अनञ्-समासग्रहणम्। भवदुक्तरीत्या नञ्समासे पूर्वपदार्थप्राधान्येन उत्तरपदस्य तच्छब्दस्य उपसर्जनतया सर्वनामसंज्ञाविरहे सति ततः परस्य सोर्लोपस्य प्राप्तेरेवाभावात्। न च सर्वनामसंज्ञाविरहेऽपि तच्छब्दात् परत्वादेव सोर्लोपस्य प्राप्तिरिति वाच्यम्। एतत्तदोः अकोरिति विशेषणेन अकच्-सहितयोः व्यावर्तकेन एतत्तदोः सर्वनामसंज्ञकयोरेव एतत्तदोः ग्राह्यत्वज्ञापनात्। ततश्च ज्ञापकात् अस इत्यत्र तच्छब्दस्य उपसर्जनत्वेऽपि सर्वनामसंज्ञायाः सिद्ध्या सर्वनामकार्याभावप्रसङ्गरूपो दोषो न भवति। तस्मात् सर्वत्र नञर्थः अभावः। तेन —

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गो अश्वेभ्यः, अधर्म इति क्रमेणोदारहणानि इत्यपि परास्तम्। सादृश्यादिबोधस्य लक्षणयैवोपपत्तौ

---

[३७] सू. ६.१.१३२

अभावमात्रस्य नञर्थत्वात्। तदुक्तं दीधितिकृता संसर्गाभावः अन्योन्याभावश्च नञर्थः इति।

संसर्गाभावत्वान्योन्याभावत्वविचारः[३८]

ननु किमिदं संसर्गाभावत्वमन्योन्याभावत्वं च। अत्र केचित् — भेदसंसर्गारोपजन्यप्रतीतिविषयाभावत्वम् संसर्गाभावत्वम्। भेदसंसर्गो नाम अभेदातिरिक्तः संबन्धः। अभेदसंसर्गारोपजन्यप्रतीतिविषयाभावत्वमन्योन्याभावत्वम्।

तद्धर्मिविशेष्यकतत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षं प्रति तद्धर्मिकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकज्ञानस्य हेतुत्वात् लक्षणसमन्वयः। अत एव — प्रसक्तं हि प्रतिषिध्यते इत्यभियुक्तवचनमुपपद्यते। प्रसङ्गस्यारोपात्मकत्वात्।

प्रतियोग्यारोपस्याभावबुद्धिहेतुत्वत्वसमर्थनम्

ननु अधिकरणज्ञानप्रतियोगिज्ञानयोरभावबुद्धिहेतुतया तत एवोपपत्तौ उपदर्शितातिरिक्तकार्यकारणभावे मानाभावः। न च प्रतियोग्यधिकरणयोः परस्परसंसर्गानवगाहिज्ञानसत्त्वे अधिकरणे प्रतियोगिमत्ताज्ञानाभावदशायामभावप्रत्यक्षवारणाय उक्तकार्यकारणभावः आवश्यक इति वाच्यम्। तदानीयभावप्रत्यक्षाङ्गीकारे बाधकाभावात्। अधिकरणानुपरक्तस्य वा प्रतियोग्यनुपरक्तस्य वा अभावस्य लौकिकबुद्धेरनुभवविरुद्धतया अधिकरणप्रतियोगिज्ञानशून्यतादशायामेव अभावलौकिकप्रत्यक्षानङ्गीकारात्।

यत्तु — अधिकरणप्रतियोगिज्ञानयोः पृथक्कारणाद्वयकल्पनापेक्षया प्रतियोगिविशिष्टाधिकरणज्ञानस्य एककारणताकल्पनमेवोचितमिति उक्तकार्यकारणभावसिद्धिरिति।

तदसत्। प्रतियोगिविशिष्टाधिकरणज्ञानस्य हेतुतावादिनः तव मतेऽपि तस्य ज्ञानस्य प्रतियोगिनिष्ठप्रकारतानिरूपिताधिकरणनिष्ठविशेष्यताशालित्वेन अधिकरणनिष्ठविशेष्यतानिरूप(पित)प्रतियोगिनिष्ठविशेष्यताशालित्वेन वा हेतुत्वे विनिगमनविरहेण कारणताद्वयस्य आवश्यकत्वात् — इति चेत् —

मैवम्। प्रतियोग्यारोपस्याहेतुत्वे अनेकाधिकरणसंनिकर्षदशायां तज्ज्ञानसत्वेऽपि क्वचिदेवाधिकरणे, उपस्थितानां प्रतियोगिनां कस्यचिदभावः प्रतीयते, न तु सर्वत्र सर्वेषाम् इत्यत्र नियामकाभावः। एवं भूतलादावधिकरणे कदाचित् घटादेः

---

[३८] न्या.कौ. पृ. ७७४

अत्यन्ताभावः, कदाचिदन्योन्याभावः, अत्यन्ताभावेऽपि कदाचित् संयोगसंबन्धावच्छिन्नप्रतियोगिताकः, प्रतीयत इत्यत्रापि नियामकाभावः। अनियमे च सर्वे एवाभावाः सर्वत्र प्रतीयेरन् इत्यनुभवविरोधः। प्रतियोग्यारोपस्य हेतुत्वे तु यत्राधिकरणे यस्य येन संबन्धेन आरोपः, तत्राधिकरणे तेन संबन्धेन तस्य अभावः प्रतीयत इति नानुभवविरोधः।

यत्तु प्रतियोग्यारोपस्य समानधर्मिकस्य अभावबुद्धौ विपरीतज्ञानत्वेन प्रतिबन्धकतया न हेतुत्वसंभवः। न चाहार्य एव प्रतियोग्यारोपो हेतुः, स च न प्रतिबन्धकः इत्यदोष इति वाच्यम्। आहार्यज्ञानस्य बाधबुद्धिमन्तरेणासंभवात्, बाधकालीनेच्छाजन्यज्ञानस्यैव आहार्यत्वात्, प्रतियोग्यारोपस्य आहार्यतानिर्वाहाय ततः पूर्वमभावबुद्ध्यन्तरोपगमे, तत्रापि प्रतियोग्यारोपस्य हेतुतया अनवस्थाप्रसङ्गात्। न चारोपात् पूर्वं परोक्षरूपा आहार्यबुद्धिरेव स्वीकार्या, तत्र च नारोपान्तरापेक्षेति नानवस्थेति वाच्यम्। लिङ्गपरामर्शशब्दज्ञानादिघटितपरोक्षधीसामग्र्याः अनियतत्वादिति।

तदपि न। अभावलौकिकप्रत्यक्षे एव प्रतियोग्यारोपस्य हेतुतया तादृशारोपस्य ज्ञानलक्षणसंनिकर्षाधीनतया लौकिकप्रत्यक्षाविरोधित्वेन तद्धेतुतायामुक्तबाधकासंभवात्। लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यानाहार्यतद्वत्ताज्ञानं प्रत्येव तदभाववत्ताबुद्धेर्विरोधित्वादिति।

प्रकारान्तरेण संसर्गान्योन्याभावलक्षणं तन्निरासश्च[३९]

अन्ये तु भेदसंसर्गावच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वम्, अभेदसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमित्याहुः।

तदपि न। ध्वंसप्रागभावयोः अन्योन्याभावस्य च प्रतियोगितावच्छेदकसंबन्धे मानाभावेन आद्यलक्षणे ध्वंसप्रागभावयोः अव्याप्तेः, अन्त्यलक्षणे चासंभवात्।

संसर्गाभावत्वान्योन्याभावत्वनिष्कर्षः

विशेषणताविशेषसंबन्धेन वृत्तिमत्त्वमेव संसर्गाभावत्वमन्योन्याभावत्वं च। यद्वा संसर्गाभावत्वमन्योन्याभावत्वं च अतिरिक्ताखण्डोपाधी।

ध्वंसप्रागभावयोरपि नञ्-पदवाच्यता

प्राचां मते ध्वंसप्रागभावयोरत्यन्ताभावविरोधितया ध्वंसाधिकरणे प्रागभावाधिकरणे चात्यन्ताभावाभावेन तत्र घटो नास्तीति प्रतीतेः अत्यन्ताभावविषय-

---

[३९] न्या.कौ. पृ. ७८२

कत्वासंभवेन ध्वंसप्रागभावविषयकतया तयोरपि नञ्-पदवाच्यत्वमावश्यकम्। एतदभिप्रायेणैव दीधितिकृता संसर्गाभाव इत्युक्तम्।

नव्यमते अत्यन्ताभावस्यान्योन्याभावस्य च नञर्थता

वस्तुतस्तु ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावेन ध्वंसप्रागभाववति घटो नास्तीत्यादिप्रतीतेरत्यन्ताभावविषयकत्वे बाधकाभावेन अत्यन्ताभावः अन्योन्याभावश्च नञोऽर्थः इत्येव युक्तम्। तत्र घटो नास्तीत्यादौ यदि अभावत्वेनैव बोधः तदा अभावत्वमेव नञ्-शक्यतावच्छेदकम्। यदि चात्यन्ताभावत्वादिना बोधः, तदा अत्यन्ताभावत्वम् अन्योन्याभावत्वं च नञ्-शक्यतावच्छेदकम्।

न चैवमपि यत्किंचित्घटवत्यमपि प्रदेशे घटान्तराभावसत्त्वात् घटो नास्तीति प्रतीत्यापत्तिरिति वाच्यम्। नञ्-समभिव्याहारे अन्वयितावच्छेदकावच्छिन्नप्रतियोगितानिरूपितानुयोगितासंबन्धेनैव अभावांशे प्रतियोगिनो भानस्य व्युत्पत्तिसिद्धतया अदोषात्।

न च लघुधर्मसमनियतस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया घटत्वापेक्षया गुरोः कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकत्वं नास्तीति तदवच्छिन्नप्रतियोगितायाः अप्रसिद्ध्या नोक्तव्युत्पत्तिसंभव इति वाच्यम्। गुरुधर्मस्याप्यनुभवबलेन प्रतियोगितावच्छेदकत्वाङ्गीकारात्। तथा हि — यत्किंचित्कम्बुग्रीवादिमद्वति कम्बुग्रीवादिमान्नास्तीति प्रतीत्यनुदयेन सा प्रतीतिः कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावं विषयीकरोति। कम्बुग्रीवादिमत्त्वं गुरु इति ज्ञानदशायामपि सा प्रतीतिर्भवति। अतस्तादृशप्रतीतिबलात् गुरोरप्यवच्छेदकत्वं सिध्यतीति।

न च पीतः शङ्खो नास्तीत्यादावगतिः। पीतशङ्खत्वादेः अन्वयितावच्छेदकस्याप्रसिद्धतया तदवच्छिन्नाभावप्रतीत्यसंभवादिति वाच्यम्। तत्र पीतपदस्य पीतत्वप्रकारकज्ञानविषये लाक्षणिकत्वात् पीतत्वप्रकारकज्ञानविषयत्वविशिष्टशङ्खत्वावच्छिन्नप्रतियोगिताकाभावस्यैव बोधेन अनुपपत्त्यभावात्। तादृशाभावस्य प्रसिद्धत्वात्।

एतेन पुष्करिण्यां जलं नास्ति, चैत्रस्य ज्ञानं नास्ति, तस्माद्यज्ञे वधोऽवधः इत्यादावुक्तव्युत्पत्तिभङ्गोऽपि निरस्तः। जलपदस्य प्रकृष्टजलत्वावच्छिन्ने, ज्ञानपदस्य शास्त्रजन्यज्ञानविशेषे, वधशब्दस्य पापसाधनवधत्वावच्छिन्ने लाक्षणिकत्वात् तत्तदवच्छिन्नप्रतियोगिताकाभावस्य प्रसिद्धत्वात्।

नञा अत्यन्ताभावान्योन्याभावयोर्बोधे नियामकम्[४०]

अथ भूतले घटो नास्तीत्यादावत्यन्ताभावबोधः, घटो न नील इत्यादावन्योन्याभावबोध इत्यत्र किं नियामकम्। वैपरीत्येनापि बोधे बाधकाभावादिति चेत् — न। नञ्-विरहे यत्र भेदसंबन्धेनान्वयबोधः भूतले घट इत्यादौ तत्र नञ्-योगे अत्यन्ताभावो बोध्यते, यत्र च नञ्-विरहे अभेदेनान्वयः नीलो घट इत्यादौ तत्र नञ्-सत्त्वे अन्योन्याभावबोध इत्यङ्गीकारात्। न च तत्रैव किं नियामकमिति वाच्यम्। तत्तदाकाङ्क्षाज्ञानादेरननुगतस्यैव तत्र नियामकत्वात्। एतदुक्तं भवति — सप्तम्यन्तभूतलादिपदसमभिव्याहारज्ञानस्यभेदान्वयबोधे आकाङ्क्षात्वम्। समानविभक्तिकविशेष्यविशेषणवाचकपदद्वयसमभिव्याहृतनञः अन्योन्याभावबोधे आकाङ्क्षात्वमिति।

पर्युदासः प्रसज्यप्रतिषेधश्च नञर्थ इति प्रवादस्य तात्पर्यम्[४१]

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।।

विधेर्यत्राप्रधानत्वं प्रतिषेधे प्रधानता। इति लक्षणलक्षितः पर्युदासः प्रसज्यप्रतिषेधश्च नञोऽर्थ इति यः प्रवादः, तस्यापि अन्योन्याभावः, अत्यन्ताभावश्च नञर्थ इत्यत्रैव पर्यवसानम्। तथा हि —

पर्युदासस्तावत् यजतिषु येयजामहं करोति, नानुयाजेषु इत्यादौ। अत्र नञो निषेधार्थकत्वे वाक्यभेदस्य, येयजामहं करोतीत्यनुषङ्गस्य च कल्पने गौरवात्, नञः भेदार्थकत्वमुपेत्य अनुयाजभिन्नेषु यजतिषु ये यजामह इत्यादिवाक्ययुक्तमन्त्रपाठं करोतीति एकवाक्यतया अन्वयबोधः।

प्रसज्यप्रतिषेधस्तु रात्रौ श्राद्धं न कुर्वीत इत्यादौ। अत्र नञः प्रसज्यप्रतिषेधोऽर्थः। तत्त्वं चात्यन्ताभावत्वमेव। स चात्यन्ताभावः लिङर्थेष्टसाधनतायामन्वेति। तथा च रात्रिश्राद्धकरणम् इष्टसाधनत्वाभाववत् इत्यन्वयबोधः।

न चात्र नञः पर्युदासात्मकभेदार्थकतामुपेत्य रात्रीतरकाले श्राद्धकरणविधायकत्वमेवास्तु, किं निषेधार्कतयेति वाच्यम्। तथा सति अमावास्यायां पितृभ्यो दद्यात् इति वाक्येन अमावास्यापदस्य रात्रिदिवसोभयसाधारणत्वात् रात्रौ श्राद्धप्राप्त्या तत्करणापत्तेः। निषेधार्थकत्वे तु विशेषनिषेधस्थले सामान्यविधेः विशेषेतरपरतायाः,

---

[४०] न्या.कौ. पृ. ७८८
[४१] न्या.कौ. पृ. ७९२

ब्राह्मणेभ्यो दधि देयम्, न कौण्डिन्याय दातव्यम् इत्यादौ व्युत्पत्तिसिद्धतया अमावास्यायामित्यादिविधेः रात्रीतरामावास्यायां श्राद्धविधायकतया न रात्रौ श्राद्धकरणापत्तिः, तत्प्रापकवचनाभावात्। अमावास्यायामित्यादिविधेः रात्रीतरपर-तोपपादकतया च न निषेधवैयर्थ्यम्।

न च तथापि प्रसक्तं हि प्रतिषिध्यत इति नियमेन रात्रिश्राद्धस्याप्रसक्त्या निषेधासंभव इति वाच्यम्। यदि निषेधो न स्यात् तदा अमावास्यायामित्यादिवाक्यस्य रात्रीतरपरता न स्यात्; तदा रात्रिश्राद्धं प्रसज्येत इति आपादितप्रसक्तेः सत्त्वात्। न पृथिव्यां नान्तरिक्षे हिरण्यं निधाय अग्निश्चेतव्यः इत्यादौ अन्तरिक्षे अग्निचयनस्य अप्रसक्तावपि प्रतिषेधाभ्युपगमेन प्रसक्तस्यैव प्रतिषेध इति नियमे मानाभावाच्च।

वस्तुतः तादृशनियमसत्त्वेऽपि न क्षतिः। यद्धर्मम् अन्वयितावच्छदकीकृत्य शास्त्रतो लोकतो वा इष्टसाधनत्वमवगम्यते तद्धर्माश्रय एव धात्वर्थे इष्टसाधनत्वात्यन्ताभावसंसर्गः विधिसमभिव्याहृतनञा प्रत्याप्यते, न तु तदाश्रये धात्वर्थे इत्येव प्रसक्तं हि प्रतिषिध्यते इति नियमस्यार्थः। इत्थं च अमावास्याश्राद्धत्वस्य राक्षिश्राद्धेऽपि सत्त्वात् तादृशनियमभङ्गाभावः इति सारम्।

भूषणसारानुसारेण नञर्थविचारः[४२]

नञ्-समासे चापरस्य प्राधान्यात्सर्वनामता।
आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत्।।

नञ्-समासे अपरस्य उत्तरपदार्थस्य प्राधान्यात् सर्वनामता सिध्यति। अत आरोपितत्वं नञ्द्योत्यमित्यङ्गीकार्यम्। अयं भावः — असर्व इत्यादौ आरोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्यं सिध्यति। तेन सर्वनामसंज्ञा सिध्यति। तत्र नञः भेदार्थकत्वे असर्व इत्यतः सर्वभिन्न इति बोधात् सर्वशब्दार्थस्य नञर्थे प्रतियोगितासंबन्धेन विशेषणत्वेन उपसर्जनतया संज्ञोपसर्जनानां सर्वनामता-निषेधात् अतिसर्व इत्यनेन सर्वनामता न स्यात्। तथा च असर्वस्मै इत्यादिकं न सिध्येत्।

न च असर्व इत्यतः भेदप्रतियोगी सर्व इति बोधाभ्युपगमात् नोत्तरपदार्थस्य प्राधान्यहानिरिति वाच्यम्। घटो नास्तीत्यादौ नञर्थस्य विशेष्यत्वदर्शनात् नञर्थाभावत्वस्य विशेष्यतायां तन्त्रत्वात्।

न चारोपितत्वस्य नञर्थत्वे अघटः पटः इत्यतः आरोपितघटः पट इत्येव बोधः स्यात्। तथा च घटभिन्नः पट इति सर्वसंप्रतिपन्नप्रतीत्यनुपपत्तिरिति वाच्यम्।

---

[४२] भू.सा. पृ. ३०७

आरोपितघटः पटः इति शाब्दप्रतीत्यनन्तरं घटभिन्नः पट इति मानसबोधस्वीकारेण तदुपपत्तेः। आरोपस्य भेदव्याप्यत्वात् अर्थापत्त्यनुसन्धानपूर्वकः तथा मानसो बोध इति।

अत्र चारोपितत्वमारोपविषयत्वम्। आरोपमात्रं नञर्थः। विषयत्वं संसर्ग इति निष्कर्षः। द्योत्यत्वोक्तिः निपातानां द्योतकत्वमभिप्रेत्य। वाच्यस्यापि तस्य द्योत्यार्थवत् विशेषणतैव। नाभाववद्विशेष्यतेति सूचयितुं द्योत्यत्वोक्तिरिति यावत्। घटो नास्ति अब्राह्मण इत्यादौ आरोपबोधस्य सर्वानुभवविरुद्धत्वात् पक्षान्तरमाह —

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।
विशेषणं विशेष्यं वा न्यायतस्त्ववधार्यताम्।।

अभावो वा नञर्थोऽस्तु। नञ्सूत्रे भाष्ये निवृत्तपदार्थकः नञ् इत्युक्तम्। निवृत्तं पदार्थो यस्य सः। निवृत्तमिति नपुंसके भावे क्तः। अभावार्थक इत्यर्थः।तत्रासति बाधके अभावस्य नञ्वाच्यत्वम्। बाधके सति नञ्द्योत्यत्वम्। यत्र नञर्थो विशेष्यः तत्र वाच्यता। यत्र विशेषणं तत्र द्योत्यता।

आरोपितत्वस्य नञ्वाच्यत्वाङ्गीकारे तु सादृश्यादेरपि नञ्वाच्यत्वापत्तेः। यत्तु —

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गो अश्वेभ्यः, अधर्मः इत्युदाहरन्ति, तत्तु आर्थिकार्थमभिप्रेत्य। भेदप्रतियोगित्वप्रकारक-ब्राह्मणादिविशेष्यकबोधानन्तरभाविमानसबोधमभिप्रेत्येति यावत्। विशेषणमिति। प्रतियोगिनीति शेषः। तथा च असर्व इत्यस्य भेदप्रतियोगी सर्व इत्यर्थः। तत्र सर्वपदार्थस्य प्राधान्यात् सर्वनामसंज्ञा सिध्यति।

एवम् अनेकमन्यपदार्थे सेव्यतेऽनेकया संनतापाङ्गया इत्यादावेकशब्दार्थप्राधान्यात् एकवचननियमः। अनेकमित्यस्य एकभिन्नमित्यर्थस्वीकारे एकप्रतियोगिकभेदवति द्वित्वस्य बहुत्वस्य अवश्यंभावे ततस्तद्बोधकद्विवचनबहुवचनयोरापत्तिः, एकत्वस्य तत्र बाधात् एकत्वबोधकैकवचनस्यानुपपत्तिश्च।

एवम् अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात् तत्पुरुषसमासत्वमुपपद्यते। ब्राह्मणभिन्न इत्यर्थाङ्गीकारे उत्तरपदार्थप्राधान्याभावात् तत्पुरुषत्वं न स्यात्। एवम् अत्वं भवसि अनहं भवामि इत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते। युष्मदर्थस्य भेदविशिष्टस्य कर्तृतया युष्मदर्थेन सामानाधिकरण्यस्य सत्त्वात् मध्यमपुरुष इति व्यवस्था अयुवां भवथ इत्यादौ द्विवचनादिव्यवस्था चोपपद्यत इत्यर्थः। अन्यथा

त्वदभावो मदभाव इतिवत् अभावांशे युष्मदस्मदोरन्वयेन युष्मदस्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात् पुरुषव्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयबोधात् सामानाधिकरण्यमुपपन्नम्।

विशेष्यो वेति। प्रतियोगिनं प्रति नञर्थो विशेष्य इत्यर्थः। न चात्र पक्षे उत्तरपदार्थस्य अप्राधान्यात् असर्वस्मै इत्यादौ कथं सर्वनामतेति वाच्यम्। ज्ञापकेन तत्सिद्धेः। तथा हि — गौणत्वेऽपि नञ्-समासे एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति ज्ञापकात् सर्वनामसंज्ञा। असः शिवः इत्यत्र सुलोपवारणाय हि अनञ्-समास इति विशेषणम्। नञ्-तत्पुरुषान्तर्गततच्छब्दस्योपसर्जनतया सर्वनामत्वाभावादेव सुलोपवारणसंभवे अनञ्-समासग्रहणं व्यर्थं सत् नञ्-समासे गुणीभूतार्थकस्यापि सर्वादेः सर्वनामसंज्ञां ज्ञापयति। न चैतत्सूत्रे एतत्तदोः सर्वनामसंज्ञकयोरेव ग्रहणमित्यत्र मानाभाव इति वाच्यम्। अकोरित्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात्। असर्वनाम्नः सर्वनामविहिताकजसंभवेन तत्पर्युदासेन सर्वनाम्नोरेव एतत्तदोर्ग्रहणमिति लभ्यते। तथा चानञ्-समास इति ज्ञापकं सुवचम्।

अनेकमन्यपदार्थे [४३] इत्यादावेकवचनं सुप् इति विशेष्यानुरोधात्। तत्र हि सुबामन्त्रिते पराङ्गवत्स्वरे[४४] इत्यतः सुप् इति एकवचनान्तं विशेष्यमनुवर्तते। किं चानेकशब्दात् द्विवचनोपादाने बहूनां बहुवचनोपादाने द्वयोः बहुव्रीहिर्न सिध्येदिति उभयसंग्रहाय एकवचनोपादानं जात्यभिप्रायम्। औत्सर्गिकं वा। एकवचनमुत्सर्गतः करिष्यते इति भाष्यानुसारात्।

सेव्यतेऽनेकया संनतापाङ्गया इत्यत्रापि योषयेति विशेष्यानुसारात्, एकभिन्नत्वेनोपस्थितासु योषासु प्रत्येकं सेवनान्वयबोधनाय च एकवचनम्, न तूत्तरपदार्थप्राधान्यप्रयुक्तम्।

अत एव पतन्त्यनेके जलधेरिवोर्मयः इत्यादिकमपि संगच्छते। भेदप्रतियोग्येकार्थकत्वे तु तत् दुरुपपादं स्यात्। भाष्योदाहृते नैकस्तिष्ठतीति प्रयोगे जन इत्यध्याहार्यम्। प्रत्येकं स्थित्यन्वयबोधनार्थं च तत्रैकवचनम्। अत्वं भवसि अनहं भवामि इत्यत्र युष्मदस्मदोः त्वद्भिन्ने मद्भिन्ने च लक्षणा। नञ् तात्पर्यग्राहकः। तथा च लाक्षणिकेन युष्मदस्मदर्थेन तिङः सामानाधिकरण्यात् पुरुषव्यवस्था सिध्यति। त्वद्भिन्नाभिन्नाश्रयिका मद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः।

---

[४३] पा.सू. २.२.२४

[४४] पा.सू. २.१.२

एवं न त्वं पचसीत्यत्र त्वद्भिन्नाश्रयकपाकानुकूलभावनाभावः, घटो नास्तीत्यत्र घटभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः। असमस्तनञः क्रियायामेवान्वय-बोधात्। स चाभावः अत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यः। तत्तद्रूपेण बोधात् इत्यन्यत्र विस्तरः।

एवं च समासे नञः आरोपार्थकत्वे अभावार्थकत्वे च पक्षद्वयेऽपि तयोः विषयतया प्रतियोगितया च उत्तरपदार्थेऽन्वयात् उत्तरपदार्थप्राधान्यमस्तीति असर्व इत्यादौ सर्वनामसंज्ञा उपपद्यते। उत्तरपदार्थस्य नञर्थेऽन्वयेन नञर्थस्य प्राधान्येऽपि सर्वनामसंज्ञा ज्ञापकात् सिध्यति। असमासस्थले च क्रियाया अभावः प्रतीयते इत्यादयो विशेषाः भूषणसारे निष्कृष्टाः।

मञ्जूषानुसारेण नञर्थविचारः

घटो नास्तीत्यादावभावस्य विशेष्यतया भानात् नञोऽभाववाचकत्वम्। अभावद्योतकत्वे तु अभावस्य विशेष्यतया भानं न स्यात्। द्योत्यस्य विशेषणतयैव भानमिति नियमात्। नानुयाजेष्वित्यादौ सप्तम्याः साधुत्वार्थं द्योतकत्वमपि। आरोपितानुयाजेषु यजतिष्विति तदर्थः। नञर्थभेदे प्रतियोगित्वेनान्वयेन अनुयाज-भिन्नेष्वित्यर्थस्वीकारे सप्तम्यनुपपत्तिः। अनुयाजपदार्थस्य यजतिसामानाधिकरण्य-विरहात्। आरोपविषयत्वं नञा द्योत्यम्, आरोपविषयानुयाजेषु यजतिषु इति वाक्यार्थे च अनुयाजानां यजतिसामानाधिकरण्यात् सप्तम्युपपत्तिः। अत एव अघट इत्यादौ नञ्-तत्पुरुषस्योत्तरपदार्थप्राधान्यं संगच्छते। अभावस्य तु प्रतियोगिनिरूपितविशेष्य-तयैव भानस्य सर्वसिद्धत्वात् तदनुपपत्तिः स्पष्टैव।

अत एव अस इत्यादौ सर्वनामकार्यं तदोः सः सावनन्त्ययोः[४५] इति सत्वं सर्वनाम्नः स्मै इत्यादिकं संभवति। अन्यथा गौणत्वात् न स्यात्। इतरविशेषणतया उपस्थितिविषयत्वस्यैव गौणत्वरूपत्वात्।

यद्वा घटादिपदानामारोपविषये शक्तिः नञ्-तात्पर्यग्राहक इति पक्षे गौरवमिति यद्यालोच्यते, तदा नञ् स्वसमभिव्याहृतघटादिपदानामारोपितप्रवृत्तिनिमित्तवद्बोध-कत्वे तात्पर्यग्राहकः। आरोपितं यत् प्रवृत्तिनिमित्तं घटत्वादि तद्विशिष्टबोधकत्वे इत्यर्थः। यथा सिंहो माणवक इत्यादौ माणवकादिपदानि सिंहादिपदस्य आरोपित-सिंहत्ववद्बोधकत्वे तात्पर्यग्राहकाणि तद्वत्। तथा च नञ्-समभिव्याहृतघटादिपदानि आरोपितघटत्वादिमल्लाक्षणिकानीत्युक्तं भवति।

---

[४५] पा.सू. ७.२.१०६

अनुदरा कन्येत्यादावपि अल्पत्वेन उदरभावमारोप्य जायमानया नञ्-समभिव्याहारे आरोपितोदरबुद्ध्या तन्मूलाल्पत्वादौ विश्रमः।

अद्विजा इत्यादौ च तद्भेद (द्विजभेद) मूलकमारोपितद्विजत्वरूपप्रवृत्तिनिमित्तकत्वमिति भेदे विश्रान्तिः। अधर्म इत्यादौ च विरोधिनि तद्विरोधमूलकः तत्प्रवृत्तिनिमित्तारोपः।

आरोपितत्वस्य नञ्वाच्यत्वे तु तस्य ब्राह्मणादिपदशक्ये अनारोपितब्राह्मण्यवति अन्वयो विरोधात् दुरुपपादः।

तत्र प्रसिद्धार्थपरित्यागोऽप्रसिद्धार्थपरिग्रहश्चेत्युभयं द्योतकत्वमिति नञ्-सूत्रे भाष्ये स्पष्टम्। तत्र हि एवं यथा विज्ञायेत अस्य पदस्यार्थो निवर्तत इति इति भाष्यम्। अस्य पदस्य मुख्यार्थप्रवृत्तिनिमित्तरूपो निवृत्तो गौणश्चोपजात इति विज्ञायेतेति तदर्थः। ब्राह्मणादिशब्दाः मुख्यब्राह्मण्यार्थकाः आरोपितब्राह्मण्यार्थकाश्च ते नानार्थकाः। ते च परस्परं भिन्नाः नञ्-समभिव्याहारे नायं मुख्यब्राह्मण्यार्थकः किं तु आरोपितब्राह्मण्यार्थक इति निर्णीयते। एतदेव नञो द्योतकत्वम्। तदप्युक्तं तत्रैव भाष्ये —

नञ्निमित्ता तूपलब्धिः इति। वाचकत्वपक्षे तु नैवं वक्तुं शक्यम्। तात्पर्यग्राहकत्वाभावात्। न च राजपुरुष इत्यादाविव अब्राह्मण इत्यादौ पृथगर्थाभावेन एकार्थीभावाभावात् समासानापत्तिरिति वाच्यम्। द्योतकत्वमात्रेण नञ्-समासे एकार्थीभावव्यवहारात्। विशिष्टानुपूर्व्याः द्योत्यार्थान्तर्भावेण शक्तावच्छेदकत्वात् विशिष्टस्यार्थवत्त्वम्। समासविधायकशास्त्रबलात् एवमेव कल्पनोचिता।

न चैवं प्रजयतीत्यादावपि द्योतकत्वाविशेषात् विशिष्टस्यैव अर्थवत्वापत्तिरिति वाच्यम्। अडादिव्यवस्थार्थमन्यथा तत्र कल्पनात्। लोकस्य तु तत्रापि विशिष्टशक्त्यैव बोधः अवयवशक्तिबोधनद्वारा विशिष्टस्य विशिष्टे शक्तिबोधकमेव व्याकरणम्।

असमासे नञर्थः

असमस्ते तु अभावो नञर्थः। स द्विधा अत्यन्ताभावो भेदश्च। तत्र तादात्म्येतरसंबन्धप्रतियोगिकाभावः आद्यः। तादात्म्याभावोऽन्त्यः। तादात्म्यमतिरिक्तं तद्वृत्त्यसाधारणरूपं वेत्यन्यदेतत्।

न चानयोरभावयोः संबन्धप्रतियोगिकत्वे कथं सर्वानुभवसिद्धं घटादिप्रतियोगिकत्वमिति; घटसंसर्गाभावघटाभावयोः समनियततया एकत्वेन घटसंसर्गघटोभयप्रतियोगिकत्वात्।

तत्राद्यः (अत्यन्ताभावः) तिङन्तार्थाक्रियायामेवान्वेति न तु द्रव्यादौ असमस्तनञर्थात्यन्ताभावविशेष्यकान्वयबोधं प्रति तिङ्समभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वात्।

अत एवं अहं नास्मि, घटो नास्तीत्यादौ पुरुषव्यवस्था, घटौ न स्तः, घटा न सन्तीत्यादौ वचननियमश्चोपपद्यते। युष्मदादौ तिङ्समानाधिकरण्यात्, मदभिन्नैकाश्रयकसत्त्वाभाव इति रीत्या बोधात्। मदभावोऽस्तीत्याद्यन्वये च स न स्यात्।

न चाख्यातार्थसंख्यान्वयित्वमेव युष्मदादेः तिङ्सामानाधिकरण्यम्, अतो नोक्तदोष इति वाच्यम्। तिङर्थसंख्यान्वयिवाचकत्वादेः यौगिकसामानाधिकरण्यशब्दावाच्यत्वात्।

किं च तिबादिविधिना द्व्येकयोः इत्यस्य एकवाक्यतया एकत्वे तिप् इत्यादिवाक्यार्थे कस्य एकत्वे इति जिज्ञासायां तिङाद्यर्थान्वयिन इत्यस्यैव प्रत्यासत्या लाभेन अभावप्रतियोगिनि अनन्वयात्।

न चैवं घटो नास्तीत्यतः घटाश्रयकसत्त्वाभाव इति बोधस्वीकारे घटाद्यभावबोधाभावात् घटविषयकसंदेहापत्तिः, घटविषयकसंदेहं प्रति घटाभावबोधस्यैव प्रतिबन्धकत्वादिति वाच्यम्। समनियतयोः घटसत्त्वाभावघटाभावयोरैक्यैन घटसत्ताभावबोधस्य घटाभावविषयकतया तदनन्तरं घटसंदेहस्याप्रसक्तेः।

एवं समनियतभावयोरपि एकज्ञाने नियमेनापरज्ञानं बोध्यम्। अत एव घटज्ञाने घटसत्त्वसंदेहो न।

नैयायिकास्तु — समनियतानामभावनामैक्यमेव। न च घटसंयोगाभावः संयोगेन घटाभाव इति प्रतीतिभेदे जाग्रति तेषामैक्यकथनस्य न कश्चिदुपयोग इति वाच्यम्। लाघवात् पदार्थे एकस्मिन्नेव घटसंयोगाभावत्वघटाभावत्वरूपधर्मभेदात् प्रतीतिभेद इत्यस्य वक्तुं शक्यत्वात्। यथा घटत्वाभावघटभेदयोः समनियतयोः ऐक्येऽपि घटत्वाभावत्वघटभेदत्वरूपधर्मभेदात् प्रतीतिभेदः तद्वत्। यथा च घटत्वघटभेदाभावयोः। एवमेव भावयोरपि समनियतयोरैक्यं युक्तम्। लाघवादियुक्तेः समानत्वादित्याहुः।

तन्न। एक एव आत्मरूपो धर्मो नान्यः। तत्र घटत्वपटत्वादिधर्माः कल्प्यन्ते। तेन लोकसिद्धो व्यवहार उपपद्यते इति धर्मिभेदस्य आत्मशरीरेन्द्रियादिरूपस्य घटपटादिरूपस्य च विलयापत्तेः, न चेष्टापत्तिः। अनुभवविरोधात्।

अपि च तद्रूपतद्रसादेरप्यैक्यापत्तिः। अत्र केचित् — तद्रूपतद्रसादौ भासमानतावच्छेदकरूपत्वादिना न समनैयत्यम्।तद्रूपं भासत इत्यादेः रूपत्वादिना व्यक्ति-

विशेषो भासत इत्येवार्थः। क्रियायाः कारकविशेषानालिङ्गितायाः अभावस्य च प्रतियोगिविशेषानालिङ्गितस्याभानात् तत्रैवं वक्तुं न शक्यमित्याहुः।

एतेन अधिकरणानालिङ्गिताभावबुद्धेरभावात् इह घटो नास्तीत्यादावेतदधिकरण-काभावप्रतियोगिघटकर्तृकसत्तेति बोध इत्यपास्तम्।

प्रतियोग्यनधिकरणस्यैवाभावाधिकरणत्वेन अभावस्य पृथगधिकरणाकाङ्क्षा-विरहात्। अधिकरणकारकस्य क्रियान्वये क्रियान्वयिकर्तृकर्मान्वये वा साधुत्वेन नञर्थेऽन्वयासंभवाच्च। अत्यन्ताभावार्थकनञः प्रतियोगिभूतक्रियान्वयनियमाच्च।

शिरोमणिमतपरिशीलनम्

यत्तु — भूतले न घट इत्यादौ तात्पर्यवशात् कदाचित् भूतलादौ घटाभावः कदाचित् घटादौ भूतलवृत्तित्वाभावः प्रतीयते। अन्यथा इह घटो नास्तीत्यादितः बोधानुपपत्तिः। न चैतदधिकरणकघटकर्तृकसत्ताभाव इति बोध इति वाच्यम्। विकल्पासहत्वात्। किं सतो निषेधः उतासतः। नाद्यः, सतो निषेधायोगात्। असतस्तु असत्त्वादेव निवृत्तिसिद्ध्या नञो वैयर्थ्यात्। तदुक्तं खण्डनकृता —

सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः।।

इति। न च घटपटास्तिपदाभ्यां या घटविषया अस्तिबुद्धिर्जाता सा नञा निवर्त्यत इति वाच्यम्। बुद्धेः शब्दावाच्यत्वेन नञा तन्निषेधायोगात्। अत एव तस्या बुद्धेः मिथ्यात्वं नञा क्रियत इति निरस्तम्। घटाभावाद्यनवगतिप्रसङ्गाच्च। नञर्थस्य नामार्थे-ऽन्वयास्वीकारेण क्रियायामन्वये घटाभावावगतिः कथं स्यात्।

कणादसूत्रेऽपि नास्ति घटो गेह इति सतो घटस्य गेहसंसर्गनिषेधः इत्युक्तम्। सतः — सत्त्वेन बुद्धस्य। एवं च घटकर्तृकसत्ताभावो बोधयितुमशक्य इति विशेषणीभूतगेहसंसर्गाभावप्रतीतिरिति तदर्थः इति तार्किका आहुः। तन्न। अत्यन्ता-भावार्थकनञः प्रतियोगिभूतक्रिययैवान्वय इति नियमस्य पूर्वमुक्तत्वात्।

न चोक्तरीत्या घटो नास्तीत्यादितो बोधानुपपत्तिरिति वाच्यम्। सत्त्वेन निश्चितस्य निषेधासंभवेऽपि सत्त्वेन संभावितस्य निषेधसंभवात्। नञ्-समभिव्याहार एव घटस्य संभावितत्वे प्रयोजकः।

कणादसूत्रे तु समनियताभावानामैक्यं बोधयितुं तथोक्तिः। गेहसंसर्गस्यापि प्रतिषेध इति तदर्थात्। यत्तु भूतले न घट इत्यत्र भूतलवृत्तित्वाभाववान् घट इति बोधोऽवश्यं स्वीकार्यः। अत एव पृथिव्यां गन्धो न जले इत्यादौ प्रतीतेरेकविशेष्यकत्वानुभव उपपद्यत इति शिरोमणिना नञ्वादे उक्तम्। तत्तु स्ववासनाकल्पितत्वादयुक्तम्।

नेक्षेतोद्यन्तमादित्यम् इत्यादौ तस्य व्रतम् तस्य ब्रह्मचारिणो व्रतमित्य-नुष्ठेयवाचिव्रतशब्देनोपक्रमात् अभावस्य चानुष्ठानायोग्यतया तत्र नञोऽभावबोध-कत्वासंभवात् नञ्समभिव्याहृतेनेक्षतिना ईक्षणाभावसंकल्पो बोध्यते।

यत्त्वत्र मीमांसकाः पर्युदासमाश्रित्य अभावस्याननुष्ठेयत्वात् व्रतशब्देनोपक्रमाच्च नञिवयुक्तन्यायेन ईक्षणभिन्नक्रियायाः सामान्यतः प्राप्त्या च तद्विशेषजिज्ञासायां पुरुषक्रियामात्रस्य संकल्पपूर्वकतया अनीक्षणसंकल्पे लक्षणेत्याहुः। तन्न। ईक्षण-भिन्नसंकल्पे तात्पर्याभावात्तथा शिष्टाचाराभावाच्च। नेक्षिष्यामीति ईक्षणाभाव-संकल्पस्यैव सर्वैराचरणाच्च।

किं च यत्र नञ्समभिव्याहारे पदार्थस्याभेदेनान्वये आकाङ्क्षा, यथा घटो न पट इत्यादौ नञोऽभावे भिन्नयोः घटपटयोः अभेदस्य बाधेऽपि समानविभक्तिकतया अभेदान्वयाकाङ्क्षा संभवतीति तत्र नञ्समभिव्याहारे भेदबोधः नान्यत्र। न हि प्रकृते नेक्षेतोद्यन्तमादित्यमित्यत्र तथा। अत एव उक्तव्युत्पत्तिस्वीकारादेव न पचति तिष्ठतीत्यादौ स्थितौ पाकभेदबोधो न भवति। अत एव तिङन्तसमभिव्याहृत-नञोऽत्यन्ताभावबोधकत्वमेव। अयमेव तिङ्समभिव्याहृतनञ्बोध्यात्यन्ताभाव एव प्रसज्यप्रतिषेध इत्युच्यते। प्रसज्य विधाय विहितस्य प्रतिषेध इति तदर्थः।

नञ्[४६] सूत्रे भाष्ये तु प्रसज्य क्रियागुणौ ततः पश्चान्निवृत्तिं करोति इत्युक्तम्। तेन गुणाभावबोधेऽपि प्रसज्यप्रतिषेध इति लभ्यते। नास्माकमेकं प्रियम् इत्युदाहरणम्। अत्र हि एकप्रियप्रतिषेधे बहुप्रियप्रतीतिः। न संदेह इत्यादौ च संदेहाभावप्रतीतिः। संदेहस्य गुणत्वात्। सर्वत्र क्रियाप्रतिषेधे हि गुणपदोपादानं भाष्ये अनर्थकं स्यात्। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् इत्यत्र क्रियाग्रहणं गुणस्याप्युपलक्षणम्।

नञर्थान्योन्याभावनिरूपणम्

एवं नञर्थोऽत्यन्ताभावो निरूपितः। अथ नञर्थः अन्योन्याभावो निरूप्यते। घटः पटो नेत्यादावन्योन्याभावः प्रतीयते। अत्र तार्किकाः — भेदो नञर्थः। तत्र प्रतियोगितासंबन्धेन पटस्यान्वयः। न च गृहस्योच्चैरित्यादाविव षष्ठ्यापत्तिः। एवं तर्हि पटपदं पटप्रतियोगिकपरम्। तस्य नञर्थभेदेऽभेदेनान्वयः। भेदस्याश्रयतया घटेऽन्वयः। अभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया।

यद्वा भेदवान्नञर्थः। भेदवति लक्षणेति तु न युक्तम्। निपातानामनेकार्थकत्वेन लक्षणानवसरात्। केवलभेदस्य क्वाप्यबोधाच्चेत्याहुः। तन्न। नब्राह्मणैरेतैरुपद्रुतम्

---

[४६] पा.सू. २.२.६

इत्यादौ भेदाश्रयभेदप्रतियोगिनोः समानविभक्तिकत्वस्य दुरुपपादत्वात्। समासवाक्ययोस्तुल्यार्थकत्वस्योचितत्वाच्च।

तस्मात् समासार्थप्रदर्शकवाक्येऽपि आरोपितपटाभिन्नो घट इति बोधः। नञ् द्योतक एव। एवं च समानविभक्तिकत्वं सिद्धम्। पटभेदबोधस्त्वार्थः। तत्समनियतत्वात् पटत्वाभावबोधोऽपि तत्र आर्थः।

यत्तु नञ्-द्योत्यो भेदो विशेषणम्। भेदप्रतियोगी घट इत्यर्थ इति। तन्न युक्तम्। अघटमानयेत्युक्ते यत्किंचिन्निष्ठभेदप्रतियोगिनः यत्किंचित्प्रतियोगिकभेदवतो वा घटस्यैव आनयनप्रसङ्गात्।

अत एव उत्तरपदार्थप्रधानत्वे नञ्तत्पुरुषस्य अब्राह्मण इत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीत्याशङ्क्य नञः प्रयोगात् नञर्थविशिष्टस्यानयनं भविष्यतीत्युक्त्वा कः पुनरसौ नञर्थविशिष्टः इति प्रश्ने निवृत्तपदार्थकः इति भाष्ये उक्तम्। निवृत्तः पदार्थः मुख्यं ब्राह्मण्यं यस्मिन् स क्षत्रियादिरित्यर्थः। सादृश्यादिना अध्यारोपितब्राह्मण्यो नञ्-द्योतिततदवस्थ इत्यर्थ इति कैयटः।

यत्तु निवृत्तेति भावे क्तः। निवृत्तमभावः पदार्थो यस्येति एतद्भाष्यार्थ इति। तत् भ्रान्त्यैवेति स्पष्टं भाष्यविदाम्।

किं च प्रतियोग्यभावौ तुल्ययोगक्षेमौ इति तान्त्रिकोक्तेः नञ्वाच्यभेदस्य विशेषणता न युक्ता। यत्र प्रतियोगिनः प्रकारता तत्रैव तदभावस्यापि प्रकारता। यत्र तस्य विशेष्यता तत्र तदभावस्यापि विशेष्यतेति तदर्थः। न चारोपितत्वं नञ्द्योत्यमिति परमसिद्धान्ते घटादिज्ञानस्य तज्ज्ञानप्रतिबन्धकता न स्यात्, ग्राह्याभावानवगाहित्वादिति वाच्यम्। यथानुभवं प्रतिबन्धकतायाः कल्पनीयत्वात्। प्रतिबन्धकत्वानुरोधेन ऋष्यनुभवसिद्धबोधान्यथाकरणस्य अयुक्तत्वात्।

प्रतियोग्यभावौ तुल्ययोगक्षेमौ इति न्यायेनैव नञोऽसत्त्वे यत् प्रतियोग्यधिकरणं तत् नञ्सत्त्वे अभावाधिकरणमिति स्वीकार्यम्।

मीमांसकमतखण्डनम्

अत्र मीमांसकाः नानुयाजेषु इत्यदौ पर्युदास एव। न प्रसज्यप्रतिषेधः। शास्त्रविहितस्य प्रतिषेधे विकल्पापत्तेः, वाक्यभेदापत्तेश्च। तथा हि — क्रियायाः कारकाकाङ्क्षत्वेन विनिगमनाविरहात् सकलकारकविशिष्टभावनां प्रतियोगिभूतामुद्दिश्य अभावस्य विधिस्तत्र वक्तव्यः। एवम् उद्देश्यस्य प्रतियोगिनः प्रसिद्ध्यर्थं प्राप्तिसापेक्षता प्रतिषेधस्य। प्राप्तिश्च क्वचिद्रागतः, यथा न कलञ्जं भक्षयेदिति। तत्र हि

रागेण कलञ्जभक्षणादेरिष्टसाधनत्वावगत्या प्रसक्तायाः कलञ्जभक्षणभावनायाः निषेधशास्त्रेण निवृत्तिविषयत्वेऽवगते अर्थात् तद्विषयकलञ्जभक्षणादेरनिष्टसाधनत्वाक्षेपात् ततो निवृत्तिः। प्रकृते च ये यजामह इति पञ्चाक्षरम् इति शास्त्रत एव प्राप्तिः। सा च प्रमारूपेति उपजीव्या चेति तस्या अत्यन्तबाधायोगात् विकल्प एव प्राप्नोति। विकल्पे च चत्वारोऽष्टौ वा दोषाः। यथा प्रथमं व्रीह्यनुष्ठाने (१) यवशास्त्रस्याप्रामाण्यस्वीकारात्मा प्रतीतप्रामाण्यपरित्यागः, वेदे विपर्यासरूपाप्रमितिजनकत्वाभावात्। (२) ततः प्रयोगान्तरे यवोपादाने यवशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्मकं परित्यक्तप्रामाण्योपादानम्। (३) व्रीहिशास्त्रे स्वीकृतप्रामाण्यपरित्यागरूपोऽप्रतीताप्रामाण्यस्वीकारः। (४) पुनस्तृतीयप्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्मा त्यक्तप्रामाण्यस्वीकार इति चत्वारो दोषाः। अत्रैव प्रामाण्यपरित्यागाप्रामाण्यस्वीकारयोः भेदारोपेण अष्टौ दोषाः इति वा — इत्याहुः। तन्न। निषेधशास्त्रानालोचने सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिद्ध्या अभावबोधसंभवेन प्रामाण्यघटितस्य विकल्पस्याप्रसक्तेः।

ननु निषेधशास्त्रस्यैव प्रथममालोचने विशेषदर्शनसत्त्वेन सामान्यशास्त्रतो भ्रमानुत्पत्त्या तादृशप्रतियोगिनोऽप्रसिद्धौ तदुद्देश्यकप्रमानुपपत्तिरिति चेन्न। तस्यैवासंभवात्। तथा हि निषेधशास्त्रस्य प्रथममालोचनं नाम तद्वाक्यज्ञानम्। उत तदर्थज्ञानम्। नाद्यः। वाक्यज्ञानमात्रेण विशेषदर्शनासंभवात्। नान्त्यः, प्रतियोग्यप्रसिद्ध्या तदसंभवात्।

किं च निषेधस्य प्रथममालोचने बाधबुद्धेः सत्त्वेन विधिवाक्यतः प्रमा दुरुपपादेति विकल्पापत्त्युक्त्यसंभवः।

यद्वा तादृशे विषये आहार्यभ्रमात्मिका प्रतियोगिप्रसिद्धिरस्तु। एवमेव हि नान्तरिक्षे जुहोति ह्रदे वह्निर्नास्ति इत्यादौ प्रतियोगिप्रसिद्धिः सर्वैरुपपादनीया। प्रतियोगिज्ञानस्याभावधीहेतुत्वेऽपि तत्कारणतावच्छेदककोटावनाहार्यत्वनिवेशे मानाभावात्।

अभावबुद्धौ प्रतियोगिज्ञानं कारणमिति न पृथक् कार्यकारणभावः। ससंबन्धिकपदार्थज्ञाने संबन्धितावच्छेदकप्रकारकज्ञानं कारणमिति वा विशेषणतावच्छेदकप्रकारकज्ञानं कारणमिति वा सामान्यकार्यकारणभावेनैव निर्वाहादिति पक्षेऽपि आहार्यानाहार्यसाधारणज्ञानत्वेनैव हेतुता। आहार्यप्रतियोगिज्ञानात्आहार्य एव अभावबोध इत्यनेनैव अतिप्रसङ्गभङ्गात् (विकल्पप्रसङ्गभङ्गात्) आहार्यः शाब्दबोधो नेति तु अश्रद्धेयमेव। ह्रदे वह्निर्नास्तीत्यादौ ह्रदवृत्तित्वाभावबोधो वह्नाविति तु अधिकरणकारकस्य कर्तृकर्मद्वारा क्रियायामेवान्वयादयुक्तम्। प्रसक्तं निषिध्यत इत्यस्य प्रसञ्जनार्हमित्यर्थः। यदि निषेधो न स्यात् स्यादेव सामान्येन प्रसक्तिरिति।

किं च विध्युपमर्दकत्वेन उपजीव्यादपि विधेः निषेधो बलवान्। एतदेवाभिप्रेत्य निषेधाश्च बलीयांसः इति भाष्यकृतः।

किं च उपजीव्यविरोधः विकल्पवादिनोऽपि। तथा हि — यागत्वावच्छेदेन ये यजामहकर्मकभावनाख्यो वाक्यार्थो निषेधस्योपजीव्यः। तस्य च यस्मिन्ननूयाजे तदकरणं तदंशे विरोधः। अवच्छेदकावच्छेदेन प्रतीतेः अप्रामाण्यं च। अनूयाजवाक्ये तु एकवाक्यतालाभेन पर्युदास इति तत्त्वम्। एवं च शास्त्रविहितस्य प्रतिषेधे विकल्पापत्तेः वाक्यभेदापत्तेश्च न प्रसज्यप्रतिषेधः। किं तु पर्युदास इति मीमांसकोक्तौ विकल्पापत्तेरिति प्रथमहेतुरयुक्तः। वाक्यभेदापत्तेरिति द्वितीयहेतुनैव पर्युदासस्तत्रेति फलितम्।

अत एव उक्तरीत्या सामान्यविशेषस्थले विकल्पाभावादेव द्वन्द्वे च[४७] विभाषा जसि[४८] इत्यादीनां चारितार्थ्यम्। अन्यथा विधिनिषेधाभ्यां विकल्पलाभे विभाषा जसीत्यादीनां वैयर्थ्यं स्पष्टमेव।

अत एव पर्युदासवत् प्रतिषेधेऽपि विकल्पानवसरादेव सुडनपुंसकस्य[४९] इत्यादौ भाष्ये पर्युदासप्रसज्यप्रतिषेधयोः फलाविशेष उक्तः संगच्छते। तत्र हि "शि सर्वनामस्थाने सुडनपुंसकस्येति चेत् जसि शिप्रतिषेधः प्राप्नोति" इति दोषमाशङ्क्य "नाप्रतिषेधात् नायं प्रसज्यप्रतिषेधः नपुंसकस्य नेति। किं तर्हि पर्युदासोऽयम्। यदन्यत् नपुंसकादिति नपुंसके न व्यापारः" इति समाहितम्। प्रसज्यप्रतिषेधाश्रयणेन पूर्वपक्षः। पर्युदासाश्रयणेन च सिद्धान्तः। अनन्तरं प्रसज्यप्रतिषेधेऽप्यदोषः इत्याशयेन तमाश्रित्य "अप्राप्तेर्वा। अथवा अनन्तरा या प्राप्तिः सा निषिध्यते" इति समाधानान्तरमुक्तम्। एवं च प्रसज्यप्रतिषेधयोः भाष्यकृता समफलत्वोक्त्या शास्त्रप्रापितस्य प्रतिषेधे विकल्प इति मीमांसकोक्तं चिन्त्यमेव। सामान्यविशेषभावेन बाधस्यैवौचित्यात्।

नन्वेवं जैमिनिसूत्रविरोधः प्राप्नोति। तथा हि — ज्योतिष्टोमे श्रूयते दीक्षितो न ददाति, न जुहोति, न पचति इति। तत्र वाक्यभेदात् विहितस्य प्रतिषेधे विकल्पापत्तेश्च न प्रतिषेधः, किं तु पर्युदासः। तत्रापि दीक्षितशब्देन नञः संबन्धाश्रयणेन अदीक्षितः चोदकप्राप्तहोमादिविशिष्टप्रायणीयादिकं कुर्यादिति न पर्युदासः संभवति। दीक्षितस्यैव तद्विधानात्। किं तु नञः धातुना संबन्धात् दीक्षितो दानहोमपाकव्यतिरिक्तानि

---

[४७] पा.सू. १.१.३१
[४८] पा.सू. १.१.३२
[४९] पा.सू. १.१.४३

प्रकृतान्यङ्गानि कुर्यात् इति पर्युदासः स्वीकार्य इति दशमेऽध्यायेऽष्टमे पादे सप्तमेऽधिकरणे दीक्षितदाननिषेधस्य पर्युदासताधिकरणे जैमिनिना सिद्धान्तितम्। — "अपि तु वाक्यशेषत्वात् इतरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात्" इति। मीमांसाभाष्यकृतापि तदेवाङ्गीकृतम्। शास्त्रसिद्धस्य प्रतिषेधे विकल्पाभावे तद्विरोधः स्पष्ट एवेति चेत् — न। विकल्पकथनस्याभ्युच्चयमात्रत्वात्। युक्तिसिद्ध-पतञ्जलिवाक्यविरोधात्। मुख्यं तु पर्युदासत्वसाधकमेकवाक्यत्वमेव। अत एव तत् प्रथमत उपात्तम्। वाक्यशेषत्वादित्यस्य एकवाक्यत्वलाभादित्यर्थः। अधिकं मञ्जूषायाम्।

शङ्काविशेषसमाधानम्

ननु अत्यन्ताभावार्थकनञः क्रियाभावबोधकत्वे

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे।।

इत्यत्र एकेनैव नञा भवनक्रियाभावस्य बोधनसंभवात् अनेकेषां नञां वैयर्थ्यम्। अनन्वयश्च। भवन्तीति बहुवचनार्थेन क्रोध इत्याद्येकवचनान्तोपस्थप्यानामनन्वयः, वचनभेदादिति चेत् — न।

प्रत्येकं क्रोधादिभवनाभावस्य बोधनाय अनेकनञां, समुदितानां भवनाभावस्य बोधनाय भवन्तीति बहुवचनस्य च सार्थक्यात्। तत्र पूर्वार्धे प्रत्येकं भवतीत्यध्याहारः। एतेन —

न तं विरिञ्चिर्न भवो न लक्ष्मीर्न धनाधिपः।
दातुमर्हन्ति विभवं विष्णोराराधनेन यः।।

इत्यपि व्याख्यातम्। समुदितानां बलवत्त्वेऽपि दानयोग्यत्वाभावप्रतिपादनाय च बहुवचनम्। समुदितानां वैमत्येन (ऐकमत्याभावेन) अदातृत्वेऽपि प्रत्येकं दातृत्वा-भावबोधफलकं नञनेकत्वमित्यदोषात्। एवं च भगवद्भक्त्याराधनादेः माहात्म्याति-शयसूचनद्वारा अत्यन्तोपादेयतासूचनाय तथोक्तिरिति तत्त्वम्। मैत्रस्येदं न चैत्रस्य इत्यादौ आरोपितचैत्रस्वामिकत्ववदिदं मैत्रसंबन्धीति बोधः।

यत्त्वत्र स्वत्त्ववान् षष्ठ्यर्थः। तत्र स्वत्वे निरूपितत्वसंबन्धेन चैत्रस्यान्वयः। स्वत्ववतः नञर्थभेदे प्रतियोगितयान्वयः। चैत्रनिरूपितस्वत्ववद्भिन्नमिदमिति बोध इति। तन्न। यन्निरूपिते (चैत्रनिरूपिते) यन्निष्ठेऽर्थे (इदंनिष्ठे स्वत्वे) या विभक्तिः तदर्थस्य विभक्त्यर्थस्य स्वत्वस्य तत्रैव नञ्-समभिव्याहारेऽप्यन्वयौचित्येन नञर्थे

प्रतियोगितया अन्वयासंभवात्। अन्यथा एकत्वाभाववन्तौ पाककर्तारौ चैत्रौ इत्यर्थे न पचति चैत्रौ इत्यस्याप्यापत्तिः, एको न द्वौ इतिवत्।

किं च चैत्रस्येत्यादेः तत्संबन्ध्यन्तराकाङ्क्षायाः विशेषाकाङ्क्षायाः वा नियमतः सत्त्वेन तत्संबन्धं विना नञर्थस्य प्रतियोग्याकाङ्क्षावशात् नञर्थान्वयो वक्तुमशक्यः। स्वाकाङ्क्षानिवृत्त्युत्तरमेव अन्याकाङ्क्षापूरणस्योचितत्वात्।

प्रतियोगिनः अभावेऽन्वयप्रकारः

अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं चाभावे व्युत्पत्तिबललभ्यम्। नीलघटवति भूतले अत्र घटो नास्तीत्यव्यवहारात्, पीतघटो नास्तीति व्यवहाराच्च। ध्वनितं चेदं विरोमोऽवसानम्[५०] इत्यत्र भाष्ये। तत्र हि अभावोऽवसानं विरामोऽवसानमिति लक्षणद्वये कस्य ज्यायस्त्वमित्यर्थविचारावसरे भावभावित्वात् अवसानभावित्वाच्च शब्दस्यावसानलक्षणं नोपपद्यते। इति पक्षद्वयेऽपि दोषः शङ्कितः। वर्णानामभाव इत्युक्ते वर्णत्वावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः। स च न वर्णसत्त्वे इति तद्भाष्यार्थः। ततश्च भाष्यानुगृहीतेयं व्युत्पत्तिः।

अत एव वायौ रूपं नास्तीति प्रतीत्या सामान्याभावः साधितो मणौ। विशेषाभावकूटाज्ञानेऽपि तादृशप्रतीतेः सत्त्वात् तस्याः सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावेनैव निर्वाह्यत्वात्।

अन्वयितावच्छेदकशब्देन नञर्थान्वयिविशेषणमुच्यते। यथा न पीतघट इत्यत्र पीतरूपम्। प्रतियोगितावच्छेदकं च तत्रापि घटत्वमेव। विशिष्टबोधे विशेष्यवृत्तिधर्मस्यैव प्रतियोगितावच्छेदकत्वात्। घटत्वावच्छिन्ना प्रतियोगिता च पीतेत्यादिविशेषणबलात् पीतघटव्यक्तिनिष्ठैव। विशिष्टं च केवलात् नात्यन्तमतिरिक्तम्। सर्वथा अतिरिक्तत्वे तु वैशेषिकाणां पदार्थविभागन्यूनतापत्तिः। अत एव अभियुक्तैः अन्वयितावच्छेदकेत्युक्तं, न तु प्रतियोगितावच्छेदकेति। यथा घटपटादीनां घटत्वादिना शक्तावपि प्रकरणादिना कासांचिदेव व्यक्तीनां बोधः, तथा प्रकृते विशेषणबलात्।

एवमाधारतावच्छेदकावच्छेदेनाभावान्वयः। घटे पीतघटत्वाभाव इत्यव्यवहारात्। एवं नीलघटो न घट इत्यपि। आरोपितघटत्वस्य तत्राभावात्। अज्ञानशब्दे अधर्मशब्दे इव विरोध्यर्थको नञ्। तेन भावपदार्थ एव स सविषयकश्च।

अभावशब्देऽपि विरोध्यर्थक एव सः। भावविरोधीत्यर्थः। एवं चाभावस्य भावप्रतियोगिकत्वमेव। अभावाभाव इत्यादिर्व्यवहारो नैयायिकानामप्रामाणिक एव।

---

[५०] पा.सू. १.४.११०

घटाभावो नास्तीत्यादौ घटाभावकर्तृकसत्तायामेव अभावप्रयोगित्वम्। एवमेव नासहस्रंदस्तत्रास्ते इत्यादौ।

येन नाप्राप्ते, नाविष्णुः पृथिवीपतिः इत्यादौ नञ्-द्वयं प्रकृतार्थगतदार्ढ्यद्योतकम्। तदुक्तं विनञ्भ्यां इति सूत्रे भाष्ये — इह नानेति सहार्थो गम्येत। द्वौ हि प्रतिषेधौ प्रकृतमर्थं गमयतः न न सह सहैवेति इति।

न सहेति प्रत्ययार्थनिर्देशं मन्यते प्रकृत्यर्थेन प्रत्ययार्थो विशेषणीयः। ततः प्रतिषेधस्य प्रतिषेधात् विधिना भाव्यमिति भावः इति कैयटः। अथवा अविष्णुः पृथिवीपतिर्न भवतीत्यन्वयः।

मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन।। (वेणीसंहारे)

इत्यादौ काकुसहकारेण नञामन्यादिगतं निश्चितत्वं द्योत्यते। तदेव अभिलप्यते मथ्नाम्येवेति।

शशशृङ्गं नास्ति इत्यादौ बौद्धप्रतियोगिप्रसिद्धेः सत्त्वान्न दोषः। वह्नित्वेन घटो नास्तीत्यादौ अप्रसिद्धप्रतियोगिकाया अभावबुद्धेः सौन्दडादिभिः स्वीकाराच्च। अन्यथा वह्नित्वविशिष्टस्य घटस्याप्रसिद्ध्या तत्प्रतियोगिकाभावस्वीकारो न संगच्छेत।

प्रतियोग्यारोपस्याभावज्ञानहेतुता

अत्रेदं बोध्यम् — प्रतियोग्यारोपः अभावज्ञाने अभावव्यवहारे च हेतुः. प्रतियोग्यनालिङ्गिताभावबुद्धेरभावात् सर्षपे सुमेरुभेदतदत्यन्ताभावयोर्व्यवहाराभावाच्च। न च न न इत्यत्र तदनालिङ्गिताभावबोधो भाष्ये स्वीकृत इति वाच्यम्। तादृशभाष्याभावात्। नञ्सूत्रे न न एकं प्रियम् इति भाष्ये प्रयुक्तम्। तस्य च नोऽस्माकं एकं प्रियं नेत्यर्थः कैयटेनोक्त इति प्रतियोग्यालिङ्गितैव तत्राभावबुद्धिः।

किं च नञ्सूत्रे नेत्युक्ते संदेहः स्यात् कस्य पदार्थो निवर्तते इति ग्रन्थेन नित्यं प्रतियोग्याकाङ्क्षैव दर्शिता।

एतदेवाभिप्रेत्य नञ्सूत्रे भाष्ये उक्तम् — ब्राह्मणदृष्टगुणस्य गौरत्वादेः दर्शनात् दुष्टोपदेशाद्वा अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेत्येवंरूपात् अब्राह्मणे पूर्वं ब्राह्मणोऽयमित्यध्यवस्यति। ततः पश्चादुपलभते नायं ब्राह्मण इति। ततः अब्राह्मणोऽयमिति प्रयुङ्क्ते। आतश्च तद्दृष्टगुणदर्शनात् दुष्टोपदेशाद्वा ब्राह्मणत्वाध्यवसायपूर्वकमेव अयं न

ब्राह्मण इति ज्ञानम्। न ह्ययं कालवर्णमापणे आसीनं दृष्ट्वा अध्यवस्यति ब्राह्मणोऽयमिति। यथास्थितं वस्तुतत्त्वं तस्य निर्ज्ञातं भवतीति तदारोपाभावान्न तदभावज्ञानं तत्रेति ब्राह्मणाब्राह्मणशब्दयोरुभयोरपि तत्र प्रयोगाभाव इत्यर्थकम्। एतेन प्रतियोग्यारोपस्यान्वयव्यतिरेकाभ्यां स्पष्टमेवाभावज्ञाने कारणता उक्ता।

एतदेव आरोपस्याभावधीहेतुत्वमेवाभिप्रेत्य आरोपितरजतत्वायामेव शुक्तौ नेदं रजतमिति प्रतीतिरिति लीलावत्त्युपाये उक्तम्। अत एव प्रतियोग्यधिकरणाभ्यामभावो निरूप्यत इति वृद्धाः। अधिकरणपदेन संनिधानात् प्रतियोग्यारोपाधिकरणमेव गृह्यते। तदेव चाभावाधिकरणम्। एवं च आरोपस्यैव शब्दप्रयोगकारणत्वात् बोद्धुरपि तदारोपितविषयस्यैव प्रतीतेः आरोपितत्वमेव नञर्थः। अत्र ब्राह्मणो नास्ति इत्यादावपि एतद्देशाधिकरणिका आरोपितब्राह्मणकर्तृका सत्तेत्येव बोधः। आर्थस्तु तदभावबोधः।

एवं च यत्र तादात्म्यारोपस्तत्रारोपितत्वं नामार्थगतम्। एवमारोपितत्वस्य नञ्वाच्यत्वे तु मुख्यब्राह्मणत्ववति गृहीतशक्तिकब्राह्मणपदार्थे तदन्वयो दुरुपपाद इति प्रत्ययत्यागो वाच्यः। स चाशक्यः। शब्दार्थसंबन्धस्य नित्यताहानिश्च। यत्र संसर्गारोपस्तत्र क्रियागुणगतं तत् आरोपितत्वमिति व्यवस्था।

इदमेव युक्तम्। अन्यथा नञोऽभावार्थकत्वे न कलञ्जं भक्षयेत् इत्यादावनुपपत्तेः। यदि कलञ्जभक्षणाभावः प्रेरणाविषय इति बोधः तदा प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वमिति व्युत्पत्तिभङ्गः। तस्मात् आरोपितकलञ्जभक्षणं प्रेरणाविषय इति बोधः। अनिष्टसाधनत्वं बुध्यत इति तु विधिवादे दूषयिष्यते। अत एव —

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

इत्यभियुक्तवाक्ये सादृश्याद्यार्थिकार्थेषु अभावभेदयोः गणनम्।

भूषणपरिशीलनम्

यत्तु प्रमायां गुणस्य कारणत्वानुरोधेन प्रतियोग्यारोपस्याभावप्रमायां हेतुत्वमिति। तन्न। प्रमाया गुणजन्यत्वे मानाभावात्। चक्षुर्गतपित्तदोषाभावे शङ्खे श्वैत्यप्रमा, तत्सत्त्वे न चक्षुर्गतमण्डूकवसाञ्जनाभावे वंशप्रमा, तत्सत्त्वे न, इत्यन्वयव्यतिरेकाभ्यां तत्तत्प्रमायां तत्तद्दोषस्य प्रतिबन्धकताया एव कल्पनात्। सत्यां सामग्र्यां कार्य-विरोधित्वमेव प्रतिबन्धकत्वम्। आरोपस्य गुणत्वाभावाच्च। प्रत्यक्षे निर्दुष्टेन्द्रिय-संनिकर्षादेः शाब्दे आप्तोक्तशब्दज्ञानस्य गुणस्य सत्त्वाच्च।

यदपि घटस्य भेदवानित्यर्थात् वाक्ये षष्ठीसंभवेऽपि अघट इत्यादौ समासे षष्ठ्यापत्त्याद्यभावात् घटभिन्न इत्येव बोधः। अवर्षा हेमन्तः, अनर्थः स्त्री इत्यादौ हेमन्तादिगतलिङ्गं तु न, लोकाश्रयत्वाल्लिङ्गस्य। न चैवम् अस इत्यादौ तद्भिन्न इति बोधे तच्छब्दस्य सर्वनामत्वानापत्तिः, तदर्थस्योपसर्जनत्वादिति वाच्यम्। एतत्तदोः सुलोपोऽकोरनञ्समासे हलि[५१] इति ज्ञापकेन पूर्वपदार्थप्राधान्येऽपि उत्तरपदार्थ-प्रयुक्तकार्यज्ञापनात्। एतदुक्तं भवति — असः शिवः इत्यादावुपसर्जनत्वात् सर्वनामत्वाभावादेव सुलोपस्याप्राप्त्या तत्र तद्वारणाय कृतम् अनञ्समासग्रहणं व्यर्थं सत् उक्तमर्थं ज्ञापयतीति। तच्च ज्ञापकं सामान्यापेक्षम्, असति बाधके प्रमाणानां सामान्यापेक्षत्वात्। अत एव अत्वं भवसीत्यादौ पुरुषव्यवस्था। अनेकमन्यपदार्थे[५२] इत्येकवचनं तु विशेष्यभूतसुबित्यस्य एकवचनान्तत्वात्।

वर्जयन्त्या शनैः सङ्गमेकान्ततः तर्कयन्त्या सुखं सङ्गमेकान्ततः।
योषयैष स्मरासन्नतापाङ्ग्या सेव्यते ऽनेकया सन्नतापाङ्ग्या।।[५३]

इत्यत्र अनेकया इत्यत्र योषया इति विशेष्यानुरोधात् एकवचनम् इति। तदपि न। ताभ्यां भिन्नोऽस्ति इत्यर्थके अतौ स्तः इति प्रयोगे द्विवचनापत्तेः एकवचनापत्तेश्च।

एवकारार्थनिर्णयः

शब्दखण्डे दिनकरीयव्याख्याने रामरुद्रीये - एवकारार्थस्त्रिविधः - अन्ययोग-व्यवच्छेदः अयोगव्यवच्छेदः अत्यन्तायोगव्यवच्छेदश्चेति। तत्र विशेष्यसंगतैवकारस्य अन्ययोगव्यवच्छेदोऽर्थः यथा चैत्र एव पचतीत्यादौ चैत्राद्यन्यस्मिन् पाककर्तृत्वयोगो व्यवच्छिद्यते। तत्रान्यस्मिन् योगे व्यवच्छेदे च पृथगेव एवकारस्य शक्तिः। अन्यरूपार्थः चैत्रांशे विशेषणतया भासते। संबन्धरूपयोगे आख्यातार्थकृतेः प्रतियोगित्वेनान्वयः। तादृशयोगस्याभावरूपव्यवच्छेदे प्रतियोगितयान्वयः। अभाव-श्चान्यस्मिन् प्रकारविधया भासते। तथा च चैत्रः पाकानुकूलकृतिमान् चैत्रान्यः पाकानुकूलकृतिसंबन्धाभाववान् इत्याकारकः शाब्दबोधो भवति।

विशेषणसंगतैवकारस्य चायोगव्यवच्छेदोऽर्थः। यथा शङ्खः पाण्डर एवेत्यादौ शङ्खे पाण्डरायोगो व्यवच्छिद्यते। शङ्खः पाण्डरत्वायोगाभाववान् इति बोधः।

---

[५१] पा.सू. ६.१.१३२
[५२] पा.सू. २.२.२४
[५३] शिशुपालवधम्, सर्गः-४

क्रियासंगतैवकारस्य च अत्यन्तायोगव्यवच्छेदोऽर्थः यथा नीलं सरोजं भवत्येवेत्यादौ सरोजे नीलभवनस्य अत्यन्तायोगो व्यवच्छिद्यते। न त्वयोगो व्यवच्छिद्यते। क्वचित् सरोजे नीलत्वासंबन्धस्यापि सत्त्वात्।

यद्यपि अयोगेऽत्यन्तत्वं सरोजत्वव्यापकत्वमेव वाच्यम्। अन्यस्य दुर्वचत्वात्। तथा च सरोजनिष्ठभेदप्रतियोगितानवच्छेदकनीलत्वसंबन्धाभावस्याप्रसिद्ध्या तद्व्यवच्छेदो दुर्घटः। तथाप्ययोगे अत्यन्तत्वस्य सरोजनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपस्य व्यवच्छेद एव अत्यन्तायोगव्यवच्छेदपदार्थ इति नोक्तानुपपत्तिः।

मञ्जूषानुसारमेवकार्थनिर्णयः

एवशब्दोऽवधारणे। एवे चानियोगे इति वार्तिके नियोगोऽवधारणम् इति कैयटाद्युक्तेः। उक्तवार्तिकादेव असंभवाद्यपि एवकारार्थः। अवधारणं ज्ञानविशेषः। स च द्योत्य एव समभिव्याहृतपदार्थे विशेषणम्। तच्च अवधारणं पार्थ एव धनुर्धरः इत्यादौ विशेष्यसंगतं स्वातिरिक्तावृत्तित्वेन गृहीतसमभिव्याहृतपदार्थप्रकारकज्ञानरूपं पार्थविशेषणम्। स्वं पार्थः, तदतिरिक्तावृत्तित्वेन गृहीतो यः पदार्थः धनुर्धरत्वं तत्प्रकारकं पार्थविशेष्यकं यत् ज्ञानं तद्रूपमित्यर्थः। अवधारणविशेष्यः पार्थो धनुर्धर इति बोधः। साधारण्येन धनुर्धरत्वज्ञानवन्तं प्रति तद्भ्रमनिरासायैव तथा प्रयोगात्। पार्थान्यो न धनुर्धर इति तु फलति।

कदाचित् स्पष्टत्वार्थं तत्प्रयोगः। यथा —त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येन केनचित् इति। नान्येन केनचित् इत्यनेन सिद्धत्वात् एवशब्दप्रयोगः स्पष्टप्रतिपत्त्यर्थः। अर्थावृत्त्या लब्धस्य शब्देन प्रतिपादने पौनरुक्त्याभावस्य आलङ्कारिकैरुक्तत्वात्। लवणमेवासौ भुङ्क्ते इत्यादौ प्राचुर्यार्थकस्य, घट एव प्रसिद्धः इत्यादौ अप्यर्थकस्य, क्वेव भोक्ष्यसे इत्यादौ असंभवार्थकस्य च तस्य सत्त्वेन तदर्थकत्वव्यावृत्तये तदुक्तेश्च।

शङ्खे पाण्डुरत्वमेव इत्यादौ स्वातिरिक्तरूपानाश्रयत्वेन गृहीतसमभिव्याहृतप्रकारकज्ञानरूपमधारणम्। शङ्खे अनेकरूपज्ञानवन्तं प्रति अयं प्रयोगः।

क्रियासंगते चैत्रो हसत्येव इत्यादौ स्वातिरिक्तबुद्धिस्थक्रियानाश्रयसमभिव्याहृतपदार्थप्रकारकज्ञानरूपमवधारणम्। स्वं हंसः। तदतिरिक्ता या बुद्धिस्था क्रिया तदनाश्रयो यः समभिव्याहृतपदार्थः चैत्रः तत्प्रकारकज्ञानरूपमित्यर्थः। तथा च चैत्राभिन्नकर्तृकोऽवधारणविशेष्यो हंस इति बोधः।

नीलं सरोजं भवत्येवेत्यादौ नीलभवनाभावानधिकरणं यत् सरोजं तत्प्रकारकज्ञानरूपमवधारणम्। नीलाभिन्नसरोजाभिन्नकर्तृकमवधारणविशेष्यं भवनमित्यन्वयबोधः।

ज्ञानमर्थं गृह्णात्येवेत्यादौ अवच्छेदकावच्छेदेन अर्थग्रहणाभावानधिकरणज्ञान-प्रकारकज्ञानरूपम्। ज्ञानकर्तृकमर्थकर्मकमवधारणविषयो ग्रहणमिति अन्वयबोधः। न गृह्णातीति न इति प्रतिनिर्देशात्।

शीत एव स्पर्सो जले इत्यादौ शीतान्यस्पर्शानधिकरणसमभिव्याहृतपदार्थ-प्रकारकज्ञानरूपं तत्। नान्यः स्पर्शो जले इति प्रतिनिर्देशात्। जलाधिकरणकाव-धारणविषयशीताभिन्नः स्पर्शः इति बोधः।

चैत्रेणैवायं दृश्यत इत्यादौ चैत्रान्यकर्तृकसकलकारकविशिष्टदर्शनक्रियाविशेष्यक-बोधरूपं तत्। अवधारणविषयचैत्रकर्तृकमेतत्कर्मकं दर्शनमिति बोधः। घटत्वं पृथिवीवृत्त्येवेत्यादौ पृथिव्यन्यावृत्तित्ववद्घटत्वविशेष्यकज्ञानरूपं तत्। नान्यवृत्तीति प्रतिनिर्देशात्। अवधारणविषयपृथिवीवृत्तित्ववत् घटत्वमिति बोधः।

ऋतौ स्वभार्यामुपेयादेव इत्यादौ स्वाभावानाश्रयकारकप्रकारकज्ञानरूपं तत्। नोपेयादिति नेति प्रतिनिर्देशात्। एवं च ऋतुकालाधिकरणकस्वकर्तृकस्वभार्याकर्म-कमवधारणविषयो गमनं प्रेरणाविषय इति बोधः। तेन तस्योपगमनस्य प्रत्यवाया-भावरूपेष्टसाधनत्वलाभः। इष्टस्य प्रत्यवायाभावरूपत्वं तु ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति। घोरायां भ्रूणहत्यायां पच्यते। इत्यादिवचनैकवाक्यतया लभ्यते। तेन ऋतुकालाधिकरणकस्वभार्यागमनाभावस्य प्रत्यवायसाधनत्वमवगम्यते। सकल-साधारणमवधारणत्वमखण्डोपाधिः। तेनैव रूपेण शक्तिर्बोधश्च।

नव्यनैयायिकास्तु — एवकारार्थोऽन्ययोगव्यवच्छेदः। पृथिव्यामेव गन्ध इत्यादौ पृथिव्यामित्यस्य एवकारार्थेऽन्यत्वे गन्धे चान्वयः। पृथिव्यन्यावृत्तिः पृथिवीवृत्तिर्गन्ध इत्यादिक्रमेण बोधः। न च सप्तम्यर्थविशेषणस्य पृथिव्यादेः कथमेवकारार्थेऽन्वयः। एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतयान्वयस्य अव्युत्पन्नत्वादिति वाच्यम्। व्युत्पत्तिवैचित्र्येणान्वयसंभवात्। एवकारातिरिक्तस्थलविषयकतया व्युत्पत्तेः संकोच-नीयत्वादित्याहुः।

तन्न। अनेकव्युत्पत्तिवैचित्र्यकल्पनाया अन्याय्यत्वात्।

न्यायकौस्तुभरीत्या एवकारार्थः[५४]

एवकारस्य अत्यन्तायोगव्यवच्छेदः, अयोगव्यवच्छेदः, अन्ययोगव्यव-च्छेदश्चार्थः। अत्यन्तायोगव्यवच्छेदो नाम अन्वयितावच्छेदकव्यापकत्वाभाव-

---

[५४] न्या.कौ. पृ. ८३९

विशिष्टो यो अभावः प्रतियोगितासंबन्धेन तत्प्रतियोगिकः अभावः। अत्यन्त-पदनञ्पदयोगपदव्यवच्छेदपदैः व्यापकत्वाभाववैशिष्ट्यव्यवच्छेदानां लाभः। इतरांशस्य तु तात्पर्यवशाल्लाभः। एतादृशायोगव्यवच्छेदबोधस्तु नीलं सरोजं भवत्येवेत्यादि-क्रियासमभिव्याहृतैवकारस्थले भवति। तथाविधबोधे तादृशानुपूर्वी ज्ञानस्य हेतुत्वात्। तथाच "नीलं सरोजं भवत्येव" इत्यत्र सरोजत्वव्यापकत्वाभावविशिष्टो यः नीलभवनाश्रयत्वाभावः तत्प्रतियोगिको यः व्यवच्छेदः अभावः तद्वत् नीलभव-नाश्रयत्ववत् सरोजम् इत्याकारकः शाब्दबोधः। भवनमत्राभेदः। तत्संबन्धाभावः व्यवच्छेदे प्रतियोगितया अन्वेति। नीलतादात्म्यरूपनीलभवनाश्रयत्वाभावः न सरोजत्वव्यापकः। नीलस्यापि सरोजस्य सत्वात्। तादृशनीलतादात्म्याश्रयत्वा-भावस्याभावः नीलतादात्म्याश्रये सरोजे वर्तते।

अयोगव्यवच्छेदो नाम तादात्म्याभावव्यवच्छेदः। तस्य च शङ्खः पाण्डर एवेत्यादिविशेषणसंगतैवकारस्थले बोधः। तादृशायोगव्यवच्छेदबोधे तादृशानु-पूर्वीज्ञानस्य हेतुत्वात्। इत्थं च "शङ्खः पाण्डर एव" इत्यादौ पाण्डरतादात्म्या-भावव्यवच्छेदवान् शङ्खः इत्याकारको बोधः।

अन्ययोगव्यवच्छेदश्च अन्यतादात्म्यादिव्यवच्छेदः। एतद्बोधश्च विशेष्यसंग-तैवकारस्थले "पार्थ एव धनुर्धरः" इत्यादौ। तादृशबोधे तादृशानुपूर्वीज्ञानस्य हेतुत्वात्। एवं च तत्र पार्थान्यतादात्म्याभाववद्धनुर्धराभिन्नः पार्थ इत्याकारको बोधः।

तत्र आक्षेपसमाधाने

ननु क्रियासमभिव्याहारे एवकारस्य अत्यन्तायोगव्यवच्छेदबोधकत्वे "ज्ञानमर्थं गृह्णात्येव" "नरो वेदानधीत एव" इत्यादिप्रयोगप्रसङ्गः। तत्र ज्ञानत्वादिव्यापकत्वा-भावविशिष्टरजतनिरूपितविषयिताश्रयत्वाभावादिव्यवच्छेदस्य ज्ञानत्वसामानाधि-करण्येन बोधसंभवात्। अयं भावः-ज्ञानत्वादिव्यापकत्वाभावविशिष्टः यः रजत-निरूपितविषयिताश्रयत्वाभावादिः तद्व्यवच्छेदस्येत्यर्थः। रजतं गृह्णातीत्यत्र धात्वर्थः विषयता, तदन्वयिनिरूपितत्वं द्वितीयार्थः,आश्रयत्वमाख्यातार्थः। रजतनिरूपित-विषयिताश्रयत्वाभावः न ज्ञानत्वव्यापकः, रजतविषयकज्ञानस्य सत्वात्। तादृश-विषयिताश्रयत्वाभावस्य व्यवच्छेदः ज्ञाने वर्तत इति ज्ञानं रजतं गृह्णात्येवेति प्रयोगापत्तिरिति।

न चान्वयितावच्छेदकावच्छेदेनैव अत्यन्तायोगव्यवच्छेदबोधाङ्गीकारात् न दोष इति वाच्यम्। नीलं सरोजं भवत्येवेत्यादौ अन्वयितावच्छेदकसरोजत्वावच्छेदेन नीलभवनाश्रयत्वायोगव्यवच्छेदासंभवेन तथावक्तुमशक्यत्वादिति चेत् —

मैवम्। ज्ञान-अध्ययनाद्यर्थकधातुसमभिव्याहृताख्यातसमभिव्याहृतैवकारस्य अन्वयितावच्छेदकावच्छेदेनैव अत्यन्तायोगव्यवच्छेदबोधकत्वाङ्गीकारेण "ज्ञानं रजतं गृह्णात्येव" "नरो वेदानधीत एव" इति प्रयोगापत्तेरभावात्। ज्ञानममर्थं गृह्णात्येव इत्यादौ ज्ञानत्वादिव्यापकत्वाभावविशिष्ट अर्थविषयिताश्रयत्वाद्यभावव्यवच्छेदस्य ज्ञानत्वावच्छेदेन सत्वात् न दोषः। अर्थाविषयकज्ञानस्याभावात्।

नीलं सरोजं भवत्येवेत्यादौ तु अन्वयितावच्छेदकसामानाधिकरण्येन अत्यन्तायोगव्यवच्छेदबोधकत्वाङ्गीकारेण नानुपपत्तिः।

पूर्वोक्तनियमाभाव इति प्रतिपादनम्

अत्रेदं बोध्यम् — विशेष्यसंगतस्य एवकारस्य अन्ययोगव्यवच्छेदबोधकत्वम्, विशेषणसंगतस्य तस्य अत्यन्तायोगव्यवच्छेदबोधकत्वम्, क्रियासंगतस्य तस्य अत्यन्तायोगव्यवच्छेदबोधकत्वम् इति नास्ति नियमः। तात्पर्यवशात् अनुभवानुसारेण क्वचिदन्यथापि बोधात्। अत एव "चैत्रस्यैवेदं धनम्" "पृथिव्यामेव गन्धः" इत्यादौ एवकारस्य विशेषणसंगतत्वेपि चैत्रान्यस्वत्वव्यवच्छेदपृथिव्यसमवेतत्वव्यवच्छेदरूपान्ययोगव्यवच्छेदबोधकत्वम् उपपद्यते।

एवम् "ऋतौ स्वदारान् गच्छेदेव" इत्यादौ एवकारस्य क्रियासंगतत्वेपि अयोगव्यवच्छेदबोधकत्वम्। तत्र ऋतुकालावच्छिन्नस्वदारनिष्ठकर्मताकगमनाभावाभावः प्रत्यवायाभावरूपेष्टसाधनमित्याकारकः एवकारार्थविशेष्यको बोधः।

नव्यमतनिरूपणम्

नव्यास्तु — एवकारस्य सर्वत्र क्रियासंगतत्वे विशेषणसंगतत्वे च अन्ययोगव्यवच्छेद एवार्थः। अन्ययोगश्च अन्यसंबन्धमात्रम्। एवं च "नीलं सरोजं भवत्येव" इत्यादौ आख्यातस्य आश्रये धर्मिणि लक्षणा। तत्र नीलभवनवदन्त्यत्वव्यवच्छेदः सरोजत्वसामानाधिकरण्येन प्रतीयते। "शङ्खः पाण्डर एव" इत्यादौ शङ्खत्वावच्छेदेन पाण्डरान्यत्वव्यवच्छेदबोधो जायते। "पार्थ एव धनुर्धरः" इत्यादौ धनुर्धरत्वावच्छेदेन पार्थान्यत्वव्यवच्छेदबोधः। "पृथिव्यामेव गन्धः" इत्यादौ गन्धे पृथिव्यन्यवृत्तित्वाभावः बुध्यते। "ऋतौ स्वदारान् गच्छेदेव" इत्यत्र ऋतुकालावच्छिन्नस्वदारकर्मकगमनवदन्यत्वव्यवच्छेदे प्रत्यवायपरिहाररूपेष्टसाधनत्वं प्रतीयते।

न च पृथिव्यामेव गन्धः इत्यत्र पृथिव्याः सप्तम्यर्थविशेषणत्वेनोपस्थित्या कथमेवकारार्थे अन्यत्वे अन्वयः। एकत्र विशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतया अन्वयस्याव्युत्पन्नत्वात्। अन्यथा राजपुरुषमानयेत्यत्र द्वितीयार्थकर्मत्वे राज्ञो

अन्वयापत्तेरिति वाच्यम्। एवकारस्थले तादृशव्युत्पत्तेः संकोचात्। एवम् "ऋतौ स्वदारान् गच्छेदेव" इत्यत्र लिङर्थस्य प्रत्यवायाभावरूपेष्टसाधनत्वस्य एवकारार्थे व्यवच्छेदे अन्वये प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिविरोधोपि एवकारस्थले तादृशव्युत्पत्तेः संकोचमभ्युपगम्य वारणीयः इति वदन्ति।

चैत्रस्यैवायं भ्राता इति वाक्यजन्यबोधविचारः

अत्र केचित् — चैत्रान्यभ्रातृकत्वं न चैत्रान्यजनकजन्यत्वम्। चैत्रान्यस्य स्वस्य = मैत्रस्य यज्जनकत्वं = मैत्रनिरूपितं पितृनिष्ठं जनकत्वमिति यावत्, तन्निरूपितजन्यत्वस्य स्वस्मिन् मैत्रे सत्वेन तद्यवच्छेदबोधासंभवात्। नापि चैत्रान्यभिन्नत्वे सति चैत्रान्यजनकजन्यत्वं चैत्रान्यभ्रातृकत्वम्। चैत्रान्ययत्किंचित्प्रतियोगिकभेदस्यापि स्वस्मिन् मैत्रे सत्वात्। तथा च विशेषणाभावप्रयुक्तः विशिष्टाभावः मैत्रे न संभवति। चैत्रान्यत्वावच्छिन्नप्रतियोगिताकभेदविशिष्टस्य चैत्रान्यजनकजन्यत्वस्य चैत्रे एव सत्वेन चैत्रमैत्रोभयभ्रातृकेऽपि चैत्रस्यैवायं भ्राता इत्यादिप्रयोग प्रसङ्गात्। चैत्रान्यतत्तद्व्यक्तीनां प्रातिस्विकरूपेण भेदघटितस्य चैत्रान्यभ्रातृकत्वस्य युगसहस्रेणापि ज्ञातुमशक्यत्वात्। किं तु तद्भेदावच्छिन्नस्वरूपसंबन्धेन तज्जनकजन्यतावत्वं तद्भ्रातृकत्वम्। चैत्रे चैत्रभेदावच्छिन्नस्वरूपसंबन्धेन चैत्रजनकजन्यत्वस्यासत्वेन चैत्रे चैत्रभ्रातृकत्वस्य न प्रसङ्गः इत्याहुः।

अन्यानुयोगिकस्य योगव्यवच्छेदस्य एवकारार्थत्वम्[५५]

अत्रेदं बोध्यम् — "चैत्रस्येवेदं धनम्" "पृथिव्यामेव गन्ध" इत्यादौ यदि चैत्रान्यस्वत्वव्यवच्छेदबोधः पृथिव्यन्यसमवेतत्वव्यवच्छेदबोधश्च स्वीक्रियते, तदा "स्वत्वं चैत्रान्यस्य कस्यचित्" "पृथिव्यन्यस्मिन् न किंचित् समवैति" "भोजनं न जलान्यस्य कस्यचित्" "भ्राता न चैत्रान्यस्य कस्यचित्" इत्यादिभ्रमदशायामुक्तस्थले शाब्दबोधानुपपत्तिः। स्वत्वादौ चैत्रान्यीयत्वाद्यभावनिर्णयेन चैत्रान्यीयस्वत्वादिव्यवच्छेदबोधासंभवात्। एतदुक्तं भवति — स्वत्वे चैत्रान्यप्रतियोगिकत्वाभावस्य, समवेतत्वे पृथिव्यन्यनिरूपितत्वाभावस्य, भोजने जलान्यकर्मकत्वाभावस्य, भ्रातृत्वे चैत्रान्यप्रतियोगिकत्वाभावस्य च भ्रमरूपो यो निर्णयस्तेन प्रतिबन्धात् चैत्रनिरूपितस्वत्वादिप्रतियोगिज्ञानानुदयेन तदभावबोधासंभवः — इति। एवं "प्राणिन एव धनम्" "जातिमत्येव सत्ता" "द्रव्यमेव भुङ्क्ते" "प्राणिन एव भ्राता" इत्यादावपि शाब्दबोधानुपपत्तिः। प्राणिभिन्ननिरूपितस्वत्वाद्यप्रसिद्ध्या तद्यवच्छेदबोधासंभवात्। अतः अन्ययोगप्रतियोगिकव्यवच्छेद इव अन्यानुयोगिको योगव्यवच्छेद एव वा सर्वत्र

---

[५५] न्या.कौ. पृ. ८५८

एवकारार्थः। इत्थं च "चैत्रस्यैव धनम्" इत्यादौ चैत्राद्यन्यस्मिन् धनस्वामित्वाद्यभावः, "पृथिव्यामेव गन्धः" इत्यादौ पृथिव्याद्यन्यस्मिन् गन्धसमवायाद्यभावः, "चैत्रो जलमैव भुङ्क्ते" इत्यादौ जलाद्यन्यस्मिन् चैत्रकर्तृकभोजनकर्मत्वाद्यभावः, "चैत्रस्यैवायं भ्राता" इत्यादौ चैत्राद्यन्यस्मिन् चैत्रमात्रभ्रातृकमैत्रनिष्ठभ्रातृत्वप्रतियोगित्वाद्यभावः प्रतीयते। तत्र च नानुपपत्तिलेशोऽपि। सर्वत्र शाब्दबोधे प्रथमान्तार्थस्यैव मुख्यविशेष्यत्वमिति नियमो नास्ति।

अन्यानुयोगिको व्यवच्छेद एव सर्वत्र एवकारार्थः

वस्तुतस्तु अन्यानुयोगिको व्यवच्छेद एव सर्वत्र एवकारार्थः। न तु योगांशस्यापि व्यवच्छेदप्रतियोगितया निवेशः,मानाभावात्। व्यवच्छेदश्च द्विविधः अन्योन्याभावः अत्यन्ताभावश्च। पार्थ एव धनुर्धर इत्यत्र पार्थान्यस्मिन् धनुर्धरत्वावच्छिन्नभेदः, शङ्खः पाण्डर एवेत्यत्र पाण्डरान्यस्मिन् शङ्खत्वावच्छिन्नभेदः, नीलं सरोजं भवत्येवेत्यत्र नीलभवनाश्रयान्यत्वसामानाधिकरण्येन सरोजत्वावच्छिन्नभेदः प्रतीयते। चैत्रस्यैव धनम् इत्यादौ चैत्राद्यन्यस्मिन् स्वामित्वादिसंबन्धावच्छिन्नप्रतियोगिताकः धनाद्यभावः, पृथिव्यामेव गन्धः इत्यादौ पृथिव्याद्यन्यस्मिन् समवायादिसंबन्दावच्छिन्नप्रतियोगिताको गन्धाद्यभावः, चैत्रो जलमेव भुङ्क्ते इत्यादौ जलाद्यन्यस्मिन् कर्मतादिसंबन्धावच्छिन्नप्रतियोगिताकः भोजनाद्यभावः, चैत्रस्यैवायं भ्राता इत्यादौ चैत्राद्यन्यस्मिन् प्रतियोगितादिसंबन्धावच्छिन्नप्रतियोगिताकः एतद्भ्रातृत्वाद्यभावः प्रतीयत इति। न च स्वामित्वादिसंबन्धस्य वृत्यनियामकतया प्रतियोगितावच्छेदकत्वाभावेन नोक्तरीतिः संभवतीति वाच्यम्। वृत्यनियामकसंबन्धस्याभावप्रतियोगितावच्छेदकत्वे बाधकाभावात्। द्रव्यं गच्छति नाभावमित्यादौ द्वितीयार्थे समवेतत्वे वृत्यनियामकेन निरूपितत्वसंबन्धेन प्रकृत्यर्थस्याभावस्याभावबोधनाय वृत्यनियामकसंबन्धस्यापि प्रतियोगितावच्छेदकतायः स्वीकरणीयत्वात्।

मतान्तरानुवादतन्निरासौ

अत्र केचित् — पार्थ एव धनुर्धर इत्यादौ पार्थान्यत्वव्यवच्छेदादिसंबन्धेन धनुर्धरादौ पार्थाद्यन्वयबोधसंभवात् अलमेवकारस्य व्यवच्छेदादौ शक्त्यादिकमभ्युपगम्य तदर्थविषयकबोधाभ्युपगमेन। न चैवं पार्थ एव धनुर्धर इत्यादिवत् पार्थो धनुर्धर इत्यादावपि उपदर्शितसंबन्धेन धनुर्धरादौ पार्थाद्यन्वयबोधापत्तिरिति वाच्यम्। एवकारस्य तेन संबन्धेन तदर्थबोधे तात्पर्यग्राहकतया पार्थो धनुर्धर इत्यादौ तादृशबोधतात्पर्यग्रहाभावेन तादृश शाब्दबोधापादनासंभवात्। न च नामार्थस्य पार्थस्य पार्थान्यव्यवच्छेदरूपभेदसंबन्धेन नामार्थे धनुर्धरे अन्वयः नामार्थयोर्भेदेनानन्वय इति व्युत्पत्तिविरुद्ध इति वाच्यम्। एवकारस्थले तादृशव्युत्पत्तिसंकोचात् — इत्याहुः।

तदसत्। नामार्थयोर्भेदेनानन्वय इति व्युत्पत्तिसंकोचं विनैव निर्वाहे संभवति तत्संकेचे प्रमाणाभावात्। किं च पार्थ एव धनुर्धर इत्यादौ पार्थान्यत्व-व्यवच्छेदादिसंबन्धेन धनुर्धरादौ पार्थाद्यन्वयबोधाङ्गीकारे भूतले न घट इत्यादावपि स्वाभाववत्वादिसंबन्धेन भूतलवृत्तित्वादेः घटादावन्वयसंभवेन नञादेरप्यभावार्थ-कत्वविलोपप्रसङ्गाच्च। किं च सर्वानुभवसिद्धस्य धनुर्धरादौ पार्थान्यत्वव्यवच्छेदा-दिप्रकारकबोधस्यापलापप्रसङ्गः। न च तादृशानुभव एव असिद्ध इति वाच्यम्। तथापि तादृशव्यवच्छेदादिसंबन्धस्य वृत्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्संब-न्धावच्छिन्नप्रतियोगिकाभावबोधोपगमासंभवात्। न च वृत्यनियामकसंबन्धस्या-भावप्रतियोगितावच्छेदकत्वे बाधकाभावान्न दोष इति वाच्यम्। तथापि पार्थ एव धनुर्धर इत्यादौ पार्थान्यत्वव्यवच्छेदाभाववान् धनुर्धरः इत्यादि मानसं प्रति प्रतिबन्धकत्वं न कल्पनीयम्। तदभाववत्ताज्ञानविधया क्लृप्तप्रतिबन्धकतयैव निर्वाहात् इति लाघवम्। व्यवच्छेदप्रकारकज्ञानस्य व्यवच्छेदाभावप्रकारकज्ञानप्रतिबन्ध-कत्वात्। अत एवकारस्य व्यवच्छेदादौ शक्तिमुपगम्य तत्प्रकारकबोधाङ्गीकार एवोचितः।

परिशिष्टम् (त्रिंशच्छ्लोकीतः) केषांचिदव्ययानामर्थः

नचेति वाच्यमिति वाक्यार्थविचारः

न च पाषाणे गन्धवत्वं नास्तीति वाच्यम्। पाषाण इति सप्तम्यर्थो निरूपितत्वम्। वृत्तित्वम् असधात्वर्थः। आख्यातार्थश्चाश्रयत्वम्। नञर्थश्चाभावः। पाषाणनिरूपित-वृत्तिताश्रयत्वाभाववान् गन्धः इति नास्त्यन्तार्थः। निरूपितत्वस्य वृत्तित्वे, वृत्तित्वस्य निरूपितत्वसंबन्धेनाश्रयत्वे, तस्य प्रतियोगितया नञर्थाभावे, तस्य स्वरूपसंबन्धेन गन्धेऽन्वयात् उक्तार्थलाभः।

यद्वा सप्तम्यर्थो निरूपितत्वं वृत्तित्वम्, असधात्वर्थः तस्याख्यातार्थाश्रयत्वे, तस्य नञर्थाभावे, तस्य प्रतियोगितया गन्धवत्वेऽन्वयात् पाषाणवृत्यभावप्रतियोगी गन्ध इति वाक्यार्थः। इतिपदस्य गन्धनिष्ठपाषाणवृत्यभावप्रतियोगित्वमर्थः। वाच्यमित्यत्र ण्यत्त्वेन रूपेण विधिशक्तस्य कृत्प्रत्ययस्य प्रामाण्ये लक्षणा। तदन्वितस्य नञर्थस्य वचिधात्वर्थेऽन्वयः। वचधात्वर्थः उक्तिः। पुनः कृत्यत्वेन रूपेण कृता विषयो बोध्यते।

तथा च गन्धनिष्ठपाषाणवृत्त्यभावप्रतियोगित्वं प्रामण्याभाववदुक्तिविषयीभूतमिति समग्रवाक्यार्थः।

ननुशब्दघटितवाक्यार्थः

उदाहरणम् — ननु मङ्गलं विघ्नध्वंसं प्रति वा समाप्तिं प्रति वा न कारणम्, विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु समाप्तिदर्शनात्।

विनापदस्य अभावसामानाधिकरण्यमर्थः। तस्य विनापदार्थैकदेशेऽभावेऽन्वयः, ससंबन्धिकत्वादेकदेशान्वयो न दोषाय। विनापदार्थस्य चरमवर्णरूपसमाप्तावन्वयः। ग्रन्थेष्वित्यत्र घटकत्वं सप्तम्यर्थः। वर्णेषु चरमत्वं च स्वघटितग्रन्थघटकवर्ण-प्रागभावासमानकालीनत्वम्। तस्याः दर्शनं ज्ञानम्। ज्ञाप्यत्वं पञ्चम्यर्थः। अन्वयश्चास्य कारणभेदे। वाकारद्वयसमभिव्याहृतस्य समाप्तिपदस्य विघ्नध्वंससमाप्त्यन्यतरदर्थः। विनापीत्यपिशब्दस्वारस्यात् मङ्गलसामानाधिकरण्यमपि सूच्यते। तथा च मङ्गल-प्रतियोगिकाभावसमानाधिकरणमङ्गलसमानाधिकरणनास्तिकादिकर्तृकग्रन्थघटकचर मवर्णरूपसमाप्तिज्ञानज्ञाप्यविघ्नध्वंससमाप्त्यन्यतरनिरूपितकारणतावत्प्रतियोगिकभेद-वत् मङ्गलमित्यन्वयबोधः। तत्र ननुपदस्य ग्रन्थकारसंबोधनमर्थः। तस्य कर्मता-संबन्धेन कारणभेदेऽन्वयः। ग्रन्थकारसंबोधनकर्मत्वं नाम ग्रन्थकारसमवेत-बोधजनकव्यापारजन्यज्ञानविषयत्वमिति।

चेत् इतिशब्दस्यार्थः

उदाहरणम् — इति चेन्न। स्वानुमत्यभावः चेच्छब्दस्यार्थः। संपूर्णम् उदाहरणम् — ननु मङ्गलं विघ्नध्वंसं प्रति वा समाप्तिं प्रति वा न कारणम्। विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु समाप्तिदर्शनात् इति चेन्न।

तत्र स्वस्यानुमतिः अभ्युपगमापरपर्यायो ज्ञानविशेषः तस्याभावः चेदिति शब्दस्यार्थः। यत्र चेदित्यनन्तरं पृथङ्नञ् श्रूयते, किं तु इति चेत् इत्येव तत्र चेदित्यस्य तदर्थकत्वं बोध्यम्। तत्र न कारणम् इत्यत्र पूर्वोक्तविशिष्टकारणभेदस्य प्रकारतासंबन्धेन मङ्गलस्य विशेष्यितासंबन्धेन अनुमतावन्वयः। इतिशब्दप्रभावात्। तत्र चेच्छब्दार्थः स्वनिष्ठानुमत्यभावः। स च नैकदा स्वनिष्ठनुमत्यभावत्वेन विशिष्टरूपेण चेच्छब्देन प्रतीयते। किं तु स्वनिष्ठत्वं विधेयतया, अनुमत्यभावश्च उद्देश्यविधया। तथा च तादृशविशिष्टभेदप्रकारकमङ्गलविशेष्यकानुमत्यभावः स्वनिष्ठ इति विशिष्टबोधः।

केचित्तु तज्ज्ञानप्रयोज्यत्वं पञ्चम्यन्तार्थः। तस्य स्वनिष्ठत्वेऽन्वयः। प्रयोज्यत्वं स्वरूपसंबन्धविशेषः। प्रतिबध्याभावसंबन्धप्रतिबन्धकयोः प्रयोज्यप्रयोजकभावस्य सिद्धान्तसिद्धत्वात्। प्रकृते शिष्टाचारविषयत्वेन मङ्गलस्य समाप्तिसाधनत्वानुमाना-

दिति यदि स्यात् तदा तादृशानुमत्यभावः शिष्टाचारविषयत्वज्ञानजन्यमङ्गलविशेष्यक-समाप्तिकारणत्वप्रकारकानुमितिप्रयोज्यस्वनिष्ठत्ववान् इति विशिष्टबोध इत्याहुः।

चेच्छब्दस्य अन्योऽर्थः

यद्वा स्वानुमत्यभावविशिष्टशङ्का चेच्छब्दार्थः। शङ्का नाम स्वोक्तार्थविशेष्य-काप्रामाण्यप्रकारकज्ञानम्। प्रकृते तु केवलज्ञानमेव शङ्का। तत्र स्वानुमत्यभावो नाम प्रतिबध्यत्वम्। न तु पूर्वोक्तः। तत्र नञः एव प्रतिबध्यत्वमर्थः। चेच्छब्दस्य शङ्कार्थः। तत्र मङ्गलादेः विशेष्यित्वादिना अन्वयः। कारणत्वानुमानादित्यत्र पञ्चम्यर्थो निरूपितत्वम्। अन्वयश्चास्य प्रतिबध्यत्वे। तथा च मङ्गलविशेष्यक-यथोक्तभेदप्रकारिका शङ्का निरुक्तानुमाननिरूपितप्रतिबध्यत्वाश्रयीभूतेति विशिष्ट-बोधः।

चेच्छब्दस्य जिज्ञासार्थकत्वम्

क्वचित् चेच्छब्दस्य जिज्ञासा अर्थः। उदाहरणम् — द्रव्यत्वजातौ किं मानम्। न तावत् प्रत्यक्षम्। घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न। कार्यसमवायिकारण-तावच्छेदकतया द्रव्यत्वजात्यनुमानादिति।

अत्र द्रव्यत्वजातिविषयकप्रमाकरणविषयकजिज्ञासा कार्यसमवायिकारणता-वच्छेदकत्वविषयकद्रव्यत्वजात्यनुमितिज्ञाननिवर्तनीयेति बोधः। अत्रानुमानपदमनु-मितिपरम्। निरूपितत्वं पञ्चम्यर्थः। नञर्थस्तु निवर्त्यत्वम्। तस्य चेच्छब्दार्थे जिज्ञासायामन्वयः।

चेच्छब्दस्यार्थान्तरम्

क्वचित् जिज्ञासाविशेष्यत्वमाशङ्काविशेष्यत्वं च कर्तृनिष्ठं चेच्छब्दस्यार्थः। उदाहरणम् — शब्दाश्रयत्वेनाकाशस्य कारणत्वे का अन्यथासिद्धिरिति चेत् पञ्चमीति गृहाण।

शब्दाश्रयत्वेनेत्यनन्तरम् इतिशब्दोऽध्याहर्तव्यः। तदर्थे प्रकारत्वे तृतीयान्तार्थस्य शब्दाश्रयत्वावच्छिन्नस्य अन्वयः। तस्य कारणत्वपदार्थे कारणत्वग्रहेऽन्वयः। यद्वा इतिशब्दमनध्याहृत्य तृतीयार्थस्यावच्छिन्नत्वस्य प्रकारितासंबन्धेन कारणत्वग्रहे-ऽन्वयः। तथा च शब्दाश्रयत्वावच्छिन्नत्वप्रकारेण कारणत्वप्रकारकाकाशविशेष्यक-ग्रहविरोधिग्रहविषयीभूतान्यथासिद्धिः जिज्ञासाविषयीभूतेति तत्रेतिपदपूर्वकाव्य-यात्मकतादृशपदोपस्थाप्यवाक्यस्यार्थः।

वस्तुतस्तु कारणत्व इत्यनन्तरं संभाव्यमाने सतीति पूरणीयम्। आनुभविकं चैतत्। कान्यथासिद्धिरित्यनन्तरं ग्रहीतव्येति पूरणीयम्। अत एव पञ्चमीति गृहाणेत्युत्तरम्। इदानीं सप्तम्यर्थस्य प्रयोज्यत्वस्य ग्रहीतव्येत्यत्र तव्यप्रत्ययप्रकृत्यर्थे ग्रहेऽन्वयः। तथा च शब्दाश्रयत्वावच्छिन्नत्वप्रकारकसंभावनाविषयीभूतकारणता-प्रयोज्यग्रहविषयीभूता अन्यथासिद्धिः केत्यर्थः।

अत्र चेदन्तार्थस्य तादृशवाक्यप्रतिपाद्यजिज्ञासायाः अध्याह्रियमाणे त्वमिति पदार्थे अन्वयः। पञ्चमीतीत्यत्र विषयित्वमिति शब्दार्थः। तथा चैतादृशवाक्यप्रति-पाद्यजिज्ञासाश्रयः त्वं पञ्चमान्यथासिद्धिविषयकज्ञानवान् भूयाः इति बोधः। एवं पञ्चमीति गृह्यतामिति यत्र श्रूयते तत्र तादृशवाक्यप्रतिपाद्यजिज्ञासाश्रयत्वत्समवेतः पञ्चमान्यथासिद्धिग्रहो भूयादित्यर्थः। जिज्ञासान्वितस्याप्यध्याहततृतीयान्तयुष्म-च्छब्दार्थस्य तृतीयार्थसमवेतत्वद्वारा ग्रहेऽन्वयात्।

यद्यपि, तथापिशब्दयोरर्थः[५६]

यद्यपिशब्दस्यानादरोऽर्थः। तथापिशब्दस्याबाध्यत्वमर्थः। उदाहरणम् — यद्यपि स्नेहत्वं नित्यवृत्तितया न कार्यतावच्छेदकम्, तथापि जन्यस्नेहत्वं तथा बोध्यम् — अत्र स्नेहत्वं नित्यवृत्तित्वप्रयोज्यकार्यतावच्छेदकभेदवत् इति बोधे यद्यपिशब्दार्थस्य अप्रयोजकत्वज्ञानरूपस्य अनादरस्य विषयतया, अप्रयोजकत्वरूपस्य वा स्वरूप-संबन्धेन भेदेऽन्वयः स्वीकर्तव्यः। अत्र शुद्धस्नेहत्वे कार्यतावच्छेदकभेदो हि जलत्वजात्यसिद्धिप्रयोजकतया उपन्यस्यते। स च न तथा भवितुमीष्टे। जन्यत्व-विशेषितस्नेहत्वस्य कार्यतावच्छेदकत्वमादाय जलत्वजातिसिद्ध्युपपादनसंभवादिति भावः। तदेवाह — तथापि जन्यस्नेहत्वं तथा बोध्यमिति। तथापीत्यस्य शुद्धस्नेहत्व-विशेष्यककार्यतावच्छेदकभेदप्रकारकज्ञानाप्रतिबध्यत्वमर्थः। तस्य तथा बोध्यमित्यत्र कार्यतावच्छेदकप्रकारकज्ञानेऽन्वयः। तथा चाप्रयोजकनित्यवृत्तित्वप्रयोज्यकार्य-तावच्छेदकभेदवत् स्नेहत्वमिति प्रथमवाक्यार्थः। स्नेहत्वविशेष्यककार्यतावच्छेदक-भेदप्रकारकज्ञानाप्रतिबध्यकार्यतावच्छेदकत्वप्रकारकज्ञानविषयीभूतं जन्यस्नेहत्व-मिति द्वितीयवाक्यार्थः। यत्र बोध्यमिति न श्रूयते, किं तु तथापि जन्यत्वं कार्य-तावच्छेदकमित्येव, तत्र निरुक्तज्ञानाप्रतिबध्यज्ञानविषयत्वपर्यन्तं तथाप्यर्थः। तस्य कार्यतावच्छेदकत्वेऽन्वयः।

---

[५६] त्रिंशच्छ्लोकी पृ. १५

यदि च-तदाशब्दयोरर्थः[५७]

यदिचेत्यस्य ईषदनिष्टत्वमर्थः। तदाशब्दस्य तज्जन्यवेदनमर्थः। उदाहरणम् — यदि च हस्तादौ शरीरव्यवहारो न भवति, तदा अन्त्यावयवित्वे सतीति अनेन विशेषणीयम् — अत्र नञ्समभिव्याहृतभूधातुना अभावोऽभिधीयते। आख्यातेन प्रतियोगित्वम्। ईषदनिष्टत्वं यदि चेत्यनेनोच्यते। तत्र बलवद्द्वेषाविषयत्वम्। तथा च बलवद्द्वेषाविषयहस्तादिनिष्ठाभावप्रतियोगित्वाश्रयः शरीरव्यवहार इति प्रथमवाक्यार्थः। द्वितीयवाक्यार्थे इतिशब्दानन्तरम् अनेनेति पूरणीयम्। तत्र यदि लक्षणे इति सप्तम्यन्तलक्षणपदमध्याह्रियते, तदा विपूर्वकशिष्धातूत्तरस्य भावकर्मणोः इत्यधिकारविहितस्य अनीयर्-प्रत्ययस्य साधुत्वार्थकत्वम्। विपूर्वकशिष्धातोः घटितत्वमर्थः। लक्षण इत्यत्र सप्तम्यर्थो निष्ठत्वम्। अन्त्यावयवित्वे सतीत्येकं पदम्। तादृशानुपूर्वीविशेषविशिष्टवाक्यपरम्। इतिशब्दार्थश्च प्रतिपाद्यत्वम्। अनेनेत्यत्रेदंशब्दार्थः धर्मः। तृतीयार्थो निरूपितत्वम्। तथा च सप्तम्यन्तपदसमभिव्याहृतान्त्यावयवित्वपदप्रतिपाद्यान्त्यावयवित्व-वैशिष्ट्यरूपो यो धर्मः तन्निरूपितघटितत्वं निरुक्तलक्षणनिष्ठमिति बोधः।

तदेत्यत्र तच्छब्देन शरीरव्यवहारनिष्ठहस्तनिष्ठाभावप्रतियोगित्वमुपस्थाप्यते। विशेषणानां लक्षणघटकत्वं विशेषणवाचकपदानां लक्षणघटकत्वं चातिव्याप्त्यात्यादिवारणप्रयोजनकत्वं तद्घटितस्यालक्ष्यसाधारणतामनध्यवसाय न व्यवस्यते। तच्चातिव्याप्तिनिरूपकाधिकरणे लक्ष्यतावच्छेदकशून्यत्वनिश्चये स्यादिति प्रकृते लक्ष्यतावच्छेदकीभूतशरीरव्यवहारविषयत्वस्य हस्तादिनिष्ठाभावप्रतियोत्वज्ञानं तद्घटकत्वज्ञानजनकमित्यादि।

यदितदाशब्दयोरर्थान्तरम्

क्वचित् प्रयोज्यत्वं तदेत्यत्र दाप्रत्ययार्थः। यदि चार्थस्तु पूर्ववत्। उदाहरणम् — यदि च पर्वते धूमोऽस्ति, तदा वह्निः पर्वतेऽस्तीति। तत्र तच्छब्देन धूमनिष्ठपर्वतवृत्तित्वमभिधीयते। दाल्-प्रत्ययेन प्रयोज्यत्वम्। अन्वयश्चास्य वृत्तित्वे। क्वचित् तुल्ययुक्तिकत्वं दाल्-प्रत्ययार्थः। यथा एकः पटत्वस्य जातित्वाभावं मनुते। अन्यस्तु घटत्वस्य। तत्र पटत्वजातित्ववादी अपरं प्रति प्रत्यवतिष्ठते — यदि घटत्वं जातिः तदा पटत्वमपि जातिः — इति। अत्रापि यदिचार्थः पूर्ववत्। बलवद्द्वेषाविषयत्वस्य तत्राप्यविशिष्टत्वात्। तदेत्यत्र तच्छब्दस्य घटत्वनिष्ठजातित्वमर्थः। तुल्ययुक्तिकत्वं दाल्-प्रत्ययार्थः जातित्वेऽन्वेति।

---

[५७] त्रिंशच्छ्लोकी पृ. १५

केचित्तु यदि चेत्यस्य संभावनार्थकतामाचक्षते यत्र तादृशार्थो वक्तुरपि संमतः। यथा — यदि च घटत्वं जातिः तदा पटत्वमपि जातिः इत्यत्रैव। तदर्थसंभावना च विषयतया जातित्वेऽन्वेति। क्वचित् तदाशब्दस्य हेतुत्वार्थकत्वमपि। हेतुत्वं हेतुतानिरूपकत्वं जन्यत्वम्। यदि च तत्र दण्डो वर्तते तदा घटोत्पत्तिरपीति। अत्र तत्पदस्य दण्डोऽर्थः। जन्यत्वं दाल्-प्रत्ययार्थः। तस्य घटेऽन्वयः।

यदिशब्दस्य आहार्यधीरर्थः

आहार्यज्ञानविषयत्वं यदिशब्दार्थः। यथा — यदि पर्वते वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्। अत्र वह्निशब्दार्थान्वितः नञर्थाभावः मुख्यविशेष्यः। पर्वतवृत्तित्वं तदंशे प्रकारः। अथ वा वह्निरेव मुख्यविशेष्यः। तदंशे पर्वतनिष्ठाभावप्रतियोगित्वं प्रकारः। नञ्समभिव्याहृतासधात्वर्थान्वितप्रतियोगित्वस्य तिङर्थत्वात्। आहार्यज्ञानविषयत्वं यदिशब्दार्थः। तच्च पर्वतविशेष्यकवह्निप्रकारकज्ञानोत्तरकालीलज्ञानविषयत्वम्। अन्वयश्चास्यासधात्वर्थे। लिङ्त्वेन रूपेण लिङर्थो न विवक्षितः। तथा च वह्न्यभावः पर्वतविशेष्यकवह्निप्रकारकज्ञानोत्तरकालीनज्ञानविषयपर्वतनिरूपितवृत्तित्वाश्रय इति, वह्निः तादृशज्ञानोत्तरकालीनज्ञानविषयपर्वतनिष्ठाभावप्रतियोगीति वा तदर्थः।

तर्हि धूमोऽपि न स्यादित्यत्र तर्हीत्यस्य वह्न्यभावविशेष्यकपर्वतवृत्तित्व-ज्ञानज्ञाप्यत्वं वह्निविशेष्यकपर्वतनिष्ठाभावप्रतियोगित्वज्ञानज्ञाप्यत्वं वा अर्थः। तस्यापि यथायोगमन्वयः। अत्र तु लिङ्त्वेन रूपेण आपत्तिरर्थः धात्वर्थेऽन्वेति। तथा च वह्न्यभावविशेष्यकपर्वतवृत्तित्वज्ञानज्ञाप्यं यत् पर्वतवृत्तित्वमापत्तिविषयीभूतं तदा-श्रयो धूमाभाव इति वह्निविशेष्यकपर्वतनिष्ठाभावप्रतियोगित्वज्ञानज्ञाप्यः यः पर्वत-निष्ठाभावः आपत्तिविषयः तत्प्रतियोगी धूम इति वा वाक्यार्थः।

आकारशब्दार्थः

भूतले घट इत्याकारकं ज्ञानमित्यत्र आकारशब्दार्थो विषयिता। सा च वारद्वयं प्रतीयते। घटपदार्थो घटत्वावच्छिन्नः इति शब्दार्थनिरूपितत्वद्वारा एकविषयि-तायामन्वेति। भूतल इत्यत्र सप्तम्यन्तार्थो भूतलवृत्तित्वमपि इतिशब्दार्थद्वारा अपरविषयितायामन्वेति। तयोरेकत्रापरस्यावच्छिन्नत्वसंबन्धेनान्वयः। तथा च भूतल-वृत्तित्वविषयित्वावच्छिन्नघटविषयित्ववत् ज्ञानमिति, घटविषयित्वावच्छिन्नभूतल-वृत्तित्वविषयित्ववत् ज्ञानमिति वा बोधः।

इत्यादौ। तत्र व्यपेक्षायां सत्यां यो यः संनिहितो योग्यश्च तेन तेन सम्बन्धोऽभ्युपेयते। यथा राज्ञः पुरुषोऽश्वश्च। राज्ञो देवदत्तस्य च पुरुष इति। एकार्थीभावस्तु राजपुरुष इत्यादिवृत्तावेव। स च प्रक्रियादशायां पृथगर्थकत्वेन प्रथमगृहीतस्य विशिष्टैकार्थत्वरूपः। अत एव राजपुरुष इत्यत्र राज्ञि ऋद्धस्येति विशेषणं नान्वेति। पदार्थैकदेशत्वात्। न चैवं देवदत्तस्य गुरुकुलम् इत्यादावनन्वयापत्तिः, तत्रापि देवदत्तोरषष्ठ्यर्थस्य गुरुणैकदेशेनान्वयादिति वाच्यम्। देवदत्तस्य प्रधानीभूतकुलेनैवान्वयात्। सम्बन्धस्तु उपस्थितगुरुद्वारक एव षष्ठ्यर्थः, न तु तदितरः।

उक्तं च वाक्यपदीये —

समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह।।

यद्वा ससम्बन्धिकपदार्थस्यैकदेशत्वेऽपि भवत्येव विशेषणान्वयः। उक्तं च तत्रैव —

सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत् सा व्यपेक्षा हि वृत्तावेव न हीयते।। इति।

नन्वेवं राज्ञोऽपि नित्यसापेक्षत्वादेकदेशत्वेऽपि ऋद्धस्येति विशेषणेनान्वयोऽस्तु। मैवम्। राज्ञ ईशितुः ईशितव्यसापेक्षत्वेऽपि ऋद्धं प्रत्यनाकाङ्क्षत्वात्।

ननु वाक्ये क्लृप्तावयवशक्त्यैवोपपत्तौ विशिष्टार्थविषयकशक्त्यन्तरमेव मास्तु। सत्यम्।

बहूनां वृत्तिधर्माणां वचनैरेव साधने।
स्यान्महत् गौरवं तस्मादेकार्थीभाव आस्थितः।।
चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितम्।।

तथाहि — धवरवदिराविति वृत्त्यैव क्रोडीकृतार्थत्वात् चकारो न प्रयुज्यते, तथा चित्रग्वादौ यत्पदम्। त्वया तु वचनं कर्तव्यम्। निरूढलक्षणा तु शक्तितो नातीव भिद्यते। किं च प्राप्तमुदकं यमिति व्यस्ते समीचीनमति विशेषणवत् समस्तेऽपि उदकविशेषणप्रयोगः प्राप्तः। स च "वृत्तस्य विशेषणयोगो न" इति वचनेनैव वारणीयः। नामार्थयोरभेदान्वयः, प्रत्ययार्थः प्रधानम् इति व्युत्पत्तिभङ्गश्च। उदककर्तृकप्राप्तिकर्मेत्याद्यर्थाभ्युपगमात् एकार्थीभावे तु लाघवमिति दिक्।

पदग्रहणं किमर्थम्। वर्णविधौ समर्थपरिभाषा माभूत्। तिष्ठतु दध्यानय तक्रम्, इह स्यादेव यण्। विधिग्रहणं तु पदस्य विधिः) पदयोर्विधिः पदानां विधिरिति

तावच्छेदकत्वसंभावनाप्रयोज्यत्वमन्वेति। तथा च कुलालपितृत्वनिष्ठं कुलालत्वमपेक्ष्य गौरवं कारणतावच्छेदकत्वसंभावनाप्रयोज्यसंभावनाविषयीभूतमित्यन्वयबोधः। युज्यते चैतत्। कुलालपितृत्वस्य प्रथमतः कारणतावच्छेदकत्वमसंभाव्य गौरवं न केनचित् उद्भावयितुं शक्यमिति।

अत्र कुलत्वमपेक्ष्येत्यत्र अपपूर्वकेक्षधात्वर्थः अवधित्वम् अवधिमत्वम् अवधितानिरूपकत्वम्। अवधित्वं चेदम् इदमस्माद् गुरु इति प्रतीतिसाक्षिकस्वरूपसंबन्धविशेषः। अथ वा अवधित्वं निरूपितत्वम्। तथा च कुलालत्वमपेक्ष्य कुलालपितृत्वस्य गौरवमित्यस्य कुलालत्वनिरूपितकुलालपितृत्वनिष्ठगौरवमित्यर्थः। प्रकृते गौरवमवच्छेदकगौरवम्। तच्चाधिकपदार्थघटितत्वम्। कुलालत्वघटकपदार्थपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणपदार्थघटितत्वमिति यावत्। तत्र कुलालत्वनिरूपितत्वमव्याहतमेव।

न च कुलालत्वघटकपदार्थाप्रसिद्धिः, तस्याखण्डपदार्थरूपत्वादिति वाच्यम्। स्वस्यैव स्वघटकत्वोपगमात् तत्पर्याप्तसंख्या एकत्वसंख्येति नानुपपत्तिः।

उदाहरणान्तरम् — कुलालत्वस्य कारणतावच्छेदकत्वमपेक्ष्य कुलालपितृत्वस्य कारणतावच्छेदकत्वे गौरवम् — इत्यत्र गौरवपदस्य स्वाश्रयघटकपदार्थपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणपदार्थघटितधर्मवृत्तित्वं कुलालपितृत्वनिष्ठकारणतावच्छेदकत्वनिष्ठम् इति बोधः।

एवं कुलालत्वमपेक्ष्य कुलालपितृत्वस्य कारणतावच्छेदकत्वं गुरु इत्यत्र कुलालत्वपदं कुलालत्वनिष्ठकारणतावच्छेदकत्वपरम्। तेन कुलालत्वनिष्ठकारणतावच्छेदकत्वाश्रयधर्मघटकपदार्थपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणपदार्थघटितधर्मवृत्तित्वाश्रयीभूतं कुलालपितृत्वनिष्ठकारणतावच्छेदकत्वमित्यन्वयबोधः।

कुलालपितृत्वमपेक्ष्य कुलालत्वस्य कारणतावच्छेदकत्वे लाघवमित्यत्र तु कुलालत्वनिष्ठं कुलालपितृत्वघटकपदार्थपर्याप्तसंख्यान्यूनसंख्यापर्याप्त्यधिकरणपदार्थघटितत्वं कुलालत्वविशेष्यककारणतावच्छेदकत्वप्रकारकसंभावनाप्रयोज्यसंभावनाविषयीभूतमित्यन्वयबोधः।

कुलालपितृत्वस्य कारणतावच्छेदकत्वमपेक्ष्य कुलालत्वस्य कारणतावच्छेदकत्वे लाघवम् इत्यत्र तु कुलालपितृत्वनिष्ठकारणतावच्छेदकत्वाश्रयधर्मघटकपदार्थपर्याप्तसंख्यान्यूनसंख्यापर्याप्त्यधिकरणपदार्थघटितधर्मवृत्तित्वं कुलालत्वनिष्ठकारणतावच्छेदकत्वनिष्ठमित्यन्वयबोधः।

यत्र तु अपक्षयेत्येव श्रूयते तत्रापेक्षाशब्दार्थो निरूपितत्वम्। तृतीयार्थो वैशिष्ट्यम्। अन्वयश्च पूर्ववत्।

एवं दण्डमपेक्ष्य दण्डरूपस्य कारणत्वे गौरवम् इत्यत्र दण्डनिष्ठकारणतावच्छेदक-संबन्धघटकपदार्थपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणपदार्थघटितसंबन्धावच्छिन्नत्वं दण्डरूपनिष्ठकारणत्वनिष्ठम् इत्यन्वयबोधः।

वर्जयित्वापदार्थः

वर्जयित्वेत्यत्र भेदो धात्वर्थः। आदिपदात् विहायेत्यादेः परिग्रहः। यथा-नित्यद्रव्याणि विहाय वृत्तिमत्वं साधर्म्यम् इति। अत्र पदार्थानाम् इत्यध्याहार्यम्। नित्यद्रव्याणीत्यत्र प्रतियोगितानिरूपकत्वं द्वितीयार्थः। विपूर्वकहाधात्वर्थो भेदः। ल्यबर्थश्चाविवक्षितः। अन्वयश्चास्य पदार्थे। तथा च नित्यद्रव्यप्रतियोगिकभेद-वत्पदार्थनिरूपितसाधर्म्यत्ववत् वृत्तिमत्वमित्यन्वयबोधः।

द्रव्याण्यपेक्ष्य पार्थिवानि न्यूनसंख्याकानि इति वाक्यार्थः

अत्र द्रव्यपदं द्रव्यत्वावच्छिन्नपर्यप्तसंख्यापरम्। निरूपितत्वमपेक्ष्यार्थः। तस्य न्यूनत्वेऽन्वयः। एवं —

पार्थिवान्यपेक्ष्य द्रव्याण्यधिकसंख्याकानि इति वाक्यार्थः

इत्यत्र पार्थिवपदं पार्थिवत्वावच्छिन्नपर्याप्तसंख्यापरम्। निरूपितत्वमपेक्ष्यार्थः। तस्याधिकत्वेऽन्वयः। एवं च द्रव्यत्वावच्छिन्नपर्याप्तसंख्यान्यूनसंख्याधिकसंख्या-पर्याप्त्यधिकरणानि पार्थिवानि पार्थिवत्त्वावच्छिन्नपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधि-करणानि द्रव्याणीति च क्रमशो बोधः।

तत्र न्यूनत्वं व्यप्यत्वम्। तच्च तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति तत्समानाधिकरणत्वम्। द्रव्यत्वावच्छिन्नपर्याप्तसंख्याधिकरणे जलादौ पार्थिवत्वाव-च्छिन्नपर्याप्तसंख्यावद्भेदस्य पृथिव्यां तत्समानाधिकरण्यस्य च सत्त्वान्नानुपपत्तिः।

एवमधिकत्वं व्यापकत्वम्। तच्च तत्समानाधिकरणान्योन्याभावप्रतियोगिता-निरूपितसमवायसंबन्धावच्छिन्नावच्छेदकताशून्यत्वे सति तन्निष्ठसमवायसंबंधाव-च्छिन्नप्रतियोगितावच्छेदकताकभेदसमानाधिकरणत्वम्। तादृशं च पार्थिवत्वाच्छिन्न-पर्याप्तसंख्याव्यापकत्वं द्रव्यत्वावच्छिन्नपर्याप्तसंख्यायामक्षतमिति केषांचिन्मतम्।

तन्न युक्तम्। यद्येवं न्यूनाधिकत्वे संख्यायां स्यातां तदा यत्र भूतले दश घटाः सन्ति पटाश्च षट्, तत्र एतान् घटानपेक्ष्य एते पटा न्यूनसंख्याका इति व्यवह्रियते, स व्यवहारो

नोपपद्येत। तावद्घटत्वावच्छिन्नपर्याप्तसंख्यायाः तावत्पटत्वावच्छन्नपर्याप्तसंख्यायाश्च परस्परसामानाधिकरण्याभावात्। एवमेतान् पटानपेक्ष्य एते घटा अधिकसंख्याका इति व्यवह्रियते। सोऽपि न स्यात्। तावद्घटत्वावच्छिन्नपर्याप्तसंख्यायाः तावत्पटत्वावच्छिन्नपर्याप्तसंख्यायाः तावत्पटत्वावच्छिन्नपर्याप्तसंख्याधिकरणपटवृत्तिभेदप्रतियोगितानिरूपितसमवायसंबन्धावच्छिन्नावच्छेदकतावत्वेन तच्छून्यत्वाभावात्।

तत्र मतान्तरम्

तद्रूपावच्छिन्नपर्याप्तसंख्यानिष्ठसंख्यात्वव्याप्यधर्मावच्छिन्नपर्याप्तिसंबन्धावच्छिन्नव्यापकतानिरूपितपर्याप्तिसंबन्धावच्छिन्नव्याप्यतावच्छेदकधर्मवत्वं संख्यानिष्ठं न्यूनत्वम्। तद्रूपावच्छिन्नपर्याप्तसंख्यानिष्ठसंख्यात्वव्याप्यधर्मावच्छिन्नव्याप्यतानिरूपितपर्याप्तिसंबन्धावच्छिन्नव्यापकतावच्छेदकधर्मवत्त्वं संख्यानिष्ठमधिकत्वम्।

तथा च द्रव्याण्यपेक्ष्य पार्थिवानि न्यूनसंख्याकानि इत्यत्र द्रव्यत्वावच्छिन्नपर्याप्तसंख्यानिष्ठसंख्यात्वव्याप्यधर्मावच्छिन्नपर्याप्तिसंबन्धावच्छिन्नव्यापकतानिरूपितपर्याप्तिसंबन्धावच्छिन्नव्याप्यतावच्छेदकसंख्यात्वव्याप्यधर्मावच्छिन्नसंख्यापर्याप्त्यधिकरणानिपार्थिवानि इत्यन्वयबोधः।

पार्थिवान्यपेक्ष्य द्रव्याण्यधिकसंख्याकानि इत्यत्र तु पार्थिवत्वावच्छिन्नपर्याप्तसंख्यानिष्ठसंख्यात्वव्याप्यधर्मावच्छिन्नपर्याप्तिसंबन्धावच्छिन्नव्याप्यतानिरूपितपर्याप्तिसंबन्धावच्छिन्नव्यापकतावच्छेदकसंख्यात्वव्याप्यधर्मावच्छिन्नसंख्यापर्याप्त्यधिकरणानिद्रव्याणि इत्यन्वयबोधः।

एवं च यत्र भूतले दश घटाः सन्ति पटाश्च षट् तत्र एतान् घटानपेक्ष्य एते पटा न्यूनसंख्याकाः, एतान् पटान् अपेक्ष्य एते घटा अधिकसंख्याकाः इति व्यवहारश्चोपपद्यते। एवं तद्धर्मावच्छिन्नपर्याप्तसंख्यानिष्ठसंख्यात्वव्याप्यधर्मावच्छिन्नपर्याप्तिसंबन्धावच्छिन्नव्यापकतानिरूपितपर्याप्तिसंबन्धावच्छिन्नव्याप्यतावच्छेदकत्वं नाम तद्धर्मावच्छिन्नपर्याप्तसंख्यापर्याप्त्यवच्छेदकधर्मसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको यो धर्मः तदवच्छिन्नपर्याप्तसंख्यापर्याप्त्यवच्छेदकधर्माधिकरणमात्रवृत्तिः, तदवच्छिन्नपर्याप्तिनिरूपकतावच्छेदकत्वम्। तावद्घटत्वावच्छिन्नपर्याप्ता या दशत्वसंख्या तत्पर्याप्त्यवच्छेदकीभूतो यः तावद्घटान्यतमत्वरूपो धर्मः तदवच्छिन्नपर्याप्तिनिरूपकतावच्छेदकः षट्त्वरूपसंख्यात्वव्याप्यधर्मः तदवच्छिन्नसंख्यापर्याप्त्यधिकरणत्वं षण्णां घटानामस्तीति नैतान् घटानपेक्ष्य एते पटा न्यूनसंख्याका इति प्रयोगानुपपत्तिः।

एवं तद्धर्मावच्छिन्नपर्याप्तसंख्यानिष्ठसंख्यात्वव्याप्यधर्मावच्छिन्नपर्याप्तिसंबन्धावच्छिन्नव्याप्यतानिरूपितपर्याप्तिसंबन्धावच्छिन्नव्यापकतावच्छेदकत्वं नाम तद्धर्मावच्छिन्नपर्याप्तसंख्यापर्याप्त्यवच्छेदकधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावसमानाधिकरणो यः तद्धर्मावच्छिन्नपर्याप्तसंख्यापर्याप्त्यवच्छेदकधर्मसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकः तदच्छिन्नपर्याप्तिनिरूपकतावच्छेदकत्वम्। षट्पटनिष्ठा या षट्त्वसंख्या तत्पर्याप्त्यवच्छेदकीभूतो यः षट्पटान्यतमत्वरूपो धर्मः तदवच्छिन्नप्रतियोगिताकान्योन्याभावसमानाधिकरणतद्धर्मसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकश्च तावत्पटेतरचतुर्व्यक्तितदन्यतमत्वरूपो धर्मः तदवच्छिन्नपर्याप्तिनिरूपकतावच्छेदकीभूतो यो दशत्वरूपसंख्यात्वव्याप्यधर्मः तदवच्छिन्नसंख्यापर्याप्त्यधिकरणत्वस्य दशघटेषु विद्यमानत्वात् नैतान् पटानपेक्ष्य एते घटा अधिकसंख्याका इति प्रयोगानुपपत्तिरिति सर्वं समञ्जसम्।

यद्वा-अथवापदयोरर्थः

यद्वा अथवा इतिपदयोः वैलक्षण्यमर्थः। वैलक्षण्यं द्विविधं भेदः विरुद्धत्वं चेति। तत्र भेदः उक्तपदयोरर्थः। तथा हि — चेष्टाधिकरणत्वं शरीरलक्षणम्। अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्वं तदिति। अत्राथवाशब्दस्य पूर्वोक्तचेष्टाधिकरणत्वलक्षणाभिन्नत्वमर्थः। तस्य तत्पदार्थेऽन्वयः।

परं तु, अपि तु, किं तु, इत्येतेषामर्थः

एतेषां विरुद्धत्वरूपं वैलक्षण्यमर्थः। यथा — न हि दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे। परं तु महत्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वं तदभावे चादृश्यत्वमिति।

अत्र परं तुशब्देन पूर्वोक्तिवैलक्षण्यमुत्तरोक्तौ प्रतीयते। तच्च तद्विरुद्धार्थकत्वम्।

विकल्पोत्तरसप्तम्यर्थः

विरोधिज्ञानविषयत्वं विकल्पोत्तरसप्तम्यर्थः। उदाहरणम् — तस्य नित्यत्वे घटानयनान्तरमपि भूतले घटाभावबुद्धिप्रसङ्गात् इति। अत्र तत्पदमभाववैशिष्ट्यपरम्। विशेष्यत्वं षष्ठ्यर्थः। नित्यत्वपदं नित्यत्वज्ञानपरम्। विरोधिज्ञानविषयत्वं सप्तम्यर्थः। घटानयनानन्तरमपीति अपिशब्दस्वारस्यात्। स्वाव्यवहितोत्तरघटाभावोत्तरकालीनत्वं सूच्यते। तथा चाभाववैशिष्ट्यविशेष्यकनित्यत्वप्रकारकज्ञानविरोधिज्ञानविषयः यो घटानयनोत्तरकालीनघटाभावबुद्धिप्रसङ्गः तस्मादित्यर्थः।

अत्रैव मतान्तरम्

ज्ञानज्ञाप्यत्वं विकल्पोत्तरसप्तम्यर्थ इति केचित्। उदाहरणं पूर्वोक्तमेव। तस्येत्यत्र षष्ठ्यर्थो विशेष्यत्वम्। नित्यत्वपदं नित्यत्वज्ञानपरम्। ज्ञाप्यत्वं सप्तम्यर्थः। तस्य प्रसङ्गेऽन्वयः। ज्ञानं च संभावनात्मकं बोध्यम्। ज्ञायते हि तस्य नित्यत्वं संभावयतः यथोक्तातिप्रसङ्ग इति।

विकल्पोत्तरसप्तम्याः समानयुक्तिकत्वार्थकत्वम्

क्वचित् विकल्पोत्तरसप्तम्याः समानयुक्तिकत्वमर्थः। यथा — समवायस्यातिरिक्तत्वे वैशिष्ट्यं संबन्धान्तरं सिध्येत् इति। अत्र समवायस्येत्यत्र षष्ठ्यर्थः विशेष्यत्वम्। अतिरिक्तत्वपदमतिरिक्तत्वसिद्धिपरम्। समानयुक्तिकत्वं सप्तम्यर्थः। तच्च स्वजनकसमानजनककत्वम्। स्वं समवायातिरिक्तत्वसिद्धिः। तज्जनकं यल्लाघवज्ञानं तत्समानजनककत्वं संबन्धान्तरत्वप्रकारकसिद्धेरिति। अत्रापि लाघवज्ञानसंभवादित्यर्थः।

एवकारार्थः

अयोगव्यवच्छेदः अत्यन्तायोगव्यवच्छेदः अन्ययोगव्यवच्छेदश्च एवकारार्थः।

अयोगः उद्देश्यतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वम्। तस्य व्यवच्छेदः अभावः। उद्देश्यतावच्छेदकव्यापकत्वमयोगव्यवच्छेद इति यावत्। यथा अयं शङ्खः पाण्डुर एवेति विशेषणसंगतेन एवकारेण शङ्खत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वाभावः पाण्डुरत्वे बोध्यते।

क्वचित् एवकारः अत्यन्तायोगव्यवच्छेदं बोधयति। अत्यन्तः उद्देश्यतावच्छेदकव्यापको योऽयोगः अभावः तद्व्यवच्छेदः तत्प्रतियोगित्वम्। यथा सरोजं नीलं भवत्येवेत्यत्र क्रियासंगतैवकारस्थले सरोजत्वव्यापकात्यन्ताभावाभावप्रतियोगित्वं नीलभवनरूपधात्वर्थे प्रतीयते।

क्वचित् एवकारः अन्ययोगव्यवच्छेदं बोधयति। यथा पार्थ एव धनुर्धर इत्यादौ विशेष्यसंगतैवकारस्थले पार्थान्यतादात्म्याभावः धनुर्धरे बोध्यत इति।

गुणादिषु एकादिशब्दार्थः

गुणादौ अयमेकः इत्यादिशब्दः प्रयुज्यते। तत्र एकशब्दस्य कोऽर्थः। न तावदेकत्वसंख्याविशिष्टः। गुणे गुणानङ्गीकारात्। तत्रान्नंभट्टेन आश्रयद्रव्यगतमेकत्वं

सामानाधिकरण्यसंबन्धेन भासत इत्युक्तम्। तथापि रूपत्वमेकमिति प्रतीतिनिर्वाहाय तत्र स्वाश्रयसामानाधिकरण्यसंबन्धेन एकत्वं भासत इति ऐकरूप्यभङ्गः। अपि च रूपमेकं न वेति संशयनिवर्तकत्वं रूपमेकमिति ज्ञानस्य वक्तव्यम्। तच्च साक्षात्संबन्धेनैकत्वाभाव एव युज्यते। साक्षादेकत्वं तु गुणे गुणानङ्गीकारात् न संभवति। अतोऽत्र त्रिंशच्छ्लोकीकारा एवं निर्वहन्ति —

गुणादिनिष्ठं यदेकत्वं तत् तत्तद्व्यक्तित्वरूपम्। द्वित्वत्रित्वादिकं तु — यादृश-व्यक्तीनां द्वित्वादिकं वक्तव्यं तत्तद्व्यक्तिवृत्तित्वविशिष्टतावदन्यतरत्वादिरूपम्। अयं भावः — यत्र रूपरसौ द्वाविति प्रयुज्यते तत्र एतद्रूपरसवृत्तित्वविशिष्ट-एतद्रूपरसान्यतरत्वावच्छिन्नत्वं द्वित्वमिति, यत्र एतद्रूपरसस्पर्शाः त्रय इति प्रयुज्यते तत्र एतद्रूपरसस्पर्शवृत्तित्वविशिष्टतावदन्यतमत्वावच्छिन्नत्वं त्रित्वम् — इति रीत्या ऊह्यमिति।

इति निपातार्थविचारः

समासार्थविचारः

समासलक्षणम्

शब्दशक्तिप्रकाशिकानुसारं समासलक्षणम्

यादृशस्य महावाक्यस्यान्तस्त्वादिर्निजार्थके।
यादृशार्थस्य धीहेतुः स समासस्तदर्थकः।।[१]

अन्तःशब्दोऽव्यवहितोत्तरार्थकः। त्वादीत्यादिना तलादिपरिग्रहः। निजार्थके = स्वार्थे। यादृशमहावाक्योत्तरः त्वतलादिः स्वार्थनिष्ठयादृशार्थावच्छिन्नविषयताशालिबोधे हेतुः तादृशं तद्वाक्यं तथाविधार्थे समासः। स्वार्थनिष्ठेति विषयतायामन्वेति। यादृशार्थावच्छिन्नत्वं यादृशार्थनिष्ठप्रकारतानिरूपकत्वम्। तथा चाव्यवहितोत्तरत्वसम्बन्धावच्छिन्नयादृशानुपूर्व्यवच्छिन्नप्रकारकत्वतलादिविशेष्यकं ज्ञानं यादृशार्थनिष्ठप्रकारताकत्वतलाद्यर्थविशेष्यकान्वयबोधजनकं महावाक्यघटकतादृशानुपूर्वीविशिष्टशब्दत्वं तादृशार्थे समासत्वमिति फलितम्।

नीलोत्पलत्वमित्यादौ त्वप्रत्ययार्थविशेष्यकनीलोत्पलप्रकारकान्वयबोधे नीलोत्पलादिशब्दोत्तरत्वप्रत्ययनिश्चयत्वेन हेतुत्वात् नीलोत्पलादिभागस्य नीलाभिन्नोत्पलाद्यर्थे समासत्वम्।

महावाक्यघटकेत्यनिवेशे समासलक्षणस्य पाचकादिपदेऽतिव्याप्तिः। पाचकत्वमित्यादौ त्वप्रत्ययार्थविशेष्यकपाककर्तृप्रकारकान्वयबोधे पाचकशब्दोत्तरत्वप्रत्ययनिश्चयस्य हेतुत्वात्। तन्निवेशे तु पाचकशब्दः न महावाक्यमिति नातिव्याप्तिः। यादृशानुपूर्वीविशेषः स्वघटकानेकनामलभ्ययादृशविशिष्टार्थबोधजनकतावच्छेदकस्तादृशानुपूर्वीमच्छब्दत्वं तादृशार्थे महावाक्यत्वम्। पाचकशब्दस्य स्वघटकानेकनामलभ्यविशिष्टार्थबोधजनकत्वविरहान्न महावाक्यत्वम्।

अथवा प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थान्वयबोधं प्रत्ययोग्यत्वं प्रकृते वाक्यस्य महत्त्वम्। तथा च यादृशानुपूर्वीविशेषः स्वार्थधर्मिकस्वप्रकृत्यर्थमात्रप्रकारकान्वयबोधजनकतानवच्छेदकः तादृशानुपूर्वीमत्त्वं महत्त्वम्। तेन (नामाद्यघटितद्वितीयकल्पानुसरणेन) उपकुम्भमित्यादौ नाव्याप्तिः। अन्यथा निपातस्य नामत्वाभावेन अनेकनामलभ्यविशिष्टार्थकत्वविरहादव्याप्तिः स्यादिति। न वा नीलघटत्व-

---

[१] श.श.प्र. पृ. १८९

मित्यादौ नीलघटत्वादिभागेऽतिव्याप्तिः। अन्यथा अनेकनामपदलभ्यार्थकत्वादतिव्याप्तिः स्यात्। एतत्कल्पे तु भावप्रत्ययार्थधर्मिकनीलघटमात्रप्रकारकान्वयबोधस्वरूपयोग्यतया नातिव्याप्तिः।

क्षीरपायीत्यादिकस्तु प्रकृत्यर्थावच्छिन्नकृदर्थान्वयबोधसमर्थोऽपि न प्रकृत्यर्थपानमात्रावच्छिन्नप्रत्ययार्थान्वयबोधसमर्थः, क्षीरकर्मकत्वविशिष्टपानावच्छिन्नप्रत्ययार्थन्वयबोधसमर्थत्वात्। अतः क्षीरपायीत्यस्य न समासत्वम्।

ननु राज्ञः पुरुषत्वमित्यत्र राज्ञः पुरुष इति भागे समासलक्षणस्यातिव्याप्तिः। तस्य निरुक्तमहावाक्यत्वात्। तदुत्तरत्वादिप्रत्ययार्थधर्मिकस्वार्थप्रकारकबोधजनकत्वाच्चेति चेन्न। राज्ञः पुरुषत्वमित्यतो हि राजन्येव पुरुषत्वं प्रतीयते, न तु राजसम्बन्धिपुरुषे। तद्धितानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्। अतो राज्ञः पुरुषेति भागे नातिव्याप्तिः। त्वतलादीति विशिष्य निवेशात् पायं पायमित्यादिणमुलन्ते नातिव्याप्तिः। णमुलन्तभागो हि स्वार्थपौनःपुन्यावच्छिन्नकृत्यादिरूपार्थान्तरस्यैवान्वयबोधजनकः, न तु स्वार्थविशेष्यकान्वयबोधजनक इति नातिव्याप्तिः।

न चैवमपि प्रपूर्वस्य स्थाधातोः निरुक्तमहावाक्यत्वाभावात् प्रस्थायेत्यादौ ल्यप् न स्यात् "समासेऽनञ्पूर्वे क्त्वो ल्यप्"[२] इति सूत्रेण समास एव क्त्वास्थाने ल्यप्विधानात् इति वाच्यम्। तत्र समासव्यपदेशस्य गौणत्वात्।

समासलक्षणम् (व्याकरणग्रन्थेषु)

"प्राक् कडारात् समासः"[३] इति सूत्रव्याख्यायां तत्त्वबोधिन्यां — "समसनं समासः। भावे घञ्। अनेकस्य पदस्य एकपदीभवनमित्यर्थ इत्येके। वस्तुतस्तु "अकर्तरि च कारके"[४] इति कर्मणि घञ्। अन्यथा सुबन्तं समस्यत इत्युत्तरग्रन्थो न संगच्छते।

अयं च समासः पदसम्बन्धी विधिरिति कृत्वा सामर्थ्ये सत्येव भवतीति "समर्थः पदविधिः"[५] इति सूत्रादवगम्यते। तत्र किं नाम सामर्थ्यमिति जिज्ञासायां तत्त्वबोधिनीकार आह —

सामर्थ्यं च द्विविधम् व्यपेक्षालक्षणमेकार्थीभावलक्षणं चेति। स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशात् यः परस्परसम्बन्धः सा व्यपेक्षा। सैव वाक्ये राज्ञः पुरुष

---

[२] पा.सू. ७.१.३७
[३] पा.सू. २.१.३
[४] पा.सू. ३.३.१९
[५] पा.सू. २.१.१

ददात्यर्थः

घटकत्वं घटकत्वप्रकारकज्ञानविषयत्वं वा ददात्यर्थः। यथा — तदा अन्त्यावयवित्वे सतीति विशेषणं शरीरलक्षणे देयमिति। शरीरलक्षणनिरूपितघटकत्वाश्रयीभूतमिति तन्निरूपितघटकत्वप्रकारकज्ञानविषयीभूतमिति वा बोधः।

मध्येशब्दार्थः

निर्धारणविभक्त्या योऽर्थः प्रतिपाद्यते स एव मध्येशब्देनापि प्रतिपाद्यते। निर्धारणविभक्त्यर्थः सुबर्थविचारे प्रतिपादितोऽपि प्रकृते किंचित् प्रतिपाद्यते। तत्र निर्धारणविभक्तिः पुरुषाणां विष्णुरुत्तमः इत्यत्र। पुरुषाणामित्यत्र षष्ठ्यर्थो भेदोऽभेदश्च। तत्र पुरुषपदार्थस्याभेदे निरूपितत्वसंबन्धेन अन्वयः। अभेदस्य चानुयोगितासंबन्धेन विष्णुपदार्थे उद्देश्यतावच्छेदकघटकतया अन्वयः। विष्णोः प्रतियोगितया पुरुषाणामित्यत्र षष्ठ्यर्थभेदे अन्वयः। तस्य चानुयोगितया पुरुषेऽन्वयः। पुरुषस्य च पुनर्भेदे प्रतियोगितासंबन्धेनान्वयः। तस्य चानुयोगितासंबन्धेनोत्तमपदार्थे अन्वयः। तस्य चाभेदसंबन्धेन विष्णुपदार्थेऽन्वयः। तथा च पुरुषाभिन्नो विष्णुः विष्ण्वन्यपुरुषान्योत्तमाभिन्न इति बोधः। अत्राभेदमात्रस्य निर्धारणविभक्त्यर्थत्वे विष्ण्वन्यपुरुषोत्तमस्य सत्त्वेऽपि पुरुषाणां विष्णुरुत्तमः इति वाक्यस्य प्रामाण्यापत्तिः। पुरुषाभिन्ने विष्णौ उत्तमाभेदसत्त्वात्। अतो भेदार्थकत्वं स्वीकृतम्।

एवं च निर्धारणविभक्तेः भेदोऽभेदश्चार्थ इति स्थिते यत्र पुरुषाणां मध्ये विष्णुरुत्तमः इति प्रयुज्यते तत्र मध्येशब्दस्यैव भेदोऽभेदश्चार्थः। अन्वयस्तु पूर्ववत्।

अपेक्ष्यशब्दार्थः

अवधित्वं तद्धीविषयता वा अपेक्ष्यशब्दार्थः। उदाहरणम् — कुलालत्वमपेक्ष्य कुलालपितृत्वस्य कारणतावच्छेदकत्वे गौरवम् — इति।

अत्र कारणतावच्छेदकत्वपदं कारणतावच्छेदकत्वप्रकारकज्ञानपरम्। विरोधिज्ञानविषयत्वं सप्तम्यर्थः। अन्वयश्चास्य गौरवे। तथा च कुलालपितृत्वनिष्ठं कुलालत्वावधिकं गौरवं कुलालपितृत्वविशेष्यककारणातावच्छेदकत्वप्रकारकग्रहविरोधिग्रहविषयीभूतमित्यन्वयबोधः। अथ वा कारणतावच्छेदकत्वे इत्यस्यानन्तरं संभाव्यमाने सतीति पूरणीयम्। सतिसप्तम्याः प्रयोज्यत्वमर्थः। संभाव्यमानाभिन्नकारणतावच्छेदकत्वप्रयोज्यत्वं कारणतावच्छेदकत्वसंभावनाप्रयोज्यत्व एव पर्यवस्यति। यद्वा कारणतावच्छेदकत्वपदं कारणतावच्छेदकत्वसंभावनापरम्। प्रयोज्यत्वं सप्तम्यर्थः। गौरवमित्यनन्तरं संभाव्यत इति पूरणीयम्। तत्र संभावनायां कारण-

अनेकविभक्त्यन्तसमासलाभार्थम्। पदस्येत्युक्तौ तु "उपपदमतिङ्"[६] इत्यादावेवास्योपस्थितिः स्यादित्याहुः। पदसम्बन्धी विधिः समर्थाश्रितः इति सूत्रार्थः। समर्थाश्रित इत्यनुपादाने "पश्यति कृष्णं श्रितो देवदत्तम्" इत्यादौ कृष्णाश्रित इति समासः स्यात्।

एकार्थीभावविषये मणिकारमतम्[७]

शक्तिवादे लक्षणा तु पदवृत्तिः न तु वाक्यवृत्तिः वृत्तित्वात् शक्तिवत् इति निरूपितम्। तदुपरि समासवादे एवं विचारः प्रवर्तितः —

ननु बहुव्रीहौ चित्रगुमानयेत्यत्र अन्यपदार्थस्य = समस्यमानपदातिरिक्तपदार्थस्य चित्रगोस्वामिनः सम्बन्धित्वेन प्रतीतेः वाक्य एवान्यपदार्थे लक्षणा। न च तत्र चित्रापदं चित्रगोस्वामिलक्षकम्। तत्र गोपदार्थानन्वयप्रसङ्गात्। नापि गोपदं लक्षकम्। गोस्वामिनि चित्रापदार्थानन्वयापत्तेः। न च गव्यन्वयः। एकदेशान्वयस्याव्युत्पन्नत्वात्। तस्मात् वाक्यार्थभूता या चित्राभिन्ना गौः तत्सम्बन्धितया पुरुषस्य प्रतीतेः बहुव्रीहौ वाक्य एव लक्षणेति चेत् —

न। वाक्ये शक्त्यभावेन शक्यार्थाभावात् शक्यार्थसम्बन्धरूपायाः लक्षणायाः असम्भवात्। तत्रापि पदलक्षणयैव उपपत्तेश्च। तथा हि — चित्रपदार्थगोपदार्थयोरभेदेनान्वयबोधानन्तरं गोपदं लक्षणया चित्रगोस्वामिबोधकम्, स्वज्ञाप्यचित्रगोसम्बन्धेन तत्स्वामिस्मारकत्वात्। चित्रापदं गवान्वितस्वार्थबोधकतया मुख्यार्थमेव।

न च चित्रपदगोपदयोः विभिन्नान्वयबुद्धिजनकत्वे वाक्यभेदापत्तिरिति वाच्यम्। तात्पर्यविषयीभूतैकान्वयबुद्धिप्रयोजकत्वेन वाक्यभेदाभावात्। एकान्वयबुद्ध्यप्रयोजकत्वस्यैव भिन्नवाक्यतारूपत्वात्।

न चैवमेकगोपदस्यैव अन्यपदार्थे वृत्तौ समासो न स्यात्। "अनेकमन्यपदार्थे"[८] इति सूत्रेण अनेकस्यान्यपदार्थे वर्तमानस्य समासानुशासनात् इति वाच्यम्। चित्रापदस्यापि परंपरया अन्यपदार्थबोधकत्वात्।

यद्वा चित्रापदं चित्रगोसम्बन्धित्वेन चित्रगोसम्बन्धिनं गोपदं च पुरुषत्वेन पुरुषं लक्षयतीति पदद्वय एव लक्षणा। अन्वयधीरपि चित्रगोसम्बन्ध्यभिन्नं पुरुषमानयेत्याकारा।

---

[६] पा.सू. २.१.१९
[७] त.चि. पृ. ७२६
[८] पा.सू. २.२.२४

न च चित्रपदस्य चित्रगोस्वामिनि स्वशक्यसम्बन्धाभावात् कुतो लक्षणेति वाच्यम्। चित्रपदशक्यस्य चित्ररूपस्य स्वाश्रयस्वामित्वलक्षणपरम्परासम्बन्धेन चित्रगोस्वामि-सम्बन्धात्।

न चैवमेकपदे लक्षणायामितरपदवैयर्थ्यमिति वाच्यम्। इतरपदमहिम्नैव चित्र-गोस्वामित्वादिरूपविशेषस्य लक्षणीयत्वात्। तथा च तात्पर्यग्राहकतया इतरपद-सार्थक्यम्।

न चैवं वाक्यार्थबोधकपदद्वयलक्षणायां वाक्यलक्षणैवेति वाच्यम्। पदवाक्य-योर्भिन्नत्वात्।

यत्तु चित्रापदेन गोपदसन्निधानात् स्वार्थसम्बन्धिनी गौः लक्ष्यते। चित्रगवा च स्वामी लक्ष्यत इति लक्षितलक्षणया अन्यपदार्थधीरिति। तन्न। एकपदलक्षणातो लक्षित-लक्षणायाः जघन्यत्वात्।

ननु भूवादयो धातवो भवन्ति, चैत्रादीन् भोजय इत्यत्र तद्गुणसंविज्ञानबहुव्रीहौ लक्षणया आदिपदोपस्थापितस्यान्यपदार्थस्यैव क्रियान्वयसम्भवात् कथं भूचैत्रादेरपि क्रियान्वयः, न हि चित्रगुमानयेत्यत्र चित्रेण क्रियान्वय इति चेत् —

न। तद्गुणसंविज्ञानबहुव्रीहौ विशेषणस्य पूर्वपदार्थस्यापि क्रियायामन्वयात्। ततश्च भूवादय इत्यत्र आदिपदस्य क्रियावाचकत्वेन रूपेण भूप्रभृतिषु अजहल्लक्षणा। चैत्रादीन् भोजयेत्यत्र आदिपदस्य चैत्रविषयकबुद्धिविशेषविषयत्वेन रूपेण लक्षणा। लम्बकर्णमानयेत्यत्र लम्बकर्णावयविनोः यः सम्बन्धः तन्निरूपकत्वेन रूपेण अजहत्स्वार्था लक्षणा इति सम्प्रदायः।

समासे एकार्थीभावविषये न्यायकौस्तुभगताः विशेषाः

वैयाकरणमतानुवादः[९]

"समर्थः पदविधिः" इति सूत्रेण एकार्थीभावरूपसामर्थ्ये सति समासविधानेन राजपुरुषादिसमुदायस्य राजकीयपुरुषादौ शक्तिरावश्यकीति समासशक्तिवादिनः शाब्दिकाः। एकार्थीभावो नाम विशिष्टैकार्थबोधकत्वम्।सामर्थ्यं द्विविधं व्यपेक्षा एकार्थीभावश्चेति। आकाङ्क्षावशात् पदानां परस्परान्वितबोधकत्वं व्यपेक्षा। सा राज्ञः पुरुषः इत्यादिवाक्ये। शक्त्या विशिष्टार्थबोधकत्वम् एकार्थीभावः। स च समासादिविधिषु।

---

[९] न्या.कौ. पृ. ६६१

तत्खण्डनम्

तदसत् — तेन सूत्रेण आकाङ्क्षादिवशात् परस्परान्वयबोधकत्वात्मक-व्यपेक्षारूपसामर्थ्ये एव समासविधानेन समुदायशक्तौ मानाभावात्।

नव्यवैयाकरणमतानुवादः

अत्र नव्यवैयाकरणमतानुवादः — समासे एकार्थीभावरूपसामर्थ्यानङ्गीकारे राजपुरुष इत्यादिसमासैकदेशराजादिपदार्थे विशेषणान्वयो दुर्वारः। तथाच सुन्दरस्य राज्ञः पुरुष इत्यर्थे सुन्दरस्य राजपुरुष इति प्रयोगप्रसङ्गः। तथाहि — राजपदोपस्थापितो राजा स्वस्वामिभावरूपेण भेदसंबन्धेन पुरुषे अन्वेति। निपातस्येव समासावयवस्यार्थो भेदेन प्रातिपदिकार्थेनान्वेति, व्युत्पत्तिवैचित्र्यात्। यद्वा लुप्तषष्ठीजन्यपदार्थोपस्थितिसहकारेण विग्रहवाक्यादिव समासादपि राजनिरूपितस्वत्ववान् पुरुषः इत्याकारकः स्वत्वप्रकारको बोध इति हि व्यपेक्षावादिनां मतम्। तथाच विग्रहे लुप्तविभक्तिकदध्यादिपदार्थस्य दध्यादेरिव समासघटकराजादिपदार्थस्यापि विशेषणयोगो दुरुद्धरः।

एवं समासस्य शक्तिमत्त्वाभावे अर्थवत्त्वाभावात् प्रातिपदिकसंज्ञायाः अनुपपत्तिः। चित्रगुः इत्यादौ पूर्वपदे उत्तरपदे पदद्वये वा लक्षणया विवक्षितबोधासंभवः। तथाहि — न तावत् गोपदस्य गोस्वामिनि लक्षणया तत्संभवः। पदार्थैकदेशे गवि चित्रादेः अनन्वयप्रसङ्गात्। नापि गोपदस्यैव चित्राभिन्नगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकमिति युक्तम्। चित्रपदार्थगोपदार्थयोरन्वयाभावेन तत्पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वलक्षणैकवाक्यतात्मकव्यपेक्षासामर्थ्यस्य चित्रगोपदयोरभावात् समासानुपपत्तेः। नापि चित्रापदगोपदयोरुभयोरपि चित्राभिन्नगोस्वामिनि लक्षणा। बहुव्रीहौ एकशेषद्वन्द्वान्यतरप्रसङ्गात्।

यदि च क्वचिदेकदेशान्वयस्यापीष्टतया गोसंबन्धिलाक्षणिकगोपदार्थैकदेशगवि चित्रापदार्थान्वयो नानुपपन्नः। भिन्नाभ्यां प्रातिपदिकाभ्यामुपस्थितयोरेव न भेदान्वयः। एकप्रातिपदिकोपस्थापितयोस्तु भवत्येवेति गोपदलक्ष्ये स्वामिनि गोपदशक्यस्य भेदेनान्वयबोधोपगमेपि क्षतिविरहादिति विभाव्यते;

तथापि अषष्ठ्यर्थबहुव्रीहौ प्राप्तेदको ग्राम इत्यादौ व्यपेक्षारूपसामर्थ्योपगमे कथमपि नाभिमतार्थबोधनिर्वाहः। तथाहि — प्राप्नोतेः उत्तरदेशसंयोगावच्छिन्ना क्रिया क्तप्रत्ययस्य कर्ता अर्थः। तेन प्राप्तिकर्तृ प्राप्तपदार्थः। उदकपदं च व्यपेक्षावादित्वमते जलसंबन्धिनि लाक्षणिकम्। तदेकदेशे जले प्राप्तस्य तादात्म्येनान्वयः। न ह्येतावतापि उदककर्तृकप्राप्तिकर्म ग्राम इत्यन्वयबोधनिर्वाहः। अभिमतश्च तादृश एवान्वयबोधः।

तस्मात् व्यपेक्षारूपसामर्थ्योपगमेनानिर्वाहात् एकार्थीभावरूपसामर्थ्यमङ्गीकरणीयम्। तच्च समुदायशक्तिं विना न निर्वहति इति समासे शक्तिसिद्धिरिति।

उक्तवैयाकरणमतदूषणम्

यदुक्तं एकार्थीभावानङ्गीकारे सुन्दरस्य राजपुरुष इति प्रयोगापत्तिरिति तन्न। "सविशेषणानां वृत्तिर्न, वृत्तस्य व विशेषणयोगो न" इति वार्तिकेन तादृश-प्रयोगवारणसंभवात्।

यदपि समासे शक्त्यभावे अर्थवत्त्वाभावात् प्रातिपदिकसंज्ञा न स्यादिति। तदपि न। अर्थवत्सूत्रे अर्थवत्पदेन अर्थस्मारकवृत्तिमत्त्वं विवक्षितम्। तच्च वृत्तिमद-विषयकप्रतीत्यविषयत्वरूपम्। तद्विद्यते वृत्तिमदवयवके समुदायेपीति समासस्य प्रातिपदिकसंज्ञासिद्धेः। प्रकृतिप्रत्ययार्थवत्तया कृदन्तादेरर्थवत्तासिद्धौ प्रातिपदिक-संज्ञासिद्धौ च सुबन्ततिङन्तयोरपि उक्तार्थवत्त्वात् तयोः, वाक्यस्य च प्रति-पदिकसंज्ञायाः वारणाय कृत्तद्धितेति नियमसूत्रम्। प्रकृतिप्रत्ययसमुदायस्य चेत् प्रातिपदिकसंज्ञा कृत्तद्धितान्तयोरेव, वाक्यस्य चेत् समसस्यैवेति नियमाकारः।

अषष्ठ्यर्थबहुव्रीहौ व्यपेक्षापक्षे बोधनिर्वाहः अवशिष्यते। स इत्थम् — प्राप्तोदको ग्राम इत्यादौ अषष्ठ्यर्थबहुव्रीहौ समुदायशक्तिं विनापि अभिमतबोधः संभवत्येव। तथाहि — तत्र प्राप्तिप्रकृतिकक्तप्रत्ययस्य कर्ता कर्म चार्थः। उदकं तादात्म्येन कर्तरि स निरूपकतया प्राप्तौ, सा च कर्मणि इत्येवं विशेषणविशेष्यभावव्यत्यासमात्रेण क्लृप्तपदार्थैरेव उदककर्तृकप्राप्तिकर्म ग्रामः इत्यभिमतबोधः निर्वाहयितुं शक्यते। न च विशेषणविशेष्यभावव्यत्यासकल्पने गौरवमिति वाच्यम्। पदसमुदायात्मके समासे अतिरिक्तायाः शक्तेः कल्पनमपेक्ष्य उक्तव्यत्यासकल्पने एव लाघवात्।

किं च समासस्थले समुदायशक्तिकल्पने शशशृङ्गं नास्तीत्यादौ शशशृङ्गपदे समासानुपपत्तिः। शशशृङ्गस्यालीकतया विशिष्टार्थे समुदायशक्त्यसंभवात्।

वस्तुतस्तु समासे एकार्थीभावाभ्युपगमेपि न समुदायशक्तिसिद्धिः। तथाहि — एकार्थीभावो न विशिष्टैकार्थप्रतिपादकत्वम्। विशिष्टस्य विशेष्यविशेषणा-भ्यामनतिरिक्तत्वेन विशेष्यविशेषणयोः ऐक्यासंभवात्। किं तु विशिष्टविषयताक-बोधप्रयोजकत्वरूपमेकवाक्यत्वमेव। तच्च समुदायशक्तिं विनापि आकाङ्क्षा-दिसाचिव्यात् तादृशविषयताशालिबोधजनकत्वादेवोपपन्नम्। न चैवं धवखदिरौ इत्यादौ समासानुपपत्तिः, तस्य धवत्वावच्छिन्नविशेष्यता खदिरत्वावच्छिन्नविशेष्यता चेति नानाविषयताकबोधजनकत्वादिति वाच्यम्। तत्प्रयोज्यविषयतया साक्षात् परंपरया वा निरूपिता या विषयता तत्प्रयोजकत्वात्मकतदेकवाक्यत्वस्यैव

निरुक्तप्रयोजकत्वरूपत्वात्। धवखदिरौ इत्यादौ च धवत्वाद्यवच्छिन्ननानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताकबोधोदयान्नानुपपत्तिः। एतदुक्तं भवति खदिरपदप्रयोज्यखदिरत्वावच्छिन्नविशेष्यतायाः धवपदप्रयोज्यधवत्वावच्छिन्नविषयतया साक्षात् निरूपितत्वविरहेपि स्वनिरूपितद्वित्वप्रकारतानिरूपितत्वात् परंपरया निरूपितत्वमस्तीति धवपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपं धवपदैकवाक्यत्वं खदिरपदे वर्तत इति।।

वैयाकरणमतान्तरम्

अत्राहुः वैयाकरणाः — अनस्तमितपदपदार्थविभागस्य = प्रतीयमानावयवकपदपदार्थविभागस्य चित्रगुसमुदायस्य अन्योन्यान्वितावयवार्थसम्बन्धिन्यन्यपदार्थे शक्तिः कल्प्यते। सा च शक्तिः सम्बन्धित्वेन रूपेण कल्प्यते, न तु चैत्रत्वादिना। अतो नानेकार्थकत्वम्, न वा अवयवार्थत्यागः, न वा तद्गुणसंविज्ञाने लक्षणा। अवयवार्थाज्ञाने तत्सम्बन्धिनोऽज्ञानेन योगरूढिस्वीकारात्। मण्डपादौ तु अवयवार्थाविषयिण्येव गृहविशेषधीरिति अवयवार्थत्याग एव, समुदाये रूढिः। तथाहि — अस्ति चित्रग्वादिपदस्यान्यपदार्थे तात्पर्यम्। नियमतोऽन्यपदार्थस्य प्रतीतेः, तदन्याप्रतीतेश्च। नियततात्पर्यं विना अन्यपदार्थे बहुव्रीहौ नियमतो लक्षणापि न स्यात्। तस्मात् नियततात्पर्यनिर्वाहिका बहुव्रीहेरन्यपदार्थे शक्तिरेव। न तु लक्षणा। लक्षकपदस्य लक्ष्ये तात्पर्यनियमाभावात्। बहुव्रीहेरपि तात्पर्यानियमे च क्वचित् बहुव्रीहेः अन्यपदार्थपरत्वमपि न स्यात्।

अथ क्वचित् बहुव्रीहेः अन्यपदार्थे तात्पर्यमेव न भवति। यथा "यजमानपञ्चमा ऋत्विजः" "लोहितोष्णीषा ऋत्विजः" इत्यत्र। उभयत्रापि प्रचरन्तीति शेषः। प्रचरन्तीत्यस्य यज्ञशालायां गच्छेयुरित्यर्थः। यजमानपञ्चमत्वलौहित्ययोर्विधेयत्वेन प्राधान्यात् तत्परतया अन्यपदार्थे तात्पर्याभावात्। एवं क्वचिल्लोकेऽपि लम्बकर्णमानयेत्पादौ इति चेत् —

तर्हि तत्र अन्यपदार्थे तात्पर्याभावात् लक्षणापि न स्यात्। तात्पर्यानुपपत्तिर्हि लक्षणायाः बीजम्। सति हि तात्पर्ये लक्षणां विना तदनुपपत्तिज्ञानेन लक्षणा भवति। तथा च लक्षणाविरहात् अन्यपदार्थे शक्तिरेव। अन्यथा = शक्त्यभावे तत्रान्यपदार्थबुद्ध्यनुदयापत्तिः। न च तत्र यजमानपञ्चमा ऋत्विज इत्यत्र लोहितोष्णीषा इत्यत्र च अन्यपदार्थबुद्धिः शब्दतो न भवत्येवेति वाच्यम्। तथा सति ऋत्विक्शब्देन यजमानपञ्चमादिशब्दस्य सामानाधिकरण्यानुपपत्तेः। अभेदेन तदर्थान्वितस्वार्थबोधकत्वं हि पदस्य पदान्तरसामानाधिकरण्यम्। तस्मात् बहुव्रीहितः नियमेनान्यपदार्थबुद्ध्युदयात् अन्यपदार्थे शक्तिरेव।

यद्यपि शक्तस्य न शक्ये तात्पर्यनियमः। लक्ष्येऽपि क्वचित् तात्पर्यात्। तथापि शक्ये तात्पर्यमौत्सर्गिकं क्वचित् अन्यत्र प्रयोगात् अपोद्यते। बहुव्रीहौ तु अन्यपदार्थादन्यत्र प्रयोगाभावात् शक्यार्थेऽपि तात्पर्यनियमो भवति।

यत्तु केवललाक्षणिकस्य = अशक्तस्य लाक्षणिकस्य अभावात् शक्यनियमे परिशेषादन्यपदार्थ एव शक्य इति तन्न।

समुदायशक्तिं विनापि अवयवलक्षणयैव तात्पर्यविषयान्वयबोधनिर्वाहात्। समुदायलक्षणायामेव समुदायशक्तेरावश्यकत्वादिति।

उक्तवैयाकरणमतान्तरखण्डनम्

अत्र ब्रूमः। बहुव्रीहौ न वाक्ये लक्षणा। किं तु पदे। पदस्य च नान्यपदार्थे तात्पर्यनियमः। क्वचित् शक्येऽपि तात्पर्यात्।

अथास्ति बहुव्रीहिस्थपदद्वयस्यान्यपदार्थे तात्पर्यनियमः। ततोऽन्यत्र प्रयोगाभावनियमात्। अतः तात्पर्यनियमनिर्वाहिका पदद्वये शक्तिः। सैव च वाक्ये शक्तिः, वाक्यस्य पदद्वयरूपत्वात् इति चेत् —

अस्तु तर्हि बहुव्रीहिस्थपदद्वये निरूढा लक्षणा। तथैवान्यपदार्थे तात्पर्यनियमोपपत्त्या समुदायशक्तौ मानाभावात्।

वैयाकरणनवीनमतम्

नवीनवैयाकरणास्तु — बहुव्रीहौ यदि अन्यपदार्थो लक्ष्यः स्यात् तदा नियमतो लक्ष्यार्थवाचकपदलिङ्गसमानलिङ्गकत्वं न स्यात्। लक्षकपदस्य लक्ष्यार्थवाचकपदलिङ्गाग्राहकत्वनियमात् स्वलिङ्गपरित्यागाभावाच्च। यथा गङ्गायां घोष इत्यत्र लक्षकं गङ्गापदं लक्ष्यार्थवाचकतीरपदस्य यत् नपुंसकलिङ्गं तन्न गृह्णाति, स्वकीयं स्त्रीलिङ्गं च न जहाति। अतोऽन्यपदार्थे शक्तिरेवेति वदन्ति।

तत्खण्डनम्

अत्र ब्रूमः। लाक्षणिकस्य बहुव्रीहेः विशेषणपदत्वनियमात् नियमतः लक्षणीयोपस्थापकविशेष्यपदलिङ्गग्राहित्वम्। समानाधिकरणस्य समानविभक्तिकस्य विशेषणपदस्य विशेष्यपदलिङ्गकत्वमिति नियमात्। मैत्रस्य पत्न्याः पितेत्यत्र व्यभिचारवारणाय समानाधिकरणस्येति। अभेदान्वयबुद्धिसाकाङ्क्षस्येति तदर्थः। मैत्रः पचतीत्यत्र व्यभिचारवारणाय समानविभक्तिकस्येति। अजहल्लिङ्गे तु वेदः प्रमाणम्,

रूपं गुण इत्यादौ लिङ्गविशेषनियमानुशासनात् न विशेषणपदस्य विशेष्यपद-लिङ्गग्राहित्वम्। तथा चासति विशेषानुशासने विशेषणपदं विशेष्यपदलिङ्गग्राहकम्।

अथ नियमतो विशेष्यलिङ्गकत्वमेव विशेषणपदस्य बहुव्रीहेः शक्तिं विना न निर्वहतीति चेत् न। विशेषणपदत्वमेव हि विशेष्यलिङ्गकत्वे तन्त्रम्, न तु शक्तत्वे सति, गौरवात्। दण्डी इत्यादिवाक्यस्य अशक्तस्यापि पुरुषादिविशेष्यलिङ्गकत्वात्। किं च गुणवाचकानां शुक्लादिपदानां पुंलिङ्गानां लक्षणया गुणवत्पराणां शुक्लः पट इत्यादौ विशेष्यलिङ्गत्वं दृश्यते। न हि तेषां तत्र शक्तत्वमस्ति।

ननु शुक्लादेः गुणिपरत्वे लाक्षणिकस्य स्वलिङ्गप्राप्तौ "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इत्यनुशासनात् लाक्षणिकस्यापि विशेष्यलिङ्गकत्वम्। न च बहुव्रीहौ तथानुशासनमस्तीति चेत् —

न। अनुशासनं हि कोशरूपं "समानाधिकरणस्य समानविभक्तिकस्य विशेषणपदस्य विशेष्यपदलिङ्गत्वम्" इति न्यायप्राप्तमर्थमनुवदति, न तु स्वातन्त्र्येण लिङ्गं विदधाति। अत एव "शुक्लं रूपम्" इति गुणवाचकत्वेऽपि "गुणे शुक्लादयः पुंसि" लिङ्गानुशासनं परिभूय विशेषणपदत्वात् शुक्लपदं विशेष्यस्य रूपपदस्यैव लिङ्गं गृह्णाति। अन्यथा शुक्लो रूपम् इति स्यात्।

किं च बहुव्रीहेर्लिङ्गानुशासनाभावेन स्वलिङ्गाभावात् लाक्षणिकपदे स्वलिङ्गस्या-परित्याग इति नियमस्यानवकाशात् विशेषणोपस्थापकवाक्यत्वाच्च विशेष्यपद-लिङ्गतैव युक्ता, यथा दण्डी पुरुष इत्यादौ वस्तुतो बहुव्रीहेरन्यपदार्थे शक्तावपि कथं नानालिङ्गकत्वम्। नानालिङ्गविधायकानुशासनाभावात्।

अथ विशेषणपदत्वात् विशेष्यपदलिङ्गता। विशेष्यपदं च नानालिङ्गम्, अतो नानालिङ्गतेति चेत् तर्हि लाघवाल्लक्षणैवास्तु। उक्तन्यायेनैव लक्षणीयविशेष्यपद-लिङ्गकत्वोपपत्तेः। एवं समासान्तरेऽपि न विशिष्टे शक्तिः इति।।

एकार्थीभावविषये जगदीशमतम्[१०]

स्यादेतत् — समासानां समुदायशक्तत्वे "वाचस्पतिः मितायाः, स श्यामे कण्ठेव्रणः पुमान्" इत्यादौ वाचि मितायाः कण्ठे च श्यामादेर्नाभेदेनान्वयः। वागादेः पदार्थैकदेशत्वेन तत्र पदार्थान्तरस्य मितादेः नान्वयः। निराकाङ्क्षत्वात्। यद्येकदेशेनान्वयः साकाङ्क्षः स्यात् तदा पशुरपशुः इति प्रयोगः साधुः स्यात्। पशुपदार्थैकदेशे पशुत्वे पशुभिन्नत्वसत्त्वेन योग्यताया अनपायात्। एवं गगनं समवेतम्

---

[१०] श.श.प्र. पृ. २१३

इति प्रयोगः साधुः स्यात्। शब्दसमवायिकारणरूपगगनपदार्थैकदेशशब्दे समवेतत्व-सत्त्वेन योग्यताया अनपायात्। समासानां यौगिकत्वे तु तत्र तथाविधान्वयो दुर्निवारः, वाक्प्रभृतेः पदार्थत्वादिति चेत् —

समासानां यौगिकत्वेऽपि सम्बन्धस्य कारकस्य वा बोधिका या विभक्तिः तदन्यविभक्तेः वृत्त्येकदेशपदार्थे स्वार्थानुभावकतायां निराकाङ्क्षत्वादेव वाचि मितायाः कण्ठे श्यामादेरन्वयस्यापादयितुमशक्यत्वात्। विभक्तौ सम्बन्धबोधक-विभक्त्यन्यत्वस्य कारकबोधकविभक्त्यन्यत्वस्य निवेशात् चैत्रस्य गुरुकुलम् इत्यादौ गुर्वादिपदस्य वृत्त्येकदेशत्वेऽपि तदर्थे षष्ठ्यर्थसम्बन्धस्य तृतीयार्थकरणत्वस्य चान्वयः उपपद्यते। तदुक्तम् —

प्रतियोगिपदादन्यत् यदन्यत् कारकादपि।
वृत्तिशब्दैकदेशार्थे न तस्यान्वय इष्यते।। इति।

भूषणसारानुसारेण समासे एकार्थीभावनिरूपणम्[११]

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती भवतः। जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पदे वर्णा यथा अर्थशून्याः तथा समासे पदानि अर्थशून्यानीत्यर्थः। अयं भावः — समासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुषपदयोरपि पुनः तद्बोधकत्वं कल्पनीयम्। वृषभयावकादिपदेषु वृषयावादिपदानामिव। अन्यथा राजपदेन विग्रहवाक्य इव राज्ञः स्वातन्त्र्येणोपस्थितिसत्त्वात् ऋद्धस्य राज्ञः पुरुषस्य इतिवत् ऋद्धस्य राजपुरुष इत्यपि प्रयोगापत्तेः। एवं च जहत्स्वार्था वृत्तिरिति पक्षे एकार्थीभावः।

न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्था वृत्तिः। अयं भावः — राज-पुरुषादिसमासादौ नातिरिक्ता शक्तिः। कल्पकाभावात्। न च विशिष्टार्थबोधा-नुपपत्तिरेव तत्कल्पिकेति वाच्यम्। कृतराजादिप्रत्येकपदशक्त्यैव आकाङ्क्षादिसह-कारेण विशिष्टार्थबोधसम्भवे विशिष्टे शक्त्यन्तरकल्पनस्य गौरवपराहतत्वात्। अपि च वृत्तिप्राक्काले कृता या प्रत्येकपदशक्तिः तस्यास्त्यागोऽपि अप्रामाणिकः कल्पनीयः स्यात्। तथा च आकाङ्क्षादिकारणसहकृतकृतप्रत्येकशक्त्यैव विशिष्टार्थबोधः। अयमेव व्यपेक्षापक्षः मतान्तरत्वेन भाष्यकारैरुक्तः।

एकार्थीभावपक्षे — "किं पुनः समर्थं नाम। पृथगर्थानामेकार्थीभावः समर्थवचनम्। क्व पुनः पृथगर्थानि, क्वैकार्थानि। वाक्ये पृथगर्थानि राज्ञः पुरुष इति। समासे पुनः

---

[११] भू.सा. पृ. २३७

एकार्थानि राज्ञपुरुष इति'' इति समर्थसूत्रस्थं भाष्यं प्रमाणम्। व्यपेक्षापक्षे च - ''परस्परव्यपेक्षां सामर्थ्यमेके'' इति भाष्यं प्रमाणम्। अनयोः पक्षयोः एकार्थीभावपक्ष एव युक्त इत्याह —

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।
बहूनां वृत्तिधर्माणां वचनैरेव साधने।।

स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। समास इति वृत्तिमात्रोपलक्षणम्। ''समर्थः पदविधिः'' इत्यत्र पदमुद्दिश्य यो विधीयते समासादिः स समर्थः विग्रहवाक्यार्थाभिधाने शक्तः सन् साधुरिति सूत्रार्थस्य भाष्याल्लाभात्। पदोद्देश्यक-विधित्वं च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव।

पङ्कजशब्दवदिति सप्तम्यन्ताद्वतिः। पङ्कजशब्दे यथा अवयवशक्त्यति-रिक्तशक्तिः तथा समासेऽपीत्यर्थः। व्यपेक्षावादिनां मते तु पङ्कजनिकर्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिध्येत्।

न च पद्मत्वेन रूपेणोपस्थित्यर्थं समुदायशक्तिः कल्प्यत इति वाच्यम्। चित्रग्वादिसमासपदेऽपि स्वामित्वेन उपस्थित्यर्थं समुदायशक्तिकल्पनस्या-वश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत् पङ्कजपदेऽपि सा सुवचा।

एवं रथकारपदेऽपि समुदायशक्तिरेव। रथं करोतीति रथकार इति योगमात्रकल्पने क्लृप्तयोगेनैव लक्षणां विना ब्राह्मणादिविषयकतयैव रथकारपदस्य उपपत्तौ ''वर्षासु रथकारोऽग्नीनादधीत'' इत्यत्र रथकारपदस्य निरूढलक्षणां स्वीकृत्य, ''माहिष्येण करिण्यां तु रथकारः प्रजायते'' इति स्मृत्यनुसारेण माहिष्यात् करिण्यायुत्पन्नो यो जातिविशेषः तस्य अधिकारित्वं प्रकल्प्य तस्य आधानोपयोगिवेदाध्ययनरूपविद्या-कल्पनं यत् मीमांसकैः सिद्धान्तितं तदयुक्तं स्यात्। राजन्येन वैश्यात् उत्पादितः माहिष्य इत्युच्यते। वैश्यात् शूद्रायामुत्पन्ना करिणी इत्युच्यते। माहिष्यात् करिण्यामुत्पन्नः रथकार इत्युच्यते। ''विनैव न स्त्रीशूद्रौ वेदमधीयाताम्'' इति शास्त्रसंकोचं ब्राह्मणविषयकत्वेन विधेश्चारितार्थ्यसम्भवात्।

साधकान्तरमाह — बहूनामिति। वृत्तिधर्माः समासादिवृत्तेः धर्माः विशेषणलिङ्ग-संख्याद्यन्वयाभावादयः। अयं भावः — राज्ञः पुरुष इत्यत्रेव राजपुरुष इत्यत्रापि राजपदार्थे राज्ञि ऋद्धस्येत्यादिविशेषणान्वयः स्यात् यदि समासे विशिष्टशक्तिर्नाङ्गी-क्रियते। राजपदेन राज्ञः स्वातन्त्र्येणोपस्थितेः सद्भावात्। विभाषावचनं च समासनियमवारणाय कर्तव्यं भवेत्।

न च "सविशेषणानां वृत्तिर्न" इति वचनात् राजपुरुष इत्यत्र विशेषणान्वयो न प्रसजति। विभाषावचनं च कृतमेवेति वाच्यम्। अस्माकं मते व्यपेक्षाविवक्षायां वाक्यस्य प्रयोगः, एकार्थीभावे समासस्य प्रयोग इति न्यायसिद्धार्थानुवादरूपं विभाषासूत्रम्। भवतां मते तु अपूर्वविधिरूपमिति वैषम्यात्।

"सविशेषणानां वृत्तिर्न" इत्येतदपि पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेनेति न्यायसिद्धानुवादरूपम्। अत एव व्यपेक्षापक्षमुद्भाव्य भाष्यकारैः —

"अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः" इति दूषणमुक्तम्।

तथा धवरवदिरावित्यत्र धवश्च रवदिरश्चेति वाक्य इव समुच्चयार्थकश्चकारः प्रयोक्तव्यः स्यादिति तस्य लोपः अनुशासनीयः। एकार्थीभावे तु वृत्त्यैव समुच्चयस्य क्रोडीकारः, धवखदिरसमुच्चये शक्त्यङ्गीकारात् इति चलोपो नानुशासनीयः। एवं निष्कौशाम्बिरित्यत्र अतिक्रान्तपदलोपः, गोरथ इत्यत्र गोयुक्तो रथ इत्यर्थात् युक्तपदलोपः, घृतघट इत्यत्र घृतपूर्णो घट इत्यर्थात् पूर्णपदलोपः, गुडधाना इत्यत्र गुडमिश्रा धाना इत्यर्थात् मिश्रपदलोपः, केशचूडः इत्यत्र संघातशब्दलोपः, सुवर्णालंकार इत्यत्र विकारशब्दलोपः, द्विदशा इत्यत्र सुच्प्रत्ययलोपः वाचनिको वक्तव्यः। एकार्थीभावे तु अतिक्रान्ताद्यर्थमन्तर्भाव्य शक्तिस्वीकारात् तेषां लोपो न वक्तव्य इति लाघवम्।

अपि च घनश्यामः हंसगमन इत्यादौ इवशब्दलोपो वक्तव्यः स्यात् व्यपेक्षापक्षे। एकार्थीभावपक्षे तु घनसदृशश्यामः हंससदृशगमन इति विशिष्टेऽर्थे शङ्क्त्यङ्गीकारात् न इवशब्दलोपो वाच्यः।

अपि च चित्रगुरित्यत्र चित्रगोस्वामीति बोधः अनुभवसिद्धः। स च व्यपेक्षापक्षे दुर्घटः। स्वामिवाचकपदाभावात्। न च समासस्य गोस्वामिनि लक्षणाया अङ्गीकारात् स बोधो निर्वहतीति वाच्यम्। प्राप्तोदको ग्राम इत्यादौ लक्षणायाः असम्भवात्। प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरमनुपपत्तिप्रतिसन्धाने सति प्राप्तिकर्त्रभिन्नोदक-सम्बन्धिलक्षणायामपि उदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थस्यालाभात्।

न च प्राप्तेति कर्त्रर्थकस्य क्तप्रत्ययस्य कर्मणि लक्षणेति वाच्यम्। तर्हि समान-विभक्तिकप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेः उदकाभिन्नप्राप्तिकर्मेति बोधः स्यात्।

न चोदकस्य कर्तृतासम्बन्धेन धात्वर्थे प्राप्तौ अन्वयोऽस्तु इति वाच्यम्। नामार्थधात्वर्थयोः साक्षात् भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। अन्यथा देवदत्तः पच्यत इति वाक्यात् देवदत्तकर्तृकः पाक इत्यन्वयबोधापत्तेः।

न च उदकस्याभेदेन क्तार्थकर्तर्यन्वयः। कर्तुः धात्वर्थप्राप्तावन्वयः। एवं च उदकाभिन्नकर्तृका प्राप्तिः इति बोधः। तदुत्तरं तत्सम्बन्धिग्रामो लक्ष्यत इति वाच्यम्। प्राप्तेः धात्वर्थस्य क्तप्रत्ययार्थकर्तारं प्रति विशेष्यत्वासम्भवात्। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति व्युत्पत्तेः। संख्यादौ व्यभिचारेण तस्या औत्सर्गिकत्वेऽपि प्राप्तपदार्थे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वे उदकेन सममभेदान्वयापत्तेश्च। समानविभक्तिकनामार्थयोरभेदान्वय इति व्युत्पत्तेः।

एवं ऊढरथः, उपहतपशुः, उद्धृतौदना, बहुपाचिकेत्यादिष्वपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्ता पशुकर्मकोपहरणोद्देश्यः, ओदनकर्मकोद्धरणावधिः बहुपाककर्त्रधिकरणमिति क्रमशो बोधः। ऊढो रथो येन सः, उपहतः पशुः यस्मै सः, उद्धृत ओदनो यस्याः सा, बहवः पाचका यस्यां सा इति क्रमशो विग्रहः। भवन्मते हि वहनकर्माभिन्नो रथः इति बोधोत्तरं सम्बन्धिनि लक्षणायामपि रथकर्मकवहनकर्ता अनड्वान् इतीप्सितार्थस्यालाभ एव। कर्मार्थकक्तप्रत्ययस्य कर्तरि लक्षणायां तु धात्वर्थे वहने रथस्य कर्मतया भेदसम्बन्धेनान्वयो दुर्लभ एव। समानविभक्तिकनामार्थयोरभेदेनैव अन्वय इति व्युत्पत्तेः।

उक्तस्थलेषु विशिष्टेऽर्थेऽतिरिक्तशक्त्यङ्गीकारे च घटत्वविशिष्टे घटपदस्येव उदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति न दोषः। एवम् ऊढरथ इति समुदायस्य रथकर्मकवहनकर्तरि शक्तिः, उपहतपशुपदस्य पशुकर्मकोपहरणोद्देश्ये शक्तिः उद्धृतौदना इति समुदायस्य ओदनकर्मकोद्धरणावधौ शक्तिः, बहुपाचिकेति समुदायस्य बहुपाककर्त्रधिकरणे शक्तिः इति द्रष्टव्यम्। तदेतत् सकलमभिप्रेत्योक्तम् —

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः।। इति।

समासे विशिष्टशक्तौ साधकान्तरम्

अपि च चित्रगुरित्यादिषु चित्रगोस्वाम्यादिप्रतीतिः न शक्तिं विनोपपद्यते। न च तत्र लक्षणा। सा हि न चित्रपदे। चित्रस्वामी गौरिति बोधापत्तेः। नापि गोपदे, गोस्वामी चित्र इति बोधापत्तेः।

न च चित्राभिन्ना गौः इति शक्त्युपस्थाप्ययोः अर्थयोः अन्वयबोधानन्तरं तादृशगोस्वामी गोपदेन लक्ष्यत इति वाच्यम्। गोपदस्य चित्रपदस्य च विनिगमनाविरहेण लक्षकत्वासम्भवात्।

न च गोपदार्थस्य गोः अन्यपदार्थे स्वामिनि साक्षात्सम्बन्धः, चित्रपदार्थस्य तु गोद्वारक इति परम्परयेति विनिगमकसत्त्वात् गोपदस्यैव लक्षणेति वाच्यम्। एवमपि प्राप्तोदकः कृतविश्व इत्यादौ अषष्ठ्यर्थबहुव्रीहौ विनिगमकस्याभावात्। यौगिकानां कर्त्रर्थकतया साक्षात्सम्बन्धाविशेषात्।

न च पदद्वये लक्षणेति नैयायिकोक्तं युक्तम्। बोध्यमानस्य स्वामिनः द्वेधा भानापत्तेः बोधावृत्तिप्रसङ्गात्।

न च परस्परं तात्पर्यग्राहकत्वात् एकस्यैव एकदा लक्षणा, न द्वयोरिति न बोधावृत्तिरिति वाच्यम्। एवमपि विनिगमनाविरहात् एकतरपदे लक्षणाया असम्भवात्। पदद्वये लक्षणायां तु बोधावृत्तिप्रसङ्ग उक्त एव।

न च चरमपद एव लक्षणा, प्रत्ययार्थान्वयानुरोधात्। प्रत्ययानां सन्निहित-पदार्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः इति सैव विनिगमिकेति वाच्यम्। एवं हि बहुव्रीह्यसम्भवापत्तेः। "अनेकमन्यपदार्थे"[१२] इत्यनेन अनेकसुबन्तानामन्यपदार्थ-प्रतिपादकत्वेन तद्विधानात्।

एतदुक्तं भवति — वृत्तेः विशिष्टार्थकत्वं न शास्त्रैकसमधिगम्यम्। "अचतुर"[१३] इत्यादावर्थानादेशनात्। किं तु लौकिकव्यवहारगम्यम्। "स्वभावत एव तेषां शब्दानामेष्वर्थेष्वभिनिविष्टानां निमित्तत्त्वेनान्वाख्यानं क्रियते" इति समर्थसूत्रभाष्यात्। "अनेकमन्यपदार्थे"[१४] "चार्थे द्वन्द्वः"[१५] इत्यादीनामनेकं प्रथमान्तमन्यार्थप्रतिपादकं बहुव्रीहिसंज्ञकं भवति, चार्थे वर्तते यः प्रथमान्तसमुदायः स द्वन्द्वसंज्ञको भवतीति क्रमेण लोकसिद्धार्थानुवादेन बहुव्रीह्यादिसंज्ञाविधायकत्वमात्रम्। अर्थस्यापि विधाने वाक्यभेदापत्तेः। स्वसमानार्थकवाक्यानिवृत्तये विभाषाधिकारोऽपि विधेयः स्यात्। एवं च सुबन्तसमुदायस्य अन्यार्थाप्रतिपादकत्वे कथं बहुव्रीहिः स्यादिति।

न चैकपदस्यान्यार्थप्रतिपादकत्वे तात्पर्यग्राहकतया अपरपदस्याप्युपयोगित्वेन समुदायस्य विशिष्टार्थप्रतिपादकत्वमप्रकम्प्यमिति वाच्यम्। एवं सति घटादिपदेष्वपि चरमवर्णे एव वाचकत्वकल्पना स्यात् पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोग-सम्भवात्।

एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेत् — प्राप्तोदक इत्यादिष्वपि उदकपदमात्रश्रवणात् अर्थप्रत्ययापत्तिस्तुल्येति।

---

[१२] पा.सू. २.२.२४
[१३] पा.सू. ५.४.७७
[१४] पा.सू. २.२.२४
[१५] पा.सू. २.२.२९

एवं च अषष्ठ्यर्थबहुव्रीहौ प्राप्तोदक इत्यादौ व्युत्पत्त्यन्तरकल्पना, अगत्या शक्त्यन्तरकल्पना, क्लृप्तशक्त्युपपत्तिरिति व्युत्पत्तित्यागश्च तत्रास्ति। एवं च क्वचित् समासे विशिष्टशक्तिकल्पने सर्वत्रैव समासे विशिष्टशक्तिकल्पना स्वीक्रियताम्। तदुक्तम् —

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना।
क्लृप्तत्यागश्च तत्रास्ति तत् किं शक्तिं न कल्पयेः।। इति।

व्यपेक्षावादिनैयायिकमीमांसकादिमतम्

अत्राहुः नैयायिकमीमांसकादयः — न समासे शक्तिः। राजपुरुष इत्यादौ राजपदादेः सम्बन्धिनि लक्षणया तस्याभेदेन पुरुषपदार्थेऽन्वयेन राजसम्बन्ध्यभिन्नः पुरुष इति बोधोपपत्तेः। अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिपदार्थान्वयः। न वा घनश्यामो निष्कौशाम्बिः इत्यादौ इवक्रान्तादिपदप्रयोगापत्तिः। उक्तार्थकतयैव क्रान्तादिपदप्रयोगासम्भवात्। घनपदस्य घनसदृशे लक्षणया तस्योत्तरपदार्थेऽभेदसम्बन्धेनान्वयात्। निरादिपदानां द्योतकतया कौशाम्ब्यादिपदस्यैव कौशाम्ब्यवधिकनिष्क्रमणकर्त्राद्यर्थे लक्षणाभ्युपगमेनैवेष्टार्थबोधोपपत्तौ क्रान्तादिशब्दानां प्रयोगस्यानावश्यकत्वात्। न वा "विभाषा"[१६] इति सूत्रस्यावस्यकत्वम्। लक्षणया राजसम्बन्ध्यभिन्नः पुरुष इति बुबोधयिषायां समासस्य राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भवात्।

नापि पङ्कजपदे पद्मत्वविशिष्टशक्त्यङ्गीकाररूपा प्रतिबन्दी समासे शक्तिसाधिका। तत्रावयवशक्तिमजानतोऽपि बोधात्। न हि अवयवशक्त्यग्रहे लक्षणया पङ्कजादिशब्देभ्यः पद्मत्वविशिष्टार्थबोधः सम्भवति। लक्षणायाः शक्यार्थोपस्थितिपूर्वकत्वेन शक्यार्थग्रहाभावे तस्याः असम्भवात्। तथा च अवयवशक्त्यग्रहेऽपि विशिष्टार्थबोधजननात् पङ्कजादिशब्दे विशिष्टशक्तिरङ्गीकृता। अत एव तत्पदीयलक्षणाग्रहे तत्पदशक्तिज्ञानस्य हेतुत्वादेव राजादिपदशक्त्यग्रहे राजपुरुषः चित्रगुः इत्यादौ न बोधः।

न चाषष्ठ्यर्थबहुव्रीहौ प्राप्तोदक इत्यादौ का गतिः इति वाच्यम्। तत्राप्युत्तरपदे (उदकपदे) उदककर्तृकप्राप्तिकर्मणि लक्षणायाः स्वीकारात्। पूर्वपदस्य प्राप्तपदस्य यौगिकत्वेन तल्लक्षणायाः धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात्। तथा च शीघ्रोपस्थितिकत्वम् उत्तरपदलक्षणायां बीजम्।

---

[१६] पा.सू. २.१.११

अपि च प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वमिति व्युत्पत्त्यनुरोधोऽप्युत्तरपदलक्षणायां विनिगमकः।

घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते, विशिष्टस्यैव संकेतितत्वात्। बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात्। प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्याय उत्तरपदे एव लक्षणा कल्प्यत इति विशेषः। स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकंमन्यैः —

तन्मतपरिशीलनम्

अत्रोच्यते। समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात्, अर्थवत्त्वाभावात् "अर्थवत् अधातुरप्रत्ययः प्रातिपदिकम्"[१७] इति सूत्रेण अर्थवच्छब्दस्वरूपस्यैव प्रातिपदिकसंज्ञाविधानात्। न च "कृत्तद्धितसमासाश्च"[१८] इत्यत्र समासग्रहणात् तेन सूत्रेण प्रातिपदिकसंज्ञा भविष्यतीति वाच्यम्। तत्र समासग्रहणस्य नियमार्थत्वात्।

न चार्थवत्पदेन शक्त्या अर्थबोधकं न विवक्षितम्, किं तु वृत्त्या अर्थबोधकम्। एवं च समासे शक्त्यभावेऽपि लक्षणायाः स्वीकारात् लक्षणया अर्थबोधकत्वरूपमर्थवत्त्वमस्तीति प्रातिपदिकसंज्ञा भविष्यतीति वाच्यम्। समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपाया लक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात्।

किं च समासे विशिष्टशक्त्यस्वीकारे चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः। समुदायोत्तरमेव प्रत्ययोत्पत्त्या समुदायस्यैव प्रकृतित्वात्।

यत्तु प्रत्ययानां सन्निहितपदार्थान्वितस्वार्थबोधकत्वमित्येव व्युत्पत्तिः कल्प्यत इति। तन्न। उपकुम्भम् अर्धपिप्पली इत्यादौ पूर्वपदार्थे कुम्भसमीपादौ विभक्त्यर्थान्वयेन व्यभिचारात्।

ननु सन्निहितत्वं नाव्यवहितपूर्वत्वम्, तत्त्वेनानुसन्धीयमानत्वं वा। धवखदिरावित्यादौ धवादिपदार्थे विभक्त्यर्थानन्वयप्रसङ्गात्। किं तु सन्निहितत्वेनानुशासनबोधितत्वम्। तच्च धवादिपदार्थानामिव उपादिपदार्थानामप्यस्ति। समासस्यानेकपदसमुदायरूपतया समुदायस्य प्रत्येकानतिरिक्ततया समासरूपप्रातिपदिकात् विहितायाः विभक्तेस्तत्तत्पदसन्निहितत्वादिति चेत् — न।

---

[१७] पा.सू. ७.१.४५

[१८] पा.सू. १.२.४६

समासग्रहणस्य नियमार्थतया अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव विभक्त्यनुशासनात्। तथा च शास्त्रबोधितं सन्निहितत्वमपि विशिष्टस्यैव, न केवलपूर्वपदस्येति उक्तस्थले व्यभिचारो दुरुद्धरः।

अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यते, न तु प्रकृतित्व-पर्याप्त्यधिकरण इति। तथा च प्रकृतित्वाश्रयत्वस्य प्रकृत्येकदेशेऽपि सम्भवात् नोक्तदोष इति चेत् — तर्हि पङ्कजमानय, दण्डिनं पश्य, शूलिनं पूजय इत्यादौ पङ्कदण्डशूलेषु आनयनदर्शनपूजनकर्मत्वान्वयप्रसङ्गः। अघटमानयेत्यत्र घटेऽप्या-नयनान्वयापत्तिश्च।

न च दण्डादीनां विशेषणतया न तत्र आनयनादिकर्मत्वान्वयः। एकत्र विशेषणतयोपस्थितस्यान्यत्र नान्वय इति व्युत्पत्तेरिति वाच्यम्। पाकान्नीलः धर्मात् सुखी इत्यादौ पाकधर्मादेः नीलरूपसुखादावनन्वयप्रसङ्गात्। एकत्र विशेषणस्य अन्यत्र विशेषणतयैव नान्वयः, विशेष्यतयान्वयस्तु भवतीत्यङ्गीकारे तु नायं दोषः।

अथ प्रत्ययप्राग्वर्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेत् — न। गामानयति कृष्णो दण्डेन इत्यत्र कृष्णे तृतीयाविभक्त्यर्थान्वयप्रसङ्गात्।

अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेत् — न। अक्लृप्तकल्पनां क्लृप्तव्युत्पत्तित्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वात्।

अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषः चित्रगुः नीलोत्पलम् इत्यादौ सर्वत्रानन्वयप्रसङ्गः। तथाहि — तण्डुलः पचति इत्यादौ धात्वर्थपाकादौ तण्डुलादेः कर्मत्वसम्बन्धेनान्वयेन तण्डुलकर्मकबोधस्य वारणाय विशेष्यतासम्बन्धेन प्रातिपदिकार्थप्रकारकबोधं प्रति विशेष्यतासम्बन्धेन विभक्तिजन्योपस्थितिः कारणमिति वक्तव्यम्। पाके च विभक्तिजन्योपस्थितेरभावात् न तत्र तण्डुलस्य कर्मतासम्बन्धेनान्वयः। एवं च पुरुषे विभक्तिजन्योपस्थित्यभावेन तत्र राजपदार्थस्य राजसम्बन्धिनः अभेदेनान्वयो न सम्भवति। एवं नीलोत्पलमित्यत्रापि।

तण्डुलः शुभ्र इत्यादौ च प्रातिपदिकार्थार्थकप्रथमार्थे प्रकृत्यर्थस्य तण्डुला-देरभेदेनान्वयः। प्रथमार्थस्य च शुभ्रे अभेदेनान्वयः। तथा च तण्डुलान्वयिनि प्रातिपदिकार्थे विभक्तिजन्योपस्थितेः सत्त्वान्न व्यभिचारः।

शुभ्रेण तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्थिका। तत्र शुभ्रस्यान्वयः। अभेदस्य तण्डुलेऽन्वयः। अतो न तत्र व्यभिचारः।

तथा च समासे तद्घटकपदार्थानां परस्परमन्वयासम्भवात् समुदायस्य विशिष्टे शक्तिरावश्यिकैव। किं च राजपुरुष इत्यादौ सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः,

राज्ञः पुरुष इति विवरणेन विरोधात्। समाससमानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा विग्रहवाक्यात् शक्तिनिर्णयो न स्यात्। तत्समानार्थकवाक्यस्यैव तच्छक्तिनिर्णायकत्वात्। नान्त्यः, राजसम्बन्धाभिन्नः पुरुष इति बोधप्रसङ्गात् विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदेनान्वय इति व्युत्पत्तेः।

समासे एकार्थीभावाङ्गीकारे मीमांसासम्मतिरपि वर्तते। तथा हि — "वषट्कर्तुः प्रथमभक्षः" इति किञ्चित् वेदवाक्यम्। वषट्कर्ता होता। तत्कर्तृकं भक्षणं "ऋत्विजो हविःशेषं भक्षयन्ती"ति वाक्यप्राप्तमिति तदनुवादेनाप्राप्तं प्राथम्यमनेन विधीयत इति पूर्वपक्षे — प्रथमभक्ष इत्यस्य समस्तपदत्वेन यदि प्राथम्यविधायकत्वं स्यात् तदा यो भक्षः स प्रथम इत्येवं विच्छिन्नान्वयो वाच्यः। स न सम्भवति, समासानुपपत्तेः। उद्देश्यविधेयभावेनान्वये पृथगुपस्थितेः नियामकत्वेन तदनुरोधेन तदुपगमे विशिष्टार्थोपस्थितिजनकत्वरूपैकप्रसरताभङ्गापत्तिः। अतः प्राथम्यविशिष्टं भक्षणमेव विधीयत इति सिद्धान्तितम्। तेन समासस्य विशिष्टार्थबोधकत्वं मीमांसासम्मतम्। यद्यपि तत् लक्षणयेति ते वदन्ति, तथापि पूर्वोक्तरीत्या लाघवादियुक्तिसहकारेण शक्त्यैव तदिति निर्णीयते।

एवं "त्र्यङ्गैः स्विष्टकृतं यजति" इति वाक्ये किम् इज्याशेषभूतत्रित्वविशिष्टयत्किंचिदङ्गविधानम्, किं वा त्रित्वविशिष्टाशेषाङ्गविधानमिति संशये प्रकृतौ इज्याशेषेण पुरोडाशेन स्विष्टकृते हुतत्वात् अत्रापि शेषभूतत्रित्वविशिष्टाङ्गैरेव स्विष्टकृद्धवनं युक्तमिति पूर्वपक्षे शेषभूतानि कानिचिदङ्गान्यनूद्य त्रित्वविधाने एकप्रसरताभङ्गापत्तिः। तस्मात् कल्पसूत्रोक्तत्रित्वविशिष्टाङ्गान्तरविधानमिति निर्णीतं दशमाध्यायस्य तृतीये पादे। कल्पसूत्रोक्तानि एकादशाङ्गानि तु हृदयं जिह्वा, वक्षः, यकृत्, वृक्णौ, सव्यं दोः, उभे, पार्श्वे, दक्षिणा श्रोणी, गुदम् इति। तत्र त्रीणि दक्षिणोंऽसः, सव्या श्रोणी, गुदं तृतीयमिति।

अरुणाधिकरणमपि समासे विशिष्टशक्त्यङ्गीकारे प्रमाणम्। तथाहि — अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति इत्यत्र अरुणापदवत् एकहायनी पिङ्गाक्षी इति समासयोरपि एकाहायनत्वपिङ्गाक्षत्वरूपगुणमात्रवाचकतया तयोश्च अमूर्तत्वात् क्रीणातौ करणत्वासंभवस्य तुल्यत्वात् आरुण्यस्यैव अमूर्तत्वेन क्रयाङ्गत्वासंभवशङ्कायाः अरुणाधिकरणे कृतायाः असंगत्या, समासे विशिष्टशक्तेः अङ्गीकारस्य अरुणाधिकरणे सूचनादिति।

व्युत्पत्तिवादे राजपुरुषवादे राजपुरुष इति षष्ठीतत्पुरुषसमासे पूर्वस्य राजपदस्य षष्ठ्यन्तार्थराजसंबन्धविशिष्टे लक्षणा। लक्षणार्थस्य राजसंबन्धविशिष्टस्य उत्तरपदार्थे पुरुषे अभेदसंबन्धेनान्वयः। तथा च राजसंबन्ध्यभिन्नः पुरुषः इति बोधः। राजपुरुष

इति समासस्य राजसंबन्धविशिष्टपुरुषे शक्तिरनावश्यकीति विस्तरेण भट्टाचार्यैः विचारितम्।

तद्व्याख्याने गूढार्तत्वालोके षड्दर्शिनीवल्लभैः बञ्चाझाशर्ममहोदयैः एकार्थीभाववादिवैयाकरणमतं साररूपेणानूद्य तत्खण्डनपूर्वकं व्यपेक्षावादिनैयायिकमतं समर्थितम्। तदत्र जिज्ञासूपकाराय संगृह्यते।

गूढार्थतत्वालोके वैयाकरणमतानुवादः[१९]

अथ "समर्थः पदविधिः" सूत्राभिप्रेतं सामर्थ्यं न निरूप्यनिरूपकभावापन्नविषयताकशाब्दबोधप्रयोजकाङ्क्षाशालित्वरूपव्यपेक्षात्मकम्। अपि तु एकधर्मावच्छिन्नशक्तिमत्वरूपैकार्थीभावात्मकमेव लाघवात्। अतः समासादिवृत्तौ शक्तिः अवश्याभ्युपगन्तव्येति राजपदस्य राजसंबन्धिनि लक्षणाङ्गीकारो निरर्थकः। शक्त्यैव राजसंबन्धविशिष्टपुरुषादिबोधसंभवात्। तथा सति समासविग्रहवाक्ययोः औत्सर्गिकं समानार्थकत्वमपि निराबाधमवतिष्ठते।

न च समासावयवप्रत्येकपदात् क्लृप्तशक्तिकात् शक्त्या लक्षणया वा बुभुत्सितबोधसंभवे अतिरिक्तशक्तिर्न कल्प्या, अनन्यलभ्यो हि शब्दार्थ इति वाच्यम्। शक्त्यभावे हि प्रातिपदिकसंज्ञा - प्राचीनविभक्तिलोपविभक्त्यन्तरोत्रत्यादिकार्यं न स्यात्। अर्थवदिति सूत्रे वृत्तिमत एव अर्तवत्पदेन विवक्षितत्वात्।

न च "कृत्तद्धितसमासाश्च" इति सूत्रेण समासस्य प्रातिपदिकसंज्ञा अस्तु इति वाच्यम्। तस्मिन् सूत्रेपि अर्थवत्पदानुवृत्तेरावश्यकत्वेन शक्त्यभावे समासादेः प्रातिपदिकसंज्ञायाः तत्सूत्रादप्यसंभवात्।

न च अर्थवत्पदस्य "कृत्तद्धितसमासाश्च" इति सूत्रे अनुवृत्तिः नापेक्षितेति वाच्यम्। कृत्तद्धितशब्दाभ्यां हि कृत्तद्धितान्तौ विवक्षितौ। तादृशविवक्षाग्राहकं च तत्तत्पदस्य विशेषणपरत्वम्। तच्च विशेष्यपदं विना नोपपद्यत इति विशेष्यसमर्पकस्य अर्थवदित्यस्य निरर्थकत्वप्रसङ्गात् निरर्थकस्य सार्थकधात्वादिपर्युदासेनैव व्यावृत्तेः पर्युदासे नञस्तत्सदृशतद्भिन्नबोधकत्वात् सादृश्यस्य अर्थवत्वरूपस्यैव आदरणीयत्वात्।

वस्तुतः "कृत्तद्धितसमासाश्च" इति सूत्रस्य विधायकत्वमेव नास्ति। कुत इति चेत् — "कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहण"मिति परिभाषया मूलकेनोपदंश-

---

[१९] गू.त. पृ. ६४

मित्यन्तवाक्यस्य ग्रहणापत्या तस्यापि प्रातिपदिकसंज्ञाप्रसङ्गात्, तद्धितपदेन "प्रत्ययग्रहणे तदन्तस्यापि ग्रहणम्" इति परिभाषया तद्धितान्तस्यैव ग्राह्यत्वेन बहुगुडादिपदे प्रातिपदिकसंज्ञानुपपत्तेश्च। तद्धितग्रहणे तद्धितविशिष्टस्यैव ग्राह्यत्वे उक्तदोषवारणेपि पचतकि इत्यादि मध्यस्थिततद्धितकेपि प्रातिपदिकसंज्ञा स्यात्। एवं च कृत्तद्धितसूत्रं येषां पूर्वसूत्रेण अर्थवतां धातुभिन्नानां प्रत्ययभिन्नानां च प्रतिपदिकसंज्ञा विहिता तेषां परिगणनत्वेन तत्प्रपञ्चमात्रमिति न ततः समासस्य प्रातिपदिकसंज्ञासंभव इति चेत् — न।

अर्थवदिति सूत्रे अर्थवत्वं न वृत्तिमत्वम्, अपि तु वृत्तिमदविषयक-प्रतीत्यविषयत्वमेव वाच्यम्। न च तत्र गौरवम्। अनन्तसमासेषु अनन्त-शक्तिकल्पनापेक्षया लाघवस्यैव सत्वात्। एवं च वृत्तिमत्संघातरूपे कृत्तद्धितान्त-पूर्वविहिततद्धितसमासादौ वृत्तिं विनैव अर्थवत्वस्य सद्भावात् प्रातिपदिक-संज्ञानुपपत्यभावात्। वृत्तिमद्विषयकप्रतीतिविषयत्वं तु समूहालम्बनमादाय निरर्थकेपि स्यादिति निषेधद्वयगर्भता। अत्र प्रत्ययान्तपर्युदासश्चेत् कृदन्तानां न स्यात् प्रातिपदिकसंज्ञा। न चेत् तिङन्तादीनामपि स्यादिति प्रत्ययान्तस्य चेत् प्रातिपदिकसंज्ञा कृत्तद्धितान्तयोरेव, वाक्यस्य चेत् समासस्यैवेति नियमार्थं कृत्तद्धितेति सूत्रं कर्तव्यमेव। इतरथा वृत्तिमत्वस्य अर्थवत्वरूपत्वे कृत्तद्धितसमासादीनामर्थवत्वात् सुप्तिङन्तवाक्यानामतथात्वात् प्रातिपदिकसंज्ञातदभावयोः संभवात् प्रत्ययान्त-पर्युदासस्य अस्मत्पक्ष इव तवाप्यकर्तव्यस्य तुल्यत्वेपि कृत्तद्धितसूत्रस्य व्यर्थत्वमनिष्टमापन्नं स्यादिति।

न च क्विबन्तधातोः प्रातिपदिकसंज्ञा न स्यात्। क्विपो लुप्तत्वात् विद्यमानस्य धातुभिन्नत्वाभावादिति कृत्तद्धितेति सूत्रं विधायकमेवाभ्युपगन्तव्यमिति वाच्यम्। काल्पनिकविभक्त्यादिविशिष्टे राजन् ङस् पुरुष सु इत्यलौकिकप्रक्रियावाक्ये समाससंज्ञाया इव काल्पनिकक्विबन्तत्वमादाय धातुभिन्नत्वस्य संभवात्।

अथापि समासशक्तिरवश्यमभ्युपगन्तव्या। अन्यथा चित्रगुरित्यादौ चित्राभिन्न-गोस्वामी इति बोधस्यानुपपत्तिः। तथाहि — गोपदस्य गोस्वामिलक्षकत्वे गोः पदार्थैकदेशत्वेन तत्र चित्रापदार्थान्वयस्यासंभवः। न च गोपदमेव चित्राभिन्न-गोस्वामिलक्षकं, चित्रापदं तात्पर्यग्राहकमिति वाच्यम्। एकार्थीभावरूपसामर्थ्यस्यैव समासप्रयोजकतया चित्रापदप्रयोज्यविषयत्वस्य तत्राभावे व्यपेक्षाया अप्यसंभवात् समासानुपपत्तेः।

नापि गोपदस्य शक्त्या गौरर्थः, लक्षणया च स्वामी, तत्र स्वामिविशेषणतापन्नगवि चित्रापदार्थान्वयः, तथा सति नैकदेशान्वयप्रसङ्गः, न वा व्यपेक्षाविरह इति वाच्यम्।

युगपत् वृत्तिद्वयानङ्गीकारात्। प्रातिपदिकार्थयोः गोगोस्वामिनोः भेदेनान्वयस्याव्युत्पन्नत्वाच्च। न वा चित्रपदगोपदयोः चित्राभिन्नगोस्वामी अर्थः, पदार्थयोश्च तादात्म्येनान्वयः। अत एव सर्वलाक्षणिकत्वात् बहुव्रीहेः तत्पुरुषापेक्षया जघन्यत्वप्रवाद इत्यपि युक्तम्। तादात्म्येनान्वयप्रयोजकविरूपोपस्थितेरभावात्।

न च विरूपोस्थित्यर्थं चित्रपदस्योक्तस्वामी अर्थः। गोपदस्य स्वरूपं चित्रपदस्य स्वरूपं गोपदस्य वा उक्तस्वमी अर्थ इति वाच्यम्। इतरपदार्थान्वितगोरूपस्वाम्यर्थस्य उपसर्जनत्वाभावेन तथात्व एव गोपदस्य उदन्ततायाः संभवेन तदनुपपत्तेः। यत्वत्र द्वन्द्वैकशेषान्यतरप्रसङ्गः उक्तः; तन्न। साक्षादनन्वितत्व एव तत्तत्पदार्थयोःतयोः प्रसक्तेः अत्र पदार्थयोरभेदेनान्वयाङ्गीकीरात्।

एवमेकदेशान्वयाभ्युपगमेपि प्राप्तमुदकं यं स इति वाक्यार्थबहुव्रीहौ प्राप्तोदक इत्यत्रागतिरेव। तथाहि प्राप्तशब्दस्य कर्तृक्तप्रत्ययनिष्पन्नस्य प्राप्तिकर्ता अर्थः। उदकशब्दस्य उदकसंबन्धिनि लक्षणा। उदके चोक्तकर्तुरन्वयः। तथापि विवक्षितस्य उदककर्तृकप्राप्तिकर्मणः न लाभः। एवं कृतपाक इत्यादौ कृतपाकशब्दयोरशक्तत्वेन लक्षणाया एवासंभवात् स्वसमवेतकृतिकर्मपाकसंबन्धित्वादिना चैत्रादेरवगमस्याशक्यत्वात् स्वरूपार्थकघञ्मात्रस्योक्तार्थलक्षकत्वस्य प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधेनासंभवात् धातुमात्रस्य तथात्वे तदर्थस्याप्रकृत्यर्थत्वेन सुबर्थानन्वयप्रसङ्गात् अगतिरेवेति चेत् —

उक्तवैयाकरणमतपरिशीलनम्

उच्यते। कथंचिदपि क्लृप्तशक्तिपदात् लक्षणया अभिमतार्थसंभवे समभिव्याहारवैलक्षण्यप्रयुक्तानन्त्यवत्समासेषु अनन्तशक्तिकल्पनायाः गुरुतरायाः अन्याय्यत्वमेव। लक्षणया चेत्थं निर्वाहः संभवति। तथाहि गोपदस्य चित्राभिन्नगोस्वामिलक्षकत्वेपि चित्रापदस्य ह्रस्वतापन्नस्य गोपदव्यवहितपूर्ववर्तिन एव तात्पर्यग्राहतया अन्वयव्यतिरेकाभ्यां च चित्रगुपदजन्यशाब्दबोधे तादृशसमभिव्याहारज्ञानस्य कारणतया च निरूप्यनिरूपकभावापन्नस्वस्वार्थनिष्ठविषयताकशाब्दबोधप्रयोजकाकांङ्क्षाशालित्वरूपा व्यपेक्षा तत्राक्षतैवेति न समासानुपपत्तिः।

तत्पुरुषापेक्षया बहुव्रीहेर्जघन्यताप्रवादश्च व्यर्थत्वकल्पतात्पर्यग्राहकत्वस्य स्वघटकपदे प्रसक्त्या उपपादनीयः। कृतपाक इत्यत्र घञो लक्षणाव्युत्पत्तिवैचित्र्योपगमात् प्रकृत्यर्थान्वितत्वनियमः संकोचनीयः। प्राप्तोदक इत्यत्र उदकपदमेव उदककर्तृकप्राप्तिकर्मलाक्षणिकम्, प्राप्तपदं तात्पर्यग्राहकमिति न काचिदनुपपत्तिः।

यद्वा गोपदस्यैव शक्त्या लक्षणया च गौः स्वामी चार्थ इति न तत्रैकदेशान्वयापत्तिः। एकधात्वर्धयोः फलव्यापारयोरिव एकप्रातिपदिकार्थयोरपि भेदेनान्वयो व्युत्पत्तिवैचित्र्यात् अभ्युपगम्यते। मूलं च तत्र एकदेशानन्वयनियमसहकृतातात्पर्यान्यथानुपपत्तिः। अत एव युगपत् वृत्तिद्वयाङ्गीकरणमपि न विरुध्यते। न चात्र "चित्रगुरस्ति, तामानय" इत्यत्र तत्पदात् गोः बोधापत्तिः। तस्य प्रधानत्वात्। प्रधानत्वं च वृत्तिग्रहमुख्यविशेष्यत्वमेव, न तु शाब्दग्रहमुख्यविशेष्यत्वम्। तथा सति "चैत्रेण गम्यते तमानय" इत्यादौ चैत्रादिबोधानुपपत्तेरिति वाच्यम्। तत्पदवृत्तिज्ञानीयविषयताप्रयोज्यविशेष्यत्वानिरूपिततत्पदवृत्तिज्ञानीयविषयताश्रयत्वस्यैव प्राधान्यरूपत्वात् चैत्रेणेत्यादौ चैत्रादेः प्रकारत्वेपि चैत्रपदार्थे तस्याप्रकारत्वात् प्राधान्यनिर्वाहः। गोः गोपदार्थ एव स्वामिनि प्रकारत्वात् न प्राधान्यप्रसङ्गः। बहुव्रीहेः अधिकवृत्तिग्रहसापेक्षत्वात् तत्पुरुषापेक्षया जघन्यताप्रवादः समर्थनीयः। चित्रापदगोपदयोरुभयोः चित्राभिन्नगोस्वामिलक्षकत्वपक्षश्च व्युत्पत्तिवैचित्र्यात् एकपदार्थयोः अभेदान्वये विरूपोपस्थितेरनपेक्षामभ्युपेत्य कथंचित् उपपादनार्होपि द्विधा तादृशार्थभानस्य अनुभवविरुद्धत्वादितो नादरणीयः।

प्राप्तोदक इत्यत्र धातोः प्राप्तिः क्तप्रत्ययस्य कर्म कर्ता चार्थः। कर्तरि उदकस्य, कर्तुः, प्राप्तौ, प्राप्तेः कर्मणि अन्वयोपगमात् विवक्षितस्य उदककर्तृप्राप्तिकर्मबोधस्य निर्वाहः। विशेषणविशेष्यभावव्यत्यासश्च व्युत्पत्तिवैचित्र्यात् अभ्युपेय इति सर्वमवदातम्।

अथवा परमः सुन्दरः चैत्रस्य गुरुकुलम् इत्यादौ शतशः एकदेशान्वयस्य दृष्टत्वेन एकदेशानन्वयनियमस्य अवश्यसंकोचनीयत्वे, बहुव्रीहिस्थलेपि तत्संकोचो लक्षणा च न दोषावहः। लक्षणायां संकोचे च शक्तिकल्पनागौरवसहकृततात्पर्यान्यथानुपपत्तिर्मूलमस्तीति निर्मूलत्वाभावात्। अत्र पक्षे चोपसर्जनप्राधान्यादिकं यथाश्रुतमपि न क्षतिकरम्। न ह्यत्र प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमसंकोचस्य अदृष्टचरस्य प्रसङ्गः। कृधातोः स्वकीयकृतौ लक्षणा, क्तप्रत्ययस्य कर्मार्थः, पचधातोः पाकः अर्थः, घञः संबन्धिनि लक्षणेत्यभ्युपगमात् कृतपाक इत्यत्र स्वकृतिकर्मपाकसंबन्धित्वेन चैत्रादेः बोधस्य निर्वाहात् । न ह्यत्र पक्षे व्युत्पत्तिद्वयाङ्गीकारप्रसङ्गः, न वा क्लृप्तविशेष्यविशेषणभावव्यत्यासस्य च प्रसङ्गः।

प्राप्तोदक इत्यत्र धातोः स्वकर्मकप्राप्तौ लक्षणा। क्तप्रत्ययस्य कर्ता अर्थः। उदकपदस्य उदकसंबन्धिनि लक्षणा। तथा च स्वकर्मकप्राप्तिकर्त्रुदकसंबन्धित्वेन ग्रामादेरवगतिरुपपद्यते। न चैवमुदककर्तृकप्राप्तिकर्मत्वेन ग्रामादिबोधस्य विवक्षितस्य न निर्वाह इति वाच्यम्। आरूढवानर इत्यादौ स्वकर्मकारोहणकर्तृवानरसंबन्धित्वादिना वृक्षादेर्बोधस्य तत्र तत्रोपपादितत्वेन तत्तुल्ये अत्रापि तथा-

विधार्थविवक्षाया एवोचितत्वेन उक्तार्थविक्षाया एवाप्रामाणिकत्वात्। प्रामाणिकत्वे वा उदकपदस्य कर्मणि, क्तप्रत्ययस्य प्राप्तौ, धातोः उदककर्तृत्वे लक्षणाङ्गीकारात् उदककर्तृकप्राप्तिकर्मबोधस्य संपादनीयत्वात्।

अत्र च "प्रणाल्या प्राप्तोदकः" इत्यत्र कारकतृतीयार्थस्य प्रणालीकरणत्वस्य स्वनिरूपकप्राप्तिनिरूपितत्वसंबन्धेन धात्वर्थभूतनिरुक्तकर्तृत्व एवान्वयो वाच्यः। कारकविभक्तेः धातुसाकांङ्क्षत्वात्। उक्तस्य संसर्गता च व्युत्पत्तिवैचित्र्यात् अभ्युपगन्तव्येति सर्वनिर्वाहात् नाभ्युपगन्तव्या समासशक्तिः। तथा च राजपुरुष इत्यत्र राजपदस्य राजसंबन्धिनि लक्षणोक्तिः उपपन्नैवेति।

अत्र वैयाकरणस्य आक्षेपः

अथ समासशक्त्यनभ्युपगमे "सविशेषणानां वृत्तिर्न, वृत्तस्य विशेषणयोगो न" इति वार्तिकस्य "भवति वै नित्यसापेक्षे समासः" इति वार्तिकस्य चानुवादकत्वम् इतरथा विधायकत्वं स्यादिति लाघवात् समासशक्तिरभ्युपगन्तव्या। तथाहि -ऋद्धस्य राजमातङ्गः इति वाक्यस्य ऋद्धाभिन्नराजमातङ्गादिबोधकतायां साधुतावारकस्य पदार्थैकदेशे पदार्थान्वये वाक्यमसाधु, यथा नित्यो गौरिति न्यायस्य अनुवादकं प्रथमं वार्तिकम्।राजादेः पदार्थैकदेशत्वात् भवति नित्यसापेक्ष एकदेशान्वयो यथा चैत्रस्य नप्तेति न्यायस्यानुवादकं द्वितीयं वार्तिकम्। समासशक्त्यभावे राजादेः पदार्थत्वात् उक्तन्यायस्य तत्राप्राप्तत्वान्न तथा। न च तादृशस्थले अन्वयप्रयोजकाकाङ्क्षाया अभावात् तादृशान्वयबोधस्यैवासंभवात् असाधुत्वमिति वाच्यम्। समासस्थले लुप्तविभक्त्यनुसंधानेनान्वयोपगमपक्षे सर्वदैव तदभावपक्षेपि यदा लुप्तविभक्त-यनुसंन्धानं तदा आकाङ्क्षायाः सत्वात् अन्वयबोधस्य वारयितुमशक्यत्वात्। शोभने वनेचरः, विरूपायाः दास्याः पुत्रः, शुक्ले कण्ठेकालः, मिताया वाचस्पतिः इत्याद्य-लुक्समासस्थले सहजत एव आकांङ्क्षाप्रतिपत्तेः अन्वयबोधस्य दुर्वारतापत्तेः इति चेत् न। अनन्ताप्रामाणिकशक्तिकल्पनापेक्षया विधायकत्वे गौरवाभावात्। "सापेक्षमसमर्थं भवति" इति स्मृत्या समासप्रयोजकसामर्थ्यविपरीतम-सामर्थ्यमतिदिशन्त्या लभ्यस्यार्थस्यानुवादकताया एवोक्तवार्तिकस्याभ्युपगमाच्च।

अथ किं नाम सापेक्षत्वमिति चेत् — समासाघटकपदार्थान्विताप्रधानी-भूतस्वार्थकत्वम्। प्राधान्यं च प्रकृतसमासजन्यबोधे मुख्यविशेष्यत्वम्। भवति चैवं ऋद्धस्य राजमातङ्गाः, शोभने वनेचराः इत्यादेः समासघटकर्द्धशोभनादिपदार्था-न्विताप्रधानीभूतराजवनादिस्वार्थकत्वस्य राजवनादिपदे सत्वेनासमर्थतया तस्य पुरुषादिपदेन समासासंभवेन असाधुतया प्रयोगानर्हत्वम्। अन्वितत्वं च अन्वितत्वेन तात्पर्यविषयत्वम्। तेन ऋद्धस्य राजमातङ्गा इत्यत्र ऋद्धस्य राज्ञः सर्वदैव

ऋद्धान्विततया तात्पर्याविषयत्वे सत्यपि सापेक्षत्वस्य न प्रसङ्गः। अप्रधानीभूतेति विशेषणात् शोभनो राजपुरुष इत्यत्र पुरुषपदस्य न सापेक्षत्वप्रसङ्गः।

न च दर्शनीयं राजपुरुषमानयेत्यादौ पुरुषस्य द्वितीयार्थकर्मत्वे विशेषणतया मुख्यविशेष्यत्वाभावात् सापेक्षत्वं स्यादिति वाच्यम्। समासजन्यावान्तरवाक्यार्थबोधे मुख्यविशेष्यत्वस्य पुरुषे संभवात्। यदि चावान्तरवाक्यार्थबोधस्य मुख्यविशेष्यकस्य न संभवः, निर्विभक्तिकस्य राजपुरुषपदस्य निराकाङ्क्षत्वात् अमन्तस्य तदुपस्थितकर्मत्वविशेष्यकबोधसाकाङ्क्षत्वेन तद्विशेष्यकबोधस्यैव संभवात् इति विभाव्यते, तदा समासघटकपदप्रयोज्यविशेष्यतानिरूपितप्रकारत्वानवच्छिन्नविषयत्वस्य प्राधान्यरूपत्वं वक्तुं शक्यम्। पुरुषस्य समासबहिर्भूतद्वितीयार्थे कर्मत्वे प्रकारत्वात् प्राधान्यम्। नित्यसापेक्षस्य समासघटकपदसापेक्षत्वेपि नासामर्थ्यम्। तेन चैत्रस्य गुरुकुलं, चैत्रस्य दासभार्या, देवदत्तस्य पुत्रधनम्, पितृधनम्, नप्तृधनम्, शरैः शातितपत्रः इत्यादौ गुरुशातितादिपदस्य सापेक्षतायामपि नासामर्थ्यम्। गुरुत्वादेः सनिरूपकत्वेन शातनादेः क्रियारूपत्वेन प्रतियोगिकारकाभ्यां नित्यसापेक्षत्वात्। नित्यसापेक्षत्वं च स्वार्थान्वय्यर्थजिज्ञासात्मकाङ्क्षानियततत्प्रतिबन्धकविरहसहकृतस्वार्थप्रतिपत्तिकत्वम्। गुर्वादिपदार्थे ज्ञाते असति च प्रतिबन्धके कस्य गुरुः दासः पुत्रो वेत्यादि जिज्ञासायाः, शातितपदात् शातनक्रियाज्ञाने जाते कैः इत्यादिकरणकारकजिज्ञासायाः नियमेनोत्पादात् गुर्वादिपदस्य तथात्वम्।

अत्र केचिदाहुः — समासघटकपदार्थान्विते अन्वयः तादात्म्यरूपो ग्राह्यः। ऋद्धस्य राजमातङ्गा इत्यत्र ऋद्धपदार्थस्य राज्ञि अभेदेनैवान्वयस्य विवक्षितत्वात् सापेक्षत्वम्। चैत्रस्य गुरुकुलमित्यादौ गुरुपदार्थे समासबहिर्भूतपदार्थस्य चैत्रनिरूपितत्वादेः भेदेनैवान्वयान्न सापेक्षत्वम्।

अन्ये त्वाहुः — चैत्रस्य गुरुकुलमित्यादेः साधुत्वोपपादनाय सापेक्षत्वशरीरे समासघटकपदे प्रतियोगिपदकारकपदातिरिक्तत्वं विशेषणमुपादेयम्।

"प्रतियोगिपदादन्यत् यदन्यत् कारकादपि।
वृत्तिशब्दैकदेशार्थे न तस्यान्वय इष्यते।।"

इत्यभियुक्तोक्तेः। प्रतियोगित्वं च स्वग्रहत्वव्यापकविषयतासमानाधिकरणतत्प्रयोज्यजिज्ञासाविषयतावच्छेदकविशेषधर्मावच्छिन्नत्वम्। गुरुत्वादिकं चात्र मते सर्वं निरूपकघटितमेवाभिप्रेतम्। तथाहि स्वबुभुत्सितार्थप्रतिपत्तिफलकोपदेशकर्तृत्वं गुरुत्वम्। स्वगर्भबुभुत्सितत्वप्रवेशात् उपदेशादन्यस्य अन्यबुभुत्सितार्थप्रतिपत्तावपि न तन्निरूपितगुरुत्वव्यवहारः।

पुनः समासशक्त्यङ्गीकार इत्याक्षेपः

अथ समासशक्त्यस्वीकारे ब्राह्मणः पण्डितः पण्डितो ब्राह्मण इत्यत्रेव पण्डितब्राह्मण इति समासेपि उद्देश्यविधेयभावेन शाब्दबोधापत्तिः। तत्प्रयोजिकायाः असंसृष्टोद्धेश्यविधेयोपस्थित्यात्मकपृथगुपस्थितेः सत्वात्। समासशक्त्यभ्युपगमे च पण्डिताभिन्नब्राह्मणोपस्थितौ समासशक्तिजन्यायाम् उभयोः संसृष्टयोरेव विषयत्वात् पृथगुपस्थितेरभावात् नोद्देश्यविधेयभावेनान्वयबोधः।

अत एव "वषट्कर्तुःप्रथमभक्षः" इत्यत्र वषट्कर्तृविशिष्टभक्षोद्देशेन प्राथम्यस्य न विधिः, अपि तु प्राथम्यविशिष्टभक्षान्तरमेव विधीयत इति मीमांसासिद्धान्तोपि संगच्छते। अन्यथा उद्देश्यविधेयभावे प्रयोजिकायाः पृथगुपस्थितेः सत्वात् भक्षणस्य प्रधानार्थत्वेन तत्र वषट्कर्तुः अन्वयेपि सापेक्षत्वाभावात् तादृशविधाने क्षत्यभावादसंङ्गतिः स्यात्। न चैवं "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" "सप्तदशारत्निर्वाजपेयस्य यूपः" इत्यत्र साप्तदश्यादेः विधेयत्वोक्तिः मीमांसकानामसंगता स्यादिति वाच्यम्। अतिदेशात् उपदेशस्य प्राबल्येन अतिदेशालोचनात् प्राक् उपदेशेन लौहित्यविशिष्टोष्णीषसप्तदशारत्निविशिष्टयूपादिविधाने पश्चादतिदेशाकलनात् प्राप्ताप्राप्तविवेकेन लौहित्याद्यंश एव विधेयत्वव्यवस्थितेः, तदभिप्रायकत्वात् उक्तोक्तेः असंगत्याभावात्। वषट्कर्तृभक्षणस्य प्राप्त्यभावात् न ह्येवं तत्रापि गतिरिति चेत् —

तत्र समाधानम्

उच्यते। समासस्थले उद्देश्यविधेयभावेन बोधो न जायत इत्यस्य वासनामात्रविजृम्भितत्वात्। सत्यां पृथगुपस्थितौ तादृशबोधाभ्युपगमे क्षत्यभावात्। समासशक्त्यनङ्गकर्तृमीमांसकानामुक्तसिद्धान्ते योजनान्तरस्यैव वक्तव्यत्वात्। समासशक्त्यभ्युपगमे प्रसक्तस्य, तत्पुरुषे लक्षणायाः कर्मधरये च अलक्षणायाः निषादस्थपत्यधिकरणीयकर्मधारयाभ्युपगममूलकनिषादविद्योपगमसिद्धान्तमूलभूतायाः असंभवेन तत्सिद्धान्तविरोधस्य यथा वैदिकसमासस्थले तत्पुरुषत्व कर्मधारयत्वान्यतरसंदेहे कर्मधारयत्वमेवेति अनादिनियममूलकतात्पर्यबुद्धेः तत् सिद्धान्तमूलत्वमभ्युपेत्य, निषादाभिन्नस्थपतिः समासार्थ उत निषादभिन्नस्त्रैवर्णिको निषादानां स्थपतिः समासार्थ इति संदेहे निषादभिन्नोपस्थितिकल्पनागौरवग्रहनिबन्धनकर्मधारयार्थतात्पर्यबुद्धेर्वा तत्सिद्धान्तमूलत्वभ्युपेत्य परिहारः क्रियते भवद्भिः, तथा अस्माभिरपि वैदिकसमासस्थले किं समासैकदेशार्थस्य विधेयत्वमुचितं किं वा विशिष्टार्थस्य तदुचितमिति संदेहे विशिष्टार्थस्यैवेति नियममूलकविशिष्टार्थविधेयत्वानादितात्पर्यग्रहमूलकत्वमुक्तसिद्धान्तस्याभ्युपेत्य वषट्कर्तृविशिष्टभक्षणस्य अप्राप्तत्वेन उद्देश्यत्वासंभवात् भक्षणमात्रमुद्दिश्य प्राथम्यवषट्कर्त्रोर्विधाने वाक्यभेदप्रसंङ्गेन

गौरवं स्यात् इत्यनुसन्धानमूलकविशिष्टविधितात्पर्यमूलकत्वं वा तत्सिद्धान्तस्याभ्युपेत्य स संदेहो अस्माभिरपि परिहरणीयः।

वस्तुतो भवद्भिरपि अयमेव परिहारो अभ्युपेयः। तथाहि समासशक्तिस्वीकारेपि समासघटकतत्तत्पदार्थवृत्तिग्रहसहकृतविशिष्टग्रहजन्योपस्थितिरेव शाब्दबोधकारणमङ्गीक्रियते नवीनवैयकरणैः। वाक्यात् समासे विशेषश्च वाक्यस्थले-पृथगुपस्थितयोरर्थयोः शाब्दबुद्धावेव संसृष्टतया भानम्, समासस्थले चोपस्थितावपि इति। प्रत्येकपदवृत्तिग्रहापेक्षाभ्युपगमे मूलं च समासघटकराजपदादेः चन्द्राद्यर्थकत्वग्रहे नृपसंबन्धिपुरुषे समुदायशक्तेः अग्रहः, ग्रहेपि वा शाब्दबोधाननुभवः, राजपुरुषपदशक्यसंबन्धित्वेन शुद्धघटादिग्रहे समासस्थले अविशिष्टघटादिशाब्दस्य अननुभविकस्य प्रसङ्गश्च। समुदायशक्तिग्रहप्रयुक्तविशिष्टविषयकत्वोपगमे च तथात्वे विशिष्टस्य प्रकृत्यर्थतया तत्र विभक्त्यर्थान्वयाङ्गस्यादिः प्राक्प्रदर्शितयुक्तिसंघातश्च मूलमिति। तथासति समासस्थलेपि पृथगुपस्थितेः संभवात् उद्देश्यविधेयभावेन बोधस्य दुर्वारतया तत्सिद्धान्तविरोधस्य दुर्वारत्वात्।

एवं च उक्तरीत्या समासशक्तिपरिष्कारे करणीये न्यायनये समासस्थलीयशाब्दबोधसामग्र्यामुपस्थितिद्वयप्रवेशेन गौरवमिति शङ्कापि निरस्ता वेदितव्या। प्रत्येकशक्तिग्रहजन्यत्वद्वयं समुदायशक्तिजन्यत्वं विशिष्टविषयकत्वं च निरूप्यनिरूपकभावव्यत्यासप्रयुक्तविषयतात्रयरूपमिति षण्णां कारणविशेषणत्वे व्यासज्यवृत्यवच्छेदकत्वानङ्गीकारेण विशेष्यविशेषणभावे विनिगमनाविरहात् बहुतरगुरुधर्मावच्छिन्नकारणत्वप्रसङ्गेन समासशक्तिवाद एव गौरवात् लाघवेन उपस्थितिद्वयस्य कारणत्वे व्यवस्थिते सामग्रीप्रतिबन्धकत्वादौ गौरवस्य फलमुखत्वेनादोषादिति।

व्यपेक्षावादे युक्त्यन्तरम्

अत्रेदमपि चिन्तनीयम् — समासस्याशक्तत्वे शशशृङ्गादिपदानां व्यपेक्षारूपसामर्थ्यमादाय समाससंभवः। समासशक्तिपक्षे तु विशिष्टस्य शशशृङ्गादिपदार्थस्यालीकतया शक्त्यसंभवेन एकार्थीभावस्याभावात् समासानुपपत्तिः प्रातिपदिकसंज्ञानुपपत्तिश्च। न चासत्ख्यात्युपनीते तत्र शक्तिसंभव इति वाच्यम्। ज्ञानकारणेन्द्रियादिव्यापाराभावेन असत्ख्यातेरेवासंभवात्। किं च शक्तेरज्ञाताया अनुपयोगित्वेन ज्ञानं तस्या अपेक्षितम्। न च तत् संभवति। तथाहि — परबुद्धिविषयत्वेन विशेषत उपस्थिते तत्र शक्तिग्रहः सामान्यत उपस्थिते वा। विशेषत उपस्थितिरपि बुद्धेः सनिरूपकत्वेन बुद्धिनिरूपणे अवश्यं भासमानत्वेन व्यवहारे शाब्दबुद्धावुन्नीयमानायां विशेषणतया विषयत्वेन वा। तत्र नाद्यः, परबुद्धेर-

प्रत्यक्षत्वात्। न द्वितीयः, अलीके व्यवहाराभावात्। नापि शशशृङ्गादिः शब्दः उच्चारयितृतात्पर्यकः बालशुकादिशब्दभिन्नशब्दत्वात् इत्यनुमानेन तात्पर्यसिद्धौ तात्पर्यं सविषयकमित्यनुमानेन तात्पर्यविषये सिद्धे शशशृङ्गशब्दसंकेतग्रह इति सामान्यत उपस्थितिपक्षो युक्तः। तादृशसंकेतग्रहस्य शाब्दबोधानुपयोगित्वात्। अन्यथा गोत्वविशिष्टे शक्तिमजानतः सामान्यतः शक्तिग्रहात् शाब्दबोधप्रसङ्गात्।

न चान्यत्र तथा मास्तु। निधर्मकेलीके तात्पर्यविषयत्वोपलक्षित एव शक्तिग्रहः शाब्दबोधोपयोगीति विशेषधर्मं विनैव कल्पनामात्रविषयः शशशृङ्गादिपदवाच्य इति वाच्यम्। कूर्मरोमशशशृङ्गविकल्पयोरविशेषप्रसङ्गेन तद्विषययोः व्यावर्तकाभावेन कूर्मरोमादिशशशृङ्गादिपदजन्यबुद्धेर्वैलक्षण्यस्यानुभवसिद्धस्यापलापप्रसङ्गात्।

अत एव तेषु तेष्वर्थेषु समासं विदधता व्याकरणेन तेष्वर्थेषु शक्तिरेव प्रतिपपाद्यते। अन्यथा व्याकरणात् शक्तिरेव न सिध्येत् इत्यवश्यं शशशृङ्गादिवाच्यमेषितव्यमिति निरस्तम्। तत्र शक्तिग्रहस्यैवासंभवात् असति बाधके तस्य शक्तिग्राहकत्वादित्यलमतिविस्तरेण।।

समासविभागः

शब्दशक्तिप्रकाशिकायां समासस्य नित्यानित्यभेदेन द्वैविध्यम्[२०]

स चायं षड्विधः कर्मधारयादिप्रभेदतः।
यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः।।

स चायं निरुक्तः समासः कर्मधारयाद्विगुतत्पुरुषाव्ययीभावबहुव्रीहिद्वन्द्वभेदात् षड्विधः, यश्च कुम्भकारादिरप्युपपदसंज्ञकः समासोऽस्ति तेन समं समासः सप्तविधः। संकाशनिभनीकाशादीनामिव कारादीनामपि शब्दानामुपपदार्थान्वितस्यैव स्वार्थस्य बोधकतया तथाविधनामान्तत्वमेव चैतस्य समासान्तराद्विशेषः।

ननु यदि षड्विधः सप्तविधो वा समासः तदास्य पञ्चविधत्वोक्तिः प्राचामसंगतेत्यतस्तामुपपादयति —

पूर्वमध्यान्त्यसर्वान्यपदप्राधान्यतः पुनः।
प्राच्यैः पञ्चविधः प्रोक्तः समासो वाग्भटादिभिः।।

(१) कश्चित् समासः पूर्वपदार्थविशेष्यकान्वयबोधजनकतया पूर्वपदप्रधान उच्यते, यथा प्राप्तो जायां प्राप्तजायः, अर्धं पिप्पल्याः अर्धपिप्पली, पूर्वः कायस्य पूर्वकायः

---

[२०] पृ. १८२ ..

इत्यादिकः तत्पुरुषः; यथा वा उपकुम्भाद्यव्ययीभावः पुरुषसिंहादिकर्मधारयश्च। (२) कश्चित् मध्यपदार्थविशेष्यकधीजनकतया मध्यपदप्रधानः यथा घटानधिकरणं प्रतियोगितानवच्छेदकम् इत्यादिकस्तत्पुरुषः। घटस्य न अधिकरणमित्यादिविग्रहे घटाधिकरणभिन्नमित्येवं मध्यनञ्पदार्थस्यैव विशेष्यत्वात्। (३) कश्चित् अन्तिम-पदार्थविशेष्यकधीजनकत्वात् अन्त्यपदप्रधानः, यथा राजपुरुषादिकः तत्पुरुषः, नीलोत्पलादिकः कर्मधारयः, द्विगार्ग्याद्यव्ययीभावश्च। (४) कश्चित् समासघटकसर्व-पदार्थविशेष्यकबुद्धिहेतुत्वात् सर्वपदप्रधानः यथा इतरेतरद्वन्द्वः द्वन्द्वमात्रं वा। (५) कश्चित् स्वघटकापेक्षया यः अन्यपदार्थः तद्विशेष्यकज्ञानजनकत्वात् अन्य-पदार्थप्रधानः, यथा बहुव्रीहिः खलेयवाद्यव्ययीभावश्च। तदेवं पञ्च भेदानादायैव पञ्चविधत्वं प्राच्यैरुक्तम्, अतो न विरोधः।

नित्यानित्यभेदेन समासस्य द्वैविध्यमप्यस्ति। यदुक्तं जयादित्येन —

विभक्तिमात्रप्रक्षेपान्निजान्तर्गतनामसु।
स्वार्थस्याबोधबोधाभ्यां नित्यानित्यौ समासकौ।।

स्वान्तर्गतनामसु विभक्तिमात्रप्रक्षेपेण यल्लभ्यस्यार्थस्य अबोधः स नित्यः समासः यथा कृष्णसर्प-निर्मक्षिक-असुरादिः। कृष्णः सर्पः मक्षिकायाः निः न सुर इत्यादितः तल्लभ्यस्य वैजात्यादेः अग्रहात्। यल्लभ्यस्य च बोधः स अनित्यसमासः। यथा राजपुरुषपूर्वकायादिः। तल्लभ्यस्य अर्थस्य राज्ञः पुरुषः पूर्वं कार्यस्येत्यादि वाक्यादपि प्रतीतेः।

विग्रह एव समासलभ्यार्थस्य बोधकत्वे तन्त्रम्, न तु समासे विग्रहार्थस्य। विग्रहलभ्ययोः लिङ्गसंख्ययोः बोधकविरहेण समासाबोध्यत्वात्। यत्र समासे तयोः बोधकसद्भावः तत्र तयोरवगमोऽपि। यथा जरतीचित्रगुः जनः प्रियतिसा पुरुषः इत्यादौ स्त्रीत्वस्यावगमः। स्त्रीप्रत्ययतिस्रादेशयोः तद्बोधकयोः सद्भावात्। यथा वा अक्षपरि शलाकापरि प्रिययुवया हस्त्यश्वमित्यादावेकत्वादेः। एकस्याः शलाकायाः द्यूते-ऽन्यथापातनमित्यर्थे शलाकापरि, प्रियौ युवां यस्यास्तया प्रियुवया, हस्तिनामश्वानां च समाहार इत्यर्थे हस्त्यश्वम् इति क्रमशः एकत्वे द्वित्वे बहुत्वे च अव्ययीभावस्य युवादेशस्य समाहारद्वन्द्वस्य च विधानात्।

तदुक्तमभियुक्तैः —

संख्या तु व्यञ्जकाभावादव्यक्ता प्रातरादिवत्।
यत्र तु व्यञ्जकं किञ्चित् तत्र संख्या प्रकाशते।।
शलाकापरि हस्त्यश्वं पूर्वकायोऽर्धपिप्पली। इति।

पूर्वादेरर्धस्य च ङसर्थमेकत्वमन्तर्भाव्यैव अवयविवाचकेन सह तत्पुरुषस्य अनुशिष्टत्वात्।

समासविभागः भूषणसारे

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः।।

सुबन्तस्य सुबन्तेन समासः, यथा राजपुरुष इत्यादिः। सुबन्तस्य तिङन्तेन समासः, पूर्वपदं सुबन्तम् उत्तरपदं तिङन्तम् यथा पर्यभूषयत्। अनुव्यचलत्। "गतिमता उदात्तवता तिङापि समासः" इति वार्तिकात् समासः। सुपां नाम्ना समासः यथा कुम्भकार इत्यादिः। "उपपदमतिङ्"[२१] इति समासः। स च "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषया भवति। अत्र उत्तरपदे सुबुत्पत्तेः प्रागित्यर्थः। सुपां धातुना समासः यथा कटप्रूः, आयतस्तूः। उत्तरपदं धातुमात्रं न सुप्तिङन्तम्। "क्विब्वचिप्रच्छयायतस्तुकटप्रुजुश्रीणां दीर्घश्च" इति वार्तिकात्। तिङां तिङा समासः यथा पिबतरवादता पचतभृज्जता। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकादिगणान्तर्गणसूत्रात् समासः। तिङां सुबन्तेन समासः यथा जहिस्तम्बः। "जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्।

अयं षड्विधोऽपि समासः "सह सुपा"[२२] इत्यत्र योगविभागेन भाष्ये व्युत्पादितः।

प्राचीनानां मतम्

समासस्तु चतुर्धेति प्रायोवादस्तथापरः।
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च।।

भौतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः। समासश्चतुर्विधः अव्ययीभावद्वन्द्वतत्पुरुषबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः दृन्भूः करभूः आयतस्तूः वागर्थाविव इत्याद्यसंग्रहात्।

तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। उभयपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहिः इत्यादिलक्षणमपि प्रायिकम्। उन्मत्तगङ्गं सूपप्रति अर्धपिप्पली द्वित्राः शशकुशपलाशमित्यादौ व्यभिचारात् (अतिव्याप्तेः)

---

[२१] पा.सू. २.२.१०
[२२] पा.सू. २.१.४

उन्मत्ता गङ्गा यस्मिन् देशे इत्यर्थेऽव्ययीभावसमासः। "अन्यपदार्थे च संज्ञायाम्"[२३] इति सूत्रात्। तत्रान्यपदार्थप्राधान्यसत्त्वात् बहुव्रीहिलक्षणस्यातिव्याप्तिः। पूर्वपदार्थ-प्राधान्याभावात् अव्याप्तिश्च। सूपप्रति = सूपस्य लेश इत्यर्थः। "सुप् प्रतिना मात्रार्थे"[२४] इति समासः अत्रोत्तरपदार्थप्राधान्यसत्त्वात् तत्पुरुषलक्षणस्यातिव्याप्तिः। अर्धं पिप्पल्याः अर्धपिप्पलीति तत्पुरुषसमासः। अत्र पूर्वपदार्थप्राधान्यात् अव्ययीभाव-लक्षणस्यातिव्याप्तिः। तत्पुरुषलक्षणस्याव्याप्तिश्च। द्वौ वा त्रयो वा द्वित्राः "संख्य-याव्यय"[२५] इति बहुव्रीहिः। अत्र उभयपदार्थप्राधान्यात् द्वन्द्वलक्षणस्यातिव्याव्तिः। शशकुशपलाशमिति समाहारद्वन्द्वे समाहाररूपान्यपदार्थप्राधान्यसत्त्वात् बहुव्रीहि-लक्षणस्यातिव्याप्तिः द्वन्द्वलक्षणाव्याप्तिश्च।

सिद्धान्ते तु अव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि लक्षणं द्रष्टव्यम्।

लघुमञ्जूषायां समासलक्षणं समासविभागश्च

समासत्वं संकेतविशेषसम्बन्धेन समासपदवत्त्वम्। अयं समासबोध्यो भवतु इति यः पाणिन्यादेः संकेतः तेन सम्बन्धेन समासपदवत्त्वमिति यावत्। समासपद-बोध्यत्वप्रकारकपाणिन्यादिगतेच्छविशेष्यत्वं स्वबोध्यत्वप्रकारकपाणिन्यादीच्छीय-विशेष्यतासम्बन्धेन समासपदवत्त्वं वा समासत्वमिति फलितोऽर्थः।

यत्तु अर्थबोधायाननुसन्धीयमानविभक्तिकपूर्वपदकनामसमुदायत्वं समासत्वम्। यथा राजपुरुषः इत्यादिः। अत्र राजपदोत्तरषष्ठीविभक्तिर्लुप्ता। सा च नानुसन्धीयते। अथाप्यर्थबोधो जायते। अतश्चाननुसन्धीयमानविभक्तिकं पूर्वपदं राजपदम्। तद्घटितः नामसुदायः राजपदपुरुषपदसमुदायः राजपुरुषः समासः इति।

तन्न। असमासे दधि मधुरमिति नामसमुदायेऽतिव्याप्तेः। तत्रापि दधिपदोत्तर-विभक्त्यनुसन्धानं विनाप्यर्थबोधात्। तत्र लुप्तविभक्तिस्मरणपूर्वकमेव बोध इति चेत् राजपुरुषादावपि तुल्यम्। लोपमजानतो बोध इत्यप्युभयत्र तुल्यम्। अपि च "श्रुतेरिवार्थं स्मृतिरन्वगच्छत्" इत्येतद्वाक्यघटके इवार्थम् इति समुदायेऽतिव्याप्तिश्च। अननुसन्धीयमानविभक्तिकपूर्वपदघटितत्वात् इति। किं च पर्यभूषत् पचतभृञ्जत इति तिङन्तघटितसमासेऽव्याप्तिः। नामसमुदायत्वविरहात्। अतः पूर्वोक्तमेव लक्षणं साधु। समासो द्विविधः तत्पुरुषादिविशेषसंज्ञारहितः

---

[२३] पा.सू. २.१.२१
[२४] पा.सू. २.१.९
[२५] पा.सू. २.२.२५

'सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः।।

इति विहितः, विशेषसंज्ञायुक्तश्चेति। अन्त्यश्चतुर्विधः अव्ययीभावतत्पुरुषबहुव्रीहि-द्वन्द्वभेदात्। संकेतविशेषसम्बन्धेन तत्पुरुषादिपदवत्त्वं तत्पुरुषत्वादिकम्। सुपां सुपा इत्यस्योदाहरणं — पूर्वं भूतो भूतपूर्वः। पूर्वमिति क्रियाविशेषणं पूर्वकालवृत्तिपरम्। भूधातोः सत्ता उत्पत्तिर्वा अर्थः। पूर्वकालवृत्तिसत्ताश्रयः पूर्वकालवृत्त्युत्पत्त्याश्रय इति वा बोधः। द्विर्बद्धं सुबद्धं भवतीति न्यायेन पूर्वशब्देनोक्तेऽपि अतीतत्वे क्त. प्रत्ययः। विस्पष्टं पटुः विस्पष्टपटुः। विस्पष्टपटुत्ववानिति बोधः। विस्पष्टमिति पटुत्वविशेषण-तया नपुंसकम्। अन्येषामुदाहरणं मञ्जूषायां नास्ति। भूषणसारे वर्तते।

अव्ययीभावः मणिग्रन्थानुसारम्[२६]

तत्त्वचिन्तामणौ समासवादे अव्ययीभावमधिकृत्य एवं निरूपितम् — उपकुम्भमित्याद्यव्ययीभावः अर्धपिप्पली इत्यादिश्च तत्पुरुषः पूर्वपदार्थप्रधान एव। कुम्भस्य समीपे पिप्पल्या अर्धे तात्पर्यात्। अतस्तत्रोत्तरपदे षष्ठ्यर्थे कुम्भसम्बन्धे पिप्पलीसम्बन्धे च लक्षणा। तस्य आश्रयतया उपपदार्थे समीपे अर्धपदार्थे चान्वयः। अतस्तत्र समासे न शक्तिः इत्येतावदेवोक्तम्।

अव्ययीभावः शब्दशक्तिप्रकाशिकायाम्[२७]

उत्तरार्थान्वितस्वार्थाव्ययपूर्वस्तु यो भवेत्।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः।।

उत्तरपदार्थान्वितस्वार्थबोधकाऽव्ययपूर्वपदकः स्त्रीपुंलिङ्गकार्थविधुरः समासः अव्ययी-भाव इत्युच्यते। "गृहे निर्मक्षिकम्" "उपकुम्भम्" इत्यादौ हि मक्षिकायाः अभावः, कुम्भस्य सामीप्यं च निः उप इत्यादिना अव्ययेन पूर्वभागेन बोध्यते। अव्ययपूर्व-पदकत्वोक्त्या अर्धशरीरमित्यादौ उत्तरशरीरपदार्थान्वितस्वार्थबोधकत्वस्य अर्धपदे सत्त्वेऽपि तस्याव्ययत्वाभावात् अव्ययपूर्वपदकत्वाभावात् नार्धशरीरमित्यस्याव्ययी-भावसमासत्वम्। स्त्रीपुंलिङ्गकार्थविधुरत्वोक्त्या "निर्मक्षिका भूमिः" निर्मनुष्यो देशः" इत्यादौ मक्षिकादेः अभाववत्त्वं बोधयन्नपि निर्मक्षिकादिस्तत्पुरुषः न तादृशार्थे स्त्रीपुंलिङ्गकार्थविधुर इति नाव्ययीभावः।

---

[२६] मणि. पृ. ७७५
[२७] श.श.प्र. पृ. २३९

ननु एकस्याक्षस्य शलाकाया वा द्यूतेऽन्यथापातनमित्यर्थे अक्षपरि, शलाकापरि इत्यव्ययीभावे अव्याप्तिः। तस्याव्ययगर्भत्वेऽपि अव्ययपूर्वपदकत्वाभावात्।

एवं द्वौ गार्ग्यौ इत्यर्थे "द्विगार्ग्यम् गच्छतः" इत्यादौ, द्वाभ्यां दण्डाभ्यामित्यर्थे "द्विदण्डि प्रहरति" इत्यादौ, तिसृणां यमुनानां समाहार इत्यर्थे "त्रियमुनं स्नाति" इत्यादौ, लोहिता गङ्गा यस्मिन्नित्यर्थे — "लोहितगङ्गं देशः" इत्यादौ, दण्डेन मिथः प्रहृत्य रणं वृत्तमित्यर्थे "दण्डादण्डि रणम्" इत्यादौ, केशेषु मिथः प्रगृह्य वृत्तमित्यर्थे "केशाकेशि युद्धम्" इत्यादौ, खले यवा यदा, संहता यवा यदा, तिष्ठन्तो गावो यदा इत्याद्यर्थे "खलेयवम्, संहतयवम्, तिष्ठद्गु वा कालः" इत्यादौ द्विगार्ग्य-द्विदण्ड्यादिष्वप्यव्याप्तिः। तेषु अव्ययगर्भत्वस्याप्यभावात् अतः प्रकारान्तरेण लक्षणमाह —

अमादेशं विना श्रूयमाणषष्ठी न बोधिका।
स्वार्थे यदर्थस्य यद्वा सोऽव्ययीभाव इष्यते।।

अमादेशं विना श्रूयमाणैव षष्ठी स्वार्थे यत्समासार्थस्य अन्वयबोधं प्रति असमर्था स एव वा अव्ययीभावः। "स्निग्धस्योपगङ्गं पवित्रत्वम्" इत्यत्र (स्निग्धस्य गङ्गासमीपस्य पवित्रत्वम् इत्यन्वये) स्निग्धपदोत्तरं श्रूयमाणया षष्ठ्या समीपादेः सम्बन्धः अमादेशवशादेवानुभाव्यत इति लक्षणसमन्वयः। कृतयोरक्षपरि व्यर्थत्वमित्यादौ कृतयोरेकाक्षान्यथापातनयोर्निष्फलत्वमित्यर्थे लुप्तषष्ठ्यैव पातनस्य सम्बन्धप्रत्याय-नादव्याप्तिः। तद्वारणाय श्रूयमाणैवेति एवकारपर्यन्तनिवेशः।

अनुगङ्गेन संचारः, उपगङ्गेषु पूतत्वम्, उपकुम्भादानीत इत्यादावमादेशं विनापि श्रूयमाणाभिः तृतीयासप्तम्यादिभिः अव्ययीभावार्थस्य करणत्वाधिकरणत्वादिकं बोध्यत इति सुप् इत्यनुक्त्वा षष्ठीत्युक्तम्।

अव्ययीभावः लघुमञ्जूषायाम्[२८]

अधिहरि —हरौ इत्यधिहरि भक्तिः। हर्यधिकरणिका भक्तिरिति बोधः। अधिः सप्तम्यर्थवाचकः।

उपकृष्णम् —उपशब्दः समीपवाचकः। कृष्णसमीपमित्यर्थः। अत्राव्ययानां वाचकत्वादेव "पूर्वपदार्थप्रधानोऽव्ययीभावः" इत्युत्सर्गस्य निर्वाहः। द्योतकत्वे हि तेषां द्योत्यार्थस्य विशेषणताया एव न्याय्यत्वात् उत्सर्गबाधः स्पष्ट एव। स्पष्टं चेदमत्रैव भाष्ये।[२९]

---

[२८] पृ. १४२२-१४२४
[२९] पा.सू. २.१.६

एतेन कुम्भादिपदानां तत्समीपे लक्षणा उपादिकं तात्पर्यग्राहकमित्यपास्तम्। किं च प्रजयतीत्यादौ द्योतकस्य प्रादेः द्योत्यार्थप्रकर्षादिविशेषणकबोधे कारणत्वम्, उपकुम्भमित्यादौ तु द्योत्यार्थसमीपादिविशेष्यकबोधे कारणत्वमिति कार्यकारण-भावद्वयकल्पने गौरवम्।

अतिनिद्रम् — निद्रा संप्रति न युज्यत इत्यतिनिद्रम्। "युज समाधौ" इति दिवादेर-कर्मकस्य युजेः युज्यते इति रूपम्। अत्र निद्राकर्तृकवर्तमानयुक्तत्वाभाव इति बोधः। अतः सम्प्रति न युज्यत इत्यर्थः। अतिनिद्रमासीदित्यादौ तथा व्यवहारविषये लक्षणा।

इतिहरि — हरिशब्दः शब्दस्वरूपपरः। इतिशब्दः प्रकाशवाची। हरिशब्दप्रकाश इति बोधः।

अनुरूपम् — रूपस्य योग्यमनुरूपम्।

सतृणम् सतृणमत्तीत्यत्र साहित्यं समभिव्याहृतक्रियाकारकवृत्तिसाकल्यं च सहशब्दार्थः। तृणसहितं सकलं भोज्यमत्तीति बोधः। तृणसाहित्यं तु अत्र आरोपितं प्रतीयते, न वास्तवम्। शब्दशक्तिस्वभावात्। सकलभोज्यभोजनप्रतिपादन एव तात्पर्याच्च। "अव्ययं विभक्ति"[३०] इत्यादिसूत्रे साकल्यग्रहणं प्रवृत्तिनिमित्तपरम्।

साग्नि — साग्नि अधीते। अग्निग्रन्थसहितं तदन्तग्रन्थकर्मकमध्ययनमिति बोधः।

यावच्छ्लोकमच्युतप्रणामाः — परिमाणपरिच्छिन्नत्वं यावच्छब्दार्थः। श्लोक-परिमाणसंख्यापरिच्छिन्नाः अच्युतप्रणामा इति बोधः।

एकपरि — विपरीतवर्तनं परेरर्थः। एकहेतुकं विपरीतवर्तनं, पराजय इति यावत्।

सप्तगङ्गम्, उन्मत्तगङ्गम् — सप्तगङ्गम् उन्मत्तगङ्गमित्यादौ सप्तगङ्गासमाहारः उन्मत्तगङ्गाधिकरणम् इत्यादिक्रमेण बोधः।

एतेन पूर्वपदार्थप्रधानत्वमव्ययीभावलक्षणमिति परास्तम्। उन्मत्तगङ्गमित्यादा-वव्याप्तेः। उत्सर्गत्वं तु अङ्गीक्रियत एव।

तत्पुरुषसमासनिरूपणं तत्त्वचिन्तामणौ शब्दखण्डे[३१]

तत्पुरुषे राजपुरुष इत्यादौ पूर्वपदस्य षष्ठ्यर्थसम्बन्धे निरूढलक्षणा। तस्याश्रयतासम्बन्धेनोत्तरपदार्थेऽन्वयः। राजसम्बन्धाश्रयः पुरुष इति बोधः। अतः समासे न शक्तिः अनन्यलभ्यस्यैव शब्दार्थत्वात्।

---

[३०] पा.सू. २.१.६

[३१] त.चि. पृ. ७५३

यत्तु समस्यमानपदातिरिक्तं न समासपदम्। समासे समस्यमानपदानां प्रत्यभिज्ञानात्। अतो न समासे शक्तिरिति। तन्न। पदतत्समुदाययोर्भिन्नानुपूर्वीकत्वात्।

ननु राजपुरुष इत्यादौ अनुपपत्तिप्रतिसन्धानाभावात् कथं षष्ठ्यर्थे लक्षणेति चेत् यदि षष्ठ्यर्थः सम्बन्धो न राजपदेन लक्ष्यते, तदा लुप्तषष्ठीस्मरणकल्पनाभावप्रयुक्तलाघवेन द्वयोः पदयोः सामानाधिकरण्यावगमात् राजत्वविशिष्टाभिन्नपुरुषस्यैव बोधः स्यात्। राजवाहनमानयेत्यादौ तु वाहनेन समं राज्ञोऽभेदान्वयबोधासम्भवात् वाहनपदस्य वाहनवति लक्षणया राजाभिन्नो यो वाहनवान् तमानयेति बोधः स्यात्।

न च राजत्वविशिष्टेऽस्मदादिकर्तृकानयनान्वयोऽयोग्य इति वाच्यम्। तर्हि अनयैवानुपपत्त्या तात्पर्यविषयस्य राजसम्बन्धवत्पुरुषबोधस्यानुपपत्त्या वा राजपदस्य षष्ठ्यर्थे लक्षणा।

न च विग्रहवाक्यस्थषष्ठ्यर्थसम्बन्धेन राजपदार्थस्य पुरुषपदार्थेऽन्वयादेव राजसम्बन्धिपुरुषबोधोपपत्त्या किं लक्षणयेति वाच्यम्। नामार्थस्य भेदसम्बन्धेन विभक्त्यर्थे एवान्वयः, न तु अपरनामार्थे इति व्युत्पत्त्या तथान्वयायोगात्। तथा च विग्रहवाक्यश्रुतविभक्त्यर्थरूपेण सम्बन्धेन राज्ञः पुरुषेऽन्वयासम्भवात् राजपदस्य विभक्त्यर्थे सम्बन्धे लक्षणैवोचिता।

यत्तु — राजपुरुष इत्यत्र घटेन जलमाहरेत्यत्र छिद्रेतरत्वस्येव लक्षणां विना प्रकारान्तरेणोपस्थितस्यैव सम्बन्धस्य भानमिति पूर्वपदे न लक्षणा न वा समासे शक्तिरिति। तन्न। नामार्थयोः शाब्दबोधे जायमाने षष्ठ्यर्थसम्बन्धस्य नियमत उपस्थित्तौ हेत्वभावात्।

न च भवन्मते नियमतो लक्षणया सम्बन्धोपस्थितिवत् नियमतः सम्बन्धस्मृतिरपि यथाकथंचित् स्यात्, कार्योन्नेयधर्माणां यथाकार्यमुन्नयनादिति वाच्यम्। एवमपि शब्दादनुपस्थितस्यान्वयप्रकारतया भाने मानाभावात्। पदजन्यपदार्थोपस्थितेरेव शाब्दधीहेतुत्वात्। मम मते तु लक्षणया पदादुपस्थितस्य सम्बन्धस्य शाब्दबोधे भानमिति न दोषः।

न च चैत्रस्य नप्तेत्यादौ चैत्रपुत्रस्य शब्दादनुपस्थितस्य कुतो हेतोरन्वयबोधे प्रकारतया भानमिति वाच्यम्। तत्र नप्तृपदस्य पुत्रपुत्रे शक्तिः। तथा च नप्तृपदशक्यतावच्छेदकतया नप्तृपदादुपस्थितस्य पुत्रस्य बोधे प्रकारतया भानमिति नानुपपत्तिः।

लुप्तविभक्तिस्मरणस्यानावश्यकत्वम्

यत्तु — राज्ञः पुरुष इति विग्रहे समासस्यानुशासनात् लुप्ता स्मृता षष्ठीविभक्तिरेव सम्बन्धस्मारिका। तथा च स्मृतषष्ठ्या स्मृतस्य सम्बन्धस्य शाब्दबोधे प्रकारतया भानोपपत्तेः न लक्षणा न वा शक्तिरिति।

तत्र। राजपुरुषमानयेत्युक्ते बोधात् पूर्वं नियमतो विग्रहवाक्यस्यानुपस्थितेः। तथा च यत्र विग्रहवाक्यं न स्मृतं, तदधीनं षष्ठीस्मरणं च नास्ति तत्र षष्ठ्यर्थसम्बन्धबोधार्थं लक्षणा आवश्यकी।

न च विग्रहवाक्याप्रतिसन्धानेऽप्यन्वयबोधस्वीकारे विग्रहप्रतिसन्धानार्थं शाब्दिकानां समासस्थले विग्रहवाक्याभिधानं व्यर्थमिति वाच्यम्। शाब्दिकानाम् अस्मिन् विग्रहे अयं समास इत्यभिधानं समासस्य तात्पर्यविषयीभूतोऽयमर्थ इति प्रतिपादनार्थम्, न तु समासार्थबोधात् पूर्वं विग्रहप्रतिसन्धानार्थमिति।

न च यदि विग्रहप्रतिसन्धाननियमो नास्ति तदा तदर्थं विभाषया समासानुशासनमफलमिति वाच्यम्। विभाषया समासानुशासनं हि समासविग्रहयोः पर्यायत्वं साधुत्वं वा बोधयितुं, न तु नियमतो विग्रहस्योपस्थित्यर्थमिति।

पर्यायत्वेऽपि समासविग्रहयोरयं विशेषः — समासतात्पर्यविषयीभूतोऽर्थः विग्रहे नामविभक्त्यादिभिः शक्त्याभिधीयते। समासे तु राजादिपदेन लक्षणयेति।

न च बहुव्रीहौ विग्रहाभावरूपनित्यसमासानुशासनं समासान्तरे विग्रहप्रतिसन्धानार्थम्। तच्चासंगतं स्यादिति वाच्यम्। बहुव्रीहौ नित्यसमासत्वाभिधानस्य बहुव्रीहौ विग्रहासाधुत्वख्यापनार्थत्वात्। चित्रा गौः यस्येति विग्राहाभिधानं तु बहुव्रीह्यर्थकथनपरम्।

समासे विशिष्टशक्तिनिरासः

स्यादेतत् — "विभाषा"[३२] इति सूत्रेण वाक्यसमासयोस्तुल्यार्थकत्वं दर्शितम्। वाक्ये च मुख्या वृत्तिः। अतः समासेऽपि सैव वृत्तिः। अन्यथा तयोरतुल्यार्थतापत्तेः। वाचकस्यैवानुशासनाच्च समासस्यापि वाचकत्वम्। यथा वाचकस्यैव लिङादेरनुशासनम्। न च लाक्षणिकं वाचकम्। अवाचकस्याप्यनुशासने गाव्यादेरप्यनुशासनापत्तेः।

---

[३२] पा.सू. २.१.११

अथ वाचकव्युत्पादनवत् लाक्षणिकव्युत्पादनमपि। उभयोरपि वाचकलाक्षणिकज्ञानयोः पदार्थोपस्थापकत्वात् इति चेत् — न।

वाचकत्वज्ञानं विना वाच्यस्याज्ञानात् युक्तं वाचकत्वानुशासनम्। लाक्षणिकं च शक्ये शक्तिग्रहेणैव शक्यस्मृतिद्वारा लक्ष्यस्मारकम्। अतो न तस्य लक्ष्ये लक्षणाग्रहापेक्षा।

न च प्रयोगानुशासनं व्याकरणम्। प्रयोगश्च लक्षणायामपि भवति। अतस्तस्याप्यनुशासनम्, घोषपदसमभिव्याहारे गङ्गापदस्येवेति वाच्यम्। गङ्गायामिति पदमात्रमनुशिष्टम्। तच्च स्नातिपदसमभिव्याहारेऽप्युपपन्नम्। न तु तत्तद्वाक्यस्थत्वेनानुशिष्टम्।

किं च गङ्गायामिति पदं नानुशिष्टम्। किं तु विभक्तिः अधिकरणत्वेऽर्थेऽनुशिष्टा। सा च उभयत्र = गङ्गापदस्य लाक्षणिकत्वे शक्तत्वे च अधिकरणत्ववाचिकैवेति न गङ्गाप्रातिपदिकवृत्तेः मुख्याया लक्षणाया वा अपेक्षा। अत एव = अंवाचकस्याननुशासनादेव विभक्तौ न लक्षणा। तथा च समासस्यावाचकत्वे तस्यानुशासनासम्भवात् समासे शक्तिरङ्गीकरणीयेति —

अत्रोच्यते। पदानां साधुत्वबोधकं व्याकरणम्। व्याकरणं पदसाधुत्वज्ञापकम् इत्येव प्रामाणिकानां प्रसिद्धेः। अत एव न गाव्यादेरनुशासनं व्याकरणम्। तस्यासाधुत्वात्। भवति च समासः साधुः। अतो युक्तं तस्य साधुत्वानुशासनम्। साधुता च लाक्षणिकस्यापि सम्भवति।

न च व्याकरणस्य साधुतामात्रानुशासनत्वे पदानां वाचकता कथं सिध्यतीति वाच्यम्। अनन्यलभ्यः शब्दार्थ इति न्यायेनैव वाचकत्वसिद्धेः। अयम् एतच्छब्दार्थः अनन्यलभ्यत्वात् इत्यनुमानेनैव वाच्यत्वसिद्धेः इति यावत्। प्रयोगमात्रे साधूनां टाप्ङीबादीनां शप्श्यनादिविकरणानां इट्नुमाद्यागमानां वर्णविकारपकारणकारादीनां निरर्थकानामपि साधुत्वार्थमनुशासनात्।

अत एव "द्व्येकयोर्द्विवचनैकवचने"[३३] इत्याद्यनुशासनस्य एकत्व एव एकवचनप्रयोगः साधुः इति साधुत्वज्ञापनार्थत्वेन सार्थकता। अन्यथा एकत्वे एकवचनस्य द्वित्वे द्विवचनस्य बहुत्वे बहुवचनस्य च "तान्येकवचनद्विवचनबहुवचनानि"[३४] इति सूत्रेण योगार्थमर्यादया उक्तत्वात् "द्व्येकयोः" इत्याद्यनुशासनस्य वैयर्थ्यं स्यात्।

---

[३३] पा.सू. १.४.२२
[३४] पा.सू. १.४.१०२

न च भवन्मतेऽपि द्वित्वादावेकवचनस्यासाधुत्वं शक्त्यभावादेव भविष्यतीति व्यर्थं तत् सूत्रमिति वाच्यम्। एकवचनस्य लक्षणया द्वित्वादौ प्रसक्तः एकवचनप्रयोगः असाधुरिति ज्ञापकत्वेन सार्थकत्वात्।

एवं च विभक्तौ न लक्षणा। लिङादेस्तु अपूर्वे कार्येऽपि अनुशासनं नास्तीति लोके क्रियाकार्यत्वे न लक्षणा। एवं च तृतीयाया अपि लक्षणया न कर्मत्वादौ प्रयोगः सामान्यतः साधुः। "कर्तृकरणयोस्तृतीया"[३५] इत्यनुशासनबलात्। व्यत्ययेऽपि च साधुत्वमनुशासनान्तरबलात्। अनुशासितार्थातिरिक्तार्थ एव लक्षणया साधुत्वाभावनियमः।

तस्मात् यदि समासो नानुशिष्येत, तदा तस्य लोके साधुत्वं न ज्ञायेत, प्रत्युत गाव्यादिशब्दवदपशब्दताबुद्धिरेव स्यात्। न च तथापि "विभाषा"[३६] इति सूत्रं व्यर्थमेव, समाससाधुत्वस्य समासविधायकसूत्रादेव सिद्धेरिति वाच्यम्। यदि विभाषासूत्रं न प्रणीयेत तदा तथाभूतेऽर्थे समासस्यैव साधुत्वं ज्ञायेत न वाक्यस्य तदर्थबोधनसमर्थस्यापि, शैवाळे इव पङ्कजादिशब्दस्य।

न च विभाषासूत्रादेव कथं वाक्यस्य साधुत्वसिद्धिः, तेन समासस्यैव विकल्पेन साधुत्वबोधनादिति वाच्यम्। विभाषाशब्दः समासविग्रहयोः साधुत्वबोधनार्थः, न तु विकल्पेन समासस्य साधुत्वबोधकः।

समासः असाधुः अवाचकशब्दत्वात् गाव्यादिपदवत्, वाक्यमेव साधु वाचकत्वात् इति शङ्कां तुल्यार्थौ वाक्यसमासाविति बोधयत् विभाषापदमेव निराकरोति।

न च समासस्य साधुत्वादेव शक्तत्वमिति वाच्यम्। अन्यलभ्यत्वेन शक्तिनिरासात्। शक्तत्वाभाववति तिङन्ते सुबन्ते च साधुत्वसत्त्वेन व्यभिचाराच्च। तत्र हि धातुतिङ्समुदायस्य प्रातिपदिकसुप्समुदायस्य च साधुत्वं प्रत्येकं धातोः तिङश्च, प्रातिपदिकस्य सुपश्च शक्तत्वमिति।

ननु नामार्थयोरन्वयबोधे विभक्तेः सहकारित्वात् राजपुरुषमित्यादिसमासे विशेषणपदोत्तरं विभक्तेरभावात् राजसम्बन्धिपुरुषानुपस्थितेः कथं तत्र द्वितीयार्थकर्मत्वान्वयः। किं च प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः प्रकृतेः राजपुरुषसमासस्य राजसम्बन्धिपुरुषे शक्त्यनङ्गीकारे कथं द्वितीया तदन्वितं कर्मत्वं बोधयेत्। अतः राजसम्बन्धिपुरुषे समासस्य शक्तिरङ्गीकरणीया। एवं चार्थवत्सूत्रेणैव

---

[३५] पा.सू. २.३.१८
[३६] पा.सू. २.१.११

समासस्य प्रातिपदिकत्वे सिद्धे "कृत्तद्धितसमासाश्च"[३७] इति सूत्रे समासग्रहणम् अर्थवत्सूत्रस्य प्रपञ्च इति चेत् —

उच्यते। नीलं घटमानयेत्यादौ नामार्थयोः विशेषणविशेष्ययोरन्वयबोधे आकाङ्क्षादिकमेव हेतुः, न तु विशेषणविभक्तिरपि। नीलस्य घटकर्मत्वबाधात् न कर्मतासम्बन्धेन घटे अन्वयः। तादात्म्यसम्बन्धेन नीलविशिष्टस्य घटस्य कर्मत्वं द्वितीयाविभक्त्यर्थकर्मतासंसर्गव्यतिरेकेण नीलघटयोरन्वयबोधे स्यात् न त्वन्यथा। तस्मादभेदानुभवार्थं न विशेषणविभक्तिरपेक्ष्यते किं तु साधुत्वाय।

न च विभक्तिं विना समस्यमानपदानां साधुत्वं नेति वाच्यम्। विभक्तिं विनापि समासस्य साधुत्वानुशासनात्। तस्मान्नामार्थयोरन्वयबोधे विशेषणविभक्तिः साधुत्वार्था। न तु कर्मत्वोपस्थापिका। एवं च राजसम्बन्धिपुरुषस्य विभक्तिं विनापि राजसम्बन्ध्युपस्थापकराजपदसहितपुरुषपदात् उपस्थितिः। अत एव = राजसम्बन्धि-पुरुषस्य प्रकृतिभूतपुरुषपदार्थत्वात् एव राजसम्बन्धिपुरुषरूपे पुरुषपदार्थे विभक्त्यर्थकर्मत्वाद्यन्वयः।

नन्वेवं नीलघटयोः परस्परमन्वये नीलविशिष्टघटकर्मतावैशिष्ट्यप्रत्ययः क्रियायां कथं स्यादिति चेत् — उच्यते। यथा "अरुणया गवा क्रीणाति" इत्यादौ आरुण्यकरणकत्वगोकरणकत्वयोः प्रत्येकं क्रियायामन्वयानन्तरं मनसा क्रयणादौ आरुण्यविशिष्टगोकरणकत्ववैशिष्ट्यप्रत्ययः तथेहापि नीलकर्मकत्वघटकर्मकत्वयोः प्रत्येकं क्रियायामन्वयबोधानन्तरं मानसः नीलविशिष्टघटकर्मकत्ववैशिष्ट्यबोधः भविष्यति। एवमेव राजपुरुषमानयेत्यत्रापि राजसम्बन्धिपुरुषयोः क्रियायामन्वय-बोधानन्तरं मनसा राजसम्बन्ध्यभिन्नपुरुषवैशिष्ट्यबोधः।

न च राजपदार्थस्य राजसम्बन्धिनः पुरुषपदोत्तरद्वितीयाविभक्त्यर्थेन कर्मत्वे-नान्वयात् न क्रियायामन्वयः सम्भवति, धात्वर्थनामार्थयोर्भेदेन साक्षादन्वयस्या-व्युत्पन्नत्वादिति वाच्यम्। क्रियायां समस्यमानपदार्थानामन्वयार्थं समासात् विभक्त्यनुशासनात् विशेषणे पूर्वपदार्थेऽपि विभक्त्यर्थान्वयात्।

न चैतादृशकल्पनापेक्षया समासस्यैव विशिष्टे शक्तिः कल्प्यतामिति वाच्यम्। अनन्यलभ्यः शब्दार्थ इति न्यायेनान्यलभ्ये शक्त्यभावनियमात्।

न च प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः प्रथमं पूर्वपदार्थे कथं विभक्त्यर्थान्वय इति वाच्यम्। वृत्तिशून्यात् समासात् उत्पन्ना विभक्तिः समस्यमान-

---

[३७] पा.सू. १.२.४६

पदार्थमात्रगतमेव स्वार्थमाहेति अन्या व्युत्पत्तिः कल्पनीया। समस्यमानपदार्थश्च पूर्वपदार्थोऽपीति तद्गतार्थप्रत्यायकत्वं प्रत्यये नानुपपन्नमिति। तथा च प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययस्येति व्युत्पत्तिः समासातिरिक्तस्थल एवेति बोध्यम्। समासेष्वनन्तशक्तिकल्पनापेक्षयेदृशकल्पनायाः लघुत्वम्।

यद्वा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति यथाश्रुतव्युत्पत्त्यनुरोधात् राजपुरुषमानयेत्यादौ उत्तरपद एव राजसम्बन्धवत्पुरुषे विशिष्टे लक्षणा। पूर्वपदं तु तात्पर्यग्राहकम्। प्रकृत्यर्थेत्यनेन प्रत्ययसन्निहितपदार्थो विवक्षितः। सन्निहित-पदमुत्तरपदम्। चित्रग्वादिबहुव्रीहौ अन्वयबोधपूर्वकोत्तरपदलक्षणायां, षष्ठीतत्पुरुषे च राजपुरुषादौ विभक्तिसन्निहितोत्तरपदार्थगतस्वार्थबोधकत्वम्। विभक्तिसंनिहित-पदार्थश्च मुख्यवृत्त्या लक्षणया वा।

तत्पुरुषसमासनिरूपणं शब्दशक्तिप्रकाशिकायाम्[३८]

यदीयेन सुबर्थेन युगपद्बोधनक्षमः।
यः समासस्तस्य तत्र स तत्पुरुष उच्यते।।

यदर्थगतेन सुबर्थेन विशिष्टस्य यदर्थस्यान्वयबोधं प्रति यः समासः स्वरूपयोग्यः, स तदर्थस्य तदर्थे तत्पुरुषः। राजपुरुषः इत्ययं राजपदार्थगतसुबर्थसम्बन्धविशिष्टस्य पुरुषपदार्थस्यान्वयबोधं प्रति स्वरूपयोग्य इति स तत्पुरुष इति लक्षणसमन्वयः।

यत्तु यन्नामोत्तरं यन्नाम यदर्थगतसुबर्थविशिष्टस्य यस्यार्थस्य बोधकं, तदुत्तरं तन्नामैव तदर्थयोस्तत्पुरुषः। यथा राजपुरुष इत्यत्र राजनामोत्तरं पुरुषनाम राजपदार्थगत-सुबर्थसम्बन्धविशिष्टपुरुषस्य बोधकं, तदुत्तरं राजनामोत्तरं पुरुषनामैव राजपुरुष-योस्तत्पुरुषः इति।

तन्न। पूर्वकायोऽर्थपिप्पलीत्यादावव्याप्तेः। कायस्य पूर्वः इत्यनुभवात् कायपदार्थे पूर्वपदार्थगतसुबर्थविशिष्टस्याबोधनात्।

पूर्वरीत्या तु कायपदार्थगतेन सुबर्थेन सम्बन्धेन विशिष्टस्य पूर्वपदार्थस्यान्वयबोधं प्रति पूर्वकाय इति समासः स्वरूपयोग्य इति स समासः कायपदार्थस्य पूर्वपदार्थे तत्पुरुष इति लक्षणं संगच्छते।

तथा च यादृशानुपूर्वीप्रकारकज्ञानं यदर्थविशेषितसुबर्थावच्छिन्नयदर्थविशेष्य-कान्वयबोधजनकं तदर्थविषयतानिरूपितसुबर्थविषयतानिरूपितयदर्थविषयताशालि-

---

[३८] पृ. २२५

बोधजनकमिति यावत्, तादृशानुपूर्वीमत्समासत्वं तदर्थस्य तदर्थे तत्पुरुषत्वमिति निष्कर्षः।

न च स्तोकं पक्ता स्तोकपक्तेत्यादौ द्वितीयातत्पुरुषेऽव्याप्तिः। तज्जन्यबोधे सुबर्थस्याप्रकारत्वादिति वाच्यम्। क्रियाविशेषणैः सह यः समासः स कर्मधारय एव न तत्पुरुष इति तस्यालक्ष्यतया तत्र लक्षणासत्त्वस्यादोषत्वात्। न च एकपदार्थेऽपरपदार्थस्याभेदेनान्वयबोधजनकः समासो हि कर्मधारयः। प्रकृते पक्तृपदार्थैकदेशे पाके अभेदेन स्तोकपदार्थस्यान्वयबोधात् न कर्मधारयसमास इति वाच्यम्। महाकविः महाविज्ञः इत्यादौ कवित्वादौ नामार्थैकदेशे महदादिपदार्थस्याभेदेनान्वयेऽपि कर्मधारयस्येष्टत्वात्। कर्मधारयलक्षणे नामार्थपदेन नामजन्यबोधविषयमात्रं विवक्षितमित्यदोषात्।

स्तोकं पक्तेत्यादौ अमस्तादात्म्यवाचित्वे तु तत्पुरुषलक्षणाक्रान्तत्वात् तत्पुरुषत्वं सम्भवत्येव।

क्रियाविशेषणैः समास एवाव्युत्पन्न इति तु न। "स्तोकनम्रा स्तनाभ्याम्" इत्यादेः कालिदासादिभिः प्रयुक्तत्वात्।

न चोक्ततत्पुरुषत्वस्य द्विगुत्वकर्मधारयत्वविरुद्धत्वात् महाराज इत्यादिकर्मधारयस्य तत्पुरुषत्वाभावात् "राजाहस्सखिभ्यष्टच्"[३९] इति टचः अयोगात् अदन्तता न स्यादिति वाच्यम्। अत एव टजादिपदसंस्कारसिद्ध्यर्थं "तत्पुरुषावुभौ" इति द्विगुकर्मधारययोस्तत्पुरुषत्वस्य शाब्दिकैः व्यपदेशात्। स च व्यपदेशः पदसंस्कारार्थो गौणः।

तत्पुरुषसमासविभागः

द्वितीयादिसुबर्थस्य भेदादेव च षड्विधः।
क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः।।

ग्रामं गतः ग्रामगतः, चैत्रेण नीतः चैत्रनीतः, ब्राह्मणाय दत्तः ब्राह्मणदत्तः, वृक्षात् पतितः वृक्षपतितः, चैत्रस्य धनं चैत्रधनम्, मैत्रस्य गतिः मैत्रगतिः, गृहे स्थितः गृहस्थितः इत्यादौ द्वितीयादिसुबर्थस्य कर्तृत्वकर्मत्वादेः बोधभेदात् एतस्य तत्पुरुषस्य द्वितीयातत्पुरुषः तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषः इति षट् भेदाः। स्वघटकैकपदार्थनिष्ठद्वितीयार्थावच्छिन्नापरपदार्थबोधकसमासः द्वितीयातत्पुरुष इत्यादिरीत्या विभाजकधर्मषट्कं सुवचम्।

---

[३९] पा.सू. ५.४.९१

इयांस्तु विशेषः यदेतेषु धात्वर्थान्वय्येव द्वितीयादेरर्थः प्रायो घटकः। पीठं परितः, पुण्येन सुखं, शमाय विद्या, दण्डात् घटः, गवां कृष्णा सम्पन्नक्षीरा, तिलेषु तैलमित्यादिविग्रहे तत्पुरुषस्यासाधुत्वात्। प्रायः इत्युक्त्या वर्षसुखी लोष्टकाणः कुण्डलहिरण्यं घटान्यः कुबेरबलिः कर्मकुशलः इत्यादौ तत्तद्विशेषविधिबलात् द्वितीयादितत्पुरुषः।

ननु ग्रामगत इत्यत्र गतौ ग्रामकर्मकत्वस्य, राजपुरुष इत्यत्र च पुरुषे राजसम्बन्धस्यावगमः कथं भवति? न तावत् ग्रामादिपदेभ्यः अनन्तरस्य लुप्तस्य सुपः स्मरणात्। तल्लोपम् अस्मरतोऽप्यन्वयबोधात्। अनुभवबलात् लुप्तविभक्तिस्मरण-नियमाङ्गीकारे च "समृद्धं ग्रामगतः" इत्यादितः समृद्धग्रामपदार्थपोरभेदधीप्रसङ्गः। न च तत्र ग्रामपदोत्तरविभक्तेः लोपात् अभेदधीप्रयोजकस्य समानविभक्तिकत्वस्य तत्र अभावात् कथमभेदधीप्रसङ्ग इति वाच्यम्। अभेदबोधं प्रति न समानविभक्तिकत्वं तन्त्रम्। सम्पन्नं दधि पश्य इत्यादौ दधिपदोत्तरविभक्तेर्लोपेन सम्पन्नदधिपदयोः समानविभक्तिकत्वाभावेन तदर्थयोरभेदबोधानुपपत्तेः। अपि तु समानविभक्तिकत्व-प्रतिसन्धानं तन्त्रम्। तस्य च समृद्धं ग्रामगत इत्यत्रापि सद्भावात् समृद्ध-ग्रामपदार्थयोरभेदधीप्रसङ्गात्।

नापि ग्रामपदस्य ग्रामनिष्ठकर्मत्वे लक्षणा। तस्य निरूपकतासम्बन्धेन गतपदार्थे गमनेऽन्वय इति गमने ग्रामकर्मकत्वस्य लाभः। एवं राजपुरुष इत्यत्र राजपदस्य राजनिष्ठस्वामित्वे राजनिरूपितस्वत्वे वा लक्षणा। तस्य निरूपकत्वेन आश्रयत्वेन वा पुरुषेऽन्वय इति पुरुषे राजसम्बन्धस्य बोध इति वक्तुं शक्यम्।

किञ्चिन्नामार्थनिष्ठाभेदातिरिक्तसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति नामोत्तरविभक्त्युपस्थाप्यत्वस्य कारणत्वात् तादृशप्रत्ययोप-स्थाप्यत्वस्य गतिपुरुषादावभावात्।

न च ग्रामगत इत्यत्र ग्रामपदस्य ग्रामनिष्ठकर्मतानिरूपके लक्षणा। तस्याभेदेन गतावन्वयः। राजपुरुष इत्यत्र राजपदस्य राजनिरूपितस्वत्वाश्रये लक्षणा। तस्याभेदेन पुरुषेऽन्वयः। अतो नानुपपत्तिरिति वाच्यम्।

तत्पुरुषेऽपि समस्यमानपदार्थयोरभेदान्वयबोधाङ्गीकारे तत्पुरुषस्य कर्मधारय-त्वापत्तेः। ग्रामं गतः राज्ञः पुरुष इत्यादिविग्रहस्य समासतुल्यार्थकत्वहान्यापत्तेश्चेति चेत् — न। भेदसम्बन्धेन प्रत्ययान्ततत्तन्नामार्थनिष्ठप्रकारताकशाब्दबोधं प्रति तत्तन्नामोत्तरप्रत्ययोपस्थाप्यत्वं प्रयोजकमिति फलानुरोधेन कल्प्यते। ग्रामगत इत्यादिसमासे ग्रामपदलक्ष्यस्य ग्रामनिष्ठकर्मत्वस्य निरूपकत्वरूपभेदसम्बन्धेन उत्तरपदार्थगमनादावन्वये बाधकं नास्ति। समासघटकनाम्नः प्रत्ययान्तत्वाभावात्।

ननु यदि नामार्थयोरपि भेदसम्बन्धेनान्वयो व्युत्पन्नः तदा ग्रामगत इत्यादौ कर्मत्वसम्बन्धेन ग्रामपदार्थस्य गमनादावन्वयसम्भवात् ग्रामपदस्य ग्रामनिष्ठकर्मत्वे लक्षणा मास्तु इति चेत् — सत्यम्। विग्रहवाक्यानां समाससमानार्थकत्वमिति नियमस्य रक्षणाय तत्र लक्षणा स्वीक्रियते। अन्यथा हि ग्रामं गत इति विग्रहवाक्यात् निरूपकत्वसंसर्गकग्रामनिष्ठकर्मत्वप्रकारकगमनविशेष्यको बोधो जायते। ग्रामगत इति समासात्तु कर्मत्वसंसर्गकग्रामप्रकारकगमनविशेष्यको बोधो जायत इति विग्रहसमासयोः समानार्थकत्वं भज्येत।

अथवा मास्तु ग्रामगत इत्यादौ ग्रामपदस्य ग्रामनिष्ठकर्मत्वे लक्षणा। कर्मत्वसम्बन्धेन ग्रामस्य गमने अन्वयः स्वीक्रियते। ग्रामं गत इति विग्रहवाक्येऽपि ग्रामपदस्य द्वितीयासमभिव्याहारवशात् कर्मत्वसम्बन्धेन ग्रामस्य गमनेऽन्वयः स्वीक्रियते। विभक्त्यर्थस्य प्रकारतयैव भानमिति नियमाभावात्। न चैवं द्वितीयायाः कर्मत्वार्थकत्वमफलमिति वाच्यम्। ग्राममित्यतः कर्मत्वधर्मिकग्रामप्रकारकान्वय-बोधानुसारेण द्वितीयादेः कर्मत्वाद्यर्थकत्वस्वीकारात्।

अथवा विग्रहसमासयोः समानविषयकबोधजनकत्वमित्येव नियमः, न तु समानप्रकारकबोधजनकत्वमिति। तथा च ग्रामगत इति समासे कर्मत्वस्य संसर्गतया विषयत्वम्। ग्रामं गत इति विग्रहे कर्मत्वस्य प्रकारतया विषयत्वमिति उभयोः समानविषयकत्वं रक्षितं भवति।

एवम् अघटः पट इत्यत्र प्रतियोगित्वसम्बन्धेन घटस्य नञर्थे भेदेऽन्वयः। पटो न घट इत्यत्रापि प्रतियोगित्वसम्बन्धेनैव घटस्य नञर्थेऽन्वय इति विग्रहसमासयोः समानविषयकत्वम्। अथवा घटपदस्य घटप्रतियोगिके लक्षणां स्वीकृत्य तस्याभेदसम्बन्धेन पटेऽन्वयस्वीकारेऽपि समानविषयकत्वमक्षतमेव असुरो दैत्य इत्यत्र सुरप्रतियोगिकविरोधवान् दैत्यः इति, अनिक्षुः शर इत्यत्र मधुररसवत्त्वेन रूपेण इक्षुसदृशः शर इति, अब्राह्मणो बार्धुषिक इत्यत्र ब्राह्मणापकृष्ट इति, "अनुदरमुदरं तरुण्याः" इत्यत्र स्वल्पोदरमिति च बोधः। अत्र सर्वत्र प्रतियोगित्वादेः नञर्थे संसर्गतया प्रकारतया वा भानेऽपि विग्रहसमासयोः समानार्थकत्वं पूर्वोक्तरीत्या उपपादनीयम्। पटस्याभाव इत्यर्थे नञा साकं अव्ययीभावसमास एव प्रमाणम्। तेन अपटं वर्तत इत्याद्येव प्रयोगः। तत्पुरुषस्योत्तरपदलिङ्गकत्वनियमात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः"[४०] इति सूत्रात् इति वृद्धाः।

---

[४०] पा.सू. २.४.२६

पक्षधरमिश्रास्तु — प्रसज्यनञापि अपट इत्यादिकः तत्पुरुष एव साधुर्नाव्ययीभावः। नञ्तत्पुरुषविधेरव्ययीभावसमासापवादकत्वात्। अत एव वादिनामविवादः इत्यादिकः किरणावल्यादिग्रन्थेषु पुंसि प्रयोगः इत्याहुः।

तत्पुरुषे द्वितीयाद्यर्थस्य सम्बन्धविधया भानकल्पे युक्त्यन्तरं चोच्यते।

दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः।
चैत्रो ग्रामगतस्तत्र मैत्रः किं कुरुतेऽधुना।।

इत्यत्र राजपदस्य राजसम्बन्धे ग्रामपदस्य ग्रामकर्मत्वे च लक्षणास्वीकारे तदेकदेशस्य राज्ञः ग्रामस्य च तत्पदेन परामर्शो न स्यात्। तदादिसर्वनामपदानां पूर्वप्रकृतप्रधानपरामर्शकत्वनियमात्। अन्यथा —

"इयं मे प्रजावती, त्वं तस्मै कम्बलं देहि" इति वाक्यस्य प्रामाण्यापत्तिः। भ्रातृजायावाचको हि प्रजावतीशब्दः। भ्रातृजायैकदेशभ्रातुः तत्पदेन परामर्शसम्भवात्। एवं "नीलो मणिः, स गुणः" इति प्रयोगापत्तिः। नीलविशिष्टः इति नीलपदार्थः। तदेकदेशस्य नीलरूपस्य तच्छब्देन परामर्शे सति तत्र गुणत्वाबाधात् तथा प्रयोगापत्तिः। ननु पूर्वोक्तरीत्या तत्पुरुषसमासे राजपुरुष इत्यादौ पूर्वपदस्य न लक्षणा, किं तु स्वत्वादिसम्बन्धेन राज्ञः पुरुषेऽन्वयः। समासविग्रहयोः समानविषयकबोधजनकत्वमात्रेण समानार्थकत्वमिति यदि निरुह्यते, तदा "निषादस्थपतिं याजयेत्" इत्यत्रापि निपादस्य स्थपतिः इति तत्पुरुष एवाङ्गीकार्यः, न कर्मधारयः। तत्पुरुषे लक्षणाभयाद्धि कर्मधारय आश्रीयते। पूर्वोक्तरीत्या तत्पुरुषेऽपि लक्षणाविरहात् कर्मधारय एवाश्रयणीयः, तदनुसारेण निषिद्धस्याप्यध्ययनस्य कल्पन"मिति पूर्वमीमांसायां निषादस्थपत्यधिकरणे यदुक्तं तद्विरोध इति चेत् —

उच्यते। तत्पुरुषे लक्षणापक्षेऽपि निषादस्थपतिपदे कुतः कर्मधारय एवाङ्गीक्रियते न तत्पुरुषः। न च तत्पुरुषे लक्षणाभयात् कर्मधारय आश्रीयत इति वाच्यम्। निषादानां स्थपतिरिति व्युत्पत्त्या निषादस्थपतिपदात् निषादसम्बन्धवान् स्थपतिरित्यनुभवस्य सर्वसिद्धतया तदनुरोधेन लक्षणायाः क्लृप्तत्वेन लक्षणाभयस्यासम्भवात्। न हि निषादस्थपत्यादिपदं निषादादिसम्बन्धवत्तया स्थपत्यादिबोधने निराकाङ्क्षमिति वक्तुं शक्यम्। तथा सति निराकाङ्क्षत्वादेव तत्पुरुषत्वासम्भवेन लक्षणापत्तेस्तत्पुरुषत्वबाधकतयोपन्यासस्यानुचितत्वात्।

अथ असति बाधके मुख्यार्थ एव श्रुतीनां प्रामाण्यम्, न तु प्रमाणान्तराविषयेऽपि लक्ष्यार्थे, "मुख्ये हि शब्दस्वरसः" इति मीमांसासिद्धान्तादिति चेत् —

तर्हि बाधकासत्त्वे कर्मधारयविधयैव वेदानां प्रामाण्यम्, न तु प्रमाणान्तराविषये तत्पुरुषविधया। कर्मधारयात् समासान्तरस्य दौर्बल्यमित्यादिमीमांसया तथैव सम्प्रतिपत्तेः इत्यपि किं न रोचयेः। तथा च वेदे कुत्रापि तत्पुरुष एव न स्यात्।

न च भवन्मतेऽपि तत्पुरुषात् बहुव्रीहेर्जघन्यत्वे सर्वपदलक्षणायाः बीजत्वं न स्यादिति वाच्यम्। इष्टापत्तेः। कल्पनागौरवादिसत्त्वे तदेव बहुव्रीहित्यागे बीजम्। तदसत्त्वे वक्तुरभिप्रायः तत्त्यागे बीजम्।

किं च बहुव्रीहौ न सर्वपदानां लक्षणा अङ्गीक्रियते, किं तु एकस्मिन्नेव पदे। चित्रगुरित्यादिबहुव्रीहौ गोपदस्यैव चित्राभिन्नगोस्वामिनि लक्षणा। पदान्तरं तात्पर्यग्राहकमिति स्वीकारात् न सर्वपदलक्षणा बहुव्रीहित्यागे बीजं, अपि तु कल्पनागौरवादिकमेव। तथा च "निषादस्थपतिं याजयेत्" इत्यत्र न लक्षणाभयात् तत्पुरुषत्यागः। किं तु कल्पनागौरवादिभयादिति जगदीशतर्कालंकाराणामाशयः।

नञ्तत्पुरुषविचारः[४१]

नञ्समासे अब्राह्मणमानयेत्यत्र (पर्युदासे) पूर्वपदस्य नञः उत्तरपदार्थ-ब्राह्मणसदृशे क्षत्रिये लक्षणा। तत्र विग्रहाधिकार्थ एव भासत इत्युभयवादिसिद्धम्। तथा च प्रकृत्यर्थानुरोधात् वृत्तौ कल्प्यायां लक्षणैव कल्प्यते लाघवात् न शक्तिः, मानाभावात्। अघटः पट इत्यादौ तु प्रसज्यप्रतिषेधार्थके नञि अघटपद-पटपदयोः सामानाधिकरण्यात् अभाववति लक्षणा। घटप्रतियोगिकाभाववान् पट इति बोधः। व्यासेऽपि न घटः पट इत्यादौ अभाववति लक्षणा। यथा शुक्लः पट इत्यत्र शुक्लपदस्य शुक्लवति लक्षणा। सामानाधिकरण्यादित्यभिधानात् यत्र सामानाधिकरण्यं नास्ति, तत्र समासेऽपि नञः न अभाववति लक्षणा, किं तु अभाव एव वाच्यः, यथा वादिनाम् अविवाद इत्यादौ। अविवाद इत्यस्य विवादाभाव इत्यर्थः।

न पचतीत्यादौ भूतले न घट इत्यादौ च प्रसज्यप्रतिषेधे नञः अभाव-रूपमुख्यार्थकता। सुबन्तसम्बन्धेऽपि न घटः पट इत्यत्र नञः न समासः। विभाषाधिकारात् विकल्पेन समासानुशासनात्।

यजतिषु ये यजामहं करोति नानुयाजेष्वित्यत्र पर्युदासे नञ्। तेनायमर्थः — यजतिषु = यागेषु, नानुयाजेषु = अनुयाजव्यतिरिक्तेषु ये यजामह इति मन्त्रं करोति इति।ननु नानुयाजेष्वित्यत्र न पर्युदासे नञ्। तदा हि पदद्वयस्यान्यपरत्वं स्यात्,

---

[४१] त.चि.श. पृ. ७८६

समासश्च स्यात्। तस्मात् अनुषङ्गात् करोतिना नञोऽन्वयात् प्रसज्यप्रतिषेधः। तेन अनुयाजेषु येयजामह इति मन्त्रं न करोतीत्यर्थः।

एवं च नानुयाजेष्विति पदद्वयस्य नान्यपरता, न वा नञो मुख्यार्थत्यागः, समासाभावेन साधुता चेति चेत् — न। समासस्यानित्यत्वात्। नानुयाजेष्विति वाक्ये पर्युदासे नञ्। न चैवं विग्रहवाक्यवृत्तिपदत्वान्नञोऽन्यपरत्वं न सम्भवति। समासे सति भवति लक्षणा राजपुरुषचित्रगवादौ = न तु विग्रहवाक्येऽपि। तथा च समासे सति भवति नञि पर्युदासे लक्षणा न विग्रहवाक्ये इति शङ्कनीयम्। गौर्वाहीक इत्यादौ वाक्येऽपि गवादिपदस्यान्यपरत्वात्। यदि च प्रसज्यप्रतिषेधे नञ् तदा मन्त्र-विधायकतन्निषेधयोः विरुद्धार्थत्वेन वाक्यभेदः स्यात्। तस्मात् प्रथमप्रतीतैक-वाक्यताबलात् सम्भवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वात् नञ्-पदे लक्षणा कल्प्यते। न तु नञ्पदे मुख्यत्वानुरोधात् एकवाक्यतायाः त्यागः। न हि पदार्थानुरोधेन वाक्यार्थकल्पनम्, किं तु वाक्यार्थानुरोधेन पदार्थकल्पनम्। ननु व्यासस्थले लक्षणास्वीकारे नानुयाजेषु इति नञः सप्तमीप्रकृतित्वाभावात् सप्तम्यप्रकृत्यर्थे नञर्थस्वरूपे भिन्ने सप्तमी स्वार्थं न बोधयेत् इति सप्तम्यर्थस्य नञर्थेनान्वयानुपपत्त्या वाक्यभेद एवास्तु इति चेत् मैवम्। साधुत्वमात्रप्रयोजिकायाः विशेषण-विभक्तेरर्थाबोधकत्वात्। यद्वा ब्राह्मणमिव पश्य, ब्राह्मणेनैव कल्प्यत इत्यादिप्रयोग-दर्शनात् निपातसमभिव्याहृतविभक्त्यर्थो निपातार्थ एव भासते।

न च नानुयाजेष्वित्यत्र नञ् न। किं तु नपदमेवान्यत् इति वाच्यम्। चकारानुबन्धरहितस्य नपदस्यैवाभावात्। नञ्पदादेव सर्वत्र प्रयोगस्योपपत्तेः। अन्यथा प्रसज्यप्रतिषेधे नञ् न स्यादेव नपदेनैव गतार्थत्वात्।

लघुमञ्जूषानुसारं तत्पुरुषविचारः[४२]

कृष्णाश्रितः — कृष्णकर्मकश्रयणकर्ता इति बोधः।

मासप्रमितः प्रतिपच्चन्द्रः — माससम्बन्धिपरिच्छेदारम्भकर्ता प्रतिपच्चन्द्र इति बोधः। आदिकर्मणि क्तः।

धान्यार्थः — धान्येनार्थो धान्यार्थः। हेतौ तृतीया। अर्थशब्दो धनवाची। धान्यहेतुकं धनमिति बोधः।

मासपूर्वः — मासेन पूर्वो मासपूर्वः। अवध्युत्तरकालावधिमदुत्पत्तिकालयोः मासस्य व्यवधायकत्वेऽयं प्रयोगः। तथा चावध्युत्पत्तिकालप्राग्वर्तिव्यवधायककाल-

---

[४२] ल.म. पृ. १४२५

प्राग्वर्तिकालोत्पत्तिक इति बोधः। "पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः"[४३] इति सूत्रेण पूर्वशब्दयोगे तृतीया।

माषोनं कार्षापणम् — ऊनशब्दार्थः पूर्णत्वसम्पादकवस्त्वभाववान्। माषरूपपूर्णत्वसम्पादकवस्त्वभाववत् कार्षापणमिति बोधः।

वाक्कलहः — वाचा कलहः वाक्कलहः। कलहः क्रोधपूर्वको व्यापारः। वाग्रूपः क्रोधपूर्वको व्यापार इति बोधः।

दध्योदनः — दध्युपसिक ओदनः। वृत्तिस्वभावलभ्य उपसेकः।

यूपदारु — यूपरूपविकारोपकारकं दारु इति बोधः।

अश्वघासादयः षष्ठीतत्पुरुषाः।

लघुमञ्जूषानुसारं कर्मधारयः[४४]

स्नातानुलिप्तः पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। स्नानोत्तरकालिकानुलेपनाश्रय इति बोधः। एवमादिः समानाधिकरणपदतत्पुरुषः कर्मधारय इत्युच्यते।

प्रसन्नेन दृगब्जेनेत्यादौ मयूरव्यंसकादित्वात् समासः। अब्जसदृशदृशेति बोधः। पूर्वपदार्थप्रधानता परवल्लिङ्गता च। अन्यो राजा राजान्तरमित्यादावपि मयूरव्यंसकादित्वात् पूर्वपदार्थप्रधानता। न तु "उपमितं व्याघ्रादिभिः"[४५] इति समासः, सामान्यधर्मप्रयोगात्। न चानुपात्तधर्मेणात्र सादृश्यम्। धर्मोपादाने उपात्तधर्मेणैव सादृश्यमित्यस्य प्रकाशे (काव्यप्रकाशे) दशमे स्फुटत्वात्। परेन्दुः सकलकल इत्यादौ उपात्तधर्मातिरिक्तधर्मेण सादृश्यस्याभावाच्च।

किं चेदं सूत्रं समानलिङ्गवचनत्वे एव प्रवर्तते। अत एव "परवल्लिङ्गम्"[४६] इति सूत्रे "तत्पुरुषश्चापि कः प्रयोजयति यः पूर्वपदार्थप्रधान एकदेशिसमासः" इति भाष्यम्, "द्वन्द्वैकदेशिनोः" इति न्यासेन तत्पुरुषग्रहणप्रत्याख्यानपरं भाष्यं च संगच्छते। अन्यथा दृगब्जेनेत्यादेः पूर्वपदार्थप्रधानस्य दृश्यमानपरवल्लिङ्गस्य सत्त्वेन तदसंगतिः स्पष्टैव। दृगब्जस्य वीक्षणान्वयस्तु तस्य पूर्वपदार्थप्रधानत्वान्निर्बाधः। मुखचन्द्र इत्यादावपि मयूरव्यंसकादिसमास एव। तस्य पूर्वपदार्थप्रधानत्वात्। चन्द्ररूपकव्यवहारः परवल्लिङ्गतापि तत एव।

---

[४३] पा.सू. २.१.३१
[४४] पृ. १४२५
[४५] पा.सू. २.१.५६
[४६] पा.सू. २.३.२६

एतेनोत्तरपदार्थप्रधानत्वं तत्पुरुषलक्षणमित्यपास्तम्। पूर्वपदार्थप्रधाने दृगब्जेनेत्यादावव्याप्तेः। सूपप्रतीत्यादि अव्ययीभावसमासेऽतिव्याप्तेश्च। तस्मात् उत्तरपदार्थप्रधानस्तत्पुरुष इत्युत्सर्गः।

नीलोत्पलम् — नीलं च तदुत्पलं च नीलोत्पलम्। अत्र वाक्ये चकारप्रयोगेण प्रवृत्तिनिमित्तयोरुत्पलत्वनीलत्वयोः नीलोत्पलयोर्वा साहित्यं भासते। अत एवात्र द्वन्द्वमाशङ्क्य अनवकाशेन कर्मधारयेन बाधान्नेति भाष्ये उक्तम्। एवं च नीलत्वोपलत्वसमूहवन्नीलमुत्पलमिति बोधः। नीलसमानाधिकरणं तदभिन्नमुत्पलमिति वा। तत्र वाक्ये इव वृत्तौ चशब्दाप्रयोगाय एकार्थीभावः।

एतेन कर्मधारयेऽवयवशक्त्योपस्थितयोरर्थयोः विशेष्यविशेषणभावसम्भवान्न तत्रैकार्थीभाव इत्यपास्तम्।

केचित्तु पण्डितो ब्राह्मणः, दधि रुचिकारि इत्यादिवाक्ये इव पण्डितब्राह्मण इत्यादिवृत्तावुद्देश्यविधेयभावेनान्वयवारणाय एकोपस्थितये एकार्थीभावः। अत एव "वषट्कर्तुः प्रथमभक्ष" इत्यत्र प्रथमभक्ष इति समस्तपदे होतृचमस इति समाख्यावलात् प्राप्तवषट्कर्तुसम्बन्धिभक्षणोद्देशेन प्राथम्यविधाने एकप्रसरताभङ्गः स्यादिति प्राथम्यविशिष्टं भक्षान्तरं विधीयत इति मीमांसकाः। न च प्रथमभक्ष इत्यत्र उद्देश्यतानियामकस्य यद्वृत्तयोगादेः विधेयतागमकस्य तद्वृत्तयोगादेश्चाभावेन कथं भक्षानुवादेन प्राथम्यविधानस्य प्रसक्तिरिति वाच्यम्। यद्वृत्तयोगप्राथम्ये उद्देश्यतानियामके। पश्चात्त्वतद्वृत्तयोगौ विधेयतानियामकौ इत्यस्य औत्सर्गिकत्वात् अनियतत्वात्। प्रथमो भक्षः पण्डितो ब्राह्मणः इत्यादौ यद्वृत्तयोगप्राथम्ययोः पश्चात्त्वतद्वृत्तयोगयोरभावेऽपि उद्देश्यविधेयभावेन बोधदर्शनेन तस्य व्यभिचारात्। "अपृक्त एकाल्प्रत्ययः"[४७] इत्यादिसूत्रेषु व्यभिचाराच्च। अत एव वृद्धैरपि —

"यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्" इत्यत्र आदिशब्दप्रयोगेन तस्यानियतत्वं सूचितम्।

"तद्वृत्तयोगः पश्चात्त्वं स्याद्विधेयस्य लक्षणम्" इत्युत्तरार्धम्। पूर्वकायोऽर्धपिप्पली इत्यादौ कायसम्बन्धी पूर्वो भागः पिप्पलीसम्बन्धी अर्धो भाग इत्यादिक्रमेण बोधः। एकदेशिसमासप्रत्याख्यातृभाष्यमते कायादिशब्दानां तदवयवपरतया कायावयवरूपः पूर्वो भाग इत्यादिक्रमेण बोधः।

मासो जातस्य मासजातः। अत्र विग्रहे वृत्तौ चोत्तरपदार्थप्रधानत्वम्। न च विग्रहे उत्तरपदार्थप्रधानत्वे जातशब्दात् षष्ठ्यनुपपत्तिः, विशेषणादेव तद्विधानादिति वाच्यम्।

---

[४७] पा.सू. १.२.४१

तस्य वृत्त्यर्थबोधकत्वाविवक्षापातात् व्यत्यासेऽपि पूर्वजातसंस्कारानिवृत्तेः। मास-परिच्छेद्यो जात इति बोधः। जातस्य परिच्छेद्यत्वं तु परिच्छेद्यजननाश्रयत्वेन। अस्य जातस्य कियान् काल इति प्रश्ने मासजात इत्युत्तरम्।

नञ्समासे बोधस्तु नञर्थनिर्णये निरूपितः। कर्मधारयात् नञ्तत्पुरुषाच्च न मत्वर्थीयः। मत्वर्थीयान्तेन च न तौ (कर्मधारयतत्पुरुषौ)। वृत्तिद्वयकल्पने गौरवेण तत्र बहुव्रीहेरेव साधुत्वात्। क्वचित्तु शिष्टप्रयोगानुसारेण लाघवादरात् भवत्येव, यथा अदण्डी अपुच्छी अवाग्मी एकदेशिन इत्यादि।

प्रगत आचार्यः प्राचार्यः, निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः इत्यादौ प्रनिरादीनां गतक्रान्ताद्यर्थे वृत्तिः।

मणिग्रन्थानुसारं कर्मधारयसमासविचारः[४८]

नीलोत्पलमानयेत्यादौ कर्मधारये विभक्तिं विनैव नामार्थयोरभेदेनान्वयबोधानन्तरं विशिष्टस्य अभेदेन नीलपदार्थविशिष्टस्य उत्पलपदार्थस्य कर्मत्वेन क्रियायामन्वयः। कर्मधारये नीलोत्पलपदसमुदाये तु न शक्तिः न वा लक्षणा। ताभ्यां विनापि विवक्षितार्थान्वयबोधोपपत्तेः।

ननु नीलोत्पलमानयेत्यत्र नीलोत्पलयोः सामानाधिकरण्यं प्रतीयते। तत्र सामानाधिकरण्ये नीलपदस्य लक्षणैव वक्तव्या। न च सामानाधिकरण्यं संसर्गतया भासते। अतो न लक्षणेति वाच्यम्। तथा सति राजपुरुषादिषष्ठीतत्पुरुषेऽपि षष्ठ्यर्थस्य सम्बन्धस्य संसर्गतया भानसम्भवात् राजपदस्य सम्बन्धे लक्षणा न स्यात्।

अत्र ब्रूमः। कर्मधारये नामार्थयोः सामानाधिकरण्यं नाम किम्? नामार्थयोः नीलरूपाश्रयोत्पलयोः अभेदो वा गुणगुणिनोः नीलरूपोत्पलयोः समवायो वा अनुभूयते। स च संसर्ग एव। न तु संसर्गप्रतियोगी। अतोऽन्वयप्रतियोगिनोः शाब्दोऽनुभवः शक्त्यैवेति न लक्षणा। यद्यपि नामार्थयोर्भेदेनान्वयस्य अव्युत्पन्नतया नीलरूपघटयोः समवायस्य कथं संसर्गमर्यादया भानम्, तथापि समासातिरिक्तस्थल एव तथा अव्युत्पन्नतेति ध्येयम्। राजपुरुष इति तत्पुरुषे तु राजसम्बन्धि-पुरुषयोरन्वयोऽनुभूयते। राजसम्बन्धिनश्च अन्वयप्रतियोगिनः शाब्दोऽनुभवः न राजपदे षष्ठ्यर्थलक्षणां विना सम्भवति। राजसम्बन्धस्य प्रकारतया भानं न लक्षणां विना सम्भवतीति यावत्। कर्मधारये तु अभेदस्य समवायस्य वा न प्रकारतया भानं, किं तु संसर्गतयेति तद्भानाय न लक्षणाया आवश्यतेति विशेषः।

---

[४८] तत्त्वचिन्तामणौ श.ख. पृ. ७७७-

एवं च बहुव्रीहौ सर्वपदानां अन्तिमपदस्य वा अन्यपरतया (समस्यमानपदार्थातिरिक्तार्थपरतया) षष्ठीतत्पुरुषे पूर्वपदस्यान्यपरतया लाक्षणिकत्वात् ताभ्यां कर्मधारयो बलीयान्। कर्मधारये सर्वेषां पदानां स्वार्थपरतया मुख्यत्वात्।

अत एव "एतया ऋचा निषादस्थपतिं याजयेत्" इत्यत्र निषादस्थपतिशब्दः कर्मधारय एव, न तु षष्ठीतत्पुरुषः। षष्ठीतत्पुरुषत्वे पूर्वपदस्य षष्ठ्यर्थे लक्षणापत्तेः। निषादश्चासौ स्थपतिश्चेति विग्रहः। स्थपतिर्नाम ईश्वरः। राजा वा अधिपतिर्वा। निषादजातीयं राजानं याजयेत् इत्यर्थः। निषादस्य च यागानुकूलवेदविद्यां विना यागानुष्ठानासम्भवात् अनेन विधिना निषादस्य यागानुकूलविद्या अनुमन्यते। षष्ठीतत्पुरुषे तु मुख्यार्थहानिप्रसङ्गः।

शब्दशक्तिप्रकाशिकायां कर्मधारयविचारः[४९]

क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्।
तादात्म्येन भवेदेष समासः कर्मधारयः।।

क्रमिकं यन्नामद्वयं तयोरेकस्य नाम्नोऽर्थे धर्मिणि तादात्म्येन अपरनाम्नोऽर्थस्यान्वयबोधं प्रति समर्थं तादृशं नामद्वयं कर्मधारयः। नीलोत्पलमित्यादौ उत्पलादिपदस्यार्थे नीलादिपदार्थस्य तादात्म्येनान्वयः। तादात्म्यसम्बन्धावच्छिन्नपूर्वनामार्थनिष्ठप्रकारतानिरूपितोत्तरनामार्थनिष्ठविशेष्यतानिरूपकशाब्दबोधजनकं क्रमिकनामद्वयं कर्मधारयसमास इति निष्कर्षः। तथा पुरुषः सिंह इव पुरुषसिंह इत्यादौ "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"[५०] इति सूत्रेण कर्मधारयसमासः। तत्र सिंहपदस्य सिंहसदृशे लक्षणा। तस्य तादात्म्यसम्बन्धेन पुरुषपदार्थेऽन्वयः। पुरुषाभिन्नः सिंहसदृश इत्यन्वयबोधः।

कुम्भस्य समीपमित्याद्यर्थकोपकुम्भाद्यव्ययीभावसमासेऽतिव्याप्तिवारणाय तादात्म्येनेति। तत्र हि निरूपितत्वसम्बन्धेन कुम्भपदार्थस्योपपदार्थसमीपेऽन्वयः। न चोपपदस्य नामत्वं नास्तीति वाच्यम्। प्रकृष्टं बलं प्रबलम्। अपकृष्टं द्रव्यमपद्रव्यमित्यादौ प्र अप इत्यादेः संग्रहाय नामपदस्य धातुभिन्नोपलक्षकत्वात्।

नीलमुत्पलमित्यादिवाक्येऽतिव्याप्तिवारणाय क्रमिकमिति। तत्र नीलोत्पलपदयोः विभक्त्या व्यवधानेन क्रमिकत्वाभावात्।

यदि च तादात्म्येन नीलादिनामार्थस्यान्वयबुद्धौ नीलादिनामोत्तरनामोपस्थाप्यत्वं तन्त्रम्। अतो नीलमुत्पलमित्यत्र अभेदसम्बन्धेन न नीलस्योत्पलेऽन्वयः। अपि तु

---

[४९] श.श.प्र. पृ.२०१
[५०] पा.सू. २.१.५६

विशेषणविभक्त्युपस्थाप्ये तादात्म्ये आधेयतासम्बन्धेन अन्वयः। तथा च नील-वृत्तितादात्म्यवदुत्पलमिति तत्र बोधः।

न च नामार्थप्रकारकाभेदसंसर्गकान्वयबोधे न नामोत्तरनामोपस्थाप्यत्वं तन्त्रम्; नीलघटपटावित्यत्र अभेदसंबन्धेन नीलप्रकारकबोधस्य पटेऽपि सत्त्वेन तत्र नीलपदाव्यवहितोत्तरनामोपस्थाप्यत्वाभावात् व्यभिचारापत्तेः। अव्यवधानांशानिवेशे च नीलमुत्पलमित्यत्रापि अभेदसंसर्गकबोधो भवेदेवेति वाच्यम्। नीलघटपटावित्यत्र नीलपदाव्यवहितोत्तरेण घटपटेत्येवं द्वन्द्वात्मकनाम्नैवोपस्थापिते पटे नीलस्य तादात्म्येनान्वयात् व्यभिचाराप्रसक्तेः।

न च तथापि स्तोकं पचति, धान्येन धनम् प्रकृत्या पटुः इत्यादौ स्तोकधान्यप्रकृत्यादीनां पाकधनपटुत्वादावभेदसंसर्गेणान्वयेन तत्र विभक्त्या व्यवधानेन नामाव्यवहितोत्तरनामोपस्थाप्यत्वाभावात् व्यभिचार इति वाच्यम्। तत्र स्तोकादेर्न धात्वाद्यर्थे तादात्म्येन अन्वयः। अपि तु द्वितीयाद्यर्थे तादात्म्य एवान्वयः, अतो न व्यभिचार इति विभाव्यते — तदा क्रमिकत्वमनुपादेयमेव।

नन्वेवमप्युक्तस्य कर्मधारयलक्षणस्य राजपुरुषइत्यादितत्पुरुषेऽतिव्याप्तिः। नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नतया तत्र राजपदस्य राजसम्बन्धिनि लक्षणाया आवश्यकत्वेन राजपदार्थस्य राजसम्बन्धिनोऽभेदान्वयबोधजनकत्वात् इति चेत् —

न। राजपुरुष इत्यादितत्पुरषे पूर्वपदलक्षितस्य राजसम्बन्धिनः पुरुषपदार्थे न तादात्म्येनान्वयः। तथा सति विग्रहसमासयोरनतिरिक्तविषयकत्वमिति नियमभङ्गा-पत्तेः। किं तु राजपदलक्षितस्य राजसम्बन्धस्यैव स्वरूपसम्बन्धेन पुरुषेऽन्वयः। अत एव राजपुरुष इत्यादौ पूर्वपदस्य षष्ठ्यर्थसम्बन्धे लक्षणेति मणिकारोक्तं संगच्छते।

न च नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् कथमेतदिति वाच्यम्। नामार्थयोर्भेदा-न्वयस्याव्युत्पन्नत्वमिति नियमे निपातातिरिक्तत्वमिव तत्पुरुषातिरिक्तत्वमपि विशेषणं दीयते। अतः क्षत्यभावात्।

अथवा तत्पुरुषविग्रहघटकसुबर्थानवच्छिन्नस्यैव नामार्थस्य तादात्म्येनान्वय इति व्युत्पत्तिः। अतो न दोषः।

नन्वेवमपि पञ्चानां पुलानां समाहर इत्यर्थे पञ्चपुली इति द्विगौ, द्वौ गार्ग्यौ इत्यर्थे द्विगार्ग्यं गच्छतीत्यादिस्थलीये द्वितीयाद्यभिन्नगार्ग्यादिबोधकाव्ययीभावे चातिव्याप्तिः अभेदसम्बन्धेन नामार्थप्रकारकनामार्थविशेष्यकबोधजनकत्वादिति चेत् — न।

कर्मधारयलक्षणे द्विग्वव्ययीभावान्यत्वस्यापि विशेषणीयत्वात्।

विशेषणविशेष्ययोर्मिथः व्यभिचार एव कर्मधारयः

मानुषब्राह्मणः ब्राह्मणमानुष इत्याद्यप्रयोगात् यत्र विशेषणविशेष्ययोः परस्परं व्यभिचारस्तत्रैव कर्मधारयः साधुः। मानुषस्य ब्राह्मणव्यभिचारित्वेऽपि ब्राह्मणस्य मानुषव्यभिचारित्वाभावान्न कर्मधारयः। न च प्रमेयधूम इत्यत्राव्याप्तिः। प्रमेयभेदाप्रसिद्ध्या धूमस्य प्रमेयव्यभिचारित्वाभावादिति वाच्यम्। नरस्य शरीरं, राहोः शिरः इत्यादाविव तादात्म्यार्थकषष्ठ्या प्रमेयधूम इति तत्पुरुषसमासस्यैवाङ्गीकारादिति **वृद्धाः**।

नव्यास्तु — विशेष्यस्यैव विशेषणव्यभिचारित्वं कर्मधारये तन्त्रम्, न तु विशेषणस्यापि विशेष्यव्यभिचारित्वम्। चन्दनतरुः, विन्ध्यगिरिः, वसन्तसमयः इत्यादिप्रामाणिककर्मधारयेषु विशेष्यस्य तर्वादेः विशेषणचन्दनादिव्यभिचारित्वेऽपि विशेषणचन्दनादेः विशेष्यतर्वादिव्यभिचारित्वाभावात्। एवं च प्रमेयधूम इत्यत्र तु विशेष्यस्य धूमस्य प्रमेयरूपविशेषणाव्यभिचारित्वात् तादात्म्यसम्बन्धार्थकषष्ठ्या तत्पुरुष एव। मानुषब्राह्मण इति त्वसाधुः। विशेष्यस्य ब्राह्मणस्य मानुष-व्यभिचारित्वाभावात्। ब्राह्मणमानुष इति तु साधुः, विशेष्यस्य मानुषस्य ब्राह्मणव्यभिचारित्वात्।

पुरुषोत्तम इति कर्मधारये उत्तमशब्दार्थः भ्रमविधुरत्वम्। पुरुषशब्दार्थः स्त्रीत्वनपुंसकत्वशून्यः। एवं च पुरुषभिन्ने भ्रमविधुरत्वसत्त्वात् विशेष्यस्य विशेषण-व्यभिचारित्वम्। उत्तमपुरुष इत्यपि साधुरेव विशेष्यविशेषणयोः द्वयोरपि व्यभिचारात् इत्याहुः।

तदाद्युत्तरपदकः कर्मधारयः

तदाद्युत्तरपदकः कर्मधारयः प्रायशो नेष्यते। नीलतदस्तीत्यतः कदाचिदपि नीलोत्पलास्तित्वाप्रतीतेः। क्वचिदिष्यतेऽपि।

> पक्वयद्भोजनं रम्यमामतद्भोजनं वृथा।
> नीलयद्रस आस्वाद्यः कटुतद्रूपमीक्ष्यते।।

इति प्रयोगात्। पक्वाभिन्नस्य यस्य भोजनं रम्यम् आमाभिन्नस्य तस्य भोजनं वृथा। नीलाभिन्नस्य यस्य रस आस्वाद्यः कट्वभिन्नस्य तस्य रूपमीक्ष्यत इति श्लोकार्थः।

ननु विशेष्यतासम्बन्धेन नामार्थप्रकारकशाब्दबोधसामान्यं प्रति नामोत्तर-विभक्त्युपस्थाप्यत्वं तन्त्रम्। घटमित्यादौ घटप्रकारककर्मत्वविशेष्यकबुद्धौ घटादि-नामोत्तरामादिविभक्त्युपस्थाप्यत्वस्य कर्मत्वादौ दर्शनात्। न तु तादात्म्यसम्बन्धा-

वच्छिन्नतन्नामार्थनिष्ठप्रकारताकशाब्दबोधं प्रति तन्नामोत्तरविभक्त्युपस्थाप्यत्वं गौरवात्। अतो नामार्थयोर्नीलोत्पलयोरन्वयासम्भवात् कर्मधारयादिकः समासो न यौगिकः। किं तु नीलोत्पलत्वादिविशिष्टे रूढ एव। तदुक्तं भर्तृहरिणा —

अबुधान् प्रत्युपायाश्च विहिताः प्रतिपत्तये।
शब्दान्तरत्वादत्यन्तं भेदो वाक्यसमासयोः।।

इति वैयाकरणाः इति चेत् — न। तन्मन्दम्। "नीलोत्पल"मित्यादौ समुदाये रूढिज्ञानाभावेऽपि नीलादिप्रत्येकपदार्थोपस्थित्या तयोस्तादात्म्येनान्वयबोधस्य आनुभविकत्वेन गौरवस्य प्रामाणिकत्वात्। अन्यथा नामार्थप्रकारकान्वयबोधसामान्यं प्रति नामोत्तरनामोपस्थाप्यत्वं तन्त्रमित्यूरीकृत्य "नीलमानये"त्यादौ नामार्थसुबर्थयोर्नान्वयबोधः, परं तु सुबन्तभागस्य नीलविशिष्टकर्मत्वादौ रूढिरेवेत्यपि प्रसज्येत।

न च समासस्याशक्तत्वे "नीलो द्रव्यं च घटः" इत्यादाविव "नीलघटो द्रव्य"मित्यादावपि घटे धर्मिण्येकत्र द्वयमिति न्यायेन नीलद्रव्ययोस्तादात्म्येनान्वयापत्तिरिति वाच्यम्। नामार्थमुख्यविशेष्यताक इव तादात्म्यावच्छिन्नविधेयताकेऽपि बोधे नाम्नः प्रथमान्तत्वस्य तन्त्रत्वात्। विधेयत्वं तु विशेष्यतावच्छेदकत्वान्यप्रकारत्वं प्रकारताप्रभेदो वा। पटमित्यादौ तु कर्मत्वादौ पटादिर्न तादात्म्येन विधेय इति न तत्र व्यभिचारः।

ननु नीलं पीतं चोत्पलं यत्रेत्यर्थे नीलपीतोत्पलं सरः इति बहुव्रीहिवत् नीलं पीतं चोत्पलमित्यर्थे नीलपीतोत्पलं पुष्पम् इत्यादिः कर्मधारयोऽप्येकत्र द्वयमिति न्यायेन नीलपीतोभयावच्छिन्नोत्पलनिष्ठविशेष्यताकधीजनकः कथं न स्यादिति चेत् —

मैवम्। "बहुपदे बहुव्रीहिरेव नेतरो द्वन्द्वान्यः समासः" इत्यनुशासनबलेन बहुव्रीहेरेव स्वघटकनामद्वयोपस्थाप्यार्थद्वयावच्छिन्नतादृशनामान्तरार्थनिष्ठविषयताकबोधं प्रति हेतुत्वेन समासान्तरस्य तादृशबोधं प्रति असमर्थत्वात्।

"नीलपीतोत्पले रम्ये, पीतनीलोत्पलाश्रितम्" इत्यादौ तु नीलोत्पलं पीतोत्पलं रम्यम् इत्याकारक एवान्वयबोधः, न तु नीलं पीतं च यदुत्पलं तद्रम्यमित्याकारकः। अत एव द्वन्द्वात् परस्य प्रत्येकाभिसम्बन्धसूचनार्थं नीलं च पीतं च नीलपीते, नीलपीते च ते उत्पले च नीलपीतोत्पले इत्येव तत्र विग्रहं वर्णयन्ति; न तु नीलं च पीतं च तत् उत्पलं चेत्यादिकम्।

घटस्य नाधिकरणमित्यादिविग्रहे घटानधिकरणमित्यादिकस्तु मध्यमपदप्रधानस्तत्पुरुषो न बहुनामगर्भो नञो नामत्वाभावात् न वा एकत्र द्वयमिति न्यायेन स्वार्थस्य बोधकः।

शब्दशक्तिप्रकाशिकानुसारम् उपपदसमासः[५१]

यदुत्तरपदं नामानुत्तरं सदबोधकम्।
धातुकृद्भ्यामुपपदसमासः स तदन्तकः।।

धातुकृद्भ्यां निष्पन्नं यस्योत्तरपदं शब्दान्तरानुत्तरं सत् यादृशार्थस्य बोधं प्रति असमर्थं तादृशार्थकान्त्यपदकः समासः उपपदसंज्ञकः। कुम्भकारः क्षीरपायी इत्यादिके उपपदसमासे धातुकृद्भ्यां निष्पन्नं कर्त्राद्यर्थकं कारादिपदं पदान्तरानुत्तरं तन्न कर्त्रादेरन्वयबोधसमर्थम्, किं तु कुम्भादिशब्दोत्तरं सदेव तद्बोधकमिति लक्षण-समन्वयः। धातुकृद्भ्यां निष्पन्नमित्युक्त्या चन्द्रनिभमित्यादेः नोपपदसमासत्वम्। चन्द्रनिभमिति तत्पुरुषः। तत्र निभपदं शब्दान्तरानुत्तरं सत् सदृशार्थबोधासमर्थम्, अथापि धातुकृद्भ्यां न निष्पन्नम्। अतः तद्व्युदासः।

कारकैकोपपदकः षड्विधोऽयमिति भ्रमः।
कर्मकर्त्राद्युपपदभेदात् बहुविधस्त्वसौ।।

कर्तृकर्मकरणसम्प्रदानापादानाधिकरणरूपषड्विधकारकमात्रोपपदकः षड्विधः उप-पदसमासः इति केषांचित् भ्रमः। सम्प्रदानोपपदकसमासस्य कुत्राप्यदर्शनात् विभागोऽयमनुपपन्नः। अपि च अकारकोपपदकोऽपि समासो दृश्यते। अतोऽयं विभागः भ्रममूलकः। अपि तु असावुपपदसमासो बहुविधः। तथा हि — कारकेषु उत्तानः शेते उत्तानशयः पूर्वः सरतीति पूर्वसर इत्यादावुत्तानादिः कर्ता उपपदम्। कुम्भं करोतीति कुम्भकार इत्यादौ कुम्भादिः कर्म, कच्छेन पिबतीति कच्छपः इत्यादौ कच्छादि करणम्, उरवायाः स्रंस्यते उरवास्रत् इत्यादौ उरवादिरपादानम् खे शेत इति खशयः इत्यादौ खादिरधिकरणम् उपपदम्। सम्प्रदानं तु न कुत्राप्युपपदम्। अतः षड्विधविभागे न्यूनता। दृश्यते च ब्रह्मभूयमित्यादौ कारकभिन्नेनाप्युपपदेन समास इत्यसावुपपदसमासोऽनेकविध एव। न तु कारकमात्रोपपदकत्वात् षड्विध एव। न्यूनत्वाधिकत्वाभ्यां षड्विधत्वव्याघातात्।

असूर्यंपश्या इत्यप्युपपदसमासः। परं तु अव्ययपदस्येव नञा समस्तस्यैव तस्य स्वार्थबोधने व्युत्पन्नत्वात् न केवलस्य नञ्रहितस्य तस्य प्रयोगः।

शब्दशक्तिप्रकाशिकानुसारं द्विगुसमासः[५२]

संख्याशब्दयुतं नाम तदलक्ष्यार्थबोधकम्।
अभेदेनैव यत् स्वार्थे स द्विगुः त्रिविधो मतः।।

---

[५१] पृ. २७२-२७३
[५२] पृ. २१७

संख्यावच्छिन्नशक्तयत्पदोत्तरत्वविशिष्टं यन्नाम स्वार्थधर्मिकं तादात्म्येन तत्पदलक्ष्याभिन्नार्थस्यान्वयबोधं प्रति समर्थं तन्नामोत्तरतापन्नं तन्नाम तदलक्ष्यार्थाभिन्नस्वार्थे द्विगुः उच्यते। तथा च समासत्वे सति यादृशानुपूर्वीप्रकारकज्ञानं स्वघटकसंख्यावच्छिन्नशक्तनामोत्तरयादृशानामप्रतिपाद्ययादृशार्थधर्मिकतादात्म्यसम्बन्धावच्छिन्नतादृशनामलक्ष्यार्थभिन्नयादृशार्थनिष्ठप्रकारताकान्वयबोधजनकं तादृशानुपूर्वीमच्छब्दत्वं द्विगोर्लक्षणमिति पर्यवसन्नम्। यथा पञ्च मूलानि पञ्चमूली इत्यत्र पञ्चशब्दस्य पञ्चत्वसंख्याविशिष्टोऽर्थः, तस्याभेदेन मूलपदार्थेऽन्वयः। तथा च पञ्चमूलीत्यानुपूर्वीघटकं संख्यावच्छिन्नशक्तं पदं पञ्चपदं तदुत्तरं मूलपदं तदर्थमूलधर्मिकाभेदसंसर्गकपञ्चत्वसंख्याविशिष्टप्रकारकान्वयबोधजनकं भवति इति लक्षणसमन्वयः। पञ्च मूलानीति विग्रहवाक्येऽतिव्याप्तिवारणाय समासत्वे सतीति। नीलोत्पलमिति कर्मधारयेऽतिव्याप्तिवारणाय संख्यावच्छिन्नशक्तपदोत्तरमिति।

"पञ्चभार्या द्रौपदीयं धर्मिष्ठातिपतिव्रता" इत्यत्र पञ्चानां भार्या पञ्चभार्येति तत्पुरुषेऽतिव्याप्तिवारणाय तादात्म्यसम्बन्धावच्छिन्नेति प्रकारताविशेषणम्। त्रिकटु त्रिभुवनम् इत्यादौ कर्मधारये पूर्वपदस्य शुण्ठ्यादिपर्याप्तत्रित्वावच्छिन्न लाक्षणिकतया पूर्वपदलक्ष्यार्थस्याभेदेनान्वयबोधकेऽतिव्याप्तिवारणाय लक्ष्यार्थभिन्नेति। द्वयो रूपं द्विरूपमिति तत्पुरुषेऽतिव्याप्तिवारणाय अभेदसम्बन्धनिवेशः। स चायं द्विगुस्त्रिविधः तद्धितार्थद्विगुः उत्तरपदद्विगुः समाहारद्विगुश्चेति।

तद्धितार्थद्विगुः

तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मतः। यो द्विगुः स्वोत्तरतद्धितार्थान्वितस्वार्थकः स तद्धितार्थद्विगुः। द्विगुत्वे सति यादृशानुपूर्वीप्रकारकज्ञानत्वं स्वाश्रयोत्तरत्वेनोपस्थिततद्धितोपस्थाप्ययादृशार्थविशेष्यकयादृशार्थप्रकारकान्वयबोधजनकतावच्छेदकं तादृशानुपूर्वीविशिष्टशब्दत्वं तद्धितार्थद्विगोर्लक्षणमिति पर्यवसन्नम्।

यथा "द्विमुद्रो वृष" इत्यत्र द्वाभ्यां मुद्राभ्यां क्रीतः इत्यर्थे उत्पन्नस्य ठकः "द्विगोस्तद्धितस्यानपत्ये"[५३] इति सूत्रेण लुक्। लुप्तठगर्थक्रीतार्थविशेष्यकद्विमुद्राप्रकारकबोधस्य द्विमुद्र इति समासाज्ञायमानतया अयं तद्धितार्थद्विगुः। लुप्तद्धिततदर्थस्मृतिपूर्वकमेव शाब्दबोध इति जगदीशाशयः।

एवं "द्विवर्षा गौः" इत्यादौ द्वाभ्यां वर्षाभ्यामभिन्नवयस्कस्य, "द्विदलं पवित्रम्" इत्यादौ द्वाभ्यां दलाभ्यां निर्मितस्य, "द्विगुञ्जं स्वर्णम्" इत्यादौ द्वाभ्यां गुञ्जाभ्यां तुलितस्य, "त्रिकाण्डः पुरुषः" इत्यादौ त्रिभिः काण्डैः परिमितस्य, "पञ्चकपालश्चरुः"

---

[५३] पा.सू. ४.१.८८

इत्यादौ पञ्चभिः कपालैः संस्कृतस्य बोधने लुप्तस्यैव तद्धितस्य क्रीताद्यभिधायकत्वात्। परिशिष्टकृतो मतमेतत्।

महाभाष्यकृन्मतम्

उक्तप्रयोगेषु द्विगुसमासघटकान्तिमनाम्नैव क्रीतादिरूपार्थो लक्ष्यते। न तु लुप्तठगादिरप्यपेक्ष्यते। अतस्तद्धितार्थलाक्षणिकस्वान्त्यनामको द्विगुरेव तद्धितार्थद्विगुरिति फणिभाष्यमतं तु न युक्तम्।

असर्वगत्वात् = स्थलविशेषेऽव्याप्तत्वात्। तथाहि "पाञ्चपुरुषिः" इत्यादौ पञ्चानां पुरुषाणामपत्यस्य, "पञ्चगर्गरूप्यो गौः" पञ्चानां गर्गाणां भूतपूर्वस्य बोधने तद्धितेनैव स्वार्थस्यापत्यप्रभृतेरुपस्थापनात्।

न चोक्तस्थले पुरुषादिपदेन लक्षणया पुरुषापत्यादेरुपस्थापनात् तदेकदेशे पुरुषादौ पञ्चपदार्थस्य व्युत्पत्तिवैचित्र्येण अभेदेनान्वयसम्भवात् नाव्याप्तिरिति वाच्यम्। एवमपि "द्विसुवर्णमुद्रः पशुः" इत्यादौ उत्तरपदस्य सुवर्णमुद्र इत्यस्य वाक्यरूपतया शक्तिविरहेण क्रीताद्यर्थे शक्यसम्बन्धरूपाया लक्षणाया असम्भवात्।

उत्तरपदद्विगुः

स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः।
यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः।।

यो द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः। यथा पञ्च गावो धनमस्येत्यादिविग्रहे "पञ्चगवधनः पुरुषः" इत्यादौ बहुव्रीह्यादिघटकः पञ्चगवादिः। अत्र पञ्च गावो धनं यस्येति विग्रहेऽन्तर्वर्तिद्विगुमवलम्ब्य राजादित्वादन् प्रत्ययः। समुदायस्तु बहुव्रीहिः। पञ्चगवाभिन्नधनसम्बन्धीति शाब्दबोधः।

द्विगुत्वाश्रयत्वे सति स्वघटकनामद्वयसाकाङ्क्षनामान्तरघटितसमासघटकत्वम् उत्तरपदद्विगोर्लक्षणं पर्यवसन्नम्।

समाहारद्विगुः

स्वार्थान्वितसमाहारलक्षकस्वान्त्यशब्दकः।
उक्ताभ्यामितरः किं वा समाहारद्विगुर्द्विगुः।।

स्वोपस्थाप्यार्थघटितसमाहारलक्षको यदीयान्त्यशब्दः स द्विगुः समाहारद्विगुः। तथा च द्विगुत्वे सति स्वोपस्थाप्यार्थसमाहारलक्षकान्त्यपदकत्वं समाहारद्विगुत्वमिति

पर्यवसन्नम्। तथाविधकर्मधारयेऽतिव्याप्तिवारणाय सत्यन्तम्। उत्तरपदद्विगावतिव्याप्तिवारणाय विशेष्यम्। पूर्वपदलक्षकपदघटितद्विगावतिव्याप्तिवारणाय अन्त्येति।

उदाहरणं — पञ्चपुली। पञ्चानां पुलानां समाहारः। अत्र योगलभ्यानां पञ्चाभिन्नपुलानां समाहारः उत्तरपदभूतपुलशब्देन लक्ष्यते। न तु तत्र द्विगोः शक्तिः। अन्यलभ्ये शक्त्ययोगात्। वाक्यत्वेन शक्त्यसम्भवाच्च। अत एव न लक्षणापि। शक्यसम्बन्धस्यैव लक्षणात्वेन वाक्ये शक्त्यभावेन शक्यसम्बन्धरूपायाः लक्षणायाः असम्भवात्।

यदि च पञ्चपुलीत्यतः पञ्चानां पुलानामेव बोधः, न तु तत्समाहारस्यापि। अत एव पञ्चपुलीं छिनत्तीत्यादिकः प्रयोगः प्रमाणम्। अन्यथा समूहरूपस्य समाहारस्य छेदनाद्यसम्भवेन तादृशवाक्यस्यायोग्यतापत्तेः। पुलादेः बहुत्वेऽपि एकवचनमानुशासनिकम्, दारादेः बहुवचनवत्।

न च द्रव्यप्राधान्ये पञ्चानां खट्वानां समाहारः "पञ्चखट्वि" इत्यादौ ह्रस्वो न स्यात्। "गोस्त्रियोरुपसर्जनस्य"[५४] इति सूत्रेण गोशब्दस्येव स्त्रीप्रत्ययस्यापि समासान्त्यस्योपसर्जनस्यैव ह्रस्वविधानात्समाहारबोधने तु समाहारं प्रति खट्वायाः उपसर्जनतया ह्रस्वविधेर्निराबाधत्वादिति वाच्यम्। समाहारसंज्ञकद्विगोरप्यन्त्यस्य स्त्रीप्रत्ययस्य पृथगेव ह्रस्वविधेर्वक्तव्यत्वात्, प्रयोगानुसारित्वात् कल्पनायाः। पञ्चानां पाचकानां समाहारः पञ्चपाचकी इत्यादावव्याप्तिश्च। तत्रोत्तरपदस्य वाक्यत्वेन लक्षकत्वायोगात् — इति सूक्ष्ममीक्ष्यते —

तदा पूर्वनिरुक्ताभ्यां तद्धितार्थोत्तरपदद्विगुभ्यां भिन्नो द्विगुरेव समाहारद्विगुर्बोध्यः। एवं च कर्मधारयान्तर्गतत्वेऽपि द्विगोः न क्षतिः। संख्यावाचिनामार्थविषयकबोधजनकत्वरूपोपाधिभेदमादायैव षोढा समासविभागोपपत्तिः — इत्याहुः।

शब्दशक्तिप्रकाशिकानुसारं बहुव्रीहिसमासः[५५]

बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः।
निरूढया लक्षणया, स्वांशज्ञापकशब्दवान्।।

समास इति प्रकृतम्। स्वांशस्य ज्ञापकेन शब्देन घटितः स्वघटितस्य यादृशार्थस्य निरूढलक्षणया सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वघटिततादृशार्थसम्बन्धिबोधने बहुव्रीहिः इत्यर्थः। स्वगर्भार्थेत्यत्र स्वशब्देनान्यपदार्थो गृह्यते। एवं

---

[५४] पा.सू. १.२.४८
[५५] पृ. २४४

स्वांशज्ञापकेत्यत्र स्वशब्देन विशिष्टो बहुव्रीह्यर्थो गृह्यते। तथा च आरूढवानरो वृक्ष इत्यत्र आरूढो वानरो यं स इति विग्रहात् वृक्षकर्मकारोहणकर्तृवानरसम्बन्धी वृक्षः बुध्यते। स्वं वृक्षः तद्घटितोऽर्थः वृक्षकर्मकारोहणकर्तृवानरः तत्सम्बन्धित्वेन रूपेण वृक्षस्य निरूढलक्षणया बोधकः बहुव्रीहिः। तथा तादृशविशिष्टार्थस्य अंशभूतः वृक्षकर्मकारोहणकर्तृवानरः तस्य बोधकः यः वानरशब्दः तद्घटितोऽयं बहुव्रीहिरिति लक्षणसमन्वयः। तथा च समासत्वे सति यादृशार्थधर्मिकयादृशार्थघटितार्थ-सम्बन्धित्वप्रकारकबोधं प्रति यादृशार्थबोधजनकतावच्छेदकानुपूर्वीघटितयादृशानु-पूर्वीप्रकारकज्ञानं स्वरूपयोग्यं निरूढलक्षणाधीनतादृशार्थबोधजनकतावच्छेदकानु-पूर्वीघटिततादृशानुपूर्वीमच्छब्दत्वं तादृशार्थघटितार्थसम्बन्धित्वप्रकारकात्वयबोधे बहुव्रीहित्वमिति निष्कर्षः। तथा च बहुव्रीहौ उत्तरपदस्य विशिष्टेऽन्यपदार्थे निरूढलक्षणेत्युक्तं भवति।

एवं पीतपयस्कं पात्रमित्यत्र पीतं पयो येनेति विग्रहात् स्वकरणक-पानकर्मजलसम्बन्धि पात्रमिति बोधः। पक्वतण्डुलश्चैत्र इत्यत्र पक्वः तण्डुलो येनेति विग्रहात् स्वकर्तृकपाककर्मतण्डुलसम्बन्धी चैत्र इति बोधः। दत्तदक्षिणो द्विज इत्यत्र स्वसम्प्रदानकदानकर्मदक्षिणासम्बन्धी द्विजः बुध्यते, दत्ता दक्षिणा यस्मै इति विग्रहात्। पतितपत्रस्तरुः इत्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापादानकपतनाश्रय-पत्रसम्बन्धी वृक्ष इति बोधः। चित्रगुश्चैत्र इत्यत्र चित्रा गावो यस्येति विग्रहानुरोधेन चित्राभिन्नस्वगोसम्बन्धी चैत्रः बुध्यते। रक्तपटः काय इत्यत्र रक्तः पटो यत्रेति विग्रहेण रक्ताभिन्नस्ववृत्तिपटसम्बन्धी काय इति बोधः। बाणच्छिन्नकरो नरः इत्यत्र बाणेन छिन्नः करो येन यस्य वेति विग्रहानुसारात् बाणकरणकस्वकर्तृकच्छेदनकर्मकरसम्बन्धी नर इति बोधः। इत्थं सर्वत्र स्वगर्भतत्तदर्थसम्बन्धित्वेन अन्यपदार्थरूपधर्मिणामवगमः।

दक्षिणपूर्वा, पूर्वोत्तरा

दक्षिणपूर्वा, पूर्वोत्तरा इत्यादिविदिग्बहुव्रीहिस्थले दक्षिणया पूर्वा यस्याः, पूर्वया उत्तरा यस्या इत्यादिविग्रहेण स्वपार्श्वस्थदक्षिणसहितपूर्वसम्बन्धित्व स्वपार्श्वस्थपूर्व-सहितोत्तरसम्बन्धित्वादिना आग्नेयीप्रभृतीनां विदिशां बोधः। तासां दक्षिणस्याः पूर्वस्याश्च दिशः समीपवर्तित्वात्।

अस्तिक्षीरा नास्तिक्षीरा गौः

अस्तिक्षीरा नास्तिक्षीरा गौः इत्यादौ अस्ति क्षीरं यस्या इत्यादिविग्रहेण अस्तित्ववत्स्वक्षीरसम्बन्धित्वप्रकारेण गवादेर्बोधः। इयांस्तु विशेषः — यत् तत्र केषांचिन्मते अस्तीत्यादिक तिङन्तम् अन्येषां मते तिङन्तप्रतिरूपकमव्ययमिति।

उपदशाः शकुनयः

उप समीपे दश येषामिति समीपगणितार्थकषष्ठ्या विग्रहात् उपदशाः शकुनय इत्यादौ स्वसमीपगणितदशसम्बन्धित्वेन नवानामेकादशानां च पक्षिणामवगमः। तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्याप्तसंख्यासमीपगणितदशत्वसम्बन्धित्वेनैव नरादेः बोध इति दुर्गप्रभृतयः। स्वं = अन्यपदार्थो नरादिः।

अधिकदशाः पुरुषाः

अधिकदशाः पुरुषा इत्यादौ अधिका दश येषामिति विग्रहे स्वपर्याप्त-संख्याधिकदशवृत्तिसंख्यापर्याप्त्यधिकरणदशसम्बन्धित्वेन नवादिपुरुषाणां बोधः। स्वं अन्यपदार्थो नरादिः। तत्पर्याप्तसंख्या नवत्वसंख्या, तदधिका या दशवृत्तिसंख्या दशत्वसंख्या तत्पर्याप्त्यधिकरणभूता ये दश तत्सम्बन्धिनो नरा इत्यर्थः।

द्वित्राः पञ्चषाः — द्वित्राः पवित्राः परमा इत्यादौ द्वौ वा त्रयो वा येषामित्यन्यतरार्थकवाशब्देन विग्रहे द्वित्र्यन्यतरपर्याप्तस्वपर्याप्तसंख्यासम्बन्धित्वेन द्वयोस्त्रयाणां वा पवित्राणां बोधः। स्वं — अन्यपदार्थः पवित्रादिः। न च वाशब्दस्यान्यतरार्थकत्वं नास्तीति वाच्यम्। पटे घटे वा घटत्वमित्याद्यनुसारेण वाकारस्यान्यतरार्थकतायाः प्रसिद्धत्वात्। तत्र हि घटत्वं घटपटान्यतरवृत्तीति शाब्दबोधात् तदनुरोधेन वाकारस्यान्यतरार्थकत्वमवश्यमङ्गीकर्तव्यम्। न च विग्रहवाक्ये द्वौ वा त्रयो वेति वाकारश्रवणात् समासेऽपि तस्य श्रवणं स्यादिति वाच्यम्। वाकारार्थस्य निरूढलक्षणालक्ष्यार्थान्तर्भूतत्वात् वाकारस्य समासेऽश्रव-णात्। द्वित्रान्यतरशब्दस्य निरूढलक्षणया द्वित्र्यन्यतरपर्याप्तस्वसंख्यासम्बन्धिन एव बोधात्। पञ्च षड्वा येषामिति विग्रहात् पञ्चषाः पुरुषा इत्यादावपि पञ्चषडन्यतर — पर्याप्तस्वसंख्यासम्बन्धित्वेन पञ्चानां षण्णां वा बोधः।

परे तु द्वौ वा त्रयो वा येषामित्यादिविग्रहे वाशब्दस्य संशयकोट्यर्थकतया द्वित्राः इत्यादिबहुव्रीहेः स्वधर्मिकसंशयकोटितापन्नद्वित्रिसम्बन्धित्वेन द्विप्रभृतिबोधक-त्वमित्याहुः।

वस्तुतस्तु द्वित्रास्तिष्ठन्तीत्यादितः द्वौ वा त्रयो वा तिष्ठन्तीति न संशयः। शब्दस्य तत्रासामर्थ्यात्। द्वौ त्रयः तिष्ठन्तीति च न निश्चयः, द्वयोः सत्त्वे भ्रमत्वापातात्। अतः द्वित्र्यन्यतरे सन्तीति बोध इति **जयरामभट्टाचार्याः**।

द्वित्राः रसाः — द्विः त्रयो येषामिति विग्रहे द्विशब्दस्य द्विगुणितवाचित्वेन द्विगुणितत्रिपर्याप्तस्ववृत्तिसंख्यासम्बन्धित्वेन द्वित्रा रसा इत्यादौ षण्णामवगमः।

दलप्रयोजनम् — स्वधनसम्बन्धी चैत्र इत्यादौ स्वधनस्य सम्बन्धी इति विग्रहेण स्वघटितार्थस्य सम्बन्धित्वेन चैत्रं बोधयन्नपि तत्पुरुषो न स्वांशस्य निरूढलक्षणया बोधकेन पदेन घटितः, अतो नातिव्याप्तिः।

न च द्वौ मुनी, त्रयो वा मुनयो यस्येति वक्तृत्वार्थकषष्ठ्या विग्रहे स्ववक्तृमुनि-द्वयादिसम्बन्धित्वेन बोधके द्विमुनि त्रिमुनि वा ग्रन्थ इत्याद्यव्ययीभावेऽतिव्याप्तिरिति वाच्यम्। तदन्यत्वेनापि बहुव्रीहिलक्षणस्य विशेषणीयत्वात्।

बहुव्रीहौ कस्य पदस्य कुत्र लक्षणेति विचारः

इदमत्रावधेयम् — चित्रगुरस्तीत्यादौ चित्राभिन्नगोसम्बन्धी इति प्रतीतिर्जायते। तन्निर्वाहाय न चित्रगुसमुदायस्य लक्षणा तस्य वाक्यत्वेन लक्षकत्वायोगात्। वाक्यस्य कुत्रापि शक्त्यभावेन शक्यसम्बन्धरूपायाः लक्षणायाः असम्भात्।

न च चित्रपदं चित्राभिन्नगोसम्बन्धिलक्षकम्, गोपदं तु तादृशार्थे तात्पर्यग्राहकं, लक्षणायाः निरूढत्वसम्पादकं वेति वाच्यम्। चित्रपदस्य प्रथमाविभक्त्यन्तत्वाभावेन तदर्थेऽस्तित्वाद्यन्वयस्यानुपपत्तेः, प्रथमान्तपदोपस्थाप्यस्यैव आख्यातार्थभावना-विशेष्यत्वात्। अन्यथा राजपुरुषोऽस्तीत्यादावपि राजनि अस्तित्वान्वयप्रसङ्गात्। अपि च प्रकृत्यर्थ एव सुपः संख्याबोधकत्वमिति व्युत्पत्तेः चित्रपदस्य सुप्प्रकृतित्वाभावेन तदर्थे चित्रगोस्वामिनि सुबर्थसंख्यान्वयानुपपत्तिः।

यत्तु गोपदमेव चित्राभिन्नगोस्वामिलक्षकम्, चित्रपदं तु तत्र तात्पर्यग्राहकम्। गोपदस्य सुप्प्रकृतित्वेन तदर्थे सुबर्थसंख्यान्वयोपपत्तिरिति **मणिकारादि**भिरुक्तम्, तन्न युक्तम्। पूर्वपदार्थान्वितस्य गोपदार्थस्योपसर्जनत्वे एव "गोस्त्रियोरुपसर्जनस्य"[५६] इति सूत्रेण गोपदस्य ह्रस्वविधानात् चित्रपदार्थेन समं गोपदार्थस्यान्वयाभावे गोपदे उकाररूपह्रस्वस्यानुपपत्तेः। अन्यथा गौर्वाहीक इत्यादावपि चित्राभिन्नगोस्वामिति लक्षणायां गोपदे उकाररूपह्रस्वापत्तेः।

न च नामोत्तरवर्तिन एव गोपदस्य स्वार्थोपसर्जनतायां ह्रस्वविधिः, अतो गौरस्तीत्यत्र न गोपदे ह्रस्वः, तस्य नामोत्तरवर्तित्वाभावादिति वाच्यम्। यत्र गोपदेन लक्षणया उपस्थापिते चित्राभिन्नगोसम्बन्धिनि चित्रपदार्थस्यान्वयः तत्र चित्रगवो-ऽस्तीति कर्मधारयेऽपि गोपदस्य ह्रस्वप्रसङ्गात्। तत्र गोपदस्य नामोत्तरवर्तित्वात् अप्रधानत्वाच्च।

---

[५६] पा.सू. १.२.४८

तस्मात् चित्रगुरित्यत्र गोपदं स्वगोसम्बन्धिलक्षकम्। तदेकदेशे गवि चित्रपदार्थस्य तादात्म्येनान्वयः। न च पदार्थैकदेशे गवि अन्वयः न सम्भवति, गोविशेष्यकान्वयबुद्धौ गोविशेष्यकवृत्तिज्ञानस्य हेतुत्वात्; अत्र गोविशेष्यकवृत्तिज्ञानविरहात्। एकदेशान्वयस्य व्युत्पन्नत्वे चित्रव्रजोऽस्तीत्यत्र व्रजशब्दार्थगोस्थानैकदेशे गवि चित्रपदार्थस्य अन्वयापत्तेः इति वाच्यम्। एकदेशे भेदसम्बन्धेनान्वयवत् अभेदसम्बन्धेनाप्यन्वयस्य सम्भवात्। यथा घटशून्यं भूतलमित्यत्र शून्यशब्दार्थः अत्यन्ताभाववान् तदेकेदेशे अत्यन्ताभावे प्रतियोगित्वसम्बन्धेन घटस्यान्वयः। चैत्रनप्ता इत्यत्र जन्यजन्यार्थकनप्तृशब्दार्थैकदेशे प्रथमजन्यत्वे निरूपितत्वसम्बन्धेन चैत्रस्यान्वयः। तथा चित्रगुरित्यत्र गोशब्दार्थैकदेशे चित्रपदार्थान्वयः सम्भवति, व्युत्पत्तिवैचित्र्यात्। कल्पनायाः फलानुरोधित्वात्। प्राचीनैरपि सुन्दरराजपुरुष इत्यादौ सुन्दरस्य राजपुरुषैकदेशे राजन्यभेदेनान्वयबुद्धेः स्वीकाराच्च।

यत्तु — चित्रगुरित्यत्र गोपदस्य स्वकीयगवि सम्बन्धिनि च लक्षणा। चित्रपदार्थस्याभेदेन स्वकीयगवि अन्वयः। स्वकीयगोश्च सम्बन्धिनि अन्वयः। तथा च चित्राभिन्ना या स्वकीयगौः तत्सम्बन्धी इति शाब्दबोधः। न च एकगोपदबोध्ययोः स्वकीयगोः सम्बन्धिनश्च परस्परमन्वयो न सम्भवतीति वाच्यम्। पचतीत्यादावाख्यातार्थयोः कृतिवर्तमानकालयोरिव व्युत्पत्तिवैचित्र्येण एकपदबोध्ययोरपि परस्परमन्वयसम्भवात् इति।

तन्मन्दम्। तथा सति चित्रगुः पुरुषः, तस्याः संचारः अतिमनोहरः इति प्रयोगस्य साधुत्वापत्तेः। तच्छब्देन गोशब्दार्थस्य स्वकीयगोः परामर्शसम्भवात्। तच्छब्दः पदार्थैकदेशमेव न परामृशति। पदार्थं तु परामृशेदेव। गोपदस्य गोसम्बन्धिनि लक्षणां स्वीकुर्वतामस्माकं मते तु गोः पदार्थैकदेशस्य तच्छब्देन परामर्शासम्भवात् न तथा प्रयोगः आपादयितुं शक्यः। सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शकत्वमिति व्युत्पत्तेः।

पूर्वोक्तरीत्या बहुव्रीहावेकदेशान्वयस्य व्युत्पन्नत्वात् आरूढवानरः वृक्षः इत्यत्रापि रुहधातोः स्वकर्मकारोहणमर्थः। क्तप्रत्ययस्य कर्ता अर्थः। वानरशब्दस्य वानरसम्बन्धी अर्थः। एतेषामाकाङ्क्षादिज्ञानसहकारात् स्वकर्मकारोहणकर्त्रभिन्नवानरसम्बन्धी वृक्षः इति बोधः।

बहुव्रीहिसमासविग्रहवाक्यलक्षणम्

यस्यैकं प्रथमान्तं सत् सुबन्तैरितरैः सह।
यदा भेदसुबन्तेन साकाङ्क्षं नाम विग्रहः।।

यस्य = बहुव्रीहेः घटकमेकं यत् नाम प्रथमान्तं सत् सुबन्तैः इतरनामभिः सह भेदार्थकसुबन्तयच्छब्देन साकाङ्क्षं तादृशं तन्नाम तद्बहुव्रीहौ विग्रहः कथ्यते। तेन आरूढो वानरो यस्य ग्रामस्य वृक्षमित्यर्थे आरूढवानर इति न बहुव्रीहिः। यत्पदस्य वृक्षपदेन साकाङ्क्षत्वेन बहुव्रीहिघटकपदैः साकाङ्क्षत्वाभावात्। आरूढो वानरो य इति विग्रहेण बहुव्रीहिवारणाय भेदार्थकसुबन्तेति यच्छब्दविशेषणम्। पतितस्य धनं यस्य दण्डात् घटो यस्मात् इत्यादिकस्तु समानार्थकसुपद्वयीमन्तर्भाव्य न बहुव्रीहिसमासः, सम्प्रदायविरोधात्। तथा च समानार्थकसुपद्वयाघटितत्वमपि लक्षणे विशेषणं देयम्। एतेन घटेन पटो यत्रेति सहार्थमन्तर्भाव्यापि न बहुव्रीहिविग्रहः। सपुत्र इत्यादौ तु सह पुत्रो येनेत्यादिरेव विग्रहः, न तु पुत्रेण सहेत्यादिः, अन्यपदार्थाप्राप्तेः। सघटो देश इत्यादौ च सह घटो येनेत्यादिविग्रहे सहार्थो वैशिष्ट्यम्, न तु सामानाधिकरण्यम्। घटेन देशस्य तद्बाधात्। जीवत्पितृक इत्यादेस्तु जीवन् पिता यस्येति विग्रहः। यस्य च पिता जीवन् इत्येवं जीवद्विधेयकान्वये निराकाङ्क्षोऽपि जीवदभिन्नः पिता यदीय इत्यन्वय एव साकाङ्क्षः।

इदं तु बोध्यम् — यत्र विग्रहवाक्ये सुबन्तयच्छब्दस्य क्रियासाकाङ्क्षत्वसम्भवः तत्र तदर्थान्वितक्रियागर्भित एवार्थे विना बाधकं बहुव्रीहिर्व्युत्पन्नः। तेन गन्तव्यो ग्रामो यस्येति विग्रहे गन्तव्यग्रामश्चैत्र इत्यादितः स्वकर्तृकगतिकर्मग्रामसम्बन्धित्वेनैव चैत्रादेरौत्सर्गिको बोधः। कदाचित्तु तात्पर्यादिवशात् गन्तव्याभिन्नस्वकीयग्राम-सम्बन्धित्वेन बोधः।

यत्र तु विग्रहवाक्ये यच्छब्दस्य क्रियासाकाङ्क्षत्वासम्भवः तत्र विशेषविध्यसत्त्वे यन्नामार्थमुख्यविशेष्यको विग्रहवाक्यात् बोधः सुबन्तयदर्थान्विततन्नामार्थगर्भित एवार्थे बहुव्रीहिर्व्युत्पन्नः। अत एव धनी दासो यस्येत्यर्थे यदीयधनवान् दासः तस्य धनिदासकोऽयमित्यादितो नावगमः, किं तु धनवत्स्वदाससम्बन्धिन एवावगमः। विशेषविध्यसत्त्वे इत्यस्य प्रयोजनं तु — चन्द्रश्चूडायां यस्येत्यादिकस्तु विग्रहो न यदीयश्चन्द्रश्चूडायामित्यर्थकः, किं तु यदीयचूडायां चन्द्र इत्यर्थकः। तादृशार्थ एव सप्तम्यन्तेन चन्द्रादेर्विशेषतो बहुव्रीहिविधानात्। तेन चन्द्रचूडः शिव इत्यादौ स्वचूडावृत्तिचन्द्रसम्बन्धित्वेन शिवस्यावगमो न तु चूडावृत्तिस्वकीयचन्द्रसम्बन्धित्वेन तस्य गगनादेर्वा बोधः।

ससम्बन्धिकपदार्थस्य विशेषणत्वस्थले तु सुबन्तयदर्थान्वितेन तादृशपदस्यार्थेन गर्भितेऽपि बहुव्रीहिर्व्युत्पन्नः। अत एव चैत्रः पुत्रकृतोत्कर्षः इत्यादौ स्वपुत्र-कृतोत्कर्षवानेव चैत्रादिः प्रतीयते, न त्वन्यदीयपुत्रकृतोत्कर्षाश्रयः।

बहुव्रीहिविभागः[५७]

तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः।
विग्रहस्य विशेष्यो यस्तद्विशेष्यकबोधकृत्।।

तद्गुणसंविज्ञानः अतद्गुणसंविज्ञानश्चेति बहुव्रीहेर्द्वौ भेदौ। यस्य विग्रहवाक्यस्य विशेष्यविधया प्रत्याय्यो योऽर्थः तद्विशेष्यकबोधकृत् बहुव्रीहिः तद्गुणसंविज्ञानः। तस्य स्वार्थगुणीभूतस्य सम्यक् विशेष्यविधया विज्ञानं यस्मादिति व्युत्पत्त्या अन्वर्थसंज्ञकत्वात्। तद्भिन्नः अतद्गुणसंविज्ञानः यथा घटस्वरूपः पदार्थः इत्यतः घटः स्वरूपं यस्येति विग्रहस्थले स्वस्वरूपाभिन्नघटसम्बन्धित्वेन घटाभिन्नस्वस्वरूप-सम्बन्धित्वेन वा विग्रहविशेष्यं कलशमेव विशेष्यविधया बोध्यते। तथा च स्वयोग्यविग्रहवाक्यप्रयोज्यबोधमुख्यविशेष्यविशेष्यकबोधजनकबहुव्रीहिः तद्गुणसं-विज्ञानः। कुटादिर्गण इत्यादिरपि कुट आदिर्यस्येति व्युत्पत्त्या कुटाभिन्नस्य स्वधर्मिकज्ञानधर्मिणः सम्बन्धित्वेन धात्वन्तरमिव कुटमपि बोधयन् तद्गुणसंविज्ञान एव बहुव्राहिः।

प्राचां मतेन तद्गुणसंविज्ञानमन्यथा निर्वक्ति —

यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने।
अनुकूलो बहुव्रीहिः स तयोरथवादिमः।।

यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्यार्थस्यान्वयबोधने समर्थः स तद्गुणसंविज्ञानो बहुव्रीहिः। लम्बकर्णमानय, हारग्रीवं पश्येत्यादौ हि बहुव्रीहिः लम्बमानस्वकर्णसम्बन्धिनः स्वग्रीवावर्तिहारसम्बन्धिनश्च स्वार्थस्यान्वयिनि कर्मत्वादौ स्वार्थघटकीभूतस्य तादृशकर्णहारादेरपि व्युत्पत्तिवैचित्र्येण अन्वयबोधने समर्थ इत्येवंविधः बहुव्रीहिः तद्गुणसंविज्ञानः। एकत्र विशेषणतयोपस्थितस्यान्यत्रा-न्वयासम्भवात् प्रकृत्यर्थान्वितस्वार्थबोधकत्वेन प्रत्ययस्य व्युत्पन्नत्वाच्च व्युत्पत्ति-वैचित्र्येणेत्युक्तम्। तद्गुणसंविज्ञानात् भिन्नः बहुव्रीहिः अतद्गुणसंविज्ञानः। यथा दृष्टसागरमानयेत्यादीति प्राचां मतम्।

बहुव्रीहेः विभागान्तरम्

व्युत्पत्तिवैशद्यार्थमन्यथापि पुनर्विभजते —

स्वान्तर्निविष्टद्वित्र्यादिनामभिर्विग्रहात् पुनः।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः।।

---

[५७] श.श.प्र. पृ.२५७

द्वित्रिचतुरादिभिः स्वघटकनामभिर्विग्रहवशात् द्विपदत्रिपदचतुष्पदादिको बहुव्रीहिर्बोध्यः। तथा च स्वघटकनामद्वयघटितविग्रहको बहुव्रीहिर्द्विपदः। एवं त्रिपदादिकं निर्वाच्यम्। चित्रा गौर्यस्येति विग्रहात् चित्रगुरित्यादौ द्विपदस्येव जरती चित्रा गौर्यस्य, महन्नीलमुत्पलं यत्रेत्यादिविग्रहात् जरतीचित्रगुश्चैत्रः, महन्नीलोत्पला सरित् इत्यादौ त्रिपदस्यापि बहुव्रीहेरावश्यकत्वात्।

न च चित्रा च सा गौश्च चित्रगौः जरती चित्रगौः यस्य सः जरच्चित्रगुः इति द्विपद एव बहुव्रीहिर्भवतु। तथा महत् नीलोत्पलं यत्र महन्नीलोत्पला इति द्विपद एव बहुव्रीहिरस्त्विति वाच्यम्। द्विपदविग्रहे जरतीशब्दे पुंवद्भावस्य महच्छब्दे च आकारस्य प्रसङ्गात्। उत्तरपदे तयोः विधानात् समासान्तिमपदस्य चोत्तरपदत्वात्। एवम् एकत्र द्वयमिति रीत्या गवि चित्रजरत्योरभेदानुभवस्य च सम्पादयितुमशक्यत्वेन तदर्थमेव त्रिपदादिबहुव्रीहेरावश्यकत्वाच्च।

लघुमञ्जूषानुसारेण बहुव्रीहिनिरूपणम्[५८]

चित्रगुः — चित्रा गावो यस्येति विग्रहः। चित्रगोसम्बन्धीति समासार्थः। यत्सम्बन्धिन्यश्चित्रा गाव इति विग्रहे बोधः। वृत्तौ विशेषणविशेष्यभावव्यत्यासः।

नव्यनैयायिकमतम् यत्तु — बहुव्रीहावन्यपदार्थे गोस्वामिनि उत्तरपदस्य लक्षणा। न च गोपदेनैव गोस्वामिलक्षणायां तत्र चित्रपदार्थस्यानन्वयः, गोः पदार्थैकदेशत्वात्, पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन इति व्युत्पत्तिविरोधादिति वाच्यम्। चित्रपदस्य तात्पर्यग्राहकतया गोपदेनैव चित्रगोस्वामिलक्षणान्न दोषः।

एवं प्राप्तोदको ग्राम इत्यादौ उदककर्मकप्राप्तिकर्मीभूतो लक्ष्यते। प्राप्तपदं तात्पर्यग्राहकम्।

प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं स्वकर्तृकप्राप्तिकर्मत्वसम्बन्धेन तत्सम्बन्धिग्रामे लक्षणेति तु न युक्तम्। उदककर्तृकप्राप्तिकर्म ग्राम इति विवक्षितार्थानिर्वाहात्। एवं प्राप्तेति क्तस्य कर्त्रर्थकस्य कर्मणि लक्षणा। प्राप्तौ च उदकस्य कर्तृतासम्बन्धेनान्वयः इत्यपि न युक्तम्। उदकरूपकर्तुरनुक्तत्वेन ततस्तृतीयायां वैयधिकरण्येन बहुव्रीह्यनुपपत्तेः।

एवं उदककर्तृकप्राप्तिरिति बोधोत्तरं तत्कर्म ग्रामो लक्ष्यते इत्यपि न युक्तम्। प्रत्ययार्थप्राधान्यस्य नाम्नः सत्त्वप्राधान्यस्य च भङ्गापत्तेः। विशेषणे कर्तरि एकदेशे उदकान्वयासम्भवाच्चेति **नव्यन्यायविदः**।

---

[५८] पृ. १४४९ -

तन्न। उत्तरपदे एव लक्षणायां विनिगमकाभावात्। न च प्रत्ययानां सन्निहितपूर्वपदार्थगतस्वार्थबोधकत्वमिति व्युत्पत्तिः तत्र विनिगमिकेति वाच्यम्। अकच्प्रत्ययघटिते सर्वक इत्यादौ व्यभिचारात्। अत्र पूर्वस्यासुबन्तत्वेनापदत्वात्। शक्तत्वरूपपदत्वमपि अकारान्ते न तु हलन्त इति।

किं च दधीयद्ददातीत्यादौ दध्नि वत्वर्थान्वयापत्तेश्च। एतदुक्तं भवति इयत् दधि ददातीत्यन्वयः। इदं परिमाणमस्येति विग्रहे "किमिदंभ्यां वो घः"[५९] इति सूत्रेण इदंशब्दात् वतुप्प्रत्यये वस्य घादेशे घकारस्य "आयनेयीनीयीयियः फढखछघां प्रत्ययादीनाम्"[६०] इति सूत्रेण इयादेशे इदम् इयत् इति स्थिते इदं किमोरीश् की[६१] इति सूत्रेण इदंशब्दस्य ईकारादेशे ईकारस्य "यस्येति च"[६२] इति लोपे इयत् इति प्रत्ययमात्रमवशिष्यते। तत्र वतुप्प्रत्ययार्थस्य परिमाणस्य दध्नि अन्वयापत्तिः। दध्नः प्रत्ययसन्निहितपूर्वपदार्थत्वात् तद्गतपरिमाणबोधकत्वस्य प्रत्यये सम्भवादिति। एवं दधि बहुपटुर्ददातीत्यत्र बहुच्प्रत्ययार्थस्य दध्नि अन्वयापत्तिः। तथा हि — ईषद्नः पटुरित्यर्थे "विभाषा सुपो बहुच् पुरस्तात्तु"[६३] इति सूत्रेण पटुशब्दात् पूर्वं बहुच्प्रत्यये बहुपटुरिति रूपं भवति। दधि बहुपटुर्ददाति इत्यत्र बहुच्प्रत्ययार्थः ईषदूनत्वं पटुशब्दार्थेऽन्वेतीति स्थितिः। प्रत्ययानां सन्निहितपूर्वपदार्थगतस्वार्थबोधकत्व-व्युत्पत्तिस्वीकारे बहुच्-प्रत्ययसन्निहितपूर्वपदं दधिपदमिति तदर्थदधिगतेषदूनार्थ-बोधकत्वं स्यात्। पटुपदस्य बहुच्प्रत्ययोत्तरवर्तितया तत्पूर्वपदत्वं नास्तीति पटुपदार्थगतेषदूनार्थबोधकत्वं च न स्यात्। अतस्तादृशव्युत्पत्तिर्न नियतेति।

किं च समस्यमानानामनेकपदानामनेकपदयोर्वा अन्यपदार्थे वृत्तावेव "अनेकमन्यपदार्थे[६४] इति सूत्रेण बहुव्रीहिर्विहितः। चित्रगुरित्यत्र गोपदस्य चित्र-गोस्वामिति लक्षणाङ्गीकारे गोपदस्यैवान्यपदार्थे वर्तमानतया चित्रपदस्य तत्र वृत्त्यभावात् बहुव्रीह्यनापत्तिश्च।

किं च घटादिपदेष्वपि चरमवर्णस्याच्प्रत्ययरूपस्य घटादौ लक्षणयैवोपपत्तौ विशिष्टशक्ति (समुदायशक्ति) कथाया उच्छेदापत्तिः। नच घटादिशब्देषु अवयव-तल्लक्षणाज्ञानविरहिणामपि बोधोत्पत्त्या तत्र समुदाये शक्तिरङ्गीक्रियत इति वाच्यम्। तर्हि चित्रगुः इत्यादावपि अवयवतल्लक्षणाज्ञानविरहिणामपि बोधोत्पत्त्या समुदायशक्ति-

---

[५९] पा.सू. ५.२.४०
[६०] पा.सू. ७.१.२
[६१] पा.सू. ६.३.९०
[६२] पा.सू. ६.४.१४८
[६३] पा.सू. ५.३.६८
[६४] पा.सू. २.२.२४

रङ्गीक्रियताम्। कस्यचित् चित्रगुरित्यादौ अवयवतल्लक्षणयोर्ज्ञानात् विशिष्टार्थबोधेऽपि न तत्तच्छब्दसाधुत्वम्। सूत्रविरोधात्। सूत्रे लाक्षणिकान्वाख्यानस्यादृष्टत्वात्। व्याकरणस्य शक्तिग्राहकत्वभङ्गापत्तेश्च।

किं चैवं प्रातिपदिकात् कर्मत्वाद्यर्थे स्वादय इति शास्त्रात् प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वमिति व्युत्पत्तिर्लभ्यते। तथा च परस्परं प्रकृत्यर्थप्रत्ययार्थयोरन्वये एव प्रकृतिप्रत्ययोः साधुत्वं लभ्यते। यदि बहुव्रीहावुत्तरपदमात्रे लक्षणा स्वीक्रियते, तदा तथा साधुत्वस्य भङ्गः स्यात्। उत्तरपदमात्रस्य समासोत्तरविहितसुप्प्रकृतित्वाभावात्। प्रकृतित्वं च प्रत्ययविधानावधित्वम्। प्रकृतिजन्यज्ञानविशेष्यत्वं प्रकृत्यर्थत्वम्।

एतेन प्राप्तोदक इत्यादौ यदुक्तं तदप्यपास्तम्। किं च चित्रगुरित्यादौ स्ववाच्यार्थ-घटितलक्षणायां चित्रपदस्य तात्पर्यग्राहकत्वं क्लृप्तम्। तस्य प्राप्तोदक इत्यादौ भङ्गप्रसङ्गः। लक्ष्यार्थस्य उदककर्तृकप्राप्तिकर्मणः उत्तपदवाच्यार्थघटितत्वेऽपि पूर्वपदार्थघटितत्वाभावात्। तदर्थं तत्र व्युत्पत्त्यन्तरस्वीकारे गौरवात् विशिष्ट-शक्तिरेवोचिता। विशिष्टशक्तिवादिनां तु न कश्चित् व्युत्पत्तिविरोधः। सर्वासामपि व्युत्पत्तीनां भिन्नोपस्थितिजनकशब्दविषयकत्वात्। तत्र विशेष्यविशेषणभाववैप-रीत्यान्तर्भावेणैव संसर्गे अन्यपदार्थे च शक्तिकल्पना। चित्रगुः इत्यादौ स्वस्वामि-भावादिसम्बन्धेन चित्रगोविशिष्टः समासार्थः, तत्राश्रयः स्वस्वामिभावादिः सम्बन्ध-श्चेत्युभयं समासार्थः।

यद्वा संसर्गरूपो विभक्त्यर्थ एव बहुव्रीहिशक्यः। न च विभक्त्यर्थस्य असत्वरूपतया (अद्रव्यरूपतया) तत्र लिङ्गसंख्यादिरूपकार्यानुपपत्तिरिति वाच्यम्। गुणवाचकशब्दवत् यद्द्रव्याश्रितोऽसौ सम्बन्धः तद्गतलिङ्गसंख्याभ्यां तस्य योगाङ्गी-कारात्। एवं च समासेनाभिधीयमानः सम्बन्धः सम्बन्धितादात्म्येनैवाभिधीयते। तत्र सम्बन्धस्य द्विनिष्ठत्वेऽपि सम्बन्धस्य सम्बध्यन्तरविशेषणतया शब्देनैवोपात्तत्वात् प्राधान्याच्च स्वामिन एवाश्रयत्वं व्यवस्थाप्यत इति तद्गतलिङ्गसंख्ये भवतः। सम्बन्धसम्बन्धिनोः स्वरूपातिरिक्तसम्बन्धाभावेन सम्बन्धितादात्म्ये एव पर्यवसानम्। शब्दशक्तिस्वभावाच्च पटस्य शुक्ल इत्यत्रेव न भेदेनात्र विवक्षा। वाक्ये तु षष्ठीविभक्त्यनुसारेण भेदेनैव विवक्षा। पक्षद्वयमपीदं भाष्ये स्पष्टमिति बहवः।

मतान्तरम् — परे तु एवं सति प्राप्तोदक इत्यादौ प्राप्तादिपदेऽपि विशेषणविशेष्य-भावव्यत्यासकल्पने गौरवम्। बहुव्रीह्युपजीव्यस्य एकधर्मिबोधकत्वरूपसामानाधि-करण्यस्य भङ्गश्च। प्राप्तभार्य इत्यादौ पूर्वोत्तरपदयोः एकविशेष्यकप्रतीतिजनकत्व-सामानाधिकरण्याभावात् पुंवद्भावानुपपत्तिश्च।

किं च अलौकिकविग्रहे एकार्थीभावरूपसामर्थ्यकल्पनया तत्र तन्मूलके विशेषणत्वव्यत्यासे पदयोः एकार्थबोधकत्वरूपसामानाधिकरण्याभावेन समास-शास्त्राप्राप्तिः। चित्रग्वादौ क्लृप्तस्य स्वशक्यार्थघटितैकार्थीभावस्य भङ्गश्च।

तस्मात् प्राप्तिकर्त्रुदककर्मेत्यादिप्रकारेण बोधः। उदके कर्मत्वनिरूपकत्वबाधेन तु विशेषणभूतप्राप्तौ कर्मत्वनिरूपकत्वपर्यवसानम्। स्वर्गी ध्वस्त इतिवत्। विभक्त्यर्थस्य प्राधान्येऽपि धर्मिबोधकत्वमुक्तरीत्यैव।

मीमांसकमतखण्डनम्

यत्तु मीमांसकाः — बहुव्रीहौ चित्राणां गवामयमिति विग्रह उचितः, न तु चित्रा गावोऽस्येति। वृत्तिविग्रहयोः भिन्नार्थत्वस्यानुचितत्वात्। प्राप्तोदक इत्यादेरपि प्राप्तस्योदकस्यायमिति विग्रहः। प्राप्तोदकसम्बन्धीति बोधः। सम्बन्धश्च स्वकर्तृकप्राप्ति-कर्मत्वादिरित्याहुः।

तन्न। एवंविधविग्रहस्य "मत्वर्थे बहुव्रीहिः" "कर्तृकर्मवचनेनाप्रथमायाः"[६५] "अप्रथमाविभक्त्यर्थे बहुव्रीहिः" "शेषो बहुव्रीहिः"[६६] "त्रिकतः शेषः"[६७] इत्यादिमुनित्रयवचनविरुद्धत्वात्।

न चालौकिकविग्रहवाक्ये प्रथमान्तानामेव प्रवेशेन न तद्विरोध इति वाच्यम्। अलौकिके प्रविष्टानामेव पक्षान्तरे समासाभावे परिनिष्ठितानां तदर्थबोधनाय प्रयोगसम्भवे उपस्थितपरित्यागेन अनुपस्थितपदघटितलौकिकविग्रहवाक्यकल्पनाया अनुचितत्वात्।

किं च न केवलमर्थबोधनायैव लौकिकविग्रहवाक्यप्रयोगः; किं तु समासा-देर्वैकल्पिकत्वप्रदर्शनायापि तत्प्रयोगः। तत्प्रदर्शकं चोक्तरीत्या चित्रा गावो यस्येत्याद्येव, न त्वदीयं वाक्यम्। अत एव अविग्रहो नित्यसमास इति वृद्धाः। अन्यथा कुम्भकार इत्येतत्समानार्थकस्य कुम्भस्य कर्तेत्यस्य सम्भवेन तस्य नित्यसमासत्वं भज्येत। कर्तृपदस्य न समासघटकतेति चेत् चित्राणामित्यादेरपि तदघटकत्वं तुल्यम्।

न च चित्रा गावो यस्येत्यपि विग्रहोऽस्तु बहुव्रीहिवैकल्पिकत्वबोधकः ; अर्थ-निर्णयार्थं तु मदुक्तोऽपि चित्राणां गवामयमिति विग्रहोऽस्तु। समासघटकपदघटितं

---

[६५] वा. १३६५
[६६] पा.सू. २.२.२३
[६७] म.भा. Vol. II, पृ. ४४३

वाक्यं यत्र न सम्भवति तत्रैव नित्यसमासत्वमिति न बहुव्रीहेस्तत्त्वमिति वाच्यम्। समासार्थबोधनार्थं तद्वैकल्पिकत्वबोधनार्थं चेति फलद्वयार्थं युगपद्वाक्यद्वयप्रयोगापत्तेः।

सिद्धान्तः

वृत्त्यर्थप्रदर्शनार्थं कल्पिते चित्रा गावो यस्येत्यादावपि विशेष्यविशेषणभाव-व्यत्यासात् चित्रगोसम्बन्धीत्येव बोधः। व्यत्यासबोधनायैव चित्रा गावो यस्य स चित्रगुरिति प्रदर्श्यते वृद्धैः। सर्वनामसंज्ञासूत्रभाष्येऽपि सर्व आदिर्येषां तानीति विग्रहो दर्शितः। सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वात् स चित्रगुरित्यनेन स्वामिप्राधान्यं प्रदर्श्यत इति कैयटः।

अत एव मासजात इत्यादेः मासो जातस्य यस्य सः इति विग्रहं प्रदर्शयन्ति। चित्रा गावो यस्य स चित्रगुरिति वाक्ये चित्रगुपदं तत्पदबोध्यपरम्। चित्रगोसम्बन्धी यो भवति स चित्रगुपदबोध्य इति बोधः। पचतीति पाचक इत्यादेः पाचकपदं पचतीत्येतत्समानार्थकमिति बोधः। पचति पाकं करोतीत्यतोऽपि पचतिपदम् एककर्तृकपाकक्रियाबोधकमिति बोधः। एवं च वृत्तिविग्रहयोः समानार्थकता स्पष्टैव। विग्रहश्च — वृत्त्यर्थः वृत्तिवैकल्पिकत्वं वृत्तिघटकपदस्वरूपं चेत्येतत्त्रितयोद्देशेन प्रवृत्तं वाक्यम्। तेन लोके स्वातन्त्र्येण अर्थबोधनार्थं प्रयुक्ते यथास्थित एव विशेष्यविशेषणभावः। तदुक्तं हरिणा — क्वचित् गुणप्रधानत्वमर्थानामविवक्षितम् इत्युपक्रम्य,

आख्यातं तद्धितार्थस्य यत् किंचिदुपदर्शकम्।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः।। इति।

दीव्यतीत्याद्यर्थविहिततद्धितानां साधनप्रधानत्वेन सूत्रस्थे दीव्यतीत्यादौ विग्रह-वाक्यस्थे च गुणप्रधानभावो विपरीतो दृष्टः, अन्यथा वृत्तिविग्रहयोः समानार्थत्वं भज्येतेति तदर्थः।

अनेन तुल्यन्यायात् सर्वत्र वृत्त्यर्थप्रदर्शनाय प्रवृत्ते वाक्ये वृत्तिवाक्ययोः समानार्थत्वाय विशेष्यविशेषणभावव्यत्यास इति सूचितम्।

तथा च "तद्वहति"[६८] इति सूत्रे भाष्यम् — "वहत्यर्थे रथादिभ्यः प्रत्यय-विधिरनर्थकः। "तस्येदम्[६९] इति विहितत्वात्" इत्युक्त्वा वहतीत्यस्य क्रिया-प्रधानत्वात् वोढेत्यस्य सत्वप्रधानत्वात् "शब्दभेदान्न प्राप्नोति, अन्यः शब्दो रथं वहति, अन्यो रथस्य वोढा" इत्याशङ्क्य, "अर्थसामान्यात् सिद्धं य एवार्थो रथं वहति स

---

[६८] पा.सू. ४.४.७६
[६९] पा.सू. ४.३.१२०

एवार्थो रथस्य वोढेति'' इति तद्वैयर्थ्यं दृढं कृत्वा द्विरथ्य इत्यादौ लुगभावार्थं तत्'' इति सिद्धान्तितम्।

य एवार्थ इत्यादेः, रथ्य इत्यस्य विग्रहभूते रथं वहतीत्यत्र योऽर्थ स एव तद्विग्रहभूते रथस्य वोढेत्यत्रेत्यर्थः। एवं च विशेष्यविशेषणव्यत्यासस्तत्रैव स्पष्टमुक्तः। एवं च वृत्तिविग्रहयोः विषयोऽपि समानः।

अत एव समर्थसूत्रे भाष्ये ''महत् कष्टं श्रित इति विग्रहे कष्टश्रितयोः समासः कुतो न'' इत्याशङ्क्य ''इह समानार्थेन वाक्येन भवितव्यम्। यश्चेहार्थो वाक्येन गम्यते महत् कष्टं श्रित इति न जातुचित् समासेनासौ गम्यत'' इत्युक्तम्।

तत्र पदार्थानां वाक्ये समासे च प्रतीतिस्तुल्यैव। तथापि महत् कष्टं श्रित इति वाक्ये कष्टपदार्थो विशेषणत्वानाक्रान्तस्वनिष्ठविशेष्यतया बुध्यते। समासे तु श्रितनिरूपित-विशेषणत्वाक्रान्ततयैवेति न महत्पदार्थस्य तत्र विशेषणत्वम्। एवं च विषयता-विशेषस्य वाक्ये भासमानस्य समासे न कथमपि भानमिति तदर्थः। एतदेवाभिप्रेत्य कैयटः — ''यः कष्टं श्रितः स महत् कर्म करोतीत्यादि प्रतीयते न तु महतः कष्टविशेषणत्वम्'' इति इत्याहुः।

बहुव्रीहिविभागः

बहुव्रीहिर्द्विविधः तद्गुणसंविज्ञानः अतद्गुणसंविज्ञानश्चेति। लम्बकर्णमान-येत्यादावाद्यः। तस्य अन्यपदार्थस्य गुणानां विशेषणानां कार्यान्वयितया संविज्ञानं यत्रेत्यर्थात्। विधेयान्वयिस्वघटकावयवार्थकत्वं तद्गुणसंविज्ञानत्वम्। आनयनरूप-विधेये अवयवार्थकर्णयोरप्यन्वयात्। चित्रगुमानयेत्यादावन्त्यः। विधेयानन्वयिस्व-घटकावयवार्थकत्वमतद्गुणसंविज्ञानत्वम्। लम्बकर्णं भोजयेत्यत्रापि अतद्गुण-संविज्ञानबहुव्रीहिः। भोजने कर्मतया कर्णानन्वयात्।

यदि विधेयान्वयित्वमिव विधेयकाले सन्निहितत्वमपि तद्गुणसंविज्ञानत्व-मित्युच्यते तदा लम्बकर्णं भोजयेत्यत्रापि तद्गुणसंविज्ञान एव बहुव्रीहिः।

संयोगसमवायान्यतरसम्बन्धेन सम्बन्धे यत्रान्यपदार्थः तत्र प्रायः तद्गुणसंविज्ञानः, अन्यत्रातद्गुणसंविज्ञानः इत्यप्याहुः। यथा दण्डी विषाणी चानीयताम् इति। दण्डी विषाणी च भोज्यतामित्यत्र व्यभिचारात् प्राय इत्युक्तम्।

बहुव्रीहौ विशिष्टशक्तिस्वीकारे अरुणाधिकरणन्यायानुकूल्यम्

बहुव्रीहौ विशिष्टशक्तिस्वीकारादेव अरुणाधिकरणमुपपद्यते। तत्र हि ''अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति'' इति ज्योतिष्टोमप्रकरणपठिते वाक्ये किम्

अरुणिमा वाक्यात् भित्त्वा प्राकरणिकेषु सर्वद्रव्येषु निविशते उत क्रीणातिना सम्बध्य तदङ्ग एकहायन्यां निविशते इति संशयः।

तत्र आरुण्यगुणस्य अमूर्तत्वात् क्रयरूपक्रियासाधनत्वासम्भवात् पृथग्भूतः अविशेषात् प्राकरणिकेषु सर्वेषु द्रव्येषु निविशते। अरुणादिशब्दाश्च गुणवचना एव।

ननु तदाक्षिप्तद्रव्यस्य क्रयसाधनत्वं सम्भवति। अन्यथा प्रकरणेऽपि विनिवेशो न स्यात्। अमूर्तत्वात् क्रियाभिः, कारकत्वाच्च द्रव्यैः सम्बन्धासम्भवादिति चेत् — न। श्रौतैकहायनीद्रव्येण करणाकाङ्क्षायाः शान्तत्वात् आक्षिप्तद्रव्यस्य क्रये करणतया अन्वयासम्भवात्। एवं चाविशेषात् अरुणापदलक्षितं तदर्थाक्षिप्तं वा द्रव्यं प्राकरणिकं सर्वमेवेति पूर्वपक्षः।

स चायुक्तः स्यात्। भवन्मते एकहायनीति समासस्यापि लाक्षणिकत्वेन श्रौतत्वाभावात्। निरपेक्षो हि रवः श्रुतिः। इतरपदार्थान्वयानुपपत्तिज्ञानसापेक्षप्रतीतिकं हि लाक्षणिकम्। अन्यथा अरुणापदलक्षितमपि द्रव्यं श्रौतमेव स्यात्।

सिद्धान्तस्तु अरुणापदस्य गुणितादात्म्येन गुणबोधकत्वम्। गुणिद्रव्यं च वाक्ये श्रुतत्वेन सन्निहितत्वात् एकहायन्येवेति विशिष्टविधिरयम्। एतदभिप्रायेणैव वार्तिके उक्तम् गुणस्यैवास्य द्रव्यपरिच्छेदद्वारा क्रयसाधनत्वमित्यरुणादीनां योग्यत्वात् द्रव्यपरिच्छेद एव व्यापारः। तत्रैषां कर्तृत्वात् इतरत्र करणत्वं भविष्यति। तत्र अरुणापदात् एतदवगतम्, किञ्चित् द्रव्यं परिच्छिन्दता अरुणगुणेन क्रयः साधयितव्य इति। एकहायन्यपि केनचित् गुणेन मे परिच्छेदः कार्य इत्येतावदपेक्षते। उभयापेक्षालक्षणश्च सम्बन्धः शीघ्रतरं निर्वर्तते। तेन नष्टाश्वदग्धरथवत् तयोरेव विनापि षष्ठीं सम्बन्धः इति सन्निहतातिक्रमे कारणाभावाच्च एवमेव ज्ञायत इति। परिच्छेदश्च स्वतादात्म्येन ग्रहणं स्वाश्रयत्वेन ग्रहणं वेति।

उपदशाः — दशानां समीपे ये सन्तीति विग्रहः। अत्रायं समीपसंख्यावत्परः। दशपदार्थस्य स्ववृत्तिदशत्वसमीपसंख्यासम्बन्धेनान्वयः। दशसमीपसंख्यावन्त इति बोधः। ईदृशसम्बन्ध एवास्य साधुत्वं, शब्दशक्तिस्वभावात्। "संख्ययाव्यय"[७०] इत्यादिसूत्रबलाच्च। अत एव नव एकादश वा अनेन प्रत्याय्यन्ते। न तु दशानां वृक्षादीनां समीपे ये गवादयस्ते प्रत्याय्यन्ते। एतेन आसन्नविंशाः अदूरत्रिंशाः इति व्याख्यातम्।

द्वित्राः — द्वौ वा त्रयो वा द्वित्राः। अत्र वाशब्दो विकल्पार्थकः। अत्र कार्ये विकल्पः न तु शाब्दबोधे। अतः शब्दान्नियमेन बहूनामुपस्थितेः नित्यबहुवचनान्तता। अत्रापि

---

[७०] पा.सू. २.२.२५

एककालं समभिव्याहृतान्वयिपदार्थासम्बन्धत्वरूपो विरोधो भासते। प्रायोऽ- यमेव सर्वत्र विरोधो वाशब्दार्थः। क्वचित् एकाधिकरणावृत्तित्वरूपः यथा शब्दो नित्यः न वेति विप्रतिपत्तिवाक्ये। तस्य शब्दो नित्यत्वविरुद्धानित्यत्ववान् इत्यर्थः।

क्वचित् एककालावृत्तित्वरूपो विरोधः, यथा व्राहिभिर्यजेत, यवैर्यजेत इत्यादौ। वाशब्दं विनापि तात्पर्यवशात् देवदत्तो वामेनाक्ष्णा पश्यतीतिवत् एकविशेषविधेः दक्षिणेनाक्ष्णा न पश्यतीति विशेषान्तरनिषेधफलकत्वात् परस्परनिरपेक्षत्वलाभात् समुच्चयासंभवेन विकल्पो युज्यते। स च विरोधः समभिव्याहृतकारकविशिष्टक्रियायां भिन्नकालिकत्वरूपः।

अत्र व्रीहिभिर्यवैर्वा यष्टव्यमिति प्रश्नवाक्यं यागत्वावच्छेदेन यवनिरपेक्ष-व्रीहिकरणकत्वव्रीहिनिरपेक्षयवकरणकत्वसंशयपरम्। उत्तरमपि तथैव = संशय-परमेव। परं तु तत् वाक्यं यागत्वसामानाधिकरण्येन यवनिरपेक्षव्रीहिसाधन-कत्वव्रीहिनिरपेक्षयवसाधनकत्वसंशयपरमित्याहुः।

अन्ये तु उत्तरे वाशब्दः अन्यतरार्थकः। एवं च द्वयोरपि यागसाधनत्वात् इच्छया एकतरग्रहणात् ऐच्छिको विकल्पः। इदमेवाभिप्रेत्य, "प्रश्ने वाशब्दः सर्वात्मना पक्षान्तरप्रतिक्षेपार्थः। उत्तरे तु स्वप्राप्तिपक्षे तत्प्रतिक्षेपार्थः" इति प्रवादः। द्वित्रा इत्यत्रापि द्वित्र्यन्यतर इत्यर्थः। अन्यतरत्वमुपात्तेतरव्यावृत्तैकत्वरूपम्। तच्च क्वचित् व्यक्तिगतं क्वचित् धर्मगतम्, तात्पर्यवशात्।

यत्तु स्वभिन्नभेद एवान्यतरत्वमिति। तन्न घटपटान्यतरमानयेत्यतः कदाचित् उभयस्याप्यानयनापत्तेः। तद्भिन्नभेदस्य प्रत्येकं घटपटयोरिव समुदितयोरपि सत्त्वात् इत्याहुः।

तत्र धर्मगतमेकत्वमिति पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति न्यायविरुद्धमिति द्वित्र्यन्यतरगतेत्यर्थकथनमसंगतम्। किं च द्वित्रा इत्यादौ नित्यबहुवचनान्ततानापत्तिः। अन्यतरत्वेनानेकबोधे तु घटपटान्यतरमानयेत्यादौ द्विवचनाद्यापत्तिरित्यन्ये।

क्वचित्तु उद्देश्यतावच्छेदकावच्छेदेन पाक्षिकः समभिव्याहृतार्थप्रतियोगिका-भावोऽपि वाशब्दार्थः। यथा दीर्घात् पदान्ताद्वा इत्यादौ। शास्त्रीयव्यवस्थितविकल्पे तु उद्देश्यतावच्छेदकसामानाधिकरण्येन भावाभावबोधः। लक्ष्यानुसाराच्च व्यवस्था।

स्थाणुर्न वेत्यादौ संशयात्मकज्ञानजनके एकाधिकरणावृत्तित्वरूपो विरोधो वाशब्दार्थः। अन्यतरकोटेः सर्वथा बाध्यत्वात्। अनेककोट्युपस्थितिरपि वाशब्द-समभिव्याहारादेव। स्थाणुर्नेत्युक्ते स्थाणुभिन्न इत्येव प्रतीतेः।

क्वचित्तु एकाधेयानधिकरणत्वरूपो विरोधो वाशब्दार्थः। यथा घटे पटे वा सौन्दर्यमित्यत्र।

मतान्तरम् — केचित्तु द्वित्रा इत्यादौ संशयविषयत्वं वाशब्दार्थः। संशयविषयद्वित्वत्रित्ववन्त इति बोधः। त्रित्वेनापि संदेहविषयत्वात् बहुवचनम्। शब्दो नित्यो न वेत्यस्यापि नित्यत्वानित्यत्वसंदेहविषय इत्यर्थः। स्वसंशयज्ञापनाय च तथोक्तिरित्याहुः। अत्रारुचिबीजं तु प्रश्नवाक्ये एवं सुवचत्वेऽपि नोत्तरवाक्ये प्रोक्तरीत्या वक्तुं शक्यमिति।

मतान्तरम् (नागेशमतम्)

परे तु वाशब्दसमभिव्याहारे परस्परविरुद्धानेकधर्मवत्त्वं धर्मिणि गृह्यते। तदेव विषयनिष्ठं संशयत्वम्। तदेव वाशब्दवाच्यम्। इदमेव विकल्पितरूपम्। तद्विषयकत्वाच्च ज्ञानं संशयः। एवं च स्थाणुर्न वेत्यादौ स्थाणुत्वतदभावरूपः संशयः।

द्वित्रा इत्यादौ द्वित्रिरूपसंशयसाधनिका क्रियेत्यादिरीत्या बोधः। अत एव —

"भवेद्यदा बहूनामानयनं तदा बहुवचनमुपपन्नम्। यदा द्वावानीयेते तदा न सिध्यति" इत्याशङ्क्य, द्वौ वेत्युक्ते त्रयो वेति गम्यते। त्रयो वेत्युक्ते द्वौ वेति गम्यते। सैषा पञ्चाधिष्ठाना वाक्" इति भाष्ये उक्तम्। अन्यतरार्थो वाशब्द इत्याशङ्काशयः।

तत्र कैयटसंवादः

"विकल्पो वार्थ इति। द्वित्रशब्दः कदाचित् द्वयोर्वाचकः।" इति शङ्काशयमुक्त्वा, "संशयोऽत्र वार्थः, न तु विकल्पः, विरुद्धानेकविषयत्वाद्विमर्शस्य पर्यायस्थितद्वित्व-त्रित्वाधारवस्तुसंकलनया पञ्चाधिष्ठानत्वमुच्यते।" इत्याह।

अनेकविषयत्वात् अनेकविषयरूपत्वात् विमर्शस्य संशयस्येत्यर्थः। तत्र क्वचित् बलवता प्रमाणेन एका कोटिः बाध्यैव। यत्र तु न तथा बाधकं तत्र ऐच्छिकं पाक्षिकानुष्ठानं क्वचित्। यथा व्रीहियववविषये। क्वचित् व्यवस्थया।

संशयत्वस्य विषयनिष्ठत्वादेव संशयलक्षणपरे न्यायसूत्रे तद्वार्तिककृता संशयपदे विरुद्धत्वात् (संशयत्वस्य विषयनिष्ठत्वात्) संशय्यते विषयोऽनेनेति करण-व्युत्पत्तिर्दर्शिता। अत एव प्रमाणप्रमेयेति सूत्रे[७१] विषयभूतपदार्थेषु संशयस्य पाठः। अत एव इदं तु चिन्त्यम् — निर्णयस्य तर्कस्य च ज्ञानभेदस्य तत्रोक्तत्वात्। प्रमादयो ज्ञानभेदाः तत्र नोक्ताः।

---

[७१] न्या.सू. १.१.१

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु।
सेव्या नितम्बाः किमु भूधराणां किं वा स्मरस्मेरविलासिनीनाम्।।

इति पद्ये संशयो वाच्यः निश्चयो व्यङ्ग्य इति काव्यप्रकाशे उक्तम्। संदेहालंकारात् विकल्पालंकारश्च न तेन पृथगुक्तः। निश्चयान्तससंदेहालंकारेण गतार्थत्वात् — इत्याहुः।

द्विदशाः — द्विरावृत्ताः दश द्विदशाः। अत्र सुजर्थान्तर्भावेण आवृत्तिक्रियान्तर्भावेण च द्विशब्दस्य आवृत्तिविषये वृत्तिः। आवृत्तिजन्मगणने च द्विशब्दः। द्वित्वसंख्या-विशिष्टोत्पत्तिकावृत्तिविषया दशेति बोधः। अन्यथा द्वित्वान्वयो न स्यात्। दशत्वसंख्यायाः संख्येयं प्रति उपसर्जनत्वात् एकत्वाच्च न तत्र अन्वयः। संख्येयेष्वपि नान्वयः, विरोधात्। न हि दश द्वौ भवन्ति। तदुक्तं हरिणा —

न संख्यायां न संख्येये द्वौ दशेत्यस्ति सम्भवः।
भेदाभावान्न संख्यायां न विरोधात्तदाश्रये।। इति।।

केशाकेशि — केशेषु केशेषु गृहीत्वेदं युद्धं केशाकेशि। अत्र क्त्वाप्रत्ययो-ऽध्याहृतस्थित्यादिक्रियामादाय बोध्यः। ग्रहणकर्मत्वं च प्रत्यासत्त्या केशादि-विशिष्टपुरुषयोरेव परस्परग्रहणादिरूपः कर्मव्यतिहारः समुदायशक्यः युद्धादिक्रिया च। एवं च परस्परकेशाधिकरणकतद्वत्पुरुषकर्मकग्रहणोत्तरकालिकस्थितिकर्तृ-पुरुषकर्तृका क्रियेति बोधः। क्रिया युद्धादिरूपेति क्वचित् प्रकरणात् क्वचित् युद्धादिवाचकपदसमभिव्याहारान्निर्णेयम्। यथा —

"मृधं कियच्छत्रकदण्डताण्डवं भुजाभुजि क्षोणिभृतां दिदृक्षवः।" इत्यादौ। एतेन "कर्णाकर्णि प्रथितमयशः" इति व्याख्यातम्। कर्णाभ्यां कर्णाभ्यामाकर्ण्येदं प्रथितम् इत्यर्थः। एतेनायं समासः युद्धादिक्रियायामेवेत्यपास्तम्।

एवं —"हस्ताहस्ति मिषात् स्पृशन् कुचतटीम्" इत्यत्रापि बोध्यम्।

मणिग्रन्थानुसारेण द्वन्द्वसमासविचारः[७२]

इतरेतरद्वन्द्वः — इतरेतरद्वन्द्वे धवखदिरौ छिन्धि इत्यादौ विभक्त्यर्थस्य द्वित्वस्य धवखदिरयोः प्रत्येकं नान्वययोग्यता। तथा धवखदिरयोः न द्वित्वेऽन्वययोग्यता। प्रत्येकं द्वित्वाभावात्। न च द्वित्वस्य व्यासज्यवृत्तित्वेन उभयस्य प्रत्येकानतिरिक्ततया प्रत्येकानाश्रितस्य नोभयाश्रितत्वमिति द्वित्वमेकाश्रितमपीति वाच्यम्। स हि द्वित्वमाकाङ्क्षति, द्वित्वं च तमाकाङ्क्षति यत्र द्वित्वं परिसमाप्यते एकस्य

---

[७२] त.चि.श.ख. पृ. ७९१-८१८

द्वित्वपरिसमाप्त्याश्रयत्वे एकत्रापि द्वौ बहव इति प्रतीतिः स्यात्। अतो द्वन्द्वे पदशक्यस्य नान्वयबोधः। अन्वयबोधे वा धवद्वयधीः खदिरद्वयधीश्च स्यात्। तस्मात् पदशक्ये द्वित्वान्वयानुपपत्त्या सहितावस्थमुभयं द्वित्वान्वयावगमयोग्यं तत्साकाङ्क्षं चेति खदिरसहितधवोपस्थितये धवपदे साहित्यलक्षणा।

ननु खदिरसहितधवस्यैकत्वात् खदिरसहितो धव इतिवत् द्विवचनानुपपत्तिः। धवसहितखदिरसाहित्यावस्थालक्षकत्वे च तस्या एकत्वात् एकवचनापत्तिः। अवस्थाश्रययोः साहित्यविशेषणत्वेन द्वित्वान्वयानुपपत्तिश्चेति चेत् —

अत्र कश्चित् — अवस्थायाः लक्ष्यत्वेऽपि तदाश्रयगतस्वार्थबोधकत्वमेव द्विवचनबहुवचनयोः। पदवृत्तिवैचित्र्यात्। तथैव व्युत्पत्तेः। यथा गुणवाचि नीलादिपदं क्वचित् गुणमात्रवाचकम्, यथा पटस्य शुक्ल इत्यादौ। क्वचित् गुणाश्रयद्रव्यपरं यथा नीलः पट इत्यादौ। अन्यथा नीलपटपदयोः सामानाधिकरण्यं न स्यात् एकार्थबोधकत्वाभावात् इति।

यत्तु लक्षिता साहित्यावस्था स्वाश्रयमुभयं लक्षयतीति। तन्न। लक्षितलक्षणायाः जघन्यत्वात्। वस्तुतस्तु — साहित्याश्रये लक्षणा। साहित्ये लक्षणायां तु समाहारद्वन्द्वात् इतरेतरयोगद्वन्द्वस्य वैलक्षण्यं न स्यात्। साहित्यं तु लक्ष्यतावच्छेदकम्। तेन साहित्याश्रयस्यानेकत्वात् द्विवचनबहुवचने भवतः।

अत एवेतरेतरद्वन्द्वः द्वन्द्वघटकसर्वपदार्थप्रधानः। धवश्च खदिरश्चेति विग्रहेण तथैवावगमात्। समाहारद्वन्द्वे तु साहित्यावस्था प्रधानम्, पदार्थो गुणभूतः। तेन तस्याः एकत्वात् भेरीपटहमित्यादावेकवचनम्। समाहारद्वन्द्वस्य धर्मे, इतरेतरद्वन्द्वस्य धर्मिणि तात्पर्यात् द्वन्द्वयोर्भेदः।

अत एव युगपदधिकरणवचन इतरेतरद्वन्द्व इति शाब्दिकाः। अधिक्रियत इत्यधिकरणं पदार्थः। तेषां युगपद्वचनम् एकेन एकदोपस्थापनम्। तच्च न शक्त्या। एकपदस्येतरपदार्थे शक्त्यभावात्। अन्यथा इतरपदवैयर्थ्यप्रसङ्गः। अनेकार्थत्वेऽपि एकस्यैकत्रानेकार्थपरत्वाभावात्। नापि पदद्वयं मिलितं द्वयोः उपस्थापकम्। मिलितस्य मिलिते शक्त्यभावात्। नापि द्वन्द्वे शक्तिरेव। पदलक्षणयैवानेकार्थोपस्थितिसम्भवात्।

अत एव आङ्गाश्च वाङ्गाश्च कालिङ्गाश्चेति विग्रहे आङ्गवाङ्गकालिङ्गशब्दात् द्वन्द्वे बहुष्वर्थेषु वर्तमानात् परस्य तद्राजसंज्ञकस्याञादेः "तद्राजस्य बहुषु तेनैवास्त्रियाम्"[७३] इति सूत्रेण लोपे अङ्गवङ्गकलिङ्गाः इति भवति। अन्यथा साहित्य-

---

[७३] पा.सू. २.४.६२

लक्षणायाः अभावे तेषां प्रत्येकपदस्य बहुषु वृत्त्यभावात् नञः लोपो न स्यात्। एतेन द्वन्द्वे सर्वस्मिन् पदे साहित्ये लक्षणेति सूचितम्। अन्यथा एकपदलक्षणायामपरपदस्य बहुत्वे वृत्त्यभावात् आङ्गवाङ्गकालिङ्गा इत्येव स्यात्।

घटौ घटा इत्यत्रापि घटसहितघटत्वेन द्विवचनबहुवचनान्वययोग्यतेति तदुपस्थितये घटपदस्य साहित्ये लक्षणा। तदर्थप्रदर्शनार्थं द्वन्द्वापवादकं सरूपाणामेकशेषानुशासनम् तदुक्तम् —

सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः।
क्रमेणार्थप्रतीतौ हि न स्यात् द्विवचनादिकम्।। इति।

ननु स्वरूपद्वयमेव साहित्यम्, अतिरिक्तस्याभावात्। स्वरूपयोश्च धवपदादुपस्थितौ युगपत् अर्थद्वये शक्त्यसम्भवरूपो विरोधः प्राप्नोति। न च स्वरूपद्वये अजहत्स्वार्था लक्षणा अङ्गीक्रियते। युगपत् द्वाभ्यां वृत्तिभ्यामर्थद्वयबोधन एव वृत्तिद्वयविरोधः। न तु एकया लक्षणया शक्त्या वा अर्थद्वयबोधने वृत्तिद्वयविरोध इति वाच्यम्। स्वरूप-द्वयसाधारणस्य लक्ष्यतावच्छेदकधर्मस्याभावात् लक्षणाया असम्भवात्। न च एकक्रियान्वयित्वम् एकान्वयप्रकारत्वम् अपेक्षाबुद्धिविशेषविषयत्वादिकत्वं च धवखदिरोभयसाधारणो धर्मः। एकोऽन्वयः कर्मत्वादिः तत्प्रकारत्वमेकान्वय-प्रकारत्वमिति वाच्यम्। आद्ययोर्द्वयोः द्वित्वान्वयात् पूर्वमविद्यमानत्वात् तृतीयस्य अप्रतीतत्वाच्च। धवखदिराविति हि प्रतीतिः, न तु अपेक्षाबुद्धिविशेषविषयत्वेन। अपि च न धवपदस्य खदिरे स्वार्थसम्बन्धः लक्षणाबीजमस्तीति चेत् न।

साहित्यं नाम तुल्यद्वारत्वम्। तुल्यद्वारत्वं च धातूपस्थाप्यफलानुकूलसजातीय-विजातीयव्यापारसमूहस्य एकरूपः तुल्यः सम्बन्धः। द्वन्द्वेऽन्योन्यसम्बन्धोऽप्ययमेव। धवखदिरौ छिन्धीत्यत्र छेदनानुकूलो यावान् व्यापारः स तयोः तुल्य एव भासते च। अत एव स्वर्गकामादौ पत्न्याः सहत्वेनानुप्रवेशेऽपि न द्विवचनापत्तिः, एकत्वानुप-पत्तिर्वा। अतुल्यद्वारकत्वात्। दम्पत्योः एकरूपसजातीयविजातीयव्यापारसमूह-रूपसाहित्यस्याभावात्। एवं च छेदनानुकूलतुल्यव्यापारवत्त्वात्मकसाहित्यरूपेण शक्यलक्ष्यसाधारणरूपेण अजहत्स्वार्थलक्षणया धवपदादुपस्थिते धवखदिरस्वरूपे विभक्त्यर्थस्य द्वित्वस्यान्वयः। धवपदार्थस्य खदिरेण सम्बन्धोऽपि तुल्यद्वारत्वमेव।

न चास्य लक्ष्यत्वात् न सम्बन्धरूपतेति वाच्यम्। अजहत्स्वार्थायां लक्षणायां येन रूपेण लक्ष्यता तद्रूपमेव सम्बन्धः, यथा छत्रिकाकपदयोः छत्रिघटितसमूहवर्तित्वं दध्युपघातकत्वं च लक्ष्यमेव सम्बन्धः।

न चैवं खदिरपदवैयर्थ्यम्। लक्षणायां लक्षणीयवाचकपदानुपयोगादिति वाच्यम्। खदिरपदं विना न नियता खदिरोपस्थितिरिति साहित्याश्रयद्वितीयविशेषज्ञापनाय

पदसार्थक्यम्। अन्यथा लक्षणाविरहेण धवद्वयधीप्रसङ्गात्। अत एव अग्नीषोमीये अग्नीषौमौ देवते इति द्वित्वान्वयबलात् साहित्यावस्थयोः सापेक्षयोः देवतात्वम्।

द्वन्द्वे आद्यं पदं लक्षकम्, प्राथम्यात्। द्वितीयं पदं साहित्यनिरूपकत्वेन आकाङ्क्षितस्य समर्पकं मुख्यमेव। उभयोरमुख्यार्थत्वे हेत्वभावात्।

मतान्तरम्

अन्ये तु — द्वितीयपदेऽपि लक्षणा। समभिव्याहृतविभक्त्यर्थान्वयानुरोधात्। अन्यथा समभिव्याहारभङ्गापत्तेः। समभिव्याहृतपदार्थगतस्वार्थबोधिका हि विभक्तिः। न च समासे समस्यमानपदात् अन्यत् पदमस्ति। समासे शक्त्यभावात्। तेन धवपदार्थगतं खदिरपदार्थगतं च द्वित्वं तन्त्रेण विभक्तिराह। अतो धवपदवत् खदिरपदेऽपि इतरसम्बन्धावस्थस्वार्थपरता। प्रातिपदिकार्थे इतरपदार्थान्वयस्य विभक्त्यर्थगर्भत्वात् उभयपदार्थगते एव द्वित्वकर्मत्वे विभक्तिराह।

न च द्वयोः पदयोः सहितावस्थस्वार्थपरत्वे धवद्वयं खदिरद्वयं च वाक्यार्थऽन्वायेत नत्वेको धवः खदिरश्चेति चतुष्टयबोधापत्तिरिति वाच्यम्। पदद्वयेन हि सहितयोरेकमेव साहित्यं लक्ष्यते, तच्च न चतुष्टयवृत्तिः इत्याहुः।

अत्र मतेऽस्वारस्यं तावत् — समस्यमानयावत्पदार्थगतस्वार्थबोधकत्वं विभक्तीनामिति व्युत्पत्तिरसिद्धा। किं तु समस्यमानपदार्थगतस्वार्थबोधकत्वमित्येव व्युत्पत्तिः। सा चैकपदलक्षणयैव निर्वहतीति।

मतान्तरम्

अपरे तु — प्रथमपदस्यैव साहित्याश्रये लक्षणा। द्वितीयपदं साहित्यनिरूपकतया सामान्यत उपस्थितस्य द्वितीयपदार्थस्य विशेषेणोपस्थितयेऽनुवादकम्। यथान्विताभिधानवादे इतरान्वितस्वार्थे पदस्य शक्त्युपगमात् तादृशशक्त्या उपस्थितस्येतरस्य विशेषत उपस्थित्यर्थं पदान्तरेण पुनर्वचनमनुवादः, तद्वत्। अत एव समुच्चयेऽन्वाचये च पदार्थयोः साहित्यानवगमात् न द्विवचनबहुवचने न वा द्वन्द्वः। यद्यपि "चार्थे द्वन्द्वः" इति सूत्रेण चकारार्थमात्रे द्वन्द्वानुशासनम् ; तथापि यत्र अन्योन्यसाहित्यान्वयपूर्वकम् इतरेतरपदार्थान्वयः तत्र समासः साधुः। तेनेतरेतरयोगसमाहारयोः तथा अन्वयात् समासः भवति। समुच्चये अन्वाचये च न तथा अन्वय इति न समासः। तत्रासम्बद्धयोरेव एकैकशः क्रियान्वयात्। एवं च धवं खदिरं च छिन्धि इत्यादौ समुच्चये तुल्यवत् असम्बद्धयोः क्रियान्वयधीः। पश्चात्तु तयोरेकरूपसजातीयविजातीयव्यापारप्रचययोगित्वरूपं साहित्यं चकारादवगम्यते। क्रियायाः भेदे तु अन्वाचयः। यथा इन्धनमाहर्तुं वनं व्रज शाकमप्यानेष्यसीति।

न च गौश्चाश्वश्चेति न स्यात्। क्रियायोगाभावेन समुच्चयान्वाचयत्वाभावादिति वाच्यम्। गौश्चाश्वश्चेति हि द्वन्द्वसमानार्थकं वाक्यमेव। इयांस्तु विशेषः यत् द्वन्द्वे स्वार्थ सम्बन्धेन लक्षणया साहित्योपस्थितिः। अत्र तु पश्चात् चकारेण। द्विवचन - बहुवचनयोरेव साहित्यव्यञ्जकत्वात्।

स्वमतम्

अत्रोच्यते। एकस्मृत्यारूढाभ्यां धवखदिरपदाभ्यां स्वस्वार्थयोः एकदा स्मृतिसम्भवात् अनेकार्थस्मरणार्थं साहित्ये लक्षणा नापेक्षिता। एकैकमात्र-विषयकसंस्कारद्वयात् पदयोस्तदर्थयोश्चैका स्मृतिः इत्यनुभवसिद्धम्। यथा प्रत्येक-मिन्द्रियसंयोगात् अर्थद्वयस्य समूहालम्बनं प्रत्यक्षं तद्वत्। एवं च पदद्वयादुपस्थिते धवखदिरादिस्वरूपे विभक्त्या द्वित्वान्वयो बोध्यते। यथा इन्द्रियसन्निकृष्टे ज्ञाते वा धवखदिरादिस्वरूपे प्रत्यक्षेण द्वित्वं बोध्यते। न हि तत्र तयोः स्वरूपातिरिक्तं तुल्यद्वारत्वादिरूपं साहित्यमस्ति, ज्ञायते वा। तथा विभक्त्यापि विलक्षणस्वरूपे द्वित्वं बोध्यते। उभयोः द्वित्वान्वयबोधकत्वे विशेषाभावात्।

ननु योग्यतावच्छेदकरूपेणोपस्थिते इतरपदादन्वयबोधो भवति। धवखदिरौ साहित्याश्रयत्वेन इतरपदार्थान्वययोग्याविति साहित्याश्रयत्वं योग्यतावच्छेदकम्। ततश्च लक्षणा अवश्यकीति चेत् — न। उपस्थिते योग्येऽन्वयबोधः, अधिकस्य गुरुत्वात्।

शङ्का

स्यादेतत्। पदद्वयात् स्वस्वशक्त्या एकदा स्मृतयोः अर्थयोः इतरपदार्थस्य विभक्त्यर्थस्य चान्वयबोधो न सम्भवति। इतरपदार्थे इतरपदानां स्वार्थान्वय-बोधकत्वम्, नामार्थे विभक्तीनां स्वार्थान्वयबोधकत्वम् इति च व्युत्पत्तेः, व्याप्तेश्च। अनेकं च न पदार्थः नापि नामार्थः। मिलितपदद्वये पदत्वनामत्वयोरभावात्। अतो द्वित्वान्वययोग्यस्य पदार्थत्वनामार्थत्वयोर्निर्वाहाय द्वन्द्वपदे साहित्यलक्षणा आवश्य-कीति।

समाधानम्

तन्न। पदार्थत्वं हि वृत्त्या पदोपस्थाप्यत्वं पदतात्पर्यविषयत्वं वा। अस्ति च द्वन्द्वे पदस्यानेकमुपस्थाप्यं, तत्र तात्पर्यं च। तन्निर्वाहश्च अनेकविषयकैकस्मृतिद्वारा लक्षणया पदेन वा, स्वशक्त्या पदाभ्यां वेति न कश्चित् विशेषः। एक्यदोपस्थाप्यत्वं न पदार्थत्वं गौरवात्। एवं नामार्थत्वमपि तत्तात्पर्यविषयत्वमेव।

शङ्का

ननु पदार्थतावच्छेदकावच्छिन्ने विभक्तेः स्वार्थान्वयबोधकत्वमिति व्युत्पत्तिः। मिलिते अर्थद्वये पदार्थतावच्छेदकावच्छिन्नत्वं च मिलितवृत्तिपदार्थतावच्छेदके लक्षणां विना न सम्भवतीति चेत् —

समाधानम्

मैवम्। समभिव्याहृतपदार्थे विभक्त्यर्थान्वय इत्येव व्युत्पत्तिः लाघवात्, न तु पदार्थतावच्छेदकावच्छिन्ने गौरवात्। पदार्थत्वं च पूर्वोक्तं पदोपस्थाप्यत्वं पदतात्पर्य-विषयत्वं वा। न तु एकपदोपस्थाप्यत्वम्।

शङ्का

ननु विभक्तेः पदार्थतावच्छेदकधर्मव्याप्यसंख्याबोधकत्वमावश्यकम्। द्वन्द्वादन्यत्र तथा व्युत्पत्तेः। ततश्च उभयगतपदार्थतावच्छेदके साहित्ये लक्षणेति चेत् —

समाधानम्

मैवम्। पदार्थतावच्छेदकधर्मसमानाधिकरणस्वार्थबोधकत्वं विभक्तेरित्येव व्युत्पत्तिः। न तु नियतसमानाधिकरणत्वरूपव्याप्यत्वस्य व्युत्पत्तौ प्रवेशः। तथा च धवरवदिरावित्यत्र विभक्त्यर्थद्वित्वे पदार्थतावच्छेदकधवत्वखदिरत्वसमानाधिकरण-त्वसत्त्वात् साहित्ये लक्षणायाः नावश्यकता।

शङ्का

नन्वेवं घटावानय पटं चेयत्र घटत्वसमानाधिकरणं द्वित्वं पटेऽपीति तमादायान्वयबोधः स्यात् इति चेत् —

समाधानम्

न। विभक्तीनां योग्यतादिमत्प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वमिति व्युत्पत्तिः। घटावानय पटं चेत्यत्र पटपदस्य द्विवचनप्रकृतित्वाभावात् तदर्थमादाय न द्वित्वान्वय-बोधप्रसक्तिः। न च धवखदिरावित्यत्र धवपदस्य द्विवचनप्रकृतित्वाभावात् कथं तदर्थगतद्वित्वान्वयबोधकत्वमिति वाच्यम्। तत्र द्विवचनस्य समासः प्रातिपदिकत्वात् प्रकृतिः। समासत्वं च द्वयोरपि पदयोरिति धवस्य प्रकृत्यर्थत्वमक्षतम्।

शङ्का

ननु विभक्त्यर्थान्तर्भावेणैव नामार्थस्य क्रियान्वयित्वमिति नियमः। विभक्तेश्च एकपदार्थमात्रगतसंख्याभिधायकत्वं नानापदार्थगतसंख्यान्वयाबोधकत्वं चेति व्युत्पत्तिः। ततश्च धवखदिरोभयगतसंख्याबोधकत्वं कथं विभक्तेरिति चेत् —

समाधानम्

मैवम्। आद्यव्युत्पत्तौ एकपदं मात्रपदं चाधिकम्। विभक्तेः पदार्थगतसंख्याबोधकत्वमित्येव व्युत्पत्तिः। द्वितीये नानापदार्थगतसंख्यान्वयाबोधकत्वे योग्यताविरहः प्रयोजकः, सत्यां योग्यतायां विभक्तेः नानापदार्थगतसंख्याबोधकत्वमपि सम्भवतीति।

शङ्कासमाधाने

न च एकधर्मरूपमवच्छेदकं विना यदि धवखदिरस्वरूपद्वये विभक्त्यर्थद्वित्वान्वयः, तदा "धवं च खदिरं च छिन्धि" इत्यत्रेव वाक्यभेदः स्यात्, द्वित्वविशिष्टैकार्थप्रतिपादकत्वाभावादिति वाच्यम्। आनयनान्वितद्वित्वरूपैकधर्मविशिष्टार्थबोधकतया एकवाक्यत्वोपपत्तेः। अन्यथा घटावानयेत्यत्रापि वाक्यभेदापत्तेः। एतदुक्तं भवति — धवखदिरावित्येतन्मात्रं न वाक्यम्, येनानेकार्थबोधकतया वाक्यभेदः स्यात्। अपि तु धरखदिरौ छिन्धि इत्येव वाक्यम्। तच्च द्वित्वविशिष्टधवखदिरकर्मकानयनरूपैकार्थप्रतिपादकतया एकवाक्यं भवति। न च क्रियायाः प्रत्येकमन्वयात् वाक्यभेद इति वाच्यम्। साहित्ये लक्षणेति पक्षेऽपि प्रत्येकमेव क्रियान्वयेन वाक्यभेदापत्तेः। न खलु छेदनादिक्रिया व्यासज्यवृत्तिः।

निगमनम्

तस्मात् नामपदादप्युपस्थितेऽनेकत्र द्वित्वान्वयसम्भवात् नानेकोपस्थित्यर्थं साहित्ये लक्षणा। अत एव —

"चन्द्रे कलङ्कः सुजने दरिद्रता विकासलक्ष्मीः कमलेषु चञ्चला।
मुखाप्रसादः सधनेषु सर्वदा यशो विधातुः कथयन्ति खण्डितम्।।"

इत्यादावेकस्मृतिविषयभूतनानापदजनितैकस्मृतिविषयेषु कलङ्कादिषु बहुत्वान्वयबोधः। सहिततयोपस्थापकस्य द्वन्द्वस्य तत्राभावात्। न च तत्रापि द्वन्द्वः तानीत्येकशेषो वा कल्पनीय इति वाच्यम्। कल्पने प्रमाणाभावात्। एकवचनान्तपदानां वाक्येऽनन्वयप्रसङ्गाच्च।

शङ्कासमाधाने

नन्वेवं धवखदिरौ छिन्धि इत्यत्र धवखदिरयोः छिदानुकूलव्यापारवत्त्वरूपं साहित्यं न प्रतीयेतेति चेत् — न। द्वित्वान्वयबोधात् पूर्वं न प्रतीयत एव। तदुत्तरं तु विभक्त्या क्रियापदेन च मिलित्वा छिदानुकूलसजातीयविजातीयव्यापारप्रचयस्य तुल्य एव सम्बन्धो धवे खदिरे च बोध्यते, यथा धवं खदिरं च छिन्धीति समुच्चयेन।

न चैवं द्वन्द्वसमानार्थकत्वेन समुच्चयेऽपि समासः स्यादिति वाच्यम्। द्वन्द्वे युगपदुपस्थिते द्वये एकदा क्रियान्वयबोधे तात्पर्यम्। तेन तत्र समासः। समुच्चये क्रमेण उपस्थिते द्वये क्रमेण क्रियान्वयबोधे तात्पर्यम्। अतस्तत्र न समासः।

किं च तुल्यव्यापारवत्त्वरूपेण साहित्येन द्वयोः उपस्थितिः पदार्थता च तदा तुल्यव्यापारौ सहितौ वा गच्छतः इति बोधः स्यात्, न तु चैत्रमैत्रौ गच्छतः इति। पदार्थतावच्छेदकरूपेणोपस्थिते पदार्थे विभक्तेः क्रियापदस्य च स्वार्थान्वयबोधकत्व-मिति व्युत्पत्तेः नियमाच्च। यथा काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वरूपेण काकस्येतरपदार्थान्वयः तद्वत्। ननु शक्यतावच्छेदकचैत्रत्वमैत्रत्वाभ्यां लक्ष्यता-वच्छेदकसाहित्येन चोपस्थितयोः चैत्रमैत्रयोः द्वित्वान्वयो भवतु। सहितावस्थचैत्रमैत्रौ गच्छत इति बोधोऽस्तु इति चेत् — न। तथा सति प्रत्येकं द्वित्वान्वयानुपपत्तिः। युगपत् वृत्तिद्वयविरोधश्च। युगपत् शक्यार्थलक्ष्यार्थयोरितरपदार्थान्वयोऽनुभवविरुद्ध इति यावत्।

अपि च चैत्रमैत्रौ गच्छत इत्यत्र गमनस्य व्यासज्यवृत्तित्वाभावात् चैत्रत्वेन गमनान्वयार्थं चैत्रत्वेन चैत्रपदात् चैत्रस्योपस्थितिः, द्विवचनार्थद्वित्वान्व-यार्थं मैत्रसहितचैत्रत्वेन उपस्थितिश्च स्वीकरणीयेति एकस्मिन् पदे युगपत् वृत्तिद्वयविरोधः। सहितावस्थे च गमनकर्तृत्वाभावात्। आख्यातार्थसंख्यान्वयोऽपि न स्यात्। कृतेः प्रत्येकविश्रान्तत्वात् संख्यायाः कृत्यन्वय्यन्वयित्वाच्च।

न च सहितत्वेनोपस्थिते चैत्रे मैत्रसहितरूपपदार्थैकदेशे मैत्रे च धात्वर्थगमनान्वय इति वाच्यम्। सहितो गच्छतीति धीप्रसङ्गात्।

न च धात्वर्थगमने आख्यातार्थद्वित्वान्वयः, चैत्रमैत्रयोः सुबर्थद्वित्वान्वय इति वाच्यम्। सुबन्ततिङन्तयोः सामानाधिकरण्यभङ्गप्रसङ्गात्। सुप्तिङ्भ्यामेक-गतसंख्याबोधकत्वव्युत्पत्तिभङ्गप्रसङ्गाच्च।

एवं गर्गा भुञ्जत इत्यत्र भोजनस्यैककर्तृकत्वनियमात् अनेककर्तृकं भोजनं न सम्भवतीति एकया वृत्त्या गर्गत्वेनोपस्थितेऽनेकत्र सुप्तिङर्थबहुत्वान्वयः, न तु सहितत्वेनोपस्थिते।

यत्तु तत्रापि धात्वर्थभोजनगतं बहुत्वमाख्यातेन उच्यते इति। तन्न। तिङन्त-सुबन्तयोः सामानाधिकरण्यानुपपत्तेः, उभयोः एकसंख्याभिधायकतयैव तदुपपत्तेः। भोजनानां सहितत्वेनानुपस्थितेश्च। यदा चानुगतं रूपं विनैव एकैकपदात् स्वस्वशक्त्योपस्थितेऽनेकत्र योग्यतया द्वित्वबहुत्वान्वयः तदा सुबन्ततिङन्तार्थ-संख्यान्वयः प्रातिपदिकार्थे भवतीति नैते दोषाः।

मतान्तरनिरासः

यत्तु साहित्यं नोभयानुगतं तुल्यव्यापारवत्त्वादिकम्। तेन रूपेण धवखदिरयोः विभक्त्यर्थे धात्वर्थे च अन्वयाप्रतीतेः। किं तु प्रत्येकविलक्षणं स्वरूपद्वयमेव तत्। प्रत्येकं चोभयादन्यत्। भवति हि द्वयादन्यः एकः। धवो न धवखदिरौ, तौ च न धव इत्यनुभवात्। तथा चैकमात्रवाचकेन अशक्यं द्वयं लक्ष्यत इति न वृत्तिद्वयविरोधः। धवपदस्य च स्वार्थनिरूप्यत्वमेव लक्ष्ये स्वरूपद्वये सम्बन्धः। एकनिरूप्यत्वात् द्वयस्य। अनुगतधर्मं विनापि धवपदादनेकोपस्थितिः, ध्रुवपदादिव चतुर्दशानाम्। यथा ध्रुवपदात् एकयैव शक्त्या ध्रुवत्वादिना प्रातिस्विकरूपेण चतुर्दशानामुपस्थितिः तथा स्वार्थनिरूप्यत्वेन एकैकेनैव सम्बन्धेन धवत्वादिनोभयोपस्थितिरिति यावत्। योग्य-तावशाच्च विभक्त्यर्थद्वित्वस्य स्वरूपद्वये धात्वर्थस्य च छेदनस्य प्रत्येकमन्वय इति।

तन्न। उक्तरीत्या स्वस्वशक्त्या अनेकपदजनितैकस्मृतिविषयेऽनेकत्र द्वित्वान्वय-बोधसम्भवात् तदर्थं साहित्यलक्षणाया अनावश्यकत्वात्।

सरूपैकशेषः

घटौ घटा इत्यत्र घटपदात् द्वित्वबहुत्वान्वययोग्यानेकघटोपस्थितिः शक्तिरूपया एकया वृत्त्यैव सम्भवतीति न तदर्थं लक्षणा। यथा ग्रहं सम्मार्ष्टीत्यत्र ग्रहपदात् एकशक्त्या उपस्थिते अनेकग्रहे सम्मार्गान्वयः तद्वत्।

समाहारद्वन्द्वः

पाणिपादं पञ्चपूली इत्यादौ समाहारद्वन्द्वे पाणिपादादिवृत्त्येकधर्मः लक्षणया अभिधीयते। तस्यैकत्वात् एकवचनम्। तदाहुः शाब्दिकाः — समाहरणं समाहरः अनेकस्यैकीकरणम् एको धर्म इति यावत्। स चैको धर्मः सेनावनादाविव द्वित्वबहुत्वसंख्या, अपेक्षाबुद्धिविशेषविषयत्वं वा।

नन्वेवं सति पाणिपादं चलतीत्यादौ धर्मे चलनाद्यन्वयानुपपत्तिरिति चेत् — न। स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन तदुपपत्तेः। न च पाण्याद्यनन्वयापत्तिः। धर्म-विशिष्टलक्षणया तदुपपत्तेः।

केचित्तु अनुशासनबलात् तत्रैकवचनं प्रयोगसाधुत्वार्थम्। तथा चैकत्वानन्वयेऽप्यदोष इति न विशिष्टे लक्षणेत्याहुः।

अन्ये तु धर्मे लक्षणायामपि पदार्थतावच्छेदके पाण्यादौ चलनान्वयः, व्युत्पत्तिवैचित्र्यात्। यथा उत्कृष्टः पण्डित इत्यादौ एकदेशपण्डायामुत्कृष्टत्वान्वयः तथेत्याहुः।

विरूपैकशेषः

माता च पिता च पितराविति विरूपैकशेषे एकस्य पितृद्वयाभावात् अगत्या पितृपदस्य जनकदाम्पत्ये(दम्पत्योः) लक्षणा। विभक्त्युपस्थापितं च द्वित्वं विरूपयोरेव मातापित्रोरवगम्यते। सरूपस्य तु पितृद्वयस्य मातृद्वयस्य चैकं प्रत्यजनकत्वात्।

श्वश्रूश्च श्वशुरश्च श्वशुरौ इत्यत्र श्वशुरपदस्य पत्नीजनकदम्पत्योर्लक्षणा। पत्नीमातापित्रोः द्वित्वमन्वेति।

ब्राह्मणावानयेत्यत्र दम्पतिपूजाप्रकरणे मानान्तरात् ब्राह्मणब्राह्मणीपरत्वावगमे "पुमांस्त्रिया"[७४] इति विरूपैकशेषत्वात् ब्राह्मणपदस्य स्त्रीपुंसे लक्षणैव। यद्यपि ब्राह्मणत्वजातिमत्त्वात् ब्राह्मण्यपि शक्यैवेति न लक्षणा, तथापि आद्यवर्णत्वस्त्रीत्वादिप्रकारकप्रतीतितात्पर्यकत्वे तन्निर्वाहार्थं लक्षणा।

न च स्त्रीपुंसयोः ब्राह्मणपदार्थत्वे विभक्त्यर्थपुंस्त्वान्वयो न स्यात् उभयस्य पुंस्त्वाभावादिति वाच्यम्। पदार्थैकदेशगतपुंस्त्वस्यैव विभक्त्या अनुवादात्। यदा तु न ब्राह्मणपदस्य न दम्पतिपरत्वं तदा ब्राह्मणावित्यत्र घटावित्यत्रेव ब्राह्मणपदेन एकया वृत्त्या पुंद्वयमेवोच्यते, न स्त्रीपुंसौ। सरूपैकशेषापेक्षया विरूपैकशेषस्य लाक्षणिकत्वेन जघन्यत्वात्।

यदि च सरूपैकशेषेऽपि लक्षणा तदाप्यौकारान्तपदात् सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वात् पुंलिङ्गानुरोधात् ङीबाद्यर्थकल्पने मानाभावात् पुंद्वयमेवावगम्यते, न स्त्रीपुंसौ।

शिवौ नमस्कुर्यादित्यत्र नमस्करणीयशिवान्तराभावात् विरूपैकशेष इति शिवश्च शिवा च लक्षणया उच्यते।

भ्रातरौ पुत्रावित्यत्र प्रमाणान्तरात् स्त्रीपरत्वस्यापि ज्ञाने "भ्रातृपुत्रौ स्वसदुहितृभ्याम्"[७५] इति सूत्रेण विरूपैकशेषः भ्राता च स्वसा च भ्रातरौ, पुत्रश्च दुहिता च

---

[७४] पा.सू. १.२.६७

[७५] पा.सू. १.२.६८

पुत्राविति। ततश्च भ्रातृपदेन भ्रातृस्वसारौ पुत्रपदेन पुत्रदुहितारौ लक्ष्येते। स्त्रीपरत्वाज्ञाने च भ्रातृद्वयं पुत्रद्वयं च शक्त्यैवोच्येते, घटावित्यत्रेव।

शङ्का — नन्वेवं "क्षौमे वसानावग्नीनादधीयाताम्" इत्यत्र औकारान्त-वसानशब्दात् सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुंलिङ्गावरुद्ध-त्वात् टाबाद्यर्थकल्पने च हेत्वभावात् पुंद्वयबुद्धौ आधाने पुरुषद्वयविधिः स्यात्। वसानशब्दात् तन्त्रावृत्त्यापि स्त्रीपुंसयोर्ज्ञानासम्भवात्। न चैवं "पुमांस्त्रिया"[७६] इति विरूपैकशेषोच्छेद इति शङ्कनीयम्। यत्र मानान्तरात् स्त्रीपरत्वधीः तत्र स्त्रीद्वितीयस्य प्रातिपदिकार्थत्वाय विरूपैकशेषविधानात्। उभयसमवेतद्वित्वस्य पुंस्यपि सम्भव इति विभक्त्या तद्गतसंख्याभिधाने विरूपैकशेषसम्भवात्। इह तु स्त्रीपरत्वग्राहक-प्रमाणाभावात् द्वितीयत्वेन स्त्रिया अप्राप्तत्वात् वसानपदस्य तदुपस्थापकत्वाभावात् वसानपदस्य सरूपैकशेषतैव स्यादिति चेत् —

मैवम्। "सपत्नीकोऽग्नीनादध्यात्" इति विधिना यत् कर्तव्यं तदनया सह" इति सामान्यविधिना वा अग्न्याधाने सहत्वेन प्राप्तया पत्न्यैव पुंसः सद्वितीयत्वं न त्वप्राप्तेन पुमन्तरेण। क्षौमपुंसयोरुभयोर्विधेयतायां वाक्यभेदापत्तेः। पुंस्त्वं तु विभक्त्या नामार्थगततया प्राप्तमेवानूद्यते, न तु नामार्थैकदेशगततया, अन्यसहितावस्थपुमर्थस्यैव नामार्थत्वात्। ततश्च वसानश्च वसाना च वसनाविति विरूपैकशेष एवेति सिद्धम्।

शब्दशक्तिप्रकाशिकायां द्वन्द्वसमासविचारः[७७]

यद्यदर्थोपस्थापकस्य क्रमिकयादृशनामस्तोमस्य निश्चयः तत्तदर्थप्रकारका-न्वयबोधं प्रति तत्त्वेन समर्थः तन्नामनिवह एव तावदर्थको द्वन्द्वसमासः। यथा पाणिपादं वादय धवखदिरौ छिन्धि इत्यादौ द्वितीयाविभक्त्यर्थकर्मत्वांशविशेष्यककर-चरणादिप्रकारकान्वयबोधं प्रति अमादिधर्मिकः अव्यवहितोत्तरत्वसम्बन्धेन करचर-णाद्युपस्थापकपाणिपादादिक्रमिकनामस्तोमप्रकारकः निश्चयः कारणम्। अतः पाणि-पादादिनामसमुदायः करचरणादितत्तदर्थे द्वन्द्वः। तथा च स्वघटकयद्यन्नामोपस्थाप्य-यद्यदर्थप्रकारकान्वयबोधं प्रति यादृशानुपूर्वीप्रकारकनिश्चयत्वेन हेतुत्वं तादृशानुपूर्वी-विशिष्टसमासत्वं तत्तदर्थबोधे द्वन्द्वत्वमिति पर्यवसितोऽर्थः।

प्राचीनमतखण्डनम्

यत्तु पाणिपादमित्यादौ समाहारद्वन्द्वे सर्वत्र उत्तरपदे पाणिपादादिसाहित्ये लक्षणा। अत एव नित्यं तत्रैकवचनम्। समाहारस्यैकत्वात्। पदान्तरं तु तादृशलक्षणायाः

---

[७६] पा.सू. १.२.६७

[७७] पृ. २६०-२७०

निरूढत्वसम्पादकम्। तथाविधसाहित्यस्य च स्वाश्रयनिष्ठत्वादिसम्बन्धेनैव द्वितीयाद्यर्थकर्मत्वादौ साकाङ्क्षत्वमिति प्राचीनैरुक्तम्।

तन्न। तुल्यवदेकक्रियान्वयित्वं नाम एकजातीयक्रियानिष्ठैकजातीयसंसर्गनिरूपकत्वं अपेक्षाबुद्धिविशेषविषयत्वं वा पाणिपादयोः साहित्यम्। तस्य च नानात्वसम्भवेन साहित्यगतद्वित्वादिबोधनार्थं समाहारद्वन्द्वादपि द्विवचनाद्यापत्तेः दुर्वारत्वात्। न च साहित्यस्य नानात्वेऽपि न समाहारद्वन्द्वस्य द्विवचनादिसाकाङ्क्षत्वम् "द्वन्द्वैकत्वं द्विगोरिव" इति द्विगोरिव एकवचनानुशासनात् इति वाच्यम्। तर्हि पाणिपादप्रभृतीनां नानात्वेऽपि न तदर्थकस्य द्वन्द्वस्य द्विवचनादिसाकाङ्क्षत्वमित्येव वक्तुमुचिततया अलं साहित्ये लक्षणया। किं च साहित्ये लक्षणाङ्गीकारे "हस्त्यश्वं धनम्" इत्यस्य वाक्यस्यायोग्यार्थकत्वं स्यात्। साहित्ये धनाभेदविरहात्। न च स्वाश्रयत्वसम्बन्धेन हस्त्यश्वसाहित्यस्य धनेऽन्वयसम्भवात् नायोग्यतेति वाच्यम्। नामार्थयोः भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। न च पाणिपादमित्यादेः समाहाराबोधकत्वे समाहारसंज्ञायाः किं फलमिति शङ्कनीयम्। नपुंसकलिङ्गत्वनित्यैकवचनत्वादिरूपपदसंस्कारोपयोगित्वात् समाहारपरिभाषायाः तस्याः अर्थव्यवस्थापकत्वाभावात्।

मीमांसकमतखण्डनम्

मीमांसकास्तु — धवखदिरावित्यादावितरेतरद्वन्द्वेऽपि उत्तरपदे धवखदिरसाहित्याश्रये लक्षणा। अन्यथा द्विवचनादेः प्रकृत्यर्थतावच्छेदकवत्येव पर्याप्तिसम्बन्धेन स्वार्थद्वित्वाद्यन्वयबोधजनकत्वमिति व्युत्पत्तेः धवखदिरावित्यतः धवद्वयस्य खदिरद्वयस्य च प्रतीत्यापत्तेरित्याहुः।

तदपि न। तुल्यवदेकक्रियान्वयित्वं धवखदिरविशेष्यकधीविशेषविषयत्वं वा साहित्यम्। तदाश्रयश्च धवद्वयादिकमपीति साहित्याश्रयलक्षकत्वपक्षेऽपि धवखदिरावित्यतः धवद्वयादिबोधस्य दुर्वारत्वात्। न च त्रितयाविशेष्यकधवखदिरविशेष्यकधीविशेष्यत्वमेव प्रकृते धवखदिरयोः साहित्यम्। तच्च न धवद्वयादेरिति वाच्यम्। तथाविधसाहित्यान्वयस्यानुभवाभावात्।

तस्मात् यत्र नानाधर्माणां प्रकृत्यर्थतावच्छेदकत्वं, तत्र तत्तद्धर्मावच्छिन्ने समुदित एव पर्याप्तिसम्बन्धेन द्वित्वादिबोधने द्विवचनादिकं साकाङ्क्षम्, न तु तादृशैकधर्मावच्छिन्नं त्यक्त्वा तथाविधापरधर्मावच्छिन्ने। अतो धवखदिरावित्यतः न धवयोः खदिरयोश्च बोधप्रसङ्गः।

एवं यत्र पदार्थयोः पदार्थतावच्छेदकयोर्वा भेदः तत्रैव द्वन्द्वः। अतो घटघट, घटकलशेत्यादौ न द्वन्द्वः। "पीततत्पटयोस्तादात्म्यम्" इत्यादौ तत्पटादेः पीताद्यभिन्नत्वेऽपि पदार्थतावच्छेदकयोः पीतत्वतत्पटत्वाद्योः भेदसत्त्वात् द्वन्द्वः।तत्र विभक्त्यर्थद्वित्वं न प्रकृत्यर्थेऽन्वेति। पीतपटे पर्याप्तिसम्बन्धेन द्वित्वस्य बाधात्। किं तु प्रकृत्यर्थतावच्छेदकयोः पीतत्वतत्पटत्वयोरन्वेति। व्युत्पत्तिवैचित्र्यात्। पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति व्युत्पत्तेः संकोचादिति यावत्। अत एव पदार्थतावच्छेदकेऽपि पदार्थान्वयस्य व्युत्पन्नत्वादेव "द्व्यणुकारम्भकसंयोगनाशेभ्यः कार्यद्रव्यं नश्यति" इति भाष्ये कार्यद्रव्याणामनेकत्वात् एकत्वबाधात् कार्यद्रव्यम् इत्येकवचनस्य उपपत्तये "जात्यभिप्रायमेकवचनम्" इति गुणकिरणावल्यामाचार्यैरभिहितम्। द्रव्यत्वस्य पदार्थतावच्छेदकस्य एकत्वादेकवचनमिति तदाशयः। एवं "श्यालाः स्युर्भ्रातरः पत्न्याः, स्वामिनो देवृदेवरौ" इति अमरकोशः। पत्न्याः भ्रातरः श्यालपदवाच्याः, स्वामिनो भ्रातरः देवृदेवरपदवाच्याः इत्यर्थः। भ्रातरः इति बहुवचनानुसारेण देवृदेवरा इति बहुवचनेन भाव्यम्। परं तु पदार्थतावच्छेदकयोः देवृदेवरपदयोः द्वित्वान्वयात् साधुता भवति। अतः पदार्थतावच्छेदकेऽपि विभक्त्यर्थान्वयः साधुरिति बोध्यम्।

यदि च पटद्वयासत्त्वेऽपि भूतले पीतपटाविति प्रयोगः स्यात्, पीतत्वपटत्वोभयाश्रयस्य तत्र सत्त्वात्। एवं पीतपटयोरभेदः इत्यादितः द्वित्वानवच्छिन्नपटत्वादेरबोधप्रसङ्गश्च, पटत्वादिरूपार्थे सुबर्थद्वित्वस्य प्रकारत्वात् इत्यादि सूक्ष्ममीक्ष्यते, तदा गोदौ ग्रामः इत्यादाविव साधुत्वार्थमेव तत्र द्विवचनमिति वदन्ति। (ग्रामवाचकगोदशब्दस्य नित्यद्विवचनान्तता)

एवं "विद्यति विन्दतिविनत्तीनामनिट्" इत्यत्र विन्दत्यादिशब्दः न विदधातुत्वेन उपस्थापकः, त्रयाणामपि आनुपूर्व्यैक्येन पदार्थतावच्छेदकानुपूर्वीभेदविरहात् पदार्थधातुभेदविरहाच्च द्वन्द्वानुपपत्तेः। किं तु सत्तालाभविचाररूपार्थविशिष्टविदधातुत्वेनोपस्थापकः। तथा च सत्तालाभविचाराणां पदार्थतावच्छेदकानां भेदात् द्वन्द्व उपपद्यते।

मृगपाण्डरयोः हरिणपदार्थयोः भेदेऽपि हरिणहरिणौ इति प्रयोगो न भवति। अतः समानानुपूर्वीकशब्दयोः द्वन्द्वप्रसक्तावेकशेषः व्युत्पत्तिसिद्धः। तेन हरिणावित्यत्र लुप्तश्रुताभ्यामेव हरिणपदाभ्यामुपस्थितयोः मृगपाण्डरयोः बोधः।

"हरी नमस्यौ" इत्यत्रापि एकशेषात् लुप्तश्रुताभ्यामेव हरिपदाभ्यां विष्णुचन्द्रयोर्बोधः। अन्यथा हरिहरी नमस्यावित्यपि प्रयोगापत्तिः। ननु हरिपदान्तराभावे हरी च हरयश्चेति विग्रहे हरय इत्यतः विष्णुद्वयसिंहत्रयबोधो न स्यात्। लुप्तहरिपदस्मरणेऽपि संख्यावाचकसुबाद्यभावात् संख्यावगमो न स्यादिति चेत् — तादृशस्थले द्वित्वसंख्यावच्छिन्नविष्णुलक्षकस्य लुप्तस्य हरिपदस्योत्तरत्वेन ज्ञातं हरिपदं त्रित्वसंख्यावच्छिन्नसिंहस्य लक्षणया बोधकम्। तदज्ञाने तु श्रुतमेव हरिपदं विष्णुद्वयस्य सिंहत्रयस्य च एकया लक्षणया शक्तिभ्रमेण वा बोधकम्।

ननु विग्रहस्थसुबर्थद्वित्वादिसंख्यायाः समासाप्रतिपाद्यत्वनियमात् तथाविधद्वित्वत्रित्वान्तर्भावेण द्वन्द्वस्यैवासाधुत्वात् उक्तक्रमेणैकशेषो न युक्तः। द्वन्द्वप्रसक्तावेव एकशेषस्य विधानादिति चेत् — मैवम्। शलकापरि हस्त्यश्वमित्यादौ अक्षशलाकयोरेकत्वे वर्तमानयोरेव परिणा सहाव्ययीभावस्य विधानात् एकत्वसंख्यायाः समासप्रतिपाद्यत्वात् व्यभिचारेण विग्रहस्थसुबर्थस्य समासाप्रतिपाद्यत्वमिति नियमाभावात्। न चैकत्वस्य समासाप्रतिपाद्यत्वनियमो मया नोक्तः, परं तु द्वित्वादेरिति वाच्यम्। एकत्वे च एकत्वानि चेति विग्रहे एकत्वानीत्येकशेषस्य गुणकिरणावल्यामाचार्यैरुक्तत्वात् द्वित्वादेरपि समासप्रतिपाद्यत्वात् उक्तनियमव्यभिचारात्।

हंसश्च हंसी चेत्यर्थे हंसहंस्याविति प्रयोगाभावात् तत्रापि "पुंसा स्त्रियाः सारूप्ये" इत्यनुशासनात् पुंसा सह स्त्रियाः सारूप्ये स्त्रिया लोपः इत्यर्थकात् हंसीपदस्य लोपे हंसौ इत्यत्र लुप्तमेव हंसीपदमनुसन्धाय स्त्रीपुंसयोर्बोधः। तल्लोपमजानतस्तु हंसपदे स्त्रीहंसत्वपुरुषहंसत्वाभ्यां विभिन्नरूपाभ्यामेकस्याः शक्तेः लक्षणाया वा ग्रहादेव बोधः।

यत्तु तत्र हंसपदमेव लक्षणया हंसीत्वेन, शक्त्या च हंसत्वेन बोधकम्। सुबर्थस्तु पुंस्त्वं हंस एवान्वेति, न तु हंस्याम्, अयोग्यत्वात् इति मतम्।

तन्न। तथा सति स्त्रीहंसत्वहंसत्वयोः पदार्थतावच्छेदकयोर्भेदविरहेण द्वन्द्वाप्रसक्तौ एकशेषस्य दुष्करत्वापत्तेः। अन्यथा घटतद्घटावित्यपि द्वन्द्वप्रसङ्गात्। अस्मन्मते तु स्त्रीत्वविशिष्टहंसत्वावच्छिन्नपुंस्त्वविशिष्टहंसत्वावच्छिन्नयोरिव तद्द्वयोरपि मिथो भेदसत्त्वान्नानुपपत्तिः।

दुन्दुभी च दुन्दुभिश्चेति विग्रहे "दुन्दुभी सुन्दरौ" इत्यत्र अक्षभेर्योर्बोधस्थले पुंलिङ्गस्यैव दुन्दुभिशब्दस्य "स्त्रीपुंसयोः पुमान् शेष" इत्यनुशासनशिष्टतया तद्विशेषणतयैव सुन्दरशब्दस्य पुंलिङ्गत्वम्।

युवा च युवतिश्चेत्यर्थे युवानौ इत्यत्रापि पुंलिङ्गयुवन्शब्दस्यैवोक्तरीत्या अनुशिष्टतया युवतियौवनवतोः बोधः।

वरटाहंसौ, लक्षणासारसौ इत्यादौ तु स्त्रीपुंसयोः द्वन्द्वेऽपि पदसारूप्य-विरहान्नैकशेषः।

दम्पत्यर्चनप्रकरणे ब्राह्मणावानयेत्यत्रापि ब्राह्मणश्च ब्राह्मणी चेति विग्रहे प्रागुक्तदिशा ब्राह्मणभार्यापत्ययोरवगमः।

एकश्चैका चेत्यत्र एकौ, द्वौ च उभे चेत्यत्र उभौ, त्रयश्च तिस्रश्चेत्यत्र त्रय इत्यादिरेकशेषः इष्यत एव। बाधविरहात् युक्तेस्तौल्याच्च।

"ग्राम्यानेकशफेष्वतरुणेषु"[७८] स्त्रीपुंसयोः बहुत्वमन्तर्भाव्य सारूप्येण द्वन्द्वस्थले तु पुंस एव लुक्। तेन मेष्यश्च मेषाश्चेत्यर्थे मेष्य इत्यत्रापि लुप्तं बहुमेषाणां लक्षकं मेषपदं यः प्रतिसन्धत्ते तस्यैव बहुमेषाणामनेकमेषीणां च अवगमः।

एवं महिषाश्च महिष्यश्चेत्यर्थे महिष्य इत्यत्रापि महिषपदं बहूनां महिषाणां लक्षकम्। मृगाश्च मृग्यश्चेत्यर्थे मृगा इत्यत्र तु मृगस्याग्राम्यत्वान्न पुंसो लुक्, परं तु स्त्रियाः। तथा गर्दभाश्च गर्दभ्यश्चेत्यर्थे गर्दभा इत्यत्रापि खराणामेकशफत्वात् न पुंसो लुक्, किं तु स्त्रियाः। वर्करस्तरुणो युवा पशुः। स्वसा च भ्राता चेत्यर्थे भ्रातरावित्यत्र, पुत्रश्च दुहिता चेत्यर्थे पुत्रवित्यत्र च विरूपैकशेषेष्वपि स्वसृपदं दुहितृपदं च लुप्तं स्मृत्वैव भ्रातृभगिन्योः पुत्रकन्यकयोश्चावगमः।

"ज्येष्ठपुत्रदुहित्र्योश्च ज्येष्ठे मासि न कारयेत्" इत्यादिकः प्रयोगस्तु परिचिन्तनीयः। एकशेषे बाधकाभावात्। पुत्रत्वदुहितृत्वाभ्यामेक- शक्तिमत्प्रकृत्यन्तरस्वीकारेण कथंचिदुपपादनीयः।

स च मैत्रश्चेति विग्रहे त्यदादिना तदन्यस्य द्वन्द्वे लुकि ["त्यदादीनि सर्वैर्नित्यम्"[७९] इति सूत्रेण] तावित्यत्रापि लुप्तं मैत्रपदमनुसंदधत एव मैत्राद्यवगमः।

स च त्वं चेति विग्रहे किंपदान्यत्यदादिद्वयगर्भद्वन्द्वे तु पूर्वस्यैव स्वानुत्तरपदस्य वा त्यदादेर्लुकि युवाम् इत्यादावपि लुप्ततत्पदानुसन्धानेनैव तदर्थयुष्मदर्थयोः बोधः।

स्वानुत्तरपदस्येत्युक्त्या स च स चेत्यत्र भिन्नार्थयोः तच्छब्दयोर्विग्रहे स्वपूर्वागणितोऽपि स्वोत्तरापठित एव तदादिरिति लुक्। अतस्तौ इति भवति।

"तत्तन्मानुषतुल्योऽसौ यद्यद्विद्यातिनिर्मला" इत्यादौ तु न त्यदादिगणेन द्वन्द्वः, किं तु तदाद्यव्ययेन। अतो नैकशेषः। यथा "तत्तत्तामसभूतभीतयः" इत्यादौ। न च तत्र

---

[७८] पा.सू. १.२.७२

[७९] पा.सू. १.२.७२

एकार्थे सरूपैकशेषो न स्यादिति वाच्यम्। यत्तदादिव्यतिरिक्तानामेवाव्ययानां सरूपैकशेषस्य व्युत्पन्नत्वात्। प्रयोगानुरोधित्वात् कल्पनायाः।

कश्च त्वं चेत्यादिविग्रहेण किंशब्देन द्वन्द्वे तु किंशब्दादन्यस्यैव त्यदादेः युष्मच्छब्दस्य लुकि कौ इत्यादिक एव प्रयोगः।

चैत्रस्य पितरावित्यत्रापि विरूपैकशेषे पिता माता च इति विग्रहे लुप्तस्य मातृशब्दस्य स्मरणात् मातुरवगमः। तदस्मरणे तु पितृपदे जनकशरीरत्वेन लक्षणया मातापित्रोरवगमः इति प्राञ्चः।

कौमारास्तु — मातृशब्देन पितृशब्दस्य द्वन्द्वे मातापितृभ्यां मातरपितराभ्याम् इति प्रयोगद्वयदर्शनात् प्रकृत्यन्तरस्वीकारस्यावश्यकत्वात् पितरावित्यत्रापि तथा स्वीकारस्योचितत्वान्नैकशेषः। किं तु मातृत्वपितृभ्यां विभिन्नरूपाभ्यामेकशक्तिमत् नियतद्विवचनसाकाङ्क्षं पितृपदं प्रकृत्यन्तरम्, यथा पुष्पवन्तपदं चन्द्रत्वसूर्यत्वावच्छिन्नैकशक्तिमत् द्विवचनमात्रसाकाङ्क्षं तद्वत्। अत एव "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" "मातापितरौ पितरौ मातरपितरौ च तातजनयित्र्यौ" इत्यमरकोशः। एवं श्वश्रूश्च श्वशुरश्चेत्यर्थे श्वशुरौ इत्यत्र श्वशुरपदमपि विभिन्नरूपाभ्यामेकशक्तिमत् नियतद्विवचनसाकाङ्क्षम्। श्वश्रूशब्दस्य श्वशुरशब्दस्य च द्वन्द्वे श्वश्रूश्वशुरावित्येव प्रयोगादित्याहुः।

द्वन्द्वसमासविभागः

द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ।
एकान्यवचनाकाङ्क्षाहीनोपादानतश्च तौ।।

अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च शास्त्रसिद्धौ। तत्रैकवचनान्यसुबाकाङ्क्षाविहीनः समाहारः। तथाविधसुबाकाङ्क्षश्चेतरेतरः। पाणिपादं हस्त्यश्वम् इत्यादितो हि करचरणादीनां बहूनामप्यवगतावेकवचनमेव प्रमाणम्। धवखदिरावित्यादौ तु द्विवचनादिः प्रमाणम्।

ननु "अदितुदिनुदि .....पदिस्कन्दिस्विदेर्दात्" इति अनिड्विधायक- सूत्रे स्विदेरिति पञ्चम्येकवचनमसंगतम्। न च समाहारत्वादेकवचनम् इति वाच्यम्। तथा सति नपुंसकलिङ्गत्वापत्तेरिति चेत् तत्र पदिस्कन्दिभ्यां सहितः खिदिरिति विगृह्य मध्यमपदलोपिकर्मधारयस्याश्रयणीयत्वात्; यथा "अव्याप्त्यतिव्याप्तेः" इति मणिग्रन्थादौ। अव्याप्तिसहिता अतिव्याप्तिः इति विग्रहात्।

लघुमञ्जूषानुसारं द्वन्द्वसमासः[८०]

धवखदिरौ — धवखदिरौ इत्यादौ इतरेतरयोगद्वन्द्वे उद्भूतावयवभेदः समुदायः समासार्थः। अत एव समूहस्य समासार्थत्वादेव "चार्थे द्वन्द्वः"[८१] इति सूत्रे भाष्ये चार्थे विधीयमानस्य द्वन्द्वस्य चकारार्थवत् लिङ्गसंख्याशून्यत्वमाशङ्क्य शब्दशक्तिस्वभावेन वा, गुणवचनानामिव आश्रयतो लिङ्गवचनानि इत्यनेन वा परिहृतम्। बहुव्रीहावन्य-पदार्थस्येवात्रापि चकारार्थस्यैव प्राधान्यौचित्यात्।

अत एव "गोस्त्रियोरुपसर्जनस्य"[८२] इति सूत्रे भाष्ये कुक्कुटमयूर्यौ इत्यत्र ह्रस्वमाशङ्क्य "द्वन्द्वे प्रतिषेधो वक्तव्यः" इत्युक्तम्। "समासार्थेऽवय-वार्थस्याप्रधानत्वात् प्रथमानिर्दिष्टत्वाच्च उपसर्जनत्वम्" इति कैयटेनोक्तम्।

"प्रमाणप्रमेय" इत्यादिप्रथमसूत्रे न्यायभाष्यकारोऽपि चार्थे द्वन्द्वः समास इत्याह। "अतः सर्व एते प्रमाणादयो विज्ञेयाः" इति वार्तिकं च। तेन हि समासस्य चार्थे वृत्तिः स्पष्टमुक्ता। तेन च समूहस्य लाभः। अन्यथा समासान्तरे इव चकाराघटितवाक्ये इव चात्रापि समासे कथं सर्वेषां ज्ञेयत्वलाभः स्यात्। एवं च समासघटकपदाबोध्ये अर्थे समासस्य शक्तिरित्युक्तं भवति।

पाणिपादमित्यादिसमाहारे तु अनुद्भूतावयवभेदः समूहो विशेष्यः। उद्भूतावयव-भेदत्वं चावयवगतसंख्याद्यारोपवत्त्वम्। तद्विपरीतमनुद्भूतावयवभेदत्वम्। उभयत्रापि द्वन्द्वे समूहो नावयवव्यतिरिक्तः। धवखदिरं धवखदिराविति अवयववाचकशब्दैरेव समूहस्याभिधानात्। अवयवातिरिक्तस्तु समूहः यूयं वयमिति शब्दान्तरेणैवोच्यते।

एतेन इतरेतरयोगे अवयवानतिरिक्ततया समूहस्य भानम्, समाहारे तु तदतिरिक्ततयेत्यपास्तम्।

दीक्षितादिमतानुवादः

यत्तु — इतरेतरयोगे साहित्यं विशेषणम्। तच्च समुदायशक्यम्। साहित्यमुत्तर-पदलक्ष्यमिति तु बहुव्रीह्युक्तरीत्या निरसनीयम्। समुदायलक्ष्यमित्यपि न युक्तम्। अनुपपत्तिप्रतिसन्धानं विनापि प्रतीतेः। समाहारे तु साहित्यं विशेष्यम्। साहित्यस्य इतरेतरयोगद्वन्द्वे अभाने तु द्वित्वाद्यन्वयोग्यतावच्छेदकस्य साहित्यस्य दुर्लभतया द्वित्वान्वयो न स्यात्। प्रत्येकवृत्तिधवत्वादेः द्वित्वान्वययोग्यतावच्छेदकत्वाभावात्।

---

[८०] पृ. १४८२
[८१] पा.सू. २.२.२९
[८२] पा.सू. १.२.४८

ननु उपस्थिते योग्य एव द्वित्वाद्यन्वयनियमः, न तु योग्यतावच्छेदकोपस्थित्यपेक्षा। अत एव घटेन जलमाहरेत्यादौ छिद्रेतरस्यैव घटस्य योग्यतया जलाहरणेऽन्वयः, न तु छिद्रेतरत्वप्रकारको बोधः। एवं च साहित्यस्य अनुपस्थितावपि योग्यतावशात् तस्यैव द्वित्वान्वयितावच्छेदकत्वमिति चेत् —

मैवम्। घट इत्यादौ विभक्त्युपस्थाप्यसंख्यायाः प्रकृत्यर्थतावच्छेदकव्याप्यत्वदर्शनात् विभक्त्युपस्थाप्यसंख्यात्वावच्छेदेन प्रकृत्यर्थतावच्छेदकव्याप्यत्वं कल्पनीयम्। इत्थं च धनखदिरावित्यत्र साहित्यस्य प्रकृत्यर्थतावच्छेदकत्वमावश्यकमिति तत् समासशक्यम्। अन्यथा धवत्वव्याप्यस्य खदिरत्वव्याप्यस्य च द्वित्वस्य बोधे धवखदिरावित्यतो धवद्वयस्य खदिरद्वयस्य च बोधापत्तेः। किं चान्वययोग्यतावच्छेदकधर्मवत्त्वेनोपस्थिते एव द्वित्वादेः साकाङ्क्षत्वात् तादृससाहित्यरूपधर्मोपस्थित्यर्थं तत्र शक्तिरावश्यकी।

किं च चैत्रमैत्रौ पचत इत्यादौ आख्यातोपात्तद्वित्वान्वयार्थमन्वयितावच्छेदकस्य लाभाय साहित्यस्य भानमावश्यकम्। न च तत्र सुबुपात्तद्वित्वमेव आख्यातार्थद्वित्वान्वयितावच्छेदकमिति वाच्यम्। चैत्रो मैत्रश्च गच्छत इत्यादावन्वयानापत्तेः। तत्र द्वित्ववाचकस्य सुपः अभावात्। न च तत्र चशब्दार्थो द्वित्वमाख्यातार्थद्वित्वान्वयितावच्छेदकमिति वाच्यम्। चशब्दस्य द्वित्ववाचकतायाः कोशभाष्यादावनुक्तत्वात्। यदि चकारार्थो द्वित्वं स्यात् तदा चार्थे द्वन्द्वविधानेन द्वन्द्वाञ्चशब्दस्येव द्विवचनस्याप्यनापत्तेश्चेति।

उक्तमतखण्डनम्

तन्न। प्रकृत्यर्थतावच्छेदकधवत्वखदिरत्वाद्यनेकधर्मावच्छिन्ने द्वित्वान्वययोग्यतायाः सत्त्वेनानुपपत्त्यभावात्। न च विभक्तेः प्रकृत्यर्थतावच्छेदकव्याप्यसंख्याबोधकत्वनियमात् धवत्वव्याप्यं खदिरत्वव्याप्यं च द्वित्वं प्रतीयेतेत्युक्तदोषः कथं परिह्रियतामिति वाच्यम्। क्वचित् संख्यायां प्रकृत्यर्थतावच्छेदकव्याप्यत्वभानेऽपि सर्वत्र तथा भानमिति नियमाभावात्।

मम मते तु न दोषः। द्वित्वादिसम्बन्धस्य प्रत्येकावृत्तेरेव समुदायवृत्तित्वस्वीकारात्, समूहस्य विशेष्यतया भानेन द्वित्वादेः समूह एव भानात्। पटावित्यादावेकशेषेऽपि द्वन्द्ववत् विशेष्ये समूह एव द्वित्वान्वयः।

अत एव समासस्यालिङ्गसंख्यत्वादिशङ्कापरमुक्तभाष्यं संगच्छते। न च तद्भाष्यं समाहारद्वन्द्वविषयं नेतरेतरयोगद्वन्द्वविषयमिति वाच्यम्। तस्य वाचनिकलिङ्गैकवचनयोः सत्त्वात्। तस्याश्रयगतलिङ्गसंख्याग्राहकत्वाभावाच्च।

उपदशं दन्तोष्ठम् — दशसमीपो दन्तोष्ठ समाहार इति बोधः। समाहारे दशसमीपत्वं च स्ववृत्तिदशत्वसंख्यासमीपसंख्यावदवयवकत्वेन।

अत्र बहुव्रीहेर्नानुप्रयोगः, नित्यबहुवचनान्तत्वेन दन्तोष्ठमित्यनेनान्वयायोग्यत्वात्।

लघुमञ्जूषानुसारेण एकशेषः[८३]

घटावित्यादौ घटद्वयादिसमूहो घटशब्दाद्यर्थः। एकशेषात्। एकशेषविधायकं च — सरूपाणामेकशेष एकविभक्तौ''[८४] इति सूत्रम्। तच्च द्वन्द्वे इत्यनुवर्तनात् द्वन्द्वविषयम्। तेन तत्र शिष्टस्य ''शिष्यमाणं तु लुप्यमानार्थाभिधायि'' इति न्यायेन लुप्यमानार्थवृत्तिता समूहवृत्तिता च। अत एव तत्र द्वित्वाद्यन्वयः।

ननु तन्त्रेणैवेदं सिद्धम्। तथा हि द्विविधं तन्त्रं शब्दतन्त्रमर्थतन्त्रं च।

तत्र केचित् — अर्थभेदाच्छब्दभेद इति मते सकृत् ताल्वोष्ठपुटव्यापारात् विनिगमनाविरहेणानेकशब्दानां भेदापह्नवेनोच्चरणमित्याद्यः। तदर्थान्वयिसमभिव्याहृतैकपदप्रयोगे तत एव तात्पर्यग्राहकात् प्रायः प्रातिपदिकानामेव तन्त्रमिति श्रोतुरपि एकवृन्तगतानेकफलन्यायेन अनेकशब्दविषयकैकानुसन्धानेन कर्मत्वादिवैशिष्ट्येनानेकार्थसमूहबोधः। यथा अक्षान् पश्येत्यादौ।

मुक्तावल्यनुसारेण समासार्थविचारः

बहुव्रीहिः[८५]

चित्रगुः इत्यत्र गोपदस्य गोस्वामिनि लक्षणा। तदेकदेशे गवि चित्रपदार्थस्याभेदेनान्वयः। चित्राभिन्नगोस्वामीति बोधः। यदि तु एकदेशान्वयो न सम्भवति। तथा हि गोविशेष्यकान्वयबोधं प्रति गोविशेष्यकवृत्तिज्ञानं कारणमिति अवश्यं वाच्यम्। अन्यथा चित्रव्रजोऽस्तीति व्रजपदार्थगोस्थानैकदेशगवि चित्राभेदान्वयाबाधात् चित्राभिन्नगोस्थानमिति बोधतात्पर्येण प्रयोगापत्तेः। उक्तकार्यकारणभावे तु व्रजपदजन्यवृत्तिज्ञाने गोः विशेष्यतया अभानात् गोविशेष्यकवृत्तिज्ञानं नास्तीति नोक्तापत्तिः। तथा च चित्रगुरित्यत्र गोपदस्य गोस्वामिनि लक्षणायां गोविशेष्यकवृत्तिज्ञानविरहात् गवि एकदेशे चित्राभेदान्वयबोधो न सम्भवतीति विभाव्यते; तदा गोपदस्य चित्रगोस्वामिनि लक्षणा। चित्रपदं तात्पर्यग्राहकम्।

---

[८३] ल.म. १५०५

[८४] सू.पा.सू. १.२.६९

[८५] मु. पृ. ३९५

यद्यपि घटशून्यमित्यादौ शून्यपदस्याभाववदर्थकतया तदेकदेशेऽभावे घटपदार्थस्य प्रतियोगितासम्बन्धेनान्वयो दृश्यते; तथापि पदार्थैकदेशे पदार्थान्तरस्य तादात्म्येनैव अन्वयो न स्वीक्रियते, भेदसम्बन्धेनान्वयस्तु स्वीक्रियत एव।

आरूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरकर्तृकारोहणकर्मणि लक्षणा आरूढपदं तात्पर्यग्राहकम्। वानरकर्तृकारोहणकर्माभिन्नो वृक्ष इति बोधः।

आरूढो वानरो यं स इति विग्रहवाक्येन यत्कर्मकारोहणकर्ता वानर इति बोधात् बहुव्रीहिसमासे विग्रहवाक्यात् यादृशविशेषणविशेष्यभावापन्नार्थबोधो भवति समास-वाक्यात् तद्विपरीतविशेषणविशेष्यभावपन्नार्थबोध इति नियमेन वानरकर्तृका-रोहणकर्म वृक्ष इति बोधस्याभ्युपगन्तव्यतया वानरपदस्य वानरकर्तृके लक्षणां स्वीकृत्य आरूढपदस्य आरोहणकर्मणि लक्षणास्वीकारे पदद्वये लक्षणापत्तिः। बहुव्रीहौ उत्तरपद एव लक्षणेति नियमस्य उत्तरपदार्थप्राधान्यनियमस्य च भङ्गापत्तिः स्यादिति वानरपदस्यैव वानरकर्तृकारोहणकर्मणि लक्षणेति रामरुद्री।

तत्पुरुषः — तत्पुरुषे तु पूर्वपदे लक्षणा। तथा हि — राजपुरुष इत्यत्र राजपदार्थस्य पुरुषपदार्थे स्वस्वामिभावसम्बन्धेनान्वयो न सम्भवति। निपातातिरिक्तनामार्थयोः साक्षात् भेदसम्बन्धेन (अभेदातिरिक्तसम्बन्धेन) अन्वयबोधस्य अव्युत्पन्नत्वात्। अन्यथा राजा पुरुष इत्यत्रापि स्वस्वामिभावसम्बन्धेनान्वयः स्यात्। पटो न घट इत्यत्र घटपदार्थस्य नञर्थे भेदे प्रतियोगितासम्बन्धेन, नञर्थस्य भेदस्यानुयोगितासम्बन्धेन पटे चान्वयेन घटप्रतियोगिकभेदानुयोगी पट इति बोधोदयेन तदुपपत्तये निपातिरिक्तेति नामविशेषणम्। नीलो घट इत्यादौ नामार्थयोः नीलघटयोः अभेदेनान्वयात् भेदे-नेत्युक्तम्। भूतले घट इत्यादौ भूतलस्य सप्तम्यर्थाधेयत्वद्वारा घटेऽन्वयात् साक्षादित्युक्तम्। साक्षादित्यस्य विभक्त्यर्थमद्वारीकृत्येत्यर्थः। निपातपदमव्यय-स्याप्युपलक्षणम्। तेन चन्द्र इव मुखमित्यादौ चन्द्रपदार्थस्य प्रतियोगितासम्बन्धेन इवपदार्थे सादृश्ये, इवपदार्थस्य सादृश्यस्य चानुयोगितासम्बन्धेन मुखे अन्वयेन चन्द्रप्रतियोगिकसादृश्यप्रतियोगि मुखमिति बोधस्योपपत्तिः।

न च राजपुरुष इत्यादौ लुप्तषष्ठीविभक्तिस्मरणं कल्पयित्वा तदर्थद्वारैव राज-पदार्थस्य पुरुषपदार्थेऽन्वयसम्भवेन नोक्तव्युत्पत्तिविरोध इति वाच्यम्। लुप्तविभक्ति-स्मरणं विनापि बोधस्योत्पत्तेः।

तस्मात् राजपदार्थस्य पुरुषपदार्थे भेदसम्बन्धेन अन्वयस्याव्युत्पन्नत्वात् राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकृत्य तस्य पुरुषपदार्थे अभेदसम्बन्धेनान्वयो वक्तव्यः। राजसम्बन्ध्यभिन्नः पुरुष इति बोधः।

अर्धं पिप्पल्याः अर्धपिप्पली इत्यादितत्पुरुषे तु उत्तरपदस्य पिप्पलीसम्बन्धिनि लक्षणा। तस्याभेदेन पूर्वपदार्थेऽन्वयः। पिप्पलीसम्बन्ध्यभिन्नमर्धमिति पूर्वपदार्थ-प्रधान्येन बोधः।

दिनकर्यां मतान्तरम्

परे तु राजपुरुष इत्यादितत्पुरुषे न लक्षणा। राजपदार्थस्य स्वत्वसम्बन्धेन पुरुषेऽन्वयसम्भवात्। न चैवं सति राजा पुरुष इत्यत्रापि तथान्वयः स्यादिति वाच्यम्। पुरुषविशेष्यकस्वत्वसंसर्गकराजप्रकारकबोधं प्रति राजपदाव्यवहितोत्तरपुरुष-पदत्वरूपानुपूर्वीज्ञानस्य कारणत्वस्वीकारेणादोषात्। अपि च राजपदस्य राज-सम्बन्धिनि लक्षणायाः स्वीकारे "दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः" इत्यत्र तत्पदेन राज्ञः परामर्शो न स्यात्। राज्ञः राजपदलक्ष्यराजसम्बन्ध्येकदेशत्वात्। तत्पदेन पूर्ववाक्यस्थपदार्थस्यैव परामर्शः न तु तदेकदेशस्येति नियमात्। अन्यथा अत्र शुक्लो घटोऽस्ति, स न द्रव्यमिति स्वारसिकप्रयोगापत्तेः।

द्वन्द्वसमासः

इतरेतरद्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ द्विवचनस्य द्वित्वमर्थः। तस्य प्रकृत्यर्थे धवे खदिरे चान्वयः। तयोः द्वितीयार्थकर्मत्वे, तस्य धात्वर्थे छेदने चान्वयः। द्वित्वाश्रयधवखदिरकर्मकच्छेदनानुकूलकृतिमानयमिति बोधः।

अत्र मीमांसकाः — धवखदिरावित्यत्र धवत्वं खदिरत्वं च न द्विवचनार्थ-द्वित्वोद्देश्यतावच्छेदकम्। सुपाम् उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वव्युत्पत्त्या धवद्वयस्य खदिरद्वयस्य वा बोधापत्तेः। घटाकाशद्वित्वमादाय आकाशाविति वाक्यप्रामाण्यवारणाय उक्तव्युत्पत्तेरावश्यकत्वात्। किं तु खदिरपदस्य धवखदिर-साहित्याश्रये लक्षणा उपगम्यते। एवं च उद्देश्यतावच्छेदकीभूततादृशसाहित्यव्याप्यत्वं न धवद्वयवृत्तिद्वित्वस्य, न वा खदिरद्वयवृत्तिद्वित्वस्य। अपि तु धवखदिरोभय-वृत्तिद्वित्वस्येति न धवद्वयादेर्बोध इत्याहुः।

तन्न। साहित्यं नाम किमेकदेशवृत्तित्वम् एककालवृत्तित्वम् एकक्रियान्वयित्वं वा। नाद्यः, एकदेशवृत्तित्वाभावेऽपि गोत्वाश्वत्वे जाती इति द्वन्द्वदर्शनात्। न द्वितीयः, एककालवृत्तित्वाभावेऽपि गङ्गेशगदाधरौ तार्किकौ इति द्वन्द्वदर्शनात्। न तृतीयः। एकक्रियान्वयाभावेऽपि यथाक्रमं धवे छेदनस्य खदिरे दर्शनस्य चान्वयतात्पर्येण धवखदिरौ छिन्धि पश्येति द्वन्द्वदर्शनात्। किं च चैत्रमैत्रो गच्छत इत्यादौ यदि मैत्रादिपदस्य साहित्यविशिष्टे लक्षणा तदा साहित्यस्य व्यासज्यवृत्तितया तदवच्छेदेन अव्यासज्यवृत्तेः गमनकर्तृत्वस्यान्वयासम्भवः।

तस्मात् साहित्यादिकं नार्थः। किं तु वास्तवो भेदो यत्र तत्र द्वन्द्वः। किं च राजपुरोहितौ सायुज्यकामौ यजेयाताम् इत्यत्र राज्ञः पुरोहितौ इति तत्पुरषो वा राजा च पुरोहितश्चेति द्वन्द्वो वेति संशये तत्पुरुषे पूर्वपदस्य लक्षणा स्यादिति द्वन्द्व आश्रितः। यदि द्वन्द्वेऽपि लक्षणा स्यात् तदा तत्पुरुषपरित्यागे मानाभावः।

अत्रेदं तत्त्वम्। "चार्थे द्वन्द्वः"[८६] इत्यनुशासनम्। तत्र चार्थाः चत्वारः। समुच्चयान्वाचयेतरेतरयोगसमाहारभेदात्। तत्र समुच्चयान्वाचययोः सामर्थ्याभावान्न समासः। तथा हि घटं पटं चानयेत्यत्र चार्थः समुच्चयः। तत्र घटपटयोः समासाघटकानयनक्रियान्वयित्वेन सापेक्षत्वान्न समासः। सापेक्षमसमर्थं भवतीति भाष्यात्। एवं भिक्षामट गां चानयेत्यत्र चार्थोऽन्वाचयः। अत्रापि भिक्षागवोः समासाघटकक्रियासापेक्षत्वेनासामर्थ्यादेव न समासः। किं च रामश्च लक्ष्मणश्च रालक्ष्मणौ इतीतरेतरयोगद्वन्द्वे अहिश्च नकुलश्च अहिनकुलमिति समाहारे च चार्थे द्वन्द्वः। यत्र पदार्थयोः भेदः तत्रैव चकारः प्रयुज्यत इति समस्यमानपदार्थयोः वस्तुतः भेदे सति द्वन्द्वो भवति।

ननु यदि समासघटकपदार्थयोर्यत्र भेदस्तत्रैव द्वन्द्वः तदा नीलघटोरभेद इत्यत्र कथं द्वन्द्वः। नीलघटयोः भेदाभावात्। एवं प्रमाणप्रमेयेत्यादिसूत्रे प्रमाणं प्रमेयं चेति कथं द्वन्द्वः। प्रमाणानामपि प्रमेयतया द्वादशविधप्रमेयान्तर्गतमनोबुद्धीन्द्रियाणां प्रमेयतया च प्रमाण- प्रमेययोर्भेदाभावात् इति चेत् — उच्यते। नीलघटयोरभेद इत्यत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा। अभेद इत्यस्य आश्रयाभेद इत्यर्थः। तथा च पदार्थयोः नीलत्वघटत्वयोः भेदात द्वन्द्वः। तथा प्रमाणप्रमेयेत्यादिसूत्रेऽपि प्रमाणत्वादौ प्रमाणादिपदस्य लक्षणा। पदार्थपदस्य पदार्थतावच्छेदके लक्षणेति।

ननु पदार्थतावच्छेदकभेदस्थले द्वन्द्व इति स्वीकारे पदार्थभेदस्थले द्वन्द्वस्य कथं साधुत्वम् इति चेत् — न। घटश्च घटश्च घटावित्यत्र द्वन्द्वोपपत्तये पदार्थभेदस्य द्वन्द्वसाधुतानियामकत्वोपगमात्। न च तत्र "सरूपाणामेकशेषः" इति सूत्रेण पदान्तरस्य लोपाभिधानात् द्वन्द्व एव नास्तीति कृतं पदार्थभेदस्य द्वन्द्वसाधुता-नियामकत्वोपगमेनेति वाच्यम्। सरूपैकशेषस्य द्वन्द्वसमासापवादकत्वेन द्वन्द्वस्य साधुतास्थल एव एकशेषविधेः प्रवर्तनीयतया तत्र पदार्थतावच्छेदकघटत्वस्य भेदाभावेन पदार्थयोः घटव्यक्त्योः भेदादेव द्वन्द्वस्य साधुतामुपपाद्य तदपवादक-सरूपैकशेषविधेः प्रवर्तनीयत्वात्।

---

[८६] पा.सू. २.२.२९

दिनकर्यां मतान्तरम्

दिनकर्यां मतान्तरं केचित्तु इत्यादिना उपन्यस्तम्। तदित्थम् — पदार्थत्वं पदजन्यप्रतीतिविषयत्वम्। तच्च पदार्थपदार्थतावच्छेदकोभयसाधारणम्। तथा च क्वचित् पदार्थभेदात् क्वचित् पदार्थतावच्छेदकभेदात् द्वन्द्वः। नीलघटयोरभेद इत्यादौ पदार्थतावच्छेनीलत्वघटत्वाद्योर्भेदात् द्वन्द्वः। रामलक्ष्मणौ इत्यादौ पदार्थयोः रामलक्षणयोः भेदात् द्वन्द्वः। अस्तु वा पदार्थतावच्छेदकभेदे एव द्वन्द्वः। न चैवं घटा इत्यादौ पदार्थतावच्छेदकभेदाभावात् द्वन्द्वस्य अप्रसक्त्या तदपवादक सरूपैकशेषो न स्यादिति वाच्यम्। इष्टापत्तेः। तत्र घटपदोपस्थापितेषु बहुत्वान्वयादेव बहुघट-बोधसम्भवात्। न च सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति व्युत्पत्त्या एकवारो-च्चरितपदात् एकस्यैवार्थस्य बोधेन घटपदादेकदा नानाघटबोधासम्भव इति वाच्यम्।

तादृशव्युत्पत्तौ प्रमाणाभावात्। न चैवं सरूपाणामिति सूत्रवैयर्थ्यम्। एकघटपदेनैव नानाघटोपस्थितिसम्भवेन पदान्तरं कल्पयित्वा तल्लोपविधानस्यानुचितत्वादिति वाच्यम्। सरूपैकशेषविधेः हरी इत्यादौ सार्थकत्वात्। हरिपदे सूर्यत्वसिंहत्वादिपदार्थताव-च्छेदकानां भेदेन द्वन्द्वप्रसक्त्या तदपवादकसरूपैकशेषविधेः सार्थकत्वादिति यावत्।

ननु सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति व्युत्पत्त्यनभ्युपगमे सैन्धव-पदादेकदैव लवणाश्वयोर्बोधापत्तिः। न च तात्पर्यज्ञानस्य नियामकत्वान्नानुपपत्तिरिति वाच्यम्। तात्पर्यसत्त्वेऽप्येकदा लवणाश्वयोर्बोधाननुभवात् इति चेत् — अस्तु तर्हि सा व्युत्पत्तिः। परं तु तस्याः अयमर्थः — सकृदर्थमित्यत्र अर्थशब्दार्थो वृत्त्या पदबोध्यः। तदेकदेशवृत्तौ सकृच्छब्दार्थस्य एकत्वस्यान्वयः। तथा च सकृदुच्चरितः शब्दः एकया वृत्त्या स्वबोध्यमर्थं बोधयतीति। ततश्च घटा इत्यतः घटत्वावच्छिन्नैकशक्त्या नानाघटबोधोपपत्तिः। यदि तु हरयस्तिष्ठन्तीत्यादौ तात्पर्यसत्त्वे सिंहसूर्यादीनामपि एकदा बोध इति विभाव्यते तदा नानावृत्त्यापि नानार्थानामेकदा बोधनिर्वाहाय सकृदित्येतत् बोधविशेषणमेव। तथा च एकपदज्ञानात् एक एव शाब्दबोधो न तु क्रमिकशाब्दबोधद्वयमित्येव उक्तव्युत्पत्तिपर्यवसितार्थः इति।

परं त्विदं मतं न व्याकरणशास्त्रसम्मतम्। घटा इत्यादेरप्येकशेषोदाहरणत्वेन तच्छास्त्रे प्रतिपादितत्वात्।

समाहारद्वन्द्वः

अहिनकुलमित्यादौ उत्तरपदस्य अहिनकुलसमाहारे लक्षणा। पूर्वपदं तात्पर्य-ग्राहकम्। न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयः क्रियायाम्। अपेक्षा-बुद्धिविशेषरूपस्य तस्य वादनासम्भवात्। वादनं हि अभिघाताख्यसंयोगानुकूलक्रिया।

तत्र धात्वर्थतावच्छेदकस्याभिघाताख्यसंयोगस्य समाहारेऽसम्भवेन धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वासम्भवादिति वाच्यम्। स्वाश्रयघटितत्वरूपपरम्परासम्बन्धेन वादनकर्मत्वस्य समाहारेऽन्वयसम्भवात्। एवं पञ्चपूलीत्यादावपि उत्तरपदस्य समाहारे लक्षणा।

परे तु अहिनकुलमित्यत्र अहिर्नकुलश्च बुध्यते, न तु समाहारोऽपि। न च समाहारो यदि न बुध्यते तदा एकवचनार्थस्यैकत्वस्य कुत्रान्वयः, समाह्रियमाणयोरेकत्वाभावादिति वाच्यम्। प्रत्येकमेकत्वान्वयात्। तत्रैकवचनस्य साधुत्वार्थत्वाद्वा। न च पाणिपादमित्यादेः समाहारबोधकत्वाभावे कथं समाहारद्वन्द्वसंज्ञेति वाच्यम्। यत्रैकत्वं नपुंसकत्वं च "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्"[८७] इत्यादिसूत्रेणोक्तं तत्रैव समाहारसंज्ञायाः प्रवृत्तेः। तस्याः संज्ञायाः प्रयोजनं तु समाहारातिरिक्तद्वन्द्वे एकवचनस्यासाधुत्वम्। नित्यैकवचननपुंसकलिङ्गादिपदसंस्कारार्था संज्ञा, न तु समुदायबोधनार्थेत्याहुः।

एकशेषः

माता च पिता च पितरौ श्वश्रूश्च श्वशुरश्च श्वशुरावित्यादौ "पिता मात्रा"[८८] "श्वशुरः श्वश्र्वा"[८९] इति सूत्राभ्यां विरूपयोरेकशेषः विधीयते। तत्र पितृपदस्य जनकदम्पत्योः लक्षणा। श्वशुरपदस्य स्त्रीजनकदम्पत्योर्लक्षणा। एकस्य पितृद्वयासम्भवेन तत्र विरूपैकशेषं विना गत्यभावात्।

केचित्तु विरूपैकशेषेऽपि लुप्तमात्रादिशब्दस्मरणेनैव शाब्दबोधान्न लक्षणेत्याहुः। लुप्तशब्दस्मरणं विनापि शाब्दबोधानुभवान्न तन्मतं युक्तम्।

एवं "पुमांस्त्रिया"[९०] इति सूत्रेण यत्र एकशेषः तत्र दम्पतिपूजाप्रकरणे ब्राह्मणावानयेत्यादौ, शिवौ नमस्कुर्यादित्यादौ, स्त्रीपुरुषयोः लक्षणा।

भ्राता च स्वसा च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ इत्यत्र "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्"[९१] इति सूत्रेण एकशेषः। तत्र प्रमाणन्तरेण भ्रातृपदस्य भ्रातृभगिन्युभयतात्पर्यकत्वज्ञाने पुत्रपदस्य पुत्रपुत्र्युभयतात्पर्यकत्वज्ञाने एकशेषः भवति। तदा भ्रातृपदस्य भ्रातृस्वस्रोः, पुत्रपदस्य पुत्रदुहित्रोर्लक्षणा।

---

[८७] पा.सू. २.४.२
[८८] पा.सू. १.२.७०
[८९] पा.सू. १.२.७१
[९०] पा.सू. १.२.६७
[९१] पा.सू. १.२.६८

घटा इत्यादिसरूपैकशेषस्थले तु न लक्षणा। बहुत्वान्वययोग्यानेकघटोपस्थितेः शक्तित एव सम्भवात्।

कर्मधारयः

कर्मधारये तु नीलोत्पलमित्यादौ अभेदसम्बन्धेन नीलपदार्थः उत्पलपदार्थे विशेषणम्। तत्र न कस्यापि पदस्य लक्षणा। कर्मधारये लक्षणाविरहादेव निषादस्थपतिं याजयेत् इत्यत्र निषादश्चासौ स्थपतिश्चेति कर्मधारयः, न तु निषादस्य स्थपतिरिति तत्पुरुषः। तत्पुरुषे पूर्वपदस्य निषादसम्बन्धिनि लक्षणापत्तेः। ननु निषादस्य संकरजातिविशेषस्य वेदाध्ययनेऽधिकाराभावात् अध्ययनविधिसिद्धज्ञानाभावात् यागे नाधिकारः। अर्थी समर्थो विद्वान् इत्यादिना यागोपयुक्तद्रव्यवतः (प्रयोजनकामस्य) शक्तिमतः ज्ञानवतश्च यागेऽधिकारित्वोक्तेः ज्ञानस्य च "स्वाध्यायोऽध्येतव्यः" इति श्रुत्या प्रयोजनवदर्थप्रतीतिजनकस्वाध्यायाध्ययनविधानात् वेदाध्ययनेनैव सम्पादनीयत्वात् निषादस्य अध्ययनाभावात् वेदाध्ययनजन्यज्ञानाभावेन यजनासम्भवः, तदभावे याजनस्याप्यसम्भवः इति चेत् — न। श्रुतिबोधितयाजनानुपपत्त्यैव वेदाधिकारस्य कल्पनात्। ततश्च यागोपयुक्तवेदभागाध्ययनमात्रं कल्प्यते। अध्ययननिषेधस्तु निषादस्य यागोपयुक्तवेदभागेतरवेदभागाध्ययननिषेधपरः। एतावत्कल्पनमपि लक्षणाभयात् सोढव्यम्।

अव्ययीभावः

उपकुम्भमित्यादावव्ययीभावसमासे उत्तरपदस्य कुम्भसम्बन्धिनि लक्षणा। तस्याभेदसम्बन्धेन पूर्वपदार्थे समीपेऽन्वयः। कुम्भसम्बन्ध्यभिन्नं समीपमिति बोधः। न चैवं सति उपकुम्भात् आगत इत्यत्र विभक्त्यर्थापादानत्वादौ समीपादेरन्वयो न स्यात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्, उपपदस्य विभक्त्यप्रकृतित्वात् उपपदोत्तरकुम्भपदस्यैव विभक्तिप्रकृतित्वादिति वाच्यम्। पदभेदेन व्युत्पत्तिभेदस्वीकारात्। पूर्वपदार्थप्रधानसमासस्थले तादृशसमस्तपदविभक्त्योः अव्यवहितपूर्वापरभावस्यैव तादृशशाब्दबोधनियामकत्वस्वीकारेण प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेरुक्तस्थले संकोचस्योपगमादिति भावः।

केचित्तु — उपकुम्भमित्यत्र कुम्भपदस्यैव कुम्भसमीपे लक्षणा। उपपदं तात्पर्यग्राहकम्। एवं च प्रत्ययानामिति व्युत्पत्तेरपि न संकोचकल्पनमित्याहुः।

तच्चिन्त्यम्। सम्भवति सार्थकत्वे किंचित्पदस्य निरर्थकत्वकल्पनस्यायुक्तत्वात् इत्यन्ये।

एवं च तत्र तत्र समासेषु समासघटकपदानां शक्त्या लक्षणया वा परस्परोपस्थापितानामर्थानामन्वयबोधोपपत्तौ समासे न क्वापि विशिष्टशक्तिरूप एकार्थीभावः वैयाकरणसम्मतः स्वीकरणीय इति सिद्धम्।

इति समासार्थविचारः

तद्धितार्थविचारः

तद्धितार्थः (व्युत्पत्तिवादे)

तद्धितप्रत्ययाः नामप्रकृतिकाः क्वचित् प्रकृत्यर्थेन स्वार्थैकदेशस्य, क्वचिच्च प्रकृत्यर्थेन स्वार्थस्य अन्वयबोधं जनयन्ति। यथा गर्गस्यापत्यं गार्गिः, इत्यत्र गर्गशब्दात् "अत इञ्" इति सूत्रेण[१] इञ् अपत्यार्थे भवति। अपत्यमित्यस्य जन्यत्ववा- नित्यर्थः। तदेकदेशे जन्यत्वे निरूपितत्वसम्बन्धेन प्रकृत्यर्थस्य गर्गस्यान्वयः। गर्गनिरूपितजन्यत्ववानिति बोधः। गार्ग्य इत्यत्र "गर्गादिभ्यो यञ्"[२] इति सूत्रेण गोत्रापत्यार्थे गर्गशब्दात् यञ्। गोत्रापत्यमित्यस्य स्वपुत्रनिरूपितसाक्षात्परम्परा-साधारणजन्यत्ववानित्यर्थः। "अपत्यं पौत्रप्रभृति गोत्रम्"[३] इति सूत्रम्। पुत्रशब्दार्थः जन्यत्ववान्। तदेकदेशजन्यत्वे निरूपितत्वसम्बन्धेन गर्गस्यान्वयः। तथा च गर्गनिरूपितजन्यत्वाश्रयनिरूपितसाक्षात्परंपरासाधारणजन्यत्ववान् इति गार्गीत्यतो बोधः। गार्ग्यस्य युवापत्यं गार्ग्यायण इत्यत्र गार्ग्यशब्दात् "यञिञोश्च"[४] इति सूत्रेण फक्। प्रत्ययस्य युवापत्यमित्यर्थः। पित्रादिजीवनकालिकं स्वपुत्रनिरूपित-साक्षात्परंपरासाधारणजन्यत्ववत् युवापत्यमित्युच्यते। "जीवति तु वंश्ये युवा"[५] इति सूत्रात्।

तदेकदेशे जन्यत्वे प्रकृत्यर्थस्य गार्ग्यस्य निरूपितत्वसम्बन्धेनान्वयः। तथा जीवने गर्गस्य चान्वयः। तथा च गर्गादिजीवनकालिकः गर्गगोत्रापत्यस्यापत्यमयमिति बोधः।

माञ्जिष्ठम् इत्यत्र तेन रक्तमित्यर्थे "तेन रक्तं रागात्"[६] इति सूत्रेण अण्। तत्सम्बन्धाधीनतदीयरूपारोपविषयत्वं तेन रक्तत्वम्। तदेकदेशे सम्बन्धे प्रकृत्यर्थस्य मञ्जिष्ठस्य प्रतियोगितासम्बन्धेनान्वयः। रूपे चाश्रयतासम्बन्धे-नान्वयः। मञ्जिष्ठप्रतियोगिकसम्बन्धाधीनः यः मञ्जिष्ठवृत्तिरूपप्रकारकः आरोपः तद्विशेष्यः वासः (वस्त्रम्) इति बोधः। शङ्खः पीत इत्यारोपमादाय शङ्खादेरारोप्य-

---

[१] पा.सू. ४.१.९५
[२] पा.सू. ४.१.१०५
[३] पा.सू. ४.१.१६२
[४] पा.सू. ४.१.१०१
[५] पा.सू. ४.१.१६३
[६] पा.सू. ४.२.१

पीतिमाश्रयहरितालरक्तत्वस्य वारणाय अधीनान्तमारोपे विशेषणम्। पटादेश्चक्षुषा रक्तत्वस्य वारणाय तदीयत्वं रूपविशेषणम्।

शूल्यम् उरव्यम् — शूले संस्कृतं मांसम्। उरवा पात्रविशेषः। उरवायां संस्कृतम् उरव्यम्। "शूलोखाद्यत्"[७] इति सूत्रेण संस्कृतम् इत्यर्थे यत्। तद्धितार्थ संस्कृतैकदेशे संस्कारे पाकादिरूपे प्रकृत्यर्थस्य शूलोखादेः अधिकरणत्वेनान्वयः। शूलाधिकरणकसंस्कारकर्म मांसम्, उरवाधिकरणकसंस्कारकर्म इति च बोधः।

पौषी रात्रिः — पुष्यनक्षत्रयुक्तरात्रिरित्यर्थः। पुष्यशब्दात् "नक्षत्रेण युक्तः कालः"[८] इति सूत्रेण अणि, अण्णन्तात् ङीपि च पौषी इति भवति। कालस्य नक्षत्रयुक्तत्वं च तन्नक्षत्रशशिभोगाश्रयत्वम्। तदेकदेशे भोगे कर्मतया तन्नक्षत्रान्वयः। पुष्यनक्षत्रकर्मकः शशिकर्तृको यो भोगः तदाश्रयः रात्रिः इति बोधः।

वैष्णवी ऋक् ऐन्द्रं हविः — विष्णुर्देवता अस्याः वैष्णवी। इन्द्रो देवता अस्य ऐन्द्रम्। "सास्य देवता"[९] इत्यण्। अण्-प्रत्ययस्य तद्देवताकत्वमर्थः। ऋङ्मन्त्रस्य विष्णुदेवताकत्वं च विष्णूद्देश्यकत्यागकरणत्वेन वेदबोधितत्वम्। तदेकदेशदेवतायामभेदेन प्रकृत्यर्थस्य विष्णोरन्वयः। विष्णवभिन्नदेवतोद्देश्यकत्यागकरणत्वप्रकारकबोधविशेष्यभूता ऋक् इति बोधः। हविषः तद्देवताकत्वं च तदुद्देश्यकत्यागकर्मत्वम्। इन्द्राभिन्नदेवतोद्देश्यकत्यागकर्म हविरिति बोधः।

कापोतं राजतं जनतेत्यादौ समूहार्थविहितस्य तद्धितस्य पर्याप्तसमुदायत्वावच्छिन्नोऽर्थः। पर्याप्तौ प्रकृत्यर्थकपोतत्वाद्यवच्छिन्नस्यान्वयः। कपोतत्वावच्छिन्नपर्याप्तमुदायत्वाश्रय इति बोधः।

तद्धितवृत्तिनिरूपणं लघुमञ्जूषायाम्[१०]

उपगोरपत्यम् औपगव इत्यादौ 'तस्यापत्यम्'[११] इत्येवंजातीयकैः सूत्रैः विहितानां प्रत्ययानामपत्यादिरर्थः। षष्ठ्याद्यर्थश्च समुदायगम्यः। उपगुसंबन्ध्यपत्यमित्यादिरीत्या बोधः।

---

[७] पा.सू. ४.२.१७
[८] पा.सू. ४.२.३
[९] पा.सू. ४.२.२४
[१०] पृ. १५१७
[११] पा.सू. ४.१.९२

अत्रापि सुन्दरस्योपगोरपत्यम् उपगोर्देवदत्तस्य चापत्यमितिवत् सुन्दरस्यौपगवः औपगवो देवदत्तस्य चेत्यादिवारणाय एकार्थीभाव आवश्यकः। सुबन्तात् तद्धितोत्पत्तेः पदविधित्वात्।

न च तद्धिते एकार्थीभावाङ्गीकारे पर्वतो वह्निमान् धूमात् इत्यादौ धूमादित्यस्य वह्नावनन्वयापत्तिः। तस्य विशिष्टार्थैकदेशत्वात् इति वाच्यम्। विशष्टपर्वत एव धूमात् इत्यस्यान्वयात्। ज्ञानगतस्य हेतुहेतुमद्भावस्य विषये आरोपात् हेतावत्र पञ्चमी। विशिष्टे पञ्चम्यन्तान्वयादेव न्यायसूत्रभाष्यवार्तिककारैः 'प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः' इत्युक्तम्।

अत्र केचित् — 'सास्य देवता'[१२] इत्यस्योदाहरणे आग्नेयः इत्यादौ देवताविशिष्टं देयं प्रत्ययार्थः। प्रकृत्यर्थः प्रत्ययार्थैकदेशे देवतायामभेदेन विशेषणम्। यद्वा प्रदेययोः भिन्नैव प्रत्ययस्य शक्तिः।अग्न्यभिन्नदेवतासंबन्धीति बोधः। प्रदेयं च संबन्धित्वेनैव प्रत्ययार्थः। प्रदेय इति मन्त्रस्यापि उपलक्षणम्। आमिक्षादिपदैश्च संबन्धित्वेन बुद्धस्यैव प्रदेयस्य विशेषसमर्पणं क्रियते। इन्द्रादिपदैः देवतायाः लाभेपि देवतात्वेनालाभात् तेन रूपेण लाभाय देवतायां शक्तिः इत्याहुः।

अन्ये तु — चतुर्थ्यादौ प्रकृत्यर्थस्य प्रकृत्यैव लब्धस्य चतुर्थ्या उद्देश्यत्वमात्रं यथोच्यते, तथा अत्रापि देवतात्वं प्रदेयं च प्रत्ययार्थः। तत्र प्रदेये देवतात्वस्य निरूपकतासम्बन्धेनान्वयः। प्रकृत्यर्थस्य अग्नेः आधेयतासम्बन्धेन देवतात्वेऽन्वयः। अग्निवृत्तिदेवतात्वनिरूपकम् इति बोधः।

नन्वेवम् —

> तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
> देवतासंगतिस्तत्र दुर्बलं तु परं परम्।।

इति मीमांसकोक्तं दौर्बल्यं कथमिति चेत् इत्थम्। चतुर्थ्या वाक्यात् देवतात्वसम्बन्धलाभः। तद्धिते समानपदाभिधानश्रुत्येति श्रुतिवाक्यबलाधीनं तत्। देवतात्वस्य संबन्धिद्वयसापेक्षत्वेन चतुर्थ्यां द्वितीयसम्बन्धिनः पृथक्पदोपात्तत्वेन वाक्यात्तल्लाभः। प्रकृते तु तद्धिते सम्बन्धिद्वयस्याप्येकपदोपस्थाप्यत्वात् श्रुत्या देवतात्वलाभः। यद्वा प्रदेयमेव तद्धितप्रत्ययार्थः। स्ववृत्तिदेवतात्वनिरूपकत्व-सम्बन्धेन प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वय इत्याहुः।

---

[१२] पा.सू. ४.२.२४

देवतात्वं च दिवेः ऐश्वर्यकर्मणः देवतेति "देवात्तल्" [१३] इति सूत्र-भाष्यात् मन्त्रकरणको यो हविस्त्यागः तज्जन्यस्वर्गातिरिक्तफलाश्रयत्वेन तदुद्देश्यत्वं मन्त्रस्तुत्यत्वं च। अत एव ऐन्द्रं हविः, ऐन्द्रो मन्त्र इत्यादि सिद्धम्। देवतानिष्टं फलं च अस्येदं फलं भवतु इतीच्छारूपा प्रीतिरेव। "कोऽदात् कामः कामायादात्" इत्यादिमन्त्रप्रयोज्यस्वामित्वभागिनि प्रतिग्रहीतरि अतिप्रसङ्ग-वारणाय मन्त्रकरणकेति हविस्त्यागविशेषणम्। स्वर्गाश्रयत्वेनोद्देश्ये यागकर्तरि अतिप्रसङ्गवारणाय स्वर्गातिरिक्तेति। "न योषिद्भ्यः पृथक् दद्यात्" इत्यादितः श्राद्धे मृतपत्नीनां मृतानां हविस्सम्बन्धात् तद्वारणाय उद्देश्यत्वमिति। शूद्रकर्तृक-श्राद्धादावपि नमस्कारो मन्त्रोऽस्त्येव। "अनुमतोऽस्य नमस्कारो मन्त्रः" इति गौतमस्मृतेः।

न च देवताया अपि यागाङ्गत्वम् आग्नेय इत्यादितद्धितादिभिर्बोध्यते। अनुष्ठेयमुपकारकं हि अङ्गं भवति। न च देवता यागमध्ये स्वरूपेणानुष्ठातुं शक्या। नापि ऋत्विजामिव तासामुपकारकत्वमिति वाच्यम्। तद्वाचकशब्दोच्चारणस्यैव अनुष्ठेयत्वात्। वाचकशब्दद्वारैव तासामुपकारकत्वात्। शब्दश्चोपस्थित्वादग्न्यादिरेव। तदुक्तं शबरस्वामिभिः — "शब्द एव हविषा सम्बध्यते। तत्सम्बन्धादर्थो देवता भविष्यति" इति। अग्न्यादिशब्दयुक्तयागेनेष्टं भावयेदिति विधिवाक्यार्थः। आवाहनमन्त्रैश्चानेकयागेषु सन्निधानं अयं यागो मदर्थ इति बुद्धिविशेष एवेति न शालादिभङ्गः। तस्याः स्वल्पत्वात् देवतास्वरूपस्य महत्त्वादिति शङ्कनीयम्। नाप्यनेकेषु सन्निधानानुपपत्तिः। यौगिवत् भूतानां तद्वश्यत्वेन इच्छया भूतान्यधिष्ठाय अनेकैः सूक्ष्मतरैः शरीरैः तत्र सन्निधाने बाधकाभावाच्च। अन्तर्धानशक्तियोगाच्च परैः अदर्शनम्। मन्त्रोक्तशब्दशरीरोभयावच्छिन्नेश्वरचैतन्यस्यैव देवतात्वे तु नानुप-पत्तिलेशोऽपि।

लघुमञ्जूषायाम् एवं "तदस्यां प्रहरणम्" [१४] इति क्रीडायां णः। "सोऽस्य निवासः" [१५] "सास्मिन् पौर्णमासी" [१६] इत्येवं जातीयकेषु सास्य देवतेत्युदाहरण इव बोधः। तथाहि — "तेन दीव्यति खनति जयति जितम्" [१७] इत्यनेन अक्षैर्दीव्यति आक्षिक इत्यत्र इकप्रत्ययः। अत्र तद्धितेन भासमानमपि देवनं न कारकान्वय-योग्यक्रियारूपम्।

---

[१३] पा.सू. ५.४.२७
[१४] पा.सू. ४.२.५७
[१५] पा.सू. ४.३.८९
[१६] पा.सू. ४.२.२१
[१७] पा.सू. ४.४.४२

"तेन तुल्यं क्रिया चेद्वतिः"[१८] उपमेयस्य क्रियात्वे उपमानवाचकात् तृतीयान्तात् तुल्यमित्यर्थे वतिरित्यर्थः। नन्वेवं ब्राह्मणवदधीते इत्यादौ न स्यात् ब्राह्मणसादृश्यस्य अध्ययनेऽभावादिति चेन्न। ब्राह्मणादिशब्दानां तत्कर्तृकाध्ययने लाक्षणिकत्वात्। सौष्ठवादिश्च साधारणो धर्मः। न च ब्राह्मणपदलक्ष्यस्य अध्ययनस्य विभक्त्यर्थान्वयित्वेन सत्त्वरूपतया न क्रियात्वमिति वाच्यम्। तुल्यस्य क्रियात्वे तृतीयासमर्थात् वतिः इत्यनेन तृतीयासमर्थस्य सामर्थ्यात् क्रियोपमानत्वयोग्यार्थकत्वलाभेऽपि क्रियात्वलाभे मानाभावात्।

स्थातव्येन तुल्यं गच्छतीत्यादावपि तृतीयार्थान्वयेन तस्य सत्त्वरूपतैव न मुख्यं क्रियात्वम्। तिङन्तार्थस्य तु नोपमानत्वम्। "न वै तिङन्तेनोपमास्ति" इति सन्सूत्रस्थभाष्यात्। एवं चास्य क्रियान्वय एव साधुत्वम्।

अरविन्दवत् सुन्दरं मुखम् इत्यादौ भवतिक्रियाध्याहारः। अरविन्दपदेन सुन्दरारविन्दभवनं लक्ष्यते। सुन्दरारविन्दभवनसदृशं सुन्दरमुखभवनमिति बोधः। अरविन्दमुखयोः सौन्दर्यधर्मकसादृश्यं तु व्यञ्जनया बुध्यते। अत एव क्रियान्वये साधुत्वादेव ब्राह्मणेन तुल्यमस्य रूपमित्यादौ न वतिः।

"तत्र तस्येव"[१९] इति सूत्रं द्रव्यगुणादितुल्यार्थम्।

मथुरावत् पाटलीपुत्रे प्राकारः। मथुरायामिवेत्यर्थः। मथुरावत् पाटलिपुत्रस्य विस्तारः। मथुराया इवेत्यर्थः। किं चेवार्थस्योपमानविशेषणतया तुल्यपदार्थस्य तद्विशेष्यतया, बोधे भेदः। अत्र प्राकारयोरुपमानोपमेयभावः। वृत्तौ मथुरादिपदानां तदधिकरणकतत्सम्बन्धिप्राकाराद्यन्तर्भावेण वृत्तिरिति केचित्।

परे तु षष्ठ्यर्थसप्तम्यन्तात् षष्ठ्यन्ताच्चायं साधुः। अधिकरणसप्तम्यन्तात्तु नायम्। असामर्थ्यात्। अत एव "तत्र तस्येव"[२०] इति सूत्रस्थतत्रग्रहणस्य इवशब्दयोगे षष्ठ्यर्थे सप्तमीज्ञापकता उक्ता भाष्ये। देवेष्विव मनुष्येषु नामेत्युदाहृतं च। तत्रैव देववन्यनुष्येषु नामेति साधु। उपमानदेवसम्बन्धिनामाभिन्न मनुष्यसम्बन्धि नामेति बोधः। मथुरावत् पाटलिपुत्रे प्राकार इत्यत्र उपमानमथुरासम्बन्धिप्राकाराभिन्नः पाटलिपुत्रसम्बन्धी प्राकार इत्येवं बोधे साधुत्वम्। अस्मादेव ज्ञापकात् इवयोगे उपमानविशेषणात् उपमेयविशेषणाच्च षष्ठ्यर्थे सप्तमी। न चाधिकरणकारकस्य कर्त्रादिद्वारैव क्रियान्वय इति नासामर्थ्यमिति वाच्यम्। एवं हि अस्तीत्यध्याहारस्यावश्यकत्वेन क्रिययोरेव

---

[१८] पा.सू. ५.१.११५
[१९] पा.सू. ५.१.११६
[२०] पा.सू. ५.१.११६

तुल्यत्वेन "तेन तुल्यम्"[२१] इत्यनेनैव सिद्धावस्य सूत्रस्य वैयर्थ्यापत्तेः। अत एव द्रव्यगुणतुल्यार्थोऽयमारम्भ इति भाष्ये ध्वनितम्। कैयटेन च स्पष्टमुक्तम्। इत्याहुः।

मयुरापाटलिपुत्रयोः सादृश्यं तु आर्थम्।

विधिवत् पूज्यत इत्यादौ विधिविषययोग्यताकहरिकर्मकं देवदत्तकर्तृकं पूजनमिति बोधः। विधिशब्देन तदुक्तः प्रकारः। विधिमर्हतीति विग्रहः। "तदर्हम्"[२२] इति सूत्रेण वतिः। "यथावत् विहिताध्वराय" "यथावत् ख्यातवृत्ताय" इत्यादौ यथाशब्दः वृत्ति-विषये शास्त्राद्युक्तप्रकारवाची। शास्त्रोक्तप्रकारकर्मकार्हतावद्विधानकर्मीभूताध्वरं-सम्बन्धिने, इत्युक्तप्रकारकर्मकार्हतावत्ख्यातिकर्तृकवृत्तसम्बन्धिने इत्यादिरीत्या बोधः।

राजवत् वृत्तमस्येत्यादौ राजयोग्यमेतद्वृत्तमिति बोधः। न तु अराजयोग्यमिति तु अर्थात् प्रतीयते। विनीतवदागमनं विच्छेदकृतहस्तवत् इत्यादौ विनीतयोग्यमागमनं कृतहस्तानामिदं योग्यं छेदनमिति बोधः। घटत्वमित्यादौ प्रकृत्यर्थसम्बन्धि प्रवृत्तिनिमित्तं त्वादि वाच्यमिति सिद्धान्तः।

अत्र केचित् — संज्ञाशब्दे केवलं द्रव्यमेव शक्यम्। एवं च तत्र प्रवृत्ति-निमित्तरूपप्रत्ययार्थो दुर्वच इति मन्वानाः — प्रकृतिः लक्षणया शब्दपरा। तत्तद्रूपेण प्रकारः त्वाद्यर्थः। स च प्रवृत्तिनिमित्तरूप एव। जन्यबोधप्रकारत्वं जन्यबोध-विषयसंसर्गत्वं च संसर्गः। एवं च गोत्वमित्यादौ गोशब्दजन्यबोधप्रकारः गोत्व-मित्यर्थः। राजपुरुषत्वमित्यादौ राजपुरुषशब्दजन्यबोधविषयः संसर्ग इति बोधः। शाब्दबोधे शब्दस्य भानमिति मतेऽपि शब्दस्य न प्रवृत्तिनिमित्तत्वमिति गोत्वमित्यादौ न गोशब्दप्रतीतिः।

प्रवृत्तिनिमित्तत्वं च यज्ज्ञानात् शब्दस्यार्थे प्रवृत्तिः तत्त्वमित्युक्तम्। तच्च घटादिषु जातिः, शुक्लादिषु गुणः तद्गतजातिश्च, पाचकादिषु क्रिया तत्सम्बन्धो वा, राजपुरुषः औपगवः इत्यादौ सम्बन्धः।

डित्थादिषु द्रव्यस्यैव विषयताद्वयेन भानात् द्रव्यमेव प्रवृत्तिनिमित्तम्। तस्यैव प्रकारतावैशिष्ट्येन भावप्रत्ययार्थत्वमिति प्रकृतिप्रत्ययार्थयोः भेदः सुवचः। प्रकृतेः शब्दपरत्वात् उक्तसम्बन्धस्य च नानुपपत्तिरिति वदन्ति। सर्वत्र शब्दः शब्दार्थो वा प्रवृत्तिनिमित्तमिति मते तदेव त्वाद्यर्थः।

---

[२१] पा.सू. ५.१.११५

[२२] पा.सू. ५.१.११७

अपरे तु भाष्यमते गुणसमुदायो द्रव्यमिति निरूपितम्। तत्र शब्दशक्तिस्वभावात् क्वचित् जात्यतिरिक्तसमुदायो विशेष्यः। जातिर्विशेषणम्। क्वचित् गुणातिरिक्तो विशेष्यः यथा शुक्लादिपदे, गुणस्तु तत्र विशेषणम्। संज्ञाशब्दे कुशब्दादौ कादिव्यक्तिरेव शक्या कत्वादीन् उपलक्षणीकृत्य। यः शुक्लवासाः स देवदत्त इत्यादाविव शुद्धव्यक्तौ शक्तिग्रहः।

न चैवं कुत्वमित्यादौ त्वाद्यनुपपत्तिः, प्रकृत्यर्थाभावादिति वाच्यम्। तत्र शब्दपरादर्थरूपे भावे प्रत्ययेन अदोषात्। एवं च कुकुत्वशब्दौ पर्यायौ।

अत एव "तस्य भावः"[२३] इति सूत्रस्य अभिप्रायाद्यर्थेष्वपि त्वतलौ स्याता-मित्याशङ्क्य, यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशः तदभिधाने त्वतलावित्युक्त्वा तथापि डित्थादिष्वव्याप्तिः, ततो व्यक्त्यतिरिक्तस्य धर्मस्याभानात् इत्याशङ्क्य, व्यक्तेरेव विषयताद्वयेन प्रकारतया विशेष्यतया च भानात् प्रकारत्वाद्यवच्छिन्नव्यक्तिरेव त्वाद्यर्थः इत्येकं समाधानमुक्त्वा, यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थः तदभिधाने त्वतलौ इत्यनेन समाधानान्तरमुक्तम्। शब्दस्य द्विविधोऽर्थः, वाच्यः प्रवृत्तिनिमित्तभूतश्च। तदन्यतराभिधाने त्वतलाविति तदर्थः। तत्र घटत्वमित्या-दावन्त्यः। तत्र प्रकृतिरर्थपरैव। आद्यः कुत्वं डित्थत्वमित्यादौ। तत्र प्रत्ययार्थानुपपत्त्या प्रकृतिः शब्दपरा। न त्वेतावता सर्वत्र प्रकृतिः शब्दपरा। मानाभावात्, लक्षणायां मानाभावाच्च। "तस्य भावः" इत्यत्र तच्छब्दस्य शब्दमात्रपरत्वे "गुणवचन"[२४] इति सूत्रे शब्दाधिकारापत्तेश्च। तद्धितप्रकरणे सर्वत्र "तस्या-पत्यम्"[२५] इत्यादावर्थपरताया एव सत्त्वाच्च।

एवं च प्रकृतिजन्यबोधे प्रकारः प्रवृत्तिनिमित्तभूतो घटत्वादिः धर्मत्वेन त्वाद्यर्थः। प्रकृत्यर्थो व्यक्तिश्च स्वोतरासम्बन्धित्वावच्छिन्ननिखिलस्वसम्बन्धित्वसम्बन्धेन प्रकारः। तस्य भाव इति सूत्रात्।

एवं घटत्वमित्यादितः घटसम्बन्धी धर्म इत्यादिरीत्या बोधः। घटत्वत्वमित्यादौ घटत्वसम्बन्धी धर्म इति। घटत्वत्वं च अविद्याकल्पितधर्मरूपम्। यद्वा व्यक्तिरेव घटत्वपदजन्यबोधे प्रकार इति सेव घटत्वत्वम्।

यत्तु घटेतरासम्बन्धित्वे सति निखिलघटसम्बन्धित्वमेव घटत्वत्वमित्यादेरर्थ इति, तत्तु अत्यन्तगौरवग्रस्तम्।

---

[२३] पा.सू. ५.१.११९
[२४] पा.सू. ५.१.१२४
[२५] पा.सू. ४.१.९२

रूपादिभ्यो गुणवृत्तिजातौ त्वादयः। शुक्लादिभ्यो गुणिपरेभ्यो गुणे, गुणपरेभ्यो जातौ। अण्वादिभ्यो नित्यं परिमाणवृत्तिभ्यः परिमाणरूपे गुणे त्वादयः। परिमाणं चतुर्धा अणु महत् दीर्घं ह्रस्वं चेति तु अण्वादिवृत्तीत्यर्थकम्।

जातिमात्रपरगवादिशब्देभ्यः शब्दस्वरूपे भावप्रत्ययः। शब्दार्थयोरभेदाध्यासेन तस्यैव प्रवृत्तिनिमित्तत्वादिति कैयटः। शावलेयस्य गौरिति तु न। तथा व्यवहाराभावेन तत्र जातिपरत्वाभावादिति। तथा गौर्नित्येति प्रयोग इष्ट इति तदाशयः।

षत्वं णत्वमित्यादौ वर्णानां वास्तवस्यौपाधिकस्य वा भेदस्य सद्भावात् जातिः सूपपादा। उपाधिरूपमेव वा तत्।

परे तु जातिपरगवादिशब्देभ्यः नैव त्वादिः प्रत्ययः, अनभिधानात्। गोत्वत्वमितिवद्वा ततो बोधः। षत्वमित्यादौ कुत्वशब्दवत् अर्थे एव प्रत्ययः। ष इत्येव तदर्थ इत्याहुः। नानात्वं यौगपद्यमित्यत्रापि नानादिशब्दजन्यबोधप्रकारः सहभावो युगपद्भावश्चार्थः।

पाचकः औपगवः राजपुरुष इत्यादौ क्रियाकारकभावस्य विभक्त्यर्थसम्बन्धस्य च वृत्तौ प्रवेशात् शब्दप्रवृत्तौ तस्यैव निमित्तत्वाच्च तत्रैव त्वादयः। तदुक्तं च हरिणा — "कृत्तद्धितसमासेभ्यः भावप्रत्ययेन सम्बन्धाभिधानम्" इति।

सर्वत्र समासादौ सम्बन्ध एव भावप्रत्ययं वदता हरिणा विभक्त्यर्थस्य सर्वस्यापि षष्ठ्यर्थवत् सम्बन्धतया भानमिति सूचितम्। राजपुरुषादावपि राजादिसम्बन्धज्ञानादेव शब्दस्य प्रवृत्तिः।

इदमपि प्रायिकम् — कृष्णसर्पत्वं पटे शुक्लत्वं सत्ता इत्यादौ जातिगुणप्रकारकबोधस्यैवानुभवात्। तदुक्तम् — "अन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः" इति। तत्र कृष्णसर्पत्वमित्यादौ रूढिः। शुक्लत्वमित्यभिन्नरूपम्। पटः शुक्ल इति व्यवहारात्। सत्तेति तृतीयम्। न हि सत्सत्तयोः सम्बन्धः कदापि व्यभिचरितः।

नीलघटत्वमित्यादौ नीलघटादिवृत्तिधर्मः घटत्वादिकमेव वा त्वाद्यर्थः। तदेव च नीलघटादिशब्दानां प्रवृत्तिनिमित्तम्। नीलादिविशेषणबलाच्च तेन रूपेण नीलादिव्यक्तीनामेव भानेन नीलसमानाधिकरणघटत्वाद्येव प्रवृत्तिनिमित्तत्वेन भासते। उपाधिभेदाच्च घटत्वादीनामपि भेदः। न त्वत्र सम्बन्धो भावप्रत्ययार्थः। अभिन्नरूपत्वेन पूर्वोत्तरपदार्थयोर्विशेष्यविशेषणभावातिरिक्तस्य तस्याभावात्।

एतेन प्रवृत्तिनिमित्तगुणजात्याद्योः सामानाधिकरण्यं तदुत्तरभावप्रत्ययार्थ इत्यपास्तम्।

सामानाधिकरण्यस्य त्वप्रत्ययप्रकृतितो भानाभावात्। भानसत्त्वेऽपि तस्य विशेष्यावृत्तितया प्रवृत्तिनिमित्तत्वाभावेन भावप्रत्ययवाच्यत्वे मानाभावात्।

नीलघटत्वसमुदायः प्रवृत्तिनिमित्तमित्यपि केचित्। घवखदिरत्वमित्यादौ धवत्व-खदिरत्वजातिसमुदायः त्वप्रत्ययवाच्यः। तत्र तस्यानुद्भूतावयवत्वे एकवचनम्। उद्भूतावयवत्वे द्विवचनाद्यपि।

मीमांसकमतम्

ये व्यपेक्षावादिनः दण्डीत्यादौ इनः द्रव्यमात्रवाचित्वम्। प्रकृत्यर्थस्य च तत्रान्वयः। सम्बन्धश्च वाक्यार्थविधया (आकाङ्क्षया) लभ्यः, न तत्र शक्तिः। एवं पाचक इत्यादावपि। प्रकृत्यर्थत्वेन अनुगतीकृतं दण्डादिकमुपलक्षणीकृत्य अनन्तेष्वपि द्रव्येषु शक्तिग्रहसम्भव इति वदन्ति।

तन्मतेऽपि सम्बन्धस्यैवोक्तरीत्या शब्दप्रवृत्तौ निमित्तत्वात् तत्रैव भावप्रत्ययः सुलभः।

सम्बन्धस्य विभक्तिवाच्यत्वात् प्रकारतया भानमिति तु न युक्तम्। सांसर्गिक-विषयतया भासमाने एव सम्बन्धपदप्रयोगात्। वाच्यस्यापि षष्ठ्यादिभिः संसर्गतया भानस्य सर्वसम्मतत्वाच्च।

मतान्तरम्

यत्तु तत्तद्रूपेण धर्माणां शक्यतेति। तन्न। शक्त्यानन्त्यापत्तेः। किं च "तस्यापत्यम्"[२६] इत्यादिशास्त्रात् यथा औपगवादीनाम् उपग्वपत्यत्वेनैव बोधकता न तु तत्तद्रूपेण तथा "तस्य भावः"[२७] इति शास्त्रबलादस्यापि त्वादेः धर्मत्वेनैव बोधकतेत्यस्य उचितत्वात्। अत एव घटवृत्तिर्धर्म इति बोध इत्ययुक्तम्। घटे घटत्व-मित्यादेरनापत्तेश्च। घटवृत्तिः घटवृत्तिर्धर्म इति बोधस्य पुनरुक्तदुष्टत्वात्। इति प्राहुः।

कतिपयतद्धितार्थः

पञ्चमः

पञ्चानां पूरणः पञ्चमः। पञ्चसम्बन्धिपञ्चत्वसंख्यापूरणः इति बोधः। उद्भूता-वयवभेदः समूहः प्रकृत्यर्थः। अवयवः प्रत्ययार्थः। वृक्षस्यावयवो वार्क्षी शाखेतिवत्।

---

[२६] पा.सू. ४.१.९२

[२७] पा.सू. ५.१.११९

तदस्यास्त्यस्मिन्निति मतुप्[२८] वर्तमानकालोऽत्र विवक्षित इति भाष्ये स्पष्टम्। गावः अस्य सन्तीति गोमान्। अत एव गवामतीतत्वे अनागतत्वे वा मतुपो न साधुत्वम्। एवं च गोमानित्यतो वर्तमानसत्ताश्रयगोसम्बन्धीति बोधः।

गोमानासीत् भवितेति तु बाह्यसत्ताविशिष्टगोसम्बन्धरूपायाः गोमदवस्थायाः नाशेन भावित्वेन वा तादृशवस्थाविशिष्टस्य गोमतः अतीतत्वेन भावित्वेन वा नेयम्। यद्वा तादृशावस्थागतातीतत्वादेः गोमत्यारोपः। एवमेव जीवत्येव तस्मिन् ईश्वरोऽयमासीत् शिखी नष्ट इत्यादेरुपपत्तिः।

यत्र तु गवां गोमतश्च अतीतत्वं तत्र यद्यपि गोषु वर्तमानसत्ताश्रयत्वं नास्ति, अतीते सम्बन्धिनि वर्तमानगोसम्बन्धश्च नास्ति; तथापि "ज्योतिष्टोमयाजी अस्य पुत्रो भविता" इत्यादौ यथा यागगतातीतत्वस्य त्यागः भावित्वप्रतीतिश्च भवितेत्ये-तत्समभिव्याहारात्, तथा प्रकृते गोसत्तायां वर्तमानत्वत्यागः अतीतत्वादि-प्रत्ययश्चेत्यदोषः। यद्वा सर्वत्र तथाव्यवहारविषये गोमत्पदस्य लक्षणेति कैयटे स्पष्टम्।

यद्वेति पक्ष एवात्र युक्तः। एवं च सम्बन्ध आश्रयः इत्युभयं समुदायशक्यम्। सम्बन्ध एव प्रवृत्तिनिमित्तम्। यद्वा आश्रयाभेदमापन्नः सम्बन्ध एव शक्यः। न च सम्बन्धस्य शक्यत्वे दण्डसम्बन्धसम्बन्धीति बोधापत्तिरिति वाच्यम्। संसर्गविधयैव तस्य शक्यत्वात्।

ये गुणगुणिनोः समानरूपा एव लोके प्रयुज्यन्ते शुक्लादयः शब्दाः तेभ्यो मतुपो लोप उक्तो वार्तिककृता "गुणवचनेभ्यो मतुपो लुक्" इति। यद्यपि गुणगुणिनोः सोऽयमित्यभेदाध्यवसायेन लुकं विनापि पटः शुक्ल इत्यादेः सिद्धिः, तथापि पटस्य शुक्ल इति भेदव्यवहारस्यापि सत्त्वात् शुक्लवान् इत्येतद्व्यावृत्त्यर्थं लुग्वचनम्। एवं चास्य गुणिनि यौगिकत्वात् सर्वलिङ्गत्वम्। रूढत्वे तु गुणगुणिनोरुभयोरपि सर्वलिङ्गत्वं नियतलिङ्गत्वं वा स्यात्। अयं च लुक् द्रव्यवाचकपदसमभिव्याहार एव पटः शुक्ल इत्यादौ, अथवा प्रकरणादिना द्रव्यावगतौ। "गुणिलिङ्गास्तु तद्वति" इति कोशस्य मतुब्लुका अभेदेन वा तद्वति वर्तमाना इत्यर्थः। जातेस्तु घटादिशब्देभ्यः न कदापि द्रव्यात् भेदेन बोधः। शाबलेयस्य गौरिति प्रयोगाभावादिति न तेभ्यो द्रव्ये मतुप् इति भाष्ये स्पष्टम्।

प्रकारवचने थाल्[२९] प्रकारोऽत्र न सादृश्यम्। अन्यथा सर्वथा इत्यादौ सादृश्य-स्याप्रतीतेः। किं तु सामान्यस्य भेदको विशेषः प्रकारः। बहुभिः प्रकारैः भुङ्क्ते इत्यतः

---

[२८] पा.सू. ५.२.९४

[२९] पा.सू. ५.३.२३

बहुभिर्विशेषैः इत्यर्थप्रतीतेः। यथा हरिस्तथा हर इत्यादौ यद्विशेषधर्मवान् हरिः तद्विशेषधर्मवान् हर इति बोधः। हरिसदृशो हर इति तु फलति। यत्तद्भ्यां तयोः प्रकारयोः ऐक्यावगतौ तादृशैकधर्मेण निमित्तेन मानसस्य सादृश्यबोधस्योपगमात्।

वचनग्रहणाच्चात्र जातीयर्प्रत्ययविधौ "स्थूलादिभ्यः प्रकारवचने कन्"[३०] इत्यत्र च प्रकारवान् प्रत्ययार्थः। थाल्प्रत्ययेन जातीयर्प्रत्ययादेर्बाधस्तु न। तथाजातीयक इत्यादिभाष्यप्रयोगात्। एकधा कुरु इत्यादेः एकप्रकारं कुरु इत्यादिप्रकारेण बोधः। अनेकराशीन् ऐकध्यं कुरु इत्यत्र एकत्वसंख्याविशिष्टं कुरु इति बोधः। सहितं कुरु इति फलति।

वैयाकरणपाशः कुत्सितवैयाकरणत्ववानित्यर्थः। एकदेशान्वयोऽत्र शब्दशक्ति-स्वभावात्। प्रवृत्तिनिमित्तस्य कुत्सायामेवायम्।

अयमेषां शुक्लतम इत्यादौ अतिशायने तमबिष्ठनौ। अतिशायनं प्रकर्षः। स चेतरस्य न्यूनीकरणरूपोऽभिभवः। तत्र वर्तमानात् प्रत्यय इत्यर्थः। तेनाभिभव-कर्तृत्वद्योतको य इतराभिभवकर्ता शुक्ल इत्यादिरीत्या बोधः। यद्यपि द्रव्ये न स्वतः प्रकर्षः तथापि प्रवृत्तिनिमित्तभूतगुणादिगतप्रकर्षेण परम्परया द्रव्यस्यापि प्रकर्षः।

पाचकतरः इत्यादौ प्रवृत्तिनिमित्तसम्बन्धप्रतियोगिक्रियागतप्रकर्षेण प्रकर्षो बोध्यः। अयमेव च द्रव्यप्रकर्ष उच्यते।

गोतरः इत्यादौ प्रवृत्तिनिमित्तभूतजातेः प्रकर्षाभावेऽपि तत्सहचरितवाहदोहादि-गतातिशयमादाय प्रत्ययः। द्व्यादिभ्यस्तु न प्रत्ययः। तदर्थे प्रकर्षाभावात्। बहुशब्दात्तु भवत्येव। संख्याधिक्यकृतातिशयस्य तत्र वक्तुं शक्यत्वात्।

बहूनां मध्ये एकस्यातिशये तमबादिः। द्वयोरेकस्य अतिशयेऽर्थद्वयप्रतिपादकशब्दे उपपदे तरबादिः। यथा अयमनयोः पटुतरः। अस्माकं च देवदत्तस्य च देवदत्तो-ऽभिरूपतरः। बह्वर्थके विभागप्रतियोगिनि उपपदे तरबादिः। उदीच्याः प्राच्येभ्यः पटुतरा इति यथा। सांकाश्यकानां पाटलिपुत्रका अभिरूपतमाः इत्यत्र बहूनामेव प्रतीतेः तमप्। परुत् भवान् पटुरासीत् पटुतरश्च ऐषमः इत्यादौ एकस्यैव द्रव्यस्य गुणभेदेन भेदमारोप्य तरप्। गुणान्तरयोगे अन्यो भवान् संवृत्त इति व्यवहारात्।

क्वचित् प्रकृत्यर्थगतप्रकर्षे तरप्, यथा नतरामित्यादौ। तत्र हि प्रतियोग्य-समानाधिकरणत्वरूपमात्यन्तिकत्वमभावगतः प्रकर्षः। एवमेव घटस्य शुक्लतरं रूपम् इत्याद्युपपत्तिः।

---

[३०] पा.सू. ५.४.३

प्रकृत्यर्थविशेष्यगतप्रकर्षासम्भवे तु प्रवृत्तिनिमित्तादिगतप्रकर्षे तरप्। एवं द्योत्यार्थप्रकर्षे द्योतकात् तरप् नितरां गच्छतीत्यादौ।

कल्पप्

गुडकल्पा द्राक्षा, बहुगुडो द्राक्षा इत्यादौ गुडादिशब्दानां सादृश्यात् द्राक्षायां वृत्तिः। तत्र सादृश्यप्रयोजकस्य माधुर्यादेः ईषदसमाप्तिः गम्यते। तेन ईषत्सादृश्ये न प्रत्ययः। अत्र सर्वत्रोपमा गम्या। गुडगतमाधुर्याश्रयेण द्राक्षायां गुडत्वारोपात् गुडत्वजात्यभावाच्च ईषदसमाप्तं गुडत्वं द्राक्षायामिति गुड इयं द्राक्षा गुडकल्पा द्राक्षेति प्रयोग इत्यन्ये। कुत्सिते कः — पाचकक इत्यादौ "कुत्सिते"[३१] इति कः। कुत्सितपाचकत्ववानित्यर्थः। प्रवृत्तिनिमित्तकुत्सायाः असम्भवे अश्वक इत्यादौ तत्सहचरितधर्मान्तरगतकुत्साश्रयः प्रत्ययः। कुत्सितक इत्यादौ यदा कुत्सितत्वं कुत्स्यते, नास्य सम्यक् कुत्सितत्वं, किं तु शत्रुभिः द्वेषेण आरोपितमिति तदा प्रत्ययः। यद्वा अनिर्धारितविशेषनिबन्धना कुत्सा प्रवृत्तिनिमित्तम्। ब्रह्महत्यादिनिबन्धनायां तस्यां प्रत्ययः। यथा प्रकृष्टतम इति प्रकर्षस्य प्रकर्षे तमप्। यद्वा नियमेन कुत्सासम्बन्धं प्रतिपादयितुं प्रवृत्तिनिमित्तकुत्सायमेव पुनः प्रत्ययः।

किं च शब्दः स्वार्थजात्यादिविषयकाभिधाग्रहविषयो भूत्वा इतरानपेक्ष एव तत्सम्बद्धं द्रव्यमाह। ततः संख्याद्यपेक्षया अन्तरङ्गत्वात् तद्गतं लिङ्गमाह। अत एव तद्बोधकं टाबादि पूर्वं भवति। ततः क्रियापेक्षकारकापेक्षया अन्तरङ्गत्वात् संख्यामाह। ततः कारकमित्येवं कल्पितक्रमेण शास्त्रप्रक्रियानिर्वाहः। एवं च एतत्सकलबोधकविभक्त्यन्तस्यैव प्रियकुत्सितादौ वृत्तिरिति उपस्थितलिङ्गादिगततयापि कुत्सितबोधनं प्रत्ययेन। तत्र स्वार्थकुत्सा यथा पण्डितक इति। द्रव्यकुत्सा यथा शुक्लकं रूपमित्यादौ। लिङ्गकुत्सा यथा "प्राप्य गाण्डीवधन्वानं विद्धि कौरवकान् स्त्रियः" इति। संख्यायाः कुत्सा यथा — पुत्रकः शतम्। शतभरणे यत् दुःखं तदेकस्यैव भरणे इति एकत्वसंख्याकुत्सेति दिक्। अश्व इव अश्वकः। "इवे प्रतिकृतौ"[३२] इति कन्। उपमानाश्वाभिन्न इति बोधः।

काकतालीयम्

काक इव तालमिवेति विग्रहे "समासाच्च तद्विषयात्"[३३] इति छः। तत्प्रामाण्यात् "सुप् सुपा"[३४] इति इवार्थेऽपि समासः। तत्र पूर्वपदमुपमानकाकागमनपरम्।

---

[३१] पा.सू. ५.३.७८
[३२] पा.सू. ५.३.९६
[३३] पा.सू. ५.३.१०६
[३४] पा.सू. २.१.४

उत्तरपदं चोक्तपूर्वपदार्थसमानाधिकरणोपमानतालपतनपरम्। समुदायश्चोपमेयपरः। एवं चोपमानकाकागमनसमानधिकरणोपमानतालपतनाभिन्नं देवदत्तागमनसमानाधिकरणं चोरपतनमिति बोधः। तत्तदुपमेयबोधे तत्तदुपमेयवाचकसमभिव्याहारस्तन्त्रम्। ततस्तद्धिते समासार्थोपमानप्रयोज्योपमानभूततालकृतकाकवधाभिन्नः समासार्थोपमेयप्रयोज्यश्चोरकृतदेवदत्तवध इति बोधः। एतेन परस्परसम्बन्धाभावेन असामर्थ्यात् वृत्तिद्वयमपि दुर्लभमित्यपास्तम्।

यत्तु — काकागमनसदृशसमानाधिकरणकाकागमनसमानाधिकरणतालपतनसदृशप्रयोज्यतालकृतकाकमरणसदृशं देवदत्तमरणमिति बोध इति, तत्तु निपातवादे दूषितम्।

उपमानोपमेयभावश्च अकस्मादुपनतत्वेन उपमेयवाचकतत्तत्पदसमभिव्याहारेण प्रयोज्यतया कदाचित् काकमरणस्य कदाचित्काककृतोपभोगस्य भानम्। उपमानतावच्छेदकरूपेण बोधकाभावाच्च छप्रत्ययोपमायामुपमानलोप इत्यालंकारिकाः।

कृत्वसुच्

पञ्चकृत्वो भुङ्क्ते। पञ्चशब्दः पञ्चत्वसंख्योत्पत्तिकपरः। तस्य च क्रियायामन्वयः। "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्"[३५] इति सूत्रात्। तत्र अभ्यावृत्तिः पुनः पुनर्जननम्। पञ्चसंख्योत्पत्तिका भुजिक्रियेति बोधः। पञ्चवारमुत्पद्यमाना भोजनक्रियेति यावत्। प्रत्ययस्तु स्वार्थे। कर्तृबहुत्वे तु पञ्चकृत्वो भुञ्जत इति बहुवचनम्। त्रिरावृत्ता दशेत्यादौ आवृत्तिक्रियाजन्मगणन एव सुच्। यत्र क्रिया न श्रूयते तत्र भवतिक्रियाध्याहारः। पञ्चकृत्वः पाचकः, पक्वः इत्यादिकम् इष्टमेव।

लकृत्यक्तखलर्थानां तथाव्ययकृतामपि।
रूढिनिष्ठाघञादीनां धातुः साध्यस्य वाचकः।। इति हर्युक्तेः।

तत्र हेलाराजः — कृत्यादियोगे कृत्वसुजादयो भवन्त्येव इत्याह — कृत्येत्यादि। क्तो नपुंसकविषयः। रूढिशब्दाः ताच्छीलिकाः। घञादयः भावकर्मादिविहिताः। आदिना तृजादयः। द्विः शयितव्यम्। द्विः सुकरः। द्विर्हसितम्। द्विर्दत्तवान्। द्विः कर्ता। द्विः पाकः। द्विर्भुक्त्वा गत इत्युदाहरणानि। अत एव द्विः प्रयोगः, द्विर्वचनेऽचि, द्विर्बद्धं सुबद्धं भवति इत्यादि संगच्छते। अतिप्रसङ्गस्तु अनभिधानात् वारणीयः।

---

[३५] पा.सू. ५.४.९७

मयट्

"तत्प्रकृतवचने मयट्"[३६] प्रकृतशब्देनात्र प्रचुरम्। वचनशब्दे भावे ल्युट्। तेन प्रचुरार्थबोधकात् प्रथमान्तात् स्वार्थे मयट्। यथा घृतमयं वर्तते। प्रचुरघृतमित्यर्थः। यद्वा अधिकरणे ल्युट्। प्राचुर्यवदन्नादिबोधकात् अधिकरणेऽर्थे मयट्। यथा अन्नमयो यज्ञः प्रचुरान्नवानित्यर्थः।

आनन्दमयो ब्रह्म, चिन्मयं ब्रह्म इत्यादावयमेव मयट्। प्राचुर्यं तु तत्र निर्धर्मकत्वमेव, व्यावहारिकमपरिच्छेद्यत्वं च। अनन्तत्वप्रतिपादकश्रुतेः। न च प्राचुर्यस्य स्वसमानाधिकरणविरोध्यल्पतासापेक्षत्वेन दुःखानुवृत्तेरपि प्रतीत्यापत्तौ तस्य ब्रह्मत्वहानिरिति वाच्यम्। वैपुल्यरूपप्राचुर्यस्य तदपेक्षत्वेऽपि अपरिच्छेद्यत्वरूपस्य तस्य तदनपेक्षत्वात् "सत्यं ज्ञानमनन्तं ब्रह्म" इति तैत्तिरीयकश्रुतौ अनन्तत्वोक्तेः। प्राणमयः — इत्यादावप्ययमेव मयट्। विकाररूपस्यार्थस्य आञ्जस्येनोपपत्त्यभावात्। तदवच्छिन्नस्य तद्विकारत्वाभावात्। न हि घटमय आकाश इति भवति। किं च आनन्दमये न ब्रह्मानन्दविकारत्वम्। तस्याविकारित्वात्। नापि वृत्त्यानन्दविकारत्वम्। तद्विषयविज्ञानस्य तत आन्तरत्वेन तस्य विज्ञानमयान्तरत्वानुपपत्तेः। प्रव्रज्याहोमे अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ताम् "इति मन्त्रे शुद्धिः तद्विषयावरणनाशरूपेति न विरोध इति व्याससूत्रवृत्तिकृतः।

अभूततद्भावे च्विः

अकृष्णः कृष्णः संपद्यते, तथा करोति कृष्णीकरोति। यत्र प्रकृतिरेव विकारसादृश्यमापद्यमाना विवक्ष्यते तत्र च्विप्रत्ययः। "कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः"[३७] "अभूततद्भाव इति वक्तव्यम्" इति सूत्रवार्तिकतद्भाष्यबलात्। अतथाभूतस्य तथाभावे क्रादियोगे सम्पद्यकर्तृत्वेन विवक्षितार्थवाचकात् च्विः इति तदर्थः। विकारवाचकात् स्वसादृश्येन प्रकृतौ वर्तमानात् अयं प्रत्ययः। करोत्यादिक्रियाकारकत्वं प्रकृतिभूतस्यैव विकारसादृस्यं प्राप्तस्य। अत एव सङ्गीभवन्ति ब्राह्मणाः त्वद्भवति देवदत्त इत्यादौ वचनपुरुषव्यवस्था।

वीप्सा

वृक्षं वृक्षं सिञ्चति। अत्र वीप्सायां द्वित्वम्। अत्र स्वप्रकृत्यर्थनिष्ठं व्याप्यत्वं तन्निरूपितं व्यापकत्वं च शाब्दबोधविषयः। व्याप्तिं बोधयितुमिच्छोः इदं

---

[३६] पा.सू. ५.४.२१
[३७] पा.सू. ५.४.५०

वाक्यमित्यवगमात् वीप्सा प्रयोक्तृधर्म एव। वृक्षनिरूपितव्यापकताश्रयः सेक इति बोधः। तच्च द्विर्वचनं पृथक्संख्यायुक्तानां नानाद्रव्याणां तदा बुद्धिस्थानां प्रत्येकरूपेण गुणक्रियाद्रव्यैर्युगपदन्वये भवति। तत्रैव व्यापकत्वप्रतीतेः। पृथक्संख्यायुक्तानाम् इत्यनेन ब्राह्मणो न हन्तव्य इत्यादौ जात्यभिप्रायेण प्रयोगे न द्वित्वम् एकशेषश्च न।

अत एव गर्गाः शतं दण्ड्यन्ताम् इत्यादौ न प्रत्येकं शतं दण्डनम्। तथा सति वीप्साविषयापहारः स्यात्। प्रत्येकं शतदण्डेन संख्यान्तरोपजननात् शतसंख्याश्रवणं च विरुद्धं स्यात्।

ब्राह्मणा भोज्यन्ताम् इत्यादौ भोजनस्य तृप्तिफलकत्वात् अन्नरूपत्वाच्च प्रत्येकमेव समाप्तिर्न समुदाये, असम्भवात्। युगपदित्युक्त्या क्रमविवक्षायां न। तत्रानेक-प्रयोगस्यैव दर्शनात्। तदा बुद्धिस्थानामित्यनेन जगतीतलवर्तिसर्ववृक्षसेचनाभावेऽपि वीप्साप्रयोगः। प्रकरणादेः संकोचकस्य सत्त्वात्। यत्र संकोचकं नास्ति, तत्रासंकोच इष्ट एव। जातो जातो निधनमुपैतीति यथा। व्यापकत्वं च तदर्थस्य येन सम्बन्धेनेतरान्वयः तत्सम्बन्धे बुध्यते। सम्बन्धश्च विभक्त्यर्थ एव। एवं च तादृशव्यापकत्वविशिष्टस्य संसर्गतया भानम्। अत्रैव द्विर्वचनं तात्पर्यग्राहकम्। एवं च ब्राह्मणाय ब्राह्मणाय शतं देहीत्यादौ बुद्धिस्थयावद्ब्राह्मणोद्देश्यकं शतकर्मकं दानमिति बोधः। ब्राह्मणव्यापकं शतदानमिति फलति। सम्बन्धे एकसम्बन्धिव्यापकत्वबोधस्य अपरसम्बन्धिनि सम्बन्धव्यापकत्वबोधफलकत्वात्।

यद्यपि उद्देश्यविधेयान्यतरस्य वीप्सया प्रयोगेणोभयत्रापि व्यापकत्वबोधो भवत्येव; तथापि क्वचित् स्फुटप्रतीतये क्वचित् आवश्यकत्वद्योतनाय उभयत्रापि द्वित्वम्। यथा ब्राह्मणाय ब्राह्मणाय शतं शतं देहीत्यादौ। एकैकस्य शतं शतमित्यादौ च। यत्र यत्र धूमस्तत्र वह्निरित्यादौ यद्व्यापकाधिकरणत्ववत्का धूमसत्ता तद्व्यापकाधिकरणतावत्का वह्निसत्ता इति बोधः। एवं वह्निधूमयोः व्याप्यव्यापकता फलति।

गजे गजे न मौक्तिकम् इत्यादौ गजव्यापकाधिकरणतावत्कमौक्तिकसत्ताभाव इति बोधः। सर्वाधिकरणतायां गजव्यापकत्वरूपविशेषणाभावमादाय पर्यवस्यति।

शशे शशे न शृङ्गमित्यत्र शशव्यापकाधिकरणतावत्कशृङ्गाभाव इति बोधः। विशेष्याभावप्रयुक्तोऽयमभावः। राज्ञो राज्ञः पुरुष इत्यादौ बुद्धिस्थयावद्राजस्वामिकः पुरुष इति बोधः। ग्रामो ग्रामो रमणीयः इत्यादौ विशेष्यविशेषणभावस्यैव संसर्गतया रमणीय- निष्ठविशेषणतानिरूपितग्रामव्यापकविशेष्यतावान् ग्राम इति बोधः।

अत्र वने रमणीयो रमणीयः प्लक्ष इत्यादौ रमणीयव्यापकविशेषणतानिरूपित-विशेष्यतावान् प्लक्ष इति बोधः। यो यो धूमवान् सोऽग्निमान् इत्यत्र यच्छब्दो धूमवान्

इत्यर्थक एव। धूमवद्व्यापकविशेषणतानिरूपितविशेष्यतावान् अग्निमानिति बोधः। यच्छब्दप्रयोगस्तु लघुभूते द्विरुक्तप्रयोगाय धूमवह्न्योर्व्याप्याप्यव्यापकभानं तु फलति।

यत्तु अत्र धूमव्यापकत्वस्य वह्नौ बोधः धूमवान् धूमव्यापकवह्निमानिति। तन्न। अनेकव्युत्पत्तिविरोधात्। जातो जातो निधनमुपैतीत्यादौ जातव्यापकविशेषणतावत्कर्तृका निधनप्राप्तिरिति बोधः।

क्वचित्तु व्याप्यव्यापकभावरूपः सम्बन्ध एव विभक्त्यर्थः यथा वृक्षं वृक्षं प्रति सिञ्चतीत्यादौ। अत्र द्विर्वचनप्रतिशब्दौ तात्पर्यग्राहकौ सर्वान् घटान् पश्येत्यादौ न द्वित्वम्। कार्त्स्न्यस्य सर्वशब्देनोक्तत्वात्। वृक्षं वृक्षमित्यादौ बहुवचनं न। प्रत्येकनिष्ठस्य एकत्वस्यैव तत्र भानात्।

ब्राह्मणाय ब्राह्मणाय शतं देहीत्यादौ च प्रत्येकं शतदानप्रतीतिः, एकशेषे तु नैवम्। ब्राह्मणेभ्यः शतं देहीत्युक्ते नियमेन प्रत्येकं शतदानाप्रतीतेः। यदा तु परिगृहीतद्वित्वानां वीप्सा तदा ब्राह्मणौ पूजय, द्वाभ्यां द्वाभ्यां, त्रिभ्यस्त्रिभ्य इत्यादि भवत्येव।

अत्रेदं बोध्यम्। यत्र यत्पदे वीप्सा तत्र तत्पदे न सा। यत्पदे द्वित्वेन यत्पदार्थसंसर्गे यच्छब्दार्थतावच्छेदकव्यापकत्वे बोधिते विनापि द्वित्वं तत्पदार्थसंसर्गे तच्छब्दार्थतावच्छेदकव्यापकत्वबोधात्।

"कारकं चेद्विजानीयात् यां यां मन्येत सा भवेत्" इति "अकथितं च"[३८] इति सूत्रबाष्ये प्रयोगात्, "व्यञ्जनानि यस्य यस्याचः कार्यमुच्यते तं तं भजन्ते" इति "अजादेः"[३९] इति सूत्रस्थभाष्यप्रयोगात् स्पष्टत्वाय क्वचित् तत्पदेऽपि वीप्सा, द्वित्वम्।

यत्तु — नात्र द्विर्वचनम्। किं तु भिन्नौ यत्तच्छब्दौ भिन्नरूपेणैव बुद्धिस्थपदार्थपरामर्शकाविति। तन्न। बह्वर्थप्रतिपादनेच्छायां बहुयच्छब्दप्रयोगापत्तेः। द्वाभ्यामेव सर्वप्रतीतिरिति चेत् एकेनैव सर्वप्रतीत्युपपत्तौ द्वितीयप्रयोगस्य वैयर्थ्यापत्तेरिति।

स्त्रीप्रत्ययार्थः व्युत्पत्तिवादे[४०]

प्रातिपदिकप्रकृतिकाः "स्त्रियाम्"[४१] इत्यनेन विहिताः टाबादयः क्वचित् स्त्रीत्वं प्रकृत्यर्थविशेषणतया बोधयन्ति। यथा अजा अश्वा शूद्रा श्यामा चपला ब्राह्मणी गौरी सुकेशी गर्भिणी इत्यादौ। स्त्रीत्वविशिष्टा अजा इत्यादिरर्थः। स्त्रीत्वं च योनिमत्त्वम्। न

---

[३८] पा.सू. १.४.५१
[३९] पा.सू. ६.१.९
[४०] पृ. २७३
[४१] पा.सू. ४.१.३

च स्त्रीतात्पर्यकाजादिपदात् साधुत्वार्थः टाबादिः प्रत्ययः, न तु स्त्रीत्वं तस्यार्थः। क्वचित् स्त्रीत्वबोधश्च स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वरूपात् लिङ्गात् जायत इति वाच्यम्। खट्वा इत्यादौ प्रकृतितात्पर्यविषयत्वस्य खट्वायां सद्भावेऽपि योनिमत्त्वरूपस्त्रीत्वबोधाभावेन व्यभिचारात्। तादृशहेतोः स्त्रीत्वासाधकत्वात्। अत्र व्यभिचारः अन्वयव्यभिचारः। खट्वायां स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वसत्त्वेऽपि स्त्रीत्वबोधाभावेन अन्वयव्यबिचारात् स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वस्य स्त्रीत्वबोधं प्रति अप्रयोजकत्वात् इत्यर्थः।

यद्वा स्त्रीत्वबोधः लिङ्गज इत्यस्य स्त्रीत्वबोधः लिङ्गजन्यानुमितिरूप इत्यर्थः। तथा च अजः स्त्री स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वात् इत्यनुमानं प्रयोक्तव्यम्। तत्र खट्वायां योनिमत्त्वरूपस्त्रीत्वरूपसाध्याभावावत्यां स्त्रीप्रत्ययप्रकृतितात्पर्यविषयत्वरूपहेतु-सत्त्वत् व्यभिचारो हेत्वाभास इत्यर्थः। न च प्राणित्वे सतीति हेतौ विशेषणं देयम्। अतः खट्वादौ न व्यभिचारः, तत्र प्राणित्वाभावेन विशिष्टहेत्वभावादिति वाच्यम्। तथापि देवतादौ व्यभिचारात्। इन्द्रादिदेवेषु टाप्प्रकृतितात्पर्यविषयत्वस्य प्राणित्वस्य च सत्त्वेऽपि योनिमत्त्वरूपस्त्रीत्वाभावात्।

वस्तुतस्तु पुंरूपाजवत्यपि प्रदेशे अजा नास्ति इति प्रयोगात् नञर्थप्रतियोगिता-वच्छेदकतया स्त्रीत्वभानमावश्यकम्। तत्र स्त्रीत्वावच्छिन्नाजनिष्ठप्रतियोगिताका-भावसत्त्वान्न दोषः। अन्यथा अजत्वावच्छिन्नप्रतियोगिताकाभावस्य तत्र असत्त्वेन तादृशप्रयोगस्य प्रामाण्यं न स्यात्। एवं च स्त्रीत्वस्य प्रत्ययार्थत्वमावश्यकम्।

अत्र वैयाकरणाः — अजा इत्यादौ प्रातिपदिकार्थ एव स्त्रीत्वम्। तस्य च प्रातिपदिकार्थे एव अजत्वादिजातिमति विशेषणतया अन्वयः। स्त्रीप्रत्ययास्तु टाबादयः स्त्रीत्वद्योतका एव न तु स्त्रीत्ववाचकाः। स्त्रीत्वद्योतका इत्यस्य टाप्प्रकृतिगतस्त्रीत्व-वाचकत्वतात्पर्यग्राहका इत्यर्थः। अत एव —

> स्वार्थो द्रव्यं च लिङ्गं च संख्या कर्मादिरेव च।
> अमी पञ्चैव नामार्थाः त्रयः केषाञ्चिदग्रिमाः।।

इति कारिकापि संगच्छते। तत्र स्वार्थः जात्यादिरूपः गवादिपदमुख्यार्थः। द्रव्यं गवादिरूपस्तद्धर्मी तन्मते औपचारिको गवादिपदार्थः। लिङ्गस्य प्रातिपदि-कार्थत्वमावश्यकम्। नात्र ब्राह्मणः, अपि तु ब्राह्मणी इत्यादौ पुंस्त्वबोधकपदा-न्तराभावेन पुंस्त्वस्य नञर्थप्रतियोगितावच्छेदकतया भानानुपपत्तेः। ब्राह्मणादिपदाच्च जात्यादेः द्रव्यस्य च भानं नियतमेव। लिङ्गभानं तु तात्पर्यवशात् योग्यतावशाच्च क्वाचित्कम्। ब्राह्मणीत्यादौ पुंस्त्वाद्यबोधात् इत्याहुः।

तन्न। उक्तयुक्त्या पुंस्त्वस्य प्रातिपादिकार्थत्वेऽपि अनन्तानां प्रातिपदिकपदानां स्त्वीत्वार्थकत्वे गौरवात् लाघवेनाल्पीयसां स्त्रीप्रत्ययानां स्त्रीत्वार्थकत्वकल्पनस्य

उचितत्वात्। अत एव स्त्रीत्वसंग्रहाय "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[४२] इति सूत्रे लिङ्गग्रहणम्। अन्यथा प्रातिपदिकार्थ एव स्त्रीत्वान्तर्भावेण पृथक् तदुपादानानुपपत्तेः।

क्वचित् स्त्रीप्रत्ययः भार्यात्वविशिष्टं स्त्रियं स्त्रीप्रत्ययप्रकृत्यर्थविशेष्यतया बोधयति। यथा आचार्यानी इत्यादौ आचार्यभार्या इति बोधः। भार्यात्वं सम्बन्धविशेषः। तत्र आचार्यस्य निरूपितत्वसम्बन्धेनान्वयः। आचार्यनिरूपितभार्यात्ववती इति बोधः पर्यवस्यति। स्त्रियः प्रकृत्यर्थविशेष्यत्वं भार्यात्वद्वारकम्।

खट्वा अटवी देवता इत्यादिपदेषु स्त्रीप्रत्ययाः नार्थबोधकाः। तत्र प्रकृत्यर्थे योनिमत्त्वरूपस्त्रीत्वस्य अयोग्यतया अनन्वयात्। किं तु पदसंस्कारकाः।

न च तत्र शब्दगतं स्त्रीत्वमेव स्वाश्रयवाच्यत्वरूपपरम्परासम्बन्धेन अर्थगततया भासत इति श्रीपतिदत्तोक्तं युक्तम्। तद्भाने मानाभावात्।

"यूस्त्र्याख्यौ नदी"[४३] इत्यत्र स्त्र्याख्यपदं स्त्रीलिङ्गशब्दपरम्, न तु स्त्रीत्व-विशिष्टार्थकशब्दपरम्। तेन अटव्यादिशब्दानां स्त्रीत्वविशिष्टाबोधकत्वेऽपि न नदी-संज्ञायाः अनुपपत्तिः।

अत एव श्रीभूप्रभृतीनां स्त्रीप्रत्ययान्तत्वाभावेन स्त्रीत्वविशिष्टाबोधकत्वेऽपि नदीसंज्ञाप्रसक्त्या "नेयङुवङ्स्थानावस्त्री"[४४] इति तन्निषेधसंगतिः।

न चैवं सेनान्यै स्त्रियै इत्यादावपि नदीसंज्ञा स्यात्। सेनान्यादिशब्दस्य तत्र विशेष्यनिघ्नतया स्त्रीलिङ्गत्वात् इति वाच्यम्। प्रयोगानुसारेण विशेष्यसमभि-व्याहारानधीनायाः स्त्रीलिङ्गताया एव विवक्षणीयत्वादिति।

इति तद्धितार्थविचारः

---

[४२] पा.सू. २.३.४६
[४३] पा.सू. १.४.३
[४४] पा.सू. १.४.४

कृदर्थविचारः

लघुमञ्जूषायां कृदर्थविचारः

कर्तरि कर्मणि च विहितानां कृत्प्रत्ययानां कर्ता कर्म च अर्थः। लिङ्ग-संख्यान्वययोग्ययोः तयोरेव प्राधान्यम्। "सत्त्वप्रधानानि नामानि" इत्युक्तेः। कर्मकृति च व्यापारः अप्रधानं, फलं प्रधानम्। पक्तेत्यतः विक्लित्यनुकूलव्यापाराश्रयः, पक्क-मित्यतः व्यापारजन्यविक्लित्त्याश्रयः बुध्यते।

तत्र शतृशानजन्तस्य योऽर्थः तस्याख्यातार्थक्रियाविशेषणत्वम् लिखन्नास्ते भूमिम् इत्यत्र इति चतुर्थोल्लासे काव्यप्रकाशे स्पष्टम्। हरिरप्याह —

चङ्क्रम्यमाणोऽधीष्वात्र जपंश्चङ्क्रमणं कुरु।
तादर्थ्यस्याविशेषेऽपि शब्दात् भेदः प्रतीयते।।

अध्ययनमत्र जपः। उभयत्रापि अध्ययनस्यैव विधिः। शब्दतस्तु आद्ये जपस्य प्राधान्यम्, अन्त्ये तस्य गुणत्वमिति तदर्थः।

क्वचित्तु शत्रन्तार्थस्य अबुद्धिपूर्वकत्वादिरूपमप्राधान्यम् प्रकरणात् व्यञ्जनया वा प्रतीयते। यथा लिखन्नास्ते इत्यादौ।

तत्र हि — "पदैकदेशरचना वर्णेष्वपि रसादयः" इत्यस्य व्याख्यानावसरे तिङ्सुपोः व्यङ्ग्यस्य द्वितीयोदाहरणत्वेन,

"लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितः
निराहाराः सख्यः सततरुदितोच्छूननयनाः।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैः
तवावस्था सेयं विसृज कठिने मानमधुना।।"

इति प्रदर्श्य अत्र लिखिन्निति न तु लिखतीति। तत्र शतृप्रत्ययेन लेखनस्या-प्राधान्यमबुद्धिपूर्वकत्वरूपम्। आस्ते इति न त्वासीदिति। तेन तथावस्थानस्य प्रसादपर्यन्तता। भूमिमिति न तु भूभाविति। तेन बुद्धिपूर्वकं भूमौ न किंचित् लिख्यत इति व्यङ्ग्यमित्युक्तम्।

भावार्थकप्रत्ययाः

भावार्थकानां कृत्यसंज्ञकतव्यदादीनां, खलर्थानां, नपुंसके भावे क्तस्य च साध्यावस्थापन्नधात्वर्थानुवादकत्वमेव। साध्यावस्थस्यापि धात्वर्थस्य पचतिरूपमित्यादाविव लिङ्गयोगः। अत एधितव्यम् इत्यादौ न क्रियान्तराकाङ्क्षा। अतस्तेष्वेकवचनमेव। सत्वप्रधानानि नामानीत्युक्तेः तत्र लिङ्गान्तरासम्भवात् लिङ्गसर्वनामत्वाच्च नपुंसकत्वमेव। लिङ्गान्वयित्वमेव तत्र सत्त्वम्। शयितव्याद्यर्थे विभक्त्या लिङ्गान्वयोपयोगिसिद्धत्वबोधनमिति केचित्।

घञादिवाच्यः भावः सिद्धावस्थापन्नः। पाक इत्यादौ क्रियान्तराकाङ्क्षायाः दर्शनात्, संख्यादियोगदर्शनाच्च। तत्रापि प्रकृत्या साध्यावस्थापन्नक्रियाया एव उपस्थित्या तत्र कारकान्वयः ओदनस्य पाक इत्यादौ। तत्र अध्याहृततिङन्तार्थक्रियायां कारकान्वय इति न युक्तम्। "न लोकाव्ययनिष्ठाखलर्थतृनाम्"[१] इति निषेधेन कृद्योगषष्ठ्यनापत्तेः। "कर्तृकर्मणोः कृति"[२] इति सूत्रस्य वैयर्थ्यापत्तेश्च। काष्ठैः पाक इति प्रयोग इष्ट एव। न चैकस्यैव सिद्धत्वसाध्यत्वाभ्यामुपस्थितिः कथं, तयोः विरोधादिति वाच्यम्। यथा सम्बन्धिभेदेन एकस्यैव आचार्यत्वं मातुलत्वं च, पितृत्वं पुत्रत्वं च, तथा कारकलिङ्गादिसम्बन्धिभेदेन साध्यत्वस्य सिद्धत्वस्य च वृत्तौ विरोधाभावात्। यथा वा "मृगो धावति पश्य" इत्यादौ धावनस्य मृगं प्रति साध्यत्वं दर्शनं प्रति साधनत्वं तद्वत्। एकस्यैव धात्वर्थस्य साध्यत्वेन प्रकारता सिद्धत्वेन विशेष्यता। एकनिष्ठत्वाच्च तयोर्न स्फुटं ग्रहो बोधे।

एतेन घञ्वाच्यो भावः प्रधानमिति ग्रन्था व्याख्याताः। तदुक्तं "कर्तरि कृत्"[३] इति सूत्रे भाष्ये "घञादिवाच्यो भावो बाह्यः प्रकृत्यर्थात्" इति। तुमुनादिवाच्यस्तु अभ्यन्तर इति "तुमर्थ"[४] इति सूत्रे भाष्ये। तत्र शोभनाद्यर्थस्य धात्वर्थे फलेऽन्वये शोभनं पाक इत्येव। "कर्तृकर्मणोः"[५] इति षष्ठी तु न। कर्तृसाहचर्येण कर्मणां धात्वर्थे भेदेनान्वयिनामेव तत्र ग्रहणात्। प्रकृते चाभेदेनान्वयात्। व्यापारे शोभनपदार्थान्वये तु शोभनः पाक इत्येव। व्यापारस्य कर्मत्वाभावेन तद्विशेषणे द्वितीयाया अप्रसक्तेः। तिङन्तार्थव्यापारान्वये तु नपुंसकतैव। एतेन घञादीनां प्रयोगसाधुतामात्रमित्यपास्तम्। तदुक्तं —

---

[१] पा.सू. २.३.६९
[२] पा.सू. २.३.६५
[३] पा.सू. ३.४.६७
[४] पा.सू. २.३.१५
[५] पा.सू. २.३.६५

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः।।
साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः।।

इति। सिद्धभावः सिद्धता। यथा पचतीत्यादौ कल्पितान्वयव्यतिरेकाभ्यां क्रियायां धातुभागः, कारके प्रत्यय इति कल्पना आश्रीयते, तथा घञन्ते प्रकृतिः साध्यस्वभावमाचष्टे, घञ् तस्याः सत्त्वभावमित्यर्थ इति हेलाराजः। अनेनात्रापीयं शास्त्रकृत्कल्पनैवेति दर्शयति। साध्यत्वेन भानादेव क्रियार्थायां क्रियायामुपपदे विधीयमानतुमुनादिसिद्धिः। भोक्तुं पाक इत्यादिः। क्रियापदस्य साध्यत्वविशिष्ट एव वृत्तेः। पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति न्यायस्तु क्रियातिरिक्तविषयकः। भोक्तुं गतः, देवदत्तेन ग्रामो गतः, कृतपूर्वी कटमित्यादौ कारकाणां गुणभूतक्रियायामन्वयात्।

वस्तुतो भोक्तुं पाकः, भोक्तुं गतः इत्यादिकमसाध्वेव। क्रियार्थायां क्रियायामित्युक्त्या प्रत्यासत्त्या क्रिययोरेकजातीयत्वलाभेन स्वप्रकृतिकप्रत्ययार्थं प्रति अगुणीभूतायाः साध्यावस्थमात्राया एव क्रियार्थक्रियायाः ग्रहणात्।

तुमुन्

तुमुन्नादीनामसत्त्वभूतो भाव एवार्थः। "अव्ययकृतो भावे" इत्युक्तेः पाक इत्यादाविव तुमुन्नर्थे सिद्धसाध्यावस्थारूपवैलक्षण्याननुभवात्। एवं चायं तुमुन् धात्वर्थानुवादक एव। तत्र "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[६] इत्युक्तेः उद्देश्यत्वरूपं तादर्थ्यमपि तुमुन्ण्वुल्द्योत्यम्। तच्च संसर्गः। प्रकृत्युपपदार्थयोः तादर्थ्यवत् समानकर्तृकत्वमपीह अभिधानबललभ्यः संसर्गः। एतद्विहिततुमुन् तु कर्तर्येव। "कृष्णं द्रष्टुं याति" "कृष्णं दर्शको याति" इत्यादौ कृष्णकर्मकभविष्यद्दर्शनोद्देश्यकं ¨ र्शनकर्तृकर्तृकं यानम्, कृष्णकर्मकभविष्यद्दर्शनकर्तृकर्तृकं तद्दर्शनोद्देश्यकं गमनम् इत्याद्यकारको बोधः।

क्त्वाणमुलादयः

एवं क्त्वाणमुलादीनामपि असत्वभूतभाव एवार्थः। तुमुन्वत् क्त्वाप्रत्ययार्थक्रियापि क्रियान्तरे विशेषणम्। धातुसम्बन्धाधिकारात्। तयोः सम्बन्धः एककर्तृ-

---

[६] पा.सू. ३.३.१०

कत्वं पूर्वकालत्वोत्तरकालत्वं च। "समानकर्तृकयोः पूर्वकाले क्त्वा"[७] इत्यनुशासनात्। समानकर्तृकयोः क्रियारूपार्थयोर्मध्ये पूर्वकालसम्बन्ध्यर्थवाचकाद्धातोः क्त्वेत्यर्थः। एवं वाक्यशक्योक्तसम्बन्धतात्पर्यग्राहकाः क्त्वादयः। सूत्रबलादेव तयोः क्रिययोरेककर्तृकत्वबोधः। क्वचित्तु जन्यत्वव्याप्यत्वादिकमप्यधिकं भासते। तत्तु मानान्तरगम्यत्वान्न क्त्वाद्योत्यम्। यथा भुक्त्वैव तृप्तो न पीत्वा, अधीत्य तिष्ठति इत्यादौ। अत एव अध्ययनकालिकस्थितिमादायैव अधीत्य तिष्ठतीति प्रयोगः, न तदभावकालिकस्थितिमादाय। तदपि समानकर्तृकत्वं संसर्गमर्यादयैव भासते। एतेन समानकर्तृकत्वं क्त्वावाच्यमित्यपास्तम्। संसर्गमर्यादयैव लाभेन अन्यलभ्यत्वात्। "कर्तरि कृत्"[८] इत्यस्य तु नात्र प्रवृत्तिः। "अव्ययकृतो भावे" इत्युक्तेः। तत्र अव्यवहितपूर्वकालत्वादिरेव संसर्गः। अत एव वर्षान्तरीयभोजनमादाय भुक्त्वा व्रजतीति न प्रयोगः साधुः। अव्यवधानं च तात्पर्यवशात् दण्डमुहूर्ताहरादिभिर्यथायथं बोध्यम्। तेन अद्य भुक्त्वा श्वो गन्ता इत्यादेरुपपत्तिः।

न च पूर्वकालत्वादेः संसर्गत्वे मुखं व्यादाय स्वपिति इति न स्यात्। व्यादानस्य स्वापपूर्वकालिकत्वाभावादिति वाच्यम्। व्यादानोत्तरमपि स्वापानुवृत्त्या तमादाय तदुपपत्तेः।

अत्र कालिकसम्बन्धेन व्याप्यत्वमपि भासते। तेन व्यादानोत्तरं स्वापे कृते तदनुवृत्तावेव मुखं व्यादाय स्वपिति इति प्रयोगः, न तु मुखमीलने तथा प्रयोगः। तदातनस्वापस्य तद्व्याप्यत्वाभावात्। "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यादौ दर्शादियागवैशिष्ट्यं सोमयागे विधीयते। अतो दर्शादितः प्राक् सोमकरणे प्रत्यवायसिद्धिः। दर्शमात्रकरणे सोमाकरणे च तदभावसिद्धिः। आधानोत्तरं तावत्कालं संदिग्धजीवनस्य अतिश्रद्धावतस्तु ततः प्राक् सोमानुष्ठानेऽपि न प्रत्यवायः। "प्रागपि सोमेनैके" इति आश्वलायनोक्तेः।

उत्तरकालमात्रं पूर्वकालमात्रं वा सम्बन्ध इति तु न युक्तम्। सम्बन्धस्योभयनिष्ठत्वावश्यकत्वात्। तत्रोत्तरकालवृत्तित्वं न तद्ध्वंसाधिकरणकालवृत्तित्वम्। स्थित्वा पश्यतीत्यादावभावात्। स्थितेर्दर्शनकालेऽपि सत्त्वात्। किं तु तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिकत्वम्।

उत्तरकालस्य क्त्वाप्रत्ययार्थत्वं तु न युक्तम्। कृति प्रत्ययार्थस्य विशेष्यत्वदर्शनात् तस्य विशेष्यत्वापत्तौ क्रियाप्राधान्यविरहेण आभीक्ष्ण्ये द्वित्वाभावापत्तेः। गुणभूतक्रियामाश्रित्य तत्प्रवृत्तौ पाचक इत्यादावतिप्रसङ्ग इति प्राञ्चः।

---

[७] पा.सू. ३.४.२१

[८] पा.सू. ३.४.६७

मतान्तरम् (स्वमतम्)

परे तु समानकर्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तेः धातोः क्त्वा इति सूत्रार्थात् पूर्वकालः क्त्वाप्रकृत्यर्थे प्रकारः। तद्बलात् आनन्तर्यसम्बन्धेन तस्य धात्वन्तरार्थेऽन्वयः। एवं च भुक्त्वा व्रजतीत्यतः पूर्वकालवृत्तिभोजनानन्तरकालिकं गमनमिति बोधः। समानकर्तृकत्वमपि सम्बन्ध एव इत्याहुः।

न्यायकौस्तुभानुसारेण क्त्वाप्रत्ययार्थविचारः

अत्राहुः न्यायकौस्तुभकाराः —

क्त्वाप्रत्ययस्य प्रधानक्रियापूर्वकालीनत्वमर्थः। न च भुक्त्वा एकवर्षोत्तरं गते चैत्रे, चैत्रो भुक्त्वा व्रजतीति प्रयोगवारणाय प्रधानक्रियाव्यवहितपूर्वकालीनत्व एव क्त्वाप्रत्ययस्य शक्तिरुचितेति वाच्यम्। भोजनानन्तरं घटिकादिविलम्बेन गते चैत्रे, चैत्रो भुक्त्वा व्रजतीति प्रयोगानुपपत्तेः। भोजनस्य गमनाव्यवहितपूर्वकालवृत्तित्वाभावात्। अतः प्रधानक्रियाव्यवहितपूर्वकालवृत्तित्वे क्त्वाप्रत्ययस्य शक्तिरिति वक्तुमशक्यत्वात्। न चैवं भुक्त्वा वर्षोत्तरं गते चैत्रे, चैत्रो भुक्त्वा व्रजतीति प्रयोगवारणं कथमिति वाच्यम्। यतः प्रधानक्रियापूर्वकालत्वस्य प्रधानक्रियाप्रागभावाधिकरणघटिकामुहूर्तादिनानाविधकालवृत्तित्वरूपस्य नानात्वेन, अव्ययानामनेकार्थतया क्त्वाप्रत्ययस्याव्ययकृत्प्रत्ययत्वेन च नानार्थतया, भुक्त्वा व्रजतीत्यादौ वर्षात्मकस्थूलकालघटितप्रधानक्रियापूर्वकालवृत्तित्वं न क्त्वाप्रत्ययार्थः, किं तु प्रधानक्रियाप्रागभावाधिकरणघटिकादिरूपपूर्वकालवृत्तित्वं क्त्वाप्रत्ययार्थः इत्यभ्युपगमेन उक्तापत्त्यभावात्।

अत्र पूर्वकालीनत्वमात्रं क्त्वाप्रत्ययशक्यम्। प्रधानक्रियायाः तिङादिप्रकृतित एव लाभः। पूर्वकालीनत्वस्य च तिङ्प्रत्ययप्रकृत्यर्थप्रधानक्रियाविशेष्यतया अन्वितस्य क्त्वाप्रकृत्यर्थभोजनादिक्रियायां विशेषणतया अन्वयः। एवं स्वप्रकृत्यर्थभोजनादिसमानकर्तृकत्वमपि क्त्वाप्रत्ययार्थः। तच्च प्रधानक्रियायां विशेषणतया अन्वेति। एवं च चैत्रो भुक्त्वा व्रजतीति वाक्यात् गमनक्रियापूर्वकालीनभोजनसमानकर्तृकं यत् गमनं तदनुकूलकृतिमांश्चैत्र इत्याकारकः शाब्दबोधो भवति।

पूर्वकालीनत्वान्वयानुपपत्तिशङ्का तत्समाधानं च

ननु मुखं व्यादाय स्वपितीत्यादौ, झणात्कृत्वा पततः कंस इत्यादौ च क्त्वाप्रत्ययार्थपूर्वकालीनत्वान्वयानुपपत्तिः। मुखव्यादानस्य स्वापजन्यत्वेन स्वा-

पोत्तरकालीनत्वात् झणात्कारस्य कंसपतनजन्यत्वेन पतनोत्तरकालीनत्वाच्च मुखव्यादानझणात्कारयोः स्वापकंसपतनपूर्वकालीनत्वासंभवादिति चेत् — न।

मुखं व्यादाय स्वपितीत्यादौ सुप्त्वा मुखं व्यादत्त, इति व्यत्ययेनान्वयात्, एवं झणात्कृत्वा पतितः कंसः इत्यादावपि कंसः पतित्वा झणात्करोति इति व्यत्ययेनान्वयान्नानुपपत्तिः। तथा च व्यत्ययेन वाक्यानुसन्धानपूर्वकं व्यादानपूर्वकालीनस्वापसमानकर्तृकव्यादानानुकूलकृतिमांश्चैत्रः इति, झणात्कारपूर्वकालीनपतनसमानकर्तृकझणात्कारानुकूलकृतिमान् कंस इति चान्वयबोधः।

वस्तुतः क्त्वाप्रत्ययस्य अव्ययकृत्प्रत्ययत्वेन नानार्थकतया मुखं व्यादाय स्वपितीत्यादौ क्त्वाप्रत्ययेन जनकत्वस्य बोधनात् मुखव्यादानजनकः स्वापः झणात्कारजनकं पतनमित्यन्वयबोधोपगमान्न कोऽपि दोषः।

समानकर्तृकत्वान्वयानुपपत्तिशङ्कासमाधाने

ननु

"अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा।।" (रघुवंशः-१-७७)

इत्यत्र क्त्वाप्रत्ययार्थस्य समानकर्तृकत्वस्य अन्वयानुपपत्तिः। प्रजाकर्तृकोत्पत्तिरूपप्रधानक्रियासमानकर्तृकत्वस्य दिलीपकर्तृकाराधनक्रियायामभावादिति चेत् — न।

तत्र अनाराध्येत्यनन्तरं स्थितस्येत्यध्याहारेण स्थितिरूपप्रधानक्रियामादाय तत्र समानकर्तृकत्वान्वयबोधसंभवात्, स्थितिकर्तुः दिलीपस्यैव आराधनक्रियाकर्तृत्वात् इति आचार्यानुयायिनः।

मणिकारानुयायिमतेन क्त्वाप्रत्ययार्थप्रतिपादनम्

चिन्तामणिकारानुयायिनस्तु — पूर्वकालीनत्वं न क्त्वाप्रत्ययार्थः, किं तु आनन्तर्यम् उत्तरकालवृत्तित्वरूपम्। भुक्त्वा व्रजति इत्यादौ गमनक्रियायां भोजनोत्तरकालिकत्वबोधस्य आनुभविकत्वात्। एवं समानकर्तृकत्वमपि क्त्वाप्रत्ययार्थः। अतो न मैत्रभोजनानन्तरं गते चैत्रे भुक्त्वा व्रजति चैत्रः इति प्रयोगः। भोजनानन्तरकालिकं भोजनसमानकर्तृकं यत् गमनं तदनुकूलकृतिमान् चैत्र इत्यन्वयबोधः।

अथैवमपि मैत्रभोजनानन्तरं गते चैत्रे, चैत्रो भुक्त्वा गच्छतीति प्रयोगो दुर्वारः। मैत्रभोजनानन्तर्यस्य, गमनोत्तरचैत्रकर्तृकभोजनमादाय समानकर्तृकत्व-

स्यापि संभवादिति चेत् — न। यद्भोजनानन्तर्यं यद्गमने प्रतीयते तद्भोजन-समानकर्तृकत्वस्यैव तत्रान्वय इति नियमेन उक्तानुपपत्त्यभावात्।

चैत्रो मुखं व्यादाय स्वपितीत्यादौ मुखव्यादानजनकत्वे, झणात्कृत्वा पतितः कंसः इत्यादौ झणात्कारजनकत्वे क्त्वाप्रत्ययस्य लक्षणेति वदन्ति।

भावः क्त्वाप्रत्ययार्थ इति वैयाकरणमतम्

वैयाकरणानुयायिनस्तु — क्त्वाप्रत्ययस्य भाव एवार्थः। समानकर्तृकत्वादिकं च क्त्वाप्रत्ययस्य द्योत्यमेव, न तु वाच्यम्। तथा हि — अत्र भावः साध्यावस्थ एव। स च धातुना लब्धः। क्त्वाप्रकृत्यर्थभूता क्रिया च क्रियान्तरे विशेषणम्। धातुसंबन्धाधिकारात्। "समानकर्तृकयोः पूर्वकाले" इति सूत्रमपि द्योतकत्वाभि-प्रायेणैवोपपन्नम्। समानकर्तृकत्वादिप्रकारकबोधस्तु विवादग्रस्त एव। एवं च भुक्त्वा व्रजतीत्यादौ गमने भोजनस्य समानकर्तृकत्वानन्तरकालिकत्वोभयसंबन्धेनान्वयः। एवमन्यत्रापि यथासंभवमूह्यम् — इत्याहुः।

समानकर्तृकत्वादेः संबन्धत्वानुपपत्तिः

तन्मते इयमनुपपत्तिः भवति। तथा हि- "चैत्रः भुक्त्वा व्रजति न तु स्नात्वा" इत्यत्र गमने स्नानसमानकर्तृकत्वानन्तर्ययोः "मुखं व्यादाय स्वपिति न तु संवृत्य" इत्यत्र स्वापे मुखसंवरणसमानकर्तृकत्वसमानकालीनत्वयोः, "अधीत्य तिष्ठति न तु शयित्वा" इत्यत्र अवस्थाने शयनसमानकर्तृकत्वव्याप्यत्वयोः, "भुक्त्वैवाहं तृप्तः न तु पीत्वा" इत्यत्र तृप्तौ पानसमानकर्तृकत्वजन्यत्वयोः अभावो नञा बोध्यते इति यथायथं समानकर्तृकत्वानन्तर्यादिसंबन्धावच्छिन्नप्रतियोगिताकाभावस्यैव नञा बोधनात् न तेषां क्त्वाप्रत्ययार्थत्वमिति वाच्यम्। समानकर्तृकत्वादेः वृत्त्यनियामकतया अभाव-प्रतियोगितावच्छेदकसंबन्धत्वाभावेन नञा तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य बोधयितुमशक्यत्वात्।

कृतिरेव क्त्वाप्रत्यययार्थ इति मतम्

केचित्तु क्त्वाप्रत्ययस्य कृतिरर्थः। कृतित्वस्य जातिरूपतया तस्य शक्य-तावच्छेदकत्वे लाघवात्। न तु समानकर्तृकत्वानन्तर्यादौ क्त्वाप्रत्ययस्य शक्तिः। समानकर्तृकत्वत्वानन्तरत्वत्वादेः तच्छक्यतावच्छेदकत्वकल्पने गौरवात्। एवं चानन्तर्यादौ क्त्वाप्रत्ययो लाक्षणिकः। कृतावेव शक्तः। तादृशकृतिश्च अप्रधान-क्रियायाः विशेष्यत्वेन प्रधानक्रियायाः विशेषणत्वेनान्वेति। एवं च चैत्रो भुक्त्वा व्रजतीत्यादौ भोजनानुकूलकृतिजन्यं यत् भोजनोत्तरकालिकगमनं तदनुकूल-

कृतिमांश्चैत्र इत्यन्वयबोधः। अत्रानुकूलत्वं जन्यत्वं च संसर्गतया भासते। एवमन्यत्रापि यथानुभवमूह्यमित्याहुः।

तदपि न युक्तम्। चैत्रो भुक्त्वा व्रजति न तु स्नात्वा इत्यादिनञ्समभिव्याहारस्थले अनुकूलत्वजन्यत्वयोः वृत्त्यनियामकत्वेन तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य बोधयितुमशक्यत्वात् — इति।

इति कृदर्थविचारः

इति महामहोपाध्यायेन एन्. एस्. रामानुजताताचार्येण विरचितायां शाब्दबोधमीमांसायां सुबन्तपदार्थविचारो नाम तृतीयो भागः समाप्तः

अनुबन्धाः

उदाहृतग्रन्थानां सूची

अद्वैतसिद्धिः मधुसूदनसरस्वतीकृता, बलभद्रकृतसिद्धिव्याख्या-गौडब्रह्मानन्द-सरस्वतीकृतगौडब्रह्मानन्दी-विठलेशकृतविठलेशी-मधुसूदनसरस्वतीकृताद्वैत-मतसंरक्षण-संपादककृतचतुर्ग्रन्थीसहिता, संपा. एन्. एस्. अनन्तकृष्णशास्त्री, निर्णयसागरप्रेस्, मुम्बयी, १९१७.

अनुमानमणिः द्र० तत्त्वचिन्तामणिः.

अनुव्याख्यानम् द्र० न्यायसुधा.

अभाववादः (तत्त्वचिन्तामणिप्रत्यक्षखण्डे एकं प्रकरणम्) द्र० तत्त्वचिन्तामणिः.

अभिधानवृत्तिमातृका भारतीयनिद्याप्रकाशनम्, वारणासि.

अमरकोषः अमरसिंहविरचितः, भानुजिदीक्षितकृतसुधाव्याख्यासहितः चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, १९९७. (निर्णयसागरमुद्रितपुस्तकस्य मुद्रणप्रतिकृतिः).

अरुणाधिकरणसरणिविवरणी मैसूरनगरस्थपरकालमठद्वारा प्रकाशितम्.

आगमप्रामाण्यम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

आश्वलायनश्रौतसूत्रम् नारायणकृतवृत्तिसमेतम्, संपा. पट्टाभिरामशास्त्रि-रामनाथदीक्षितौ, लालबहादूरशास्त्रिकेन्द्रीयविद्यापीठम्, नूतनदिल्ली, १९८४-१९८५.

ऋग्वेदप्रातिशाख्यम् शौनकविरचितम्, उवटभाष्यसहितम्, संपा. अनुवादकश्च वीरेन्द्रकुमारवर्मा, काशीहिन्दूविश्वविद्यालयग्रन्थमाला, शोधप्रकाशनयोजना पुष्पम् ५, वाराणसी, १९७०.

कल्पतरुः द्र० ब्रह्मसूत्रशांकरभाष्यम्.

कारकचक्रम् वागीशभट्टाचार्यप्रणीतम्, माधवतर्कालङ्कारविरचितया माधवी-टीकया, तथा सीताशरणत्रिपाठिना कृतया प्रदीपटिप्पण्या चाभ्युपेतम्। ब्रह्मशङ्करशास्त्रिणा संशोधितम्। चौखाम्बा संस्कृत सीरज आफीस्, बनारस, १९४२.

कारिकावली (मुक्तावलीसहिता) श्रीविश्वनाथतर्कपञ्चाननकृता, प्रभा-मञ्जूषा-दिनकरी-रामरुद्री-गङ्गारामीव्याख्याभिः समन्विता, सम्पादकः श्री सी. शंकर-

रामशास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं० २९) चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९८८. (बालमनोरमाग्रन्थावलि सं० ६, १९२३, संस्करणस्य मुद्रणप्रतिकृतिः).

काव्यप्रकाशः मम्मटप्रणीतः, गोकुलनाथोपाध्यायकृतविवरणसहितः, संपा. बद्रीनाथः झा, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी, १९६१.

काव्यादर्शः दण्डिप्रणीतः, रङ्गाचार्यविरचितप्रभाव्याख्योपेतः, भण्डार्कर् प्राच्यविद्यासंशोधनालयः (Government Oriental Series: class A; no. 4) पुणे, १९३८.

कैयटः द्र० महाभाष्यम्.

खण्डनखण्डखाद्यम् श्रीहर्षविरचितम्, विद्यासागरीयखण्डनफक्किकाविभजनसंपादककृतखण्डनपञ्जिकासहितम्, संपा. स्वामी योगीन्द्रानन्दः, षड्दर्शनप्रकाशनप्रतिष्ठानम्, वारणसी, १९७९.

गणसूत्रम् द्र० सिद्धान्तकौमुदी.

गूढार्थतत्त्वालोकः द्र० व्युत्पत्तिवादः १.

चित्सुखी द्र० तत्त्वप्रदीपिका.

जैमिनिसूत्राणि द्र० मीमांसादर्शनम् १.

जैमिनीयन्यायमालाविस्तरः विद्यारण्यकृतः, संपा. के. ए. रामनाथशास्त्रि-पट्टाभिरामशास्त्रिणौ, (काशीसंस्कृतसिरीस् सं० १२६) वाराणसी, १९३७.

तत्त्वचिन्तामणिः श्रीमद्गङ्गेशोपाध्यायविरचितः, प्रत्यक्षखण्डः मथुरानाथकृतरहस्यजयदेवकृतालोकटीकासहितः (प्रथमभागः); अनुमित्यादिबाधान्तम् अनुमानखण्डः, मथुरानाथकृतरहस्यनामकटीकासहितः (द्वितीयो भागः प्रथम परिच्छेदः); शब्दखण्डमारभ्य उच्छन्नप्रच्छन्नवादपर्यन्तम्, मथुरानाथकृतरहस्यजयदेवमिश्रकृताऽऽलोकटीकासहितः (चतुर्थो भागः प्रथमपरिच्छेदः); विधिवादादिप्रमाणचतुष्टयप्रामाण्यवादान्तं शब्दखण्डः, मथुरानाथकृतरहस्यजयदेवमिश्रकृताऽऽलोकटीकाभ्यां रघुनाथशिरोमणिकृतेन आख्यातवादेन नञ्वादेन च सहितः (चतुर्थो भागः द्वितीयः परिच्छेदः), परिशोधकः संपादकश्च कामाख्यानाथः, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९९०. (एशियाटिक्सोसायटीसंस्करणस्य १८८४-१९०१ वर्षीयस्य मुद्रणप्रतिकृतिः).

तत्त्वचिन्तामणिव्याख्याप्रकाशः, रुचिदत्तकृतः, संपा. सुखरञ्जनसहा-प्रद्योतकुमार-मुखोपाध्यायौ, जादवपुरविश्वविद्यालयः, १९९१. (बनारस् संस्कृतकालेज्-संस्करणस्य मुद्रणप्रतिकृतिः).

तत्त्वप्रदीपिका, चित्सुखाचार्यविरचिता, नयनप्रसादिनीटीकोपेता, संपा. पं. काशीनाथशास्त्री, निर्णयसागरप्रेस्, मुम्बयी, १९१५.

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, तत्त्वविभावनाव्याख्योपेतः, संपा. वि. ए. रामस्वामी शास्त्रि, नवरङ्ग, नवदेहली, १९९१. (१९३६ वर्षीयस्य अण्णामलै विश्वविद्यालयसंस्कृतसीरिस् सं० ३ संस्करणस्य मुद्रणप्रतिकृतिः).

तत्त्वमुक्ताकलापः वेदान्तदेशिककृतः, स्वोपज्ञसर्वार्थसिद्धिसहितः, वाधूलश्रीनिवासकृतगूढार्थविवृति-सौम्यवरदरामानुजकृतगूढार्थप्रकाश-संपादककृतालभ्यलाभाख्यपूर्णव्याख्यानोपेतः, संपा. टी. वीरराघवाचार्यः, उभयवेदान्तग्रन्थमाला, मद्रास्, १९७३.

तत्त्वरत्नाकरः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतः.

तर्ककौमुदी लौगाक्षिभास्करकृता, संपा. एम्. एन्. द्विवेदी, बनारस्संस्कृत सिरीस् ३२, वाराणसी १८८६.

तर्कताण्डवम् व्यासतीर्थकृतम्, राघवेन्द्रयतिविरचितन्यायदीपसमेतम्, संपा. डि. श्रीनिवासाचार्य-वि. वि. मध्वाचार्यौ, (प्राच्यविद्यासंशोधनालयग्रन्थमाला सं० ७४, ७७, ७९, ८२) मैसूर्, १९३२, ३५, ३८, ४३.

तर्कभाषा केशवमिश्रप्रणीता, तत्त्वप्रबोधिनीव्याख्योपेता, संपा. परमेश्वरनारायणशास्त्री, कृष्णप्रभा प्रकाशन, यल्लापुरम्, १९९५.

तर्कसंग्रहः अन्नम्भट्टविरचितः, गोवर्धनमिश्रकृतन्यायबोधिन्या, मेरुशास्त्रिकृतवाक्यवृत्त्या, जगन्नाथशास्त्रिकृतनिरुक्त्या, पट्टाभिरामशास्त्रिकृतटिप्पण्या, तथा रामरुद्रकृतरामरुद्रीय-रायनरसिंहशास्त्रिकृतनृसिंहप्रकाशिका-नीलकण्ठशास्त्रिकृतनीलकण्ठप्रकाशिका-पट्टाभिरामशास्त्रिकृतपट्टाभिरामप्रकाशिकेतिव्याख्याचतुष्टयसमुपेतस्वोपज्ञतर्कसंग्रहदीपिकया च समेतः, सत्कारिशर्मणा वङ्गीयेन सम्पादितः, (काशीसंस्कृतग्रन्थमाला सं० १८७) वाराणसी, १९६९. (प्रथममुद्रणं बालमनोरमाप्रेस्, मद्रास् १९१६, १९२०).

तात्पर्यवृत्तिविचारः (लेखः), लेखकः वायुनन्दनपाण्डेयः, पृ. १४८-१६९, सारस्वतीसुषमा (संपूर्णानन्दसंस्कृतविश्वविद्यालयानुसंधानपत्रिका), संपा. भगीरथप्रसादत्रिपाठी, वाराणसी, भाद्रपदपूर्णिमा वै. सं. २०३१, सेप्टेम्बर् १९७४.

तैत्तिरीयसंहिता, संपा. टि. एम्. नारायणशास्त्री, शारदाविलासमुद्राक्षरशाला, कुम्भकोणम्, १९३०-१९३१.

त्रिंशच्छ्लोकी चिदम्बरनगरस्थ-अन्नामलैविश्वविद्यालयद्वारा प्रकाशितम्

दर्पणः द्र० वैयाकरणभूषणसारः.

दिनकरीयम् द्र० कारिकावली.

दीपिकाव्याख्या नृसिंहप्रकाशिका द्र० तर्कसंग्रहः.

दीपिकाव्याख्या रामरुद्री द्र० तर्कसंग्रहः.

नागेशः द्र० वैयाकरणसिद्धान्तमञ्जूषा.

निरुक्तम् यास्काचार्यप्रणीतम्, निघण्टुपाठसमुपेतम्, दुर्गाचार्यकृतऋज्वर्थाख्यवृत्त्या समेतम्, टिप्पण्यादिकर्ता महादेव हरि भडकमकरः, संपा. गोविन्दात्मजरामकृष्णः, प्रथमो भागः, (Bombay Sanskrit and Prakrit Series no. 73) भण्डार्कर्प्राच्यविद्यासंशोधनालयः, पुणे, पुनर्मुद्रणम् १९८५. (प्रथमसंस्करणम् १९१८).

निरुक्तभाष्यम् द्र० निरुक्तम्.

नीलकण्ठप्रकाशिका द्र० तर्कसंग्रहः.

नीलकण्ठीयम् द्र० नीलकण्ठप्रकाशिका.

नृसिंहप्रकाशिका द्र० तर्कसंग्रहः.

न्यायकणिका द्र० विधिविवेकः.

न्यायकन्दली द्र० प्रशस्तपादभाष्यम्.

न्यायकुसुमाञ्जलिव्याख्या विस्तरः द्र० न्यायकुसुमाञ्जलिः.

न्यायकुसुमाञ्जलिः उदयनाचार्यकृतः, उत्तमूर् टि. वीरराघवाचार्येण विरचिताभ्यां कुसुमाञ्जलिविस्तरसमाख्यविशदव्याख्यान-विशेषविषयटिप्पणाभ्यां समुल्लासितः,

पुनर्मुद्रणम् (केन्द्रीयसंस्कृतविद्यापीठ-ग्रन्थमाला, सं० ३१) तिरुपतिः, १९८०. (प्रथमप्रकाशनम् तिरुपतिः १९४१).

न्यायकोशः झळकीकरभीमाचार्यरचितः, अभ्यंकरोपाह्ववासुदेवशास्त्रिणा समुपबृंहितः संशोधितश्च, (Bombay Sanskrit and Prakrit Series no. 49) भण्डाकर्प्राच्य-विद्यासंशोधनालयः, पुणे, १९९६. (चतुर्थसंस्करणस्य मुद्रणप्रतिकृतिः).

न्यायकौस्तुभः महादेवपुणताम्बेकरविरचितः, (शब्दपरिच्छेदः) संपा. वे. सुब्रह्मण्य-शास्त्री, (तञ्जावूर्सरस्वतीमहल्ग्रन्थालयग्रन्थावलिः सं० १८८) तञ्जावूर्, १९८२.

न्यायदर्शनम् गोतमकृतम्,

१. (प्रथमो भागः) वात्स्यायनकृतभाष्य- उद्द्योतकरकृतवार्त्तिक-वाचस्पति-मिश्रकृतटीका-उदयनकृतपरिशुद्धिसहितम् (प्रथमाध्यायः), संपा. अनन्त-लाल्ठक्कुरः, मिथिलाविद्यापीठम् (Mithila Institute Series, Ancient Text No. 20), दर्भाङ्गा, १९६७.

२. विश्वनाथीयवृत्ति-वात्स्यायनभाष्यसहितम्, न्यायसूचीनिबन्धोपेतम्, संपा. एल्. एस्. द्रविड, टि. एस्. भण्डारी, वि. पी. द्विवेदी, (काशीसंस्कृत-सिरीस् सं० ४३), वाराणसी १९२०.

न्यायपरिशुद्धिः, वेदान्तदेशिककृता, संपादककृतन्यायतत्त्वप्रकाशिकाव्याख्या-समेता, संपा. टी. वीरराघवाचार्यः, उभयवेदान्तग्रन्थमाला, मद्रास्, १९७८.

न्यायबोधिनी द्र० तर्कसंग्रहः.

न्यायभाष्यम् द्र० न्यायदर्शनम् १.

न्यायभूषणम् भासर्वज्ञकृतम्, स्वोपज्ञन्यायसारव्याख्यानम्, संपा. स्वामी योगीन्द्रा-नन्दः, षड्दर्शनप्रकाशनप्रतिष्ठानम्, वारणसी, १९६८.

न्यायमञ्जरी जयन्तभट्टकृता, संपादककृतन्यायसौरभव्याख्यासहिता, संपा. के. एस्. वरदाचार्यः, (प्राच्यविद्यासंशोधनालयग्रन्थमाला सं० ११६, १३९) मैसूर्, १९७०, ८३.

न्यायरत्नमाला पार्थसारथिमिश्रप्रणीता, रामानुजाचार्यकृतनायकरत्नव्याख्योपेता, संपा. ए. सुब्रह्मण्यशास्त्री, (Library Rare Texts Publication Series No. 4), संपूर्णानन्दविश्वविद्यालयः, वाराणसी १९८२.

न्यायलीलावती वल्लभकृता, वर्धमानकृतप्रकाश-शंकरमिश्रकृतकण्ठाभरण-भगीरथ-ठक्कुरकृतविवृतिसहिता, संपा. हरिहरशास्त्रि-ढुण्ढिराजशास्त्रिणौ, (चौखम्बा-संस्कृतसिरीस् सं० ६४), पुनर्मुद्रणं वाराणसी, १९९०.

न्यायवार्त्तिकम् द्र० न्यायदर्शनम् १.

न्यायवार्त्तिकतात्पर्यटीका वाचस्पतिविरचिता,

१. द्र० न्यायदर्शनम् १ (प्रथमाध्यायपर्यन्तम्)

२. संपा. राजेश्वरशास्त्रिद्रविडः, (चौखम्बासंस्कृतग्रन्थमाला सं० २४) वाराणसी, १९२५.

न्यायवार्त्तिकटीकापरिशुद्धिः द्र० न्यायदर्शनम् १.

न्यायसुदर्शनम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

न्यायसुधा जयतीर्थविरचिता, (आनन्दतीर्थविरचितानुव्याख्यानटीका), विद्याधीश-तीर्थविरचितवाक्यार्थचन्द्रिका-सत्यव्रततीर्थविरचितसुधाविवृति-राघवेन्द्रयतिकृत-परिमल-यदुपत्याचार्यकृतसुधाटिप्पणी-श्रीनिवासतीर्थकृतटीकाऽधृतसुधावाक्यार्थ-विवरण-मन्नारीकृष्णाचार्यविरचितचषक इति षट्टिप्पणीभिः समेता, (षड्-भागेषु) मध्वसिद्धान्ताभिवृद्धिकारिणीसभा, उत्तरादिमठः, बेङ्गलूर्, १९८२.

न्यायसुधा (राणकम्) द्र० मीमांसादर्शनम् २.

न्यायसूत्राणि द्र० न्यायदर्शनम् १, २.

पञ्चपादिका पद्मपादकृता, चित्सुखकृततात्पर्यदीपिका-प्रकाशात्मकृतविवरण-नृसिंहाश्रमकृतभावप्रकाशिका-आत्मस्वरूपकृतप्रबोधपरिशुद्धि-विज्ञानात्मकृत-तात्पर्यद्योतिनीव्याख्याभिः सहिता, संपा. एस्. श्रीरामशास्त्रि-एस्. आर्. कृष्ण-मूर्तिशास्त्रिणौ, (Madras Government Oriental Series no. 155) १९५८.

पदवाक्यरत्नाकरः गोकुलनाथोपाध्यायकृतः, जदुनाथमिश्रकृतगूढार्थदीपिका-व्याख्यासहितः, संपा. नन्दिनाथमिश्रः, (सरस्वतीभवनग्रन्थमाला सं० ८८) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९६०.

पदार्थतत्त्वनिर्णयः आनन्दानुभवकृतः, अडयार्ग्रन्थालयस्थमातृका (Adyar MS. D. IX 926).

परिमलः द्र० ब्रह्मसूत्रशांकरभाष्यम्.

पाणिनिसूत्राणि द्र० सिद्धान्तकौमुदी.

पातञ्जलयोगदर्शनम्, वाचस्पतिमिश्रविरचिततत्त्ववैशारदी-विज्ञानभिक्षुकृत-योगवार्त्तिकविभूषितव्यासभाष्यसमेतम्, संपा. नारायणमिश्रः, भारतीय विद्या प्रकाशन, वारणासी, १९७१.

पुण्यराजः द्र० वाक्यपदीयम्.

प्रकरणपञ्चिका, शालिकनाथविरचिता, जयपुरनारायणभट्टकृतव्याख्यया संपादककृतटिप्पण्या च समेता, संपा. ए. सुब्रह्मण्यशास्त्री, धर्मविज्ञानसंकायः, बनारसहिन्दूविश्वविद्यालयः, वाराणसी, १९६१.

प्रकाशः द्र० तत्त्वचिन्तामणिव्याख्याप्रकाशः.

प्रकाशः द्र० व्युत्पत्तिवादः २.

प्रज्ञापरित्राणम्, न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

प्रदीपः (महाभाष्यप्रदीपः) द्र० महाभाष्यम्.

प्रभा द्र० कारिकावली.

प्रमाणसमुच्चयः हिस्टरी आफ् इण्डियन् लाजिक् ग्रन्थे उद्धृतः. सतीशचन्द्रविद्याभूषणः, पुनर्मुद्रणम् दिल्ली, १९७१. (प्रथममुद्रणम् कल्कत्ता, १९२१).

प्रशस्तपादभाष्यम् (पदार्थधर्मसंग्रहाख्यम्), श्रीधरभट्टप्रणीतया न्यायकन्दलीव्याख्यया संवलितम्, संपा. हिन्दीभाषानुवादकश्च दुर्गाधरझाशर्मा, वारणासेयसंस्कृतविश्वविद्यालयः, (गङ्गानाथझाग्रन्थमाला सं० १) वाराणसी, १९६३.

प्रौढमनोरमा भट्टोजिदीक्षितप्रणीता, (अव्ययीभावान्ता) हरिदीक्षितविरचितलघुशब्दरत्नव्याख्यया, भैरवमिश्रविरचितशब्दरत्नप्रकाशिका(भैरवी)व्याख्यया च समलङ्कृता। सभापतिशर्मोपाध्यायनिर्मितरत्नप्रभानामकटिप्पण्या च विलसिता, चौखाम्बा संस्कृत सीरज आफीस्, बनारस, १९८३.

बृहट्टीका कुमारिलभट्टकृतत्वेन व्याख्यानेषूदाहृता.

बृहती, प्रभाकरमिश्रप्रणीता (शाबरभाष्यव्याख्या) शालिकनाथमिश्रप्रणीतऋजुविमलापञ्चिकया सहिता (तर्कपादान्ता), संपा. शे. कृ. रामनाथशास्त्री, (मद्रपुरीयविश्वविद्यालयग्रन्थावलिः सं० ३) (प्रथमो भागः) मद्रास्, १९३४.

बृहद्वैयाकरणभूषणम् श्रीमत्कौण्डभट्टविरचितम्, (श्रीमद्भट्टोजिदीक्षितकृत-वैयाकरणमतोन्मज्जनव्याख्यात्मकम्), संपादककृतरूपालीटिप्पणीपरिशिष्टादिभिस्समेतम्, संपा. श्रीमनुदेवभट्टाचार्यः, (हरजीवनदासप्राच्यविद्याग्रन्थमाला सं० २) चौखम्बा अमरभारती प्रकाशन्, वारणासी, १९८५.

बृहन्मञ्जूषा नागेशभट्टविरचिता, कालिकाप्रसादशुक्लमहोदयेन संपादिता। वारणासीस्थसंपूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाशिता, १९७७.

ब्रह्मसूत्राणि द्र० श्रीभाष्यम्.

ब्रह्मसूत्रशांकरभाष्यम्, वाचस्पतिमिश्रकृतभामती-अमलानन्दकृतकल्पतरु-अप्पय्य-दीक्षितकृतपरिमळसहितम्, संपा. अनन्तकृष्णशास्त्री, वासुदेवलक्ष्मणपणशीकरः च, चौखम्बासंस्कृतसिरीस्आफीस्, वाराणसी, १९८२. (१९१७ वर्षीयस्य निर्णयसागरप्रेस्संस्करणस्य मुद्रणप्रतिकृतिः).

भट्टिकाव्यम् (भट्टिकविप्रणीतम्) अन्वितार्थप्रकाशिकाभिधया टीकया विभूषितम्। चौखाम्बा संस्कृतसंस्थानम्, वारणासी। १९८९-९१.

भागवतम् महर्षिवेदव्यासप्रणीतम्, (मूलमात्रम्)

१. (काशीसंस्कृतसिरीस् सं० २५५) वाराणसी, १९८७, (निर्णयसागर-प्रेस्संस्करणस्य मुद्रणप्रतिकृतिः).

२. गीताप्रेस्, गोरखपुर, वि.सं. २०५४.

भाट्टकौस्तुभः द्र० मीमांसाकौस्तुभः.

भाट्टचिन्तामणिः गागाभट्टविरचितः, संपा. सूर्यनारायणशुक्लः, (चौखाम्बासंस्कृत-सिरीस् सं० २५, २७) वाराणसी, १९३३, १९३८.

भामती द्र० ब्रह्मसूत्रशांकरभाष्यम्.

भूषणसारः द्र० वैयाकरणभूषणसारः.

मथुरानाथीयम् द्र० तत्त्वचिन्तामणिः.

महाभाष्यम् पतञ्जलिकृतम्, कैयटप्रणीतभाष्यप्रदीप-नागेशकृतोद्द्योतसहितम्, संपा. भार्गव शास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं० २३) (षड्भागेषु) चौखम्बा-संस्कृतप्रतिष्ठान, देहली, १९९१. (निर्णयसागरप्रेस् संस्करणस्य मुद्रणप्रतिकृतिः).

मीमांसाकोषः केवलानन्दसरस्वतीकृतः, (सप्तभागेषु) प्राज्ञपाठशालामण्डलम्, वाई, १९५२-६६.

मीमांसाकौस्तुभः श्रीखण्डदेवविरचितः, संपा. अ. चिन्नस्वामिशास्त्रि-पट्टाभिराम-शर्माणौ, (चौखम्बासंस्कृतग्रन्थमाला सं० ५८) वाराणसी, १९२४-१९३३.

मीमांसादर्शनम् जैमिनिकृतम्,

१. श्रीवैद्यनाथशास्त्रिकृतप्रभाव्याख्या-कुमारिलकृततन्त्रवार्त्तिक-टुप्टीका-समेत-शाबरभाष्योपेतम्, संपा. सुब्बाशास्त्री, (आनन्दाश्रमसंस्कृतसिरीस् सं० ९७) (पञ्चभागेषु) पुणे, १९२९-१९३४.

२. श्रीमद्गोविन्दमुनिकृतभाष्यविवरण-कुमारिलकृततन्त्रवार्त्तिक-भट्टसोमेश्वर-कृत-न्यायसुधोपेतशाबरभाष्योपेतम्, संपा. महाप्रभुलालगोस्वामी, तारा प्रिण्टिङ्ग वर्क्स्, (भागचतुष्टयम्) वाराणसी, १९८४.

मीमांसान्यायप्रकाशः आपदेवकृतः, चिन्नस्वामिकृतसारविवेचिनीव्याख्यासहितः, संपा. एम्. आर्. दीक्षितः, (हरिदाससंस्कृतसिरीस् सं० २५) वाराणसी, १९२५.

मीमांसाबालप्रकाशः शंकरभट्टकृतः, संपा. मुकुन्दशास्त्री, (चौखाम्बासंस्कृतसिरीस् सं० १६) वाराणसी, १९०२.

मीमांसावार्त्तिकम् द्र० मीमांसादर्शनम्, श्लोकवार्त्तिकम्.

मीमांसासूत्रम् द्र० मीमांसादर्शनम्.

मुक्तावलिः द्र० कारिकावली.

रहस्यम् द्र० तत्त्वचिन्तामणिः.

राममिश्राः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृताः.

रामरुद्रीयम् द्र० तर्कसंग्रहः.

योगसूत्राणि द्र० पातञ्जलयोगदर्शनम्.

योगभाष्यम् द्र० पातञ्जलयोगदर्शनम्.

लघुचन्द्रिका द्र० अद्वैतसिद्धिः.

लघुमञ्जूषा द्र० वैयाकरणसिद्धान्तमञ्जूषा.

लघुश देन्दुशेखरः नागेशभट्टप्रणीतः (अव्ययीभावान्तः) भैरवमिश्रविरचितया च द्रकलाख्यया टीकया समेतः। चौखाम्बा संस्कृत सीरज आफीस्, बनारस, १९८३.

वरदा ष्णुमिश्राः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृताः.

वाक्य दीयम् भर्तृहरिकृतम्, रघुनाथशर्मकृताम्बाकर्त्रीव्याख्यासमेतम्, पदकाण्डे वृ तसमुद्देशे जातिद्रव्यसंबन्धसमुद्देशेषु च रघुनाथशर्मकृताम्बाकर्त्री-हेलाराज-कृ प्रकाशसमेतम्, ब्रह्मकाण्डे हरिवृषभकृतस्वोपज्ञव्याख्या-रघुनाथशर्मकृता-म्बाकर्त्रीभ्यां सहितम्). (सरस्वतीभवनग्रन्थमाला सं० ९१) संपूर्णानन्द-वि विद्यालयः, वाराणासी, १९६३, ६८, ७४.

वाक्य दीयव्याख्या द्र० वाक्यपदीयम्.

वाक्य त्तिः द्र० तर्कसंग्रहः.

वार्त्ति म् (व्याकरणवार्त्तिकम्) द्र० सिद्धान्तकौमुदी, महाभाष्यम्.

वार्त्ति न्यायसुधा द्र० मीमांसादर्शनम् २.

विधि वेकः मण्डनमिश्रकृतः, वाचस्पतिमिश्रकृतन्यायकणिकाव्याख्यासहितः, संपा. म प्रभुलालगोस्वामी, (प्राच्यभारतीग्रन्थमाला सं० ८) रत्ना पब्लिकेशन्स्, व ाणसी, १९७८.

विभक्त र्थनिर्णयः गिरिधरोपाध्यायकृतः, संपा. जीवनाथमिश्रः (चौखाम्बासंस्कृत-रि ीस् सं० १२) वाराणसी, १९०२.

विवर ाम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

विवर ाम् द्र० काव्यप्रकाशः.

विस्त : द्र० न्यायकुसुमाञ्जलिः.

विस्त : द्र० जैमिनीयन्यायमालाविस्तरः.

वेदान्त परिभाषा, धर्मराजाध्वरीन्द्रविरचिता, अमरदासकृतमणिप्रभा-रामकृष्णाध्वरि-कृ शिखामण्युपेता, संपा. स्वामिगोविन्दसिंहसाधुः, वेंकटेश्वरप्रेस्, मुम्बई, १९ ५. (१९२८ वर्षीयस्य तृतीयसंस्करणस्य पुनर्मुद्रणम्).

वेदार्थ ग्रहः रामानुजाचार्यकृतः, सुदर्शनकृततात्पर्यप्रदीपिकासहितः, संपा. के. वि. ए . सुदर्शनाचार्यः, तिरुमलतिरुपतिदेवस्थानम्, तिरुपति, १९५३.

वैद्यनाथशास्त्री द्र० मीमांसादर्शनम् १.

वैद्यनाथीयम् (शाबरभाष्यव्याख्या) द्र० मीमांसादर्शनम् १.

वैयाकरणभूषणम् द्र० बृहद्वैयाकरणभूषणम्.

वैयाकरणभूषणसारः कौण्डभट्टविरचितः, बालकृष्णपञ्चौलीकृतप्रभा-श्रीहरिवल्लभ-शास्त्रिकृतदर्पणाख्यव्याख्याद्वयोपेतः, संपा. श्रीबालकृष्णपञ्चौली, (काशीसंस्कृत-ग्रन्थमाला १८८) वाराणसी, १९६९. (द्वितीयसंस्करणम्).

वैयाकरणसिद्धान्तमञ्जूषा श्रीनागेशभट्टविरचिता, दुर्बलाचार्यविरचितकुञ्जिका-बालम्भट्टविरचितकला इति टीकाद्वयेन संवलिता, संपा. माधवशास्त्रिभण्डारि-मदनमोहनपाठकौ (तस्याः शक्तिप्रकरणमारभ्य स्फोटप्रकरणपर्यन्तः प्रथमो भागः), (चौखाम्बासंस्कृतग्रन्थमाला सं० ४४) वाराणसी, १९१३-१९२६. (पुनर्मुद्रणम् १९८९).

वैशेषिकदर्शनम् कणादमुनिप्रणीतम्, उत्तमूर्वीरराघवाचार्यविरचितरसायनाख्य-व्याख्योपेतम्, प्रकाशकाः वि. एस्. वेंकटराघवाचार्य इत्यादयः, मद्रास्, १९५८.

व्युत्पत्तिवादः गदाधरभट्टाचार्यकृतः,

१. धर्मदत्तझाविरचितगूढार्थतत्त्वालोकसहितः, संपा. कीर्त्यानन्दझा, चौखाम्बा अमरभारती प्रकाशन, वाराणसी, १९७६. (१९११ वर्षीयस्य निर्णय-सागरसंस्करणस्य मुद्रणप्रतिकृतिः).

२. लक्ष्मीनाथशर्मविरचितप्रकाशव्याख्यासहितः, चौखाम्बासंस्कृतसंस्थानम्, वाराणसी, संवत् १९८८.

शक्तिवादः, गदाधरभट्टाचार्यकृतः, हरिनाथटीकोपेतः, संपा. दामोदरशास्त्रि-गोस्वामी, (चौखाम्बासंस्कृतसिरीस् सं० ७७) वाराणसी, १९२९.

शब्दकौस्तुभः भट्टोजिदीक्षितकृतः, जयकृष्णविरचितस्फोटचन्द्रिकासमेतः, संपा. विन्ध्येश्वरीप्रसादद्विवेदि-गणपतिशास्त्रिमोकाटे, (चौखम्बासंस्कृतसिरीस् सं० २) वाराणसी, १८९८-१९१७. (पुनर्मुद्रणम् १९९१).

शब्दमणिः द्र० तत्त्वचिन्तामणिः.

शब्दशक्तिप्रकाशिका, जगदीशतर्कालंकारविरचिता, कृष्णकान्तविद्यावागीशकृत-कृष्णकान्ती-रामभद्रसिद्धान्तवागीशकृतप्रबोधिनीव्याख्यासहिता, संपा. ढुण्ढिराज-शास्त्री, (काशीसंस्कृतसिरीस् सं० ११९) वाराणसी, २००२. (तृतीयमुद्रणम्).

शांकरभाष्यम् द्र० ब्रह्मसूत्रशांकरभाष्यम्.

शाबरभाष्यम् (प्रथमाध्याये प्रथमपादः) द्र० मीमांसादर्शनम् १.

शाब्दतरङ्गिणी, वे. सुब्रह्मण्यशास्त्रिविरचिता, संस्कृत एजुकेशन् सौसैटि, मद्रास्, १९६९.

शाब्दनिर्णयः प्रकाशात्मकृतः, संपा. टि. गणपतिशास्त्री, (त्रिवेन्द्रंसंस्कृतसिरीस् सं० ५३) तिरुवनन्तपुरम्, १९१७.

शास्त्रदीपिका पार्थसारथिमिश्रप्रणीता, सोमनाथप्रणीतमयूखमालिकाव्याख्यासहिता, (प्रत्यधिकरणविभक्तजैमिनीयन्यायमालायुता च), तत्र च प्रथमस्तर्कपादः श्रीमद्रामकृष्णप्रणीतयुक्तिस्नेहप्रपूरणीसिद्धान्तचन्द्रिकाव्याख्यायुक्तः स्वोपज्ञ-सिद्धान्तचन्द्रिकागूढार्थविवरणसहितश्च, सम्पादकः श्रीधर्मदत्तझा (बच्चाझा), कृष्णदास अकादमी, वारणासी, १९८८. (१९१५ वर्षीयस्य निर्णयसागर-संस्करणस्य मुद्रणप्रतिकृतिः).

शिखामणिः द्र० वेदान्तपरिभाषा.

श्रीभाष्यम् रामानुजाचार्यविरचितम्, सुदर्शनसूरिविरचितश्रुतप्रकाशिकाव्याख्या-समेतम्, संपा. उत्तमूर् ति. वीरराघवाचार्यः (भागद्वयम्), उभयवेदान्तग्रन्थ-माला, मद्रास्, १९६७.

श्रुतप्रकाशिका द्र० श्रीभाष्यम्.

श्लोकवार्तिकम् कुमारिलभट्टविरचितम्, पार्थसारथिमिश्रविरचितया न्यायरत्नाकर-व्याख्यया सनाथम्, संपा. परिष्कारकश्च स्वामी द्वारिकादासशास्त्री, (प्राच्य-भारतीग्रन्थमाला सं० १०), तारा पब्लिकेशन्स्, वारणासी, १९७८.

षडर्थसंक्षेपः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतः.

संक्षेपशारीरकम् सर्वज्ञात्मकृतम्, रामतीर्थकृतान्वयार्थप्रकाशिकासहितम्, संपा. बि. एस्. वझे, (काशीसंस्कृतसिरीस् सं० २) वाराणसी, १९१३. पुनर्मुद्रणम्.

सङ्गीतरत्नाकरः शार्ङ्गदेवकृतः, संपादककृताङ्ग्लानुवादसमेतः, संपा. आर्. के. श्रिङ्गि, (प्रेमलतामहाभागाया आध्यक्ष्ये संपादितः) (भागद्वयम्) मोतीलाल बनारसीदास, नवदेहली, १९७८-८९.

सप्तपदार्थी (वैशेषिकप्रकरणम्) शिवादित्यमिश्रप्रणीतम्, रामशास्त्रिणा संशोधितम्, E.J. Lazarus & co काशी १८९३.

सर्वार्थसिद्धिः द्र० तत्त्वमुक्ताकलापः.

सांख्यकारिका, ईश्वरकृष्णविरचिता, वाचस्पतिमिश्रविरचितसांख्यतत्त्वकौमुदी-संपादककृतसारबोधिनीव्याख्यासमेता, संपा. शिवनारायणशास्त्री, निर्णयसागर-प्रेस्, मुम्बयी, १९४०.

सांख्यतत्त्वकौमुदी द्र० सांख्यकारिका.

सांख्यसूत्राणि कपिलप्रणीतानि, विज्ञानभिक्षुभाष्य-सटीकतत्त्वसमाससूत्र-सांख्य-सारसमेतानि, सांख्यसूत्रानुवाद-शब्दानुक्रमणी-टिप्पण्यादियुतानि, संपा. राम-शंकरभट्टाचार्यः, भारतीयविद्याप्रकाशनम्, वाराणसी, १९६६.

सिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिता, ज्ञानेन्द्रसरस्वतीकृततत्त्वबोधिनीटीका-जयकृष्णविरचितसुबोधिनीभ्यां सूत्रपाठादिना च समेता, संपा. वासुदेवशर्मा पणशीकरः, मेहरचन्द लछमनदास, नवदेहली, पुनर्मुद्रणम् १९८५.

सोमनाथीयम् द्र० शास्त्रदीपिका.

स्फोटवादः नागेशप्रणीतः, संपा. वि. कृष्णमाचार्यः, (अडयार्संस्कृतसिरीस् सं० ५५) १९४६.

स्फोटसिद्धिः मण्डनमिश्रकृता, संपा. एन्. आर्. भट्ट-टि. रामानुजौ, अनुवादिका. एम्. बियार्दो, (फ्रेञ्च् इन्स्टिट्यूट् इण्डालजि सिरीस् सं० १३) पाण्डिचेरी, १९५८.

हेलाराजः द्र० वाक्यपदीयम्.

सुबन्तपदार्थविचारे उदाहृतानां श्लोकानामकारादिक्रमेण सूची

अनागमश्च सोऽभ्यासः (वा.प.)	53
अनेकार्थस्य शब्दस्य (का. प्र.)	113
अन्यथैवाग्निसंबन्धात् (न्या.म.)	129
अन्ये पूर्वापरीभूत (न्या.म.)	132
अन्वयव्यतिरेकाभ्यां (त.वा.)	139
अप्राधान्यं विधेर्यत्र	257
अबुधान्प्रत्युपायाश्च (वा.प)	351
अभावो वा तदर्थोऽस्तु	265
अभिधानाभिधेयत्वम् (न्या.प.)	86
अभिधार्थावगत्यात्मा (न्या.प.)	86
अभियुक्ताश्च ये तत्र	205
अमादेशं विना श्रूयमाण (श.श.प्र)	331
अम्बाम्बेति यदा बालः (वा.प.)	203, 207
अम्माम्मेति यदा बालः (वा.प.)	16
अवजानासि मां यस्मात् (रघुवंश.)	420
अषष्ठ्यर्थबहुव्रीहौ (भू.सा.का.)	314
असाधुरनुमानेन (वा.प.)	50, 207
असावुदयमारूढः	216
अस्यायं वाचको वाच्यः (वा.प.)	49
आख्यातं तद्धितार्थस्य (वा.प.)	366
आख्यातशब्दे भागाभ्यां (वा.प.)	416
आजानिकश्चाधुनिकः (श.श.प्र)	178
आनन्त्यव्यभिचाराभ्यां (त.वा.)	139
आनन्त्येऽपि हि भावानां (त.वा.)	196
इन्द्रियाणां स्वविषयेषु (वा.प.)	15, 23, 49, 102
उत्तरार्थान्वितस्वार्थ (श.श.प्र)	330
उपकारः स यत्रास्ति (वा.प.)	34

उपकृतं बहु नाम किमुच्यते 80
उभयावृत्तिधर्मेण (श.श.प्र) 177
उपसर्गवशाद्धातुः 133
उपसर्गेण धात्वर्थो 232
उपसर्गो विंशतिरर्थवाचकाः 240
एकं द्विकं त्रिकं चाथ (भू.सा.का.) 194
एकयोक्त्या पुष्पवन्तौ (अमर.) 386
एवं साधौ प्रयोक्तव्ये (वा.प.) 16, 207
कर्णाकर्णि प्रथितमयशः 371
कारकैकोपपदकः (श.श.प्र) 352
क्रमिकं यन्नामयुगं (श.श.प्र) 348
क्रियावाचकमाख्यातं (प्रातिशाख्य.) 240
क्वचित् संभविनो भेदाः (वा.प.) 239
गच्छ गच्छसि चेत् कान्त 113
गम्यमानस्य चार्थस्य 195
गुणं शुक्लादिशब्दास्कैं 132
गुणैकनियतास्तावत् 132
गौरित्युच्चरिते सप्त (त.वा.) 138
ग्राह्यत्वं ग्राहकत्वं च (वा.प.) 199
चकारादिनिषेधोऽथ 301, 312
चङ्क्रम्यमाणोऽधीष्वात्र (वा.प.) 415
चतुर्विधे पदे चात्र (त.वा.) 228, 232
चन्द्रे कलङ्कः सुजने दरिद्रता 377
जहत्स्वार्था तु तत्रैव 214
जातावस्तित्वनास्तित्वे (मण्डन.) 161, 170
जातिं व्यक्त्या विहीनां (त.मु.क) 192
जातिद्रव्यगुणस्पन्दैः (श.श.प्र) 176
जातिमेवाकृतिं प्राहुः (त.वा.) 121
जातौ शक्तिर्लघुत्वात् (त.मु.क) 193
जात्यवच्छिन्नसंकेत (श.श.प्र) 177
ज्ञानं प्रयोक्तुर्बाह्योऽर्थः (वा.प.) 45
ज्येष्ठपुत्रदुहित्रोश्च 385

तत्तन्मानुषतुल्योऽसौ 385
तत्सादृश्यमभावश्च 259, 265, 278
तथान्यत्र निपातेऽपि (भू.सा.का.) 229
तदतद्गुणसंविज्ञानौ (श.श.प्र) 361
तद्धितेन चतुर्थ्या वा (त.वा.) 401
तद्वतो नास्वतन्त्रत्वात् (न्या.म.) 128
तयोरर्थाभिधाने हि (त.वा.) 228, 232
तादृशार्थावगाहित्व 16
तेन तल्लक्षितव्यक्तेः (त.वा.) 141, 195
तेषां न द्रव्यपर्यन्ता (न्या.म.) 132
ते साधुष्वनुमानेन (वा.प.) 16, 207
दशैते राजमातङ्गाः 342
दैवी वाग्व्यवकीर्णेयं (वा.प.) 51
द्योतकाः प्रादयो येन (भू.सा.का.) 228
द्वितीयादिसुबर्थस्य (श.श.प्र) 339
द्वौ भेदावस्य शास्त्रोक्तौ (श.श.प्र) 386
धातोः साधनयोग्यस्य (वा.प.) 238
न क्रोधो न च मात्सर्यं 222, 275
न च तत्तादृशं किंचित् (श्लो.वा.) 127
नञ्समासे चापरस्य (भू.सा.का.) 232, 264
न तं विरिञ्चिर्न भवो 223, 275
न शिष्टैरनुमन्यन्ते (वा.प.) 16, 207
न सोऽस्ति प्रत्ययो लोके (वा.प.) 198
न संख्यायां न संख्येये (वा.प.) 371
न हि डित्थत्वसामान्यं (न्या.म.) 131
न हि तत्करणं लोके (श्लो.वा.) 13
नामाख्यातमुपसर्गो (प्रातिशाख्य.) 240
निपातत्वं परेषां यत् 234
निपाता द्योतकाः केचित् (वा.प.) 240
निपातानां वाचकत्वं (भू.सा.का.) 233
नियोगेन विकल्पेन (त.वा.) 138
निरुक्ता प्रकृतिर्द्वेधा (श.श.प्र) 175

पक्वयद्भोजनं रम्यं (श.श.प्र) 350
पदार्थः सदृशान्वेति (भू.सा.का.) 230
पदैकदेशरचना (का.प्र.) 415
पर्युदासः स विज्ञेयः 263
पूर्वमध्यान्तसर्वान्य (श.श.प्र) 326
प्रतिपत्तिर्भवत्यर्थे (वा.प.) 46
प्रतिपादकतामात्रं (वा.प.) 16
प्रतियोगिपदादन्यत् 309, 323
प्रयोगचोदनाभावात् (त.वा.) 138
प्रयोगार्हेषु सिद्धः सन् (वा.प.) 239
प्राप्य गाण्डीवधन्वानं 410
बहुव्रीहिः स्वगर्भार्थ (श.श.प्र) 355
बहूनां वृत्तिधर्माणां 301
बुद्धिस्थादभिसंबन्धात् (वा.प.) 238
मथ्नामि कौरवशतं (वेणीसंहार.) 277
मातापिररौ पितरौ (अमर.) 386
मात्सर्यमुत्सार्य विचार्य कार्यं 371
मुख्यार्थबाधे तद्योगे (का.प्र.) 79
मृधं कियच्छत्रकदण्ड 371
यः स्वार्थघटकार्थस्य (श.श.प्र) 361
यत्राकृतिस्तत्र गुणा वसन्ति 121
यत्रान्या ओषधयो म्लायन्ते 61
यन्न दुःखेन संभिन्नं 61
यत् साधकतमत्वेन (श्लो.वा.) 12
यथा विध्यन्तपर्यन्तो (न्या.म.) 130
यदीयेन सुबर्थेन (श.श.प्र) 338
यदुत्तरपदं नाम (श.श.प्र) 352
यद्यदाकाङ्क्षितं योग्यं (प्र.पं.) 211
यद्वाधुनिकसंकेत (श.श.प्र) 178
यस्यैकं प्रथमान्तं सत् (श.श.प्र) 359
यादृशस्य महावाक्य (श.श.प्र) 299
येन स्वार्थाविरोधेन 133

येन स्वीययदर्थस्य (श.श.प्र) 176
योगलभ्यार्थमात्रस्य (श.श.प्र) 212
राजनारायणं लक्ष्मीः 84
रूढं च लक्षकं चैव (श.श.प्र) 176, 210
रूढं संकेतवन्नाम (श.श.प्र) 176, 210
रूढ्यर्थभिन्ने योगार्थ (श.श.प्र) 211
रूढ्यर्थेऽन्यत्र वा यत्र (श.श.प्र) 212
लकृत्यक्तखलर्थानां (वा.प.) 411
लक्ष्यमाणगुणैर्योगात् 111
लिखन्नास्ते भूमिं (का.प्र.) 415
लिङ्गकारकसंख्याभिः (त.वा.) 138
वर्जयन्त्या शनैः सङ्गं (शिशुपालवध.) 279
वसन्ते सर्वसस्यानां 61
वाक्यभावमवाप्तस्य (श.श.प्र) 223
वाच्यस्यार्थस्य वाक्यार्थे (प्र.पं.) 62
विभक्तिमात्रप्रक्षेपात् (काशिका.) 327
व्यक्तिः शब्दैर्न बोध्या (श.श.प्र) 193
व्यक्तिवाचित्वपक्षे तु (त.वा.) 139
व्यक्त्याकृत्योरभेदाच्च (त.वा.) 139
शक्तिग्रहं व्याकरणोपमान 60
शब्दः कारणमर्थस्य (वा.प.) 53
शब्दैरेव प्रतीयन्ते (श.श.प्र) 176
शरीरात्ममनोयोगात् 13
शरैरुस्त्रैरिवोदीच्यान् 231, 241
शाब्दव्यापारतो यस्याः (अभिधानवृत्ति.) 103
श्यालाः स्युर्भ्रातरः पत्न्याः (अमर.) 383
[illegible]स्य यायादयमर्भकः (रघुवंश.) 52
[illegible]रिवार्थं स्मृतिरन्वगच्छत् (रघुवंश.) 329
[illegible]कलकलं पुरमेतत् 82
[illegible]कृतो द्विविधो नित्यः (प.वा.र.) 17
[illegible]ख्या तु व्यञ्जकाभावात् 327
[illegible]ख्याशब्दयुतं नाम (श.श.प्र) 352

स चायं षड्विधः (श.श.प्र) 326
सतां च न निषेधोऽस्ति (खण्डन.) 270
सत्वे निविशतेऽपैति (म.भा.) 58
समासस्तु चतुर्धेति (भू.सा.का.) 328
समासे खलु भिन्नैव (भू.सा.का.) 310
समुदायेन संबन्धः (वा.प.) 301
संबन्धशब्दे संबन्धो (वा.प.) 52
संबन्धिशब्दः सापेक्षः (वा.प.) 301
सर्वं समञ्जसं ह्येतत् (त.वा.) 140
स वाचको विशेषाणां (वा.प.) 239
सहभावविवक्षायां 373
साधयन्ती सखि सुभगं 97
साध्यत्वेन क्रिया तत्र (वा.प.) 416
सामासिकं तद्धितान्तं (श.श.प्र) 212
साहेति सहि सुहंअ 97
सुपां सुपा तिङा नाम्ना (भू.सा.का.) 328, 330
स्थादिभिः केवलैर्यत्र (वा.प.) 239
स्वान्तर्निविष्टद्वित्र्यादि (श.श.प्र) 361
स्वान्तर्निविष्टशब्दाभ्यां (श.श.प्र) 354
स्वान्तर्निविष्टशब्दार्थ (श.श.प्र) 210
स्वार्थान्वितसमाहार (श.श.प्र) 354
स्वार्थे शब्दान्तरार्थस्य (श.श.प्र) 221
स्वार्थो द्रव्यं च लिङ्गं च 398
हस्ताहस्तिमिषात् 371

विवृतानां पदानां सूची

अजहत्स्वार्था 309
अजहत्स्वार्था लक्षणा 90, 91
अतद्गुणसंविज्ञानः 363, 361, 367, 370
अतिशायनम् 409
अत्यन्तायोगव्यवच्छेदः 283, 297
अधिकत्वम् 295
अधिकरणसिद्धान्तः 151
अधिकसंखयाकत्वम् 296
अनवस्थानम् 118
अनित्यसमासः 327
अनुबन्धः 116
अनुमतिः 288
अनुमानेन 207
अन्त्यपदप्रधानः 326
अन्त्यपदार्थप्रधानः 326
अन्ययोगः 283
अन्ययोगव्यवच्छेदः 283, 297
अन्योन्याभावत्वम् 261, 262
अपत्यम् 399
अपद्रव्यम् 349
अपितुशब्दार्थः 297
अपेक्ष्यशब्दार्थः 293
अभिधा 17, 33, 60, 86, 112
अभिभावः 419
अभियक्ताः 205
अभ्यावृत्तिः 411
अयोगव्यवच्छेदः 284, 299
अवच्छेदकः 154
अवधारणम् 282
अवधित्वम् 294
अव्यपवर्गः 134
अव्ययीभावः 329, 330, 331
असधात्वर्थः 287
आकारशब्दार्थः 292
आकृतिः 119, 119, 120, 179.121
आख्यातार्थः 287
आख्यातिकी 116
आजनिकः 177
आधिपत्यम् 118
आधुनिकः 177
इतिपदार्थः 40
इतिशब्दार्थः 287
उत्तरपदद्विगुः 315
उपचारः 86, 111
उपपदसमासः 351
उपलक्षणम् 196
एकक्रियान्वयित्वम् 382
एकपक्षीभावः 54
एकार्थीभावः 302
एवकारार्थः 280, 282, 283, 286, 298
औत्पत्तिकः 55
औपाधिकम् 177
औपाधिकी 176
कर्मधारयः 348, 351
कलहः 346
किंतुशब्दार्थः 297
केवललाक्षणिकम् 306

क्तप्रत्ययार्थः 415
क्त्वार्थः 417
गुणः 58
गोत्रापत्यम् 399
गौणी 56
गौणी लक्षणा 95
गौणी वृत्तिः 92, 111
गौरवम् 294
ग्रन्थकारसंबोधनकर्मत्वम् 288
चार्थः 235
चेच्छब्दार्थः 288, 289
जहत्स्वार्था 309
जहत्स्वार्था लक्षणा 90, 95
जहदजहल्लक्षणा 91
जातिः 93, 119, 120
णमुलर्थः 417, 419
तत्पदशक्यत्वम 33
तत्पुरुषः 329, 338
तत्सिद्धिः 92
तद्गुणसंविज्ञानः 361, 362, 367
तद्धितार्थद्विगुः 353
तदाशब्दार्थः 291
तादर्थ्यम् 117
तुमुनर्थः 417
तुल्यद्वारत्वम् 373
तेन रक्तत्वम् 399
त्यागः 116
ददात्यर्थः 293
दर्शनम् 288
देवतात्वम् 402
द्वन्द्वः 329
द्विगुः 353
धारणम् 117
नाम 175
नक्षत्रयुक्तत्वम् 400
नचेतिवाच्यम् 287
नञर्थः 255, 260, 266, 267, 270, 274, 274, 288, 290, 254, 259, 265, 266, 269, 273
नञर्थाः षट् 261, 267, 280, 259, 266, 287, 289, 279
ननुपदार्थः 288
ननुशब्दघटितवाक्यार्थः 288
नित्यसमासः 328
निपातः 220
नियोगः 281
निरूढलक्षणा 111
निर्वर्तयति 237
निर्विकल्पकम् 128
नैमित्तिकम् 177
नैमित्तिकी संज्ञा 176
न्यूनत्वम् 295
न्यूनसंख्याकत्वम् 296
पदम् 115
पदार्थः 14, 178
पदार्थत्वम् 375
परतन्त्रत्वम् 156
परंतुशब्दार्थः 297
परिग्रहः 116
परिभाषा 14, 17
परिशंख्यानम् 16
पर्युदासः 264
पारिभाषिकम् 14, 177
पारिभाषिकी संज्ञा 176
पूर्वपदप्रधानः 326

प्रकारः 40, 408
प्रख्या 134
प्रजावती 342
प्रतियोगित्वम् 323
प्रबलम् 348
प्रवृत्तिनिमित्तत्वम् 404
प्रशंसा 94
प्रसज्यप्रतिषेधः 258, 264
प्राधान्यम् 322
प्राप्तपदार्थः 303
प्राप्नोत्यर्थः 303
बहुव्रीहिः 328, 355
बुद्धिसिद्धम् 44
भार्यात्वम् 398
भावाः 196
भूमा 94
भेदसंसर्गः 261
मध्यपदप्रधानः 327
मध्येशब्दार्थः 293
मानम् 117
मुख्यार्थः 14, 60
मृद्गवकम् 118
यदिचशब्दार्थः 291
यदिशब्दार्थः 291
यद्यपिशब्दार्थः 289
यद्वापदार्थः 289
युवापत्यम् 399
योगः112, 117
योगरूढम् 209, 214
योगरूढिः 112
योग्यता 23
यौगिकम् 209, 214
यौगिकरूढम् 215
रूढम् 175, 209, 214
रूढयौगिकंम् 209
रूढिः 112
लक्षणा 62, 67, 69, 70, 71, 72, 77, 86, 100, 103, 104, 105, 106, 107, 110
लक्षितलक्षणा 88, 89
लिङ्गसमवायः 94
वर्जयित्वापदार्थः 295
वर्णेषु चरमत्वम् 288
वषट्कर्ता 316
वाक्यव्यापारः129
वाचकः 14, 18,
वाच्यः 14, 18
वाच्यशब्दार्थः 288
विकल्पोत्तरसप्तम्यर्थः 297, 298
विग्रहः 366
विध्यन्तः 129
विध्यादिः 129
विनापदार्थः 287
विभागेन 229
विशिनष्टि 237
विशेषणार्थः 119
विशेष्यः 40
विहायपदार्थः 295
वृत्तम् 117
वृत्तिः 14, 112
वृत्तिधर्माः310
वृद्धिः116
वैलक्षण्यम् 297
व्यक्तिः 116, 119, 120
व्यञ्जना 113

व्यतिरेकः 235
व्यपेक्षा 302
व्यवच्छेदः 286
व्यापकत्वम् 233
शक्तिः 14, 15, 23
शुद्धा लक्षणा 95
श्येनचित् 124
संसर्गाभावत्वम् 261, 262
सकर्मकत्वम् 228, 229
संकेतः 3, 5, 33
संगतिः 15
संज्ञा 175
सत्त्वव्यवस्थानम् 118
संनिधिः 116
संनिहितत्वम् 315
सप्तम्यर्थः 287, 288
समयः 2, 53
समर्थम् 310
संबन्धत्वम् 20
संबन्धलक्षणम् 19
समासः 299, 300
समासत्वम् 329
समानाधिकरणस्य 308
समाहारद्विगुः 355
सर्वपदप्रधानः 327
सविकल्पकम् 128
सहचरणम् 117
सहशब्दार्थः 331
सादृश्यम् 243, 244, 247
साधनम् 118
साधनयोगः 236
साधुः 204
साधुत्वम् 202, 203, 205, 208
सापेक्षत्वम् 323
सामयिकः 53
सामीप्यम् 117
सारूप्यम् 93
साहित्यम् 374, 382
स्त्रीत्वम् 397
स्थानम् 117
स्वतो व्यावृत्तः 140

सुबन्तपदार्थविचारे व्युत्पत्तीनामकारादिक्रमेण सूची

अनन्यलभ्यः शब्दार्थः 335
नामार्थे विभक्तीनां स्वार्थान्वयबोधकत्वम् 375
निपातातिरिक्तनामार्थयोरेव भेदेनान्वयः 244
निपातातिरिक्तनामार्थयोः भेदेनान्वयः अव्युत्पन्नः 390
निपातातिरिक्तनामार्थस्यैव धात्वर्थे भेदेनान्वयोऽव्युत्पन्नः 230
पदार्थतावच्छेदकधर्मसमानाधिकरणस्वार्थबोधकत्वं विभक्तेः 376
पदार्थः पदार्थेनान्वेति, न तु तदेकदेशेनेति न्यायः क्रियातिरिक्तविषयकः 417
प्रकृतिप्रत्यययोः संभूयार्थबोधकत्वम् 252
प्रकृत्यर्थे एव सुपः संख्याबोधकत्वम् 358
प्रकृत्युपस्थापितार्थे विभक्त्यर्थान्वयनियमः 73
प्रतियोग्यधिकरणाभ्यामभावो निरूप्यते 278
प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ 253
प्रत्ययानां प्रकृतितात्पर्यविषयार्थान्वितस्वार्थबोधकत्वम् 106
प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् 89, 224, 228, 231, 252, 315, 336, 338, 361, 395
प्रत्ययानां प्रकृत्युपस्थापितार्थान्वितस्वार्थबोधकत्वम् 106
प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वम् 313
प्रत्ययानां संनिहितपूर्वपदार्थगतस्वार्थबोधकत्वम् 363
प्रत्यर्थं शब्दनिवेशः 135
प्रसक्तं हि प्रतिषिध्यते 260
प्रातिपदिकार्थयोः विभक्त्यर्थमद्वारीकृत्य भेदसंबन्धेन नान्वयः 226
भिन्नाभ्यां प्रातिपदिकाभ्यामुपस्थितयोरेव न भेदेनान्वयः 304
यः शिष्यते स लुप्यमानार्थाभिधायी 193
यत् ज्ञानं यत्पदाभिलप्यं तत् तत्पदजन्यबोधविषयतासमानविषयताकम् 40
यद्रूपवत्त्वेन गृहीते संबन्धज्ञानमेकसंबन्धिज्ञानेन तेनैव रूपेणापरसंबन्धिनः स्मृतिः 108
विग्रहसमासयोः समानविषयकबोधजनकत्वमित्येव नियमः, न तु समानप्रकारक-बोधजनकत्वमिति 341
विग्रहसमासयोरनतिरिक्तविषयकत्वमिति नियमः 349
विभक्तीनां योग्यतादिमत्प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वम् 376

विभक्तीनां समस्यमानपदार्थगतस्वार्थान्वयबोधकत्वम् 374
विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदेनान्वयः 317
विशेषनिषेधस्थले सामान्यविधेः विशेषेतरपरता 258
विशेषनिषेधस्थले सामान्यविधेः विशेषेतरसामान्यपरता 258
विशेष्यविशेषणपदयोः समानवचनकत्वम् 254
विषादे विस्मये हर्षे पौनरुक्त्यं न दुष्यति 223
व्यवसायो यद्विशेष्यको यत्प्रकारकश्च स तद्विशेष्यकत्वेन तत्प्रकारकत्वेन चानुव्यवसाये भासते 40
शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा 99, 100, 110
सकृत् श्रुतं पदं सकृदेवार्थं प्रत्याययति 142, 147
सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति 191, 396
समानाधिकरणप्रातिपदिकार्थयोः अभेदेनान्वयः 227
संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वम् 344
संभेदे नान्यतरवैयर्थ्यम् 223
सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वम् 359
सुपामुद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वम् 391
सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् 161
स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयुञ्जामहे 88
स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा 170

शाब्दबोधार्थमुदाहृतानां पदानां वाक्यानां च सूची

अघटः पटः 264, 341
अङ्गवङ्गकलिङ्गः 372
अज्ञानम् 276
अतिनिद्रम् 332
अत्र ब्राह्मणो नास्ति 278
अत्वं भवसि, अनहं भवामि 265
अद्विजाः 268
अधर्मः 268, 277
अधिकदशाः पुरुषः 357
अधिहरि भक्तिः 331
अधीत्य तिष्ठति 417
अधीत्य तिष्ठति, न तु शयित्वा 417
अनुगङ्गेन संचारः 331
अनुदरा कन्य 268
अनुरूपम् 332
अनुव्यचलन् 328
अनेकराशीन् ऐकध्यं कुरु 409
अन्नमयो यज्ञः 412
अब्राह्मणः 259, 265
अब्राह्मणमानय 343
अभावः 282
अयमनयोः पटुतरः 409
अयमेको गुणः 297
अयमेषां शक्तमः 409
अयुवां भवथ 265
अरविन्दवत् सुन्दरं मुखम् 403
अर्धपिप्पली 326, 391
अव्यत्यतिव्यप्तेः 386
अश्वकः 410
अश्वघासः 345
असर्वः 264
अस्तिक्षीरागौः 356
अहिनकुलम् 392
आग्नेयः 401
आचार्यानी 398
आनन्दमयो ब्रह्म 412
आमतद्भोजनं वृथा 350
आरूढवानरो वृक्षः 355, 359, 390
इति चेन्न 288
इतिहरि 332
ईश्वरमनुभवति 228
ईश्वरोऽयमासीत् 408
उखास्रत् 352
उख्यं मांसम् 400
उत्तानशयः 352
उदीच्याः प्राच्येभ्यःपटुतराः 409
उद्धृतौदना स्थाली 311
उन्मत्तगङ्गम् 332
उपकुम्भम् 330, 351, 399
उपकुम्भादानीतः 331
उपकृष्णम् 331
उपगङ्गेषु पूतत्वम् 331
उपदशं दन्तोष्ठम् 389
उपदशाः 368
उपदशाःशकुनयः 357
उपहतपशुः 311
उपास्येते हरिहरौ 228
ऊढरथः 311

ऋतौ स्वभार्यामुपेयादेव 282
ऋद्धस्यराजमातङ्गाः 332
एकधा कुरु 409
एकपरि 332
ऐन्द्रं हविः 400
कच्छपः 352
कटुतद्रूपमीक्ष्यते 350
कर्णकर्णी 371
काकतालीयम् 410
कापोतकम् 400
कालिदासस्येव यशः 44
कुक्कुटमयूर्यौ 387
कुत्सितकः 410
कुम्भकारः 330, 351, 352
कृतपाकः 322
कृतयोरक्षिपरि व्यर्तत्वम् 331
कृष्णं दर्शको याति 417
कृष्णं द्रष्टुं याति 417
कृष्णाश्रितः 344
कष्णीकरोति 412
केशचूडः 310
केशाकेशि 371
केशाकेशि युद्धम् 331
कौण्डिन्याय दधि न दातव्यम् 258
क्षीरपायी 352
खलेयवं कालः 331
खशयः 352
गगनं गगनाकारम् 244
गज इव गच्छति 246
गजे गजे च मोक्तिकम् 413
गर्दभाः 385
गार्गिः 399
गुडकल्पा द्राक्षा 410
गुडधानाः 310
गृहस्थितिः 339
गृहे निर्मक्षिकम् 330
गोतरः 409
गोमान् 408
गोमान् भविता 408
गोमानासीत् 408
गोरथः 310
घटः पटो न 273
घटत्वम् 407, 405
घटत्वत्वम् 405
घटस्य शुक्लतरं रूपम् 409
घटानधिकरणम् 351
घटो न 254
घटो न पटः 272
घटो नास्ति 268
घटौ 389
घनश्यामः 241, 310
चन्दनतरुः 349
चन्द्र इव मुखम् 243, 244
चन्द्र इव मुखं रमणीयम् 245, 246
चन्द्र इव मुखमाह्लादकम् 240
चन्द्र इव मुखमाह्लादयति 241
चन्द्रचूडः शिवः 360
चित्रगुः 10, 318, 356
चित्रगुमानय 310
चिन्मयं ब्रह्म 412
चेष्टाधिकरणत्वं शरीरलक्षणम् 297
चैत्र एव पचति 280
चैत्रधनम् 389
चैत्रनीतः 339

चैत्रमैत्रौ पचतः 388
चैत्रस्य गुरुकुलम् 322
चैत्रस्य ज्ञानं नास्ति 263
चैत्रस्य दासभार्या 322
चैत्रस्य नप्ता 327
चैत्रस्य पितरौ 386
चैत्रस्येदं, नेदं मैत्रस्य 254
चैत्रस्येव धनम् 286
चैत्रेण गम्यते तमानय 320
चैत्रेणेवायं दृश्यते 282
चैत्रो जलमेव भुङ्क्ते 286
जनता 400
जातो जातो निधनमुपैति 414
जातौ न सत्ता 256
जातौ सत्ता नास्ति 221
ज्ञानमर्थं गृह्णात्येव 22, 283, 284
तण्डुलः शुभ्रः 315
तत्तन्मानुष तुल्यौऽसौ 386
तथा जातीयकः 409
तस्मद्यज्ञे वधोऽवधः 263
तस्य नित्यत्वे घटानयनानन्तरमपि
भूतले घटाभावबुद्धिप्रसङ्गात् 297
तिष्ठदगुकालः 331
त्रिकटु 352
त्रिभुवनम् 353
त्रियमुनं स्नाति 331
त्रिरावृत्ता दश 411
त्र्यङ्गैः स्विष्टकृतं यजति 316
त्वन्मुखं त्वन्मुखेनैव तुल्यम् 281
दक्षिणपूर्वा 356
दण्डादण्डि रणम् 331
दत्तदक्षिणे द्विजः 356
दध्योदनः 345
दर्शनीयं राजपुरुषमानय 322
दीक्षितो न ददाति न जुहोति 276
दुन्दुभी सुन्दरौ 385
दृगब्जेन प्रसन्नेन 345
देवदत्तस्य पुत्रधनं पितृधनं नप्तृधनं 322
देवेष्वेष्विव मनुष्येषु नाम 403
द्रव्यत्वजातौ किं मानमिति चेन्न 289
द्रव्याण्यपेक्ष्य पार्थिवानि
न्यूनसंख्याकानि 296
द्विः पाकः 411
द्विः प्रयोगः 411
द्विः शयितव्यम् 411
द्विः सुकरः 411
द्विगार्ग्यं गच्छतः 331
द्विगार्ग्यं गच्छति 349
द्वित्राः 357, 373
द्वित्राः पवित्राः 357
द्वित्राःरसाः 357
द्विदण्डि प्रहरति 331
द्विदशाः 310, 371
द्विमुद्रो वृषः 353
द्विमुनि त्रिमुनि वा ग्रन्थः 357
द्विरूपम् 353
द्विर्दत्तवान् 411
द्विर्बद्धं सुबद्धं भवति 411
द्विर्भुक्त्वागतः 411
द्विर्वचनम् 411
द्विर्हसितम् 411
द्विवर्षा गौः 353
द्विसुवर्णमुद्रः पशुः 354
दवखदिरत्वम् 407

दवखदिरौ छिन्दी 381, 391
धान्यार्थः 345
न कलंजं भक्षयेत् 279
न क्रोधो न च मात्सर्यं 276
न च पाषाणे गन्धवत्वं
नास्तीति वाच्यम् 287
न तं विरिञ्चो न भवो 276
नतराम् 409
न त्वं पचसि 268
ननु मङ्गलं विघ्नध्वंसं प्रति
समाप्तिं प्रति वा न कारणम् 288
नरो वेदानधीत एव 284
न संदेहः 272
नानुयाजेषु 268
नास्तिक्षीरा गौः 356
नास्माकमेकं प्रियम् 272
नितरां गच्छति 410
नित्यद्रव्याणि विहायवृत्तिमत्वं
साधर्म्यं 295
निर्मक्षिका भूमिः 330
निर्मनुष्यो देशः 330
निषादस्थपतिं याजयेत् 347
निष्कौशाम्बिः 310, 346
नीलं सरोजं भवत्येव 281, 282, 283,
288
नीलघटत्वम् 345, 395
नीलपीतोत्पलं सरः 351
नीलपीतोत्पले रम्ये 357
नीलयद्रस आस्वाद्यः 350
नीलोत्पलम् 345, 395
नीलोत्पलमानय 347
नेक्षेतोद्यन्तमादित्यम् 272
नैकस्तिष्ठति 267
पक्ता 415
पक्कम् 415
पक्कतण्डुश्चैत्रः 356
पक्क यद्भोजनं रम्यं 350
पचति चैत्रः, न पचति चैत्रः 254
पञ्चकृत्वो भुङ्क्ते 411
पञ्चगवधनः पुरुष 354
पञ्चपुली 394
पञ्चभार्या द्रौपदीयं 351
पञ्चमः 407
पञ्चमूली 351
पञ्चषाः पुरुषाः 357
पण्डितकः 410
पतन्त्यनेके जलधेरिवोर्मयः 267
पतितपात्रस्तरुः 356
पदिस्कन्दिस्विदेः 387
परं तु कारणसमुदायवशात्
दृश्यत्वम् 297
परमः सुन्दरः 320
पर्यभूषयत् 328
पाचककः 410
पाचकतर 409
पाञ्चपुरुषिः 353
पाणिपादम् 387
पाणिपादं वादय 381
पार्थ एव धनुर्धरः 282, 287, 299
पार्थिवान्यपेक्ष्य द्रव्याणि
अधिकसंख्याकानि 296
पिक इव रौति 246
पितरौ 386
पीततत्पटयोस्तादात्म्यम् 383

पीतपयस्कं पात्रम् 356
पुत्रकः शतम् 410
पुत्रा 385
पुरुषसिंहः 348
पुरुषाणां मध्ये विष्णुरुत्तम 293
पुष्करिण्यां जलं नास्ति 263
पुष्पवन्तौ 386
पूर्वकायः 326
पूर्वसरः 352
पूर्वोत्तरा 356
पृथिव्यां गन्धो न जले 255, 272
पृथिव्यामेव गन्धः 286
पौषी रात्रिः 400
प्रकृष्टतमः 410
प्रणाल्या प्राप्तोदकः 321
प्रमेयधूमः 349
प्राचार्यः 346
प्राप्तोदकः 307, 320
प्राप्तोदको ग्रामः 303, 304, 310, 362
प्राप्य गाण्डीवधन्वानां विद्धिकौरवकान् स्त्रिय : 410
बहुगुडो द्राक्षा 410
बपुपाचिका 311
ब्णच्छिन्नकरो नरः 356
ब्रह्मभूयम् 352
ब्राह्मणदत्तः 339
ब्राह्मणाय ब्राह्मणाय शतं देहि 414
ब्राह्मणात्वानय 385
भुकत्वैवाहं तृप्तो न तु पीत्वा
भुजाभुजि 371
भूतपूर्वः 330
भतले घट इत्याकारकं ज्ञानम् 292
भूतले घटो नास्ति 255
भूतले न घटः 271
भ्रातरौ 385
मथुरावत् पाटलिपुत्रस्य विस्तारः 403
मथुरावत् पाटलिपुत्रे विस्तारः 403
महाकविः 338
महाविज्ञः 338
माञ्जिष्ठम् 399
मातरपितरौ 386
माषोनं कार्षापणं 345
मासजातः 346, 366
मासपूर्वा 345
मासप्रमितः प्रतिपञ्चन्द्रः 345
मुखं व्यादाय स्वपिति 418
मृगो धावति पश्य 416
मेष्यः 385
मैत्रगतिः 339
मैत्रस्येदं न चैत्रस्य 277
यजतिषु ये यजामहं करोति-नानुयाजेषु 343, 258, 264
यजमानपञ्चमा ऋत्विजः प्रचरन्ति 305
यथावत् ख्यातवृत्ताय 405
यथावत् विहिताध्वराय 405
यथाहरिस्तथा हरः 409
यदि च पर्वते धूमोऽस्ति तदा वह्निः पर्वतेऽस्ति. 291
यदि पर्वते वह्निर्न स्यात् तदा धूमोऽपि न स्यात् 292
यद्यद्विद्याति निर्मला 386
साक्षात्क्रियते अलंक्रियते ऊरीक्रियते शिवः 228
साग्नि अधीते 332
सांकाश्यकानां पाटलिपुत्रकाः अभिरूपतमाः 399

सुवर्णालंकारः 310
सेव्यतेऽनेकया संनतापाङ्गया 267
स्तोकनम्रा स्तनाभ्याम् 338
स्तोकपक्ता 338
स्नातानुलिप्तः 345
स्निग्धस्योपाङ्गं पवित्रत्वम् 331
हंसगमनः 310
हंसौ 384
हरी नमस्यौ 384
हस्ताहस्तिमिषात् 371
हस्त्यश्वं धनम 382
हारग्रीवं पश्य 361

ŚĀBDABODHAMĪMĀṂSĀ

PART III - NOMINAL STEMS AND THEIR SIGNIFICANCE

This volume, third in the series under the project *An Inquiry into Indian Theories of Verbal Cognition*, is devoted to an analytical and critical study of nominal stems viz. underived, ending in the *kṛt*, *taddhita* and feminine suffixes, compound words, and indeclinables, according to the schools of *Nyāya*, *Vyākaraṇa*, *Pūrvamīmāṃsā*, *Advaita*, *Viśiṣṭādvaita* and *Dvaita*.

Among the topics dealt with in this volume are: the nature of the relationship between a word and its sense, and its subdivisions (*abhidhā*, *lakṣaṇā*, *gauṇīvṛtti*); the significance of a word, whether denoting a universal (*jāti*), or an individual (*vyakti*), or the specific configuration of an object (*ākṛti*), or the blend of all three; the different forms of primary signification through which a word conveys the conventional sense (*rūḍhī*), etymological sense (*yoga*), the sense which is both conventional and etymological (*yoga-rūḍhī*), and also the conventional and the etymological senses that are different from each other (*yaugika-rūḍhī*).

Since retiring as Vice-Chancellor of the Rashtriya Sanskrit Vidyapeetha of Tirupati, Professor Ramanuja Tatacharya has been associated with the French Institute of Pondicherry as Honorary Professor.

Professor Tatacharya's profound scholarship has earned him many awards, including the Certificate of Honour for Proficiency in Sanskrit conferred upon him by His Excellency the President of India. He was awarded the title of *Darśanakalānidhi* by the Madras Sanskrit College during its Centenary Celebrations.